CC-0. In Public Domain. Digitization by eGangotri

Almira-I
Shelf-4
19

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकं श्रीमद्विष्णुपुराणं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः सजयतिनिरुपमबोधःश्रीधरकारुण्यपूर्णेंदुः विलसतियदुदयवर्धितधीवाधौतत्त्वरत्नश्रीः १ जयतिश्रुतिकावेर्यावाक्यश्रीरंगभासितं विद्यानंतशयंसच्चित्सुखसंज्ञंनिजं महः २ धीश्रीनिदानंगुणरत्नराजितंपराशरज्ञानसुधांबुधिंभजे ह्यद्योहरेर्विष्णुपुराणकौस्तुभोयस्मादभूद्व्यासविधिश्चविश्वदृक् ३ श्रीमद्विष्णुपुराणस्यप्राग्व्याख्याःप्रेक्ष्ययोगिनीः विधीयते स्वधीशुद्ध्यैव्याख्येयंविष्णुवल्लभा ३ जितमिति पुंडरीकाक्षतेतवजितंजयोऽस्त्वित्यर्थः यद्वातेत्वयाजितंसर्वोत्कर्षेणस्थितमिति एतेननमस्कारआक्षिप्तः विश्वभावनविश्वोत्पादक हृषीकाणा मिंद्रियाणामीश तत्प्रवृत्तिनिवृत्तिहेतुत्वात्प्राणस्यप्राणमुतचक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रंमनसोयेमनोविदुरितिश्रुतेः महापुरुषेतिजीवव्यवच्छेदाय महत्त्वंच द्वासुर्पणासयुजासखायावित्यादिश्रुतेः नित्यमुक्तस्वभावत्वाच्च पुरिशरीरेशयनात्तुपुरुषत्वं विश्वोत्पादकत्वेहेतुः पूर्वजेति सृष्टेःपूर्वमेवस्वतःप्रादुर्भूतत्वेनानन्यथासिद्धत्वेनवान्येषांतदधीनत्वात् नन्वेकस्मादेवनमस्कारान्मंगलसि द्धौकृतंबहुभिर्नमस्कारैरितिचेन्न अस्यशास्त्रस्यातिश्रेयःसाधनत्वेनबहुविघ्नसंभावनयामंगलबाहुल्यस्यावश्यकत्वात् अथवापुंडरीकाक्षेत्यादिपंचविशेषणैर्भूतात्माचेंद्रियात्माचप्रधानात्मात थाभवान् आत्माचपरमात्माचत्वमेकःपंचधास्थित इतिपंचमांशोक्तःपंचात्माहरिरीरितइति तत्रपुंडरीकाक्षेतिभूतात्मा विश्वभावनेतिप्रधानात्मा हृषीकेशेतिइंद्रियात्मा महापुरुषेतिपरमा

ॐ नमोभगवतेवासुदेवाय । जितंतेपुंडरीकाक्षनमस्तेविश्वभावन । नमस्तेऽस्तुहृषीकेशमहापुरुषपूर्वज १ सदक्षरं
ब्रह्मयईश्वरःपुमान्गुणोर्मिसृष्टिस्थितिकालसंलयः । प्रधानबुद्ध्यादिजगत्प्रपंचसूःसनोऽस्तुविष्णुर्मतिभूतिमुक्तिदः २

त्मा पूर्वजेत्यात्माभिहितः १ श्रोतृप्रवृत्त्यंगसंबंधंप्रयोजनंचप्रतिपादयितुमाह सदक्षरमिति सोतिप्रसिद्धोविष्णुर्व्यापनशीलोदेशकालस्वरूपतोव्यवच्छेदाभावात् विशतेर्वाविष्णुःप्रवेशन शीलः तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः मतिभूतिमुक्तिदोस्तुमतिभूत्यातत्त्वज्ञानोद्रेकेणमुक्तिदः यद्वा अधिकारिभेदात्मतिमुत्तमांबुद्धिंभूतिमैश्वर्यमुक्तिंचददातीतितथा विष्णुपदस्यप्रवेश नशीलार्थत्वेमूर्त्तत्वंप्राप्तंनिराकरोति ब्रह्मेति पूर्णमित्यर्थः तदपिकुतइत्यतआह तत्सर्वानुस्यूतं इदंसदिदंसदितिसर्वत्रप्रतीयमानत्वात् अनंतमितियावत् अक्षरमितिविकारंनिराकरोति पुमा न्कूटस्थः कुतस्तर्हिमत्यादिप्रदत्वमतआह ईश्वरःकर्तुमकर्तुमन्यथाकर्तुंसमर्थः तदपिकुतइत्यतआह गुणेति गुणाःसत्त्वरजस्तमांसितेषामूर्मयःक्षोभजनिताःसृष्टिस्थितिकालाःकालःसं हारस्तेषांसंलयःसंश्लेषोध्यासोयस्मिन्सतथा सर्वाधिष्ठानत्वेनेश्वरत्वमव्याहतमित्यर्थः ननुप्रधानादेवसृष्ट्यादीतिचेदतआह प्रधानबुद्ध्यादीनांजगत्प्रपंचानांसूःसविता प्रधानस्यानादितयाकथं तज्जनकत्वमितिचेन्न प्रलयेतस्याकिंचित्करत्वेनशक्त्यर्पणद्वाराजननोपचारात् यद्वा प्रधानद्वाराबुद्ध्यादिसूरित्यर्थः यद्वायोविष्णुर्वेदांतिनांसदक्षरंब्रह्मपातंजलानांक्लेशकर्मविपाकाशयैरपरामृष्ट ईश्वरः सांख्यानांपुमान्पुरुषः तदुक्तंकापिलैः नप्रकृतिर्नविकृतिःपुरुषइति समतिभूतिमुक्तिदोस्त्वित्यन्वयः शेषंसमानम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपराशरोमुनिर्गुर्वादिभक्तिंपुरुषार्थसाधनंदर्शयन्मैत्रेयंनिमित्तीकृत्यविष्णुतत्त्वप्रतिपादकंविष्णुपुराणंप्रारभते प्रणम्येति प्रशब्देनभक्तिश्रद्धातिशयोद्योत्यते विश्वेषांब्रह्मादिस्तंबपर्यंतानामी शंप्रवृत्तिनिवृत्तिकारणं प्रकृतशास्त्रेसंप्रदायप्रवर्तकान्प्रणमति ब्रह्मादीनिति ब्रह्मऋभुदक्षपुरुकुत्ससारस्वतप्रभृतीन् गुरुंकपिलंसारस्वतंवापुराणंसर्गःप्रतिसर्गोवंशोमन्वंतराणिवंशानुचरित मितिपंचांगवत्यथायथंप्रथमेंशेसर्गप्रतिसर्गौ द्वितीयेप्रसंगागतंभूगोलंज्योतिश्चक्रम् तृतीयेमन्वंतरं चतुर्थेवंशः पंचमेवंशानुचरितं षष्ठेवैराग्योपयोगिप्रलयादिकमभिधायात्यंतिकप्रलयरूप मोक्षःकथ्यते स्तौति वेदेनसंमितंतुल्यमिति ३ इतिहासोह्यत्रशिष्यप्रश्नएवपुराणप्रवृत्तिहेतुरितिभावः इतिहेत्यव्ययंपारंपर्योपदेशाभिधायितस्यासनमासोवस्थामेतेष्विति इतिहासःपुरावृ त्तानि धर्मार्थकाममोक्षाणामुपदेशसमन्वितं पूर्ववृत्तकथायुक्तमितिहासंप्रचक्षतेइतिस्मृतेः वेदवेदांगपारगं वेदस्यतदंगानांशिक्षाकल्पव्याकरणनिरुक्तच्छंदोज्योतिषांचपारगं धर्मशास्त्रंस्मृ तिः आदिशब्दोन्यायमीमांसादिसंग्रहार्थः धर्मशास्त्रार्थेतिवापाठः वसिष्ठतनयःशक्तिःतस्यात्मजंपुत्रं ४ पराशरमितिपरासोर्मृतकल्पस्यवसिष्ठस्याशरोऽहिंसनंमरणान्निवृत्तिर्यस्मात्तं परानत्र् पूर्वस्यशृणातेरूपं पुराहिपुत्रशोकाकुलितोवसिष्ठोमर्तुमुद्यतःपराशरंगर्भस्थंवेदमुदीरयंतंनिशम्यमरणान्निवृत्तइति मैत्रेयोमित्रयुनाम्नोमुनेःपुत्रः अभिवाद्य सव्येनसव्यस्प्रष्टव्योदक्षिणेनचदक्षि

प्रणम्यविष्णुंविश्वेशंब्रह्मादीन्प्रणिपत्यच। गुरुंप्रणम्यवक्ष्यामिपुराणंवेदसंमितम् ३ इतिहासपुराणज्ञंवेदवेदांगपारगम्। धर्मशास्त्रादितत्त्वज्ञंवसिष्ठत नयात्मजम् ४ पराशरंसुखासीनमृषिंमुनिवरोत्तमं। मैत्रेयःपरिपप्रच्छप्रणिपत्याभिवाद्यच ५ त्वत्तोहिवेदाध्ययनमधीतमखिलंगुरो। धर्मशास्त्राणिस र्वाणिवेदांगानियथाक्रमम् ६ त्वत्प्रसादान्मुनिश्रेष्ठमयाधीतंश्रमःकृतः। वक्ष्यंतेसर्वशास्त्रेषुप्रायशोयेपिविद्विषः ७ सोहमिच्छामिधर्मज्ञश्रोतुंत्वत्तोय थाजगत्। बभूवभूयश्चयथामहाभागभविष्यति ८ यन्मयंचजगद्ब्रह्मन्यतश्चैतच्चराचरम्। लीनमासीत्तथायत्रलयमेष्यतियत्रच ९

णइत्याद्युक्तविधिनानमस्कृत्यप्रणिपत्यदंडवत्प्रणम्य ५ बुभुत्सितमर्थंप्रष्टुमनास्तदनुग्रहमनुवदति त्वत्तोहीति अधीतंकृतं खिलंपरिशिष्टंतद्राहितंयथास्यात् धर्मशास्त्राणिमन्वादीनि इहाधीतमि तिछांदसमेकवचनंवचनव्यत्ययोवा यथाक्रमंवेदाध्ययनानंतरं ६ कृतःश्रमोभ्यासःसर्वशास्त्रेषुयेपिविद्विषस्तेप्यभ्युपपन्नामयावक्ष्यंतेअध्यापयिष्यंतइत्यर्थः कृतश्रममितिपाठेसर्वशास्त्रेषुकृत श्रममधीतिनंमांवक्ष्यंतेव्याचक्षते मामन्येनाकृतश्रममितिपाठेअन्येजनामामकृतश्रमंनवक्ष्यंतइत्यन्वयः ७ प्रसन्नंगुरुंप्रार्थयते सोहमिति सोहंकृतवेदाध्ययनोजगज्जन्मादिपुराणार्थंशुश्रू षेइतिवेदाध्ययनानंतरमेवपुराणाध्ययनकथनाच्छूद्रादीनामिहानाधिकारइतिसूचितं सूतादेर्विलोमजस्याप्यधिकारोनिषादस्थपतिन्यायेनसिद्धःतथाभविष्ये अध्येतव्यंनचान्येनब्राह्मणंक्षत्रियं विना श्रोतव्यमेवशूद्रेणनाध्येतव्यंकदाचनेतिनचवैन्यस्यपृथोर्यज्ञेसमुत्पन्नसूतजातेर्विलोमजत्वाभावान्निषादस्थपतिन्यायेनालमितिवाच्यम् तस्यापिवर्णवैकृतरूपत्वात् यथा वैन्यस्यतुपृथो र्यज्ञेवर्तमानेमहात्मनः सूत्यायामभवत्सूतःप्रथमंवर्णवैकृतम् ऐंद्रेणहविषातत्रहविःपृक्तंबृहस्पतेः जुहावेंद्रायदैवेनततःसूतोव्यजायत शिष्यहव्येनसंपृक्तमभिभूतंगुरोर्हविः अधरोत्तरचारेणयज्ञे तद्वर्णवैकृतमितिवायूक्तेः यथायेनप्रकारेणजगद्बभूवेतिभूतप्रश्नः पश्चाच्चभविष्यतीतिभविष्यप्रश्नः ८ यन्मयमित्युपादानप्रश्नः यतश्चेतिनिमित्तप्रश्नः लीनमासीद्यत्रेतिलयस्थानप्रश्नः ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्प्रमाणंप्रकाशकंयेषांतानितथाइतिप्रकाशकप्रश्नः भूतानिमहाभूतानि आदिशब्दःपित्रादिसंग्रहार्थः संस्थानंसंनिवेशनं १० प्रमाणमियत्तां वंशान्कुलप्रवाहान्मन्वंतराणिमनुस्थितिकालान् ११ कल्पंतेसृज्यंतेजंतवएष्वितिकल्पाः ब्रह्मदिवसाःतान्कल्पानांविकल्पाभेदास्तान्पाद्मादीन् चतुर्युगविकल्पितान् चतुर्युगसंख्यागणितान् कल्पांतस्यप्रलयस्य युगानामंतानवसानानि पाठांतरेयुगधर्मांश्च १२ देवर्षीत्यादिनावंशानुचरितप्रश्नः १३ ब्राह्मणादीनामितिवर्णधर्मप्रश्नः आश्रमेषुब्रह्मचर्यादिषुसंज्ञितान्संकेतितान्विहितानित्यर्थः आश्रमवासिनामितिवापाठः १४ प्रसादेनप्रवणमभिमुखम् १५ मैत्रेयप्रश्नानुमोदनेनोपोद्घातसंगत्यापुरावृत्तमाह साधुशोभनंपुरातनंचिरंतनंवृत्तंस्मारितोस्मीतिसंबंधः पितुःशक्तेः १६ रक्षसाद्विजशापेनजनितरक्षोभावेनरा

यत्प्रमाणानिभूतानिदेवादीनांचसंभवम्। समुद्रपर्वतानांचसंस्थानंचतथाभुवः १० सूर्यादीनांचसंस्थानंप्रमाणंमुनिसत्तम। देवादीनांतथावंशान्मनून्मन्वंतराणिच ११ कल्पान्कल्पविकल्पांश्चचतुर्युगविकल्पितान्। कल्पांतस्यस्वरूपंचयुगांतांश्चैवकृत्स्नशः १२ देवर्षिपार्थिवानांचचरितंयन्महामुने। वेदशाखाप्रणयनंयथावद्व्यासकर्तृकम् १३ धर्मांश्चब्राह्मणादीनांतथाचाश्रमसंज्ञितान्। श्रोतुमिच्छाम्यहंसर्वंत्वत्तोवासिष्ठनंदन १४ ब्रह्मन्प्रसादप्रवणंकुरुष्वमयिमानसम्। येनाहमेतज्जानीयांत्वत्प्रसादान्महामुने १५ पराशरउवाच साधुमैत्रेयधर्मज्ञस्मारितोस्मिपुरातनम्। पितुःपितामेभगवान्वसिष्ठोयदुवाचह १६ विश्वामित्रप्रयुक्तेनरक्षसाभक्षितोमया। श्रुतस्तातस्ततःक्रोधोमैत्रेयाभून्ममातुलः १७ ततोहंरक्षसांसत्रंविनाशायसमारभम्। भस्मीकृताश्चशतशस्तस्मिन्सत्रेनिशाचराः १८ ततःसंक्षीयमाणेषुतेषुरक्षःस्वशेषतः। मामुवाचमहाभागोवसिष्ठोस्मत्पितामहः १९ अलमत्यंतकोपेनतातमन्युमिमंजहि। राक्षसानापराध्यंतेपितुस्तेविहितंतथा २० मूढानामेषभवतिक्रोधोज्ञानवतांकुतः। हन्यतेतातकःकेनयतःस्वकृतभुक्पुमान् २१ संचितस्यापिमहतोवत्सक्लेशेनमानवैः। यशसस्तपसश्चैवक्रोधोनाशकरःपरः २२ स्वर्गापवर्गव्यासेधकारणंपरमर्षयः। वर्जयंतिसदाक्रोधंतातमातद्वशोभव २३ अलंनिशाचरैर्दग्धैस्तेजसानपकारिभिः। सत्रंतद्विरमत्वेतत्क्षमासाराहिसाधवः २४ एवंतातेनतेनाहमनुनीतोमहात्मना। उपसंहृतवान्सत्रंसद्यस्तद्वाक्यगौरवात् २५ ततःप्रीतःसभगवान्वसिष्ठोमुनिसत्तमः। संप्राप्तश्चतदातत्रपुलस्त्योब्रह्मणःसुतः २६ पितामहेनदत्तार्घःकृतासनपरिग्रहः। मामुवाचमहाभागोमैत्रेयपुलहाग्रजः २७

ज्ञाकल्माषपादेनभक्षितस्तातोमयाश्रुतइत्यन्वयः ततःश्रवणात् १७ रक्षसांविनाशायसत्रंबहुकालसाधनंयागमहंसमारभमारब्धवान् १८ १९ अलंव्यर्थंमन्युंकोपंयागंचत्यजयतस्तेपितुस्तथाविहितंकर्म २० तदेवस्पष्टयति मूढानामिति २१ त्यागेहेत्वंतरमाह संचितस्येति परबुद्ध्यारूढोगुणौघोयशः कार्येंद्रियतापनोधर्मस्तपः द्वयोरेवविशेषणंमहतइति महतेतिवापाठः २२ तयोर्द्वयोर्नाशात्साधनाभावेनस्वर्गापवर्गप्रतिबंधइत्याह स्वर्गेति व्यासेधोनिषेधः २३ तेजसा अग्निनाक्रोधेनवादग्धैः दीनैरितिवापाठः २४ तातेनेति तातस्येतिशेषः २५ ततःसत्रसंहारात् २६ दत्तोर्घोयस्मैसमामुवाचेतिसंबंधः पुलहाग्रजइतिअतितपस्वित्वख्यापनाय २७

Tribhuvan University Central Library, Tribeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यस्मादस्यगुरोर्वाक्यात्क्षमाश्रितातस्मात् २८ २९ कर्ताप्रवर्तकः देवेभावातूपरमार्थमाक्षीपयोगिज्ञान अत्रपक्षेविदूलाभइत्यस्यरूपं देवानांपरमार्थतत्त्वंवा यथार्थवेत्स्यतेवेदिष्यति ३०
प्रवृत्तेचनिवृत्तेचकर्मणिअस्तमलाअज्ञानविपर्यासशून्यामतिर्भविष्यति प्रवृत्तनिवृत्तकर्मणीतुस्मृतिप्रसिद्धे इहवाअमुत्रवाकाम्यंप्रवृत्तमभिधीयते वैराग्यज्ञानपूर्वंतुनिवृत्तमुपदिश्यतेइति ३१
ततःपुलस्त्यवरदानानंतरम् ३२ ३३ सोहंगुरुप्रसादात्साक्षात्कृतशास्त्रार्थःऋषिसंप्रदायागतवेदमूलधर्मशास्त्रसंहितानांयथातथंयथातथाप्रकारेण यथातथमितिक्रियाविशेषणंवा ३४ परिपृ
ष्टेश्रोतुःसुखप्रतिपत्तयेसर्वप्रश्नोत्तरतयापुराणार्थमाह विष्णोरिति विष्णोर्विराट्जीवादिरूपेणानुप्रवेशनशीलस्यब्रह्मणः अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणितदैक्षतबहुस्यांप्रजाये
येत्यादिश्रुतेः विष्णोःसकाशात्सान्निध्यात् एतेनकर्तृत्वंसूचितं यद्वाकाशःप्रकाशःतत्सहितादीक्षणसाहिता द्विष्णोरितिपंचम्यंतं जगदुद्भूतमित्यनेनयथाबभूवेतिप्रकारप्रश्नस्योत्तरं तत्रैवस्थि
तप्रलयकाले एतेनलयाधारप्रश्नस्योत्तरं चशब्देनजगतस्तत्रैवस्थितिरपीत्युक्तं अस्यजगतःस्थितिसंयमयोरसावेवकर्ता इदंजन्मनोप्युपलक्षणं अनेनयतश्चैतच्चरात्मकंजगदितिनिमित्तप्र
श्नस्योत्तरं जगच्चसइति तन्मयंजगदित्यर्थः अनेनयन्मयमित्युपादानप्रश्नस्योत्तरं उपादानकारणरूपत्वात्कार्यस्य एतेनविष्णोरेवोद्भविष्यति तत्रैवस्थास्यतीत्यादिसर्वप्रश्नस्योत्तरमर्थाद्द्रष्ट

वैरेमहतियद्वाक्याद्गुरोरस्याश्रिताक्षमा। त्वयातस्मात्समस्तानिभवान्शास्त्राणिवेत्स्यति २८ संततेर्नममच्छेदःक्रुद्धेनापियतःकृतः। त्वयातस्मान्महा
भागददाम्यन्यंमहावरम् २९ पुराणसंहिताकर्ताभवान्वत्सभविष्यति। देवतापरमार्थंचयथावद्वेत्स्यतेभवान् ३० प्रवृत्तेचनिवृत्तेचकर्मण्यस्तमलामतिः
मत्प्रसादादसंदिग्धातववत्सभविष्यति ३१ ततःसभगवान्प्राहवसिष्ठोमेपितामहः। पुलस्त्येनयदुक्तंतेसर्वमेतद्भविष्यति ३२ इतिपूर्वंवसिष्ठेनपुलस्त्ये
नचधीमता। यदुक्तंतत्स्मृतिंयातंत्वत्प्रश्नादखिलंमम ३३ सोहंवदाम्यशेषंतेमैत्रेयपरिपृच्छते। पुराणसंहितांसम्यक्तांनिबोधयथातथम् ३४ विष्णोः
सकाशादुद्भूतंजगदत्रैवचस्थितं। स्थितिसंयमकर्तासौजगतोस्यजगच्चसः ३५ इतिश्रीविष्णुपुराणेप्रथमांशेप्रथमोध्यायः १ पराशरउवाच। अविका
रायशुद्धायनित्यायपरमात्मने। सदैकरूपरूपायविष्णवेसर्वजिष्णवे १

व्यं सर्वप्रश्नोत्तरविषयस्यविष्ण्वात्मकत्वकथनादितिभावः अत्रचयथाजगद्भवयथाचपुनर्भविष्य
तियन्मयंजगत्यतश्चयत्रपूर्वंलीनंपुनश्चयत्रलयमेष्यतियत्प्रमाणानिभूतानिदेवानांचसंभवमित्यस्याष्टप्रश्नस्यउत्तरंप्रथमांशेसमुद्रपर्वतानांचसंस्थानंभुवःसंस्थानंसूर्यादीनांसंस्थानंतेषांपरिणामं
चेतिचतुःप्रश्नस्योत्तरंद्वितीयांशे देवादीनांतथावंशान्मनून्मन्वंतराणिचवेदशाखाप्रणयनंयथावद्व्यासकर्तृकम् धर्माश्चब्राह्मणादीनांतथाचाश्रमसंज्ञितानितिषट्प्रश्नोत्तरंतृतीयांशे देवर्षिपार्थिवा
नांचचरितमितिप्रश्नोत्तरंतद्वंशविस्तरोक्तिपूर्वकंचतुर्थांशे तत्रचभूभारहरणार्थमवतीर्णस्यहरेश्चरितंविस्तरेणपंचमांशे कल्पाकल्पविकल्पांश्चकल्पांतस्यस्वरूपं चेतिप्रश्नत्रयस्यप्रथमांशेसंक्षेपतो
दत्तोत्तरस्यापियुगधर्माश्चकृत्स्नशइत्यस्यचोत्तरंषष्ठांशेइतिविवेकः ३५ इतिविष्णुपुराणेवैष्णवाकूतचन्द्रिकायांप्रथमेंशेप्रथमोध्यायः १ प्रश्नान्वक्तुंहरेर्नेत्यापुराणोपक्रमःक्रमात् सृष्टिश्चमहदादी
नांद्वितीयेऽथप्रपंच्यते अथैतत्पुराणप्रतिपाद्यस्यविष्णोःस्वरूपंपरात्पररूपेणप्रणमन्विस्तरेणपुराणार्थंवक्तुमाह अविकारायेत्यादिनवभिः तत्रतावत्पूर्वाध्यायांतेपुराणार्थसंक्षेपश्लोकेनैवजगदुपा
दानकर्तृत्वाद्युक्त्याप्राप्तंविकारादिप्रसंगंवारयन्प्रणमति कर्ताहिविकारीरागादिमाननित्यःसाहंकारश्चदृष्टस्तद्वारयति अविकारायेतिचतुर्भिःपदैः उपादानकारणस्यापिविकारेणनानारूपत्वंदृष्टं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारयति एकरूपमेवरूपंयस्यतस्मै सदेत्यस्यसर्वत्रान्वयः अत्रहेतुः सर्वजिष्णवे अचिंत्यैश्वर्येणसर्वान्कर्तृकारणादीन्जेतुमतिशयितुंशीलमस्यतस्मै विष्णवेनमइत्युत्तरेणान्वयः १ ब्र
ह्मादिमूर्तिरूपेणप्रणमति हिरण्यगर्भादिरूपाय तैरूपैःसर्गस्थित्यंतकारिणेवासुदेवायनमः एवंसंसारप्रवर्तकत्वमुक्त्वासन्निवर्तकत्वेनप्रणमति तारायभक्तानांतारकायप्रणवरूपायवा २ किं
चएकानेकस्वरूपायएकंचानेकंचस्वरूपंयस्य स्थूलंसूक्ष्मंचआत्मस्वरूपंयस्यतस्मै विरुद्धस्यस्वरूपद्वयंकथमित्यतआह अव्यक्तव्यक्तरूपायअव्यक्तंकारणंव्यक्तंकार्यंतदुभयरूपाय तेनका
रणत्वेनैकत्वंसूक्ष्मत्वंचकार्यत्वेनानेकत्वंस्थूलत्वंचेत्यर्थः एवंसर्वात्मत्वरूपेणउपासकानांमुक्तिहेतवे ३ कारणकार्यत्वेएवप्रकटयति सर्गेति जगतस्तत्सर्गादीनांचयोमूलभूतःजगन्मयश्चयस्त
स्मैअतोविष्णवेसर्वव्यापिनेतथापिपरमात्मनेकार्यकारणाभ्यांपरमउत्कृष्टआत्मास्वरूपंयस्यतस्मैतत्संगरहितायेत्यर्थः ४ आधारभूतमित्यादेःप्रणम्यकथयामीतिचतुर्थेनान्वयः अणीयसाम
प्यणीयांसंसूक्ष्मतमंसर्वभूतेषुनियंतृत्वेनस्थितंतथाप्यच्युततैरप्यपरिच्छिन्नम् ५ तदेतत्कुतइत्यतआह ज्ञानेति ज्ञानंहिप्रकाशंप्रकाश्यवस्तुरहितंसूर्यवत् अर्थस्वरूपेणदृश्यरूपेणद्रष्टृजीवभ्रांति

नमोहिरण्यगर्भायहरयेशंकरायच । वासुदेवायतारायसर्गस्थित्यंतकारिणे २ एकानेकस्वरूपायस्थूलसूक्ष्मात्मनेनमः । अव्यक्तव्यक्तरूपायवि
ष्णवेमुक्तिहेतवे ३ सर्गस्थितिविनाशानांजगतोयोजगन्मयः । मूलभूतोनमस्तस्मैविष्णवेपरमात्मने ४ आधारभूतंविश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्यसर्वभूतस्थमच्युतंपुरुषोत्तमम् ५ ज्ञानस्वरूपमत्यंतनिर्मलंपरमार्थतः । तमेवार्थस्वरूपेणभ्रांतिदर्शनतःस्थितम् ६ विष्णुंग्रसिष्णुंविश्वस्यास्थि
तिसर्गेतथाप्रभुम् । प्रणम्यजगतामीशमजमक्षरमव्ययम् ७ कथयामियथापूर्वंदक्षाद्यैर्मुनिसत्तमैः । पृष्टःप्रोवाचभगवानब्जयोनिःपितामहः ८ तैश्चो
क्तंपुरुकुत्सायभूभुजेनर्मदातटे । सारस्वतायतेनापिममसारस्वतेनच ९ परःपराणांपुरुषःपरमात्मात्मसंस्थितः । रूपवर्णादिनिर्देशविशेषणविव
र्जितः १० अपक्षयविनाशाभ्यांपरिणामर्द्धिजन्मभिः । वर्जितःशक्यतेवक्तुंयःसदास्तीतिकेवलम् ११

ज्ञानेनस्थितंप्रतीतम् ६ विष्णुंग्रसिष्णुंकालरूपं अतएवसर्गस्थित्यंतकारिणइत्यनेनापौनरुक्त्यं प्रणम्येतिपदावृत्तिश्चनमस्यस्वरूपस्यकालस्यभेदात् अक्षरमचलं अक्षयमितिपाठेअविनाशि
नंअव्ययमपरिणामिनं ७ ८ पितामहेनदक्षादिभ्यःप्रोक्तंत्वयाकथंकथ्यतेतआह तैश्चोक्तमिति ९ पुराणोपक्रमेतद्रूप्यंब्रह्मस्वरूपंसर्वाधिष्ठानंशुद्धंवस्तुनिर्दिशति परइतिचतुर्भिःदेहात्पराणामिं
द्रियाणांपरःप्राचीनः परेभ्यइतिपाठेसएवार्थः अतएवपरमउत्कृष्टआत्माचप्रत्यग्बोधस्वरूपआत्मसंस्थितश्चअनन्याधारःरूपवर्णादिभिर्योनिर्देशस्तदेवविशेषणंतेनाविवर्जितः रूपंशुक्लादि व
र्णोब्राह्मणादिः आदिशब्दाज्जातिक्रिये निर्देशोडित्यादिसंज्ञाएतैःपंचभिर्विशेषणैर्जितइतिवा यद्वारूपादिवर्जितश्चअतएवविशेषणहीनः द्वंद्वात्परस्यविवर्जितशब्दस्योभयत्रान्वयात् १० जाय
तेअस्तिवर्धतेविपरिणमतेअपक्षीयतेविनश्यतीतिश्रुत्युक्तषड्भावविकारवर्जितत्वमाह अपक्षयेति जन्माभावात्तदनंतरभाव्यस्तित्वमपिनास्तीतिज्ञेयं ननुअसन्नेवसभवतिअसद्ब्रह्मेतिवेद चेत्
अस्तिब्रह्मेतिचेद्वेदसंतमेनंततोविदुरिति अस्तीत्येवोपलब्धव्यइत्यादिश्रुतेः अस्तित्वंब्रह्मणस्तावदंगीकर्तव्यंतथाचद्वितीयोभावविकारःप्राप्तइत्याशंक्याह शक्यतेवक्तुंयःसदास्तेति सर्वदा
स्तित्वंचनभावविकारःकिंतुजन्मानंतरास्तित्वमेव तस्यकादाचित्कत्वात् अतोनायंदोषइत्यर्थः यद्वाकेवलमस्तीतिकेवलंजन्मनिरपेक्षं जन्मसापेक्षस्यास्तित्वस्यभावविकारत्वात् ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचपरमात्मैवसाक्षतत्रेवासुदेवइत्युच्यतइत्याह सर्वत्रेति सर्वत्रासौवसतिसमस्तंचास्मिन्वसति वैप्रसिद्धौ ततःवासुदेवइत्युच्यते कर्त्रधिकरणयोरुणितिवासुरुभयार्थः वासुश्चासौद्योतना द्देवश्चेतिकर्मधारयः वसनात्द्योतनाच्चैववासुदेवंततोविदुरितिमोक्षधर्मेषुनिरुक्तेः १२ पूर्वोक्तविशेषणान्यनुवादेनप्रकटयति तदिति अग्रेविशेषंविधातुमनुवदतीतिवा तद्वासुदेवाख्यंब्रह्मआ त्मा बृहत्वात्बृंहणत्वाच्चात्मैवब्रह्मेतिगीयतइतिश्रुतेः परममुक्तस्वरूपंनित्यमविनाशिअजमुत्पत्तिरहितंअक्षयंत्रुटिरहितं अव्ययमपरिणामिएकस्वरूपंद्वितीयाभावत् हेयमविद्यातत्कार्यंचत दभावान्निर्मलं तदुक्तंभागवते वदंतितत्तत्त्वविदस्तत्त्वंयज्ज्ञानमव्ययं ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यते १३ तदेवंशुद्धब्रह्मस्वरूपस्यैवस्वमायाविकृतप्रपंचस्यप्रपंचंप्रत्यभिन्ननिमित्तोपा दानतामाह तदेवेति एतत्सर्वंप्रपंचजातंततब्रह्मैव कीदृशंव्यक्ताव्यक्तस्वरूपवत् व्यक्तंमहदादिअव्यक्तंप्रधानंतद्द्वयस्वरूपवत् तथानेनरूपेणस्थितंसदंतःपुरुषरूपेणबहिःकालरूपेणच स्थितं तदेतत्सर्वमेवैतदितिपाठेतदेतत्प्रकृतंब्रह्मेत्यर्थः १४ पूर्वोक्तानिव्यक्तादीनिचत्वारिरूपाणिविशिष्यानूद्यतेभ्योविलक्षणंविष्णोःस्वरूपमाह परस्येति परस्यब्रह्मणःपुरुषःप्रथमंरूपं सो स्यतद्ब्रह्मणइतिपाठेतच्चतद्ब्रह्मचेतितद्ब्रह्मतस्यास्यप्रसिद्धःसऐक्षतसोकामयतेत्यादिश्रुत्युक्तःपुरुषःप्रथमंरूपमित्यर्थः तथाचभागवते कालवृत्त्यातुमायायांगुणमय्यामधोक्षजः पुरुषेणात्मभू

सर्वत्रासौसमस्तंचवसत्यत्रेतिवैयतः । ततःसवासुदेवेतिविद्वद्भिःपरिपठ्यते १२ तद्ब्रह्मपरमंनित्यमजमक्षयमव्ययम् । एकस्वरूपंचसदाहेयाभावाच्च निर्मलम् १३ तदेवसर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् । तथापुरुषरूपेणकालरूपेणचस्थितम् १४ परस्यब्रह्मणोरूपंपुरुषःप्रथमेद्विज । व्यक्ताव्यक्तेतथैवा न्येरूपेकालस्तथापरम् १५ प्रधानपुरुषव्यक्तकालानांपरमंहियत् । पश्यंतिसूरयःसिद्धंतद्विष्णोःपरमंपदम् १६ प्रधानपुरुषव्यक्तंकालस्तुप्रतिभाव शः । रूपाणिस्थितिसर्गांतव्यक्तिसद्भावहेतवः १७ व्यक्तंविष्णुस्तथाव्यक्तंपुरुषःकालएवच । क्रीडतोबालकस्येवचेष्टांतस्यनिशामय १८ अव्य क्तंकारणंयत्तत्प्रधानमृषिसत्तमैः । प्रोच्यतेप्रकृतिःसूक्ष्मानित्यंसदसदात्मकम् १९

तेनवीर्यमाधत्तवीर्यवान् ततोभवन्महत्तत्वमित्यादि व्यक्ताव्यक्तेतथैवान्येरूपेपुरुषेक्षणीयमव्यक्तंतज्जन्यंचव्यक्तं एतेद्वेअन्येरूपेजडत्वात् कालस्तथापरंरूपंसर्वेषांक्षोभकत्वादंतेनिर्दिष्टःयद्वा प्रधानात्मनोःसंयोगकृत्सर्वचेष्टाहेतुरनादिकालइतितदुभयनिरूप्यत्वात्पश्चादुक्तः १५ परस्यब्रह्मणोरूपाणीत्युक्त्यातेषांविशेष्यत्वात्प्राप्तंप्रधानत्वंवारयति प्रधानेति सूरयोयत्पश्यंतितदेवविष्णोःपरमंपदमित्यर्थः १६ अन्यानितुरूपाणिसर्गादिव्यापृतानीतिविशिनष्टि प्रधानेतिश्लोकाभ्यां रूपाणिविष्णोरितिशेषः प्रविभागशोयथासंभवं तथाहि प्रधानंसर्गहेतुः पुरुषःस्थितिहेतुः व्यक्तंमहदादिव्यक्तीनांशरीरादिव्यक्तीनांसद्भावउत्पत्तिस्तस्यहेतुःकालश्चांतहेतुरितियोज्यं यद्वाव्यक्तिरभिव्यक्तिःसद्भावउत्पत्तिस्तत्रहेतवः विभागशइतिचतुर्विभागःसंसृष्टौचतुर्धासंस्थितः स्थितौ प्रलयंच करोत्येवंचतुर्भेदोजनार्द्दनइति वक्ष्यमाणप्रकारेणेत्यर्थः १७ नन्वेवंचतूरूपोभूत्वाविष्णुःसर्गादौकथंप्रवर्ततेननुस्वस्वरूपेणेतितत्राह व्यक्तंविष्णुरिति विष्णुर्व्यक्तादिरूपोभवती तियत्तक्रीडतोबालकस्यचेष्टामिवयथाबालकःमध्येराजादिकंकल्पयित्वाक्रीडतितद्वन्निशामयजानीहितदुक्तं लोकवत्तुलीलाकैवल्यमिति १८ अथेदानींतदेवरूपचतुष्टयंप्रपंचयन्प्रथमतः प्रधानंप्रपंचयति अव्यक्तमितिपंचभिः यदव्यक्तंतदृषिसत्तमैःप्रधानंकारणंप्रकृतिरितिचप्रोच्यतेनित्यंसदैकरूपंबुद्ध्यादिहीनमितियावत् सदसदात्मकंकार्यकारणशक्तियुक्तं १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षयमपक्षयहीनं अक्षय्यमितिपाठेक्षयानर्हम् नान्यदाधारमनन्याश्रयम् मूलकारणत्वात्नान्याधारमितिवक्तव्येदुगागमश्छांदसः अमेयमियत्ताशून्यम् अजरंस्वरूपेणापरिणामि ध्रुवमचलं शब्दस्पर्शविहीनंकारणावस्थायांअभिव्यक्तशब्दादिरहितम् २० त्रिगुणंगुणत्रयसाम्यम् जगतोयोनिःकारणम् अनादिजन्मशून्यम् प्रभवाप्ययंप्रभवंतीतिप्रभवाःकार्याणितानिअपयांतिलीयंते अस्मिन्नितिअप्ययंलयस्थानमित्यर्थः प्रभवालयमितिपाठेसएवार्थः अग्रेसृष्टेःपूर्वंप्रलयादनुअतीतप्रलयादनंतरंसर्वमेतत्कार्यजातंतेनव्याप्तमंतर्निहितमासीदित्यर्थः तमआसीत्तमसागूढमग्र इत्यादिश्रुतेः २१ अत्रार्थेविदुषांसंमतिमाह वेदवादविदःवेदवादावेदोक्तन्यायास्तद्विदः नियताःस्वाध्यायादिनिष्ठाःब्रह्मवादिनस्तत्त्वपराः एतमेवार्थमुद्दिश्यश्रुत्यर्थसूचनपरंप्रधानप्रतिपादकंनाह रित्यादिश्लोकंपठंति वैतमितिपाठेतमर्थमितिसंबंधः २२ तदाह नाहरिति अहोनासीत्रात्रिश्चसूर्याभावात्रात्रेरभावान्नतमः अह्नोऽभावान्नज्योतिः अनुक्तंसामान्यतोनिषिध्यते नचान्यदि ति सामान्यमेवाह श्रोत्रादीति श्रोत्रादिजन्यायाबुद्धिस्तयोपलभ्यम् हिशब्दाद्बुद्ध्याद्युपलभ्यमितिपाठःसुगमः तर्हिकिमासीदित्यतआह प्राधानिकम् स्वार्थेतद्धितः एकमितिप्रत्येकंसं बध्यते प्रधानंब्रह्मचपुमांश्चतदेतिकालश्चासीदिति तदाप्रलयेइतिवा श्रुतिश्च नासदासीन्नोसदासीत्तदानीमिति २३ कालस्वरूपंविवृणोति विष्णोरितिचतुर्भिः परतोनिरुपाधेर्विष्णोः

अक्षयंनान्यदाधारममेयमजरंध्रुवम् । शब्दस्पर्शविहीनंतद्रूपादिभिरसंहतम् २० त्रिगुणंतज्जगद्योनिरनादिप्रभवाप्ययम् । तेनाग्रेसर्वमेवासीद्व्याप्तं वैप्रलयादनु २१ वेदवादविदोविप्रानियताब्रह्मवादिनः । पठंतिचैतमेवार्थंप्रधानप्रतिपादकम् २२ नाहोनरात्रिर्ननभोनभूमिर्नासीत्तमोज्योतिर भून्नचान्यत् । श्रोत्रादिबुद्ध्याद्युपलभ्यमेकंप्राधानिकंब्रह्मपुमांस्तदासीत् २३ विष्णोःस्वरूपात्परतोहितेन्येरूपेप्रधानंपुरुषश्चविप्र । तस्यैवतेन्येनधृ तेवियुक्तेरूपादियत्तद्विजकालसंज्ञम् २४ प्रकृतौसंस्थितंव्यक्तमतीतप्रलयेतुयत् । तस्मात्प्राकृतसंज्ञोऽयमुच्यतेप्रतिसंचरः २५ अनादिर्भगवा न्कालोनांतोस्यद्विजविद्यते । अव्युच्छिन्नास्ततस्त्वेतेसर्गस्थित्यंतसंयमाः २६ गुणसाम्येततस्तस्मिन्पृथक्पुंसिव्यवस्थिते । कालस्वरूपरूपंतद्वि

स्वरूपात्तेप्रागुक्तेप्रधानंपुरुषश्चेतिद्वेरूपेअन्योविलक्षणेमायाकृते तेन्येइतिसंधिरार्षः परतोदिते इतिवापाठः परस्मात्खंडितेइत्यर्थः यद्वाहितेपरस्परंसंगतेर्मिलितेयेरूपेतेवियुक्तेकृत्वाप्रलयेधृते अन्येनकेनतदाह तत्कालसंज्ञम् कीदृशम् यद्रूपादिरूप्यंतेजन्यंतइतिरूपाणिकार्याणितेषामादि क्लीबत्वमार्षं यद्वायद्यस्माद्रूपादिभवतितत्कालसंज्ञम् २४ प्रधानपुरुषयोर्वियोगकालंवदन्प्राकृ तपदनिरुक्तिमाह प्रकृताविति अतीतग्रहणंसर्वप्रलयोपलक्षणम् अतीतप्रलयेयद्यस्मात्प्रकृतौसंस्थितंलीनम् विश्वमासीत्तस्मात्प्राकृतोयम् महाप्रलयउच्यते एतच्चप्रकृतिपुरुषयोरविवेकेनघ टते तयोर्विवेकेतुमोक्षाख्यआत्यंतिकःप्रलयइतिसांख्याः प्रकृतौविश्वस्यसंचरणात्प्रतिसंचरःप्रलयः २५ कालस्यानादिपुरुषमायासंयोजकत्वाद्व्यक्तोत्पत्त्यादिप्रवाहहेतुत्वाच्चमायानाशेनैव नाशोनव्यक्तवत्प्रकृतौलयइतिवदन्प्रलयेपिकालोस्तीत्याह अनादिरिति नांतोव्यक्तवल्लयोनास्तीत्यर्थः अत्रकार्यानुपपत्तिंप्रमाणयति अव्युच्छिन्नाइति ततःकालस्यानाद्यनंतत्वात्सर्गश्च स्थितिश्चअंतेसंयमःसंहारश्चसर्गस्थित्यंतानांसंयमानियमाइतिवा एतेऽव्युच्छिन्नाःप्रवाहरूपेणाविरताः २६ किंचततःकारणाद्गुणसाम्येप्रधानेपुंसिचपृथक्वियुक्ततयाव्यवस्थितेसतितथैवैत योर्धारणार्थंविष्णोःकालाख्यंरूपंवर्तते अन्यथाप्रलयानिर्वाहादितिभावः नाहोनरात्रिरित्यत्रसूर्यगत्युपलक्षितःस्थूलःकालोनास्तीत्युक्तं अत्रत्वनवच्छिन्नोविष्णुस्वरूपः कालोस्तीत्याविरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धःअनेनैवप्रलयेप्रकृत्यावियुक्तः पुरुषस्तूष्णींलीनइवतिष्ठन्सर्गकालेप्रकृतिमधिष्ठायसृष्ट्यादिकरोतीतिपुरुषस्वरूपमपिविवृतंद्रष्टव्यं २७ इदानींव्यक्तस्वरूपंप्रपंचयिष्यन्परमेश्वरात्प्रकृतिपुरुषक्षोभप्रकारमाह ततइतिपंचभिः ततःसर्गकालेप्राप्तेपरमेश्वरोहरिःस्वेच्छयाप्रधानंपुरुषंचकालद्वाराक्षोभयामासेतिद्वयोरन्वयः किंभूतोहरिस्तद्ब्रह्मेत्यादिरूपःअव्यक्तादिरूपाविलक्षणः २८प्रधानपुरुषौकिंभूतौव्ययाव्ययौपरिणाम्यपरिणामिनौ उपादाननिमित्तभूताविति यावत् प्रलयेपृथगात्मनिस्थितौस्वांशभूतौस्वकालशक्त्याउद्बुद्धयेच्छाशक्त्याक्षोभयामाससंयोज्यसृष्ट्युन्मुखौचकारेत्यर्थः २९प्रविश्यक्षोभयामासेत्युक्त्याप्राप्तंक्रियावलंवारयति यथेति संनिधिमात्रेणगंधोमनसःक्षोभायवृत्त्युपजननायजायतेकल्पते नतूपकर्तृत्वात्तदनुकूलक्रियाकारित्वात् ३० ननुप्रधानादीनामपिस्वरूपाव्यतिरेकात्कथंक्षोभ्यक्षोभकादिभावइत्यतआह सएवेतिद्वाभ्याम् संकोचःसाम्यंविकाशोगुणक्षोभस्ताभ्यामुपलक्षितः सएवस्थितःतदवस्थाद्वयोपेतंप्रधानमपिविष्णुरेवेत्यर्थः ३१ विकाराणुस्वरूपोमहाभूतमहदादिरूपः यद्वाविकारामहदादयः अणवोजीवाः अणुरात्माचेतसावेदितव्यइतिश्रुतेः ब्रह्मरूपादिभिरुपलक्षितः यद्वाब्रह्मरूपादिभिर्व्यक्त

ष्णोमैत्रेयवर्तते २७ ततस्तत्परमंब्रह्मपरमात्माजगन्मयः । सर्वगःसर्वभूतेशःसर्वात्मापरमेश्वरः २८ प्रधानंपुरुषंचापिप्रविश्यात्मेच्छयाहरिः । क्षोभयामाससंप्राप्तेसर्गकालेव्ययाव्ययौ २९ यथासंनिधिमात्रेणगंधःक्षोभायजायते । मनसोनोपकर्तृत्वात्तथासौपरमेश्वरः ३० सएवक्षोभकोब्रह्मन्क्षोभ्यश्चपुरुषोत्तमः । ससंकोचविकाशाभ्यांप्रधानत्वेपिचस्थितः ३१ विकाराणुस्वरूपश्चब्रह्मरूपादिभिस्तथा । व्यक्तस्वरूपश्चतथाविष्णुःसर्वेश्वरेश्वरः ३२ गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधिष्ठितान्मुने । गुणव्यंजनसंभूतिःसर्गकालेद्विजोत्तम ३३ प्रधानंतत्त्वमुद्भूतंमहांतंतत्समावृणोत् । सात्विकोराजसश्चैवतामसश्चत्रिधामहान् ३४ प्रधानतत्त्वेनसमंत्वचाबीजमिवावृतम् । वैकारिकस्तैजसश्चभूतादिश्चैवतामसः । त्रिविधोयमहंकारोमहत्तत्त्वादजायत ३५ भूतेंद्रियाणांहेतुःसत्रिगुणत्वान्महामुने । यथाप्रधानेनमहान्महतासतथावृतः ३६ भूतादिस्तुविकुर्वाणःसर्गंतन्मात्रिकंततः । ससर्जशब्दतन्मात्रादाकाशंशब्दलक्षणम् । शब्दमात्रंतथाकाशंभूतादिःससमावृणोत् ३७ आकाशस्तुविकुर्वाणःस्पर्शमा

स्तद्रूपश्चविष्णुरेवेत्यर्थः व्यक्तस्वरूपःसमष्टिव्यष्टिदेहरूपइतिवा ३३ इदानींमहदादिक्रमेणव्यक्तस्वरूपप्रपंचमाहगुणसाम्यादित्यादिनाबीजंवाह्यदलैरित्यंतेन ततोगुणक्षोभादनंतरंतस्माद्गुणसाम्यात्क्षेत्रज्ञेनाधिष्ठितात्आत्मत्वेनेक्षिताद्गुणानांव्यंजनंव्यज्यतेऽनेनेतिव्यंजनंमहत्तत्त्वंतस्यसंभूतिरुद्भवोभूत् ३३ उद्भूतंमहांतंप्रधानंकर्तृसमावृणोद्व्याप्नोत् तथाचप्रधानमेवमहत्तत्त्वादिरूपेणाहंकारादिषुकार्येषूपादानं मृदिवपिंडादिद्वाराघटादिष्वितिभावः एतदेवविवृणोति सात्त्विकइति ३४ सममन्यूनानतिरिक्तंयथाभवत्येवंसर्वतःत्वचाबीजंयथावृतंतथात्रिविधोपिमहान्प्रधानेनावृतइत्यर्थः नचैतस्मादात्मनआकाशःसंभूतः तत्तेजोसृजतेत्यादिश्रुतिविरोधः सृष्टीनांकाल्पनिकत्वात्परमात्मनिबुद्ध्यारोहार्थत्वेनक्वचित्केनचित्क्रमेणाभिधानात् वैकारिकःसात्त्विकःतैजसोराजसःभूतादिस्तामसइतिअर्थात्स्वयमेवव्याख्यातम् ३५सोहंकारइंद्रियाणांहेतुरितिदेवानामप्युपलक्षणम् ३६ तामसाहंकारकार्यंविवृणोति भूतादिरितिनवभिः विकुर्वाणःक्ष्युभ्यन् तन्मात्राभूतसूक्ष्माणितेषामिदंतन्मात्रिकंसर्गसृष्टिंससर्जाकरोत् शब्दंतन्मात्रिकमितिपाठांतरं तदास्वार्थेठन् कारणत्वाद्व्यावर्तकत्वाच्चप्रथमंतन्मात्रसृष्टिःततस्तत्रतन्मात्रसर्गम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्येशब्दतन्मात्रादाकाशंभूतादिःससर्जेतिसंबंधः शब्दलक्षणंशब्दगुणकंशब्दमात्रंशब्दतन्मात्रजन्यत्वात् ३७ आकाशःआकाशमयोभूतादिः स्पर्शतन्मात्रंससर्जपूर्वसृष्टस्यापिक्रमानुरोधात्पुनःसृष्टिकथनं एवमुत्तरत्रापिबलवान्बलाधिष्ठातृत्वेनसचस्पर्शगुणःस्पर्शमात्रंस्पर्शतन्मात्रं स्पर्शोमात्राकारणंयस्यतंवायुमितिवा ३८ ३९ तज्ज्योतिःरूपंगुणोयस्यतत्तथा ४० रसाधाराणिरसगुणानि तत्पुरुषत्वेपिषंढत्वमार्षम् ४१ ४२ संघातःसर्वगुणसंहतिरूपाकठिनावापृथिवी तन्मात्रसंज्ञानिरुक्तिमाह तस्मिन्निति तच्छब्दादि मात्रासूक्ष्मावस्थाचिह्नंवा क्वचित्तन्मात्रशब्दोपितत्समानार्थः ४३ सांख्यप्रसिद्धामविशेषसंज्ञामपितेषामाह तन्मात्राणीति अविशेषाइतिकपिलर्षिकृतसंज्ञात्वात्पुंस्त्वं विशेषाभावमेवदर्शयति नेति शांतत्वंसुखहेतुत्वं घोरत्वंदुःखहेतुत्वं मूढत्वंपरप्रकाश्यता एतेषांविशेषाणामभावादविशेषाः ४४ उक्तमनूद्यतैजसाहंकारकार्यमाह भूतेति भूतानांतन्मात्राणांचसर्गइत्यर्थः तैजसानिराजसाहंकारकार्याणि इंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायुगुह्यानि देवास्तदधिष्ठातारः दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रप्रजापतयोदशेत्युभयत्रसंबध्यते ४५ मनोंतःकरणंमनोबुद्ध्यहंकाराचित्ताख्यचतु

त्रंससर्जह । बलवानभवद्वायुस्तस्यस्पर्शोगुणोमतः ३८ आकाशंशब्दतन्मात्रंस्पर्शमात्रंसमावृणोत् । ततोवायुर्विकुर्वाणोरूपमात्रंससर्जह ३९ ज्योतिरुत्पद्यतेवायोस्तद्रूपगुणमुच्यते । स्पर्शमात्रश्चैववायूरूपमात्रंसमावृणोत्४० ज्योतिश्चापिविकुर्वाणंरसमात्रंससर्जह । संभवंतिततोंभांसिरसाधाराणितानिच ४१ रसमात्राणिचांभांसिरूपमात्रंसमावृणोत् । विकुर्वाणानिचांभांसिगंधमात्रंससर्जिरे ४२ संघातोजायतेतस्मात्तस्यगंधोगुणोमतः । तस्मिंस्तस्मिंस्तुतन्मात्रातेनतन्मात्रतास्मृता ४३ तन्मात्राण्यविशेषाणिअविशेषास्ततोहिते । नशांतानापिघोरास्तेनमूढाश्चाविशेषणाः । ४४ भूततन्मात्रसर्गोयमहंकारात्तुतामसात् । तैजसानींद्रियाण्याहुर्देवावैकारिकादश ४५ एकादशंमनश्चात्रदेवावैकारिकाःस्मृताः । त्वक्चक्षुर्नासिकाजिह्वाश्रोत्रमत्रचपंचमम् । शब्दादीनामवाप्यर्थंबुद्धियुक्तानिवैद्विज ४६ वायूपस्थौकरौपादौवाक्चमैत्रेयपंचमी । विसर्गशिल्पगत्युक्तिकर्मतेषांचकथ्यते ४७ आकाशवायुतेजांसिसलिलंपृथिवीतथा । शब्दादिभिर्गुणैर्ब्रह्मसंयुक्तान्युत्तरोत्तरैः ४८ शांताघोराश्चमूढाश्चविशेषास्तेनतेस्मृताः ४९ नानावीर्याःपृथग्भूतास्ततस्तेसंहतिंविना । नाशक्नुवन्प्रजाःस्रष्टुमसमागम्यकृत्स्नशः ५० समेत्यान्योन्यसंयोगंपरस्परसमा

वृत्ति तदधिष्ठातारश्चंद्रब्रह्मरुद्रक्षेत्रज्ञाख्यादेवावैकारिकाःसात्त्विकाइत्यर्थः तेष्वहंकारकार्यत्वंसाक्षात्परंपरयावेतिबोद्धव्यं तानिविभजते त्वक्चक्षुरित्यादिअत्रपाठक्रमोनग्राह्यः बुद्धियुक्तानिज्ञानेंद्रियाणि ४६ वायूपस्थमितिपाठेप्राण्यंगत्वात्द्वंद्वैकवद्भावोज्ञेयः पायूपस्थाविति वापाठः पायोःपुरीषविसर्गः उपस्थस्यमूत्ररेतोविसर्गइत्यवधेयं उक्तयंतंपदंद्वंद्वैक्यात् ४७ तामसाहंकारकार्येषुविशेषमाह सार्धेन आकाशादीनिभूतानिशब्दादिभिर्गुणैःसंयुक्तानि कीदृशैःउत्तरोत्तरैः कारणगुणादुत्तरःपरःउत्तरोऽधिकोयेषांतैः आकाशस्यकारणाभावात्स्वकीयएकएवगुणः यद्वाउत्तरेषामुत्तरैरधिकैरितिविवृत्याकाशस्योत्तरत्वाभावान्नाधिकइतिव्याख्येयं ४८ किंच शांतादिरूपाविशेषास्तेस्मृताउच्यंते ४९ महदादिसृष्टिमुक्त्वातत्कृतांब्रह्मांडसृष्टिंवक्तुमाह नानेतिदशभिःश्लोकैः नानावीर्याअवकाशशोषणदहनछेदनधारणरूपाभिन्नाभिन्नशक्तियुक्ताःपृथग्भूताविलक्षणस्वभावाःसंहतिंमेलनंपंचीकरणंविनाकृत्स्नशोऽसमागम्यपरस्परसाहाय्यमप्राप्यप्रजाःस्रष्टु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशक्नुवन्नित्यर्थः ५० अन्योन्यसंयोगंयथाभवतितथासमेत्यपरस्परसमाश्रयाअन्योन्यसहकारिणःएकसंघातलक्ष्याःएकःसंघातोयमितिलक्ष्यंतेयेतेतथा ऐक्यंएकपिंडत्वंसंप्राप्य ५१ पुरुषेणईश्वरेणअधिष्ठितत्वात्प्रधानस्यानुग्रहेणपरिणामोन्मुखत्वेनाविशेषामहाभूतानितदंतामहदादयःअंडमुत्पादयंतीत्यन्वयः ५२ तदंडंसमंवर्तुलंउदकेशयंजलस्थंतत्तेभ्योभूतेभ्योबृहत्विवृद्धमितिप्राकृतंप्रकृतिकार्यंहिरण्यगर्भरूपस्याविष्णोःसंस्थानमाकृतिः ५३ तत्रअंडेअव्यक्तस्वरूपइंद्रियागोचरःमाययाव्यक्तरूपीव्यवस्थितः ननूत्पन्नइत्यर्थः ५४ उल्बंभस्त्राकारंगर्भवेष्टनंचर्म जरायुस्तद्बहिर्वेष्टनं ५५ साद्रिद्वीपसमुद्राइतिपाठेऽभवन्नितिवचनपरिणामेनयोज्यं एकवचनांतपाठस्तुसुगमः लोकसंग्रहोभुवनसंग्रहः ५६ अंतःस्थितिमुक्त्वाबाहिःस्थितिमाह वारीति ततःकटाहरूपपृथिव्यावरणात्बहिःप्रत्येकंवारिवह्न्यादिभिर्भूतादिनाचतामसाहंकारेणयथाक्रमंदशगुणमुत्तरैरधिकैरावृतामित्यन्वयः पृथिव्यावरणात्पंचविंशतिकोटियोजनप्रमाणाद्दशगु

श्रयाः । एकसंघातलक्ष्याश्चसंप्राप्यैक्यमशेषतः ५१ पुरुषाधिष्ठितत्वाच्चप्रधानानुग्रहेणवा । महदादयोविशेषांताह्यंडमुत्पादयंतिते ५२ तत्क्रमेणविवृद्धंतुजलबुद्बुदवत्समम् । भूतेभ्योंडंमहाबुद्धेर्बृहत्तदुदकेशयम् । प्राकृतंब्रह्मरूपस्याविष्णोःसंस्थानमुत्तमम् ५३ तत्राव्यक्तस्वरूपोऽसौव्यक्तरूपीजगत्पतिः । विष्णुर्ब्रह्मस्वरूपेणस्वयमेवव्यवस्थितः ५४ मेरुरुल्बमभूत्तस्यजरायुश्चमहीधराः । गर्भोदकंसमुद्राश्चतस्यासन्सुमहात्मनः ५५ साद्रिद्वीपसमुद्रश्चसज्योतिर्लोकसंग्रहः । तस्मिन्नंडेऽभवद्विप्रसदेवासुरमानुषः ५६ वारिवन्ह्यनिलाकाशैस्ततोभूतादिनाबहिः । वृतंदशगुणैरंडंभूतादिर्महतातथा ५७ अव्यक्तेनावृतोब्रह्मंस्तैःसर्वैःसहितोमहान् । एभिरावरणैरंडंसप्तभिःप्राकृतैर्वृतम् ५८ नारिकेलफलस्यांतर्बीजंबाह्यदलैरिव । जुषन्नजोगुणंतत्रस्वयंविश्वेश्वरोहरिः । ब्रह्माभूत्वास्यजगतोविसृष्टौसंप्रवर्तते ५९ सृष्टंचयात्यनुयुगंयावत्कल्पविकल्पना । सत्त्वभुग्भगवान्विष्णुरप्रमेयपराक्रमः ६० तमोद्रेकीचकल्पांतेरुद्ररूपीजनार्दनः । मैत्रेयाखिलभूतानिभक्षयत्यतिभीषणः ६१ संभक्षयित्वाभूतानिजगत्येकार्णवीकृते । नागपर्यंकशयनेशेतेसपरमेश्वरः । प्रबुद्धश्चपुनःसृष्टिंकरोतिब्रह्मरूपधृक् ६२ सृष्टिस्थित्यंतकरणाद्ब्रह्मविष्णुशिवात्मिकाम् । ससंज्ञांयातिभगवानेकएवजनार्दनः ६३ स्रष्टासृजतिचात्मानंविष्णुःपाल्यश्चपातिच । उपसंह्रियतेचांतसंहर्ताचस्वयंप्रभुः ६४ पृथिव्यापस्तथातेजोवायुराकाशमेवच । सर्वे

णंतोयावरणंततोदशगुणंवह्न्यावरणंएवंदशगुणोत्तराणिसप्तावरणानि प्रकृत्यावरणंत्वष्टममपरिमितम् मह्यादिभिश्चावरणैरष्टभिर्बाहिरावृतामितिशुकोक्तेः अतएवप्रकृतिंपृथक्कृत्वासप्तभिरितिस्वयमुक्तम् पृथिव्यावरणंविहायसप्तभिरित्युक्तमितिवा ५७ ५८ यदीदृशंब्रह्मांडंतस्मिन्प्रविष्टस्याविष्णोर्गुणावतारैरवांतरसृष्ट्यादिलीलामाह जुषन्नित्यादिनायावदध्यायपरिसमाप्ति तत्रविसृष्टौविविधचराचरादिसृष्टौसंप्रवर्तते ५९ अनुयुगंयुगेयुगेयावत्कल्पस्यब्रह्मदिनस्यविकल्पनाव्यवहारःसमाप्तिर्वा विशब्दस्यविगतार्थत्वात् सत्त्वभुक्सत्त्वगुणाधिष्ठातापीत्यर्थः ६० तमोद्रेकीतिसंधिरार्षः ६१ नागोनंतःसएवपर्यंकइवशयनंशय्येवचतस्मिन्परमेश्वरःशेतेब्रह्माद्यवतारमूलस्वरूपेण ब्रह्मरूपधृक्चतुर्मुखःसन् ६२ ब्रह्मादिरूपाणिचतद्भिन्नानिनसंभवंतीत्याह सृष्टिस्थितीति करणामितिपाठेसृष्ट्यादिःकरणंनिमित्तंयस्यास्तांसंज्ञांयातीत्यर्थः ६३ तेनब्रह्मादिभेदोनतात्त्विकइत्युक्तंस्रष्टृसृज्यादिभेदश्चकाल्पनिकइत्याह स्रष्टेति विष्णुरेवस्रष्टात्मानंसृजतिचपाल्यश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पालकश्चउपसंहार्यश्चसंहर्तास्वयमेव ६४कुतइत्यतआह पृथिवीति यद्यस्मात्पृथिव्यापइत्यादिसर्वंपुरुषाख्यंपुरुषसंज्ञम् पुरुषएवेदंसर्वमितिश्रुतेः ६५ननुकथंसएवसर्गादिकर्तासृज्यश्चेत्याद्युच्यतेपितृपुत्रादीनामापितथोपलंभात्तत्राह सएवेति यतः सएवसर्वभूतानामीशः प्रवर्तयिताविश्वरूपश्चततोभूतेषुपितृपुत्रादिषुस्थितंसर्गादिकमस्यहरेरेवोपकारकंतत्प्रयुक्तैस्तद्विभूतेरेवविस्तरात् यथाऋत्विग्भिःकृतंयजमानस्योपकारकंतत्प्रयुक्तैस्तद्विस्तारसंपादनादित्यर्थः यद्वाउपकारकमुपचारकंईश्वराध्यस्तेषुभूतेषुसृजत्सुईश्वरःसृजतीत्युपचारइति ६६ उक्तंस्रष्टृसृज्याद्यैक्यमुपसंहरन्विवक्षितार्थमाह सएवेति अद्योभक्षणीयः दृद्यभावश्छांदसः पाल्यतेचेतिपाठेचकाराद्भक्ष्योपिज्ञेयः ब्रह्माद्यवस्थाभिःसृष्ट्यादिकर्ताशेषमूर्तिः सृज्यादिरूपःअतोविष्णुरेववरिष्ठःश्रेष्ठःपरमार्थरूपइतियावत् वरेण्योवरणीयरूपःपरमानंदरूपत्वात् ६७ इतिवि॰प्र॰द्विती॰ २ विष्णोःसर्गादिकर्तृत्वंतृतीयेसभ्यगीर्यते काष्ठादिर्द्विपरार्धांतकालोथप्रतिसंचरः तदेवंब्रह्मणःसृष्ट्यादिकर्तृत्वमुक्तंतत्रशंकतेनिर्गुणस्येति सत्त्वादिगुणरहितस्यअप्रमेयस्यदेशकालाद्यनवच्छिन्नस्यशुद्धस्यअदेहस्यसहकारिशून्यस्यवाअमलात्मनःपुण्यपापसंस्कारहीनस्यरागादिरहितस्यवाएवंभूतस्यविष्णोःकथंसर्गादिकर्तृत्वमिष्यते एतद्विलक्षणस्यैवकुलालादेर्घटादिकर्तृत्वदर्शनादितिभावः १ परिहरति शक्तयइतिसार्धेन लोकेहिसर्वेषांभावानांमणिमंत्रादीनांशक्तयोऽचिंत्यज्ञानगो

द्रियांतःकरणंपुरुषाख्यंहियज्जगत् ६५ सएवसर्वभूतेशोविश्वरूपोयतोव्ययः । सर्गादिकंततोस्यैवभूतस्थमुपकारकम् ६६ सएवसृज्यःसचसर्गकर्तासएवपात्यत्तिचपाल्यतेद्यः । ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्ठोवरदोवरेण्यः ६७ इतिश्रीविष्णुपुराणेप्रथमेअंशेद्वितीयोध्यायः २ मैत्रेयउवाच । । निर्गुणस्याप्रमेयस्यशुद्धस्याप्यमलात्मनः । कथंसर्गादिकर्तृत्वंब्रह्मणोह्युपपद्यते १ पराशरउवाच । शक्तयःसर्वभावानामचिंत्यज्ञानगोचराः । यतोतोब्रह्मणस्तास्तुसर्गाद्याभावशक्तयः । भवंतितपतांश्रेष्ठपावकस्ययथोष्णता २ तन्निबोधयथासर्गेभगवान्संप्रवर्तते । नारायणाख्योभगवान्ब्रह्मालोकपितामहः । उत्पन्नःप्रोच्यतेविद्वान्नित्यएवोपचारतः ३ निजेनतस्यमानेनआयुर्वर्षशतंस्मृतम् । तत्पराख्यंतदर्धंचप

चराः अचिंत्यंकुतर्कासहिष्णुयज्ज्ञानंकार्यान्यथानुपपत्तिजन्यंतस्यगोचराःसंति यतएवंअतोब्रह्मणोपितास्तद्विधाःसर्गाद्याःसर्गादिहेतुभूताःभावशक्तयःस्वभावसिद्धाःशक्तयःसंत्येववह्नेर्दाहशक्तिवत् अतोगुणादिहीनस्यापिब्रह्मणःसर्गादिकर्तृत्वंघटतइतिभावः तथाचश्रुतिः नतस्यकार्यंकरणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यते परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाच मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमित्यादिःअतोमायाख्यशक्तिनिष्ठसर्गहेतुत्वंपरमात्मनउपचर्यतइतिभावः यद्वा निर्गुणस्याद्यक्षणवर्तिद्रव्यस्यगुणेऽपरिच्छिन्नस्याकाशादेःशब्दादौअशरीरस्याप्यात्मनः शरीरप्रेरणमरागादिरहितस्यायस्कांतादेर्लोहभ्रमणादौहेतुत्वंयथातथाब्रह्मणोपितादृशस्यसर्गादिहेतुत्वंभविष्यतीति तच्चसर्गादिहेतुत्वरूपमैश्वर्यंवह्न्युष्णत्ववन्मंत्रादिभिर्नविहन्यतइतिनिरंकुशमेव सवाअयमस्मात्सर्वस्यवशीसर्वस्येशानःसर्वस्याधिपतिरित्यादिश्रुतेः तपतांश्रेष्ठेतिसंबोधनेनतपःशक्त्यास्वयमेवेदंज्ञातव्यमितिसूचयति यतएवमतोब्रह्मणएवहेतोःसर्गाद्याभवंतिनात्रानुपपत्तिरित्यर्थः २ तदेवंब्रह्मणःसर्गादिकर्तृत्वमुपपाद्यब्राह्मंसर्गमुपवर्णयितुमाह तन्निबोधेति भगवानीश्वरः भगवानखिलार्थानिर्वाहकः ननुनारायणाख्यश्चेत्ब्रह्माकथंतस्योत्पत्तिर्हिरण्यगर्भःसमवर्तताग्रइत्यादिश्रुत्याकथ्यतइत्याह उत्पन्नइति उपचारतःस्वेच्छयाविर्भावस्याप्युत्पत्तिसादृश्यात्३ औपचारिकमेवतस्यायुर्मानमाह निजेनस्वकीयेनवक्ष्यमाणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवर्षशतंतस्यायुःस्मृतंतच्चायुःपराख्यंसर्वातिशयितत्वात् तदर्धंब्रह्मायुरर्धंपंचाशद्वर्षाणिपरार्धमभिधीयते ४ तेनकालेनतस्यब्रह्मणोऽन्येषांचायुषःप्रमाणस्योपपादनंसंपादनंनिबोध परिणामेतिपाठेपरिणामस्यअवसानस्योपपादनमित्यर्थः ५ अचराश्चयेतेषामपीतिशेषः ६ तदेवनिमेषादिक्रमेणाह काष्ठेत्यादिना अक्षिपक्ष्मविक्षेपोपलक्षितःकालोनिमेषः तेषंचदश काष्ठा त्रिंशत्कलामौहूर्तिकोविधिर्मुहूर्तमानप्रकारः ७ तावत्संख्यैस्त्रिंशत्संख्यैर्मुहूर्तैरेकमहोरात्रं तावंतित्रिंशदहोरात्राणिमासःसावनइतिशेषः पक्षद्वयात्मकश्चचांद्रः एतेनपंचदशदिनात्मकःपक्षइतिसूचितम् ८ सौरैर्मासैरयनप्रकारमाह तैरिति तच्छब्देनचांद्रमासाविप्रकार्षात्सौरमासालक्ष्यंते सूर्यस्यमेषाद्येकैकराशिभोगःसौरोमासः तैःषड्भिरयनं द्वेयनेइतिपाठेसंधिरार्षः अतःपरंदिव्यमानमाह अयनमित्यादिना दक्षिणमयनंदेवानांरात्रिरुत्तरमयनंदिनमिति एवंभूतैःषष्ट्युत्तरत्रिशताहोरात्रैर्देवानांवर्षंद्रष्टव्यम् ९ तैर्वर्षैश्चतुर्युगमानमाह दिव्यैरिति दिव्यैर्द्वादशभिर्वर्षसहस्रैश्चतुर्युगमित्यन्वयः १०

रार्धमभिधीयते ४ कालस्वरूपंविष्णोश्चयन्मयोक्तंतवानघ । तेनतस्यनिबोधत्वंपरिमाणोपपादनम् ५ अन्येषांचैवजंतूनांचराणामचराश्चये । भूभूभृत्सागरादीनामशेषाणांचसत्तम ६ काष्ठाःपंचदशाख्यातानिमेषामुनिसत्तम । काष्ठास्त्रिंशत्कलास्त्रिंशत्कलामौहूर्तिकोविधिः ७ तावत्संख्यैरहोरात्रंमुहूर्तैर्मानुषंस्मृतम् । अहोरात्राणितावंतिमासःपक्षद्वयात्मकः ८ तैःषड्भिरयनंवर्षमयनेदक्षिणोत्तरे । अयनंदक्षिणंरात्रिर्देवानामुत्तरंदिनम् ९ दिव्यैर्वर्षसहस्रैस्तुकृतत्रेतादिसंज्ञितम् । चतुर्युगंद्वादशभिस्तद्विभागंनिबोधमे १० चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमम् । दिव्याब्दानांसहस्राणि युगेष्वाहुःपुराविदः ११ तत्प्रमाणैःशतैःसंध्यापूर्वातत्राभिधीयते । संध्यांशकश्चतत्तुल्योयुगस्यानंतरोहिसः १२ संध्यासंध्यांशयोरंतर्यःकालोमुनिसत्तम । युगाख्यःसतुविज्ञेयःकृतत्रेतादिसंज्ञितः १३ कृतंत्रेताद्वापरश्चकलिश्चैवचतुर्युगम् । प्रोच्यतेतत्सहस्रंचब्रह्मणोदिवसंमुने १४ ब्रह्मणोदिवसेब्रह्मन्मनवश्चचतुर्दश । भवंतिपरिमाणंचतेषांकालकृतंशृणु १५ सप्तर्षयःसुराःशक्रोमनुस्तत्सूनवोनृपाः । एककालेहिसृज्यंतेसंह्रियंतेचपूर्ववत् १६ चतुर्युगानांसंख्यातासाधिकाह्येकसप्ततिः । मन्वंतरंमनोःकालःसुरादीनांचसत्तम १७ अष्टौशतसहस्राणिदिव्ययासंख्ययास्मृतम् ।

यथाक्रमंकृतयुगेचत्वारिसहस्राणित्रेतायांत्रीणिद्वापरेद्वेकलावेकंवर्षसहस्रमितिपुराविदःकालज्ञाःपंडिताः ११ तत्प्रमाणैरिति येषांसहस्राणांप्रमाणानिचत्वारित्रीणिद्वेचैकमित्युक्तानियेषांशतानांतैःशतैःपरिमितातत्तद्युगेपूर्वभाविनीसंध्योच्यते तत्तुल्यस्तावानेवयुगानंतरभाविसंध्यांशकः १२ संध्यासंध्यांशयोरंतर्मध्येयःकालःसयुगाख्यः १३ तदेवंयुगानांदशसहस्राणिवर्षाणि संध्यासंध्यांशयोश्चद्वेसहस्रेएवंद्वादशवर्षसहस्रैश्चतुर्युगमितिसिद्धं तेषांचतुर्युगाणांसहस्रंब्रह्मणोदिवसम् १४ मन्वंतरमानंवक्तुमाह ब्रह्मणइति तेषांमनूनांकालकृतंपरिमाणंशृणु १५ यत्रकालेसप्तर्षिसुरादयोयुगपत्सृज्यंतेअधिकारिणः क्रियंतेसंह्रियंतेचअधिकारहीनाःक्रियंतेतत्सूनवएवनृपाः पूर्ववदित्यादिनामन्वंतरप्रवाहोदर्शितः १६ चतुर्युगानामेकसप्ततिर्मन्वंतरमित्यन्वयः साधिकेति अत्रश्लोकाः द्विचत्वारिंशतायुक्तशतेनाभ्यधिकास्तथा दिव्याब्दाःपंचसाहस्रामासादशदिनाष्टकम् चतुर्यामामुहूर्तौद्वावष्टावपिकलास्तथा काष्ठाःसप्तदशद्वौचनिमेषौतदनंतरम् देवस्यैकनिमेषस्यसप्तमोभागइष्यतेमानुषाब्दास्तुलक्षाणिसार्धाष्टादशतत्परम् सहस्रमष्टाविंशत्यायुताचाब्दचतुःशती चतुर्विंशत्यहोराभ्यायुक्तामासाश्चषट्तथा नाड्योद्वादशतावत्यःक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाश्चतदनंतरम् पंचविंशतिकाष्ठाश्चनिमेषादशसाधिकाइति चतुर्युगसहस्रप्रमाणस्यब्रह्मादिनस्यचतुर्दशधाविभागेएकसप्ततिचतुर्युगानिभवंति अवशिष्यतेचतुर्युगषट्कम् तस्यचतुर्दशांशैर्यथागणितम् प्रतिमन्वंतरमेकसप्ततेरधिकमित्यर्थः सुरादीनांसप्तर्षयःसुराःशक्रइतिपूर्वोक्तानांमन्वंतराधिकारिणांचसएवकालः १७ तमेवमन्वंतरकालंदिव्याब्दैर्गणयतिअष्टाविति १८ तमेवमानुषाब्दैर्गणयतित्रिंशदितिद्वाभ्यां नियुतानिलक्षाणि १९ पूर्वोक्तमधिकम् २० एषोऽनंतरोक्तःकालःब्राह्मोब्रह्मरूपकारणवान्नैमित्तिकोनाम्ना ब्राह्मनैमित्तिकइतिपाठेब्रह्मशयननिमित्तजन्यइत्यर्थः प्रतिसंचरःप्रलयः २१ भूर्भुवादिकमितिसंधिरार्षः तदादिनांतेदह्यतेरुद्ररूपेणब्रह्मणैवार्थात् २२ भोगीशेषःसएवशय्यातद्वतःसन्शेतेत्रैलोक्यप्रपंचग्रासेनबृंहितःआविर्भूतब्रह्मानंदइत्यर्थः ज्ञानबृंहितइतिपाठेत्रैलोक्यस्थैर्ज्ञानमयैर्जीवैरानंदकोशमयैरेकीभूयसमृद्धज्ञानानंदइत्यर्थः २३ जनस्थैश्चिंत्यमानः महर्लोकस्थानामपितदातत्रगतत्वात्तत्प्रमाणाम् ब्रह्माहःप्रमाणाम् रा

द्विपंचाशत्तथान्यानिसहस्राण्यधिकानितु १८ त्रिंशत्कोट्यस्तुसंपूर्णाःसंख्याताःसंख्ययाद्विज । सप्तषष्टिस्तथान्यानिनियुतानिमहामते १९ विंशतिश्चसहस्राणिकालोयमधिकंविना । मन्वंतरस्यसंख्येयंमानुषैर्वत्सरैर्द्विज २० चतुर्दशगुणोह्येषकालोब्राह्ममहःस्मृतम् । ब्राह्मोनैमित्तिकोनामतस्यांतेप्रतिसंचरः २१ तदादिदह्यतेसर्वंत्रैलोक्यंभूर्भुवादिकम् । जनंप्रयांतितापार्तामहर्लोकनिवासिनः २२ एकार्णवेतुत्रैलोक्येब्रह्मानारायणात्मकः । भोगिशय्यागतःशेतेत्रैलोक्यग्रासबृंहितः २३ जनस्थैर्योगिभिर्देवश्चिंत्यमानोब्जसंभवः । तत्प्रमाणांहितांरात्रिंतदंतेसृजतेपुनः २४ एवंतुब्रह्मणोवर्षमेवंवर्षशतंचतत् । शतंहितस्यवर्षाणांपरमायुर्महात्मनः २५ एकमस्यव्यतीतंतुपरार्धंब्रह्मणोऽनघ । तस्यांतेभून्महाकल्पःपाद्मइत्यभिविश्रुतः २६ द्वितीयस्यपरार्धस्यवर्तमानस्यवैद्विज । वाराहइतिकल्पोयंप्रथमःपरिकल्पितः २७ । । इतिश्रीविष्णुपुराणेप्र०तृतीयोध्यायः ३ मैत्रेयउवाच । ब्रह्मानारायाणाख्योऽसौकल्पादौभगवान्यथा । ससर्जसर्वभूतानितदाचक्ष्वमहामुने १ पराशरउवाच । प्रजाःससर्जभगवान्ब्रह्मानारायणात्मकः । प्रजापतिपतिर्देवोयथातन्मेनिशामय २ अतीतकल्पावसानेनिशासुप्तोत्थितःप्रभुः । सत्त्वोद्रिक्तस्ततोब्रह्माशून्यंलोकमवैक्षत ३ नारायणःपरोचिंत्यःपरेषामपिसप्रभुः । ब्रह्मस्वरूपीभगवाननादिःसर्वसंभवः४इमंचोदाहरंत्यत्रश्लोकंनारायणंप्रति । ब्रह्मस्वरूपिणंदेवंजगतःप्रभ

त्रिंनैरंतर्येणशेते २४ एवंत्विति एवंभूतैरहोरात्रैःपक्षमासादिकल्पनयावर्षमेवमनेनमानेनवर्षशतमपिज्ञेयम् ततश्चतस्यमहात्मनःतद्वर्षशतमायुःपरमित्युच्यते २५ महाकल्पइतिपुष्करप्रादुर्भावादिगुणैर्महत्वान्महाकल्पइत्युच्यते २६ २७ इति॰वि॰प्र॰तृती॰ ३ अवतारोवराहस्यधरयासनकादिभिःस्तुतिश्चतुर्थेलोकानांविभागश्चनिरूप्यते १ पूर्वोपक्षिप्तंब्राह्मंसर्गप्रसंगांतरितंश्रोतुकामोमैत्रेयःपृच्छति ब्रह्मेति १ २ प्रतिज्ञातंप्रजासर्गंनिरूपयिष्यन्प्रथमंतदाधारभूतायाभूमेरुद्धारंवक्तुमाह अतीतकल्पेत्यादिना अतीतकल्पावसानेपाद्मकल्पावसाने पराशरेण अग्रेवाराहकल्पस्यधर्मकथनान्निशायांसुप्तंप्रस्वापस्तस्मादुत्थितःप्रभुर्ब्रह्मासत्त्वोद्रिक्तः प्राप्तविष्णुरूपः तस्यैववाराहाद्यवतारप्रसिद्धेः इत्यभिध्यायतोनासाविवरात्सहसानघवराहपोतोनिरगादितिभागवतोक्तेः अथवासुप्तोत्थितत्वेनप्राप्तेंद्रियादिप्रकाशोलोकेतथादृष्टत्वात् ३ सर्वसंभवःविश्वस्रष्टाशून्यंचराचरहीनंलोकमवैक्षतापश्यदितिपूर्वेणान्वयः ४ तस्यैवंनारायणाख्यांव्युत्पाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यति इमंचेति ब्रह्मस्वरूपिणंनारायणंप्रति अत्रब्रह्मानारायणएवेत्यस्मिन्नर्थइत्यर्थः ५ श्लोकमेवाहआपइति नाराःशारीरत्वेननरसंबंधिन्यः वैशब्दःसमुच्चयेनरसूनवोनरसृष्टाअपि यद्वावैयस्मान्नरसूनवःतस्मान्नाराइत्यर्थः नरोत्रपुरुषोत्तमः तदुक्तम् तास्ववात्सीत्स्वसृष्टासुसहस्रपरिवत्सरान् तेननारायणोनामयदापःपुरुषोद्भवाइति ६ ततःकिमित्यतआह तोयांतरिति पादोनद्वाभ्यां तोयस्योपरिपुष्करपर्णंदृष्ट्वातदधिष्ठानज्ञानात्तोयांतर्महींज्ञात्वातदुद्धारंकर्तुकामःप्रजापतिरन्यांतदुद्धारयोग्यांतनुमकरोदितिद्वयोरन्वयः ७ पुराकल्पादिषुमत्स्यकूर्मादिकांमधु कैटभगृहीतवेदाहरणमंदरधारणादिकार्यार्थंयथाकरोत्तद्वत्तदावाराहंवपुरास्थितस्तोयंप्रविवेशेतिपरेणान्वयः ८ यतोवेदयज्ञमयंवपुरास्थितःअतोजगतःस्थितौस्थितः वेदयज्ञाधीनत्वाज्जगतः

वाप्ययम् ५ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः । अयनंतस्यताःपूर्वंतेननारायणःस्मृतः ६ तोयांतःसमहींज्ञात्वाजगत्येकार्णवेप्रभुः । अनुमानात्तदुद्धारंकर्तुकामःप्रजापतिः ७ अकरोत्सतनूमन्यांकल्पादिषुयथापुरा । मत्स्यकूर्मादिकांतद्वद्वाराहंवपुरास्थितः ८ वेदयज्ञमयंरूपमशेषजगतःस्थितौ । स्थितःस्थिरात्मासर्वात्मापरमात्माप्रजापतिः ८ जनलोकगतैःसिद्धैःसनकाद्यैरभिष्टुतः । प्रविवेशतदातोयमात्माधारोधराधरः १० निरीक्ष्यतंतदादेवीपातालतलमागतम् । तुष्टावप्रणताभूत्वाभक्तिनम्रावसुंधरा ११ पृथ्व्युवाच । नमस्तेसर्वभूतायतुभ्यंशंखगदाधर । मामुद्धरास्मादद्यत्वंत्वत्तोऽहंपूर्वमुत्थिता १२ त्वत्तोहमुद्गतापूर्वंत्वन्मयाहंजनार्दन । तथान्यानिचभूतानिगगनादीन्यशेषतः १३ नमस्तेपरमात्मात्मन्पुरुषात्मन्नमोऽस्तुते । प्रधानव्यक्तभूतायकालभूतायतेनमः १४ त्वंकर्तासर्वभूतानांत्वंपातात्वंविनाशकृत् । सर्गादिषुप्रभोब्रह्मविष्णुरुद्रात्मरूपधृक् १५ संभक्षयित्वासकलंजगत्येकार्णवीकृते । शेषेत्वमेवगोविंदचिंत्यमानोमनीषिभिः १६ भवतोयत्परंरूपंतन्नजानातिकश्चन । अवतारेषुयद्रूपंतदर्चंतिदिवौकसः । १७ त्वामाराध्यपरंब्रह्मयातामुक्तिंमुमुक्षवः । वासुदेवमनाराध्यकोमोक्षंसमवाप्स्यति १८ यत्किंचिन्मनसाग्राह्यंयद्ग्राह्यंचक्षुरादिभिः । बुद्ध्याचयत्परिच्छेद्यंतद्रूपमखिलंतव १९ त्वन्मयाहंत्वदाधारात्वत्सृष्टात्वामुपाश्रिता । माधवीमितिलोकोयमभिधत्तेततोहिमाम् २० जयाखिलज्ञानमयजयस्थूलमयाव्यय । जयानंतजयाव्यक्तजयव्यक्तमयप्रभो २१ परावरात्मन्विश्वात्मन्जययज्ञपतेऽनघ । त्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारस्त्वमग्नयः २२

स्थितेः ९ सृष्ट्यर्थंसनकाद्यैरभिष्टुतः सर्वाधारपृथिव्युद्धारेकासौस्थितइत्यतआहआत्माधारःस्वेमहिमनिस्थितः धराधरःधरांधर्तुंप्रवृत्तः १० तदावसुंधरातदधिष्ठात्रीतंतुष्टाव ११ अस्मात्पातालान्मामुद्धर त्वत्तोहेतोःपूर्वंउत्थिताउत्पन्ना १२ उद्गताचउपादानकारणमपिगगनादीनांममापित्वमेवेत्याह त्वन्मयात्वन्मयी १३ उपादाननिमित्तत्वादिकंसाधयंतीपरब्रह्मस्वरूपत्वेन पूर्वोक्तवस्तुरूपत्वेनप्रणमति नमस्तेइति १४ ब्राह्मादिरूपेणसृष्ट्यादिकर्तात्वमेवेत्याह त्वमिति पातापालयिता १५ शेषेशयनंकरोषि १६ रागिणोमुमुक्षवश्चतवस्वरूपाज्ञानादवताररूपमेवस्वार्थसिद्धयेचर्तीत्याह भवतइतिसार्धेन १७ व्यतिरेकमाह वासुदेवमिति १८ मनसाग्राह्यंसंकल्पम् बुद्ध्याचयत्परिच्छेद्यमध्यवसेयम् १९ मनतुत्वदीयत्वंलोकप्रसिद्धमेवेतिसहेतुकमाह त्वन्मयेति त्वन्मयात्वदुपादाना त्वदाधारात्वयिवर्ते उपाश्रिताशरणंगताइत्येतैर्हेतुभिस्ततआरभ्यलोकोयंमांमाधवींत्वदीयामभिधत्ते २० अखिलज्ञानमयकृत्त्वविषयज्ञानस्वरूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थूलमयघटादिस्वरूप स्थूलजयेतिवापाठः अनंतपरिच्छेदत्रयशून्या २१ परावरात्मन्नुत्कृष्टावरस्वरूपकार्यकारणरूपेतिवा तत्रहेतुर्विश्वात्मानिति यज्ञपतेयज्ञफलप्रदवषट्कारमंत्ररूपस्त द्वाच्योवा २२ यज्ञपुरुषोयज्ञमूर्तिर्यज्ञाराध्योवा ताराअश्विन्यादीनि नक्षत्राण्यन्यानि विपरीतंवा उभयथापिप्रयोगदर्शनात् २३ मूर्तमूपरिच्छिन्नपरिमाणंकठिनंवा तद्विपरीतममूर्तम् तदखि लंत्वम् २४ भूयोभूयइत्यादरद्योतनार्थम् सामस्वरएवध्वनिर्यस्यसघर्घरमितिवराहजातिध्वन्यनुकरणम् तत्परितोयथास्यात्तथाजगर्जध्वनदत् २५ समुत्क्षिप्यसमुद्धृत्य उत्पलपत्रसन्नि भःस्निग्धश्यामः पाठांतरेलघुत्वायधराविशेषणम् २६ तत्संप्लवांभस्तदेकार्णवजलम् अपकल्मषानपिमुनीन्प्रकर्षेणक्षालयामासअतिनिर्मलानकरोत् भगवच्छ्वासस्यवेदरूपेणातिपावनत्वा त् २७ रोमांतरस्थामुनयोजलमग्नाःक्लिष्टाविधूननेसतिजलापगमात्जुषंतिप्रीताभवंति यद्वारोम्णांजलपर्यंतंगमनाद्रोमांतरस्थाःसनकाद्याजुषंतिसेवंतइत्यर्थः २८ वराहस्यखुराग्रेणविक्षते

त्वंवेदास्त्वंतदंगानित्वंयज्ञपुरुषोहरे । सूर्यादयोग्रहास्तारानक्षत्राण्यखिलंचयत् २३ मूर्तामूर्तमदृश्यंचदृश्यंचपुरुषोत्तमः । यच्चोक्तंयच्चनैवोक्तंमयात्रप रमेश्वर २४ तत्सर्वंत्वंनमस्तुभ्यंभूयोभूयोनमोनमः । एवंसंस्तूयमानस्तुपृथिव्यापृथिवीधरः । सामस्वरध्वनिःश्रीमाञ्जगर्जपरिघर्घरम् २५ ततःस मुत्क्षिप्यधरांसदंष्ट्रयामहावराहःस्फुटपद्मलोचनः । रसातलादुत्पलपत्रसन्निभःसमुत्थितोनीलइवाचलोमहान् २६ उत्तिष्ठतातेनमुखानिलाहतंतत्सं प्लवांभोजनलोकसंश्रयान् । प्रक्षालयामासहितान्महाद्युतीन्सनंदनादीनपकल्मषान्मुनीन् २७ उत्तिष्ठतस्तस्यजलार्द्रकुक्षेर्महावराहस्यमहींवि धार्य । विभुत्वतोवेदमयंशरीरंरोमांतरस्थामुनयोजुषंति २८ प्रयांतितोयानिखुराग्रविक्षतेरसातलेधःकृतशब्दसंतति । श्वासानिलास्ताःपरितःप्र यांतिसिद्धाजनेयेनियतावसंति २९ तंतुष्टुवुस्तोषपरीतचेतसोलोकेजनेयेनिवसंतियोगिनः । सनंदनाद्यानतिनम्रकंधराधराधरंतारतरोद्धतेक्षणम् । ३० जयेश्वराणांपरमेशकेशवप्रभोगदाशंखधरासिचक्रधृक् । प्रसूतिनाशस्थितिहेतुरीश्वरस्त्वमेवनान्यत्परमंचयत्पदम् ३१ पादेषुवेदास्तवयूपदंष्ट्र दंतेषुयज्ञाश्चितयश्चवक्त्रे । हुताशजिह्वोसितनूरुहाणिदर्भाःप्रभोयज्ञपुमांस्त्वमेव ३२ विलोचनेराज्यहनीमहात्मन्सर्वाश्रयंब्रह्मपरंशिरस्ते । सू

विदीर्णेरसातलेसतितेनद्वारेणाधस्तात्तोयानिप्रयांति कथं कृतशब्दसंततिसशब्दंयथास्यात् सप्तम्यंतपाठेकृताशब्दसंततिर्यस्मिन्रसातलेतस्मिन्नधःप्रयांतीत्यर्थः श्वासानिलेनास्ताःक्षि प्ताः जनेजनलोके अत्रश्लोकपाठेपौर्वापर्यव्यतिक्रमःकुत्रचित् २९ तोषेणपरीतंव्याप्तंचेतोयेषांते तारतरःअत्युच्चशब्दयुक्तःसचासावुद्धतेक्षणउन्नतदृष्टिश्चतम् धीरतरोद्धतेक्षणमितिपाठेनिःशंको दारेक्षणमित्यर्थः ३८ हेईश्वराणांब्रह्मादीनांपरमेश अतोजगतःप्रसूत्यादीनांत्वमेवहेतुरीश्वरश्चानियंता यच्चपरमंपदंतदपिवत्तोनान्यत्त्वमेवपरमंब्रह्मेत्यर्थः ३१ परमतत्त्वेनस्तुत्वाप्रकृतावतार रूपंयज्ञरूपकेणस्तुवंति पादेष्वितित्रिभिः यज्ञपुमांस्त्वमेवेतिप्रतिज्ञातंतत्संपादनंपादेष्वित्यादिभिः चतुःसंख्यत्वाद्यज्ञांगत्वाच्चवेदायज्ञमयस्यतस्यपादत्वेनरूप्यंते हेयूपदंष्ट्रउन्नतत्वाद्यूपाए ववहिर्निर्गतादंष्ट्रायस्य पुरोडाशभक्षणार्थत्वाच्चर्वणसाधनत्वेनयज्ञारूप्यंते चितयःश्येनचितिंचिन्वीतकंकचितंचिन्वीतेत्यादिश्रुत्युक्ताअग्निस्थानानि वक्त्रेहविर्निक्षेपस्थाने हविःसा रग्राहकत्वात्हुताशएवजिह्वायस्य दर्भास्तवतनूरुहाणिरोमाणि ३२ राज्यहनीतमःप्रकाशधर्मकेयज्ञकालात्मकेतवविलोचने निमेषोन्मेषाभ्यांतयोरपितमःप्रकाशधर्मत्वात् परंब्रह्मतव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरःसूक्तानिवैष्णवादीनिसटाकलापःस्कंधकेशसंदर्भः ऋक्संदर्भरूपत्वात्सूक्तानां हवींषिघ्राणेंद्रियंगंधवत्त्वसाम्यात् ३३ स्रुक्तुंडेत्यादिचत्वारिसंबोधनानिस्रुक्जुहूस्तुंडंयस्य वराहमु
खाकारत्वात्स्रुचः सामस्वरएवधीरोनादोयस्य प्राग्वंशःपत्नीशालायाःपूर्वोभागः पूर्वभागोग्निशालायाःप्राग्वंशःपरिकीर्तितइतिवचनात् सकायोयस्य अखिलानिसत्राणिद्वादशाहादीनिसं
धयोयस्य अखिलसत्रसंधेतिपाठेसंधामर्यादाइत्यर्थः पूर्तम् स्मार्तोधर्मःइष्टंश्रौतोधर्मःतेश्रवणौयस्यसत्वमसि सनातनात्मन्नित्यमूर्ते ३४ तदुपपादयति पदक्रमेति पदानांक्रमणंक्रमःते
नक्रांतःक्रांतवान् यद्वापदक्रमोवेदाध्येतृप्रसिद्धौक्रांतंक्रमणंयस्यतत्संबोधनम् भवंतंविश्वस्यांतंसंहारकंआदिंजनकंस्थितिंपालकंचविद्मइत्यन्वयः अतःपरमेश्वरोसिनाथश्चत्वमेवासि नाथ्यते
प्रार्थ्यतेइतिनाथःप्रसीदसर्गार्थमितिभावः ३५ किंचतेतवदंष्ट्राग्रेविन्यस्तमेतद्भूमंडलंविभाव्यतेप्रतीयते किमिवपद्मवनंविगाहतोविहरतअर्थाद्गजेंद्रस्यतववादंष्ट्राग्रेधृतपंकंसरोजिनीपत्रमिव
३६ द्यावापृथिव्योर्यदंतरंअंतरिक्षंतत्तववपुषाव्याप्तम् जगद्व्याप्तौसमर्थादीप्तयोयस्यहेतथाभूत जगद्व्यापिसमस्तेतिपाठस्तुसुगमः ३७ तववपुषाव्याप्तमित्युक्तेव्याप्यमपेक्ष्यतेतच्चपरमार्थतो

क्तान्यशेषाणिसटाकलापोघ्राणंसमस्तानिहवींषिदेव ३३ स्रुक्तुंडसामस्वरधीरनादप्राग्वंशकायाखिलसत्रसंधे । पूर्तेष्टधर्मश्रवणोसिदेवसनातना
त्मन्भगवन्प्रसीद ३४ पदक्रमक्रांतभवंतमंतमादिंस्थितिंचाक्षरविश्वमूर्ते । विश्वस्यविद्मःपरमेश्वरोसिप्रसीदनाथोसिचराचरस्य ३५ दंष्ट्राग्रवि
न्यस्तमशेषमेतद्भूमंडलंनाथविभाव्यतेते । विगाहतःपद्मवनंविलग्नंसरोजिनीपत्रमिवोढपंकम् ३६ द्यावापृथिव्योरतुलप्रभावयदंतरंतद्वपुषातवैव ।
व्याप्तंजगद्व्याप्तिसमर्थदीप्तेहितायविश्वस्यविभोभवत्वम् ३७ परमार्थस्त्वमेवैकोनान्योऽस्तिजगतःपते । तवैवमहिमायेनव्याप्तमेतच्चराचरम् ३८ यदे
तद्दृश्यतेमूर्तमेतज्ज्ञानात्मनस्तव । भ्रांतिज्ञानेनपश्यंतिजगद्रूपमयोगिनः ३९ ज्ञानस्वरूपमखिलंजगदेतदबुद्धयः । अर्थस्वरूपंपश्यंतोभ्राम्यं
तेमोहसंप्लवे ४० येतुज्ञानविदःशुद्धचेतसस्तेऽखिलंजगत् । ज्ञानात्मकंप्रपश्यंतित्वद्रूपंपरमेश्वर ४१ प्रसीदसर्वसर्वात्मन्भवायजगतामिमां । उ
द्धरोर्वीममेयात्मन्शन्नोदेह्यब्जलोचन ४२ सत्त्वोद्रिक्तोसिभगवन्गोविंदपृथिवीमिमाम् । समुद्धरभवायेशशन्नोदेह्यब्जलोचन ४३ सर्गप्रवृत्तिर्भव

नास्तीत्याहुः परमार्थइति अन्यश्चेन्नास्तिकिंवपुषाव्याप्तमित्युक्तंतत्राहुः तवैवैषमहिमामायानुभावः कोऽसौयेनमायानुभावेनचराचरंविन्यस्यव्याप्तंसएषः ३८ चराचरस्यमायाविलसितत्वमेवा
हुःयदेतन्मूर्तभूतात्मकंरूपंदृश्यतेएतज्ज्ञानात्मनोज्ञानघनस्यज्ञानमयमेव ज्ञानात्मकंतवेतिवापाठः अयोगिनस्त्वज्ञाभ्रांतिज्ञानेनजगद्रूपंभूतमयंपश्यंतीत्यर्थः ३९ इदंवाराहरूपंत्वयालीलया
धृतमितिकिंवक्तव्यंयतोवस्तुतस्त्वद्रूपाव्यतिरेकाज्जगदपिज्ञानात्मकमेवतववपुरित्याहुः ज्ञानस्वरूपमिति मोहसंप्लवेसंसारसागरे ४० ज्ञानात्मकमेवसर्वमित्यत्रविद्वदनुभवंप्रमाणयंति ये
त्विति ज्ञानंब्रह्मवेदांतशास्त्रंवातद्विदः श्रुतिश्च सर्वंखल्विदंब्रह्मऐतदात्म्यमिदंसर्वमित्यादिः ४१ स्तुत्वाप्रकृतमाहुः प्रसीदेति सर्वसर्वात्मन्सकलजडाजडस्वरूप भवत्यस्मिन्निति भवोनिवा
सस्तदर्थमुर्वीमुद्धर एवंशंसुखंनोस्मभ्यंदेहि धेहीतिपाठेधारयेत्यर्थः ४२ सांप्रतंतवेदमेवयुक्तमित्याहुः सत्त्वोद्रिक्तइतिद्वाभ्यांअब्जवच्छ्रीनिलयदृष्टेअब्जवन्निर्लेपदृष्टेअब्जस्यदृपुंडरीकस्य
लोचनवत्प्रकाशकेतिचत्रिषुश्लोकेषुयथाक्रमंव्याख्येयम् तेनास्माकमभिप्रेतंपृथिव्युद्धरणादिकंत्वंजानासीतिभावः ४३ एषासृष्टौभवतःप्रवृत्तिर्जगतामुपकारिणीभवतुइतिसंबंधः ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४५ महतीनौरिवविततत्वाद्विस्तृतत्वात्संप्लवंनिमज्जनंनयाति ४६ यथाविभागंयथास्थानम् ४७ गिरयएवनसंतिकानचिनोदित्यतआह प्रागिति अमोघेनाव्यर्थेन अमोघवाञ्छितः स त्यसंकल्पः ४८ यथातथंयथावत्सप्तद्वीपात्मकंभूविभागंभूराद्यांश्चतुरोलोकान्यथापूर्वसमकल्पयत् संकल्पेनैवसृष्टवान् पातालेनसहभूरादीनांचतुष्टयम् यद्वामहर्लोकस्यापिसंकर्षणमुखा निलोष्मशून्यतयाविनष्टप्रायत्वाच्चतुरोलोकानित्युक्तम् तथाचश्रुतिः सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतारिक्षमथोस्वरितिदिवःपृथगुपादानात्स्वशब्देनमहर्लोकउच्यते ४९तदेवंधरोद्धारलोकरचनापर्यंतावराहलीलोक्ता अथतेनैवब्रह्मरूपेणकृतांदेवादिसृष्टिमाह ब्रह्मेति ५०रजसावृतःसृष्टिंचकारेत्युक्तंरजोगुणस्यकर्मासक्तिदुःखादिहेतुत्वात्ब्रह्मणोनित्यंकर्मदु. खित्वादिप्राप्तिमाशंक्याह निमित्तमात्रमिति असौब्रह्मरूपधरःसृज्यानांपदार्थानांयानिसर्गकर्माणितेषांनिमित्तमात्रंपर्जन्यवत्सान्निधिमात्रेणसाधारणंकारणम्नतुप्रतिसृज्यंस्वयंव्याक्रियतइति

तोजगतामुपकारिणी । भवत्वेषानमस्तेस्तुशन्नोदेह्यब्जलोचन ४४ एवंसंस्तूयमानस्तुपरमात्मामहीधरः । उज्जहारमहींक्षिप्रंन्यस्तवांश्चमहांभसि ४५ तस्योपरिजलौघस्यमहतीनौरिवास्थिता । विततत्वात्तुदेहस्यनमहीयातिसंप्लवं ४६ ततःक्षितिंसमांकृत्वापृथिव्यांसोचिनोद्गिरीन् । यथाविभागंभगवाननादिःपुरुषोत्तमः ४७ प्राक्सर्गदग्धानखिलान्पर्वतान्पृथिवीतले । अमोघेनप्रभावेणससर्जामोघवांछितः ४८ भूविभागंततःकृत्वासप्तद्वीपान्यथातथम् । भूराद्यांश्चतुरोलोकान्पूर्ववत्समकल्पयत् ४९ ब्रह्मरूपधरोदेवस्ततोसौरजसावृतः । चकारसृष्टिंभगवांश्चतुर्वक्त्रधरोहरिः ५० निमित्तमात्रमेवासौसृज्यानांसर्गकर्मणाम् । प्रधानकारणीभूतायतोवैसृज्यशक्तयः ५१ निमित्तमात्रंमुक्त्वैकंनान्यत्किंचिदपेक्ष्यते । नीयतेतपसांश्रेष्ठस्वशक्त्यावस्तुवस्तुताम् । ५२ । । इतिश्रीविष्णुपुराणेप्रथमेंशेचतुर्थोध्यायः । ४ । । मैत्रेयउवाच । । यथाससर्जदेवोसौदेवर्षिपितृदानवान् । मनुष्यतिर्यग्वृक्षादीन्भूव्योमसलिलौकसः १ यद्गुणंयत्स्वभावंचयद्रूपंचजगद्द्विज । सर्गादौसृष्टवान्ब्रह्मातन्ममाचक्ष्वविस्तरात् २ पराशरउवाच । । मैत्रेयकथयाम्येषशृणुष्वसुसमाहितः । यथाससर्जदेवोसौदेवादीनाखिलान्विभुः ३ सृष्टिंचिंतयतस्तस्यकल्पादिषुयथापुरा ।

भावः तदुक्तम् यथासंनिधिमात्रेणसर्गोयंजायतेयतइति अत्रसर्गेत्युपलक्षणंपालनादिकर्मणामित्यपिबोद्धव्यम् तर्हिमुख्यंकिंकारणमित्यतआह प्रधानेति प्रधानंमुख्यमसाधारणंकारणंउद्भूताःसृज्यशक्तयःप्रातिस्विकस्वभावसंस्काररूपसृज्यपरिणामसमर्थान्येव ५१ तद्विवृणोति निमित्तमात्रंमुक्त्वाविहायपरिणामार्थनान्यदसाधारणंकारणमपेक्ष्यतेकिंतुस्वशक्त्यावस्तुसूक्ष्मंवस्तुतांस्थूलतांनीयते यथातृणादिबीजेसूक्ष्मतयास्थितमंकुरादिपर्जन्येसतितथातयापरिणमतेतद्वत् अतोनोक्तदोषइत्यर्थः ५२ इतिश्री रत्नगर्भभट्टाचार्यकृतायांवै० प्र० चतुर्थोध्यायः ४ अविद्यामुख्ययोस्तिर्यगूर्ध्वावाक्स्रोतसामपि विसृष्टिःपंचमेप्रोक्तास्वमुखेभ्यस्तथापरा ब्रह्मरूपधरोदेवःसृष्टिंचकारेत्युक्तंतत्प्रकारंजिज्ञासुःपृच्छति यथेतिद्वाभ्यां असौब्रह्मा भूव्योमसलिलान्योकांसियेषांतान् १ यद्गुणमित्यादि गुणःसत्त्वादिः स्वभावःशीलम् शांतघोरत्वादीतियावत् रूपंद्विपाच्चपुष्पादाद्याकारः यादृग्गुणशीलाकारमित्यर्थः २ ३ अविद्यांविनासृष्टेष्वपिदेहेषुजीवानांकर्तृत्वभोक्तृत्वाद्यसंभवात्प्रथममविद्याविर्भावमाह सृष्टिमिति अबुद्धिपूर्वकःअनवधानमूलः तमोमयःअविद्यावृत्तिरूपः यथापुरेत्यनेनसृष्टेःपूर्वपूर्वसंस्कारजन्यत्वेनप्रवाहाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्वंसूचयति ४ तमेवाह तमइति अंधसंज्ञितःतामिस्रःअंधतामिस्रः पंचपर्वाणितमआदिवृत्तिविशेषायस्याःसा तत्रतमोदेहादावनात्मन्यात्माभिमानः मोहस्तत्संबंधिषुपुत्रादिषुस्वाम्यह मस्मीत्यभिमानः महामोहः शब्दादिभोगस्पृहा तामिस्रस्तत्प्रतिघातेक्रोधः अंधतामिस्रस्तद्विनाशादिशंकयानित्यरक्षणाद्यभिनिवेशः एतेपंचविपर्ययाःपातंजलेक्लेशशब्देनोक्ताः अविद्या स्मितारागद्वेषाभिनिवेशाःक्लेशाइति ५ तदेवमविद्यायांप्रादुर्भूतायांप्रथममत्यंततमोमयंस्थावरसर्गमाह पंचधेतिसार्धेन तस्यध्यायतःसतोनगात्मकःस्थावररूपःसर्गःपंचधावस्थितः वृक्षगुल्मलतावीरुत्समस्तास्तृणजातयइतिपंचमेंशेवक्ष्यमाणःपंचप्रकारोजातइत्यर्थः पर्वतानांप्राग्वराहकृतत्वात् पक्षच्छेदानंतरजातस्थावरत्वाच्चनैतेष्वंतर्भावः तस्यसामान्यलक्षणमप्रति बोधवान्कोहमितिपरामर्शशून्यः बहिःशब्दादिविषयेअंतेसुखादौवाऽप्रकाशः प्रकृष्टज्ञानशून्यः बहिरंतःप्रकाशश्चेतिपाठेबहिरप्रतिबोधवानितिसंबंधः अंतःप्रकाशोयस्यसः सुखादि संवेदनादित्यर्थः संवृतात्मामूढस्वभावः नगात्मकोऽगमनस्वभावः ६ मुखेदेवादिसर्गादौजातत्वान्मुख्याःप्रोक्ताःनिगमेनेतिशेषः मुख्यसर्गापरितोषेणसर्गांतरंध्यायतस्तस्मात्किंचिदुत्कृष्टस्ति र्यक्सर्गोजातइत्याह तंदृष्ट्वेतिसार्धैस्त्रिभिः तंमुख्यसर्गमसाधकंपुरुषार्थहीनंदृष्ट्वाअपरंसर्गममन्यत्अमन्यतदध्यौ अमन्यतपरंपुनरितिवापाठः ७ तिर्यक्स्रोताभ्यवर्ततइतिसंधिरार्षः

अबुद्धिपूर्वकःसर्गःप्रादुर्भूतस्तमोमयः ४ तमोमोहोमहामोहस्तामिस्रोह्यंधसंज्ञितः । अविद्यापंचपर्वैषाप्रादुर्भूतामहात्मनः ५ पंचधावस्थितःसर्गोध्या यतोप्रतिबोधवान् । बहिरंताप्रकाशश्चसंवृतात्मानगात्मकः ६ मुख्यानगायतश्चोक्तामुख्यसर्गस्ततस्त्वयम् ७ तंदृष्ट्वासाधकंसर्गममन्यदपरंपु नः ७ तस्याभिध्यायतःसर्गस्तिर्यक्स्रोताभ्यवर्त्तत । यस्मात्तिर्यक्प्रवृत्तःसतिर्यक्स्रोतःस्ततःस्मृतः ८ पश्वादयस्तेविख्यातास्तमःप्रायाह्यवेदिनः । उत्पथग्राहिणश्चैवतेज्ञानेज्ञानमानिनः ९ अहंकृताअहंमानाअष्टाविंशद्वधान्विताः । अंतःप्रकाशास्तेसर्वेआवृताश्चपरस्परम् १० तमप्यसाधकं मत्वाध्यायतोन्यस्ततोभवत् । ऊर्ध्वस्रोतस्तृतीयस्तुसात्विकोर्ध्वमवर्तत ११ तेसुखप्रीतिबहुलाबहिरंतश्चनावृताः । प्रकाशाबहिरंतश्चऊर्ध्वस्रोतो

तिर्यक्स्रोतोभ्यवर्ततइतिपाठेतस्यब्रह्मणस्तिर्यक्स्रोतः समयजातत्वात्सर्गोपितिर्यक्स्रोतोभिधीयतेउपचारादतःषंढत्वम् तथाहि बुद्धिकर्मेंद्रियचित्तेप्रवाहेंबुनिचालने स्रोतोगतौसमुद्रेच सांतमिच्छंतिसूरयइतिशब्दमहार्णवः तथाचब्रह्मणोबुद्धिकर्मेंद्रियचित्तानितिर्यंचिअंतरालस्थितानियदातदाजातइत्यर्थः तिर्यक्स्रोतस्त्वेहेत्वंतरमाह यस्मादिति तिर्यक्प्रवृत्तमाहारगतिर्यस्य सः ८ तेतत्सर्गभवाःपश्वादयःआदिशब्दात्पक्ष्यादयः तेषांलक्षणंतमःप्रायाःतमोधिकाः अवेदिनःअनुसंधानशून्याः तथाचश्रुतिः अथैषांपशूनामशनापिपासेएवअभिज्ञानंनविज्ञातंवदं तिनविज्ञातंपश्यंतिनविदुःश्वस्तनंनलोकालोकाविति उत्पथग्राहिणउन्मार्गवर्तिनःभक्ष्यादिविवेकहीनाइत्यर्थः अज्ञानेमिथ्याज्ञानेसम्यक्ज्ञानाभिमानिनः ९ अहंकृताःसाहंकारमेवकृतंक र्मयेषांते अहंमानाः अहंकारएवमानोबोधोयेषांते अष्टाविंशद्वधान्विताः अष्टाविंशतिभिर्वधैरसक्तिभिरन्विताः वधाश्चसांख्योक्ताएकादशेंद्रियाणांवाधिर्यादयएकादशबुद्धेर्नवतुष्टयोष्टौसि द्धिविपर्ययाश्चेत्येवमष्टाविंशतिः यद्यप्येतेमनुष्याणामपितथापिपशूनांबाहुल्यादेवमुक्तम् अष्टाविंशद्विधात्मिकाइतिपाठेष्टाविंशतिभेदस्वभावाः तिरश्चामष्टमःसर्गोऽष्टाविंशद्विधोमतइत्यत्र भागवतोविवृतास्ततोज्ञेयाः अंतःसुखादौप्रकाशःप्रकृष्टंज्ञानंयेषांतेआवृताश्चपरस्परम् अन्योन्याभिजात्यस्वभावानभिज्ञाः १० तिर्यक्सर्गापरितोषेणपुनर्ध्यायतोदेवसर्गोभूदित्याह तमपीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिभिः ऊर्ध्वंउपरिदेहस्यस्रोतआहारग्रहणंयस्यसःवृक्षादीनांतथालेपिरूढ्यादेवाएवोच्यंतेअमृतदर्शनादेवतृप्तेः तथाचश्रुतिःनहवैदेवाअश्नंतिनापिपिबंतिएतदेवामृतंदृष्ट्वातृप्यंतीति सात्त्विकंसुखप्रकाशादिबहुलंऊर्ध्वमधिकंयथास्यादेवमवर्तत ११ तदेवाह तइति सुखंविषयेंद्रियसंयोगजं प्रीतिस्तन्निमित्तोहर्षः तेबहुलेयेषांते बहिःशब्दादौअंतःसुखादौचनादृताअनादृतज्ञानाः तत्रहेतुःप्रकाशाइति १२ तुष्ट्यात्मकःतुष्ट्याधारः तुष्टात्मनइतिक्वचित्पाठः तदाब्रह्मणोविशेषणम् अतआहतस्मिन्निति १३ तत्राप्यसाधकेअपरितोषेणमनुष्यसर्गंकृतवानित्याह ततोन्यमितिचतुर्भिःमुख्यसर्गादिसंभवान्सात्त्विकात्मत्वान्मनुष्याधिकारिकत्वाच्छास्त्रस्यान्येषांधर्मासाधकत्वात् १४ सत्याभिध्यायिनःसत्यसंकल्पस्यभगवद्ध्यानशीलस्यवा अव्यक्तादितिमुख्यादिसर्गेपिसमानम् तथाचवायुः अव्यक्ताज्जायतेचास्यमनसायद्यदिच्छति वशीकृतत्वात्त्रैगुण्यात्साकांक्षत्वात्स्वभावतइति प्रादुर्भूतःसर्गइतिशेषः साधकःपुरुषार्थस्येतिशेषः १५ यस्मादर्वागधःप्रविष्टेनाहारेणव्यवर्त्ततस्मात्तेसाधकसर्गजाताअर्वाक्स्रोतसइत्यन्वयः प्रकाशःसत्वंतत्प्रचुराः अतोबहिरंतःप्रकाशाः तमोद्रिक्ताइतिसंधिरार्षः ततोदुःखबहुलाः रजोधिकाः ततोभू

भवाःस्मृताः १२ तुष्ट्यात्मकस्तृतीयस्तुदेवसर्गस्तुयःस्मृतः । तस्मिन्सर्गेभवत्प्रीतिर्निष्पन्नेब्रह्मणस्तदा १३ ततोन्यंसतदादध्यौसाधकंसर्गमुत्तमम् । असाधकांस्तुतान्ज्ञात्वामुख्यसर्गादिसंभवान् १४ तथाभिध्यायतस्तस्यसत्याभिध्यायिनस्ततः । प्रादुर्भूतस्तदाव्यक्तादर्वाक्स्रोतस्तुसाधकः । १५ यस्मादर्वाग्व्यवर्तंततोर्वाक्स्रोतसस्तुते । तेचप्रकाशबहुलास्तमोद्रिक्तारजोधिकाः १६ तस्मात्तेदुःखबहुलाभूयोभूयश्चकारिणः । प्रकाशाबहिरंतश्चमनुष्याःसाधकास्तुते १७ इत्येतेकथिताःसर्गाःषडत्रमुनिसत्तम । प्रथमोमहतःसर्गोविज्ञेयोब्रह्मणस्तुसः १८ तन्मात्राणांद्वितीयश्चभूतसर्गोहिसःस्मृतः । वैकारिकस्तृतीयस्तुसर्गऐंद्रियकस्मृतः १९ इत्येषःप्राकृतःसर्गःसंभूतोऽबुद्धिपूर्वकः । मुख्यसर्गश्चतुर्थस्तुमुख्यावैस्थावराःस्मृताः २० तिर्यक्स्रोतस्तुयःप्रोक्तस्तैर्यग्योन्यःसउच्यते । तदूर्ध्वस्रोतसांषष्ठोदेवसर्गस्तुसःस्मृतः २१ ततोर्वाक्स्रोतसांसर्गःसप्तमःसतुमा

योभूयःकारिणःकर्मशीलाःसाधकाःकर्मज्ञानाधिकारित्वात् १६ १७ षडत्रेतिद्वितीयाध्यायोक्तैःसहषडेतेसर्गाः तथाहि इंद्रियदेवतासर्गस्यबाह्यदेवतासर्गेणैक्यंइंद्रियसर्गेणसहाभेदश्चविवक्ष्यते अहंकाराविद्यासर्गयोर्बुद्धिभेदसर्गत्वात्बुद्ध्यात्ममहत्तत्त्वसर्गांतर्भावः भौतिकब्रह्मांडसर्गस्यभूतसर्गांतर्भावः एवंसतिमहत्तत्त्वभूतेंद्रियसर्गास्त्रयः मुख्यतिर्यङ्मनुष्यसर्गाश्चत्रयइत्येवंषडेतेसर्गाः कथिताइत्यर्थः सप्तात्रेतिपाठेमुख्यतिर्यक्सुरनरसर्गाश्चत्वारः द्वितीयाध्यायोक्तामहत्तत्त्वभूतेंद्रियसर्गाश्चत्रयइत्येवम् सप्त तानेवावांतरभेदविवक्षयानवविधानाहप्रथमोमहतइति विराट्शरीराभिमानिनोब्रह्मणोमहत्तत्त्वंसम्यगव्यक्तालिंगशरीरमतोसौब्रह्मणःसर्गइत्यर्थः यद्वाब्रह्मापरमात्मातस्मान्महतःसर्गइत्यर्थः १८ देवतासर्गाभेदविवक्षयाइंद्रियसर्गस्यवैकारिकत्वमुच्यते १९ इत्येषःप्राकृतःप्रकृतीनांब्रह्मांडकारणानांसर्गइत्यर्थः अबुद्धिरविद्याप्रकृतिस्तत्पूर्वकःसंभूतः यद्वा बुद्धिर्महत्तत्त्वंतत्पूर्वकस्तदादिरित्यर्थः पंचपर्वाविद्यासर्गस्यमहत्तत्त्वसर्गांतःपातात्मुख्यसर्गमाह मुख्यसर्गइति २० तिर्यक्पश्वादिरेवयोनिःकारणंयस्यसतिर्यग्योनिःसएवतैर्यग्योन्यःस्वार्थेष्यञ् तिर्यग्योन्यइतिपाठेभवार्थेयत्प्रत्ययः सपंचमःसर्गउच्यतइत्यर्थः ततोर्ध्वस्रोतसामितिसंधिरार्षः तदूर्ध्वस्रोतसामितिपाठेतदित्यव्ययमानंतर्ये सदेवसर्गःस्मृतः २१ सात्त्विकतामसोभयस्वभावदेवसर्गमाह अष्टमइति सचवायुपुराणेविवृतः अष्टमोनुग्रहःसर्गःसचतुर्धा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवस्थितः विपर्ययेणवाशक्त्यासिद्ध्यातुष्ट्यातथैवचस्थावरेषुविपर्यासात्तिर्यग्योनिषुशक्तितः सिद्ध्यात्मनामनुष्येषुतुष्ट्यादेवेषुकृत्स्नशइति सोनुग्रहःसर्गःस्थावरेषुतिर्यक्षुचतमःपोषकत्वात्तामसः देवेषुमनुष्येषुचसिद्धितुष्टिरूपसत्त्वपोषकत्वात्सात्त्विकइत्यर्थः २२ पंचैतेमुख्यसर्गादयोवैकृताविकृतिजन्याः देवतासर्गांतरमाह प्राकृतइति रुद्रसनत्कुमारादीनांसर्गःप्राकृतोवैकृतश्च तत्रसनत्कुमारादीनांसर्गोवैकृतोविकृतिभूतेनब्रह्मणाकृतत्वाद्रुद्रसर्गःप्राकृतःप्रकृतितःस्वयमेवोद्भवतत्त्वात् तथाचवक्ष्यति प्रादुरासीत्प्रभोरंकेकुमारोनीललोहितइति अन्येत्वाहुः रुद्रसर्गोविकृत्यंतरजनकत्वात्प्राकृतःसनत्कुमारादीनांसर्गोवैकृतएवविकृत्यंतराजनकत्वादिति अन्येतूपसंहारमाहुः प्राकृतस्त्रिविधः वैकृतःपंचविधइत्यष्टविधःसर्गउक्तइतिशेषः कौमारोनवमइति अयंतु प्राकृतएव तथाचकूर्मपुराणे महदादिसर्गमभिधाय नवमश्चैवकौमारःप्राकृतोवैकृतास्त्विमे जगत्सृजतईशस्यजगतोमूलहेतवः २३ एतेनवसर्गाःसमाख्याताइत्यन्वयः २४ २५ ब्रह्मणः

नुषः । अष्टमोनुग्रहःसर्गःसात्विकस्तामसश्चसः २२ पंचैतेवैकृताःसर्गाःप्राकृतास्तुत्रयःस्मृताः । प्राकृतोवैकृतश्चैवकौमारोनवमःस्मृतः २३ इत्येतेतुसमाख्यातानवसर्गाःप्रजापतेः । प्राकृतावैकृताश्चैवजगतोमूलहेतवः । सृजतोजगदीशस्यकिमन्यच्छ्रोतुमिच्छसि २४ मैत्रेयउवाच । । संक्षेपात्कथितःसर्गोदेवादीनांत्वयामुने । विस्तराच्छ्रोतुमिच्छामित्वत्तोमुनिवरोत्तम २५ पराशरउवाच । कर्मभिर्भाविताःपूर्वैःकुशलाकुशलैस्तुताः । ख्यात्यातयाद्यनिर्मुक्ताःसंहारेह्युपसंहृताः २६ स्थावरांताःसुराद्याश्चप्रजाब्रह्मंश्चतुर्विधाः । ब्रह्मणःकुर्वतःसृष्टिंजज्ञिरेमानसीस्तुताः २७ ततोदेवासुरपितॄन्मानुषांश्चचतुष्टयम् । सिसृक्षुरंभांस्येतानिस्वमात्मानमयूयुजत् २८ उक्तान्मनस्तमोमात्राउद्रिक्ताभूत्प्रजापतेः । सिसृक्षोर्जघनात्पूर्वमसुराजज्ञिरेततः २९ उत्ससर्जततस्तांतुतमोमात्रात्मिकांतनुम् । सातुत्यक्तातनुस्तेनमैत्रेयाभूद्विभावरी ३० सिसृक्षुरन्यदेहस्थःप्रीतिमापततःसुराः । सत्त्वोद्रिक्ताःसमुद्भूतामुखतोब्रह्मणोद्विज ३१ त्यक्तासापितनुस्तेनसत्वप्रायमभूद्दिनम् । ततोहिबलिनोरात्रावसुरादेवतादिवा ३२ सत्त्वमात्रात्मिकामेवततोन्यांजगृहेतनुम् । पितृवन्मन्यमानस्यपितरस्तस्यजज्ञिरे ३३ उत्ससर्जपितॄन्सृष्ट्वाततस्तामपिसप्रभुः । साचोत्सृष्टाभव

शरीराद्विस्तरेणसृष्टिंवक्तुमादौतावत्सनिमित्तांमानसींसृष्टिमनुवदति कर्मभिरितिद्वाभ्यां पूर्वैःकर्मभिः भाविताअधिवासिताअतस्ताःप्रजाःसंहारेउपसंहृताअपितयाख्यात्यातत्तत्कर्मानुसारिण्याबुद्ध्यासंस्काररूपेणस्थितयाअनिर्मुक्ताः नितरांअविमुक्ताजज्ञिरेइतिद्वितीयेनान्वयः २६ सुराद्याःसुरनरतिर्यक्स्थावराःएवंचतुर्विधाजरायुजादिभेदेनवाचतुर्विधाःमानसीर्मानस्यः २७ शरीरात्सृष्टिमाह ततइतियावदध्यायसमाप्ति देवादींश्चतुष्टयंचतुःसंख्यातान् अंभांसिअंभःसंज्ञान्सिसृक्षुरात्मानंमनोऽयूयुजन्समाधत्तेत्यन्वयः तानिवाएतानिचत्वार्यंभांसिदेवामनुष्याःपितरोऽसुराइतिश्रुतेर्देवादीनामंभःसंज्ञा अंभांस्यंभःस्वितिवार्थः २८ तमसोमात्रालेशःसृज्यसृष्टिवशादुद्रिक्ताभूत् ततउद्रिक्ततमोमात्रातः २९ तमोमात्रात्मिकांतनुमितिविशेषणात्तमोमयभावमुत्ससर्जेत्यर्थः एवमुत्तरत्रापि विभावरीरात्रिरभूत् श्रुतिश्च सातमिस्राभवदिति ३० अन्यदेहस्थःसात्विकभावेस्थितःसन्सिसृक्षुःप्रीतिंसुखमवाप मुखतःमुखात्संभूता मुखाद्देवानसृजद्धितिश्रुतेः ३१ सत्वप्रायंप्रकाशात्मकम् रात्र्यादिकथनस्योपयोगमाह ततोहीति यतस्तमोमय्यारात्रिभूतायास्तनोर्जातास्ततोऽसुरारात्रौबलिनः एवंसुरेष्वपिज्ञेयम् ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्त्वलेशात्मिकांतनुमन्यांजगृहेगृहीत्वाचात्मानंजगतःपितृवन्मन्यमानस्यपार्श्वाभ्यांपितरोजाताः ३३ दिननक्तांतरस्थितिः आदौदिनंततोनक्तंतयोरंतरेस्थितिर्यस्याःसासायंसंध्येत्यर्थः ३४ ३५ आद्यइत्यनेनतत्तद्बुद्धित्यागएवनतुतनुत्यागोस्तीतिसूचितम् ज्योत्स्नाप्रभातम् ज्योत्स्नामरीचिःकिंनस्यादित्यतआह प्रागिति ३६ संध्यासमयेसंध्यायोगोपलक्षितेऽपराह्णे पितरोबलिनइतिपूर्वेणान्वयः अपराह्णःपितॄणामितिश्रुतेः तस्माज्ज्योत्स्नोद्गमात्संध्यासमयाच्च ३७ ब्रह्मणस्तुशरीराणीत्युपासनार्थमुक्तम् त्रिगुणोपाश्रयाणिज्योत्स्नाराजसीरात्रिस्तामसीअहःसंध्येसात्त्विक्याविविभागः ३८ ततस्तनोरन्यांततस्तनुग्रहात्क्षुत्पार्थिवधातुक्षयकृतोवसादः तयाक्षुधाकोपस्तयैवततोव्याप्तःसन्अंधकारेऽसृजदित्युत्तरेणान्वयः ३९ ततोनंतरमभ्यधावंतभक्षयितुमितिशेषः ४० तेषांमध्येयैरक्षतामित्युक्तंतेराक्षसाः येखादामइत्यूचुस्तेयक्षणाद्भक्षणाध्यवसायाद्यक्षाः जक्षभक्षहसनयोरित्यस्यवर्णव्यत्ययेनजकारस्ययकारः

त्संध्यादिननक्तांतरस्थितिः ३४ रजोमात्रात्मिकामन्यांजगृहेसतनुंततः । रजोमात्रोत्कटाजातामनुष्याद्विजसत्तम ३५ तामप्याशुसतत्याजतनुमाद्यःप्रजापतिः । ज्योत्स्नासमभवत्सापिप्राक्संध्यायाभिधीयते ३६ ज्योत्स्नोद्गमेतुबलिनोमनुष्याःपितरस्तथा । मैत्रेयसंध्यासमयेतस्मादेतेभवंतिवै ३७ ज्योत्स्नारात्र्यहनीसंध्याचत्वार्येतानिवैविभोः । ब्रह्मणस्तुशरीराणित्रिगुणोपाश्रयाणिच ३८ रजोमात्रात्मिकामेवततोन्यांजगृहेतनुम् । ततःक्षुद्ब्रह्मणोजाताजज्ञेकोपस्तयाततः ३९ क्षुत्क्षामानंधकारेथसोसृजद्भगवांस्ततः । विरूपाःश्मश्रुलाजातास्तेऽभ्यधावंततंप्रभुम्४०मैवंभोरक्षतामेषयैरुक्तंराक्षसास्तुते । ऊचुःखादामइत्यन्येयेतेयक्षास्तुयक्षणात् ४१ अप्रियानथतान्दृष्ट्वाकेशाःशीर्यंतवेधसः । हीनाश्चशिरसोभूयःसमारोहंततेशिरः४२ सर्पणात्तेभवन्सर्पाहीनत्वादहयःस्मृताः । ततःक्रुद्धोजगत्स्रष्टाक्रोधात्मानोविनिर्ममे ४३ वर्णेनकपिशेनोग्राभूतास्तेपिशिताशिनः । धयतोगांसमुद्भूतागंधर्वास्तस्यतत्क्षणात् ४४ पिबतोजज्ञिरेवाचंगंधर्वास्तेनतेद्विज । एतानिसृष्ट्वाभगवान्ब्रह्मातच्छक्तिचोदितः ४५ ततःस्वच्छंदतोन्यानिवयांसिवयसोऽसृजत् । अवयोवक्षसश्चक्रेमुखतोऽजाःससृष्टवान् ४६ सृष्टवानुदराद्गाश्चपार्श्वाभ्यांचप्रजापतिः । पद्भ्यामश्वान्समातंगान्रासभान्गवयान्मृगान् ४७ उष्ट्रानश्वतरांश्चैवन्यंकूनन्याश्चजातयः । ओषध्यःफलमूलिन्योरोमभ्यस्तस्यजज्ञिरे ४८ त्रेतायुगमुखेब्रह्माकल्पस्यादौद्विजोत्तम ।

साक्षाद्भक्षणार्थशब्दाभावेनपरोक्षतार्थःपरोक्षप्रियाइवहिदेवाइतिश्रुतेः ४१ अथतान्दृष्ट्वास्थितस्यासंतोषेणकेशाःशीर्यंतअहीयंतेत्यर्थः शिरसोहीनाःशीर्णाःसंतःपुनस्तस्याशिरःसमारोहंतसमारूढाः ४२ सर्पणात्शिरःसमारोहणाद्धीनत्वाच्छिरसइतिशेषः क्रोधात्मानःक्रोधस्वभावान् व्यत्ययश्छांदसः ४३ कपिशेनपिंगलेनवर्णेनउपलक्षिताः भूताःप्राणिविशेषाः गांवाचंधयतःपिबतोगायतइतियावत् ४४ उक्तमेवार्थंनिरुक्त्यास्पष्टयति पिबतइति यतोगांपिबतोजज्ञिरेतेनगंधर्वाः तच्छक्तिचोदितः तेषांसृज्यानांशक्तिभिःप्राक्कर्मसंस्काररूपाभिप्रयुक्तःसन्तत्तद्बुद्धिवृत्तिभिरेतानिसृष्ट्वा सामान्यवचनत्वात्षंढत्वम् ४५ स्वच्छंदतस्तत्तत्कर्मवशादेवउत्पन्नयेच्छया वयसोमुखात् भक्षणार्थस्यवयतेःकरणेऽसुंनंतस्यरूपम् यद्वावयसोदेहावस्थाविशेषात्वयांसिपक्षिणः अवयोऽवीन्अजाःअजान् ४६ पार्श्वाभ्यांचगाएव ४७ अश्वतरान्गर्दभ्यश्चजातजातीयान् न्यंकून्गृगविशेषान् अन्याःप्राणिजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयस्ताश्च ४८ तदेवंकल्पस्यादावेवपशूनोषधीश्चसृष्ट्वानंतरंत्रेतायुगमुखेप्राप्तेसतिसम्यक्ग्राम्यारण्यव्यवस्थयातदाध्वरेसाधनतयायुयोज कृतयुगेयज्ञस्याप्रवृत्तेः ४९ अथग्राम्यारण्ययो
र्भेदमाह गौरितिद्वाभ्याम् पुरुषोमनुष्यःतस्यनरमेषपशुत्वकल्पनात् ५० श्वापदोमांसादोव्याघ्रादिः द्विखुरोगवयादिः नपुंसकपाठेपशुजातमितिविशेष्यम् उदकाःकूर्मादयः सरीसृपाःसर्प
गोधादयः ५१ पूर्वादिमुखेभ्यः सृष्टिमाहचतुर्भिः गायत्र्येवगायत्रंछंदः ऋचःऋग्वेदम् त्रिवृत्स्तोमंस्तोत्रसाधनभूतानामृचांत्रिरावृत्त्यागीयमानानांसमुदायंरथंतरंसामविशेषम् यज्ञानांमध्ये
अग्निष्टोमंसोमयागसंस्थाविशेषम्५२ यजूंषियजुर्वेदम् त्रिष्टुबेवत्रैष्टुभं स्तोमंस्तोमाख्यंपंचदशावृत्तम् बृहत्सामसामविशेषम् उक्थंसोमसंस्थंयागं ५३ सामानिसामवेदं स्तोमंस्तोमाख्यंसप्त
दशावृत्तंसाम वैरूपंसामविशेषम् अतिरात्रंसोमसंस्थाविशेषम् ५४ एकविंशंएकविंशत्यावृत्तंसाम अथर्वाणंवेदंआप्तोर्यामाणंसोमसंस्थाविशेषम् अनुष्टुभंछंदः वैराजाख्यंसाम ५५ सर्वेषां

सृष्ट्वापश्चोषधीःसम्यग्युयोजसतदाध्वरे ४९ गौरजःपुरुषामेषाअश्वाअश्वतराःखराः । एतान्ग्राम्यान्पशूनाहुरारण्यांश्चनिबोधमे ५० श्वापदोद्विखुरो
हस्तीवानरःपक्षिपंचमः । उदकाःपशवःषष्ठाःसप्तमास्तुसरीसृपाः ५१ गायत्रंचऋचश्चैवत्रिवृत्सामरथंतरम् । अग्निष्टोमंचयज्ञानांनिर्ममेप्रथमान्मुखा
त् ५२ यंजूषित्रैष्टुभंछंदाःस्तोमंपंचदशंतथा । बृहत्सामतथोक्थंचदक्षिणादसृजन्मुखात् ५३ सामानिजगतीछंदःस्तोमंसप्तदशंतथा । वैरूपमति
रात्रंचपश्चिमादसृजन्मुखात् ५४ एकविंशमथर्वाणमाप्तोर्यामाणमेवच । अनुष्टुभंसवैराजादुत्तरादसृजन्मुखात् ५५ उच्चावचानिभूतानिगात्रेभ्य
स्तस्यजज्ञिरे । देवासुरपितॄन्सृष्ट्वामनुष्यांश्चप्रजापतिः । ततःपुनःससर्जादौसकल्पस्यपितामहः ५६ यक्षान्पिशाचान्गंधर्वान्नृतथैवाप्सरसांगणा
न् । नरकिंनररक्षांसिवयःपशुमृगोरगान् ५७ अव्ययंचव्ययंचैवयदिदंस्थाणुजंगमम् । उत्ससर्जतदाब्रह्माभगवानादिकृद्विभुः ५८ तेषांयेयानि
कर्माणिप्राक्सृष्ट्यांप्रतिपेदिरे । तान्येवप्रतिपद्यंतेसृज्यमानाःपुनःपुनः ५९ हिंस्राहिंस्रेमृदुक्रूरेधर्माधर्मावृतानृते । तद्भाविताःप्रपद्यंतेऽतस्मात्तत्त
स्यरोचते ६० इंद्रियार्थेषुभूतेषुशरीरेषुचसप्रभुः । नानात्वंविनियोगंचधातैवव्यसृजत्स्वयम् ६१ नामरूपंचभूतानांकृत्यानांचप्रवर्तनम् । वेदश

भूतानांकर्मस्वभवादिवक्तुंपूर्वोक्तामेवसृष्टिंसप्रपंचामनुवदति उच्चावचानीतिसार्धैस्त्रिभिः उच्चावचानिनानाप्रकाराणिदेवासुरादीनि कल्पस्यब्रह्मदिनस्यादौ ५६ नराअश्वजघनामनुष्यावि
शेषाः किंनराश्वाश्वमुखामनुष्यविशेषाएव नरोश्वजघनेपिस्यात्किंनरोश्वमुखेनरीत्यभिधानात् ५७ नव्येत्यव्ययंस्थाणु व्यतिगच्छतिव्ययंजंगमम् यद्वाअव्ययंचिरस्थायिव्ययं तद्विपरीतम् आ
दिःप्रथमसृष्टिःतत्कर्ता ५८ ईश्वरस्यापिउच्चावचसृष्टौकर्मसापेक्षत्वमाह तेषामिति तेषांप्राणिनांमध्येयेयानिकर्माणिप्राक्सृष्टौप्रपेदिरेतेतान्येवप्रतिपद्यंतेऽनुतिष्ठंति ५९ कर्माण्येवाह हिंस्राहिंस्रे
हिंस्रंमारकम् अहिंस्रंतद्विपरीतंकायिकंकर्म मृदुसदयम् क्रूरंतद्विपरीतंमानसंकर्म ऋतंसत्यमनृतंतद्विपरीतम् वाचिकंकर्म क्वचित्हिंस्रमपिधर्मः यथाग्नीषोमीयपश्वालंभनम् अहिंस्रमपिपर
कीयस्त्रीगमनमधर्मः क्वचिन्मृद्वपिकर्मराज्ञांचौरादिरक्षणमधर्मः क्वचित्क्रूरमपिधर्मः यथाराज्ञांदुष्टशासनम् सत्यमप्यधर्मः ब्राह्मणादिवधप्राप्तौतदनुगुणम् अनृतमपिब्राह्मणादिरक्षणेधर्मएवेत्य
तोधर्माधर्मावितितयोर्हिंस्रादिजन्ययोःपृथक्ग्रहणम् तद्भाविताःतैर्हिंस्रादिकर्मसंस्कारैर्भाविताःतस्मादद्यापियोयद्वासनाभावितस्तस्मैतदेवरोचते ६० एवंतद्वासनानुसारेणैवइंद्रियार्थेषुभोग्येषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानात्वममृतमन्नंफलंतृणमित्यादिविभागेनानेकत्वम् यद्वाइंद्रियेषुतदर्थेषुचनानात्वंश्रोत्रादित्वशब्दादित्वविभागम् भूतेषुनानात्वंभूसमुद्राज्योतिर्लोकादिभोगस्थानविभागम् शरीरेषुना
नात्वंद्विपाच्चतुष्पदादिभोगायतनविभागंविनियोगम् चअनेनजीवेनेदंकार्यमित्यादितत्तत्कर्मानुसारेणधातास्वयमेवाऽसृजत् ६१ देवादीनांभूतानांसर्वेषांनामइंद्राग्नियमेत्यादि रूपवज्जहस्त
त्वादि कृत्यानांवर्षणदहनादीनांप्रवर्तनंचऐंद्रंदधिइत्येवमादिवेदशब्देभ्यएवादौब्रह्मा चकारेत्यर्थः ६२ किंचऋषीणांनामानिवसिष्ठादीनितस्माद्वासिष्ठोब्रह्माकार्यइत्यादिविनियोगयोग्यानिवे
देयथाश्रुतानितथैवकृतवान् ६३ ननुदेवादीनामनित्यानांकथंवेदेनाभिधानमित्याशंक्याहप्रवाहनित्यत्वंदृष्टांतेनदर्शयति यथेति यस्मिन्वसंतादौऋतुलिंगानिपुष्पफलादीनिपर्ययेतस्यर्तोःपु
नरावृत्तौतानितानितज्जातीयान्येवदृश्यंतेयथायुगादिषुयुगमन्वंतरकल्पाद्यावर्त्तेषुभावादेवादयस्तथा अनादित्वाद्वेदेननिबध्यंतइत्यर्थः६४उपसंहरति करोतीति सिसृक्षासर्गेच्छा शक्तिःसर्ग

ब्देभ्यएवादौदेवादीनांचकारसः ६२ ऋषीणांनामधेयानियथावेदश्रुतेनवै । यथानियोगयोग्यानिसर्वेषामपिसोऽकरोत् ६३ यथर्तावृतुलिंगानिना
नारूपाणिपर्यये । दृश्यंतेतानितान्येवतथाभावायुगादिषु ६४ करोत्येवंविधांसृष्टिंकल्पादौसपुनःपुनः । सिसृक्षाशक्तियुक्तोऽसौसृज्यशक्तिप्रचोदि
तः ६५ । । इतिश्रीविष्णुपुराणेप्रथमेंशेपंचमोध्यायः ५ । मैत्रेयउवाच । अर्वाक्स्त्रोतस्तुकथिताभवतायस्तुमानुषः । ब्रह्मन्विस्तरतोब्रूहिब्रह्मा
तमसृजद्यथा १ यथाचवर्णानसृजद्यद्गुणांश्चमहामुने । यच्चतेषांस्मृतंकर्मविप्रादीनांतदुच्यताम् २ पराशरउवाच । सत्याभिध्यायिनस्तस्यासि
सृक्षोर्ब्रह्मणोजगत् । अजायंतद्विजश्रेष्ठसत्त्वोद्रिक्तामुखात्प्रजाः ३ वक्षसोरजसोद्रिक्तास्तथान्याब्रह्मणोभवन् । रजसातमसाचैवसमुद्रिक्तास्तथोरु
तः ४ पद्भ्यामन्याःप्रजाब्रह्माससर्जद्विजसत्तम । तमःप्रधानास्ताःसर्वाश्चातुर्वर्ण्यमिदंततः ५ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चद्विजसत्तम । पादोरुव
क्षःस्थलतोमुखतश्चसमुद्गताः ६ यज्ञनिष्पत्तयेसर्वमेतद्ब्रह्माचकारवै । चातुर्वर्ण्यंमहाभागयज्ञसाधनमुत्तमम् ७ यज्ञैराप्यायितादेवावृष्ट्युत्सर्गेण
वैप्रजाः । आप्याययंतेधर्मज्ञयज्ञाःकल्याणहेतवः ८ निष्पाद्यंतेनरैस्तैस्तुस्वकर्माभिरतैस्तदा । विरुद्धाचरणापेतैःसद्भिःसन्मार्गगामिभिः ९ स्वर्गा

विधानसामर्थ्यंचताभ्यांयुक्तः सृज्यानांशक्तिरदृष्टंतयाप्रचोदितःसहकृतः ६५ इतिवै॰कूतचं॰प्र॰पंचमोध्यायः ॥ ॥ षष्ठेवाक्स्त्रोतसांसर्गोवर्णकर्मादिवर्ण्यते सत्त्वादिगुणभावेनगति
रप्यमरादिषु सर्वोत्पत्तिमन्निमित्तादृष्टसाधनानांमनुष्याणांतद्वर्णाश्रमादीनांचसृष्टिंमैत्रेयःपृच्छति अर्वागिति १ विस्तरंब्रूहीतियदुक्तंतदेवाविवृणोति यथाचेति २ जगत्सिसृक्षोःसत्याभिध्या
यिनःसत्यसंकल्पस्यब्रह्मणइतिसर्वत्रसंबध्यते ३ ४ ताश्चतुर्विधामुखादिभ्यःसृष्टाःप्रजाः इदंप्रसिद्धंचातुर्वर्ण्यं चत्वारोवर्णाइत्यर्थः ५ एतदेवविभागेनस्पष्टयति ब्राह्मणाइति पादोरुवक्ष
स्थलतोमुखतश्चेत्यस्यब्राह्मणादिभिःप्रातिलोम्येनसंबंधः ६ तत्तत्सृष्टेःप्रयोजनमाह यज्ञेति यद्यप्यवैद्यत्वादभावःकर्मणिस्यादितिसूत्रेणजैमिनिःशूद्रस्याध्ययनाभावाद्यज्ञाधिकारंनमन्यतेत
थापिद्विजशुश्रूषाद्वारातत्साधनत्वात्पाकयज्ञादिषुसाक्षादधिकाराच्चनविरोधः ७ यज्ञनिष्पादनस्योपयोगमाह यज्ञैरिति तर्पितादेवास्तायज्ञकर्त्रीःप्रजास्तर्पयंति अग्नौप्रास्ताहुतिःसम्यगादि
त्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः अतोयज्ञाःकल्याणहेतवः ८ यज्ञेषुश्रेष्ठाधिकारिणोदर्शयति निष्पाद्यंतइति स्वधर्मेषुश्रौतेषुस्मार्तेषुचाभिरतैः विरुद्धाचरणादपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैर्निर्गतैः विशुद्धाचरणोपेतैरितिपाठस्तुसुगमः सद्भिर्विद्वद्भिः सन्मार्गगामिभिः सन्मार्गःसदाचारः मोक्षप्राप्त्युपायोवातद्गामिभिः ९ अतोधर्माधिकारित्वान्मानुष्यंस्तौति स्वर्गापवर्गाविति मानुष्यान्मानुष्यंप्राप्य अभिरुचितंस्थानंउपासनानुष्ठानसमयेकामनाविषयसत्यलोकाद्यपिमनुष्याएवादृष्टद्वाराभोगार्थंलोकान्संपाद्यतेषुयांतीतिमनुष्यस्तुतिः १० तर्हिकिंमानुष्यंप्राप्यैवयांति नेत्याह ताःसृष्टाःप्रजाःयदिचातुर्वर्ण्यव्यवस्थितयेसम्यक्श्रद्धयायःसमाचारःतस्मिन्प्रवणाभवंतितदायांतीतिपूर्वेणान्वयः ११ चातुर्वर्ण्यव्यवस्थामुख्यफलमाहयथेच्छेतिद्वाभ्याम् यथेच्छया वासोगिरिकंदरादिःतत्रनिरतायतःसर्वबाधाभिःशीतोष्णादिपीडाभिर्वर्जिता :सर्वाबाधाइतिपाठेआबाधाशीतादिदुःखम् शुद्धंरागादिहीनंअंतःकरणंमनोयासांताःशुद्धाविशुद्धपितृमातृजाः अत एवसर्वाण्यनुष्ठानानिनिर्मलान्यनुसंधिरहितानियासांताः १२ एवंनिष्कामकर्मानुष्ठानादिसाधनप्रक्रमेणतासांमनसिआशयेत्वंपदार्थेचतुर्विधान्वयव्यतिरेकैः शुद्धेतथाहरौतत्पदार्थेअंतर्द्धत्पुंडरीकें तर्यामितयास्थितेशुद्धेशुद्धांतःसंस्थितेइतिपाठेकर्मधारयःसमासःशुद्धज्ञानंशुद्धंविषयोपरागहीनंब्रह्माकारंज्ञानंभवतियेनज्ञानेनतद्विष्णवाख्यमखंडंब्रह्मपश्यंति १३ तदेवंधर्मानुष्ठानफलमुक्तमिदा नींकालवशात्तद्वैकल्पात्प्राणिनामानिष्टप्राप्तिमाह ततइत्यादिना ततस्त्वेतामुखेकिंचिदतिक्रांतेसतिसप्रसिद्धोयोसौहरेःकालात्मकोंशःकथितःसोयं अघःपापंरागादिकंविषयाभिलाषद्वेषमात्स

पवर्गौमानुष्यात्प्राप्नुवंतिनरामुने । यच्चाभिरुचितंस्थानंतद्यांतिमनुजाद्विज १० प्रजास्ताब्रह्मणासृष्टाश्चातुर्वर्ण्यव्यवस्थितौ । सम्यक्श्रद्धासमाचारप्रवणामुनिसत्तम ११ यथेच्छावासनिरताःसर्वबाधाविवर्जिताः । शुद्धांतःकरणाःशुद्धाःसर्वानुष्ठाननिर्मलाः १२ शुद्धेचतासांमनसिशुद्धेंतःसंस्थितेहरौ । शुद्धज्ञानंप्रपश्यंतिविष्णवाख्यंयेनतत्पदम् १३ ततःकालात्मकोयोसौसचांशःकथितोहरेः । सपातयत्यघोघोरमल्पमल्पाल्पसारवत् १४ अधर्मबीजभूतंतुतमोलोभसमुद्भवम् । प्रजासुतासुमैत्रेयरागादिकमसाधकम् १५ ततःसासहजासिद्धिस्तासांनातीवजायते । रसोल्लासादयश्चान्याःसिद्धयोष्टौभवंतियाः १६ तासुक्षीणास्वशेषासुवर्धमानेचपातके । द्वंद्वाभिभवदुःखार्तास्ताभवंतिततःप्रजाः १७ ततोदुर्गाणिताश्चक्रुर्वार्क्षेपार्वतमौ

र्यादिकंअसाधकंपुरुषार्थप्रतिबंधकंतासुप्रजासुपातयतिक्षिपतीतिद्वयोरन्वयः क्वचिदघःशब्दःसांतःकथंभूतंघोरंबहुदुःखप्रदम् प्रथमंअल्पमसमर्थंअल्पाल्पसारवत्यल्पाल्पवद्धिक्रमेणसारवद्ब लवत्अत्यल्पसारवदितिपाठेअल्पंप्रमाणतः अत्यल्पसारवत्क्षीणबलंचेत्यर्थःरागादिकंकिंभूतम् अनंतरंत्वधर्मबीजभूतम् तत्रहेतुस्तमोभिनिवेशोलोभस्तृष्णातयोःसमुद्भवोयस्मात्तत् १४१५ ततःकिमतआह ततइति तासांसहजास्वाभाविकीसिद्धिःसर्वबाधाविवर्जितत्वंज्ञानंवानजायते तेषामितिपाठेतेषांजनानांयाअष्टौसिद्धयस्ताश्चनभवंति रसोल्लासादयश्चस्कांदोक्ताः रसस्यस्व तएवांतरुल्लासःस्यात्कृतेयुगे रसोल्लासाख्यसंसिद्धिस्तयाहंतिक्षुधंनरः स्त्रियादिनिरपेक्षेणसदातृप्ताःप्रजास्तदा द्वितीयासिद्धिरुद्दिष्टासातृप्तिर्मुनिसत्तमैः अधमोत्तमत्वंनास्त्यासांसातृतीयाभि धीयते चतुर्थीतुल्यतातासामायुषःसुखरूपयोः ऐकांत्यबलबाहुल्यंविशेषानामपंचमी परमार्थपरत्वेनतपोध्यानादिनिष्ठता षष्ठीनिकामचारित्वंसप्तमीसिद्धिरुच्यते अष्टमीचतथाप्रोक्तायत्रक्व चनशायितेति १६ पातकेवर्द्धमानेसतितासुक्षीणासुप्रत्युतान्योन्यंविरुद्धंद्वंद्वंयच्छीतोष्णादितदभिभवदुःखार्ताभवंति १७ ततश्चौरादिभयपरिहारार्थंदुर्गाणिशीतादिपरिहारार्थंगृहाणिजीवि काद्यर्थंकृषिवाणिज्यादिचक्रुरित्याह ततोदुर्गाणीतित्रिभिः वाक्षादीनिवृक्षादिभवानि कृत्रिमंप्राकारादिपुरादिलक्षणंभृगुणोक्तं नृपावासःपुरीप्रोक्ताविशांपुरमपीष्यते एकतोयत्रचग्रामो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगरंचैकतःस्थितम् मिश्रंचखर्वटंनामनदीगिरिसमाश्रितम् विप्राश्चविप्रभृत्याश्चयत्रचैवंवसंतिवै सतुग्रामइतिप्रोक्तःशूद्राणांवासएवच पण्यक्रयादिनिपुणैश्चातुर्वर्ण्ययुतंतथा अनेकजाति संबद्धंनैकशिल्पिसमाकुलम् सर्वदैवतसंबद्धंनगरंत्वभिधीयते १८ गृहाणिचविश्वकर्मप्रोक्तानि ध्रुवंधन्यंजयंकांतंविजयंचतथापरम् सुपक्षंसुमुखंनंदंधनदंचमनोरममित्यादीनि यथान्यायंअ र्थनिमित्तानुसारेणयथावास्तुशास्त्रम् १९ वार्तोपायंजीविकासाधनंकृष्यादि हस्तसिद्धिंहस्ताभ्यांसाध्यांभृतिं तामेवाह कर्मजांहस्तकर्मनिर्मिताम् २० तत्रकृषिफलंप्रपंचयति व्रीहयश्चेतिसा र्धद्वाभ्यां अणवःक्षुद्रशालयः प्रियंगवःकंगवः उदारादेवधान्यानि दीर्घनालाः कोरदूषाःकोद्रवाः चीनकाःस्वनाम्नैवपूर्वदेशेप्रसिद्धास्तत्सहिताः २१ मसूरामंगल्यकाः निष्पावाःशिब्यः कु लित्थकामुद्गसदृशपत्राः आढक्यस्तुवर्यः चणकाहरिमंथकाः शणोगोण्युत्पादनत्वक्सप्तदशोयेषांते २२ इत्येतेग्राम्याणांकृषिसाध्यानामोषधीनांसप्तदशजातयः ग्राम्याआरण्याश्च

दकम् । कृत्रिमंचतथादुर्गंपुरखर्वटकादियत् १८ गृहाणिचयथान्यायंतेषुचक्रुःपुरादिषु । शीतातपादिबाधानांप्रशमायमहामते १९ प्रतीकारमिमं कृत्वाशीतादेस्ताःप्रजाःपुनः । वार्तोपायंततश्चक्रुर्हस्तसिद्धिंचकर्मजाम् २० व्रीहयश्चयवाश्चैवगोधूमाअणवस्तिलाः । प्रियंगवोह्युदाराश्चकोरदूषाः सचीनकाः २१ माषामुद्गामसूराश्चनिष्पावाःसकुलत्थकाः । आढक्यश्चणकाश्चैवशणसप्तदशाःस्मृताः २२ इत्येताओषधीनांतुग्राम्याणांजातयो मुने । ओषध्योयज्ञियाश्चैवग्राम्यारण्याश्चतुर्दश २३ व्रीहयःसयवामाषागोधूमाअणवस्तिलाः । प्रियंगुसप्तमाह्येताअष्टमास्तुकुलत्थकाः २४ श्यामाकात्वथनीवाराजर्तिलाःसगवेधुकाः । तथावेणुयवाःप्रोक्तास्तद्वन्मर्कटकामुने २५ ग्राम्यारण्याःस्मृताह्येताओषध्यश्चचतुर्दश । यज्ञनिष्पत्तये यज्ञस्तथासांहेतुरुत्तमः २६ एताश्चसहयज्ञेनप्रजानांकारणंपरम् । परापरविदःप्राज्ञास्ततोयज्ञान्वितन्वते २७ अहन्यहन्यनुष्ठानंयज्ञानांमुनिसत्त म । उपकारकरंपुंसांक्रियमाणाघशांतिदम् २८ येषांतुकालसृष्टोऽसौपापबिंदुर्महामते । चेतःसुवृद्धेचक्रुस्तेनयज्ञेषुमानसम् २९ वेदवादांस्तथावेदा न्यज्ञकर्मादिकंचयत् । तत्सर्वंनिंदमानास्तेयज्ञव्यासेधकारिणः ३० प्रवृत्तिमार्गव्युच्छित्तिकारिणोवेदनिंदकाः । दुरात्मानोदुराचाराबभूवुःकुटिलाश

मीलिखाचचतुर्दश २३ यज्ञियाःसंख्यातुमाह व्रीहयइत्यादि व्रीह्याद्याश्यामाकांतानवग्राम्याः नीवाराद्याअरण्याश्चयज्ञसाधनभूताः यद्वा श्यामाकाआरण्याएवतृणधान्यरूपत्वात् २४ नीवाराआरण्याव्रीहयः जर्तिलाःस्वयंजातास्तिलाः गवेधुकाःकुसुंभसदृशबीजाःश्वेतगुंजाइतिप्रसिद्धाः वेणुयवावंशबीजानि मर्कटकाआरण्यप्रियंगवः २५ यज्ञनिष्पत्तयेएताःस्मृताइत्य न्वयः यज्ञश्चासामोषधीनांहेतुर्वृष्टिद्वारेण २६ प्रजानांकारणंपरंवृद्धिहेतुत्वात्परापरविदःयज्ञःप्रजानांकारणंप्रजास्तत्कार्यमेवंविदः २७ अहन्यहनिपंचमहायज्ञानामनुष्ठानंगृहस्थानांप्र त्यहंक्रियमाणस्यपंचसूनालक्षणस्यपापस्यशांतिदंनाशकंपंचसूनामनूक्ताः पंचसूनागृहस्थस्यचुल्लीपेषण्युपस्करः कंडनीचोदकुंभश्चबध्यतेयाश्चवाहयन्निति उपकारकरंस्वर्गलोकफलदायि २८ तदेवंब्रह्मसृष्टानांयज्ञानांओषधीनांकृष्यादिप्रवृत्त्याप्रवाहनित्यत्वमुक्तम् यज्ञानांचदृष्टादृष्टलक्षणंमहाफलत्वमुक्तम् तथापितेषांकैश्चिदननुष्ठानेपूर्वोपक्षिप्तमेवरागादिकारणमाह येषां त्वितित्रिभिः येषांचेतःसुपापस्याबिंदुर्लेशःसूक्ष्मावस्थारागादिर्वर्धतेतेयज्ञेषुमानसंनचक्रुः २९ वेदस्यवादान्निर्वचनानि यज्ञानांव्यासेधकारिणःप्रतिहंतारः ३० अतएवप्रवृत्तिमार्गस्यव्युच्छे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकारिणः यज्ञाननुष्ठानेदेवैरवर्षणादन्नाभावेनप्रजावृद्धेरसिद्धेः ३१ तदेवंप्रजाःसृष्ट्वातासांकृष्यादिनावार्तायांसिद्धायांयथागुणंसत्त्वोद्रेकाद्यनुसारेणब्राह्मणादीनांवर्णानांगृहस्थाद्याश्रमाणांचमर्यादांधर्मव्यवस्थांयथास्थानंअस्मिन्देशेयंचधर्मइतिस्थानानतिक्रमेणतत्तत्स्वधर्मावस्थानुसारेणवाधर्माल्लोकव्यवस्थांचकृतवानितिद्वयोरन्वयः ३२ ३३ लोकानाह प्राजापत्यमितिक्रियावतांनित्यनैमित्तिकाग्निहोत्राद्यनुष्ठानवतांप्राजापत्यंपितृलोकःकर्मणापितृलोकइतिश्रुतेः ३४ मारुतंस्थानंदेवलोकः ३५ यतीनामूर्ध्वरेतसांवालखिल्यानांस्थानंयत्तद्गुरुवासिनांनैष्ठिकब्रह्मचारिणाम् ३६ वनौकसांवानप्रस्थानाम् सन्यासिनांब्राह्मणादीनांचविशेषंवक्तुंपूर्वोक्तमेवगृहस्थानमनुवदति प्राजापत्यमितिब्रह्मसंज्ञितंसत्यलोकस्थानंसंन्यासात्ब्रह्मणःस्थानमितिवचनात् ३७ योगिनांज्ञानिनाम् तदेवस्पष्टयति एकांतिनइति यद्वा योगिनांप्रतीकोपासकानाममृतंविष्णुपदंयतोगंगाआयाति आश्रमिष्वेवएकांतिनोऽद्वैतध्यायिनःपरब्रह्मनि

याः ३१ संसिद्धायांतुवार्तायांप्रजाःसृष्ट्वाप्रजापतिः। मर्यादांस्थापयामासयथास्थानंयथागुणम् ३२ वर्णानामाश्रमाणांचधर्मान्धर्मभृतांवर। लोकांश्चसर्ववर्णानांसम्यग्धर्मानुपालिनाम् ३३ प्राजापत्यंब्राह्मणानांस्मृतंस्थानंक्रियावताम्।स्थानमैंद्रंक्षत्रियाणांसंग्रामेष्वनिवर्तिनाम्३४वैश्यानांमारुतंस्थानंस्वधर्ममनुवर्तिनाम्। गांधर्वंशूद्रजातीनांपरिचर्यासुवर्तताम् ३५ अष्टाशीतिसहस्राणांयतीनामूर्ध्वरेतसाम्। स्मृतंतेषांतुयत्स्थानंतदेवगुरुवासिनाम्३६सप्तर्षीणांतुयत्स्थानंस्मृतंतद्वैवनौकसाम्। प्राजापत्यंगृहास्थानांन्यासिनांब्रह्मसंज्ञितम्३७योगिनाममृतंस्थानंतद्विष्णोःपरमंपदम्।एकांतिनःसदाब्रह्मध्यायिनोयोगिनोहिये। तेषांतुपरमंस्थानंयत्तत्पश्यंतिसूरयः ३८ गत्वागत्वानिवर्तंतेचंद्रसूर्यादयोग्रहाः। अद्यापिननिवर्तंतेद्वादशाक्षरचिंतकाः३९तामिस्रमंधतामिस्रंमहारौरवरौरवौ।असिपत्रवनंघोरंकालसूत्रमवीचिमत् ४०विनिंदकानांवेदस्ययज्ञव्याघातकारिणाम्।स्थानमेतत्समाख्यातंस्वधर्मत्यागिनश्चये ४१ इतिश्रीविष्णुपुराणेप्रथमेंऽशेषष्ठोध्यायः ६। पराशरउवाच। ततोभिध्यायतस्तस्यजज्ञिरेमानसीःप्रजाः। तच्छरीरसमुत्पन्नैःकार्यैःस्वैःकारणैःसह १ क्षेत्रज्ञाःसमवर्तंतगात्रेभ्यस्तस्यधीमतः। तेसर्वेसमवर्तंतयेमयाप्रागुदाहृताः २ देवाद्याःस्थावरांताश्चत्रैगुण्यविषये

दिध्यासनशीलाःतेषांपरमंपदंब्रह्मैव यत्सूरयोजीवन्मुक्ताः पश्यंति शेषंसमानम् ३८ भगवदुपासकानामपितदेवस्थानंक्रममुक्त्याभवतीत्याशयेनाह गत्वागत्वेति द्वादशाक्षरोवासुदेवमंत्रः ३९ सुकृतिनांस्थानमुक्तादुष्कृतिनामाह तामिस्रमिति अवीचिमत् स्वार्थेतद्धितःलिंगव्यत्ययश्च अवीचियदितिपाठेयत्तामिस्रादितत्तेषांस्थानमिति ४० ४१ इतिश्रीविष्णुपुराणेषष्ठोध्यायः ६ असृजत्सप्तमेपुत्रान्मानसान्सृष्टिवृद्धये स्वयंपुत्रादिभिःसृष्टिंदैहिकींव्यतनोत्पुनः अथयौनसृष्टिंवक्ष्यन्पूर्वोक्तायांमानसशारीरसृष्टौकांचिद्विशेषंवक्तुमाह ततइतित्रिभिःप्रागनुक्तविशेषोक्तेस्ततइत्यपूर्वप्रस्तावः तत्रैवंशंक्यते ननुमनसासंकल्पमात्रेणभूतोपादानंविनाभौतिकानांदेहानांकथंजन्मकथंवाजडाच्छरीराच्चेतनानांजन्मेतितत्राह तच्छरीरेति तस्यब्रह्मणःशरीरात्समुत्पन्नैःकार्यैर्देहैःकारणैरिंद्रियैश्चसहमनसानिमित्तभूतेनमानस्यःप्रजाजज्ञिरे ब्रह्मशरीरभूतेंद्रियाण्येवसेंद्रियतद्देहानामुपादानमित्यर्थः १ तथाधीमतश्चेतनस्यसमष्टिजीवस्यतस्यब्रह्मणोजडेभ्योपिगात्रेभ्यउत्पद्यमानदेहैःसहसंकल्पमात्रादुद्बुद्धसंस्काराव्यष्टिक्षेत्रज्ञास्तत्तद्देहाहंमानिनःसमवर्तंतआविर्भूताः तानेवाह तेसर्वेइति २ यद्यपिस्थावरादिरेवसृष्टिस्तथापिगत्युत्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्षाद्देवाद्याइत्युक्तम् त्रैगुण्यविषयेऊर्ध्वाधोमध्यरूपेत्यर्थः ऊर्ध्वंगच्छंतिसत्त्वस्थाइत्यादिस्मृतेः ३ यौनसृष्टेःप्रयोजनमाह यदास्येति नव्यवर्धंतपुत्रपौत्ररूपेणवृद्धिमप्राप्ताःअथान्यान्यौ नसृष्टिप्रवर्तकान्सृष्टवान् ४ ५ आत्मनःसदृशानितियदुक्तंतदेवब्रह्मसमाख्ययादर्शयति नवब्रह्माणइति क्रोधाद्रुद्रसृष्टिंतत्रैवमनुसृष्टिंचवक्तुंब्रह्मणःक्रोधकारणंदर्शयन्नाह सनंदनाइति ६ लोकेषुप्रजासर्गेषुस्वर्गादिष्वितिवा असक्तौहेतुर्निरपेक्षाइति तत्रापिहेतुः सर्वेतेचागतज्ञानाःप्राप्तज्ञानाः पाठांतरेऽनागतेअर्थेज्ञानंयेषाम् ७एवंभूतेषुप्रजासृष्टौनिरपेक्षेषुसत्सुमहात्मनोब्रह्मणः क्रोधोऽभूत् ८पूर्वंसमुद्भूतमपित्रैलोक्यंतस्यब्रह्मणःक्रोधाज्ज्वालामालाभिर्विदीपितमभूत् समुद्भूतज्वालामालेतिपाठःसुगमः सर्वमखिलमितिपुनरुक्तिरतिव्याप्तिसूचनाय ९ १० अर्धाभ्यांना

स्थिताः । एवंभूतानिसृष्टानिचराणिस्थावराणिच ३ यदास्यताःप्रजाःसर्वानव्यवर्धंतधीमतः । अथान्यान्मानसान्पुत्रान्सदृशानात्मनोऽसृजत् ४ भृगुंपुलस्त्यंपुलहंक्रतुमंगिरसंतथा । मरीचिंदक्षमत्रिंचवसिष्ठंचैवमानसान् ५ नवब्रह्माणइत्येतेपुराणेनिश्चयंगताः । सनंदनादयोयेचपूर्वंसृष्टास्तु वेधसा ६ नतेलोकेष्वसज्जंतनिरपेक्षाःप्रजासुते । सर्वेतेचागतज्ञानावीतरागाविमत्सराः ७ तेष्वेवंनिरपेक्षेषुलोकसृष्टौमहात्मनः । ब्रह्मणोऽभून्म हाक्रोधस्त्रैलोक्यदहनक्षमः ८ तस्यक्रोधात्समुद्भूतंज्वालामालाविदीपितम् । ब्रह्मणोऽभूत्तदासर्वंत्रैलोक्यमखिलंमुने ९ भ्रुकुटीकुटिलात्तस्यललाटा त्क्रोधदीपितात् । समुत्पन्नस्तदारुद्रोमध्याह्नार्कसमप्रभः १० अर्धनारीनरवपुःप्रचंडोतिशरीरवान् । विभजात्मानमित्युक्त्वातंब्रह्मांतर्दधेपुनः ११ तथोक्तोसौद्विधास्त्रीत्वंपुरुषत्वंतथाकरोत् । बिभेदपुरुषत्वंचदशधाचैकधाचसः १२ सौम्यासौम्यैस्तथाशांताशांतैस्त्रीत्वंचसप्रभुः । बिभेदबहुधादेवः स्वरूपैरसितैःसितैः १३ ततोब्रह्मात्मसंभूतंपूर्वंस्वायंभुवंप्रभुम् । आत्मानमेवकृतवान्प्रजापालंमनुंद्विज १४ शतरूपांचतांनारींतपोनिर्धूतकल्मषा म् । स्वायंभुवोमनुर्देवःपत्न्यर्थंजगृहेविभुः १५तस्माच्चपुरुषाद्देवीशतरूपाव्यजायत । प्रियव्रतोत्तानपादौप्रसूत्याकूतिसंज्ञितम् १६ कन्याद्वयंचधर्मज्ञ रूपौदार्यगुणान्वितम् । ददौप्रसूतिंदक्षायाप्याकूतिंरुचयेपुरा १७ प्रजापतिःसजग्राहतयोर्जज्ञेसदक्षिणः । पुत्रोयज्ञोमहाभागोदंपत्योर्मिथुनंततः । १८ यज्ञस्यदक्षिणायांतुपुत्राद्वादशजज्ञिरे । यामाइतिसमाख्यातादेवाःस्वायंभुवेमनौ १९ प्रसूत्यांचतदादक्षश्चतस्रोविंशतिंतथा । ससर्जकन्या

रीचनरश्चवपुर्यस्यसः प्रचंडःअतिक्रोधनः अतिशरीरवान्स्थूलः आत्मानंस्त्रीपुरुषरूपंविभजपृथक्कुर्वित्युक्त्वांतर्दधे चिदचिद्ग्रंथिरूपाहंकाराभिमानिनोरुद्रस्यचिदंशेनाचिदंशाभिभवेसृ ष्टिसामर्थ्यंनभवेदितिभावः ११ स्त्रीत्वंस्त्रीरूपं एवंपुरुषत्वंचाकरोत् १२ सौम्यासौम्यैरित्यस्यविवरणंशांताशांतैरिति स्त्रीत्वंचबहुधाएकादशधा असितैःसितैश्चस्वरूपैर्बिभेद १३ तत एकादशविभागतःक्रोधांशेनिर्गतेसातिसात्त्विकस्वभावमंशंपूर्वमात्मनःस्वदेहात्संभूतमात्मानमेव आत्मावैपुत्रनामासीतिश्रुतेः तंमनुंप्रजापालंप्रजापालनार्थमकरोत् १४ तांस्वदेहार्धसंभूतांना रींपत्न्यर्थंजगृहे तयोर्निर्धूतकल्मषामितिदेवइतिविभुरितिचसापिंड्यदोषपरिहार्थमुक्तम् १५ व्यजायतप्रसूतवती १६ प्रजापतिर्मनुःददावित्यन्वयः १७ सचरुचिस्तांजग्राह तयोरुच्या कूत्योर्दंपत्योर्मिथुनंजज्ञे किंतन्मिथुनंसदक्षिणःदक्षिणाकन्यातत्सहितः यज्ञोनाम्नापुत्रइति दांपत्यमितिपाठेतन्मिथुनंदांपत्यमगमदितिशेषः १८ स्वायंभुवेआद्येमनौमन्वंतरे यामाएवदेवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९ चतस्रोविंशतिंचेत्यर्थः कश्चिच्चत्वारइतिपठित्वालिंगविभक्त्योर्व्यत्यासंमन्यते २० तासांकन्यानांनामानिकथयन्नेवविवाहानाह श्रद्धेतिपंचभिः श्रद्धाद्यधिष्ठात्र्योदेव्यःश्रद्धादयउच्यते २१ २२ २३ २४ २५ धर्मपत्नीनांत्रयोदशानांपुत्रानाह श्रद्धेतित्रिभिः चलालक्ष्मीः २६ क्रियात्रिगुणानतस्तमोंशेनदंडंरजोंशेननयंसत्वांशेनविनयमनौद्धत्यरूपमसूयत लज्जाशारीरंविनयम् वपुःसंज्ञाव्यवसायमुद्योगम् २७ कीर्तिर्यशःसंज्ञंपुत्रम् पुण्यजन्याख्यातिर्यशः तदितरासत्ख्यातिःकीर्तिरितिविभागः २८ नंदीभार्याहर्षमसूयतेत्यन्वयः नंदीरतिःधर्मभार्याणांवंशाउक्ताः अन्यासांतुदक्षकन्यानांपुत्रान्देवौधाताविधातारौभृगोःख्यातिरसूयतेत्यादिनाउत्तराध्यायत्रयेणवक्ष्यति तत्रतावद्धर्मवंशोक्त्यातत्प्रतियोगितथाबुद्धिस्थस्याधर्मस्यवंशंप्रसक्तानुप्रसक्त्यानित्यप्र

स्तासांतुसम्यङ्नामानिमेशृणु २० श्रद्धालक्ष्मीर्धृतिस्तुष्टिःपुष्टिर्मेधाक्रियातथा । बुद्धिर्ह्रीर्लज्जावपुःशांतिर्ऋद्धिःकीर्तिस्त्रयोदशी २१ पत्न्यर्थंप्रतिजग्राह धर्मोदाक्षायणीःप्रभुः । ताभ्यःशिष्टाःकनीयस्यएकादशसुलोचनाः २२ ख्यातिःसत्यथसंभूतिःस्मृतिःप्रीतिःक्षमातथा । सन्नतिश्चानुसूयाचऊर्ज्जा स्वाहास्वधातथा २३ भृगुर्भवोमरीचिश्चतथाचैवांगिरामुनिः । पुलस्त्यःपुलहश्चैवक्रतुश्चर्षिवरस्तथा २४ अत्रिर्वसिष्ठोवह्निश्चपितरश्चयथाक्रमम् । ख्यात्याद्याजगृहुःकन्यामुनयोमुनिसत्तम २५ श्रद्धाकामंचलादर्पंनियमंधृतिरात्मजम् । संतोषंचतथातुष्टिर्लोभंपुष्टिरसूयत २६ मेधाश्रुतंक्रियादंडं नयंविनयमेवच । बोधंबुद्धिस्तथालज्जाविनयंवपुरात्मजम् २७ व्यवसायंप्रजज्ञेवैक्षेमंशांतिरसूयत । सुखमृद्धिर्यशःकीर्तिरित्येतेधर्मसूनवः २८ का मान्नंदीसुतंहर्षंधर्मपौत्रमसूयत । हिंसाभार्यालधर्मस्यतयोर्जज्ञेतथानृतम् २९ कन्याचनिकृतिस्ताभ्यांभयंनरकमेवच । मायाचवेदनाचैवमिथुनंत्विद मेतयोः ३० तयोर्जज्ञेथवैमायामृत्युंभूतापहारिणम् । वेदनास्वसुतंचापिदुःखंजज्ञेथरौरवात् । मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्चजज्ञिरे ३१ दुःखोत्तराःस्मृताह्येतेसर्वेचाधर्मलक्षणाः । नैषांभार्यास्तिपुत्रोवासर्वेतेह्यूर्ध्वरेतसः ३२ रौद्राण्येतानिरूपाणिविष्णोर्मुनिवरात्मज । नित्यंप्रलयहे तुत्वंजगतोस्यप्रयांतिवै ३३ दक्षोमरीचिरत्रिश्चभृग्वाद्याश्चप्रजेश्वराः । जगत्यत्रमहाभागानित्यंसर्गस्यहेतवः ३४ मनवोमनुपुत्राश्चभूपावीर्यधना श्चये । सन्मार्गाभिरताःशूरास्तेनित्यंस्थितिकारिणः ३५ मैत्रेयउवाच । येयंनित्यास्थितिर्ब्रह्मन्नित्यःसर्गस्त्वयेरितः । नित्याभावश्चतेषांवैस्वरूपं

लयादिकंचाह हिंसेत्यादिना धर्मश्चाधर्मश्चब्रह्मणःपुत्रौ धर्मस्तनाद्दक्षिणतोयत्रनारायणःस्वयम् अधर्मःपृष्ठतोयस्मान्मृत्युर्लोकभयंकरइतिशुकोक्तेः २९ निकृतिर्वचनम् ताभ्यामनृतानिकृ तिभ्यांभयनरकाख्यंचपुत्रद्वयंजज्ञे एतयोर्भयनरकयोर्यथाक्रमंमिथुनंमिथुनत्वसंपादकंभार्याद्वयमिदंचताभ्यामेवअनृतनिकृतिभ्यांजज्ञेइत्यर्थः ३० वेदनाचदुःखंस्वसुतंस्वयोग्यंसुतंरौरवान्नर काज्जनयामासेत्यर्थः ३१ दुःखोत्तरादुःखोदर्काःयतोऽधर्मलक्षणाःपापरूपाः यद्वाप्राचीनाधर्मज्ञापकाः तत्फलत्वात् एषांव्याध्यादीनां ३२ चरमकार्यदुःखभोगात्मकत्वाद्रौद्राणितामसानि अतोजगतोनित्यंवैप्रलयहेतुत्वंप्रयांति ३३ नित्यप्रलयहेतुप्रसंगान्नित्यसंर्गहेतूनित्यास्थितिहेतूंश्चाह दक्षइतिद्वाभ्यां ३४ वीर्यंतेजएवधनंयेषांते वीर्यधराइतिवापाठः ३५ ननुमन्वादीनां कादाचित्कानांकथंनित्यसृष्ट्यादिहेतुत्वमित्याशयेनपृच्छति येयमिति नित्याभावःनित्यप्रलयः ३६ तैस्तैर्दक्षमन्वादिरूपैःशक्त्याधानद्वाराभगवानेवकरोतिअतोनोक्तदोषप्रसंगइत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्याहतान्अव्युच्छिन्नान् ३७ तत्रप्रथमंप्रलयंचतुर्विधंप्रपंचयति नैमित्तिकइति ३८ यच्छेतेयदाशेतेब्रह्मातदाब्रह्मनिद्रानिमित्तोनैमित्तिकः ब्रह्मांडंयदाप्रकृतौलयंयातितदाप्राकृतिकइ त्यर्थः ३९ ज्ञानात्परमात्मनियोगिनोलयआत्यंतिकःसदैवदीपज्वालावत्सातत्येनजातानांदिवानिशंयोविनाशःसनित्यः ४० त्रिविधांसृष्टिमाह प्रसूतिरिति प्रलयावसानेप्रकृतेःसकाशा द्यामहदादीनांप्रसूतिःसाप्रकृतीसृष्टिः अवांतरप्रलयादनुपश्चाद्यासृष्टिःसादैनंदिनीब्रह्मणोदिनंदिनंप्राप्यभवतीतितथा ४१ भूतानीति अस्मदादिसृष्टिप्रवाहोनित्यसर्गइत्यर्थः ४२ आत्यं तिकप्रलयवदात्यंतिकसृष्टेरभावात्सृष्टिस्त्रिविधैव स्थितेर्नैमित्तिकत्वादिभेदाभावादेकैवेत्युपसंहरति एवमिति ४३ तर्हिविष्णोःसर्वदेहेषुसदास्थितत्वात्कालभेदेनउत्पत्त्यादयोनस्युरित्यत आह सृष्टीति तथापिविष्णुशक्तीनांसत्त्वादीनांतत्रतत्रकालभेदेनसंचारित्वान्नायंदोषइतिभावः सदानित्यमेव अहर्निशमविच्छेदेन ४४ यस्मात्त्रिगुणात्मकशक्तित्रयपरिवृत्त्यासृष्ट्यादिप्रवा

ममकथ्यताम् ३६ पराशरउवाच। सर्गस्थितिविनाशांश्चभगवान्मधुसूदनः। तैस्तैरूपैरचिंत्यात्माकरोत्यव्याहतान्विभुः ३७ नैमित्तिकःप्राकृतिक स्तथैवात्यंतिकोद्विज। नित्यश्चसर्वभूतानांप्रलयोयंचतुर्विधः ३८ ब्राह्मोनैमित्तिकस्तत्रयच्छेतेजगतःपतिः। प्रयातिप्राकृतेचैवब्रह्मांडंप्रकृतौलयम्। ३९ ज्ञानादात्यंतिकःप्रोक्तोयोगिनःपरमात्मनि। नित्यःसदैवजातानांयोविनाशोदिवानिशम् ४० प्रसूतिःप्रकृतेर्यातुसासृष्टिःप्राकृतीस्मृता। दैनं दिनीतथाप्रोक्तावांतरप्रलयादनु ४१ भूतान्यनुदिनंयत्रजायंतेमुनिसत्तम। नित्यःसर्गोहिसप्रोक्तःपुराणार्थविचक्षणैः ४२ एवंसर्वशरीरेषुभगवान्भू तभावनः। संस्थितःकुरुतेविष्णुरुत्पत्तिस्थितिसंयमान् ४३ सृष्टिस्थितिविनाशानांशक्तयःसर्वदेहिषु। वैष्णव्यःपरिवर्तंतेमैत्रेयाहर्निशंसदा ४४ गु णत्रयमयंह्येतद्ब्रह्मशक्तित्रयंमहत्। योतियातिसयात्येवपरंनावर्ततेपुनः ४५ इतिवि०प्र०सप्त० ७। पराशरउ०। कथितःस्तामसःसर्गोब्रह्मण स्तेमहामुने। रुद्रसर्गंप्रवक्ष्यामितन्मेनिगदतःशृणु १ कल्पादावात्मनस्तुल्यंसुतंप्रध्यायतस्ततः। प्रादुरासीत्प्रभोरंकेकुमारोनीललोहितः २ रु दन्वैसुस्वरंसोथद्रवंश्चद्विजसत्तम। किंरोदिषीतितंब्रह्मारुदंतंप्रत्युवाचवै ३ नामदेहीतितंसोथप्रत्युवाचप्रजापतिम्। रुद्रस्त्वंदेवनाम्नासिमारोदीर्धैर्य

होभवतिअतोगुणत्रयातीतस्यनपुनस्तत्रप्रवाहपातइत्याह गुणत्रयेति ब्रह्मशक्तित्रयंसृष्ट्यादिरूपम् ब्रह्मनितिपाठेसंबोधनंवा योतियातिअतिक्रम्यगच्छतिसपरंपदंयात्येवपुनर्नावर्तते नसपु नरावर्ततइतिश्रुतेः यद्वासृष्ट्यादिरूपंशक्तित्रयंगुणत्रयमयंतत्कार्यंमहद्ब्रह्मचयोतिशयेनविविच्ययातिजानाति अथवाएतच्छक्तित्रयमतिअतिक्रम्यवर्तमानंमहद्ब्रह्मयोजानाति शेषंसमानम् ४५ इति०वि०प्र०सप्त० ७ अष्टमेरुद्रसर्गोऽथश्रियश्चप्रक्रमोचितः प्रोक्तोययाविष्णुशक्त्याव्याप्तमेतच्चराचरम् १ दक्षकन्यापरिणेतृधर्मवंशोक्तेस्तत्प्रतियोगितयाबुद्धिस्थस्याधर्मस्यनित्यप्र लयहेतुंतामसंवंशमुक्त्वेदानींतदनुवादपूर्वकंदक्षकन्यान्वयमनुवर्तयितुंतत्कन्यापरिणेतृमुख्यनीललोहितरुद्रस्यसर्गंप्रस्तौति कथितइतितमसोऽधर्मादेरयंतामसः यद्यपिख्यातिःसत्पथसंभूति रित्युद्देशक्रमेणख्यातेरन्वयःप्रथमंवक्तुंयोग्यस्तथापितत्कथायाअतिविततत्वात्पश्चाद्वक्ष्यते यद्वापूर्वोक्तात्तामसाद्रुद्रसर्गादन्योयःकुमारसर्गोतभूतःसात्त्विकोरुद्रसर्गस्तामिमंशृण्वितिसंबंधःरुदन्द्र वन्प्रादुरासीदितिरुद्रनामानिरुक्तिः एवमुक्तस्तुरुरुदुर्दुद्रुवुश्चसमंततः रोदनाद्रवणाच्चैवरुद्रानाम्नेतिविश्रुता इतिवायूक्तेः १ नीललोहितइति वर्णद्वययोगात् भूत्वालोहितवांश्चैवपुनर्नीलत्वमागत,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीललोहितइत्येवंतेनासावभवत्प्रभुरितिस्कंदोक्तेः २ हेदेवनाम्नाखंरुद्रोसिरोदनाद्रवणाच्चेत्यर्थः परमेश्वरस्यापिरोदनादिशिशुत्वनाट्यंवामातापितृतंत्रत्वरूपंलोकसंग्रहार्थम् अतएवा श्चर्यत्वान्नामानिरुक्तिहेतुत्वंरोदनादेः तस्यचेश्वरत्वंदेवशब्देनस्वप्रकाशत्ववाचिनासंबोधनत्वात् आत्मनस्तुल्यंसुतंप्रध्यायतइत्युक्तत्वात् ४ ५ रुद्रादिनामोपाधिभेदादष्टानामित्युच्य ते सप्तनामान्याह भवमित्यादि तंनाम्नाभवमित्युवाच तस्यभवादिनामानिचकारेत्यर्थः ६ तदेवाह चक्रइति ७ अष्टस्थानान्याह सूर्यइति सूर्यादयएवाभिव्यक्तिहेतुत्वात्तन वउच्यंते दीक्षितोब्राह्मणइति स्वधर्मानुष्ठातरिक्षेत्रज्ञेपरमात्माभिव्यक्तेस्तन्मूर्तित्वं आत्मातस्याष्टमीमूर्तिःशिवस्यपरमात्मनः व्यापिकेतरमूर्तीनांविश्वंतस्माच्छिवात्मकम् स्थानेष्वेतेषुये रुद्रंध्यायंतिप्रणमंतिच तेषामष्टतनुर्देवोददातिपरमंपदमितिवायूक्तेः रुद्रभवादीनांक्रमात्सूर्यजलादिस्थानाष्टकं तनवोमूर्तयः ८ सुवर्चलाद्याःसूर्यादीनांयथाक्रमंपत्न्यःस्मृताइतिद्वयोरन्वयः

मावह ४ एवमुक्तःपुनःसोऽथसप्तकृत्वोरुरोदवै । ततोऽन्यानिददौतस्मैसप्तनामानिसप्रभुः ५ स्थानानिचैषामष्टानांपत्नीःपुत्रांश्चवैविभुः । भवंशर्व मथेशानंतथापशुपतिंद्विज ६ भीममुग्रंमहादेवमुवाचसपितामहः । चक्रेनामान्यथैतानिस्थानान्येषांचकारसः ७ सूर्योजलंमहीवायुर्वह्निःराकाशेम वच । दीक्षितोब्राह्मणःसोमइत्येतास्तनवःक्रमात् ८ सुवर्चलातथैवोमाविकेशीचापराशिवा। स्वाहादिशस्तथादीक्षारोहिणीचयथाक्रमम् ९ सूर्यादी नांनरश्रेष्ठरुद्राद्यैर्नामभिःसह । पत्न्यःस्मृतामहाभागतदपत्यानिमेशृणु १० येषांसूतिप्रसूतैश्चइदमापूरितंजगत् । शनैश्चरस्तथाशुक्रोलोहितांगो मनोजवः ११ स्कंदःस्वर्गोथसंतानोबुधश्चानुक्रमात्स्मृताः । एवंप्रकारोरुद्रोऽसौसतींभार्यामविंदत १२ दक्षकोपाच्चतत्याजसासतीस्वंकलेवरम् । हिमवद्दुहितासाभून्मेनायांद्विजसत्तम १३ उपयेमेपुनश्चोमामनन्यांभगवान्भवः । देवौधातृविधातारौभृगोःख्यातिरसूयत । श्रियंचदेवदेवस्यपत्नी नारायणस्यया १४ मैत्रेयउवाच । क्षीराब्धौश्रीःपुरोत्पन्नाश्रूयतेऽमृतमंथने । भृगोःख्यात्यांसमुत्पन्नेत्येतदाहकथंभवान् १५ पराशरउवाच । नित्यैवसाजगन्माताविष्णोःश्रीरनपायिनी। यथासर्वगतोविष्णुस्तथैवेयंद्विजोत्तम १६ अर्थोविष्णुरियंवाणीनीतिरेषानयोहरिः । बोधोविष्णुरियंबुद्धि

९ नामभिःसहरुद्रादीनिनामान्यपिस्मृतानीत्यनुवादः १० सूतिप्रसूतैःपुत्रपौत्रादिभिः लोहितांगोमंगलः मनोजवोवायुविशेषोवायोरपत्यं ११ स्कंदःकार्तिकेयोवह्नेः स्वर्गःस्वर्गाधिष्ठा त्रीदेवताआकाशस्य एवंसंतानस्तदधिष्ठातादेवोदीक्षितस्य उक्तस्यरुद्रसर्गस्यप्रस्तुतोपयोगमाह एवंप्रकारइति १२ सतीनामदक्षस्यकन्यादक्षकोपात्पित्रादक्षेणयज्ञेरुद्रावज्ञानोद्भूतात्कले वरंतत्याज अतस्तस्याःसंततिर्नाभूदितिभावः मेनायांहिमवद्भार्यायां १३ अनन्यांभवैकनिष्ठां नारायणस्ययापत्नीतांचश्रियमसूयतेत्यन्वयः १४ क्षीराब्धौसमुत्पन्नायाःकथंख्यात्यामुत्प त्तिः उत्पन्नस्योत्पत्तेरसंभवादितिप्रश्नार्थः १५ उत्तरस्यायंभावः तस्याउत्पत्तिमत्त्वेभवेदयंविरोधः जगदुपादानभूतायाःसर्वगतायाःसत्त्वात्मिकायाश्चविष्णुशक्तेर्विष्णोरिवांशेनाविर्भावति रोभावमात्रंतेनपूर्वंभृगुख्यात्योराविर्भूतायादुर्वाससःशापेनचातिरोभूतायाःपुनःक्षीरनिधेराविर्भावमात्रंवर्ण्यतइतितदेवाह नित्यैवसेत्यादिना १६ लक्ष्मीनारायणयोःसर्वात्मत्वंतथोपासनार्थंप्र पंचयति अर्थोविष्णुरित्यादिनायावदध्यायसमाप्ति अर्थोभिधेयःवाणीतदभिधायिकावाक् नीतिर्दंडनीतिः एषाश्रीर्नयःसामाद्युपायः बोधोर्थप्रकाशःबुद्धिस्तदाभिव्यंजिकानिश्चयात्मिकाधीत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिः धर्मोऽपूर्वसत्क्रियातत्साधनंयागादि १७ भूधरोगिरिर्भूपतिर्वा यदृच्छालाभैरलंप्रत्ययःसंतोषः तत्कृतानिर्वृतिस्तुष्टिः १८ अपेक्षामात्रमिच्छा तदनुवर्त्तिःकामः १९ पत्नीशालादीक्षितपत्नीगृहम् प्राग्वंशोहविर्गृहात्पूर्वसंस्थंयज्ञशालाख्यंगृहम् चितिरिष्टकाचयनम् इध्माकाष्ठम् २० सामस्वरूपीरथंतरादिसामरूपःउद्गीतिस्तद्गानव्यापाररूपा हुताशनोवासुदेवःस्वाहा लक्ष्मीः २१ २२ अवकाशोविष्णुःद्यौःश्रीः २३ धृतिर्धारणंजगच्चेष्टालक्ष्मीस्तत्कर्तावायुर्हरिः स्मृतिरितिपाठेअनुभूतेर्थेसंस्कारजन्यंज्ञानम् स्मृतेतिपाठःसुगमः २४ जलंजलधिगोविंद

धर्मोसौसत्क्रियात्वियम्१७स्त्रष्टाविष्णुरियंसृष्टिःश्रीर्भूमिर्भूधरोहरिः। संतोषोभगवांल्लक्ष्मीस्तुष्टिर्मैत्रेयशाश्वती१८इच्छाश्रीर्भगवान्कामोयज्ञोसौदक्षिणातुसा। आज्याहुतिरसौदेवीपुरोडाशोजनार्दनः १९ पत्नीशालामुनेलक्ष्मीःप्राग्वंशोमधुसूदनः। चितिर्लक्ष्मीर्हरिर्यूपइध्माश्रीर्भगवान्कुशः २० सामस्वरूपीभगवानुद्गीतिःकमलालया। स्वाहालक्ष्मीर्जगन्नाथोवासुदेवोहुताशनः २१ शंकरोभगवाञ्शौरिःश्रीश्चगौरीद्विजोत्तम। मैत्रेयकेशवःसूर्यस्तत्प्रभाकमलालया २२ विष्णुःपितृगणःपद्मास्वधाशाश्वतपुष्टिदा। द्यौःश्रीःसर्वात्मकोविष्णुरवकाशोऽतिविस्तरः २३ शशांकःश्रीधरःकांतिःश्रीस्तस्यैवानपायिनी। धृतिर्लक्ष्मीर्जगच्चेष्टावायुःसर्वत्रगोहरिः २४ जलधिर्द्विजगोविंदस्तद्वेलाकमलालया। लक्ष्मीःस्वरूपमिंद्राणीदेवेंद्रोमधुसूदनः २५ यमश्चक्रधरःसाक्षाद्धूमोर्णाकमलालया। ऋद्धिःश्रीःश्रीधरोदेवःस्वयमेवधनेश्वरः २६ गौरीलक्ष्मीर्महाभागाकेशवोवरुणःस्वयम्। श्रीर्देवसेनातत्पातादेवसेनापतिर्हरिः२७अवष्टंभोगदापाणिःशक्तिर्लक्ष्मीर्द्विजोत्तम। काष्ठालक्ष्मीर्निमेषोसौमुहूर्तोसौकलातुसा २८ ज्योत्स्नालक्ष्मीःप्रदीपोसौसर्वःसर्वेश्वरोहरिः। लताभूताजगन्माताश्रीर्विष्णुर्द्रुमसंस्थितिः २९ विभावरीश्रीर्दिवसोदेवश्चक्रगदाधरः। वरप्रदोवरोविष्णुर्वधूःपद्मवनालया ३० नदस्वरूपोभगवाञ्श्रीर्नदीरूपसंस्थितिः। ध्वजश्चपुंडरीकाक्षःपताकाकमलालया ३१ तृष्णालक्ष्मीर्जगत्स्वामीलोभोनारायणःपरः। रतिरागौचधर्मज्ञलक्ष्मीर्गोविंदएवच ३२ किंचातिबहुनोक्तेनसंक्षेपेणेदमुच्यते। देवतिर्यङ्मनुष्यादौपुंनाम्निभगवान्हरिः। स्त्रीनाम्निलक्ष्मीर्मैत्रेयनानयोर्विद्यतेपरम् ३३ इतिश्रीविष्णुपुराणेप्रथमेअंशेअष्टमोध्यायः ८। । पराशरउवाच। इदंशृणुहिमैत्रेययत्पृष्टोहमिहत्वया। श्रीसंबद्धंम

इतिपाठःक्वचित् जलधिर्जलधेः षष्ठीलोपश्छांदसः लक्ष्मीःस्वरूपमितिव्यत्ययेनक्लीबत्वम् २५ धूमोर्णायमभार्या ऋद्धिःकुबेरभार्याधनेश्वरःकुबेरः २६ गौरीजलेशभार्या देवसेनापतिःकार्तिकेयः २७ अवष्टंभःपुरुषकारः शक्तिस्तत्सामर्थ्यम् काष्ठापंचदशनिमेषात्मिका निमेषोक्षिपक्ष्मपतनोपलक्षितःकालः मुहूर्तोदंडद्वयं कलात्रिंशभागः२८ज्योत्स्नाप्रभा प्रदीपोहरिः हरेर्विशेषणंसर्वःसर्वाधिष्ठानरूपः द्रुमसंस्थितिर्द्रुमाकारोलतायाआश्रयः २९ वरःपतिः वधूर्जाया ३० ३१ इतस्ततःपुनःपुनरुपादित्सातृष्णा देयस्यादित्सानिषिद्धालिप्साचलोभः रतिस्तत्कालजप्रियसंगजाप्रीतिः रागःकामः रतिस्तत्पत्नीतिकेचित् लक्ष्मीर्गोविंदएवचेतियथासंख्यम् ३२ अनयोराभ्यांपरमन्यन्नास्तीति ३३ इतिश्रीविष्णुपुराणेप्रथमेअंशेअष्टमोध्यायः ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह दुर्वाससःशापात्तिरोधानांश्रियस्ततः हरेःस्तुत्याब्धिमथनाच्छ्रियोजन्मादिवर्ण्यते १ तदेवंमैत्रेयकृताक्षेपपरिहारार्थंसर्वात्मकत्वंप्रपंचयन्विष्णोरखिलक्ष्म्याअपिनित्यत्वमुक्त्वेदानीमाविर्भावतिरोभावाभ्यांमैत्रेयोक्तविरोधंपरिहर्तुमाह इदंचेत्यादिनापूर्वंभृगुसुतासतीत्यंतेनग्रंथेन भृगुसुतापिश्रीर्यथाक्षीराब्धौजातेत्युच्यतेइदंवशृणु मयाप्येवमेवसंदिहानेनमरीचेःसकाशाच्छ्रुतमासीत् १ तत्रप्रथमंभृगुसुतायास्तस्यास्तिरोधानेकारणंवक्तुमाह दुर्वासाइति शंकरस्यांशइत्यनेनशक्रशापेसामर्थ्यमपराधासहिष्णुत्वंचोक्तम् २ संतानोदेवतरुस्तदीयानांपुष्पाणांस्रजंमालां यस्यागंधेनवासितंतद्वनमखिलंवनचारिणामतिसेव्यमभूत् ३ उन्मत्तव्रतधृग्योगिनोहिजडोन्मत्तपिशाचइववर्तते तांस्रजंतांविद्याधरवधूंयाचितवानितिद्विकर्मकोधातुः ४ ५ तांस्रजमात्म

याप्येतच्छ्रुतमासीन्मरीचितः १ दुर्वासाःशंकरस्यांशश्चचारपृथिवीमिमाम् । सददर्शस्रजंदिव्यामृषिर्विद्याधरीकरे २ संतानिकानामखिलंयस्यागंधेनवासितम् । अतिसेव्यमभूद्ब्रह्मंस्तद्वनंवनचारिणाम् ३ उन्मत्तव्रतधृग्विप्रस्तांदृष्ट्वाशोभनांस्रजम् । तांययाचेवरारोहांविद्याधरवधूंततः ४ याचितातेनतन्वंगीमालांविद्याधरांगना । ददौतस्मैविशालाक्षीसादरंप्रणिपत्यतम् ५ तामादायात्मनोमूर्ध्निस्रजमुन्मत्तरूपधृक् । कृत्वासविप्रोमैत्रेयपरिबभ्राममेदिनीम् ६ सददर्शसमायांतमुन्मत्तैरावतस्थितम् । त्रैलोक्याधिपतिंदेवंसहदेवैःशचीपतिम् ७ तामात्मनःसशिरसःस्रजमुन्मत्तषट्पदाम् । आदायामरराजायचिक्षेपोन्मत्तवन्मुनिः ८ गृहीत्वामरराजेनस्रग्गैरावतमूर्धनि । न्यस्तारराजकैलासशिखरेजाह्नवीयथा ९ मदांधकारितांक्षोसौगंधाकृष्टेनवारणः । करेणाघ्रायचिक्षेपतांस्रजंधरणीतले १० ततश्चुक्रोधभगवान्दुर्वासामुनिसत्तमः । मैत्रेयदेवराजंतुक्रुद्धश्चैतदुवाचह ११ ऐश्वर्यमददुष्टात्मन्नतिस्तब्धोसिवासव । श्रियोधामस्रजंयस्त्वंमद्दत्तांनाभिनंदसि १२ प्रसादइतिनोक्तंतेप्रणिपातपुरःसरम् । हर्षोत्फुल्लकपोलेनन चापिशिरसाधृता १३ मयादत्तामिमांमालांयस्मान्नबहुमन्यसे । त्रैलोक्यश्रीरतोमूढविनाशमुपयास्यति १४ मांमन्यतेन्यैःसदृशंनूनंशक्रभवान् द्विजैः । अतोवमानमस्माकंमानिनाभवताकृतम् १५ मद्दत्ताभवतायस्मात्क्षिप्तामालामहीतले । तस्मात्प्रनष्टलक्ष्मीकंत्रैलोक्यंतेभविष्यति १६ यस्यसंजातकोपस्यभयमेतिचराचरम् । तंत्वंमामतिगर्वेणदेवराजावमन्यसे १७ पराशरउवाच । महेंद्रोवारणस्कंधादवतीर्यत्वरान्वितः । प्रसाद

नोमूर्धनिकृत्वामेदिनींपरिबभ्रामेत्यन्वयः ६ ७ ८ ऐरावतमूर्ध्निन्यस्तासतीकैलासशिखरेजान्हवीवरराज ९ मदेनांधकारितेजातांधकारेआक्षिणीयस्यासौगंधाकृष्टेन करेण करिणांकरस्यैवघ्राणत्वात् १० ११ अतिस्तब्धोसिगर्वितोसि श्रियोधामलक्ष्म्यानिवासभूताम् १२ नोक्तंतेत्वयाहर्षेणोत्फुल्लौविकसितौकपोलौयस्यतथाभूतेनसतात्वयाशिरसिनधृताच १३ नचतांबहुमयादत्तांमन्यसेअतस्त्रैलोक्यश्रीस्तवत्रैलोक्यैश्वर्यम् १४ किंचअतोद्विजमात्रसादृश्यज्ञानान्मानिनाअमरराजोहमित्यभिमानवताभवतामम्मावमानंकृतम् १५ सहेतुकंशापंददाह यस्मादिति गजेक्षिप्तायाउपेक्षितत्वाद्भवतैवक्षिप्तेत्युक्तम् तस्मान्मालायाधरणीक्षेपदोषात्त्वदीयंत्रैलोक्यंप्रणष्टलक्ष्मीकंदारिद्र्याभिभूतंभविष्यति पूर्वंमालायाअवहुमानाच्छ्रीनाशलक्षणःशापःअयंचभूक्षेपाद्दारिद्र्याभिभवरूपइत्यपौनरुक्त्यम् १६ यथाकथंचित्संजातकोपस्यैवयस्यमम १७ अकल्मषंसापराधेशापदानात् १८ १९ अन्येतेमुनयोदयालवःक्षमाशीलाश्चअहंतुनतथा २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवाह गौतमादिभिरन्यैश्चमुधावृथात्वंगर्वमापादितोलंभितः गौतमोहिस्वभार्यायाअहल्यायाघर्षणात्त्वंसर्वांगभगोभवेतिशप्तवान्त्वत्प्रसादितःसएवसर्वांगनेत्रंचकार नैवंकारुणिकत्वंममेति भावः अक्षांतिरसहिष्णुतासैवसारस्तपोबलंतदेवसर्वस्वंयस्यतम् २१ वसिष्ठाद्यैरुच्चकैःस्तुवद्भिः अथवाउच्चकैरुन्नमितैःशिरोभिरुच्चासनोपनिविष्टस्यतवस्तवंकुर्वद्भिर्गर्वनीतोसियेनहेतुना मामप्युक्तस्वरूपमवमन्यसे २२ चलज्जटाकलापोयस्यतस्य ज्वलज्जटाकलापस्येतिवापाठः ममसुखंनिरीक्ष्ययोभवंनगतःसकःनकोपीत्यर्थः वशंगतइतिवापाठः २३ विडंबनामुपहासं अनुनयात्मिकांसांत्वनरूपाम् २४ विप्रोदुर्वासाः २५ अपध्वस्तंनष्टप्रायम् सत्त्वाभावान्निःश्रीकंभोग्यवस्तुरहितम् ओषध्यादिभोगाभावंतत्साधनयज्ञाद्यभावंचाह संक्षीणेत्यादि २६ २७

यामासमुनिंदुर्वाससमकल्मषम् १८ प्रसाद्यमानःसतदाप्रणिपातपुरःसरम् । प्रत्युवाचसहस्राक्षंदुर्वासामुनिसत्तम १९ नाहंकृपालुर्हृदयोनचमां भजतेक्षमा । अन्येतेमुनयःशक्रदुर्वाससमवेहिमाम् २० गौतमादिभिरन्यैस्त्वंगर्वमापादितोमुधा । अक्षांतिसारसर्वस्वंदुर्वाससमवेहिमाम् २१ वसिष्ठाद्यैर्दयासारैःस्तोत्रंकुर्वद्भिरुच्चकैः । गर्वंगतोसियेनैवंमामप्यद्यावमन्यसे २२ चलज्जटाकलापस्यभ्रुकुटीकुटिलंमुखम् । निरीक्ष्यकस्त्रिभुवनेमयोनभयंगतः २३ नाहंक्षमिष्येबहुनाकिमुक्तेनशतक्रतो । विडंबनामिमांभूयःकरोष्यनुनयात्मिकाम् २४ पराशरउवाच । इत्युक्त्वाप्रययौविप्रो देवराजोपितंपुनः । आरुह्यैरावतंब्रह्मन्प्रययावमरावतीम् २५ ततःप्रभृतिनिःश्रीकंसशक्रंभुवनत्रयम् । मैत्रेयासीदपध्वस्तंसंक्षीणौषधिवीरुधम् । २६ नयज्ञाःसमवर्तंतनतपस्यंतितापसाः । नचदानादिधर्मेषुमनश्चक्रेतदाजनः २७ निःसत्त्वाःसकलालोकालोभाद्युपहतेंद्रियाः । स्वल्पेपिहिबभूवुस्ते साभिलाषाद्विजोत्तम २८ यतःसत्त्वंततोलक्ष्मीःसत्त्वंभूत्यनुसारिच । निःश्रीकाणांकुतःसत्त्वंविनातेनगुणाःकुतः २९ बलशौर्याद्यभावश्चपुरुषाणांगुणैर्विना । लंघनीयःसमस्तस्यबलशौर्यविवर्जितः ३० भवत्यपध्वस्तमतिर्लंघितःप्रथितःपुमान् । एवमत्यंतनिःश्रीकेत्रैलोक्येसत्त्ववर्जिते । देवान्प्रतिबलोद्योगंचक्रुर्दैतेयदानवाः ३१ लोभाभिभूतानिःश्रीकादैत्याःसत्त्वविवर्जिताः । श्रियाविहीनैर्निःसत्त्वैर्देवैश्चक्रुस्ततोरणम् ३२ निर्जितास्त्रिदशादैत्यैरिंद्राद्याःशरणंययुः । पितामहंमहाभागंहुताशनपुरोगमाः ३३ यथावत्कथितेदेवैर्ब्रह्माप्राहततःसुरान् । ब्रह्मोवाच । परापरेशंशरणंव्रजध्व

निःसत्त्वाधैर्यशून्याअतएवलोभादिभिरुपहतेंद्रियाःअतःस्वल्पेप्यर्थेसाभिलाषाः २८ एतदेवस्पष्टयति यतइति यतःयत्रसत्त्वंतत्रलक्ष्मीः सत्त्वंचभूत्यनुसारिलक्ष्म्याअनुवर्ति एवंसत्त्वलक्ष्म्योःपरस्परविनाभूतत्वाच्छ्रीनिवृत्त्यासत्त्वानिवृत्तिमाह निःश्रीकाणामिति तेनसत्त्वेनविनागुणाऔदार्यसंतोषशीलादयःकुतः २९ अतोनर्थपरंपरामाह बलेति बलंसामर्थ्यं शौर्यंपरजयंप्रत्युत्साहःलंघनीयोभिभाव्यः ३० प्रथितःख्यातोपिलंघितःअवज्ञातःअपध्वस्तमतिर्नष्टप्रज्ञोभवति ३१ ३२ निर्जिताइति इंद्रापराधेनत्रैलोक्यस्यनिःश्रीकत्वंअतस्त्रैलोक्यांतर्वर्तितयादैत्यानामपिनिःश्रीकत्वसाम्येपिऔदार्यादिगुणित्वप्रकृतिच्युतादेवानिर्गुणप्रकृतिभिर्दैत्यैर्जिताइतिसंगच्छते हुताशनपुरोगमाअग्नेर्दूतत्वत्पुरोगमनम् अग्निर्देवानांदूतआसीदितिश्रुतेः ३३ यथावत्कथितेवृत्तांतेब्रह्मासुरानाह विष्णुंशरणंव्रजध्वमितिसंबंधः शरणत्वमेवाह परापरेशमित्यादिविशेषणैः परेब्रह्मादयः अपरेकीटादयःतेषामीशम् ३४ ईश्वरमभ्याहतेच्छम् अतःजगतउत्पत्त्यादीनांहेतुम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमहेतुम् अतएवनित्यसिद्धम् अतएवप्रजापतीनामस्मदादीनांपतिंनियंतारम् तत्कुतः विष्णुंसर्वत्रांतर्यामितयाप्रवेशनशीलम् प्रवेशनेनप्राप्तंपरिच्छेदंवारयति अनंतंदेशाद्यपरिच्छिन्नम् दैत्यपराजितानामस्माकंतद्भजनेनकिमतआह अपराजितंजयैकशीलम् ३५ जगदुत्पत्त्यादिहेतुत्वंसमर्थयति प्रधानपुंसोरनयोःप्रसिद्धयोःअजयोरितिपाठेजन्मरहितयोः सर्गाभिमुखीकरणेनकार्यत्वंभगवतश्चकारणत्वंकिमर्थंश्रेयोविधास्यतीत्याह स्वभावतःप्रणतार्तिहरम् ३६ उत्तरंउत्तरदिगवस्थितंतीरंकूलम् परंकूलमितिवा ३७ इष्टाभिरभिप्रेतार्थद्योतिकाभिःपरापरपतिं उत्कृष्टापकृष्टजीवस्वामिनम् हरिमार्तिहरम् ३८ नमामीत्यस्योत्तरश्लोकेनसंबंधः सर्वंसर्वस्वरूपम् सर्वेतिपाठेसंबोधनम् सर्वस्येश्वरंचअनंतंनाशहीनम् अजंजन्महीनम् अव्ययंत्रुटिरहितम् लोकेयेधामधराःप्रभाववंतस्तेषामाधारभूतम् इंद्रादीनांप्रभावकारणमित्यर्थः अप्रकाशंप्रकाशकरहितंस्वप्रकाशमित्यर्थः अभेदिनंस्वगतभेदशून्यमित्यर्थः ३९ ४० यत्रसर्वमित्या

मसुरार्दनम् ३४ उत्पत्तिस्थितिनाशानामहेतुंहेतुमीश्वरम् । प्रजापतिपतिंविष्णुमनंतमपराजितम् ३५ प्रधानपुंसोरनयोःकारणंकार्यभूतयोः । प्रणतार्तिहरंविष्णुंसवःश्रेयोविधास्यति ३६ एवमुक्त्वासुरान्सर्वान्ब्रह्मालोकपितामहः । क्षीरोदस्योत्तरंतीरंतैरेवसहितोययौ ३७ सगत्वात्रिदशैःसर्वैःसमवेतःपितामहः । तुष्टाववाग्भिरिष्टाभिःपरापरपतिंहरिम् ३८ ब्रह्मोवाच । नमामिसर्वंसर्वेशमनंतमजमव्ययम् । लोकधामधराधारमप्रकाशमभेदिनम् ३९ नारायणमणीयांसमशेषाणामणीयसाम् । समस्तानांगरिष्ठंचभूतादीनांगरीयसाम् ४० यत्रसर्वंयतश्चैतदुत्पन्नंमत्पुरःसरम् । सर्वभूतश्चयोदेवःपराणामपियःपरः ४१ परःपरस्मात्पुरुषात्परमात्मस्वरूपधृक् । योगिभिश्चिंत्यतेयोऽसौमुक्तिहेतुर्मुमुक्षुभिः ४२ सत्त्वादयोनसंतीशेयत्रचप्राकृतागुणाः । संशुद्धःसर्वशुद्धेभ्यःपुमानाद्यःप्रसीदतु ४३ कलाकाष्ठानिमेषादिकालसूत्रस्यगोचरे । यस्यशक्तिर्नशुद्धस्यप्रसीदतुसनोहरिः ४४ प्रोच्यतेपरमेशोयोयःशुद्धोप्युपचारतः । प्रसीदतुसनोविष्णुरात्मायःसर्वदेहिनाम् ४५ यःकारणंचकार्यंचकारणस्यापिकारणम् । कार्यस्यापिचयःकार्यंप्रसीदतुसनोहरिः ४६ कार्यकार्यस्ययत्कार्यंकार्यंतस्यापियःस्वयम् । तत्कार्यकार्यभूतोयस्ततश्चप्रणताःस्मतम् ४७

दियच्छब्दानांसआद्यःपुमान्प्रसीदत्वितितृतीयेनान्वयः यत्रसर्वंतिष्ठतीतिशेषः यतोयस्मादेतन्मत्पुरःसरंअहमेवपुरःसरोग्रतोयस्यएतस्य सर्वभूतःप्राप्तः सर्वरूपइतिवा पराणामर्थादीनामपियःपरःपुरुषः तथाचश्रुतिः इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः महतःपरमव्यक्तमव्यक्तात्पुरुषःपरइति ४१ परस्मादव्यक्तप्रेरकात्कारणात्मनःपुरुषादपियःपरःपरमात्मैवस्वरूपधृक्मूर्तिधारी अतएवयोगिभिश्चिंत्यतेयोऽसौ ४२ नैर्गुण्यमाह सत्त्वादयोनसंतियतोतएवशुद्धःसर्वशुद्धेभ्यःसर्वसात्त्विकेभ्योपि ४३ कलाकाष्ठानिमेषादिकालएवसूत्रवत्सूत्रंजगच्चेष्टानियामकत्वात्तस्यगोचरेविषयेयस्यशक्तिर्लक्ष्मीर्नवर्ततेस्वरूपाभिन्नत्वान्नित्यैवसाकालाधीनानभवतीत्यर्थः अतएवशक्तिशक्तिमतोरभिन्नस्वरूपत्वादेवशुद्धइत्युक्तम् ४४ ननुलक्ष्मीर्यदिस्वरूपाभिन्नाकथंतर्हिलक्ष्म्याःपतिरुच्यतइतितत्राह प्रोच्यतइति पराचासौमाचलक्ष्मीःपरमातस्याःईशोयःशुद्धोपिउपचारतोभेदविवक्षयाप्रोच्यते द्वितीयोयच्छब्दःप्रसिद्धौ यद्वाननुत्रिगुणात्मकमायासंबंधात्कथंगुणराहित्यंकुतोवाशुद्धत्वंतत्राह कलादिकालसूत्रस्यगोचरेक्षोभ्यत्वेनतदधीनायाशक्तिः सायस्यशुद्धस्यवस्तुतोनवर्ततेतर्हिपरमेशत्वंकुतस्तत्राह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोच्यतइति वस्तुतःशुद्धेपिउपचारतोमायाद्वारातथात्वमित्यर्थः किंचमायिकधर्मानन्यानप्याह अत्मायइति ४५ ४६ यःकारणंचेतिपूर्वश्लोकार्थप्रपंचयति कार्यकार्यस्येति प्रकृतिकार्यस्यमहतोयत्कार्यमहंकाररूपंतस्यकार्यभूतःसूक्ष्मवर्गःतस्यापियत्कार्यंमहाभूतवर्गस्तत्कार्यंब्रह्मांडंतस्यकार्यभूतोब्रह्मदक्षादिवर्गः ततश्चतत्पुत्रपौत्रादिप्रवाहभूतश्चयःस्वयमेवतंप्रणताःस्मेत्यन्वयः ४७ तथाकारणंपुत्रादिप्रवाहस्रष्टृब्रह्मादितस्यकारणंब्रह्मांडंतस्यकारणंमहाभूतानितत्कारणंभूतसूक्ष्माणितत्कारणानामहंकारमहत्सूत्राणांहेतुंप्रधानभूतंप्रणताःस्मेत्यर्थः यद्वाकारणस्यब्रह्मांडस्यकारणंमहाभूतवर्गःतस्यकारणंभूतसूक्ष्मवर्गःतस्यकारणमहंकारःतस्यकारणंमहत्तत्त्वंतत्कारणानांसत्वरजस्तमसांहेतुंकारणंप्रेरकम् ४८ भोक्तारंचेतनम् भोज्यभूतंजडस्वरूपंसृज्यंघटादिकार्यकार्यताविषयंयागादि कर्ताचजीवस्तत्स्वरूपम् ४९ विशुद्धंबोधनंविशुद्धज्ञानंवृत्तिज्ञानंव्यावर्तयतिविशुद्धत्वंदर्शयति अव्यक्तमिति व्यक्तंविषयस्तद्रहितम् अविकारम

कारणंकारणस्यापितस्यकारणकारणम् । तत्कारणानांहेतुंत्वांप्रणताःपरमेश्वरम् ४८ भोक्तारंभोज्यभूतंचस्रष्टारंसृज्यमेवच । कार्यकर्तृस्वरूपंतंप्रणताःस्मपरंपदम् ४९ विशुद्धंबोधनंनित्यमजमक्षयमव्ययम् । अव्यक्तमविकारंयत्तद्विष्णोःपरमंपदम् ५० नस्थूलंनचसूक्ष्मंयन्नविशेषणगोचरे । तत्पदंपरमंविष्णोःप्रणमामसदामलम् ५१ यस्यायुतायुतांशांशेविश्वशक्तिरियंस्थिता । परब्रह्मस्वरूपस्यप्रणमामतमव्ययम् ५२ यंनदेवानमुनयोनचाहंनचशंकरः । जानंतिपरमेशस्यतद्विष्णोःपरमंपदम् ५३ यद्योगिनःसदोद्युक्ताःपुण्यपापक्षयेक्षयम् । पश्यंतिप्रणवेचिंत्यंतद्विष्णोःपरमंपदम् ५४ शक्तयोयस्यचैकस्यब्रह्मविष्णुशिवात्मिकाः । भवंत्यभूतपूर्वस्यतद्विष्णोःपरमंपदम् ५५ सर्वेशसर्वभूतात्मन्सर्वसर्वाश्रयाच्युत । प्रसीदविष्णोभक्तानांव्रजनोदृष्टिगोचरम् ५६ । पराशरउवाच । । इत्युदीरितमाकर्ण्यब्रह्मणस्त्रिदशास्ततः । प्रणम्योचुःप्रसीदेतिव्रजनोदृष्टिगोचरम् ५७ यन्नायंभगवान्ब्रह्माजानातिपरमंपदम् । तन्नताःस्मोजगद्धामतवसर्वगताच्युत ५८ इत्यंतेवचसस्तेषांदेवानांब्रह्मणस्तथा । ऊचुर्देवर्षयःसर्वेबृहस्पतिपुरोगमाः ५९ आद्योयज्ञःपुमानिज्योयःसर्वेषांचपूर्वजः । तन्नताःस्मजगत्स्रष्टुःस्रष्टारमविशेषणम् ६० भगवन्भूतभव्येशयज्ञमूर्तिधराव्यय । प्रसीदप्रणतानांत्वंसर्वेषांदेहिनोवरम् ६१ एषब्रह्मातथैवायंसहरुद्रैस्त्रिलोचनः । सर्वादित्यैःसमंपूषापावकोयंसहाग्निभिः ६२ अ

परिणामिचेति तदुपपादयति नित्यमित्यादिविशेषणैः अक्षयमनाधारंतद्विष्णोःपरमंपदंप्रणमामइत्युत्तरेणान्वयः ५० यत्प्रसिद्धम् विशेषणानांशुक्लादीनांनविषये ५१ यस्याचिंत्यानंतशक्तेरयुतायुतांशोमायाशक्तिलेशस्तस्यांशेरजोगुणेतस्मिन्नियंविश्वशक्तिर्जगन्मयीमायास्थितातंप्रणमामइत्यस्योत्तरश्लोकत्रयेप्यन्वयः ५२ देवादयोनजानंतिअहंनजानामिशंकरश्चनजानाति स्वप्रकाशत्वेनज्ञानविषयत्वात् ५३ पुण्यपापक्षयेतत्प्रतिबंधापगमेप्रणवेपश्यंतिआत्मैक्येनसाक्षात्कुर्वंतेमहावाक्यार्थविषयत्वात्तस्यचिंत्यंलक्ष्यंनिदिध्येयंवा ५४ अभूतपूर्वस्यनभूतःकश्चिदपिपूर्वंयस्मात्तस्यआनादेरित्यर्थः यस्यान्नजातःपरोऽन्योऽस्मियआविवेशभुवनानिविश्वेतिश्रुतेः ५५ तदेवंस्तुत्वाप्रार्थयते सर्वेशेति सर्वसर्वाश्रयसर्वेषांसर्वात्मनाआश्रयाधिष्ठानभूत ५६ ५७ जगद्धामजगतःप्रकाशकंआश्रयभूतमितिवा ५८ देवानांब्रह्मणश्चइतिपूर्वोक्तानांवचसामंते ५९ आद्यःअतएवपूर्वेषामपिपूर्वजः वस्तुतोऽविशेषणम् ६० ६१ प्रणता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामित्युक्तंतानेवाह एषब्रह्मेति ६२ देवेंद्रस्यपश्चान्निर्देशोऽपराधित्वात् ६३ ६४ ६५ अपूर्वरूपंसंस्थानंचदैहिकःसन्निवेशोयस्यतंऊर्जितंसर्वाभिभावकम् ६६ पूर्वंप्रणताअपिभक्त्या पुनःप्रणम्यतुष्टुवुः संक्षोभेणस्वभावप्रच्युत्यास्तिमितानिनिश्चलानिईक्षणानियेषांते ६७ नमोनमइतिवीप्साआदरे अविशेषःशुद्धःपरमात्मात्वम् ६८ तवसमीपम् ६९ वेद्यंवर्तमानंअवेद्यमतीतमनागतंच ७० वयमार्ताइत्यन्वयः तेजसाप्रभावातिशयेनआप्याययस्वसंवर्धय ७१ आर्तिःपीडा वाञ्छामनोरथंःमोहश्चित्तावसादः असुखंदुःखम् ७२ स्वशक्त्यालक्ष्म्या ७३ ७४

श्विनोवसवश्चामीसर्वेचेमेमरुद्गणाः । साध्याविश्वेतथादेवादेवेंद्रश्चायमीश्वरः ६३ प्रणामप्रवणानाथदैत्यसैन्यपराजिताः । शरणंत्वामनुप्राप्ताःसमस्तादेवतागणाः ६४ । पराशरउवाच । । एवंसंस्तूयमानस्तुभगवाञ्शंखचक्रधृक् । जगामदर्शनंतेषांमैत्रेयपरमेश्वरः ६५ तंदृष्ट्वातेतदादेवाः शंखचक्रगदाधरम् । अपूर्वरूपसंस्थानंतेजसांराशिमूर्जितम् ६६ प्रणम्यप्रणताःपूर्वंसंक्षोभस्तिमितेक्षणाः । तुष्टुवुःपुंडरीकाक्षंपितामहपुरोगमाः ६७ । देवाऊचुः । । नमोनमोविशेषस्त्वंत्वंब्रह्मात्वंपिनाकधृक् । इंद्रस्त्वमग्निःपवनोवरुणःसवितायमः । वसवोमरुतःसाध्याविश्वेदेवगणाभवान् ६८ योऽयंतवागतोदेवसमीपंदेवतागणः । सत्वमेवजगत्स्रष्टयंतःसर्वगतोभवान् ६९ त्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारःप्रजापतिः । वेद्यावेद्यंचसर्वात्मंस्त्वन्मयंचाखिलंजगत् ७० त्वमार्ताःशरणंविष्णोप्रयातादैत्यनिर्जिताः । वयंप्रसीदसर्वात्मंस्तेजसाप्याययस्वनः ७१ तावदार्तिस्तथावांछा तावन्मोहस्तथासुखम् । यावन्नायातिशरणंत्वामशेषाघनाशनम् ७२ तत्प्रसादंप्रसन्नात्मन्प्रपन्नानांकुरुष्वनः । तेजसांनाथसर्वेषांस्वशक्त्याप्यायनंकुरु ७३ । पराशरउवाच । । एवंसंस्तूयमानस्तुप्रणतैरमरैर्हरिः । प्रसन्नदृष्टिर्भगवानिदमाहसविश्वकृत् ७४ तेजसांभवतांदेवाःकरिष्याम्युपबृंहणम् । वदाम्यहंयत्क्रियतांभवद्भिस्तदिदंसुराः ७५ आनीयसहितादैत्यैःक्षीराब्धौसकलौषधीः । मंथानंमदरंकृत्वानेत्रंकृत्वातुवासुकिम् । मथ्यताममृतंदेवाःसहायेमय्यवस्थिते ७६ सामपूर्वंचदैतेयास्तत्रसाहाय्यकर्मणि । सामान्यफलभोक्तारोयूयंवाच्याभविष्यथ ७७ मथ्यमानेचतत्राब्धौयत्समुत्पत्स्यतेऽमृतम् । तत्पानाद्बलिनोयूयममराश्चभविष्यथ ७८ तथाचाहंकरिष्यामितेयथात्रिदशद्विषः । नप्राप्स्यंत्यमृतंदेवाःकेवलंक्लेशभागिनः ७९ । पराशरउवाच । । इत्युक्तादेवदेवेनसर्वएवततःसुराः । संधानमसुरैःकृत्वायत्नवंतोमृतेऽभवन् ८० नानौषधीःसमानीयदेव

७५ दुर्वाससःशापंपरिहर्तुंशक्तोपिब्रह्मण्यतयादुर्वाससोभीतवदुपायमुपदिशति आनीयेति अथवात्रभागवतोक्तएवाभिप्रायः तदुक्तम् एकएवेश्वरस्तस्मिन्सुरकार्येनृपेश्वर विहर्तुकामस्तानाहसमुद्रोन्मथनादिभिरिति क्षीराब्धौक्षिप्त्वेतिशेषः विचित्रौषधिक्षेपोविचित्रवस्तूत्पत्त्यर्थः नेत्रंमंथानरज्जुम् अमृतंमथ्यतांमथनेनामृतमुत्पाद्यतामित्यर्थः ७६ तत्रामृतविषयेसामपूर्वंसोपपत्तिकप्रीतिपूर्वकंसामान्यंसमानमेवयत्फलंतस्यभोक्तारोयूयंचभविष्यथेतिदैतेयावाच्याइत्यन्वयः ७७ बलिनोऽमरामरणवर्जिताश्च ७८ तर्हितेपितथाभविष्यंतीतिशंकमानान्प्रत्याह त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्सहायिनीतेनसहअयितुंगंतुंशीलंयस्याःसा ३९ यदाहरिरादित्योवामनोभूत् भार्गवोजामदग्न्यः ४० ४१ विष्णोर्देहानुरूपाम् नृसिंहाद्यवतारेषुनारसिंह्यादिरूपाम् ४२ कुलत्रयंपु
रुषत्रयम् ४३ कलहाधाराकलहआधारोयस्याःसा कलहोपितेषुनभवतीत्यर्थः ४४ ४५ ४६ इतिश्रीवैष्णवाकूतचंद्रिकायाप्रथमेअंशेनवमोध्यायः ९ प्रसंगानुप्रसंगाप्तंनिरूप्य
श्रीसमुद्भवम् दशमेदक्षकन्यानांसृष्टिःशिष्टानुवर्ण्यते १ पुनर्भृगुसर्गात्प्रभृतितत्सुतानुवादपूर्वकमेषभृगोर्वंशःकथ्यताम् अन्यथापूर्वापरकथासंबंधाप्रतीतेरित्यर्थः १ अतोभृगोःसुतामनु

हायिनी ३९ पुनश्चपद्मादुद्भूतायदादित्योभवद्धरिः । यदाचभार्गवोरामस्तदाभूद्धरणीवियम् १४० राघवत्वेभवत्सीतारुक्मिणीकृष्णजन्मनि ।
अन्येषुचावतारेषुविष्णोरेषासहायिनी ४१ देवत्वेदेवदेहेयंमानुषत्वेचमानुषी । विष्णोर्देहानुरूपांवैकरोत्येषात्मनस्तनुम् ४२ यश्चैतच्छृणुयाज्जन्म
लक्ष्म्यायश्चपठेन्नरः । श्रियोनविच्युतिस्तस्यगृहेयावत्कुलत्रयम् ४३ पठ्यतेयेषुचैवैषगृहेषुश्रीस्तवोमुने । अलक्ष्मीःकलहाधारानतेष्वास्तेकदाच
न ४४ एतत्तेकथितंब्रह्मन्यन्मांत्वंपरिपृच्छसि । क्षीराब्धौश्रीर्यथाजातापूर्वंभृगुसुतासती ४५ इतिसकलविभूत्यवाप्तिहेतुःस्तुतिरियमिंद्रमुखोद्ग
ताहिलक्ष्म्याः । अनुदिनमिहपठ्यतेनृभिर्यैर्वसतिनतेषुकदाचिदप्यलक्ष्मीः ४६ इतिश्रीविष्णुपुराणेप्रथमेंशेनवमोध्यायः ९ । मैत्रेयउवाच । कथि
तंमेत्वयासर्वंयत्पृष्टोसिमहामुने । भृगुसर्गात्प्रभृत्येषसर्गोमेकथ्यतांपुनः १ । पराशरउवाच । । भृगोःख्यात्यांसमुत्पन्नालक्ष्मीर्विष्णुपरिग्रहः ।
तथाधातृविधातारौख्यात्यांजातौसुतौभृगोः २ आयतिर्नियतिश्चैवमेरोःकन्येमहात्मनः । भार्येधातृविधात्रोस्तेतयोर्जातौसुतावुभौ ३ प्राणश्चैवमृ
कंडुश्चमार्कंडेयोमृकंडुतः । ततोवेदशिराजज्ञेप्राणस्यापिसुतंशृणु ४ प्राणस्यद्युतिमान्पुत्रोराजवांश्चततोऽभवत् । ततोवंशोमहाभागविस्तारंभार्ग
वोगतः ५ पत्नीमरीचेःसंभूतिःपौर्णमासमसूयत । विरजाःसर्वगश्चैवतस्यपुत्रौमहात्मनः ६ वंशसंकीर्तनेपुत्रान्वदिष्येऽहंद्विजोत्तम । स्मृतिश्चां
गिरसःपुत्रान्प्रसूताकन्यकास्तथा ७ सिनीवालीकुहूश्चैवराकाचानुमतिस्तस्था । अनसूयातथैवात्रेर्जज्ञेपुत्रानकल्मषान् ८ सोमंदुर्वाससंचैवदत्ता
त्रेयंचयोगिनम् । प्रीत्यांपुलस्त्यभार्यायांदंभोलिस्तत्सुतोऽभवत् ९ पूर्वजन्मनिसोऽगस्त्यःस्मृतःस्वायंभुवेंतरे । कर्दमश्चवरीयांश्चसहिष्णुश्चसु

वदति भृगोरिति विष्णोःपरिग्रहःपत्नी २ मेरोःसुतेआयतिर्नियतिश्चधातृविधात्रोर्यथासंख्यंभार्येतयोरायतिनियत्योःप्रत्येकंप्राणश्चमृकंडुश्चेत्येवंसुतौजातावित्यन्वयः ३ ४ ५ तदेवंचतुर्वि
शतिदक्षकन्यानांमध्येश्रद्धादीनांत्रयोदशानांधर्मभार्याणांवंशाःकथिताः अनंतरंचख्यातिःसत्यथसंभूतिरित्याद्युद्दिष्टानामेकादशानांभृगुभवमरीच्यादिभार्याणांमध्येख्यात्यांभृगोर्वंशोनिरूपितः
सत्याश्चभवभार्यायादक्षकोपादप्रौढायाएवदेहत्यागोक्त्यातस्यांवंशोनाभूदित्यर्थादुक्तम् अतःक्रमप्राप्तंमरीचेःसंभूत्यांजातंवंशमाह पत्नीमरीचेरिति पौर्णमासंतदधिष्ठातृदेवम् तस्यपौर्णमा
सस्यपुत्रौ ६ वंशसंकीर्तनइति मरीचेरेवकश्यपोन्यःपुत्रस्तस्यपुत्राविवस्वदादयइत्यास्मिन्नेवादितिवंशकीर्तनेवक्ष्ये विवस्वतःश्राद्धदेवःतस्यइक्ष्वाकुप्रभृतयइत्यादि तत्पुत्राणांविस्तरतोवंशकीर्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषिभिःसहेतिऋषयोपिमुदितादिव्यदृष्ट्यादेवगतमेवामृतंभावीतिजानंतः ९७ ९८ श्रीसूक्तेनहिरण्यवर्णांहरिणीमित्याद्यृचांपंचदशकेन ९९ गंगाद्यास्तदधिष्ठात्र्योदेव्यः १०० १०१ अंगेयानिभूषणानितानिविश्वकर्माचकारेत्यन्वयः १०२ पश्यतांसर्वदेवानांताननादृत्येत्यर्थः हरेर्वक्षस्थलमितिधर्मोद्भवस्थानत्वात्तदेवधर्मलभ्याश्रीर्ययौ अतएवधार्मिकादेवास्तयावलोकितानतुदैत्याइतिभावः १०३ निर्वृतिंसुखम् १०४ १०५ १०६ स्त्रीरूपंमोहिन्यवतारम् १०७ १०८ १०९ ११० प्रसन्नभाःस्पष्टदीप्तिः स्वेनवर्त्मनादक्षिणोत्तरायणनियमेन ज्यो

ताचीप्रमुखाब्रह्मन्ननृतुश्चाप्सरोगणाः । गंगाद्याःसरितस्तोयैःस्नानार्थमुपतस्थिरे १०० दिग्गजाहेमपात्रस्थमादायविमलंजलम् । स्नापयांचक्रिरे देवींसर्वलोकमहेश्वरीम् १०१ क्षीरोदोरूपधृक्तस्यैमालामम्लानपंकजाम् । ददौविभूषणान्यंगेविश्वकर्माचकारच १०२ दिव्यमाल्यांबरधरा स्नाताभूषणभूषिता । पश्यतांसर्वदेवानांययौवक्षस्थलंहरेः १०३ तयावलोकितादेवाहरिवक्षःस्थलस्थया । लक्ष्म्यामैत्रेयसहसापरांनिर्वृतिमागताः १०४ उद्वेगंचपरंजग्मुर्दैत्याविष्णुपराङ्मुखाः । त्यक्तालक्ष्म्यामहाभागविप्रचित्तिपुरोगमाः १०५ ततस्तेजगृहुर्दैत्याधन्वंतरिकरेस्थितम् । कमंडलुंमहावीर्यायत्रास्तेताद्विजामृतम् १०६ माययामोहयित्वातान्विष्णुःस्त्रीरूपमास्थितः । दानवेभ्यस्तदादायदेवेभ्यःप्रददौप्रभुः १०७ ततःपपुःसुरगणाःशक्राद्यास्तत्तदामृतम् । उद्यतायुधनिस्त्रिंशादैत्यास्तांश्चसमभ्ययुः १०८ पीतेऽमृतेचबलिभिर्देवैर्दैत्यचमूस्तदा । वध्यमानादिशोभेजेपातालंचविवेशवै १०९ ततोदेवामुदायुक्ताःशंखचक्रगदाभृतम् । प्रणिपत्ययथापूर्वमशासंस्तेत्रिविष्टपम् ११० ततःप्रसन्नभाःसूर्यःप्रययौस्वेनवर्त्मना । ज्योतींषिचययथामार्गंप्रययुर्मुनिसत्तम १११ जज्वालभगवांश्चोच्चैश्चारुदीप्तिर्विभावसुः । धर्मेचसर्वभूतानांतदामतिरजायत ११२ त्रैलोक्यंचश्रियाजुष्टंबभूवद्विजसत्तम । शक्रश्चत्रिदशश्रेष्ठःपुनःश्रीमानजायत ११३ सिंहासनगतःशक्रःसंप्राप्यत्रिदिवंपुनः । देवराज्येस्थितोदेवीं तुष्टावाञ्जकरांततः ११४ । इंद्रउवाच । नमस्येसर्वभूतानांजननीमब्जसंभवाम् । श्रियमुन्निद्रपद्माक्षींविष्णुवक्षःस्थलस्थिताम् ११५ त्वंसिद्धिस्त्वंस्वधास्वाहात्वंमातर्लोकपावनी । संध्यारात्रिःप्रभाभूतिर्मेधाश्रद्धासरस्वती ११६ यज्ञविद्यामहाविद्यागुह्यविद्याचशोभने । आत्मविद्याचदेवित्वंविमुक्तिफलदायिनी ११७ आन्वीक्षिकीत्रयीवार्तादंडनीतिस्त्वमेवच । सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देविपूरितम् १८ कात्वन्यात्वामृतेदेविसर्वय

तींषिताराग्रहाश्चयथामार्गंवक्रातिचारंविना ११ १२ श्रियाजुष्टंयुक्तम् १३ सिंहासनंराजासनंदेवराज्ये देवानामाधिपत्ये १४ नमस्येनमामि सर्वभूतानांजननींत्वांअब्जसंभवाम् वामनावतारे १५ सिद्धिरणिमाद्या प्रभादिनम् भूतिःसंपत् १६ यज्ञविद्याकर्ममीमांसादिः महाविद्याविश्वरूपोपासना गुह्यविद्यामंत्रविद्या आत्मविद्याउपनिषत् एवंयज्ञविद्यादिरूपेणविमुक्तिफलदायिनीत्वमेव १७ आन्वीक्षिकीतर्कविद्या त्रयीवेदत्रयी वार्ताशिल्पशास्त्रायुर्वेदादिः दंडनीतिःराजनीतिः एवमन्यैरपिसौम्यासौम्यैरूपैस्त्वयैतज्जगत्पूरितम् ११८ अतस्तवसौभाग्यमत्याश्चर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्याह कात्वन्येति कापुनस्त्वन्यागदाभृतोविष्णोर्वपुरध्यास्तेतद्वक्षसितिष्ठतीत्यर्थः यद्वादेवदेवस्यस्वप्रकाशस्यगदाभृतोविष्णोर्वपुःस्वरूपमधिकृत्यततोलब्धप्रकाशसत्ताकासतीत्वाम्रते काअन्याआस्तेकिंतुत्वमेवतिष्ठसीत्यर्थः १९ अतस्त्वदुपेक्षानुकंपयोरीदृशंफलंदृष्टमित्याह त्वयेति समेधितंसंवर्धितम् १२० नचैताच्चित्रमित्याह दाराइतित्रिभिः २१ २२ २३ अतो

ज्ञमयंवपुः । अध्यास्तेदेवदेवस्ययोगिचिंत्यंगदाभृतः ११९ त्वयादेविपरित्यक्तंसकलंभुवनत्रयम् । विनष्टप्रायमभवत्त्वयेदानींसमेधितम् २० दारा:पुत्रास्तथागारंसुहृद्धान्यधनादिकम् । भवत्येतन्महाभागेनित्यंत्वद्वीक्षणान्नृणाम् २१ शरीरारोग्यमैश्वर्यमरिपक्षक्षयःसुखम् । देवित्वद्दृष्टिदृष्टानांपुरुषाणांनदुर्लभम् २२ त्वमंबासर्वभूतानांदेवदेवोहरिःपिता । त्वयैतद्विष्णुनाचांबजगद्व्याप्तंचराचरम् १२३ मानःकोशंतथाकोष्ठंमागृहंमापरिच्छदम् । माशरीरंकलत्रंचत्यजेथाःसर्वपावनि २४ मापुत्रान्मासुहृद्वर्गान्मापशून्माविभूषणम् । त्यजेथादेवदेवस्यविष्णोर्वक्षस्थलाश्रये २५ सत्त्वेनसत्यशौचाभ्यांतथाशीलादिभिर्गुणैः । त्यज्यंतेतेनराःसद्यःसंत्यक्तायेत्वयामले १२६ त्वयावलोकिताःसद्यःशीलाद्यैरखिलैर्गुणैः । कुलैश्वर्यैश्चयुज्यंतेपुरुषानिर्गुणाअपि १२७ सश्लाघ्यःसगुणीधन्यःसकुलीनःसबुद्धिमान् । सशूरःसचविक्रांतोयस्त्वयादेविवीक्षितः १२८ सद्योवैगुण्यमायांतिशीलाद्याःसकलागुणाः । पराङ्मुखीजगद्धात्रीयस्यत्वंविष्णुवल्लभे १२९ नतेवर्णयितुंशक्तागुणाञ्जिह्वापिवेधसः । प्रसीददेविपद्माक्षिमास्मांस्त्याक्षीःकदाचन १३० । पराशरउवाच । एवंश्रीःसंस्तुतासम्यक्प्राहहृष्टाशतक्रतुम् । शृण्वतांसर्वदेवानांसर्वभूतस्थितद्विज ३१ श्रीरुवाच । परितुष्टास्मिदेवेशस्तोत्रेणानेनतेहरे । वरंवृणीष्वयस्त्विष्टावरदाहंतवागता ३२ इंद्रउवाच । वरदायदिमेदेविवराहोयदिवाप्यहं । त्रैलोक्यंनत्वयात्याज्यमेषमेऽस्तुवरःपरः ३३ स्तोत्रेणयस्तवैतेनत्वांस्तोष्यत्यब्धिसंभवे । सत्वयानपरित्याज्योद्वितीयोऽस्तुवरोमम ३४ श्रीरुवाच । त्रैलोक्यंत्रिदशश्रेष्ठनसंत्यक्ष्यामिवासव । दत्तोवरोमयायंतेस्तोत्राराधनतुष्टया ३५ यश्चसायंतथाप्रातःस्तोत्रेणानेनमानवः । मांस्तोष्यतिनतस्याहंभविष्यामिपराङ्मुखी ३६ । पराशरउवाच । । एवंवरंददौदेवीदेवराजायवैपुरा । मैत्रेयश्रीर्महाभागास्तोत्राराधनतोषिता ३७ भृगोःख्यात्यांसमुत्पन्नाश्रीःपूर्वमुदधेःपुनः । देवदानवयत्नेनप्रसूतामृतमंथने १३८ एवंयथाजगत्स्वामीदेवसजोजनार्दनः । अवतारंकरोत्येषतथाश्रीस्तत्स

मातृत्वान्नोस्माकंकोशादिकंमात्यजेथाः परिच्छदंपरिकरम् २४ २५ त्वयाचपरित्यक्तानामनिष्टंभवतीत्याह सत्त्वेनेति सत्त्वंधैर्यं सत्यंभूतहितानलीकम् २६ त्वदनुकंपितागुणभाजो भवंतीत्याह त्वयेतिद्वाभ्याम् २७ २८ त्वदुपेक्षितस्यगुणाअपिदोषाभवंतीत्याह सद्यइति वैगुण्यंदोषत्वम् २९ अतस्त्वद्गुणस्तुतौनकोपिशक्तः कृपयैवकेवलंप्रसीदेतिप्रार्थयते नतइति वेधसोजिह्वानशक्तेत्यन्वयः ३० ३१ हरेशक्र ३२ अस्तुसंपद्यताम् ३३ ३४ ३५ ३६ ३७ प्रकृतावतारद्वयंनिगमयन्नन्यानप्यवतारानाह भृगोरितियावदध्यायसमाप्ति १३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्सहायिनीतेनसहअयितुंगंतुंशीलंयस्याःसा ३९ यदाहरिरादित्योवामनोभूत् भार्गवोजामदग्न्यः ४० ४१ विष्णोर्देहानुरूपाम् नृसिंहाद्यवतारेषुनारसिंह्यादिरूपाम् ४२ कुलत्रयंपु
रुषत्रयम् ४३ कलहाधाराकलहआधारोयस्याःसा कलहोपितेषुनभवतीत्यर्थः ४४ ४५ ४६ इतिश्रीवैष्णवाकूतचंद्रिकायाप्रथमेअंशेनवमोध्यायः ९ प्रसंगानुप्रसंगाप्तंनिरूप्य
श्रीसमुद्भवम् दशमेदक्षकन्यानांसृष्टिःशिष्टानुवर्ण्यते १ पुनर्भृगुसर्गात्प्रभृतितत्सुतानुवादपूर्वकमेषभृगोर्वंशःकथ्यताम् अन्यथापूर्वापरकथासंबंधाप्रतीतेरित्यर्थः १ अतोभृगोःसुतामनु

हायिनी ३९ पुनश्चपद्मादुद्भूतायदादित्योभवद्धरिः । यदाचभार्गवोरामस्तदाभूद्धरणीवियम् १४० राघवत्वेभवत्सीतारुक्मिणीकृष्णजन्मनि ।
अन्येषुचावतारेषुविष्णोरेषासहायिनी ४१ देवत्वेदेवदेहेयंमानुषत्वेचमानुषी । विष्णोर्देहानुरूपांवैकरोत्येषात्मनस्तनुम् ४२ यश्चैतच्छृणुयाज्जन्म
लक्ष्म्यायश्चपठेन्नरः । श्रियोनविच्युतिस्तस्यगृहेयावत्कुलत्रयम् ४३ पठ्यतेयेषुचैवैषगृहेषुश्रीस्तवोमुने । अलक्ष्मीःकलहाधारानतेष्वास्तेकदाच
न ४४ एतत्तेकथितंब्रह्मन्यन्मांत्वंपरिपृच्छसि । क्षीराब्धौश्रीर्यथाजातापूर्वंभृगुसुतासती ४५ इतिसकलविभूत्यवाप्तिहेतुःस्तुतिरियमिंद्रमुखोद्ग
ताहिलक्ष्म्याः । अनुदिनमिहपठ्यतेनृभिर्यैर्वसतिनतेषुकदाचिदप्यलक्ष्मीः ४६ इतिश्रीविष्णुपुराणेप्रथमेंशेनवमोध्यायः ९ । मैत्रेयउवाच । कथि
तंमेत्वयासर्वंयत्पृष्टोसिमहामुने । भृगुसर्गात्प्रभृत्येषसर्गोमेकथ्यतांपुनः १ । पराशरउवाच । । भृगोःख्यात्यांसमुत्पन्नालक्ष्मीर्विष्णुपरिग्रहः ।
तथाधातृविधातारौख्यात्यांजातौसुतौभृगोः २ आयतिर्नियतिश्चैवमेरोःकन्येमहात्मनः । भार्येधातृविधात्रोस्तेतयोर्जातौसुतावुभौ ३ प्राणश्चैवमृ
कंडुश्चमार्कंडेयोमृकंडुतः । ततोवेदशिराजज्ञेप्राणस्यापिसुतंशृणु ४ प्राणस्यद्युतिमान्पुत्रोराजवांश्चततोऽभवत् । ततोवंशोमहाभागविस्तारंभार्ग
वोगतः ५ पत्नीमरीचेःसंभूतिःपौर्णमासमसूयत । विरजाःसर्वगश्चैवतस्यपुत्रौमहात्मनः ६ वंशसंकीर्तनेपुत्रान्वदिष्येऽहंद्विजोत्तम । स्मृतिश्चां
गिरसःपुत्रान्प्रसूताकन्यकास्तथा ७ सिनीवालीकुहूश्चैवराकाचानुमतिस्तस्था । अनसूयातथैवात्रेर्जज्ञेपुत्रानकल्मषान् ८ सोमंदुर्वाससंचैवदत्ता
त्रेयंचयोगिनम् । प्रीत्यांपुलस्त्यभार्यायांदंभोलिस्तत्सुतोऽभवत् ९ पूर्वजन्मनिसोऽगस्त्यःस्मृतःस्वायंभुवेंतरे । कर्दमश्चवरीयांश्चसहिष्णुश्चसु

वदति भृगोरिति विष्णोःपरिग्रहःपत्नी २ मेरोःसुतेआयतिर्नियतिश्चधातृविधात्रोर्यथासंख्यंभार्येतयोरायतिनियत्योःप्रत्येकंप्राणश्चमृकंडुश्चेत्येवंसुतौजातावित्यन्वयः ३ ४ ५ तदेवंचतुर्वि
शतिदक्षकन्यानांमध्येश्रद्धादीनांत्रयोदशानांधर्मभार्याणांवंशाःकथिताः अनंतरंचख्यातिःसत्यथसंभूतिरित्याद्युद्दिष्टानामेकादशानांभृगुभवमरीच्यादिभार्याणांमध्येख्यात्यांभृगोर्वंशोनिरूपितः
सत्याश्चभवभार्यायादक्षकोपादप्रौढायाएवदेहत्यागोक्त्यातस्यांवंशोनाभूदित्यर्थादुक्तम् अतःक्रमप्राप्तंमरीचेःसंभूत्यांजातंवंशमाह पत्नीमरीचेरिति पौर्णमासंतदधिष्ठातृदेवम् तस्यपौर्णमा
सस्यपुत्रौ ६ वंशसंकीर्तनइति मरीचेरेवकश्यपोन्यःपुत्रस्तस्यपुत्राविवस्वदादयइत्यस्मिन्नेवादितिवंशकीर्तनेवक्ष्ये विवस्वतःश्राद्धदेवःतस्यइक्ष्वाकुप्रभृतयइत्यादि तत्पुत्राणांविस्तरतोवंशकीर्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेचतुर्थांशेपुत्रान्वंशान्वक्ष्ये अत्रतुस्वल्पत्वात्पौर्णमासान्वयमात्रमुक्तमित्यर्थःप्रसूताप्रसूतवती ७ कन्याआह सिनीवालीचतुर्दशीयुक्ताआमावास्या प्रतिपद्युक्तासैवकुहूः चतुर्दशीयुक्तापौर्णिमाराका प्रतिपद्युक्तासैवानुमतिः पुत्राणांनामाकथनमप्रसिद्धेःप्रतिपादनमात्रस्यविवक्षितत्वात् जज्ञेजनयामास ८ तत्सुतःपुलस्त्यसुतः ९ पूर्वजन्मानिस्वायंभुवमन्वंतरेदंभोलिःसइदानीमगस्त्यःस्मृतइत्यन्वयः १० क्षमानाम्नीपुलहभार्या ११ १२ रजोगात्रोर्ध्वबाहुरितिनामद्वयम् संधिरार्षः १३ सप्तर्षयस्तृतीयमन्वंतरे अभिमानीअग्न्यभिमानिनीदेवतानतुज्वलनमात्ररूपःअग्निःसर्वदेवताअग्निर्मुखमितिश्रुतेः ब्रह्मणस्तनयोग्रजः मुखादग्निरजायतेतिश्रुतेः १४ उदारौजसःअतितेजस्विनः जलाशिनम् सूर्यस्थत्वात् तथाचकौर्मे निर्मथ्यःपवमानःस्याद्वैद्युतः

तत्रयम् १० क्षमातुसुषुवेभार्यापुलहस्यप्रजापतेः । क्रतोश्चसन्नतिर्भार्यावालखिल्यानसूयत ११ षष्टिर्यानिसहस्राणिमुनीनामूर्ध्वरेतसाम् । अंगुष्ठपर्वमात्राणांज्वलद्भास्करतेजसाम् १२ ऊर्जायांचवसिष्ठस्यसप्तजायंतवैसुताः । रजोगात्रोर्ध्वबाहुश्चसवनश्चानघस्तथा १३ सुतपाःशुक्रइत्येते सर्वेसप्तर्षयोऽमलाः । योसावग्निरभिमानीब्रह्मणस्तनयोग्रजः १४ तस्मात्स्वाहासुतांल्लेभेत्रीनुदारौजसोद्विज । पावकंपवमानंचशुचिंचापिजलाशिनम् १५ तेषांचसंततावन्येचत्वारिंशच्चपंचच । कथ्यंतेवह्नयश्चैतेपितापुत्रत्रयंचयत् १६ एवमेकोनपंचाशद्वह्नयःपरिकीर्तिताः । पितरोब्रह्मणासृष्टाव्याख्यातायेमयातव १७ अग्निष्वात्ताबर्हिषदोऽनग्नयःसाग्नयश्चये । तेभ्यःस्वधासुतेजज्ञेमेनावैधारणींतथा १८ तेउभेब्रह्मवादिन्यौयोगिन्यौचाप्युभेद्विज । उत्तमज्ञानसंपन्नेसर्वैःसमुदितेगुणैः १९ इत्येषादक्षकन्यानांकथितापत्यसंततिः । श्रद्धावान्संस्मरन्नेताननपत्योनजायते २० इतिश्रीविष्णुपुराणेप्रथमेअंशेदशमोध्यायः १० । पराशरउवाच । । प्रियव्रतोत्तानपादौमनोःस्वायंभुवस्यतु । द्वौपुत्रौसुमहावीर्यौधर्मज्ञौकथितौतव १ तयोरुत्तानपादस्यसुरुच्यामुत्तमःसुतः । अभीष्टायामभूद्ब्रह्मन्पितुरत्यंतवल्लभः २ सुनीतिर्नामयाराज्ञस्तस्याभून्महिषीद्विज । सनातिप्रीतिमांस्तस्यांतस्याश्चाभूद्ध्रुवःसुतः ३ राजासनस्थितस्यांकंपितुर्भ्रातरमाश्रितम् । दृष्ट्वोत्तमंध्रुवश्चक्रेतमारोढुंमनोरथम् ४ प्रत्यक्षंभूपतिस्तत्रसुरुच्यानाभ्यनंदत । प्रणयेनागतंपुत्रमुत्संगारोहणोत्सुकम् ५ सपत्नीतनयंदृष्ट्वातमंकारोहणोत्सुकम् । पितुःपुत्रंतथारूढंसुरुचिर्वाक्यमब्रवीत्

पावकःस्मृतः यश्चासौतपतेसूर्येशुचिरग्निरसौस्मृतइति १५ तेषांत्रयाणाप्रत्येकंपंचदशपंचदशेतिपंचचत्वारिंशत् पिताअभिमानीब्रह्मपुत्रस्तस्यपुत्रत्रयंचएवमेकोनपंचाशत् १६ १७ किंचआग्निष्वात्ताअनग्नयोऽयज्वानः अमूर्त्तयश्चयोगणाःबर्हिषदःसाग्नयोयज्वानोमूर्ताश्चत्वारोगणाः येवाअयज्वानोगृहमेधिनस्तेपितरोग्निष्वात्तायेवैयज्वानस्तेपितरोबर्हिषदइतिश्रुतेः १८ १९ संस्मरन्नवधारयन् २० इतिश्रीवैष्णवाकूतचन्द्रिकायांप्रथमेअंशेदशमोध्यायः १० एकादशेतिबालोपिवाङ्नुन्नःसुरुचेर्ध्रुवः निर्गतोमुनिभिःसम्यगुपदिष्टोनुवर्ण्यते मनोर्द्वौपुत्रौद्वेचकन्येउक्तेतत्रददौप्रसूतिंदक्षायेत्यादिनादौहित्रवंशोभिहितइदानींपुत्रद्वयानुवादपूर्वमुत्तानपादवंशमाह प्रियव्रतेति १ तयोर्मध्येउत्तानपादस्यसुरुच्यामभीष्टायांप्रेयस्यामुत्तमनामासुतोभूत् २ तस्यांसुनीत्यां ध्रुवोनाम्ना ३ राजासनस्थितस्यापितुरंकमुत्संगमाश्रितंभ्रातरमुत्तमंदृष्ट्वातमंकमारोढुंध्रुवोमनोरथंचक्रेइत्यन्वयः ४ सुरुच्याःप्रेयस्याःप्रणयभंगभयाद्ध्रुवंनाभ्यनंदत् ५ सपत्नीतनयंध्रुवंपितुरंका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोहणोत्सुकंदृष्ट्वातथास्वपुत्रंचतदंकारूढंदृष्ट्वासुरुचिरब्रवीदित्यन्वयः ६ ध्रुवस्यभाविमहोदयहेतुनिर्वेदनिर्वाहिकाःसुरुचेर्गर्वोक्तीराह क्रियतेकिमितिचतुर्भिःअसंभूयअभूत्वा ७ उत्तमोत्तममुत्तमादन्यराजासनादुत्तमंचक्रवर्तिस्थानंमत्पुत्रान्येनाप्राप्यमविवेकोमंदमतिरभिवांछसिअविवेकाद्वीत्यपिपाठः अहमपिचक्रवर्तिसुतइतिचेदतआह सत्यमिति सत्यपितथात्वेमद्गर्भाधृतत्वादेषतेमनोरथोवृथाइतिपूर्वेणान्वयः ८ व्यतिरेकमाहसर्वभूभृतसंश्रयश्चक्रवर्तीतस्यकेतनमासनंममपुत्रस्यैवयोग्यम् आत्माअंतःकरणंकिंक्लिश्यतइति ९ राजानंतूष्णींभूतमाह्लो

क्रियतेकिंवृथावत्समहानेषमनोरथः । अन्यस्त्रीगर्भजातेनअसंभूयममोदरे ७ उत्तमोत्तममप्राप्यमविवेकाद्विवाञ्छसि । सत्यंसुतस्त्वमप्यस्यकिंतुनत्वंमयाधृतः ८ एतद्राजासनंसर्वभूभृत्संश्रयकेतनम् । योग्यंममैवपुत्रस्यकिमात्माक्लिश्यतेत्वया ९ उच्चैर्मनोरथस्तेऽयंमत्पुत्रस्येवकिंवृथा । सुनीत्यामात्मनोजन्मकिंत्वयानावगम्यते १० । पराशरउवाच । उत्सृज्यपितरंबालस्तच्छ्रुत्वामातृभाषितम् । जगामकुपितोमातुर्निजायाद्विजमंदिरम् ११ तंदृष्ट्वाकुपितंपुत्रमीषत्प्रस्फुरिताधरम् । सुनीतिरंकमारोप्यमैत्रेयैतदभाषत १२ वत्सकःकोपहेतुस्तेकश्चत्वांनाभिनंदति । कोनजानातिपितरंतवयस्तेपराध्यति १३ इत्युक्तःसकलंमात्रेकथयामासतद्यथा । सुरुचिःप्राहभूपालप्रत्यक्षमतिगर्विता १४ निःश्वस्यकथितेतस्मिन्सतिपुत्रेणदुर्मनाः । श्वासक्षामेक्षणादीनासुनीतिर्वाक्यमब्रवीत् १५ सुनीतिरुवाच । सुरुचिःसत्यमाहेदंस्वल्पभाग्योसिपुत्रक । नहिपुण्यवतांवत्ससपत्नैरेवमुच्यते १६ नोद्वेगस्तातकर्तव्यःकृतंयद्भवतापुरा । तत्कोपहर्तुंशक्नोतिदातुंकश्चाकृतंत्वया १७ राजासनंतथाछत्रंवराश्वावरवारणाः । यस्यपुण्यानितस्यैवमत्वैतच्छाम्यपुत्रक १८ अन्यजन्मकृतैःपुण्यैःसुरुच्यांसुरुचिर्नृपः । भार्येतिप्रोच्यतेचान्यामद्विधापुण्यवर्जिता १९ पुण्योपचयसंपन्नस्तस्याःपुत्रस्तथोत्तमः । ममपुत्रस्तथाजातःस्वल्पपुण्योध्रुवोभवान् २० तथापिदुःखंनभवान्कर्तुमर्हतिपुत्रक । यस्यायावत्सतेनैवस्वेनतुष्यतिबुद्धिमान् २१ यदिचेद्दुःखमत्यर्थंसुरुच्यावचसातव । तत्पुण्योपचयेयत्नंकुरुसर्वफलप्रदे २२ सुशीलोभवधर्मात्मामैत्रःप्राणिहितेरतः । निम्नंयथापःप्रवणाःपात्रमायांतिसंपदः २३ । ध्रुवउवाच । । अंबयत्त्वमिदंप्राहप्रशमायवचोमम । नैतद्दुर्वचसाभिन्नेहृदयेममाति

क्यातिगर्वादुक्तमेवार्थंपुनराह उच्चैरिति ध्रुवमातुर्दौर्भाग्यमपिसूचयति सुनीत्यामिति १० ११ १२ यस्तेऽपराध्यतिअपराधंकरोतिसतवपितरमवजानातिसचैवंभूतःकइत्यर्थः १३ भूपालप्रत्यक्षंयथाप्राहतत्तथाकथयामासेत्यन्वयः १४ तस्मिन्सुरुच्यावचसिकथितेसतिश्वासेनात्युष्णेनक्षामेम्लानेईक्षणेनेत्रेयस्याःसा १५ १६ उद्वेगःपरितापः १७ एतन्मत्वापुत्रकशाम्योपशमंभज १८ सुरुच्याःपुण्याधिक्यंफलेनाह नृपःसुरुच्यांसुरुचिरतिप्रीतः अन्यामादृशीभार्येतिकेवलंप्रोच्यते १९ उत्तमोनामतोर्थतोप्यभिप्रेतः यथामातातथापुत्रइत्युभयत्रदृष्टांतः २० यस्ययावद्भाग्यप्राप्तंसतेनैवस्वेनस्वकीयेनतुष्यति २१ चेदितिवाशब्दार्थे सर्वफलमभ्युदयनिःश्रेयसंप्रददातीतितस्मिन् २२ मैत्रंसर्वेषांमित्रमतःप्राणिहितेरतः प्रवणानिम्नदेशाभिमुखाः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पात्रंसगुणंनरम् २३ अंबहेमातः प्रशमाय नोद्वेगस्तातकर्तव्यइत्यादिपंचश्लोकार्थकंयद्वचःप्राहब्रवीषितद्भिन्नभांडेअमृतमिवममहृदयेनातिष्ठति २४ २५ तवोदरेवृद्धस्यवृद्धिंगतस्य २६ तयासुरुच्या तथास्तुतत्तथैवभवतु २७ स्वकर्मणास्वतपोबलेनैवेच्छामिसततंचिरस्थायि २८ २९ सप्तमुनीनात्मनोनुग्रहार्थंपूर्वमेवागतान् कृष्णाजिनमुत्तरीयमुपर्यास्तरणंयेषांतेषुविष्टरेषू

ष्ठति २४ सोऽहंतथायतिष्यामियथासर्वोत्तमोत्तमम् । स्थानंप्राप्स्याम्यशेषाणांजगतामतिपूजितम् २५ सुरुचिर्दयिताराज्ञस्तस्याजातोस्मिनोदरात् । प्रभावंपश्यमेंबत्वंवृद्धस्यापितवोदरे २६ उत्तमःसचमेभ्रातायोगर्भेणधृतस्तया । सराजासनमाप्नोतुपित्रादत्तंतथास्तुतत् २७ नान्यद्दत्तमभीप्स्यामिस्थानमंबस्वकर्मणा । इच्छामिसततंस्थानंयन्नप्रापपितामम २८ । । पराशरउवाच । । निर्जगामगृहान्मातुरित्युक्त्वामातरंध्रुवः । पुराच्चनिर्गम्यततस्तद्बाह्योपवनंययौ २९ सददर्शमुनींस्तत्रसप्तपूर्वागतान्ध्रुवः । कृष्णाजिनोत्तरीयेषुविष्टरेषुसमाश्रितान् ३० सराजपुत्रस्तान् सर्वान्प्रणिपत्याभ्यभाषत । प्रश्रयावनतःसम्यगभिवादनपूर्वकम् ३१ उत्तानपादतनयंमांनिबोधतसत्तमाः । जातंसुनीत्यांनिर्वेदाद्युष्माकंप्राप्तमंतिकम् ३२ । । ऋषयऊचुः । । ननुपंचाब्दसंभूतोबालस्त्वंनृपनंदनः । निर्वेदकारणंकिंचित्तवनाद्यापिदृश्यते ३३ नचिंत्यंभवतःकिंचिद्भियतेभूपतिःपिता । नचैवेष्टवियोगादितवपश्यामबालक ३४ शरीरेनचतेव्याधिरस्माभिरुपलभ्यते । निर्वेदःकिंनिमित्तस्तेकथ्यतांयदिविद्यते ३५ पराशरउवाच । । ततःसकथयामाससुरुच्यायदुदाहृतम् । तन्निशम्यततःप्रोचुर्मुनयस्तेपरस्परम् ३६ अहोक्षात्रंपरंतेजोबालस्यापियदक्षमा । सपत्न्यामातुरुक्तस्यहृदयान्नापसर्पति ३७ भोभोःक्षत्रियदायादनिर्वेदाद्यत्त्वयाधुना । कर्तुंव्यवसितंतन्नःकथ्यतांयदिरोचते ३८ यच्चकार्यंतवास्माभिःसाहाय्यममितद्युते । तदुच्यतांविवक्षुस्त्वमस्माभिरुपलक्ष्यसे ३९ । । ध्रुवउवाच । । नाहमर्थमभीप्सामिनराज्यंद्विजसत्तमाः । तत्स्थानमेकमिच्छामिभुक्तंनान्येनयत्पुरा ४० एतन्मेक्रियतांसम्यक्कथ्यतांप्राप्यतेयथा । स्थानमग्र्यंसमस्तेभ्यःस्थानेभ्योद्विजसत्तम ४१ मरीचिरुवाच । अनाराधितगोविंदैर्नरैःस्थानंनृपात्मज । नहिसंप्राप्यतेश्रेष्ठंतस्मादाराधयाच्युतम् ४२ । अत्रिरुवाच । परःपराणांपुरुषोयस्यतुष्टोजनार्दनः सप्राप्नोत्यक्षयंस्थानमेतत्सत्यंमयोदितम् ४३ । । अंगिराउवाच । । यस्यांतःसर्वमेवेदमच्युतस्याव्ययात्मनः । तमाराधयगोविंदंस्थानम

पविष्टान् ३० प्रणिपत्यसम्यगभिवादनंतत्पूर्वकंतदनुप्रश्रयेणावनतोभ्यभाषत ३१ निर्वेदाद्दुःखात् ३२ पंचाब्दावधिकंसंभूतंजन्मयस्यसः चतुःपंचाब्दसंभूतइतिपाठेचत्वारःपंचवाअब्दायस्यसचासौसंभूतश्चेत्यर्थः बालोदिगाद्यनभिज्ञःनृपनंदनःसुकुमारः अद्यसंप्रति ३३ चिंत्यंकुटुंबभरणादितवकिंचिदपिनास्ति पिताध्रियतेजीवतिसचभूपतिः पश्यामइतिच्छांदसो विसर्गलोपः ३४ ३५ ३६ तेजःपराभिभवसामर्थ्यम् अक्षमामानभंगासहनम् ३७ ३८ विवक्षुर्वक्तुमिच्छुःस्फुरदधरत्वात् ३९ ४० एतत्साहाय्यंक्रियताम् साहाय्यमेवाह सम्यक्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थ्यतामितिमेमया ४१ ध्रुवस्यदृढप्रत्ययार्थंकारुण्यात्सर्वएवप्रकारभेदेनविष्णुभक्तिमेवोपदिशति अनाराधितेत्यादिसप्तभिःश्लोकैः ४२ प्रकृतेःपराणांजीवानांपरउत्कृष्टः ४६ ४४ परंब्र
ह्मपरमात्मा धामप्रकाशकंअधिष्ठानंवा अपरंब्रह्मशब्दात्मकम् ४५ यज्ञेयज्ञप्रतिपादकेशास्त्रेयोगेयोगशास्त्रेय द्वागेयःयःगीयतएवइत्यर्थः अप्राप्यंकिमस्तिनास्तीत्यर्थः ४३ ४७ यद्यदिच्छ
निसत्यलोकादितदपिप्राप्नोत्रैलोक्यांतर्गतमुत्तमोत्तमंप्राप्नोतीतिकिंवक्तव्यम् ४८ कृष्णआराधितेपुंसांसुलभंस्यात्सुदुर्लभंइत्युक्तेमुनिभिःसर्वैस्तदुपायंबुभुत्सते आराध्यइतिद्वाभ्यां मयानुप
नीतेनापि ४९ यथेतिजपांगप्रश्नः ५० ५१ योगोत्रजपांगमितिसयोगंजप्यमुपदिशंति बाह्येतित्रिभिः तत्रबाह्यार्थान्त्याजयेदितिकार्योक्त्यातत्कारणभूतयमनियमासनप्राणायामाउक्ताःत

ध्यंयदीच्छसि ४४ पुलस्त्यउवाच । परंब्रह्मपरंधामयोसौब्रह्मतथापरम् । तमाराध्यहरिंदेवंमुक्तिंप्राप्नोतिदुर्लभाम् ४५ । । क्रतुरुवाच । योय
ज्ञपुरुषोयज्ञेयोगेयःपरमःपुमान् । तस्मिंस्तुष्टेतुनाप्राप्यंकिंचिदस्तिजनार्दने ४६ । । पुलहउवाच । । ऐंद्रमिंद्रपरंस्थानंयमाराध्यजगत्पति
म् । प्रापयज्ञपतिंविष्णुंतमाराधयसुव्रत ४७ । । वसिष्ठउवाच । । प्राप्नोत्याराधितेविष्णौमनसायद्यदिच्छति । त्रैलोक्यांतर्गतंस्थानंकिमुव
त्सोत्तमोत्तमम् ४८ । । ध्रुवउवाच । । आराध्यःकथितोदेवोभवद्भिःप्रणतस्यमे । मयातत्परितोषाययज्जप्तव्यंतदुच्यताम् ४९ यथावाराधनंत
स्यमयाकार्यंमहात्मनः । प्रसादसुमुखास्तन्मेकथयंतुमहर्षयः ५० । । ऋषयऊचुः । राजपुत्रयथाविष्णोराराधनपरैर्नरैः । कार्यमाराधनंतन्नोय
थावच्छ्रोतुमर्हसि ५१ बाह्यार्थानखिलांश्चित्तंत्याजयेत्प्रथमंनरः । तस्मिन्नेवजगद्धाम्नितत:कुर्वीतनिश्चलम् ५२ एवमेकाग्रचित्तेनतन्मयेनधृतात्मना ।
जप्तव्यंयन्निबोधैतत्तन्नःपार्थिवनंदन ५३ हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे । ओंनमोवासुदेवायशुद्धज्ञानस्वभाविने ५४ एतज्जजापभगवाञ्ज
प्यंस्वायंभुवोमनुः । पितामहस्तवपुरातस्यतुष्टोजनार्दनः ५५ ददौयथाभिलषितामृद्धिंत्रैलोक्यदुर्लभाम् । तथात्वमपिगोविंदंतोषयैतत्सदाजपन्
५६ । । इतिश्रीविष्णुपुराणेप्रथमेअंशेएकादशोध्यायः ११ । । छ । । पराशरउवाच । निशम्यैतदशेषेणमैत्रेयनृपतेःसुतः । निर्जगामव
नात्तस्मात्प्रणिपत्यसतानृषीन् १ कृतकृत्यमिवात्मानंमन्यमानस्ततोद्विज । मधुसंज्ञंमहापुण्यंजगामयमुनातटम् २ पुनश्चमधुसंज्ञेनदैत्येनाधि

स्मिन्नेवेतिधारणा ५२ एकचित्तेनेतिध्यानं तन्मयेनेतिसमाधिरुक्त इत्यष्टांगयोगउक्तः धृतात्मनेतिपुनर्विक्षेपादिप्राप्तौतन्निराकरणायचित्तधैर्यप्रयत्नउक्तः ५३ हिरण्यगर्भोब्रह्मापुरुषोविष्णुः
प्रधीयतेप्रक्षिप्यतेप्रकृतौविश्वमनेनेतिप्रधानांशिवः अव्यक्तःएतत्त्रयाणांनियंतात्रिगुणशक्तिकईश्वरःव्यक्तेतिपाठेव्यक्तंविश्वंएतद्रूपिणे शुद्धज्ञानस्वभाविनेतत्तदुपाधिरहितायज्ञानमात्रायओंकार
प्रतिपाद्यायवासुदेवायनमइत्यर्थः ५४ ५५ तथात्वमपीतिकुलदेवतामंत्रोहिशीघ्रंसिद्धिदइतिभावः ५६ इतिश्रीवैष्ण॰कू॰चान्द्रि॰प्रथमेअंशेएकादशोध्यायः ११ ॥ छ ॥ ॥ ध्रुवोत्रमधु
संप्राप्यहरिमीजइतीरितम् यत्रापश्यद्दैवविघ्नांस्तुत्वास्वपदमाप्तवान् तस्मात्पुरोपवनान्निर्जगाम १ २ पुनश्चमधुसंज्ञेनेतिपूर्वंकैटभेनसहमधुनामोत्पन्नः पुनश्चमधुसंज्ञेनततोन्येनेत्यर्थः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४ हरिमेधसइति हरतीतिहरिः सर्वदुःखहारिणीयद्विषयामेधासहरिमेधाः नित्यमासिच्प्रजामेधसोरितिसांतत्वम् ५ मरिचिमिश्रैर्मरीचिसमेतैर्यथोद्दिष्टमभूत्तथाअमन्यतदध्यौ ६ सर्वभावेन विश्वरूपेणतच्चित्तंगतःप्राप्तोभवत् ७ ततश्चगरिमाख्यायांसिद्धौसत्यांतस्यभारंसोढुंभूर्नाशक्नोदित्याह मनस्यवस्थितइति ८ वामपादेनस्थितेतस्मिन्नर्धेनार्धंवामभागेगतामेदिनीननामनता भूत् एवंदक्षिणेनसंस्थितेतस्मिन् क्षितेर्द्वितीयंदक्षिणमर्धंननाम ९ यदाचपादांगुष्ठेनवसुधांमध्यतःसंपीड्यआक्रम्यस्थितस्तदासमस्तावसुधाचचाल तत्क्षोभान्नदाद्याःक्षोभंययुः १० ११ त

ष्ठितंयतः । ततोमधुवनंनाम्नाख्यातमत्रमहीतले ३ हत्वाचलवणंरक्षोमधुपुत्रंमहाबलम् । शत्रुघ्नोमथुरांनामपुरींयत्रचकारवै ४ यत्रवैदेवदेवस्य सानिध्यंहरिमेधसः । सर्वपापहरेतस्मिंस्तपस्तीर्थेचकारसः ५ मरीचिमिश्रैर्मुनिभिर्यथोद्दिष्टमभूत्तदा । आत्मन्यशेषदेवेशंस्थितंविष्णुममन्यत ६ अ नन्यमनसस्तस्यध्यायतोभगवान्हरिः । सर्वभूतगतोविप्रसर्वभावगतोऽभवत् ७ मनस्यवस्थितेविष्णौतस्यमैत्रेययोगिनः । नशशाकधराभारमुद्वो ढुंभूतधारिणी ८ वामपादस्थितेतस्मिन्ननामार्धेनमेदिनी । द्वितीयंचननामार्धंक्षितेर्दक्षिणसंस्थिते ९ पादांगुष्ठेनसंपीड्ययदाचवसुधांस्थितः । तदा समस्तावसुधाचचालसहपर्वतैः १० नद्योनदाःसमुद्राश्चसंक्षोभंपरमंययुः । तत्क्षोभादमराःक्षोभंपरंजग्मुर्महामुने ११ यामानामतदादेवामैत्रेयप रमाकुलाः । इंद्रेणसहसंमंत्र्यध्यानभंगंप्रचक्रमुः १२ कूष्मांडाविविधैरूपैर्महेंद्रेणमहामुने । समाधिभंगमत्यंतमारब्धाःकर्तुमासुराः १३ सु नीतिर्नामतन्मातासास्त्रातत्पुरतःस्थिता । पुत्रेतिकरुणांवाचंमोहमायामयीतदा १४ पुत्रकास्मान्निवर्तस्वशरीरव्ययदारुणात् । निर्बंधतोम यालब्धोबहुभिस्त्वंमनोरथैः १५ दीनामेकांपरित्यक्तुमनाथांनत्वमर्हसि । सपत्नीवचनाद्वत्सअगतेस्त्वंगतिर्मम १६ क्वचत्वंपंचवर्षीयःक्वचैतद्दारु णंतपः । निवर्त्यतांमनःकष्टान्निर्बंधात्फलवर्जितात् १७ कालःक्रीडनकानांतेतथैवाध्ययनस्यच । ततःसमस्तभोगानांतदंतेचेष्यतेतपः १८ कालःक्रीडनकानांयस्तवबालस्यपुत्रक । तस्मिंस्त्वमित्थंतपसिकिंनाशायात्मनोरतः १९ मत्प्रीतिःपरमोधर्मोवयोवस्थाक्रियाक्रमम् । अनुवर्त स्वमामोहंनिवर्तास्मादधर्मतः २० परित्यजतिवत्साद्ययद्येतन्नभवांस्तपः । त्यक्ष्याम्यहमिमान्प्राणांस्ततोवैपश्यतस्तव २१ पराशरउवाच ।

तोदेवैरनेकप्रकारविघ्नेक्रियमाणेसमाधेरनुत्थानलक्षणदार्ढ्यमाह यामानामेत्यादिना सर्वासुमायास्वित्यंतेनग्रंथेन परमाकुलाःक्रुद्धाःप्रचक्रमुःकर्तुमुद्यताः १२ कूष्मांडाउपदेवविशेषाःमहेंद्रे णनियुक्ताइतिशेषः आसुराःअसुरप्रभावाः १३ सास्राअश्रुमुखी १४ शरीरव्ययेनदारुणात्तीव्रादस्मात्तपोनिर्बंधान्निवर्तस्व १५ सपत्नीवचनात्क्रुद्धःसन्मांत्यक्तुंनार्हसीत्यर्थः १६ क्वश ब्दाभ्यांविरोधउक्तः ततःकष्टात्फलवर्जितात्तपोनिर्बंधान्मनोनिवर्त्यतामित्यर्थः १७ क्रीडनकानांक्रीडानाम् १८ १९ मत्प्रीतिरेवतवपरमोधर्मस्तंपूर्वोक्तंवयोवस्थानरूपंक्रीडादिक्रियाक्रमं वानुवर्तस्व यद्वायतोमत्प्रीतिस्तवपरमोधर्मोतोमदुक्तंवयोवस्थानुरूपंक्रीडादिक्रियाक्रममनुवर्तस्व मोहदुराग्रहंमानुवर्तस्व अस्मान्मत्प्रीतिविरुद्धादकालतपश्चर्यारूपादधर्मान्निवर्तस्व मत्प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिपरमामितिपाठेमत्प्रीत्यापरमंउत्कृष्टंधर्मवयोवस्थानरूपंक्रियाक्रमंचानुवर्तस्वेत्यर्थः २० २१ बाष्पैरश्रुभिराविलेलोचनेयस्यास्तांपश्यन्नपिउन्मीलितलोचनोपि यतोविष्णौसमाहितमनाः २२ २३ २४ २५ ज्वालाएव कवलंग्रासस्तत्सहितैर्मुखैरुपलक्षिताःशिवाःफेरवोनेदुः योगयुक्तस्यसमाधियुक्तस्य २६ २७ सिंहोष्ट्रमकराणामिवाननानियेषांते २८ २९ आत्म

२३ तांविलापवतीमेवंबाष्पाविलविलोचनाम् । समाहितमनाविष्णौपश्यन्नपिनदृष्टवान् २२ वत्सवत्ससुघोराणिरक्षांस्येतानिभीषणे । वनेऽभ्युद्यतशस्त्राणिसमायांत्यपगम्यताम् २३ इत्युक्त्वाप्रययौसोऽथरक्षांस्याविर्बभुस्ततः । अभ्युद्यतोग्रशस्त्राणिज्वालामालाकुलैर्मुखैः २४ ततोनादानतीवोग्रान्राजपुत्रस्यतेपुरः । मुमुचुर्दीप्तशस्त्राणिभ्रामयंतोनिशाचराः २५ शिवाश्चशतशोनेदुःसज्वालकवलैर्मुखैः । त्रासायतस्यबालस्ययोगयुक्तस्य सर्वतः २६ हन्यतांहन्यतामेषछिद्यतांछिद्यतामयम् । भक्ष्यतांभक्ष्यतांचायमित्यूचुस्तेनिशाचराः २७ ततोनानाविधान्नादान्सिंहोष्ट्रमकराननाः । त्रासायराजपुत्रस्यनेदुस्तेरजनीचराः २८ रक्षांसितानितेनादाःशिवास्तान्यायुधानिच । गोविंदासक्तचित्तस्यययुर्नेंद्रियगोचरम् २९ एकाग्रचेताः सततंविष्णुमेवात्मसंश्रयम् । दृष्टवान्पृथिवीनाथपुत्रोनान्यत्कथंचन ३० ततःसर्वासुमायासुविलीनासुपुनःसुराः । संक्षोभंपरमंजग्मुस्तत्पराभवशंकिताः ३१ तेसमेत्यजगद्योनिमनादिनिधनंहरिम् । शरण्यंशरणंयातास्तपसातस्यतापिताः ३२ । देवाऊचुः । । देवदेवजगन्नाथपरेशपुरुषोत्तम । ध्रुवस्यतपसातप्तास्त्वांवयंशरणंगताः ३३ दिनेदिनेकलाशेषैःशशांकःपूर्यतेयथा । तथायंतपसादेवप्रयात्यृद्धिमहर्निशम् ३४ औत्तानपादितपसोवयमित्थंजनार्दन । भीतास्त्वांशरणंयातास्तपसस्तंनिवर्तय ३५ नविघ्नःकिंसशक्रत्वंकिंसूर्यत्वमभीप्सति । वित्तपांबुपसोमानांसाभिलाषःपदेषुकिम् ३६ तदस्माकंप्रसीदेशहृदयाच्छल्यमुद्धर । उत्तानपादतनयंतपसःसन्निवर्तय ३७ । श्रीभगवानुवाच । । नेंद्रत्वंनतुसूर्यत्वंनैवांबुपधनेशताम् । प्रार्थयत्येषयंकामंतंकरोम्यखिलंसुराः ३८ यातदेवायथाकामंस्वस्थानंविगतज्वराः । निवर्तयाम्यहंबालंतपस्यासक्तचेतसम् ३९ । पराशरउवाच । । इत्युक्तादेवदेवेनप्रणम्यत्रिदशास्ततः । प्रययुःस्वानिधिष्ण्यानिशतक्रतुपुरोगमाः ४० भगवानपिसर्वात्मातन्मयत्वेनतोषितः । गत्वाध्रुवमुवाचेदंचतुर्भुजवपुर्हरिः ४१ औत्तानपादेभद्रंतेतपसापरितोषितः । वरदोऽहमनुप्राप्तोवरंवरयसुव्रत ४२ बाह्यार्थनिरपेक्षंतेमयिचित्तंयदाहितम् । तुष्टोहंभवतस्तेनतद्वृह्लीष्ववरंपरम् ४३ । पराशरउवाच । । श्रुत्वेत्थंगदितंतस्यंदेवदेवस्यबालकः । उन्मीलिता

संश्रयंस्वहृदिनिविष्टंपृथिवीनाथस्यपुत्रोध्रुवः ३० तस्माद्ध्रुवाद्यःपराभवःस्वपदापहारलक्षणः तस्माच्छंकिताः ३१ ३२ ३३ कलाशेषैर्भाविष्याभिः स्वकलाभिः ३४ ३५ वित्तपःकुबेरः अंबुपोवरुणः पदेष्वधिकारेषु ३६ शल्यंपराभवशंकालक्षणंसमुद्धरोत्पाटय ३७ इंद्रत्वादिकंनप्रार्थयतियंचकामंकांक्षितमर्थंप्रार्थयतितंकरोमीत्यन्वयः ३८ विगतज्वरानिःशंकाः ३९ धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यानिस्थानानि ४० तन्मयत्वेनसर्वात्मनैकाग्र्येण ४१ ४२ बाह्यार्थेनिरपेक्षमसंबद्धचित्तेत्वयायद्यस्मादाहितम् ४३ ४४ चतुर्भुजेषुशंखादिधरम् कक्षेनंदकाख्यवरखड्गधरम् शिर सामहींजगामदंडवत्प्रणतोबभूव ४५ रोमांचितेत्यादिविशेषणाभ्यांसात्त्विकभावाःसूचिताःतैश्चस्तवायमानसंचक्रे ४६ ततश्चब्रह्मादिभिरप्यविज्ञातगतेस्तस्यस्तुतौविषयेबालोहंकिंवदामि सर्वात्मनोस्यकेनवास्तुतिर्भवेदितिव्याकुलमतिस्तंविष्णुमेवशरणंययावित्यर्थः ४७ कथंशरणंययौतदाह भगवानितिसार्धद्वाभ्याम् ४८ तंत्वामहंकथंवेदजानामिकथंवास्तोतुंशक्ष्यामीत्यन्व यः ४९ पादौस्तोतुंप्रवृत्तंततस्तत्र ५० सर्ववेदमयस्यशंखस्यप्रांतेनवेदांतभागेनतंपस्पर्शब्रह्ममयेनकंबुनेतिशुकोक्तेः तेनेश्वरतत्त्वबोधकंवेदांतबोधरूपोनुग्रहःकृतइतिभावः ५१ प्रसन्नव दनःप्राप्तज्ञानत्वात् ५२ संस्तुत्यैवपदंविष्णोर्गंतुमर्हमितिध्रुवः समागतमपिप्रीत्याभूयस्तुष्टावकेशवम् भूम्यादीनिस्थूलसूक्ष्माणिभूतानिदश मनइतिदशेंद्रियोपलक्षणम् बुद्धिर्महत्तत्त्वम्

क्षोदृदृशेध्यानदृष्टंहरिंपुरा ४४ शंखचक्रगदशार्ङ्गवरासिधरमच्युतम् । किरीटिनंसमालोक्यजगामशिरसामहीम् ४५ रोमांचितांगःसहसासाध्व संपरमंगतः । स्तवायदेवदेवस्यसचक्रेमानसंध्रुवः ४६ किंवदामिस्तुतावस्यकेनोक्तेनास्यसंस्तुतिः । इत्याकुलमतिर्देवंतमेवशरणंययौ ४७ ध्रुवउवाच । । भगवान्यदिमेतोषंतपसापरमंगतः । स्तोतुंतदहमिच्छामिवरमेतंप्रयच्छमे ४८ ब्रह्माद्यैर्वेदवेदज्ञैर्ज्ञायतेयस्यनोगतिः । तंत्वांकथ महंदेवस्तोतुंशक्ष्यामिबालकः ४९ त्वद्भक्तिप्रवणंह्येतत्परमेश्वरमेमनः । स्तोतुंप्रवृत्तंत्वत्पादौततःप्रज्ञांप्रयच्छमे ५० । पराशरउवाच । । शं खप्रांतेनगोविंदस्तंपस्पर्शकृतांजलिम् । उत्तानपादतनयंद्विजवर्यजगत्पतिः ५१ अथप्रसन्नवदनस्तत्क्षणान्नृपनंदनः । तुष्टावप्रणतोभूत्वाभूतधा तारमच्युतम् ५२ । ध्रुवउवाच । । भूमिरापोनलोवायुःखंमनोबुद्धिरेवच । भूतादिरादिप्रकृतिर्यस्यरूपंनतोस्मितम् ५३ शुद्धःसूक्ष्मोखिल व्यापीप्रधानात्परतःपुमान् । यस्यरूपंनमस्तस्मैपुरुषायगुणाशिने ५४ भूरादीनांसमस्तानांगंधादीनांचशाश्वतः । बुद्ध्यादीनांप्रधानस्यपुरुष स्यचयःपरः ५५ तंब्रह्मभूतमात्मानमशेषजगतःपरम् । प्रपद्येशरणंशुद्धंत्वद्रूपंपरमेश्वर ५६ बृहत्त्वाद्बृंहणत्वाच्चयद्रूपंब्रह्मसंज्ञितम् । तस्मैनमस्ते सर्वात्मन्योगिचिंत्याविकारवत् ५७ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सर्वव्यापीभुवःस्पर्शादध्यतिष्ठद्दशांगुलम् ५८ यद्भूतंयच्चवैभाव्यं

भूतादिरहंकारः आदिप्रकृतिःप्रधानमित्येवंचतुर्विंशतिस्तत्त्वानियस्यरूपंतंनतोस्मि ५३ परमार्थतःशुद्धः अखिलव्यापीविभुः परतःपुमान्जीवोयस्यरूपम् गुणाशिनेगुणसाक्षिणे अगुणा त्मनइतिपाठः ५४ अशेषजगतःपरमित्यस्यविवरणम् भूरादीनांभूतानांगंधादीनांविषयाणामित्यादि ५५ ५६ त्वद्रूपंतवरूपंब्रह्मभूतमितियदुक्तंतत्कथंतत्राह बृहत्वादिति बृहत्त्वात्सर्वग त्वाद्बृंहणत्वात्कारणतयासंवर्धकत्वात् योगिचिंत्यंचतद्विकारवच्चनभवतीत्यविकारवच्चतथा हेयोगिचिंत्येतिपृथक्पदंवा ५७ बृहत्वंविष्णवन्पुरुषसूक्तेनस्तौतिसहस्रशीर्षेत्यादिना सह स्रमपरिमितानिशीर्षाणियस्यविश्वरूपस्यएवंसहस्रमक्षीणियस्य सहस्रंपादायस्यसःभुवोब्रह्मांडस्यस्पर्शात् स्पृष्ट्वाकारणत्वेनाभिव्याप्य ल्यब्लोपेपंचमी दशांगुलमपरिमितम् भगवद्दशां गुलप्रायदशदशोत्तरगुणावरणानिवा अध्यतिष्ठदाधिक्येनव्याप्यस्थितःनिरवधिरवस्थितइत्यर्थः ५८ इदमेवसमर्थयतियद्भूतमित्यादिना भूतमतीतम् भाव्यंभावि चकाराद्वर्तमानंच त्वत्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायासाक्षिणःप्रत्येकगुणाभिमानिनोब्रह्मविष्णुरुद्राविराट्स्वराड्सम्राडाख्याःयद्वाविराट्ब्रह्मांडम् स्वराट्ब्रह्मा सम्राट्मनुः अधिपूरुषएषामाधिष्ठातामहापूरुषः ५९ यस्मादेतेत्वत्तोजातास्त स्मात्सभगवान्भुवोधस्तिर्यगूर्ध्वंचात्यरिच्यतअतिरिक्तोभूत् भूशब्दोक्तस्यविश्वस्यतत्कार्यत्वेनततोन्यूनत्वमाह त्वत्तोविश्वमिति इदंवर्तमानंविश्वंभूतभविष्यतीचविश्वेत्वत्तएव ६० त्वद्रूपमे वतवकारणस्यरूपंधारयतिनतुपृथक्सत्वंयस्यततूत्वद्रूपधारित्रह्मांडंतस्याप्यंतर्जगद्वर्ततेकिंपुनर्वक्तव्यंतवांतरिति सर्वाणिभूतानियस्मिञ्जगतितम् सर्वभूतादितिपाठेत्वद्रूपधारिणइत्यस्यविशेष णम् ल्यब्लोपेपंचम्यौ तत्प्राप्येत्यर्थः ६१ किंचत्वत्तोयज्ञः सर्वेषांचरुपुरोडाशादीनांहुतंहवनंयस्मिन्ससर्वहुतः अनेकद्रव्यकइत्यर्थः यज्ञादितिपाठेसर्वंहूयतेस्मिन्निति सर्वहुतूतस्मादिति ल्यब्लोपेपंचम्यौ सर्वहुतंसर्वयज्ञमुद्दिश्यपृषदाज्यादित्वत्तोजातमित्यर्थः पृषदाज्यंदधिमिश्रघृतं पशुर्द्विधाग्राम्यारण्यभेदेन ६२ छंदांसिगायत्र्यादीनि त्वत्तोश्वाउभयतोदंताःएकतोदंता श्चमहिषादयः तेषुप्राशस्त्याद्गवादेःपृथगुक्तिः ६३ त्वत्तःतवचबाह्वोः ६४ प्राणोंतःसुषिरादंतर्नाड्याःसुषुम्नायाः प्राणोनःसुषिरादितिपाठेनासाविवरात् ६५ द्यौःस्वर्गः ६६ यथान्य

पुरुषोत्तमतद्भवान् । त्वत्तोविराट्स्वराट्सम्राट्त्वत्तश्चाप्यंधिपूरुषः ५९ अत्यरिच्यतसोधश्चातिर्यक्चोर्ध्वंचवैभुवः । त्वत्तोविश्वमिदंधातस्त्वत्तोभूतभ विष्यती ६० त्वद्रूपधारिणश्चांतःसर्वभूतमिदंजगत् ६१ त्वत्तोयज्ञःसर्वहुतःपृषदाज्यंपशुर्द्विधा । त्वत्तऋचोथसामानित्वत्तश्छंदांसिजज्ञिरे ६२ त्वत्तोयजूंष्यजायंतत्वत्तोश्वाश्चैकतोदतः । गावस्त्वत्तःसमुद्भूतास्त्वत्तश्चाजावयोमृगाः ६३ त्वन्मुखाद्ब्राह्मणोबाह्वोस्त्वत्तःक्षत्रमजायत । वैश्यास्तवो रुजाःशूद्रास्तवपद्भ्यांसमुद्गताः ६४ अक्ष्णोःसूर्योनिलःप्राणाच्चंद्रमामनसस्तव । प्राणोंतःसुषिराज्जातोमुखादग्निरजायत ६५ नाभितोगगनंद्यौश्च शिरसःसमवर्तत । दिशःश्रोत्रात्क्षितिःपद्भ्यांत्वत्तःसर्वमभूदिदम् ६६ न्यग्रोधःसुमहानल्पेयथाबीजेव्यवस्थितः । संयमेविश्वमखिलंजीवभूतेतथा त्वयि ६७ बीजादंकुरसंभूतोन्यग्रोधःससमुच्छ्रितिम् । विस्तारंचयथायातित्वत्तःसृष्टौयथाजगत् ६८ यथाहिकदलीनाड्यांत्वक्पत्राद्यथदृश्यते । एवंवि श्वस्यनाड्यस्त्वंत्वत्स्थायीश्वरदृश्यते ६९ ह्लादिनीसंधिनीचापित्वय्येकासर्वसंस्थितौ । ह्लादतापकरीमिश्रात्वयिनोगुणवर्जिते ७० पृथग्भूतैकभूतायभू

ग्रोधउत्पत्तेःप्राक्संयमेनाशेपिअल्पेसूक्ष्मेबीजेव्यवस्थितःविश्वमिदंतथात्वयि ६७ यथाअंकुररूपेणसंभूतोबीजादेवसमुच्छ्रितिंविस्तारंचयातित्वत्तोजगदपितथा ६८ त्वत्तोजातंविश्वंत्वत्तो भिन्नंनभवतीतिदृष्टांतेनाह यथाहिकदलीत्वचःपत्राच्चपृथक्नदृश्यतेएवंत्वक्पत्रस्थानीयात्त्वत्तोविश्वस्यनान्यत्वंयतोविश्वंत्वत्स्थायित्वय्येवस्थातुंशीलमस्यतथाभूतमेवघटःसन्पटःसन्नित्येवं दृश्यतेनतुपृथक् भोईश्वर सर्वजीवनियामक पाठांतरेकदलीनाड्यांकदलीकाडेत्वक्पत्रादियथादृश्यतेएवंविश्वस्यनाड्यःशिराजालवदनुस्यूताःप्रकृत्यादयस्त्वमेवत्वङ्मात्रेत्यपिपठंति ६९ ईश्वरत्वमेवजीवेश्वरभेदेनदर्शयन्नाह ह्लादिनीतिह्लादिनीस्वरूपसुखप्रकाशिनी संधिनीविश्वंसंदधातीतिअघटनघटनापटीयसीविश्वजनिकाचशक्तिस्त्वय्येवनतुजीवे तत्कुतः अस र्वसंस्थितैः शुद्धेतर्हितत्रकथंशक्तिस्तत्राह एकाअभिन्नास्वस्वरूपेतियावत् सर्वसंस्थितावितिपाठेसर्वाधिष्ठानभूतइत्यर्थः ह्लादतापकरीमिश्राचेतित्रिगुणमयीजीवेयाशक्तिःसात्वयिनकुतस्त त्राह गुणवर्जितेह्लादकरीमनःप्रसादात्मिकीसात्त्विकीतापकरीइष्टविषयवियोगादिषुदुःखकरीतामसी मिश्राउभयसंपादिनीराजसी ७० ऐश्वर्यमेवविभूतिभिःप्रपंचयति पृथग्भूतैकभूताय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यात्मनापृथग्भूतायप्रकारणात्मनाचैकभूताय भूतभूतायभूतसूक्ष्मरूपाय प्रभूतानिभूतानिमहाभूतानितद्रूपाय भूतात्मनेचराचरप्राणिरूपायचतुभ्यंनमः ७१ किंचपूर्वोक्तव्यक्तप्रधानादि षड्रूपतयाभवानेवोपासकैरंतःकरणेविभाव्यतेउपास्यतेतथापुरुषेषूपाध्यभिमानेनक्षीयमाणेष्वपिभवान्परमात्माअक्षयोविभाव्यते विभाव्यसइतिपाठेत्वंपदाध्याहारः यद्वा विराडादयोविश्वतै जसेप्राज्ञास्तद्रूपतयापुरुषेषुविभाव्यतेप्रत्यक्षतांयाति व्यक्तादिपदेषुद्वंद्वैक्यंसर्वस्मिन्देवादिशरीरेसर्वभूतःक्षेत्रज्ञरूपस्त्वंसर्वश्चत्वंक्षेत्ररूपश्चत्वमेवएकस्यक्षेत्रज्ञक्षेत्ररूपत्वंविरुद्धंतत्राह सर्वस्व रूपधृक्चेतनाचेतनारूपंत्वमेवधत्से सर्वंखल्विदंब्रह्मेतिश्रुतेः तदुपपादयति सर्वंत्वत्तः सर्वस्ययद्यत्कारणंतत्त्वमेव ततःसर्वस्माद्यद्यज्जायतेतदपित्वमेव अतःसर्वस्वरूपधृगित्यर्थः स्तुतिमु पसंहरति एवंसर्वात्मनेनमइति७२ ७३ पूर्वोक्तमर्थंकियंतमनुवदन्स्वमनोरथंसूचयति सर्वात्मकोसीति सर्वात्मकःसर्वमूर्तिः ७४ एतदेवविवृण्वन्नाह सर्वात्मन्सर्वेषामात्मभूत सर्वेषांभूताना

तभूतायतेनमः । प्रभूतभूतभूतायतुभ्यंभूतात्मनेनमः ७१ व्यक्तप्रधानपुरुषविराट्सम्राट्स्वराट्तथा । विभाव्यतेंतःकरणेपुरुषेष्वक्षयोभवा न् ७२ सर्वस्मिन्सर्वभूतस्त्वंसर्वःसर्वस्वरूपधृक् । सर्वंत्वत्तस्ततश्चत्त्वमेवंसर्वात्मनेनमः ७३ सर्वात्मकोपिसर्वेशःसर्वभूतस्थितोयतः । कथयामि ततःकिंतेसर्वंवेत्सिहृदिस्थितम् ७४ सर्वात्मन्सर्वभूतेशसर्वसत्त्वसमुद्भव । सर्वभूतोभवान्वेत्तिसर्वसत्त्वमनोरथम् ७५ योममनोरथोनाथसफलःसत्व याकृतः । तपश्चतप्तंसफलंयद्दृष्टोसिजगत्पते ७६ । श्रीभगवानुवाच । । तपसस्तत्फलंप्राप्तंयद्दृष्टोहंत्वयाध्रुव । मद्दर्शनंहिविफलंराजपुत्रन जायते ७७ वरंवरयतस्मात्त्वंयथाभिमतमात्मनः । सर्वंसंपद्यतेपुंसांमयिदृष्टिपथंगते ७८ । ध्रुवउवाच । । भगवन्सर्वभूतेशसर्वस्यास्तेभ वान्हृदि । किमज्ञानंतवस्वामिन्मनसायन्मयेप्सितम् ७९ तथापितुभ्यंदेवेशकथयिष्यामियन्मया । प्रार्थ्यतेदुर्विनीतेनहृदयेनातिदुर्लभम् । ८० किंवासर्वजगच्छ्रेष्ठप्रसन्नेत्वयिदुर्लभम् । त्वत्प्रसादफलंभुंक्तेत्रैलोक्यंमघवानपि ८१ नैतद्राजासनंयोग्यमजातस्यममोदरात् । इतिगर्वादवो चन्मांसपत्नीमातुरुच्चकैः ८२ आधारभूतंजगतःसर्वेषामुत्तमोत्तमम् । प्रार्थयामिप्रभोस्थानंत्वत्प्रसादादतोऽव्ययम् ८३ । श्रीभगवानुवाच । य त्त्वयाप्रार्थितंस्थानमेतत्प्राप्स्यतिवैभवान् । त्वयाहंतोषितःपूर्वमन्यजन्मनिबालक ८४ त्वमासीर्ब्राह्मणःपूर्वमय्येकाग्रमतिःसदा । मातापित्रोश्च

मीशबुद्ध्यादिनियामक सर्वेषांसत्त्वानांभूतानांसमुद्भवोयस्माद्धेसर्वप्राणिजनक सर्वसर्वसमुद्भवेतिपाठेसर्वेतिसंबोधनम् इत्थंसर्वभूतोभवान्सर्वसत्त्वमनोरथंवेत्तिनकेवलंमदीयमेवेत्यर्थः७५ योमेमनोरथस्त्वदीयस्तुतिविषयःसत्वयास्तुतिसामर्थ्यदानेनसफलःकृतः यच्चतपस्तप्तंतदपिमेसफलमेवेतिज्ञायते यतस्त्वंदृष्टोसि यद्वामनोरथःकामनाससफलस्तपश्चसफलम् यतःसर्वफल रूपस्त्वंदृष्टःसाक्षात्कृतइत्यर्थः ७६ यद्यपिसर्वफलरूपंमद्दर्शनंयत्तपसःफलंतत्त्वयाप्राप्तमेवतथापिहियतोमद्दर्शनमुद्देश्यफलरहितंनजायते ७७ तस्मादभिमतंवरंयथावत्त्वंवरय एकस्यतपसः फलद्वयंकथमितितत्राह सर्वंप्रार्थितमप्रार्थितंच तत्रहेतुर्मयीति ७८ सर्वांतर्यामितयाहृदिवर्तमानस्यतवयन्मनसेप्सितंमयातत्किमज्ञातंज्ञातमेवेत्यर्थः ७९ तथापिप्रभोस्तवाज्ञयाहृदयेनदुर्वि नीतेनासहिष्णुना ८० तर्हिअतिदुर्लभंकिंप्रार्थ्यतेतत्राह किंचेति ८१ तस्यैवप्रार्थनसहेतुकमाह नैतदितिद्वाभ्याम् मातुःसपत्नीउच्चकैर्गर्वान्मामिदमवोचत् ८२ अव्ययंचिरस्थायि ८३ पूर्वज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मकृतकामकर्मवशाद्राज्यभोगानंतरमेवतादृशंस्थानंप्राप्स्यसीत्याह भगवान्यत्त्वयेत्यादिनातावत्कालंनिवत्स्यतीत्यंतेनग्रंथेने ८४ ८५ ८६ ८७ ८८ स्वायंभुवस्यकुलेयज्जन्ममद्भक्ताद न्येषांतापसानांतद्वरंश्रेष्ठंजन्मस्थानम् येनत्वयापूर्वमहंपरितोषितस्तस्यतवमद्भक्तस्यएतदवरंतुच्छंजन्मस्थानम् ८९ ९० त्रैलोक्यादधिकेत्रैलोक्योर्ध्वविधौ ९१ सितःशुक्रःअर्कतनयःशनैश्च रः ९२ ९३ ९४ सुनीतिरपितेमातेति त्वन्मातृत्वादेवतत्रनिवत्स्यतीत्यर्थः ९५ ९६ ९७ अभिमानंगर्वम् ऋद्धिमैश्वर्यम् महिमानंमहत्त्वम् शुक्रस्यदेवाचार्यत्वंकचद्वारा ९८ वीर्यमिंद्रा

शुश्रूषुर्निजधर्मानुपालकः ८५ कालेनगच्छतामित्रंराजपुत्रस्तवाभवत् । यौवनेखिलभोगाढ्योदर्शनीयोज्वलाकृतिः ८६ तत्संगात्तस्यतामृद्धिमव लोक्यातिदुर्लभाम् । भवेयंराजपुत्रोहमितिवाञ्छात्वयाकृता ८७ ततोयथाभिलषिताप्राप्तातेराजपुत्रता । उत्तानपादस्यगृहेजातोसिध्रुवदुर्लभे ८८ अन्येषांतद्वरंस्थानंकुलेस्वायंभुवस्ययत् । तस्यैतदवरंबालयेनाहंपरितोषितः ८९ मामाराध्यनरोमुक्तिमवाप्नोत्यविलंबितम् । मय्यर्पितमनाबाल किमुस्वर्गादिकंपदम् ९० त्रैलोक्यादधिकेस्थानेसर्वताराग्रहाश्रयः । भविष्यतिनसंदेहोमत्प्रसादाद्भवान्ध्रुव ९१ सूर्यात्सोमात्तथाभौमात्सोमपु त्राद्बृहस्पतेः । सितार्कतनयादीनांसर्वर्क्षाणांतथाध्रुव ९२ सप्तर्षीणामशेषाणांयेचवैमानिकाःसुराः । सर्वेषामुपरिस्थानंतवदत्तंमयाध्रुव ९३ केचिच्च तुर्युगंयावत्केचिन्मन्वंतरंसुराः । तिष्ठंतिभवतोदत्तामयावैकल्पसंस्थितिः ९४ सुनीतिरपितेमातात्वदासन्नातिनिर्मला । विमानेतारकाभूत्वातावत्का लंनिवत्स्यति ९५ येचत्वांमानवाःप्रातःसायंचसुसमाहिताः । कीर्तयिष्यंतितेषांचमहत्पुण्यंभविष्यति ९६ । पराशरउवाच । एवंपूर्वंजगन्ना थाद्देवदेवाज्जनार्दनात् । वरंप्राप्यध्रुवःस्थानमध्यास्तेसमहामुने ९७ तस्याभिमानमृद्धिंचमहिमानंनिरीक्ष्यच । देवासुराणामाचार्यःश्लोकंचात्रोश नाजगौ ९८ अहोस्यतपसोवीर्यमहोस्यतपसःफलम् । यदेनमग्रतःकृत्वाध्रुवंसप्तर्षयःस्थिताः ९९ ध्रुवस्यजननीचेयंसुनीतिर्नामसूनृता । अस्या श्चमहिमानंकःशक्तोवर्णयितुंभुवि १०० त्रैलोक्याश्रयतांप्राप्तापरंस्थानंस्थिरायतिः । स्थानंप्राप्तावरंकृत्वायाकुक्षिविवरेध्रुवम् १०१ यश्चैतत्की र्त्तयेन्नित्यंध्रुवस्यारोहणंदिवि । ससर्वपापनिर्मुक्तःस्वर्गलोकेमहीयते १०२ स्थानभ्रंशंनचाप्नोतिदिविवायदिवाभुवि । सर्वकल्याणसंयुक्तोदीर्घका लंसजीवति १०३ इतिश्रीविष्णुपुराणेप्रथमेअंशेद्वादशोध्यायः १२ । पराशरउवाच । ध्रुवाच्छिष्टिंचभव्यंचभव्याच्छंभुर्व्यजायत । श्लिष्टेराध

दिक्षोभणम् फलमाकल्पस्थायि ९९ सूनृतेत्यपिनाम धर्मस्यकन्यासुश्रोणीसूनृतानामाविश्रुता उत्पन्नावाजिमेधेनध्रुवस्यजननीशुभेतिहरिवंशेदर्शनात् ततःपुण्योदयेयत्नंकुर्वित्यादिरूप सत्यप्रियवादिनीतिच १०० त्रैलोक्याश्रयतांप्राप्ता प्राप्तामितिपाठेस्थानस्यविशेषणम् स्थीयतेस्मिन्नितिस्थानंपरमाधारभूतम् परंविष्णुपदाख्यम् स्थिरायतिः स्थिरप्रभावा नपुंसकत्वेस्थि रानित्याआयतिरुत्तरकालभाविमुक्तिरूपंफलंयस्मिन्तथाभूतंनिवासंकथंप्राप्ता वरंश्रेष्ठंविष्णुभक्तंध्रुवंकुक्षिविवरेस्वल्पेकृत्वा १०१ १०२ १०३ इतिवैष्णवाकूतचंद्रिकायांप्रथमेअंशेद्वाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोध्यायः १२ । । त्रयोदशेध्रुवस्योक्तोवंशोवेनोत्रकोपतः द्विजैर्दग्धोस्यमथनात्पृथुर्जातोनुवर्ण्यते भव्यात्कल्याणवतइतिध्रुवविशेषणम् शंभुर्ध्रुवभार्या श्लिष्टिंभव्यंचजनयामासेत्यर्थः भार्याशंभुरित्यपिपठंति सुच्छायानाम्ना १ एवंबृहत्यपि २ वारुण्यांवरुणसंततिजायांनाम्नापुष्करिण्याम् वीरिण्यामितिपठित्वा नाम्नावीरिण्यांपुष्करिण्यांपञ्चिन्यामितिकेचिद्व्याचक्षते चाक्षु

त्तसुच्छायापंचपुत्रानकल्मषान् १ रिपुंरिपुंजयंविप्रंवृकलंवृकतेजसम् । रिपोराधत्तबृहतीचाक्षुषंसर्वतेजसम् २ अजीजनत्पुष्करिण्यांवारुण्यांचाक्षुषोमनुम् । प्रजापतेरात्मजायामनरण्यस्यधीमतः ३ मनोरजायंतदशनड्वलायांमहौजसः । कन्यायांद्विजशार्दूलवैराजस्यप्रजापतेः ४ ऊरुःपुरुःशतद्युम्नस्तपस्वीसत्यवाक्शुचिः । अग्निष्टुदतिरात्रश्चसुद्युम्नश्चेतितेनव ५ अभिमन्युश्चदशमोनड्वलायांमहौजसः । ऊरोरजनयत्पुत्रान्षडाग्नेयीमहाप्रभान् ६ अंगंसुमनसंख्यातिंक्रतुमंगिरसोषिजौ । अंगात्सुनीथापत्यंवैवेनमेकंव्यजायत ७ प्रजार्थमृषयोयस्यममंथुर्दक्षिणंकरम् । वेनस्यमथितेपाणौसबभूवमहामतिः ८ वैन्योनाममहीपालोयःपृथुःपरिकीर्त्यते । येनदुग्धामहीपूर्वंजनानांहितकारणात् ९ । मैत्रेयउवाच । किमर्थंमथितःपाणिर्वेनस्यपरमर्षिभिः । यत्रजज्ञेमहावीर्यःपृथुःसपृथिवीपतिः १० । पराशरउवाच । सुनीथानामयाकन्यामृत्योःप्रथमजाभवत् । अंगस्यभार्यासादत्तातस्यांवेनस्त्वजायत ११ समातामहदोषेणतेनमृत्योःसुतात्मजः । निसर्गादेवमैत्रेयदुष्टएवव्यजायत १२ अभिषिक्तोयदाराज्येसवेनःपरमर्षिभिः । घोषयामाससतदापृथिव्यांपृथिवीपतिः १३ नयष्टव्यंनदातव्यंनहोतव्यंकदाचन । भोक्तायज्ञस्यकस्त्वन्योह्यहंयज्ञपतिःप्रभुः १४ ततस्तमृषयःसर्वेसंपूज्यपृथिवीपतिम् । ऊचुःसामकलंसम्यक्मैत्रेयसमुपस्थिताः १५ । । ऋषयऊचुः । । भोभोराजञ्शृणुष्वत्वंयद्वदामतवप्रभो । राज्यदेहोपकारायप्रजानांचहितंपरम् १६ दीर्घसत्रेणदेवेशंसर्वयज्ञेश्वरंहरिम् । पूजयिष्यामभद्रंतेतत्रांशस्तेभविष्यति १७ यज्ञेनयज्ञपुरुषोविष्णुःसंप्रीणितोविभुः । अस्माभिर्भवतःकामान्सर्वानेवप्रदास्यति १८ यज्ञैर्यज्ञेश्वरोयेषांराष्ट्रेसंपूज्यतेहरिः । तेषांसर्वेप्सितावाप्तिंददाति नृपभूभुजाम् १९ । वेनउवाच । मत्तःकोऽप्यधिकोऽन्योस्तिकश्चाराध्योममापरः । कोऽयंहरिरितिख्यातोयोवोयज्ञेश्वरोमतः २० ब्रह्माजनार्दनोरुद्रइंद्रोवायुर्यमोरविः । हुतभुग्वरुणोधातापूषाभूमिर्निशाकरः २१ एतेचान्येचयेदेवाःशापानुग्रहकारिणः । नृपस्यतेशरीरस्थाःसर्वदेवमयोनृ

षोमनुंचाक्षुषंषष्ठमन्वंतरपतिम् ३ वैराजस्यप्रजापतेरात्मजायांनड्वलायांमहौजसः दशपुत्राअजायंतेत्यन्वयः ४ ५ नड्वलायांमहौजसइतिपुनरुक्तिस्तुनड्वलायांमहौजसोयेदशइत्यनुवादेनतेएतइतिविधानार्था ६ अंगिरसोषिजावित्यदंतनामनी ७ ८ ९ १० प्रथमजाव्याध्यादीनामितिशेषः ११ मातामहदोषेणतेनतामसेननिसर्गात्स्वभावतोदुष्टएव १२ १३ यज्ञस्यभोक्तामत्तःकोन्योऽस्तिनकोपीत्यर्थः १४ सामप्रियपूर्वकंअव्यक्तमधुरंवाक्यमूचुः १५ राज्यदेहयोरुपकारायक्षेमाय १६ दीर्घसत्रेणसहस्रवत्सरसाध्येन अंशःषष्ठोभागः पुण्यात्षड्भागमाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तेन्यायेनपरिपालयन्निति स्मृतेः १७ १८ १९ २० २१ २२ मयायथावद्यदाज्ञप्तंतथैवक्रियतांतदेवाह नदातव्यमिति २३ २४ हविषांपरिणामोदृष्ट्यादिद्वाराकार्यम् २५ २६ को पश्चामर्षश्चभगवन्निंदासहनंताभ्यामन्विताः २७ २८ २९ रेणुंधूलिम् आसन्ननिकटस्थंजनम् ३० तेषांतेभ्यः अचौराएवचौराअभवन्चौरीभूतास्तैरातुरैराकुलैः ३१ ३२ ३३ मथ्य तोमथ्यमानात् दग्धस्थूणाप्रतीकाशःदग्धस्तंभतुल्यकृष्णवर्णः खर्वाटास्यःह्रस्वमुखः खर्वाटाख्यइतिपाठेखर्वाटनामा खर्वाटाक्षइतिपाठेखर्वाटेअनायतेवर्तुलेवाअक्षिणीयस्यसः ३४ आ

पः २२ एतज्ज्ञात्वायथाज्ञप्तंयद्यथाक्रियतांतथा । नदातव्यंनहोतव्यंनयष्टव्यंचवोद्विजाः २३ भर्तुःशुश्रूषणंधर्मोयथास्त्रीणांपरोमतः । ममाज्ञापा लनंधर्मोभवतांचतथाद्विजाः २४ । ऋषयऊचुः । देह्यनुज्ञांमहाराजमाधर्मोयातुसंक्षयम् । हविषांपरिणामोयंयदेतदखिलंजगत् । धर्मेचसंक्षयंया तेक्षीयतेचाखिलंजगत् २५ । पराशरउवाच । इतिविज्ञाप्यमानोपिसवेनःपरमर्षिभिः । यदाददातिनानुज्ञांप्रोक्तःप्रोक्तःपुनःपुनः २६ तत स्तेमुनयःसर्वेकोपामर्षसमन्विताः । हन्यतांहन्यतांपापइत्यूचुस्तेपरस्परम् २७ योयज्ञपुरुषंदेवमनादिनिधनंप्रभुम् । विनिंदत्यधमाचारोनसयो ग्योभुवःपतिः २८ इत्युक्त्वामंत्रपूतैस्तेकुशैर्मुनिगणानृपम् । निजघ्नुर्निहतंपूर्वंभगवन्निंदनादिना २९ ततश्चमुनयोरेणुंददृशुःसर्वतोद्विज । कि मेतदितिचासन्नंपप्रच्छुस्तेजनंतदा ३० आख्यातंचजनैस्तेषांचौरीभूतैरराजके । राष्ट्रेतुलोकैरारब्धंपरस्वादानमातुरैः ३१ तेषामुदीर्णवेगा नांचौराणांमुनिसत्तमाः । सुमहान्दृश्यतेरेणुःपरवित्तापहारिणाम् ३२ ततःसंमंत्र्यतेसर्वेमुनयस्तस्यभूभृतः । ममंथुरूरुंपुत्रार्थमनपत्यस्ययत्नतः ३३ मथ्यतश्चसमुत्तस्थौतस्योरोःपुरुषःकिल । दग्धस्थूणाप्रतीकाशःखर्वाटास्योतिह्रस्वकः ३४ किंकरोमीतितान्सर्वान्विप्रानाहसचातुरः । निषीदेतितमूचुस्तेनिषादस्तेनसोऽभवत् ३५ ततस्तत्संभवाजातावींध्यशैलनिवासिनः । निषादामुनिशार्दूलपापकर्मोपलक्षणाः ३६ तेनद्वारे णतत्पापंनिष्क्रांतंतस्यभूपतेः । निषादास्तेतथाजातावेनकल्मषसंभवाः ३७ ततोस्यदक्षिणंहस्तंममंथुस्तेतदाद्विजाः । मथ्यमानेचतत्राभूत्पृथुर्वै न्यःप्रतापवान् ३८ दीप्यमानःस्ववपुषासाक्षादग्निरिवज्वलन् । आद्यमाजगवंनामखात्पपाततोधनुः ३९ शराश्चदिव्यानभसःकवचंचपपा तह । तस्मिञ्जातेनुभूतानिसंप्रहृष्टानिसर्वशः ४० तत्पुत्रेणचजातेनवेनोपित्रिदिवंययौ । पुंनाम्नोनरकात्त्रातःसतेनसुमहात्मना ४१ तंसमु

तुरः आर्तःनिषीदगच्छेतितमूचुस्तेनसानिषादोभवत् ३५ पापकर्मैवउपलक्षणंव्यंजकंयेषांते तादृश्याकृत्याप्राचीनंपापकर्मउपलक्षयंतियेतेइतिवा ३६ तेनद्वारेणनिषादरूपेण अतःपापंनिषीद तिनिर्गच्छतीतिनिषादः सीदतेर्गत्यर्थस्यरूपमितिव्युत्पत्तिःसूचिता तथातत्प्रकारव्युत्पादनेन ३७ तत्रहस्ते निर्मथनेनधूमरूपानिषादेनिर्गतेअग्निरिवदेदीप्यमानःप्रतापवांश्चपृथुरभूदित्यर्थः ३८ आद्यंशार्वं आजगवंपिनाकसंज्ञंधनुः ३९ ४० पुन्नाम्नइति पुन्नाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः तस्मात्पुत्रइतिप्रोक्तःस्वयमेवस्वयंभुवेतिवचनात् ४१ सर्वशःसर्वाणिरत्नानि तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यानिचसर्वाणि ४२ देवैरित्यनेनैवप्राप्तेपुनरांगिरसैरित्यभिषेकप्राधान्यसूचनाय स्थावराणिचेति तदभिमानिन्योदेवताः ४३ चक्रंचक्राकाररेखामयंदृष्ट्वेत्यर्थः ४४ ४५ राजराज्येनचक्रवर्तित्वेनसोभिषिक्तः यस्यप्रभावस्त्रिदशैरप्यव्याहतइतिद्वयोरन्वयः ४६ ४७ अपरञ्जिताःक्लेशिताः ४८ ध्वजोरथचिह्नंआज्ञावातद्वंगोवनेषुजनेषुवानाभवदित्यर्थः ४९ अकृष्टपच्याकृषिंविनैवसफलाकृषिःपाकहीनावा कथंतर्हिआहारसिद्धिस्तत्राह सिध्यंतीति पुटकंपत्रादिसंस्थानविशेषः ५० पृथोर्यूनएवजातमात्रस्ययज्ञेपैतामहेपितामहदेवताकेनतुपितामहकर्तृके वै

द्राश्वनद्यश्चरत्नान्यादायसर्वशः । तोयानिचाभिषेकार्थंसर्वाण्येवोपतस्थिरे ४२ पितामहश्चभगवान्देवैरांगिरसैःसह । स्थावराणिचभूतानिजंगमानिचसर्वशः ४३ समागम्यतदावैन्यमभ्यषिंचन्नराधिपम् । हस्तेतुदक्षिणेचक्रंदृष्ट्वातस्यपितामहः ४४ विष्णोरंशंपृथुंमत्वापरितोषंपरंययौ ४५ विष्णुचिह्नंकरेचक्रंसर्वेषांचक्रवर्तिनाम् । भवत्यव्याहतोयस्यप्रभावस्त्रिदशैरपि ४६ महताराजराज्येनपृथुर्वैन्यःप्रतापवान् । सोभिषिक्तोमहातेजाविधिवद्धर्मकोविदैः ४७ पित्रापरञ्जितास्तत्रप्रजास्तेनानुरंजिताः । अनुरागात्ततस्तस्यनामराजेत्यजायत ४८ आपस्तस्तंभिरेचास्यसमुद्रमभियास्यतः । पर्वताश्चददुर्मार्गंध्वजभंगश्चनाभवत् ४९ अकृष्टपच्यापृथिवीसिध्यंत्यन्नानिचिंतया । सर्वकामदुघागावःपुटकेपुटकेमधु ५० तस्यवैजातमात्रस्ययज्ञेपैतामहेशुभे। सूतःसूत्यांसमुत्पन्नःसौत्येहनिमहामतिः ५१ तस्मिन्नेवमहायज्ञेजज्ञेप्राज्ञोथमागधः। प्रोक्तौतदामुनिवरैस्तावुभौसूतमागधौ ५२ स्तूयतामेषनृपतिःपृथुर्वैन्यःप्रतापवान् । कर्मैतदनुरूपंवांपात्रंस्तोत्रस्यचाप्नुयात् ५३ ततस्तावूचतुर्विप्रान्सर्वानेवकृतांजली । अद्यजातस्यनोकर्मज्ञायतेऽस्यमहीपतेः ५४ गुणानचास्यज्ञायंतेनचास्यप्रथितंयशः । स्तोत्रंकिमाश्रयंत्वस्यकार्यमस्माभिरुच्यताम् ५५ ऋषयऊचुः । । करिष्यत्येषयत्कर्मचक्रवर्तीमहाबलः । गुणाभविष्यायेचास्यतैरेवस्तूयतांनृपः ५६ । पराशरउवाच । ततःसन्नृपतिस्तोषंतच्छ्रुत्वापरमंययौ । सद्गुणैःश्लाघ्यतामेतिस्तव्याश्चाभ्यांगुणामम ५७ तस्माद्यदत्रस्तोत्रेमेगुणसंकीर्तनंत्विमौ । करिष्येतेकरिष्यामितदेवाहंसमाहितः ५८ यदिमौवर्जनीयंचकिंचिदत्रवदिष्यतः । तदहंवर्जयिष्यामीत्येवंचक्रेमतिंनृपः ५९ अथतौचक्रतुस्तोत्रंपृथोर्वैन्यस्यधीमतः । भविष्यैः

न्यस्यहिपृथोर्यज्ञेवर्तमानेमहात्मनः सूत्यायामभवत्सूतइतिवायूक्तेः सूत्यांसोमाभिषवेजातः यद्वासूयतेकंडयतेसोमोस्यामितिसूतिःसोमोभिषवभूमिस्तस्यां सौत्येहनि ५१ तस्मिन्नेवदिवसेवार्हस्पत्यंहविरैंद्रेणहविषापृक्तमभिभूतंतस्यहोमात्प्रातिलोम्येनसूतोजातएवऐंद्रामारुतेनततोमागधइतिपौराणिकः ५२ वांयुवयोः पात्रंयोग्यम् ५३ ५४ अस्माभिःअस्मदोर्द्वयोश्चेतिबहुवचनम् ५५ चक्रवर्तिदक्षिणहस्तेचक्रस्योपलब्धेः महाबलोविष्णवंशत्वादतोगुणाःसत्कर्माणिचभविष्यंतिअतस्तैरेवायंस्तूयताम् अयंभावः नीचोनियुज्यतेदंडैरुत्तमस्तुप्रियोक्तिभिरितिन्यायादयंस्तुत्यैवस्वकार्यंज्ञापनीयइति ५६ ऋषिभिःसर्वज्ञैःसूतमागधमुखेनराजसद्गुणकर्माण्युपादिश्यंतइतितान्येवाहंकारिष्यामीतिमनसापृथुराह ततइतित्रिभिः तदितिसमान्यतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपुंसकम् ५७ ५८ ५९ ६० सत्यसंधःसत्यप्रतिज्ञःसत्यमर्यादोवा ह्रीमानकार्यविमुखः मैत्रःस्वपरस्मिन्समभावः ६१ ६२ व्यवहारस्थितौव्यवहाराणांऋणादानाद्यष्टादशपदानांस्थितौनिरूपणेसमोऽपक्षपातीत्यर्थः वर्जनीयंचैतद्विपरीतमर्थादुक्तम् ६३ ६४ ६५ तस्मिन्कालेवेनपृथुराज्ययोःसंधौ ६६ ओषधीरोषध्यः ६७ ६८ ६९ ननाशअपलायत ७० ७१

कर्मभिःसम्यक्सुस्वरौसूतमागधौ ६० सत्यवाक्दानशीलोयंसत्यसंधोनरेश्वरः । ह्रीमान्मैत्रःक्षमाशीलोविक्रांतोदुष्टशासनः ६१ धर्मज्ञश्चकृतज्ञश्च दयावान्प्रियभाषकः । मान्यमानयितायज्वाब्रह्मण्यःसाधुवत्सलः ६२ समःशत्रौचमित्रेचव्यवहारस्थितौनृपः । सूतेनोक्तान्गुणानित्थंसतदा मागधेनच ६३ चकारहृदितादृक्ककर्मणाकृतवानसौ । ततःसपृथिवीपालःपालयन्वसुधामिमाम् ६४ इयाजविविधैर्यज्ञैमहद्भिर्भूरिदक्षिणैः । तंप्र जाःपृथिवीनाथमुपतस्थुःक्षुधार्दिताः ६५ ओषधीषुप्रनष्टासुतस्मिन्कालेह्यराजके । तमूचुस्तेनताःपृष्टास्तत्रागमनकारणम् ६६ । प्रजाऊचुः । अराजकेनृपश्रेष्ठधरण्यासकलौषधीः । ग्रस्तास्ततःक्षयंयांतिप्रजाःसर्वाःप्रजेश्वर ६७ त्वन्नोतृप्तिप्रदोधात्राप्रजापालोनिरूपितः । देहिनःक्षुत्परीता नांप्रजानांजीवनौषधीः ६८ । पराशरउवाच । ततोथनृपतिर्दिव्यमादायाजगवंधनुः । शरांश्चदिव्यान्कुपितःसोनुधावद्वसुंधराम् ६९ ततोननाश त्वरितागौर्भूत्वातुवसुंधरा । स्वर्लोकाद्ब्रह्मलोकादींस्तत्रासादगमन्मही ७० यत्रयत्रययौदेवीसातदाभूतधारिणी । तत्रतत्रतुसावैन्यंददर्शोद्युद्यता युधम् ७१ ततस्तंप्राहवसुधापृथुंपृथुपराक्रमम् । प्रवेपमानातद्बाणात्परित्राणपरायणा ७२ स्त्रीवधेत्वंमहत्पापंकिंनरेंद्रनपश्यसि । येनमांहंतुमत्य र्थंप्रकरोषिनृपोद्यमम् ७३ । पृथुरुवाच । । एकस्मिन्यत्रनिधनंप्रापितेदुष्टकारिणि । बहूनांभवतिक्षेमंतस्यपुण्यप्रदोवधः ७४ पृथिव्युवाच । प्रजानामुपकारायददिमांत्वंहनिष्यसि । आधारःकःप्रजानांतेनृपश्रेष्ठभविष्यति ७५ । पृथुरुवाच । त्वांहत्वावसुधेबाणैर्मच्छासनपराङ्मुखीम् । आत्मयोगबलेनेमाधारयिष्याम्यहंप्रजाः ७६ ततःप्रणम्यवसुधाभूयस्तंप्राहपार्थिवम् । प्रवेपितांगीपरमंसाध्वसंसमुपागता ७७ । पृथिव्युवाच । उपायतःसमारब्धाःसर्वेसिद्ध्यंत्युपक्रमाः । तस्माद्वदाम्युपायंतेत्वंकुरुष्वयदिच्छसि ७८ समस्तास्तामयाजीर्णानरनाथमहौषधीः । यदिच्छसिप्रदा स्यामिताःक्षीरपरिणामिनीः ७९ तस्मात्प्रजाहितार्थायममधर्मभृतांवर । तंतुवत्संप्रयच्छत्वंक्षरेयंयेनवत्सला ८० समांचकुरुसर्वत्रक्षीरंयेनसमंततः ।

तस्यपृथोर्बाणात्परित्राणमेवपरायणमभीष्टंयस्याःसा ७२ अत्यर्थंतत्तल्लोकगमनमुद्यमम् दुष्टकारिणिअपकारशीलेपृथिव्याःसंबोधनम् ७३ ७४ ७५ मच्छासनपराङ्मुखींसतीम् मच्छासने कृतेनहनिष्यामीतिभावः धारणोपायमाह आत्मयोगबलेनपृथिवीरूपंकृत्वा तथाचहरिवंशे आत्मानंप्रथयित्वेमाधारयिष्याम्यहंप्रजाइति ७६ ७७ उपक्रामाआरंभाआरब्धाःकृताः ७८ क्षीरपरिणामिनीःक्षीरभावंप्राप्ताः ७९ क्षीररूपेणओषधीःक्षरेयंयेनवत्सलासती ८० मांचसमांकुरुयेनसमस्थलत्वेनक्षीरंसर्वत्रभावयेप्रापयिष्यामि सविसर्गपाठेभावयेःप्रापयिष्यासि ८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवर्धिताएकैकत्रराशीकृताः विवर्जिताइतिपाठेअपसारिताः ८२ पूर्वविसर्गेपृथूत्पत्तेःपूर्वसृष्टौ ८३ पुरापृथोःपूर्वमराजकेकालेनचसस्यानीत्यर्थः वणिक्पथोवाणिज्यम् ८४ प्रजाराजाइति प्रजाराजाचसर्वेसमरोचयन्निति समरोचयदितिपाठेप्रजानांराजाप्रजाराजा समांसांतविधेरनित्यत्वादित्यर्थः ८५ सोपिफलाद्याहारः कृच्छ्रेणसंपाद्योभवत् ८६ सपृथुःप्रजासंतानप्रवर्तकंम नुंवत्संकल्वास्वपाणौपात्रेसस्यजातानिपृथिवींदुदोहेत्यन्वयः ८७ ८८ प्राणदानादभयप्रदानाद्भूमेःपिताअभवत् यथाहुःजनकश्चोपनेताचयश्चविद्यांप्रयच्छति अन्नदाताभयत्रातापंचै तेपितरःस्मृताइति ८९ ९० देवादिभिर्दशभिर्वर्गैस्तत्तत्स्वाभिमतंपात्रमुपादायतत्तत्स्वाभिमतंपृथिवीदुग्धा तेषांचयोगबलात्तत्तज्जातीयाएववत्साविशेषादोग्धृविशेषाश्चाभवन्तथाहि देवा

वरौषधीबीजभूतंवीरसर्वत्रभावये ८१ पराशरउवाच। ततउत्सारयामासशैलाञ्शतसहस्रशः। धनुष्कोट्यातदावैन्यस्तेनशैलाविवर्धिताः८२ नहिपूर्व विसर्गेपिविषमेपृथिवीतले। प्रविभागःपुराणांवाग्रामाणांवापुराभवत् ३ नसस्यानिनगोरक्षानकृषिर्नवणिक्पथः। वैन्यात्प्रभृतिमैत्रेयसर्वस्यैतस्यसं भवः८४ यत्रयत्रसमंतस्याभूमेरासीन्नराधिपात्। तत्रतत्रप्रजाराजानिवासंसमरोचयत् ८५ आहारःफलमूलानिप्रजानामभवंस्तदा। कृच्छ्रेणमहता सोपिप्रनष्टास्वौषधीषुवै ८६ सकल्पयित्वावत्संतुमनुंस्वायंभुवंप्रभुम्। स्वेपाणौपृथिवीनाथोदुदोहपृथिवींपृथुः ७७ सस्यजातानिसर्वाणिप्रजानांहि तकाम्यया। तेनान्नेनप्रजास्तावद्वर्तंतेद्यापिनित्यशः ८८ प्राणप्रदानात्सपृथुर्यस्याभूमेरभूत्पिता। ततस्तुपृथिवीसंज्ञामवापाखिलधारिणी ८९ ततश्चदेवैर्मुनिभिर्दैत्यरक्षोभिरद्रिभिः। गंधर्वैरुरगैर्यक्षैःपितृभिस्तरुभिस्तथा ९० तत्तत्पात्रमुपादायतत्तद्दुग्धामुनेपयः। वत्सदोग्धृविशेषाश्च तेषांतद्योनयोऽभवन् ९१ सैषाधात्रीविधात्रीचधारिणीपोषणीतथा। सर्वस्यजगतःपृथ्वीविष्णुपादतलोद्भवा ९२ एवंप्रभावःसपृथुःपुत्रोवेनस्य वीर्यवान्। जज्ञेमहीपतिःपूर्वोराजाभूज्जनरंजनात् ९३ यइदंजन्मवैन्यस्यपृथोःसंकीर्तयेन्नरः। नतस्यदुष्कृतंकिंचित्फलदायिप्रजायते ९४ दुःस्वप्नोपशमंपुंसांशृण्वतांचैतदुत्तमम्। पृथोर्जन्मप्रभावश्चकरोतिसततंनृणाम् ९५। । इतिश्रीविष्णुपुराणेप्रथमेअंशेपृथुचरितेत्रयोदशोध्या यः १३। । पृथुचरितंसमाप्तम्। । पराशरउवाच। । पृथोःपुत्रौतुधर्मज्ञौजज्ञातेंतर्धिपालितौ। शिखंडिनीहविर्धानमंतर्धानाद्व्यजायत १

नामिंद्रोवत्सः मित्रोदोग्धा सौवर्णपात्रम् बलंक्षीरम् मुनीनांसोमोवत्सः बृहस्पतिर्दोग्धाछंदांसिपात्रंतपोब्रह्मचक्षीरम् दैत्यानांविरोचनोवत्सःद्विमूर्धादोग्धाआयसंपात्रंमायाक्षीरम् राक्षसानां सुमालीवत्सःजतुनाभोदोग्धाकपालंपात्रंरुधिरंक्षीरम् अद्रीणांहिमवान्वत्सःमेरुर्दोग्धाशिलामयंपात्रंमहौषधीरत्नंचक्षीरम् गंधर्वाणांचित्ररथोवत्सःविश्वावसुर्दोग्धापद्मंपात्रंगंधःक्षीरम् उरगा णांतक्षकोवत्सःधृतराष्ट्रोदोग्धाअलाबुपात्रंविषंक्षीरम् यक्षाणांकुबेरोवत्सःसुकर्णोदोग्धाआमंमृन्मयंपात्रंअंतर्धानंक्षीरम् पितॄणांयमोवत्सःअंतकोदोग्धाराजतंपात्रंसुधाक्षीरम् तरूणांप्लक्षोव त्सःशालवृक्षोदोग्धापालाशंपात्रंछिन्नप्ररोहणंक्षीरंइत्ययंक्रमोहरिवंशादिषुज्ञेयः ९१ धात्रीमाता विधात्रीकर्त्री धरणीआधारः पोषणीपोष्ट्री सर्वस्यजगतइतिपूर्वार्धेनान्वयः पादतलोद्भवापा दस्वरूपोद्भवा तलंचाधःस्वरूपयोरित्यमरः ९२ ९३ फलदायिनप्रजायतेनइयतीत्यर्थः ९४ ९५। इतिश्रीवैष्णवाकूतचंद्रिकायांप्रथमेअंशेत्रयोदशोध्यायः १३ चतुर्दशेध्रुवस्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तोवंशोयत्रप्रचेतसः अब्धौतस्वाहरिस्तुत्वाप्रजावृद्धिवरैर्युताः १ अंतर्द्धिरेवांतर्धानस्तस्माच्छिखंडिनीभार्याहविर्धानंपुत्रमसूत १ आग्नेयीअग्निवंशजाधिषणानाम्नी २ प्राचीनबर्हि
र्महान्पितुःसकाशादेवमहत्त्वमेवाह येनेति ३ नामनिर्वचनमाह प्राचीनाग्राःकुशाइति सर्वत्रयज्ञानुष्ठानात् ४ महतस्तपसःपारेसमाधौसत्यांसवर्णायांकृतदारःतथानंतरमेवतांपरि
णीतवानित्यर्थः तमसःपारइतिपाठेपुत्रोत्पत्त्यातमसोनरकात्तरणनिमित्तामित्यर्थः तमसस्तमःसदृशस्यसमुद्रस्यपारेपारभूमाविति केचित् ५ महीपतेस्तस्मादृशपुत्रानाधत्तेत्यन्वयः नामनाम्ना

हविर्धानात्षडाग्नेयीधिषणाजनयत्सुतान् । प्राचीनबर्हिषंशुक्रंगयंकृष्णंव्रजाजिनौ २ प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः । हविर्धानान्महारा
जोयेनसंवर्धिताःप्रजाः ३ प्राचीनाग्राःकुशास्तस्यपृथिव्यामभवन्मुने । प्राचीनबर्हिरभवत्ख्यातोभुविमहाबलः ४ समुद्रतनयायांतुकृतदारो
महीपतिः । महतस्तपसःपारेसवर्णायांमहीपतेः ५ सवर्णाधत्तसामुद्रीदशप्राचीनबर्हिषः । सर्वेप्रचेतसोनामधनुर्वेदस्यपारगाः ६ अपृथग्ध
र्मचरणास्तेतप्यंतमहत्तपः । दशवर्षसहस्राणिसमुद्रसलिलेशयाः ७ । । मैत्रेयउवाच । । किमर्थंतेमहात्मानस्तपस्तेपुर्महामुने । प्रचेतसः
समुद्रांभस्येतदाख्यातुमर्हसि ८ । । पराशरउवाच । । पित्राप्रथमतःप्रोक्ताःप्रजार्थममितात्मना । प्रजापतिनियुक्तेनबहुमानपुरःसरम् ९
ब्रह्मणादेवदेवेनसमादिष्टोस्म्यहंसुताः । प्रजाःसंवर्धनीयास्तेमयाचोक्तंतथेतितत् १० तन्ममप्रीतयेपुत्राःप्रजावृद्धिमतंद्रिताः । कुरुध्वंमाननीयाच
सम्यगाज्ञाप्रजापतेः ११ ततस्तेतत्पितुःश्रुत्वावचनंनृपनंदनाः । तथेत्युक्त्वाचतंभूयःपप्रच्छुःपितरंमुने १२ प्रचेतसऊचुः । येनतातप्रजावृद्धौस
मर्थाःकर्मणावयम् । भवेमतत्समस्तंनःकर्मव्याख्यातुमर्हसि १३ प्राचीनबर्हिरुवाच । आराध्यवरदंविष्णुमिष्टप्राप्तिमसंशयम् । समेतिनान्यथाम
र्त्यःकिमन्यत्कथयामिवः १४ तस्मात्प्रजाविवृद्ध्यर्थंसर्वभूतप्रभुंहरिम् । आराधयतगोविंदंयदिसिद्धिमभीप्सत १५ धर्ममर्थंचकामंचमोक्षंचान्विच्छ
तासदा । आराधनीयोभगवाननादिःपुरुषोत्तमः १६ यस्मिन्नाराधितेसर्गंचकारादौप्रजापतिः । तमाराध्याच्युतंवृद्धिःप्रजानांवोभविष्यति १७
इत्येवमुक्तास्तेपित्रापुत्राःप्रचेतसोदश । मग्नाःपयोधिसलिलेतपस्तेपुःसमाहिताः १८ दशवर्षसहस्राणिन्यस्तचित्ताजगत्पतौ । नारायणेमुनिश्रेष्ठ
सर्वलोकपरायणे १९ तत्रैवतेस्थितादेवमेकाग्रमनसोहरिम् । तुष्टुवुर्यःस्तुतःकामान्स्तोतुरिष्टान्प्रयच्छति २० मैत्रेयउवाच । स्तवंप्रचेतसोविष्णोः

प्रचेतसः ६ अपृथग्धर्मचरणाःसमानधर्मचारिणः एतच्चतेषांवक्ष्यमाणमेकपत्नीकत्वंसंभावयितुमुक्तम् समुद्रसलिलेशयास्तस्मिन्मग्नाःसंतः ७ ८ प्रथमतस्तपसःपूर्वम् ९ प्रजापतिनियो
गमेवाह ब्रह्मणेति तेत्वयाप्रजाःसंवर्धनीयाइति १० नकेवलंमत्प्रीतयेप्रजापतेर्मांप्रतियाज्ञासाचभवद्भिर्माननीयेत्यर्थः ११ १२ १३ १४ १५ १६ यस्मिन्नाराधितेयमाराध्येत्यर्थः त
माराध्येतिभिन्नकर्तृकोपिकचित्क्त्वाप्रत्ययः यद्वा तमाराध्यस्थितानामितिशेषः १७ १८ १९ तत्रैवसमुद्रांभस्येव योहरिः २० प्राचेतसाइतिपाठेस्वार्थेतद्धितः यंस्तवंचक्रुस्तमेववक्तुमर्हसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थः २१ नतपोभिर्यदातुष्टस्तदासगुणानिर्गुणैः स्तवैराराधितोविष्णुराविरासीत्प्रचेतसाम् २२ तत्रजगत्कारणतयाप्रणमंति नताःस्मेतिद्वाभ्याम्प्रतिष्ठासमन्वयः अपिवात्स्यायनादीनांब्रह्म ण्येवसमन्वयइतिवचनाद्द्वितीयाभावाच्च शाश्वतीनियता २३ अनौपम्यंज्योतिःसूर्याद्युपमाशून्यंचिद्रूपमितियावत् अनंतरंनिर्भेदम् अपारवदवधिशून्यम् २४ कालरूपेणप्रणमंतिय स्याहरिति प्रथमंमुख्यंअरूपस्यपरमार्थतः २६ विश्वरूपेणप्रणमंतिभुज्यतइतिदशभिः सुधात्मकःअमृतमयःजीवभूतःओषध्याद्यात्मनाजीवनरूपः २६ अत्तिनाशयति धर्मादयऋतुत्रयो पलक्षणानितेनग्रीष्मादियोनिरित्यर्थः २७ स्वकार्यापेक्षयामहत्परिमाणत्वाद्व्यापी शब्दादीनांपंचानांगुणानामाश्रयः २८ योनिभूतंशोणितरूपेण बीजंशुक्ररूपेण २९ हव्यभुग्देवानांमु

समुद्रांभसिसंस्थिताः। चक्रुस्तंमेमुनिश्रेष्ठसुपुण्यंवक्तुमर्हसि २१ पराशरउवाच। शृणुमैत्रेयगोविंदंयथापूर्वंप्रचेतसः। तुष्टुवुस्तन्मयीभूताःसमुद्रस लिलेशयाः २२ प्रचेतसऊचुः। नताःस्मसर्ववचसांप्रतिष्ठायत्रशाश्वती। तमाद्यंतमशेषस्यजगतःपरमंप्रभुम् २३ ज्योतिराद्यमनौपम्यमनंतरमपा रंवत्। योनिभूतमशेषस्यस्थावरस्यचरस्यच २४ यस्याहःप्रथमंरूपमरूपस्यतथानिशा। संध्याचपरमेशस्यतस्मैकालात्मनेनमः २५ भुज्यतेनु दिनंदेवैःपितृभिश्चसुधात्मकः। जीवभूतःसमस्तस्यतस्मैसोमात्मनेनमः २६ यस्तमांस्यत्तितीव्रात्मास्वभाभिर्भासयन्नभः। घर्मशीतांभसांयोनि स्तस्मैसूर्यात्मनेनमः। २७ काठिन्येनयोबिभर्तिजगदेतदशेषतः। शब्दादिसंश्रयोव्यापीतस्मैभूम्यात्मनेनमः २८ यद्योनिभूतंजगतोबीजंयत्सर्वदे हिनाम्। तत्तोयरूपमीशस्यनमामोहरिमेधसः २९ योमुखंसर्वदेवानांहव्यभुक्कव्यभुक्तथा। पितृणांचनमस्तस्मैविष्णवेपावकात्मने ३० पंचधा वस्थितोदेहेयश्चेष्टांकुरुतेनिशम्। आकाशयोनिर्भगवांस्तस्मैवाय्वात्मनेनमः ३१ अवकाशमशेषाणांभूतानांयःप्रयच्छति। अनंतमूर्तिमाञ्शुद्धस्त स्मैव्योमात्मनेनमः ३२ समस्तेंद्रियवर्गैश्चयःसदास्थानमुत्तमम्। तस्मैशब्दादिरूपायनमःकृष्णायवेधसे ३३ गृह्णातिविषयान्नित्यमिंद्रियात्माक्ष राक्षरः। यस्तस्मैज्ञानभूतायनताःस्महरिमेधसे ३४ गृहीतानींद्रियैरर्थानात्मनेयःप्रयच्छति। अंतःकरणभूतायतस्मैविश्वात्मनेनमः ३५ यस्मिन्ननं तेसकलंविश्वंयस्मात्तथोद्गतम्। लयस्थानंचयस्तस्मैनमःप्रकृतिधर्मिणे ३६ शुद्धःसंलक्ष्यतेभ्रांत्यागुणवानिवयोगुणः। तमात्मरूपिणंदेवंनताःस्मपु

खम् कव्यभुक्पितृणांमुखम् ३० पंचधाप्राणादिरूणेप आकाशयोनिराकाशकारणकः भगवान्वीर्यवान् ३१ अनंताघटादिमूर्तयोव्याप्यतयासंतियस्यसः व्यापकइत्यर्थः ३२ स्थान मालंबनंविषयइत्यर्थः ३३ इंद्रियात्माइंद्रियस्वरूपः क्षरःस्थूलदेहावच्छेदेन अक्षरोलिंगदेहस्थत्वेन ज्ञानभूतायशब्दादिज्ञानसाधनाय ३४ गृहीतानिति अयंभावः अर्थसंनिकृष्टेनेंद्रि येणांतःकरणसंबंधादर्थाकारवृत्तिर्भवतितद्वृत्तिस्थमात्मार्थमात्मासाक्षात्करोतीति अंतःकरणरूपायमनोहंकारबुद्धिचित्तरूपाय ३५ प्रधानरूपेणप्रणमंति यस्मिन्निति प्रकृतिधर्माःसत्त्वादयः संत्यस्मिन्निति प्रकृतिधर्मातस्मै ३६ पुरुषरूपेणप्रणमंति शुद्धइति शुद्धोवस्तुतः अगुणोपिगुणवानिवतेष्वासक्तइवभ्रांत्याप्रकृतिच्छायापत्तिदृष्ट्यालक्ष्यते आत्मरूपिणंजीवस्वरूपम् ३७ शु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धरूपंप्रणमंतिअविकारमितिषड्भिः शुद्धंस्वभावतः एवंनिर्मलंनिरंजनंआगंतुकमलहीनंप्रधानात्परमंब्रह्मयदितिविशिष्यनिर्देश्य ३८ तत्कुतःनिषेधशेषत्वेनैवप्रतीतेरित्याह अदीर्घमित्या दि अनण्वग्र्यमत्यणु अतनुमशरीरम् अशरीरिणंजीवंअसमीरणामितिपाठेअवायुम् ३९ ४० अनिद्रंअवस्थाहीनम् ४१ अप्लुतंगतिशून्यम् पूर्वापरेदिक्कालकृते ४२ परंनिरुपाधिकम पीशत्वगुणवत्स्वभाविकषड्गुणैश्वर्ययुक्तम् माययासर्वभूतमपिअसंश्रयिनिराधारम् अतएवजिह्वायादृशश्चगोचरेयत्नभवतितत्नताःस्म ४३ तत्समाधयःतस्मिन्नेवसमाधिश्चित्तैकाग्र्यंये

रुषोत्तमम् ३७ अविकारमजंशुद्धंनिर्गुणंयन्निरंजनम्। नताःस्मतंपरंब्रह्मविष्णोर्यत्परमंपदम् ३८ अदीर्घंह्रस्वमस्थूलमनण्वग्र्यमलोहितम्। अस्ने हच्छायमतनुमसक्तमशरीरिणम् ३९ अनाकाशमसंस्पर्शमगंधमरसंचयत्। अचक्षुःश्रोत्रमचलमवाक्घ्राणममानसम् ४० अनामगोत्रमसुखमतेज स्कमहैतुकम्। अभयंभ्रांतिरहितमनिद्रमजरामरम् ४१ अरजोशब्दमव्यक्तमप्लुतंयदसंवृतम्। पूर्वापरेनवैयस्मिंस्तद्विष्णोःपरमंपदम् ४२ परमीश त्वगुणवत्सर्वभूतमसंश्रयि। नताःस्मतत्पदंविष्णोर्जिह्वादृग्गोचरेनतत् ४३ एवंप्रचेतसोविष्णुंस्तुवंतस्तत्समाधयः। दशवर्षसहस्राणितपश्चेरुर्महार्ण वे ४४ततःप्रसन्नोभगवांस्तेषामंतर्जलेहरिः। ददौदर्शनमुन्निद्रनीलोत्पलदलच्छविः ४५ पतत्रिराजमारूढमवलोक्यप्रचेतसः। प्रणिपेतुःशिरोभिस्तं भक्तिभारावनामितैः ४६ ततस्तानाहभगवान्व्रियतामीप्सितोवरः। प्रसादसुमुखोऽहंवोवरदःसमुपस्थितः ४७ ततस्तमूचुर्वरदंप्रणिपत्यप्रचेतसः। यथापित्रासमादिष्टंप्रजानांवृद्धिकारणम् ४८ सचापिदेवस्तंदत्त्वायथाभिलषितंवरम्। अंतर्धानंजगामाशुतेचनिश्चक्रमुर्जलात् ४९ । इतिश्री विष्णुपुराणेप्रथमेअंशेचतुर्दशोध्यायः १४ । पराशरउवाच । । तपश्चरत्सुपृथिवींप्रचेतस्सुमहीरुहाः। अरक्ष्यमाणामावव्रुर्बभूवाथप्रजाक्षयः १ नाशकन्मारुतोवातुंवृत्तंस्वमभवद्रुमैः। दशवर्षसहस्राणिनशेकुश्चेष्टितुंप्रजाः २ तद्दृष्ट्वाजलनिष्क्रांताःसर्वेक्रुद्धाःप्रचेतसः। मुखेभ्योवायुमग्निं चतेसृजञ्जातमन्यवः ३ उन्मूलानथतान्वृक्षान्कृत्वावायुरशोषयत्। तानग्निरदहद्घोरस्तत्राभूद्रुमसंक्षयः ४ द्रुमक्षयमथोदृष्ट्वाकिंचिच्छिष्टेषुशाखिषु। उपगम्याब्रवीदेतान्राजासोमःप्रजापतीन् ५ कोपंयच्छतराजानःशृणुध्वंचवचोमम । संधानंवःकरिष्यामिसहक्षितिरुहैरहम् ६ रत्नभूताचकन्ये

षांते ४४ ४५ भक्तिभारैरिवावनतैः ४६ ४७ ४८ ४९ इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांप्रथमेअंशेचतुर्दशोध्यायः १४ । । सोपाख्यानंजन्मवाक्ष्यास्त स्यांदक्षस्यसंभवम् प्रचेतोभ्यःपंचदशेदक्षात्सृष्टिंततोब्रवीत् तपश्चरत्सुप्रचेतस्सुसत्सुतत्पितीरचनारदोपदेशात्तत्त्वज्ञानंप्राप्यराज्यंत्यक्त्वावनंगतेसतीतिद्रष्टव्यम् उक्तंचभागवतेपुरंजनो पाख्यानप्रस्तावे प्राचीनवर्हिषंक्षत्तःकर्मस्वासक्तमानसम् नारदोध्यात्मतत्त्वज्ञःकृपालुःप्रत्यबोधयदित्यादिना अतोऽरक्ष्यमाणांपृथिवींकर्षणाद्यभावान्महीरुहाआवव्रुः १ २ क्रुद्धाबभूवुः ततःकिमतआह जातमन्यवश्चसंतोवायुमग्निंचासृजन्नित्यर्थः ३ वाय्वग्निसृष्टेःप्रयोजनमाह उन्मूलानिति ४ राजादक्षाणांप्रजापतीनित्यनेनकंदमूलफलादिभिःप्रजावृद्धिहेतूनांदक्षाणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाहःप्रजापालकानांयुष्माकमनुचितइतिसामोपायःसूचितः ५ यच्छतानियमयत ६ संधानमेवाह रत्नभूतेति वार्क्षेयीवृक्षापत्यम् भविष्यंइयंदक्षप्रचेतसांपत्नीदक्षस्यचमाताभाविष्यतीत्या दिकम् गोभिःरश्मिभिः ७ नाम्नामारिषा वृक्षाणामेषाकन्येतिनामप्रसिद्धानिर्मिताविधात्राकल्पिता ८ युष्माकंयत्तपोरूपमुग्रंतेजःतस्यार्धेनभागेनअस्यांसंवर्धनकालेयद्रश्मिरूपंममतेजस्त स्याप्यर्धेनास्यामेवदक्षोनामोत्पत्स्यतइत्यर्थः ९ एवंचममसौम्येनांशेनयुष्मत्तेजोमयेनचाग्निनासंयुक्तोग्नीषोमात्मकःसन्नग्निसमोऽप्रधृष्योभूत्वाप्रजाःसंवर्धयिष्यतीत्यर्थः यद्वाअग्निश्चनाग्निरनु

यंवार्क्षेयीवरवर्णिनी । भविष्यंजानतापूर्वंमयागोभिर्विवर्धिता ७ मारिषानामनाम्नैषावृक्षाणामितिनिर्मिता । भार्यावोस्तुमहाभागाध्रुवंवंशविवर्धिनी ८ युष्माकंतेजसोऽर्धेनममचार्धेनतेजसः । अस्यामुत्पत्स्यतेविद्वान्दक्षोनामप्रजापतिः ९ ममचांशेनसंयुक्तोयुष्मत्तेजोमयेनवै । अग्निनाग्निसमोभूयः प्रजाःसंवर्धयिष्यति १० कंडुर्नाममुनिःपूर्वमासीद्वेदविदांवरः । सुरम्येगोमतीतीरेसतेपेसुमहत्तपः ११ तत्क्षोभायसुरेंद्रेणप्रम्लोचाख्यावराप्स राः । प्रयुक्ताक्षोभयामासतमृषिंसाशुचिस्मिता १२ क्षोभितःसतयासार्धंवर्षाणामधिकंशतम् । अतिष्ठन्मंदरद्रोण्यांविषयासक्तमानसः १३ सातंप्राहमहाभागंगंतुमिच्छाम्यहंदिवम् । प्रसादसुमुखोब्रह्मन्ननुज्ञांदातुमर्हसि १४ तयैवमुक्तःसमुनिस्तस्यामासक्तमानसः । दिना निकतिचिद्भद्रेस्थीयतामित्यभाषत १५ एवमुक्ततस्तेनसाग्रंवर्षशतंपुनः । बुभुजेविषयांस्तन्वीतेनसार्धंमहात्मना १६ अनुज्ञांदेहि भगवन्व्रजामित्रिदशालयम् । उक्तस्तयेतिसपुनःस्थीयतामित्यभाषत १७ पुनर्गतेवर्षशतेसाधिकेसाशुभानना । यामीत्याहदिवंब्रह्मन्प्रणया त्स्मितशोभनम् १८ उक्तस्तयैवंसमुनिरुपगुह्यायतेक्षणाम् । प्राहास्यतांक्षणंसुभ्रुचिरकालंगमिष्यसि १९ तच्छापभीतासुश्रोणीसहतेनर्षिणापु नः । शतद्वयंकिंचिदूनंवर्षाणामन्वतिष्ठत २० गमनायमहाभागोदेवराजनिवेशनम् । प्रोक्तःप्रोक्तस्तयातन्व्यास्थीयतामित्यभाषत २१ तंसाशा पभयाद्भीतादाक्षिण्येनचदक्षिणा । प्रोक्ताप्रणयभंगार्तिवेदिनीनजहौमुनिम् २२ तयाचरमतस्तस्यपरमर्षेरहर्निशम् । नवंनवमभूत्प्रेममन्मथाकृष्ट चेतसः २३ एकदातुत्वरायुक्तोनिश्चक्रामोटजान्मुनिः । निष्क्रामतश्चकुत्रेतिगम्यतेप्राहसाशुभा २४ इत्युक्तःसतयाप्राहपरिवृत्तमहःशुभे । संध्यो पास्तिंकरिष्यामिक्रियालोपोन्यथाभवेत् २५ ततःप्रहस्यमुदितातंसाप्राहमहामुनिम् । किमद्यसर्वधर्मज्ञपरिवृत्तमहस्तव २६ बहूनांविप्रवर्षाणांपरिणा

ष्णःसोमश्चतौअग्निनाग्नीअग्नीषोमाविति यावत् ताभ्यांसमइति १० कन्याकुलज्ञप्यैतज्जन्मकथयतिकंडुर्नामेति ११ तस्यकंडोःक्षोभायचित्तविकाराय १२ शतंततोधिकंच १३ १४ कतिचिदन्यानि १५ १६ १७ प्रणयात्स्नेहात् स्मितशोभनंयथास्यात् १८ उपगुह्यप्राहेत्यनेनसंभोगांतरेनुरागाधिक्यंसूचयति चिरकालंगमिष्यसीति गतासतीशीघ्रंनाग मिष्यसीत्यर्थः यद्वाचिरकालंतत्रवस्तुंगमिष्यासि १९ २० देवराजनिवेशनंप्रतिगमनाय २१ दाक्षिण्येनेतियागौरवंभयंप्रेमसद्भावंपूर्वनायके नमुंचत्यन्यसक्तापिसाज्ञेयादाक्षिणाबुधैरित्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तादक्षिणातस्याभावोदाक्षिण्यंतेन प्रणयभंगेनयाआर्तिस्तद्वेदिनीनजहौ २२ प्रेमस्नेहःनवंनवमभूत् २३ उटजात्पर्णशालायाः २४ परिवृत्तंपरिणतम् २५ विस्मयेनप्रहस्य सर्वधर्मज्ञेति बहुकृत्यविस्मरणोपालंभेनसंबोध्याकिमद्यतवाहःपरिवृत्तमित्याह २६ विस्मयहेतुंस्वयमेवस्फुटयति बहूनामिति एतद्बहुवर्षैःपरिणामंगतंतवातिदीर्घमहःकस्यविस्मयंनकुरुते बहूनांवर्षाणां परिणामंपाकंगतंतवाहरतिदीर्घमेतद्यदिकथ्यतेतदाकस्यविस्मयंनकुरुतेबहूनांवर्षाणामंतइत्यध्याहारेसुकरैवयोजना २७ २८ सद्भावःपरमार्थः २९ प्रत्यूषसिप्रभाते यस्मिन्प्रत्युषः

ममहस्तव । गतमेतन्नकुरुतेविस्मयंकस्यकथ्यताम् २७ । मुनिरुवाच । । प्रातस्त्वमागताभद्रेनदीतीरमिदंशुभम् । मयादृष्टासितन्वंगिप्र विष्टाचममाश्रमम् २८ इयंचवर्ततेसंध्यापरिणाममहोगतम् । अवहासःकिमर्थोयंसद्भावःकथ्यतांमम २९ प्रम्लोचोवाच । प्रत्युषस्यागताब्रह्मन्सत्यमे तन्नतेमृषा । किंत्वद्यतस्यकालस्यगतान्यब्दशतानिमे ३० । सोमउवाच । । ततःससाध्वसोविप्रस्तांपप्रच्छायतेक्षणाम् । कथ्यतांभीरुकःकाल स्त्वयामेरमतःसह ३१। प्रम्लोचोवाच । सप्तोत्तराण्यतीतानिनववर्षशतानिते । मासाश्चषट्तथैवान्यत्समतीतंदिनत्रयम् ३२ ऋषिरुवाच ।सत्यं भीरुवदस्येतत्परिहासोथवाभवेत् । दिनमेकमहंमन्येत्वयासार्धमिहोषितम् ३३ । प्रम्लोचोवाच । वदिष्याम्यनृतंब्रह्मन्कथमत्रतवांतिके । वि शेषेणाद्यभवताप्टष्टामार्गानुवर्तिना ३४ । सोमउवाच । ।निशम्यतद्वचस्तस्याःसमुनिर्नृपनंदनाः । धिग्धिङन्नामित्यतीवेत्थंनिनिंदात्मानमात्म ना ३५ । मुनिरुवाच । । तपांसिममनष्टानिहतंब्रह्मविदांधनम् । हृतोविवेकःकेनापियोषिन्मोहायकल्पिता ३६ ऊर्मिषट्कातिगंब्रह्मज्ञेयमात्मज येनमे । गतिरेषाहृतायेनाधिक्तंकाममहाग्रहम् ३७ व्रतानिवेदविद्याप्तिकारणान्यखिलानिच । नरकग्राममार्गेणसंगेनापहृतानिमे ३८ विनिंद्येत्थं सधर्मज्ञःस्वयमात्मानमात्मना । तामप्सरसमासीनामिदंवचनमब्रवीत् ३९ गच्छपापेयथाकामंयत्कार्यंतत्कृतंत्वया । देवराजस्यमत्क्षोभंकुर्वत्या भावचेष्टितैः ४० नत्वांकरोम्यहंभस्मक्रोधतीव्रेणवह्निना । सतांसप्तपदंमैत्रमुषितोहंत्वयासह ४१ अथवातवकोदोषःकिंवाकुप्याम्यहंतव । ममै वदोषोनितरांयेनाहमजितेंद्रियः ४२ ययाशक्रप्रियार्थिन्याकृतोमेतपसोव्ययः । त्वयाधिक्तांमहामोहमंजूषांसुजुगुप्सिताम् ४३ । सोमउवाच ।

कालेअहमागतातस्यकालस्यतंकालमवधिंकृत्वेत्यर्थः ३० तावत्कालक्रियालोपभयेनससाध्वसोविप्रःपप्रच्छकःकालःकियान्गतःकालः ३१ ३२ इहोषितमत्रस्थितम् ३३ मार्गानु वर्तिनामुनिधर्मचिकीर्षुणाकर्मलोपभयाद्विशेषेणतत्त्वबुभुत्सयापृष्टासती ३४ धिग्धिक्मामितिगर्हायांधिगित्यव्ययंतद्योगेचद्वितीया ३५ ब्रह्मविदांवेदज्ञानांधनंधैर्यंतच्चहृतंनष्टम् यद्वा वि दांज्ञानिनांधनंब्रह्महृतंविस्मृतम् विवेकःसदसद्विभाजकंज्ञानम् ३६ ऊर्मिषट्कंक्षुत्तृष्णेशोकमोहौजराम्रृत्यूचतदतिक्रम्यस्थितंतदसंस्पृष्टंब्रह्ममेमयाययागत्याज्ञेयंएषागतिर्हृतायेनतम् मति रितिपाठेसएवार्थः ३७ वेदात्मिकायाविद्यातत्प्राप्तिकारणानिव्रतानिब्रह्मचर्यादीनि नरकस्यग्रामःसमूहः किंवासएवग्रामोवसतिस्थानम् ३८ ३९ देवराजस्ययत्कार्यंतत्त्वयाभावगर्भै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेष्ठितैर्मत्क्षोभंकुर्वत्याकृतमित्यन्वयः ४० मार्गेसप्तपदानिसंगच्छतांसतांमैत्रंप्रसिद्धंकिंपुनरहंत्वयासहबहुकालमुषितःअतःशापाग्निनानाहंभस्मीकरिष्यामीत्यन्वयः ४१ ४२ बुद्धि पूर्वकंममक्षोभार्थंत्वयाआगतमितितामेवनिंदति ययेति ययात्वयाशक्रप्रियमुद्दिश्यममतपसोभोगादिनाव्ययःक्षयःकृतोतस्त्वांमोहस्यमंजूषांपेटिकांधिगित्यन्वयः ४३ गलंतिस्वेदजलानिघ र्मबिंदवोयस्याःसा अतिशयेनवेपथुःकंपोयस्याःतथाभूताचबभूव ४४ गात्रमेवलतास्विन्नागात्रलतायस्यास्ताम् ४५ प्रकृतंवृक्षकन्यात्वेहेतुमाह सातुनिर्भर्त्सितेतिषड्भिः ४६ ४७ समाहि तोनिषिक्तःसगर्भःरोमभ्योंचातिगच्छतीतिरोमांचःसचासौस्वेदरूपीचतथा यद्वासरोमांचोयःस्वेदस्तद्रूपीअतोयोनिद्वारंविनैवस्वेदरूपेणगर्भोनिर्गतइतिअयोनिजासेतिभावः ४८ ४९ पूर्वो क्तमेववृक्षैःसहसंधानंनिगमयति वृक्षाग्रमेवगर्भआधारस्थानं ततःसंभूताम् ५० ५१ तर्हियोगभ्रष्टस्यकन्येयमित्यनादरंनिराकर्तुंपुनःकंडोर्योगप्रभावमाह सचापीतिसार्धद्वाभ्याम् ५२ ब्रह्म पारमयंब्रह्मशब्दपारशब्दप्रचुरंजपंयद्वाब्रह्मणोवेदस्यपारोंतोवेदांतस्तन्मयंतत्परिणामभूतम् ५३ ५४ आराध्यतआराधितः ५५विघ्नेतपसिनिर्विघ्नंदृष्ट्वैवाराधनंहरेः ब्रह्मपारेणतंस्तुत्वाकंडुराया

यावदित्थंसविप्रर्षिस्तांब्रवीतिसुमध्यमाम् । तावद्गलत्स्वेदजलासाबभूवातिवेपथुः ४४ प्रवेपमानांसतुतांस्विन्नगात्रलतांसतीम् । गच्छगच्छेतिसक्रो धमुवाचमुनिसत्तमः ४५ सातुनिर्भर्त्सितातेनविनिष्क्रम्यतदाश्रमात् । आकाशगामिनीस्वेदंममार्जतरुपल्लवैः ४६ वृक्षाद्वृक्षंययौबालातदग्रारुण पल्लवैः । निर्मार्जमानागात्राणिगलत्स्वेदजलानिवै ४७ ऋषिणायस्तदागर्भस्तस्यादेहेसमाहितः । निर्जगामसरोमांचस्वेदरूपीतदंगतः ४८ तंवृ क्षाजगृहुर्भर्गमेकंचक्रेचमारुतः । मयाचाप्यायितोगोभिःसतदावृधेशनैः ४९ वृक्षाग्रगर्भसंभूतामारिषाख्यावरांगना । तांप्रदास्यंतिवोवृक्षाःकोपए षप्रशाम्यताम् ५० कंडोरपत्यमेवंसावृक्षेभ्यश्चसमुद्गता । ममापत्यंतथावायोःप्रम्लोचातनयाचसा ५१ सचापिभगवान्कंडुःक्षीणेतपसिसत्तमाः । पुरुषोत्तमाख्यंमैत्रेयविष्णोरायतनंययौ ५२ तत्रैकाग्रमतिर्भूत्वाचकाराराधनंहरेः । ब्रह्मपारमयंकुर्वञ्जपमेकाग्रमानसः ५३ ऊर्ध्वबाहुर्महायोगीस्थि त्वासौनृपनंदनाः ५४ । प्रचेतसऊचुः । ब्रह्मपारंमुनेश्रोतुमिच्छामःपरमंस्तवम् । जपताकंडुनादेवोयेनाराध्यतकेशवः ५५ पारंपरंविष्णुरपार

त्परांगतिम् पारंपरमितिश्लोकत्रयेणस्तुत्वाचतुर्थेनरागादिदोषोपशमःप्रार्थ्यते पारंपरमित्यादिरूपोयोविष्णुःसोसौपुरुषोत्तमइत्युत्तरेणान्वयः किंभूतःपारंसंसाराध्वनोवधिः षंढत्वमार्षम् प रंनिरतिशयंआवृत्तिशून्यम् तथाचभगवद्गीता यद्गत्वानानिवर्ततेतद्धामपरमंममेति सोध्वनःपारमाप्नोति तद्विष्णोःपरमंपदमितिश्रुतिश्च ऐकपद्यंवा परंपरयागुरुसंप्रदायरूपयोपदेश्यंवस्तुपा रंपरम् तद्धेतद्ब्रह्माप्रजापतयेउवाचप्रजापतिर्मनवेमनुःप्रजाभ्यइतिछांदोग्यश्रुतेः विष्णुर्व्यापनशीलः ततःस्तुतेःप्रयोजनमाह अपारपारःपारःसंसारतरणंनविद्यतेयेषांतेऽपाराःसंसारिणःतान्पा रयतिसंसारात्तारयतीतितथा किंवाअपारोदुष्प्रापःपारःसमाप्तिःकाष्ठायस्यसः पारतीरसमाप्ताविति धातोः तत्कुतःपरःपरेभ्यःआकाशादिभ्यःपरःश्रेष्ठोनंतइत्यर्थः महतोमहानितिश्रुतेः अ तएवपरमार्थरूपीसत्यस्वरूपः यद्वा परमार्थःपरमपुरुषार्थःपरमानंदइतियावत् सएवरूपीपुरुषोत्तमरूपी परमात्मरूपीतिपाठःसुगमः ननुतस्यदुष्प्रापत्वेकथंपरमार्थरूपत्वंकथंवासोध्व नःपारमाप्नोतीतिश्रुतिस्तत्राह सविष्णुर्ब्रह्मणावेदेनपारःप्राप्तुंशक्यः तंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेः यद्वा ब्रह्मवेदस्तपोवातत्सहितास्तन्निष्ठास्तेषांपारःप्राप्तुंशक्यः तत्कुतःपरपारभू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तःपरस्यानात्मनःप्रपंचस्यपारभूतःअवधिभूतः निषेधशेषइत्यर्थः यद्वापरस्यब्रह्मायुषःपारेसमाप्तावपिभूतःसत्यःअविनाशीनित्यइत्यर्थः तत्रहेतुः परःपराणामपीति पराणामात्मत्वेनप्रतीता नामिंद्रियादीनांपरःनिरुपाधिःपरमात्मा इंद्रियाणिपराण्याहुरित्यादिगीतोक्तेः अयंभावः मण्यादिवदतिदूरत्वादिनानाप्राप्यत्वमात्मनःकिंत्वज्ञानतत्कार्यव्यवधानमात्रंतच्चतपोविशुद्धांतःकरणै र्वेदांतोत्पन्नज्ञानेननिरस्यात्माप्राप्तुंशक्यइति ततोनिरुपाधित्वेनपरमेश्वरत्वात्पारपारः पारश्चासौपारश्चसतथा पृपालनपूरणयोरितिधातोरूपे स्वभक्तानांपालनाद्वैरःपूरणाच्चपारपारःयद्वा पाराणांपालकानांवैरःपूरकाणांचब्रह्मादीनांपारःपालकःपूरकश्च ५६ तदेवंविशुद्धरूपेणस्तुत्वासर्वात्मत्वेनस्तौति सकारणमिति सविष्णुःकारणंकारणसंश्रितोपिकारणेनापिस्वहेतुतयासांश्रि तःकारणतस्ततोपीतिपाठेषष्ठ्यर्थेतसिःकारणतःकारणस्ययत्कारणंततोपितस्यापिकारणंतस्यापिहेतुरित्याद्यावृत्त्याचरमकारणमारभ्यादिकारणपर्यंतंकारणपरंपरासएवेत्युक्तम् एवंकार्येषुचका र्यपरंपरापि हइत्यवधारणे सएवतथाकर्माणिक्रियाःकर्तारश्चतद्रूपैरशेषैःसर्वैरवतीत्युपलक्षणंसृजतिसंहरतिच तत्तदनुकूलयत्नवान्भवतीत्यर्थः अयंभावः कारणानिअपादानादीनिकार्या

पारःपरःपरेभ्यःपरमार्थरूपी । सब्रह्मपारःपरपारभूतःपरःपराणामपिपारपारः ५६ सकारणंकारणसंश्रितोपितस्यापिहेतुःपरहेतुहेतुः । कार्येषुचैवं सहकर्मकर्तृरूपैरशेषैरवतीहसर्वम् ५७ ब्रह्मप्रभुर्ब्रह्मससर्वभूतोब्रह्मप्रजानांपतिरच्युतोसौ । ब्रह्माव्ययंनित्यमजंसविष्णुरपक्षयाद्यैरखिलैरसंगि । ५८ ब्रह्माक्षरमजंनित्यंयथासौपुरुषोत्तमः । तथारागादयोदोषाःप्रयांतुप्रशमंमम ५९ एवंब्रह्मपराख्यंवैसंस्तवंपरमंजपन् । अवापपरमांसिद्धिंस समाराध्यकेशवम् ६० इयंचमारिषापूर्वमासीद्यातांब्रवीमिवः । कार्यगौरवमेतस्याःकथनेफलदायिवः ६१ अपुत्राप्रागियंविष्णुंमृतेभर्तरिसत्तमाः भूपपत्नीमहाभागातोषयामासभक्तितः ६२ आराधितस्तयाविष्णुःप्राहप्रत्यक्षतांगतः । वरंवृणीष्वेतिशुभासाचप्राहात्मवांछितम् ६३ भगवन् बालवैधव्यावृथाजन्माहमीदृशी । मंदभाग्यासमुद्भूताविफलाचजगत्पते ६४ भवंतुपतयःश्लाघ्याममजन्मनिजन्मनि । त्वत्प्रसादात्तथापुत्रःप्रजाप

णिसृज्यादीनिक्रियाःसृष्ट्याद्याःकर्तारश्चस्रष्टादयः इहसर्वंसएवेति अवतेःसाक्षाद्ग्रहणंविघ्नेभ्यःस्वरक्षणाभिप्रायेण ५७ एवंसर्वात्मत्वेभावविकारप्राप्तेःकुतोस्यशुद्धतेतितत्राह ब्रह्मेति सवि ष्णुःशुद्धंब्रह्मैव सप्रभुःसर्वनियंता ब्रह्मैवसन्सर्वभूतः ब्रह्मैवसन्प्रजानांपतिःपालकः ब्रह्मैवसन्नच्युतःनकुतश्चिच्यवतेव्यापकइत्यर्थः सविष्णुर्ब्रह्मैवसन्नसौक्षेत्राधिष्ठातापुरुषोत्तमरूपीच फलितमाह सविष्णुःषड्भावविकाररहितंब्रह्मैवतत्रनाविशिष्टंरूपमेतीत्यव्ययमपरिणामि नित्यंनाशहीनंअजंजन्महीनम् अपक्षयाद्यैरपक्षयास्तित्वदृद्धिभिरसंगीत्यर्थः अचिंत्यस्वाधीनमाय यासर्वात्मतयाब्रह्मैवविवर्तते अतोनायंदोषइतिभावः ५८ उक्ततत्त्वमनुस्मरन्दोषोपशमंप्रार्थयते ब्रह्माक्षरमिति यथानिर्विकारंब्रह्मैवासौपुरुषोत्तमःतथातेनसत्येनतादृशानुस्मरणेनममरा गादयःरागआदिःकारणंयेषांक्रियालोपयोगभ्रंशादिदोषाणांतेप्रकर्षेणसमूलंशमंनाशंयांतु ५९ ६० तदेवमप्सरोजातत्वेनबहुपतित्वंनदूषणमितिसूचयित्वेदानीमस्याबहुपतित्वंभगवतैवप्र सादीकृतमितिनास्यांनयुष्माकंवाकश्चिद्दोषइतिवक्तुमाह इयंचेति वोयुष्मानेतस्याःकथनेसतिवोयुष्माकंकार्यगौरवंकार्यपरिणयनाख्यंतत्रगौरवमादरःसत्पुत्रलाभफलदायिभविष्यतीत्यर्थः ६१ प्राक्पूर्वजन्मनिविष्णुंतोषयामास ६३ ६४ वृथाजन्मयस्याःसाविफलारतिपुत्रहीना ६४ श्लाघ्याःप्रख्यातकर्माणः प्रजापतिनाब्रह्मणासमः ६५ रूपेणसंपदाचसमायुक्ता ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६७ जन्मभेदेनतयाबहुपतिप्रार्थनेकृतेपिभक्तानांपुनःपुनर्जन्मासहिष्णुर्विष्णुरेकस्मिन्नेवजन्मनिवरंददौ तदाह अन्यस्मिन्ननंतरेजन्मनि दशेतिसंख्याकथनाद्भाव्यर्थानुबोधादपीत्थंवरंददा वितिबोद्धव्यम् ६८ ६९ ७० साध्वीपतिव्रता ७१ ७२ ७३ यःपूर्वंब्रह्मणःपुत्रोभवत्सदक्षोमारिषायांजज्ञे ७४ सृष्ट्यर्थंब्रह्मणःसृष्टिवृद्ध्यर्थंआत्मनःप्रजासृष्ट्यर्थंसंतानार्थम् ७५ अवरान्नीचान् वराञ्श्रेष्ठान्अचरांश्चचरांश्चेतिवापाठः ७६ पश्चाद्धर्यश्वादिपुत्रनाशादनंतरम् स्त्रियःषष्टिकन्याः ७७ कालस्यनयनेउन्नयनेज्ञानइतियावत् अत्रचषष्टिमध्येपंचाशत्कन्याना

तिसमोस्तुमे ६५ रूपसंपत्समायुक्तासर्वस्यप्रियदर्शना । अयोनिजाचजायेयंत्वत्प्रसादादधोक्षज ६६ । । सोमउवाच । । तयैवमुक्तोदेवेशो हृषीकेशउवाचताम् । प्रणामनम्रामुत्थाप्यवरदःपरमेश्वरः ६७ । । देवउवाच । । भविष्यंतिमहावीर्याअन्यस्मिन्नेवजन्मनि । प्रख्यातोदार कर्माणोभवत्याःपतयोदश ६८ पुत्रंचसुमहात्मानमतिवीर्यपराक्रमम् । प्रजापतिगुणैर्युक्तंत्वमवाप्स्यसिशोभने ६९ वंशानांतस्यकर्तृत्वंजगत्यस्मि न्भविष्यति । त्रैलोक्यमखिलंसूतिस्तस्यचापूरयिष्यति ७० त्वंचाप्ययोनिजासाध्वीरूपौदार्यगुणान्विता । मनःप्रीतिकरीनृणांमत्प्रसादाद्भविष्य सि ७१ इत्युक्त्वांतर्दधेदेवस्तांविशालविलोचनाम् । साचेयंमारिषाजातायुष्मत्पत्नीनृपात्मजाः ७२ । पराशरउवाच । । ततःसोमस्यवचनाज्ज गृहुस्तांप्रचेतसः । संहृत्यकोपंवृक्षेभ्यःपत्नीधर्मेणमारिषाम् ७३ दशभ्यस्तुप्रचेतोभ्योमारिषायांप्रजापतिः । जज्ञेदक्षोमहाभागोयःपूर्वंब्रह्मणोभ वत् ७४ सतुदक्षोमहाभागःसृष्ट्यर्थंसुमहामते । पुत्रानुत्पादयामासप्रजासृष्ट्युर्थमात्मनः ७५ अवरांश्चवरांश्चैवद्विपदोथचतुष्पदान् । आदेशंब्र ह्मणःकुर्वन्सृष्ट्यर्थंसुसमाहितः ७६ ससृष्ट्वामनसादक्षःपश्चादप्यसृजत्स्त्रियः । ददौसदशधर्मायकश्यपायत्रयोदश ७७ कालस्यनयनेयुक्ताःसप्त विंशतिमिंदवे । तासुदेवास्तथादैत्यानागागावस्तथाखगाः ७८ गंधर्वाप्सरसश्चैवदानवाद्याश्चजज्ञिरे । ततःप्रभृतिमैत्रेयप्रजामैथुनसंभवाः ७९ संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषामभवन्प्रजाः । तपोविशेषैरिद्धानांतदात्यंततपस्विनाम् ८० । । मैत्रेयउवाच । । अंगुष्ठाद्दक्षिणाद्दक्षःपूर्वंजातः श्रुतंमया । कथंप्राचेतसोभूयःससंभूतोमहामुने ८१ एषमेसंशयोब्रह्मन्सुमहान्हृदिवर्तते । यद्दौहित्रश्चसोमस्यपुनःश्वशुरतांगतः ८२ । ।प राशरउवाच । । उत्पत्तिश्चनिरोधश्चनित्यौभूतेषुवैमुने । ऋषयोत्रनमुह्यंतियेचान्येदिव्यचक्षुषः ८३ युगेयुगेभवंत्येतेदक्षाद्यामुनिसत्तमाः । पु

मुल्लेखस्तासांप्रथमंविवाहान्वंशांश्चवक्तुमितिज्ञेयम् ७८ ततःदक्षात्प्रभृति ७९ दक्षात्पूर्वेषांतुसंकल्पादिमात्रात्प्रजाअभवन् यद्यपिप्राचेतसदक्षात्पूर्वमपिमैथुनसृष्टिरस्त्येवतथापिबाहु ल्याभिप्रायेणएतदुच्यतेइत्यविरोधः अत्यंततपस्विनामपिमध्येतपोविशेषैरिद्धानाम् ऋद्धानामित्यपिपाठः ८० ८१ सोमस्यदुहितुर्मारिषायाःपुत्रत्वाद्दौहित्रः पुनश्चश्वशुरतांगतः सप्तविंश तिमिंदवेददावित्युक्तत्वादित्येषोन्यःसंशयःदौहित्रस्यचसोमस्येतिपाठेदाक्षायण्यामनसूयायामत्रेर्जातत्वात्सोमोदक्षस्यदौहित्रस्तस्यदक्षः पुनः श्वशुरतांगतइति ८२ नित्यौप्रवाहरूपेण दिव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्षुषोऽतींद्रियवेदिनः ८३ भवंतिसुप्तप्रबुद्धवत् निरुध्यंतेसुषुप्तवल्लीयंते युगेयुगइति युज्यंतेअस्मिन्ग्रहाएकस्थानंयांतीतियुगंकल्पमन्वंतरादिःकालस्तस्मिन्स्वायंभुवमन्वंतरे ब्रह्मणोजा तस्यदक्षस्यपुनश्चाक्षुषमन्वंतरेप्रचेतोभ्योजन्मप्रसिद्धिरित्यर्थः ८४ प्रभावातिशयाद्यौनदोषाभावमभ्युपेत्यापिपूज्यपूजकादिनियमाभावमाशंक्याह कानिष्ठ्यमिति तपोगरीयोगुरुतरं प्र भावः प्रभुशक्तिश्चगरीयाञ्ज्यैष्ठ्येकारणमभूत्तुवयोमात्रमित्यर्थः ८५ दक्षसृष्टिविस्तारंपृच्छति देवानामिति इहदक्षसृष्टौ ८६ ८७ ८८ मानस्यः संकल्पजाः ८९ कन्यांकामिनीम् ९० पंचसहस्राणीतिसंबंधः ९१ प्रजाःसंविवर्धयितुमिच्छून्तान्दृष्ट्वाअभिसंगम्यप्रियसंवादः प्रियालापोदेवर्षिरब्रवीत् ९२ ९३ बालिशाबतेत्यादेरयंवास्तवोर्थः तत्त्वज्ञानाधिकारिणांप्र

नश्चैवनिरुध्यंतेविद्वांस्तत्रनमुह्यति ८४ कानिष्ठ्यंज्यैष्ठ्यमप्येषांपूर्वंनाभूद्द्विजोत्तम । तपएवगरीयोभूत्प्रभावश्चैवकारणम् ८५ । । मैत्रेयउवाच । । देवानांदानवानांचगंधर्वोरगरक्षसाम् । उत्पत्तिंविस्तरेणेहममब्रह्मन्प्रकीर्तय ८६ । । पराशरउवाच । । प्रजाःसृजेतिव्यादिष्टः पूर्वंदक्षःस्वयंभुवा । यथाससर्जभूतानितथाशृणुमहामुने ८७ मानसान्येवभूतानिपूर्वंदक्षोसृजत्तदा । देवानृषीन्सगंधर्वानसुरान्पन्नगांस्तथा । ८८ यदास्यविप्रमानस्योनव्यवर्धंतताःप्रजाः । ततःसंचिंत्यसपुनःसृष्टिहेतोःप्रजापतिः ८९ मैथुनेनैवधर्मेणसिसृक्षुर्विविधाःप्रजाः । असिक्नीमा वहत्कन्यांवीरणस्यप्रजापतेः ९० सुतांसुतपसायुक्तांमहतींलोकधारिणीम् । अथपुत्रसहस्राणिवैरण्यांपंचवीर्यवान् ९१ असिक्न्यांजनयामाससर्गहेतोःप्रजापतिः । तान्दृष्ट्वानारदोविप्रसंविवर्धयिषून्प्रजाः । संगम्यप्रियसंवादोदेवर्षिरिदमब्रवीत् ९२ हेहर्यश्वामहावीर्याःप्रजायूयंकरिष्यथ । ईदृशोलक्ष्यतेभावोभवतांश्रूयतामिदम् ९३ बालिशाबतयूयंवैनास्याजानीतवैभुवः । अंतरूर्ध्वमधश्चैवकथंस्रक्ष्यथवैप्रजाः ९४ उर्ध्वंतिर्यगधश्चैवयदाऽप्रतिहतागतिः । तदाकस्माद्भुवोनांतंसर्वंद्रक्ष्यथबालिशाः ९५ । पराशरउवाच । तेतुतद्वचनंश्रुत्वाप्रयाताःसर्वतोदिशम् । अद्यापिनानिवर्तंतेसमुद्रेभ्यइवापगाः ९६ हर्यश्वेष्वथनष्टेषुदक्षःप्राचेतसःपुनः । वैरण्यामथपुत्राणांसहस्रमसृजत्प्रभुः ९७ विवर्धयिषवस्तेतुशबलाश्वाःप्रजाःपुनः । पूर्वोक्तंवचनंब्रह्मन्नारदेनैवचोदिताः । अन्योन्यमूचुस्तेसर्वेसम्यगाहमहामुनिः ९८ भ्रातॄणांपदवींचैवगंतव्यानात्रसंशयः । ज्ञात्वाप्रमाणंपृथ्व्या

जासृष्ट्यादिदुःखदर्शनाद्वतेतिसंबोधनम् अहोयूयंबालिशाअज्ञाः यतोस्याभुवःसंसारावपनक्षेत्रस्यलिंगशरीरस्याधःउपक्रमम् ऊर्ध्वमवसानम् अंतर्मध्यंचनजानीत अतोमोक्षमार्गमज्ञात्वाकथंकिमितिप्रजाःस्रक्ष्यथव्यर्थम् ९४ तस्मात्तत्त्वज्ञानाधिकारिणांयुष्माकंतदेवकार्यमित्याह ऊर्ध्वमिति अधःउत्पत्तेःपूर्वमव्यक्तमेव ऊर्ध्वंलयानंतरमप्यव्यक्तमेवयथातथातिर्यङ्मध्येप्यव्यक्तमिति विचारेसर्वत्रगतिर्मातिर्यदाऽप्रतिहताअसंभावनादिरहिताअधिकारित्वात्तदाकस्माद्भुवोलिंगशरीरस्यांतंनिषेधाधिष्ठानंनद्रक्ष्यथ तज्ज्ञानेयत्नंकिंनकुरुथेत्यर्थः ९५ प्रयाताःसर्वतोदिशंसर्वासुदिक्षुस्वैरंव्यचरन् ततश्चयुक्तत्वाच्चाद्यापिनिवर्तंते ९६ नष्टेषुयत्रक्वचनगतेषु ९७ पूर्वोक्तंबालिशावतेत्यादिवचनंचोदिताःश्राविताःसंतोन्योन्यमूचुः ९८ भ्रातॄणांश्रेष्ठानांगुरूणांपदवीमोक्षमार्गः पृथ्व्याःलिंगशरीरस्यप्रमाणमवसानंज्ञात्वाततःपश्चात्पित्राज्ञापालनेनलोकसंग्रहार्थंप्रजाःस्रक्ष्यामइतिवास्तवोर्थः कथारूपोर्थःस्पष्टएव ९९ १०० कथार्थमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रिस्याह ततःप्रभृतीति नश्यतिलोकेनदृश्यते १०१ नारदशापस्तुवायुनोक्तः शबलाश्वैर्पुनष्टेषुदक्षःक्रुद्धोऽशपद्विजाः नारदंनाशमेहीतिगर्भवासंवसेतिचेति १०२ १०३ इदानीमु
क्तानुवादपूर्वकंसर्वासांदक्षकन्यानांवंशान्वक्तुमाह ददाविति सप्तविंशतीतिद्वितीयालोपश्छांदसः १०४ १०५ १०६ अरुंधत्याद्याःप्राचेतसस्यदक्षस्यसुतादशधर्मपत्नीः पूर्वोक्ताःश्र
द्धाकीर्त्यादयस्त्रयोदशधर्मपत्न्यस्तुस्वायंभुवस्यदक्षस्यसुताइत्यविरोधः १०७ मुहूर्तजाइतिमुहूर्ताविष्ठाभ्योदेवताः १०८ घोषोध्वनिविशेषोगोष्ठंवातदभिमानीदेवः नागवीथीअश्विन्यादि

श्वप्रजाःस्त्रक्ष्यामहेततः ९९ तेपितेनैवमार्गेणप्रयाताःसर्वतोदिशम् । अद्यापिननिवर्तंतेसमुद्रेभ्यइवापगाः १०० ततःप्रभृतिवैभ्राताभ्रातुरन्वेषणेद्वि
ज । प्रयातोनश्यतितथातन्नकार्यंविजानता १०१ तांश्चापिनष्टान्विज्ञायपुत्रान्दक्षःप्रजापतिः । क्रोधंचक्रेमहाभागोनारदंसशशापच १०२ सर्ग
कामस्ततोविद्वान्समैत्रेयप्रजापतिः । षष्टिंदक्षोसृजत्कन्यावैरण्यामितिनःश्रुतम् १०३ ददौसदशधर्मायकश्यपायत्रयोदश । सप्तविंशतिसोमायच
तस्त्रोरिष्टनेमिने १०४ द्वेचैवबहुपुत्रायद्वेचैवांगिरसेतथा । द्वेकृशाश्वायविदुषेतासांनामानिमेशृणु १०५ अरुंधतीवसुर्यामीलंबाभानुर्मरुत्वती । सं
कल्पाचमुहूर्ताचसाध्याविश्वाचतादश १०६ धर्मपत्न्योदशत्वेतास्तास्वपत्यानिमेशृणु । विश्वेदेवाश्चविश्वायाःसाध्यासाध्यान्व्यजायत १०७ मरुत्व
त्यांमरुत्वंतोवसोस्तुवसवःस्मृताः । भानोस्तुभानवःपुत्रामुहूर्तायामुहूर्तजाः १०८ लंबायाश्चैवघोषोथनागवीथीतुयामिजा ।पृथिवीविषयंसर्वमरुंधत्यां
व्यजायत १०९ संकल्पायास्तुसर्वात्माजज्ञेसंकल्पएवहि । येत्वनेकवसुप्राणादेवाज्योतिःपुरोगमाः ११० वसवोष्टौसमाख्यातास्तेषांवक्ष्यामिविस्त
रम् । आपोध्रुवश्चसोमश्चधरश्चैवानिलोनलः १११ प्रत्युषश्चप्रभासश्चवसवोनामभिःस्मृताः । आपस्यपुत्रोवैतंड्यःश्रमःशांतोध्वनिस्तथा १०२
ध्रुवस्यपुत्रोभगवान्कालोलोकप्रकालनः । सोमस्यभगवान्वर्चावर्चस्वीयेनजायते ११३ धरस्यपुत्रोद्रविणोहुतहव्यवहस्तथा । मनोहरायांशिशिरः
प्राणोथरमणस्तथा ११४ अनिलस्यशिवाभार्यातस्याःपुत्रोमनोजवः । अविज्ञातगतिश्चैवद्वौपुत्रावनिलस्यतु ११५ अग्निपुत्रःकुमारस्तुशरस्तंबेव्य
जायत । तस्यशाखोविशाखश्चनैगमेयश्चषष्ठजः । अपत्यंकृत्तिकानांतुकार्तिकेयइतिस्मृतः ११६ प्रत्यूषस्यविदुःपुत्रमृषिंनाम्नाथदेवलम् । द्वौपुत्रौ

नक्षत्रत्रयात्मकस्वर्गविशेषाभिमानिनीदेवता तुशब्दाद्रजवीथ्यादीनामष्टानांसंग्रहः पृथिवीविषयोधिकरणंयस्यद्वीपादिविभागस्यतत् पृथिवीविषयोपलंबनंयस्यचराचरस्येतिचित्सुखाचा
र्याः १०९ सर्वात्मासर्ववस्तुविषयः त्रयस्त्रिंशद्देवांतःपातित्वाद्व्याख्यातान्वसूंस्तद्वंशांश्चवक्तुमाह येत्विति अनेकंवसुतेजःप्राणोबलंयेषांतेनेकवसुप्राणाइतिनामानिरुक्त्यर्थमुक्तम् दिवाज्योतिः
पुरोगमाःअग्निमुख्याः वसूनांपावकोस्मीतिस्मृतेः ११० विस्तरंनामवंशादिम् १११ ११२ लोकप्रकालनः लोकसंहर्ता येनवर्चस्वीकांतिमान्पुरुषःसोमवज्जायतेसः ११३ धरस्य
मनोहरायांभार्यायांद्रविणाद्याःपंचपुत्राहुतंहव्यंवहतीतितथा ११४ अनिलभार्यायाःशिवायाअनिलस्यचमातापित्रोर्द्वौपुत्रावित्यन्वयः ११५ शरस्तंबेमुंजगुच्छे पृष्ठतःइंद्रहतपृष्ठदेशोद्रत :पृष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाइतिपाठेअनुजाःएतैःसहकुमारश्चतुर्मूर्तिः ततोभवच्चतुर्मूर्तिःक्षणेनभगवान्गुहइतिशल्यपर्वदर्शनात् तस्यैवनामांतरमाह अपत्यमिति १६ १७ संगवर्जितातस्यांविश्वकर्मापुत्रोजज्ञे १८ १९ २० २१ अजैकपादादयश्चैकादशरुद्राजज्ञिरे मध्येत्वष्टृवंशमुक्त्वारुद्रसंख्यासमापनम् अपराजितइतित्र्यंबकविशेषणम् एतच्चपुराणांतरमनपेक्ष्यव्याख्यातम् अन्यपुराणेकश्यपात्सुरभेरुद्राजाताइतिप्रसिद्धेः अन्यस्त्वप्रस्तुतानपिरुद्रान्देवताप्रसंगमात्रात्प्रस्तौति अजैकपादित्याह २२ २३ एषामेवरुद्राणांप्रत्येकंशतंभेदानाह शतंत्वेवमिति यद्वाएताद्विभूतिरूपाणांपुत्राणामानंत्यमुच्यते शतशब्दस्यापरिमितार्थत्वात् २४ धर्मपत्नीनांवंशाउक्ताःकश्यपपत्नीनांवंशान्वक्तुमाह अदितिरित्यादिनायावदध्यायसमाप्ति २५ तत्रतुषिताएवादितेः

देवलस्यापिक्षमावंतौमनीषिणौ ११७ बृहस्पतेस्तुभगिनीवरस्त्रीकामवैरिणी । योगसिद्धाजगत्कृत्स्नमसक्ताविचचारह १८ प्रभासस्यतुयाभार्यावसूनामष्टमस्यच । विश्वकर्मामहाभागस्तस्यांजज्ञेप्रजापतिः १९ कर्त्ताशिल्पसहस्राणांत्रिदशानांचवार्धकिः । भूषणानांचसर्वेषांकर्त्ताशिल्पवतांवरः २० यःसर्वेषांविमानानिदैवतानांचकारह । मनुष्याश्चोपजीवंतियस्यशिल्पंमहात्मनः २१ अजैकपादहिर्बुध्न्यस्त्वष्टारुद्रश्चवीर्यवान् । त्वष्टुश्चाप्यात्मनःपुत्रोविश्वरूपोमहातपाः २२ हरश्चबहुरूपश्चत्र्यंबकश्चापराजितः । वृषाकपिश्चशंभुश्चकपर्दीरैवतस्तथा २३ एकादशैतेकथितारुद्रास्त्रिभुवनेश्वराः । शतंत्वेवंसमाख्यातंरुद्राणाममितौजसाम् २४ अदितिर्दितिर्दनुश्चैवअरिष्टासुरसावसा । सुरभिर्विनताचैवताम्राक्रोधवशाइरा । कद्रूर्मुनिश्चधर्मज्ञतदपत्यानिमेशृणु २५ पूर्वमन्वंतरेश्रेष्ठाद्वादशासन्सुरोत्तमाः । तुषितानामतेन्योन्यमूचुर्वैवस्वतेंतरे २६ उपस्थितेतियशसश्चाक्षुषस्यांतरेमनोः । समवायीकृताःसर्वेसमागम्यपरस्परम् २७ आगच्छतद्रुतंदेवाअदितिंसंप्रविश्यवै । मन्वंतरेप्रसूयामस्तन्नःश्रेयोभवेदिति २८ एवमुक्त्वातुतेसर्वेचाक्षुषस्यांतरेमनोः । मारीचात्काश्यपाज्जातास्तेदित्यादक्षकन्यया २९ तत्रविष्णुश्चशक्रश्चजज्ञातेपुनरेवहि । अर्यमाचैवधाताचत्वष्टापूषातथैवच ३० विवस्वान्सविताचैवमित्रोवरुणएवच । अंशोभगश्चातितेजाआदित्याद्वादशस्मृताः ३१ चाक्षुषस्यांतरेपूर्वमासन्येतुषिताःस्मृताः । वैवस्वतेंतरेतेवैआदित्याद्वादशस्मृताः ३२ सप्तविंशत्तुयाःप्रोक्ताःसोमपत्न्योथसुव्रताः । तासामपत्यान्यभवन्दीप्तिमंत्यतितेजसा ३३ अरिष्टनेमिपत्नीनामपत्या

पुत्राजाताइतिकथापूर्वकमाह पूर्वमन्वंतरेचाक्षुषेतुषितानामदेवाआसन्तेचाक्षुषेमन्वंतरेवर्तमानेवैवस्वतमन्वंतरेचोपस्थितेभाविनिसतिपरस्परंसमागम्यान्योन्यपार्श्वंगत्वासमवायीकृतामीलिताःसंतोन्योन्यमूचुरितिद्वयोरन्वयः अतियशसःप्रख्यातकीर्तयः २६ २७ किमूचुस्तदाह आगच्छतेति वैवस्वतमन्वंतरेप्रसूयामःप्रसूयेमहि किमर्थामित्यतआहतत्ततःपुनरपिदेवाधिकारप्राप्त्यानःश्रेयोभविष्यतीति २८ चाक्षुषमन्वंतरेउक्त्वावैवस्वतमन्वंतरेऽदित्यानिमित्तभूतयाकाश्यपाज्जाताइत्यर्थः २९ ३० ३१ अत्रतुषिताएवादित्याइत्युपसंहरति चाक्षुषस्येति ३२ एवंतावद्दक्षकन्यावंशमध्येदेवतागणप्रस्तावाद्वसवोरुद्राआदित्याइतिक्रमेणोक्ता.अदितिवंशादनुक्रमप्राप्तेपिदितिवंशेतत्रप्रह्लादचरितस्यातिबहुत्वात्तांविहायादावन्यासांदक्षकन्यानांवंशानाह सप्तविंशत्तिसार्धैःपंचभिः सप्तविंशतियाइतिपाठेविसर्गलोपआर्षः अतितेजसादीप्तिमंत्यभवन् अतितेजसइतिपाठेअतितेजसश्चंद्रादित्यर्थः ३३ चतस्रोरिष्टनेमिनइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्युक्तानांवंशमाह अरिष्टेतिद्वेचैवबहुपुत्रायेत्युक्तयोर्वंशमाह बहुपुत्रस्येति चतस्रोविद्युतस्तु वातायकपिलाविद्युदातपायातिलोहिता पीतावर्षायविज्ञेयादुर्भिक्षायासिताभवेदितिज्योतिशास्त्रेप्रसिद्धाः ३४ द्वेचैवांगिरसइत्युक्तयोर्वंशमाह प्रत्यंगिरसजाइति अंगिरसंप्रत्यागतेभार्येप्रत्यंगिरसेताभ्यांजाताःप्रत्यंगिरसजाख्याऋचःयांकल्पयंतीत्यादिपंचत्रिंशन्मंत्रास्तद्देवताः द्वेकृशाश्वायेत्युक्तयोर्वंशमाह कृशाश्वस्येति देवप्रहरणास्तद्देवताः ३५ युगसहस्रांतेकल्पांतेलीयंतइतिशेषः पुनरपिकल्पादौजायंतइत्यर्थः त्रयस्त्रिंशत्तुअष्टौवसवएकादशरुद्राद्वादशादित्याः

नीहषोडश। बहुपुत्रस्यविदुषश्चतस्रोविद्युतःस्मृताः ३४ प्रत्यंगिरसजाःश्रेष्ठाऋचोब्रह्मर्षिसत्कृताः। कृशाश्वस्यतुदेवर्षेदेवप्रहरणाःसुताः३५एतेयुगसहस्रांतेजायंतेपुनरेवहि। सर्वेदेवगणास्तातत्रयस्त्रिंशत्तुछंदजाः ३६ तेषामपीहसततंनिरोधोत्पत्तिरुच्यते। यथासूर्यस्यमैत्रेयउदयास्तमयाविह३७ एवंदेवनिकायास्तेसंभवंतियुगेयुगे। दित्याःपुत्रद्वयंजज्ञेकश्यपादितिनःश्रुतम् ३८ हिरण्यकशिपुश्चैवहिरण्याक्षश्चदुर्जयः। सिंहिकाचाभवत्कन्याविप्रचित्तेःपरिग्रहः ३९ हिरण्यकशिपोःपुत्राश्चत्वारःपृथुलौजसः। अनुह्लादश्चह्लादश्चप्रह्लादश्चैवधर्मवान् ४० संह्लादश्चमहावीर्योदैत्यवंशविवर्धनः। एषांमध्येमहाभागःसर्वत्रसमदृग्वशी ४१ प्रह्लादःपरमांभक्तिंयउवाहजनार्दने। दैत्येंद्रदीपितोवह्निःसर्वांगोपचितोद्विज ४२ नददाहचयंवह्निर्वासुदेवेहृदिस्थिते। महार्णवांतःसलिलेस्थितस्यचलतोमही ४३ चचालसकलायस्यपाशबद्धस्यधीमतः। नभिन्नंविविधैःशस्त्रैर्यस्यदैत्येंद्रपातितैः ४४ शरीरमद्रिकठिनंसर्वत्राच्युतचेतसः। विषानलोज्ज्वलमुखायस्यदैत्यप्रचोदिताः ४५ नांतायसर्पपतयोबभूवुरुरुतेजसः। शैलैराक्रांतदेहोपियःस्मरन्पुरुषोत्तमम् ४६ नतत्याजात्मनःप्राणान्विष्णुस्मरणदंशितः। पतंतमुच्चादवनिर्यमुपेत्यमहामतिम् ४७ दधारदैत्यपतिनाक्षिप्तंस्वर्गनिवासिना। यस्यसंशोषकोवायुर्देहेदैत्येंद्रयोजितः ४८ अवापसंक्षयंसद्यश्चित्तस्थेमधुसूदने। विषाणभंगमुन्मत्तामदहानिंचदिग्गजाः १४९ यस्यवक्षःस्थलेप्राप्तादैत्येंद्रपरिणामिताः। यस्यचोत्पादिताकृत्यादैत्यराजपुरोहितैः १५० बभूवनांतायपुरागोविंदासक्तचेतसः। शंबरस्यचमायानांसहस्रमतिमायिनः ५१ यस्मिन्प्रयुक्तंचक्रेणकृष्णस्यवितथीकृतम्। दैत्येंद्रसूदोपहृतंयस्यहालाहलंविषम् ५२ जरयामाससमतिमानविकारममत्सरी।

प्रजापतिर्वषट्कारश्चेतिश्रुत्युक्ताः छंदतइच्छातोजायंतेइतिछंदजाः ३६ निरोधस्तत्साहिताउत्पत्तिः छंदजाश्चेत्कल्पमध्येपिनकथंलीयंतेजायंतेचेतितत्रेश्वरनियोगादेवतथेतिसदृष्टांतमाह यथेति ३७ युगेयुगेकल्पमन्वंतरादिषु दितेर्वंशमाह दित्याइति ३८ परिग्रहोभार्या ३९ ४० भगवद्वासनासिद्ध्याइहामुत्रचजायते इतिप्रह्लादमाहात्म्यमहोत्सवमिवातनोत् तेषांमध्य इत्यादिना ४१ सर्वेषुप्रह्लादांगेषुउपचितःसमेधितः वह्निरितिद्विरुक्तिराधिक्यद्योतनाय ४२ ४३ ४४ ४५ अंतायनाशाय उरुतेजोयस्यतस्य ४६ विष्णुस्मरणेनदंशितःसंनद्धः ४७ स्वर्गेतिउच्चतरोपलक्षणम्४८ ४९दैत्येंद्रपरिणामिताःदंतैःप्रहर्तुंगजशिक्षाक्रमेणोद्योजिताः ५० ५१ दैत्येंद्रस्यसूदैःसूपकारैःउपहृतंदत्तंहालाहलंविषभेदम् ५२ अविकाररोमांचादिविका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रशून्यंयथाभवतिएवंजस्यामास ५३ ५४ ५५ इतिश्रीविष्णवाकूतचंद्रिकायांप्रथमेअंशेटीकायांपंचदशोध्यायः १५ । । प्रह्लादचरिताश्चर्यश्रवणानिकुतूहलात् तेष्वेवविस्तरप्रश्नाः षोडशेनानुवर्णिताः १ स्वावधानख्यापनायउक्तानुवादपूर्वकंप्रह्लादचरितंविस्तरात्पृच्छतिकथितइत्यादिना मानवानामुत्तानपादादीनां मानसानामितिपाठेमन्वादीनां कारणंविष्णुरेवेत्यपिक

समचेताजगत्यस्मिन्यःसर्वेष्वेवजंतुषु ५३ यथात्मनितथान्यत्रपरंमैत्रगुणान्वितः । धर्मात्मासत्यशौचादिगुणानामाकरःपरः ५४ उपमानमशेषाणां साधूनांयःसदाभवत् १५५ । । इतिश्रीविष्णुपुराणेप्रथमेअंशेपंचदशोध्यायः १५ । । मैत्रेयउवाच । ! कथितोभवतावंशोमानवानांमहामुने । कारणंचास्यजगतोविष्णुरेवसनातनः १ यच्चैतद्भगवानाहप्रह्लादंदैत्यसत्तमम् । ददाहनाग्निर्नास्त्रैश्चक्षुण्णस्तत्याजजीवितम् २ जगामवसुधाक्षोभंयत्राब्धिसलिलेस्थिते । बंधबद्धेविचलतिविक्षिप्तांगसमाहता ३ शैलैराक्रांतदेहोपिनममारचयःपुरा । त्वयैवातीवमाहात्म्यंकथितंयस्यधीमतः ४ तस्यप्रभावमतुलंविष्णोर्भक्तिमतोमुने । श्रोतुमिच्छामियस्यैतच्चरितंतिग्मतेजसः ५ किंनिमित्तमसौशस्त्रैर्विक्षतोदितिजैर्मुने । किमर्थंचाब्धिसलिलेप्रक्षिप्तोधैर्यतत्परः ६ आक्रांतःपर्वतैःकस्मात्कस्माद्दष्टोमहोरगैः । क्षिप्तःकिमद्रिशिखरात्किंवापावकसंचये ७ दिग्दंतिनांदंतभूमिंसचकस्मान्निरूपितः । संशोषकोनिलश्चास्यप्रयुक्तःकिंमहासुरैः ८ कृत्यांचदैत्यगुरवोयुयुजुस्तत्रकिंमुने । शंबरश्चापिमायानांसहस्रंकिंप्रयुक्तवान् ९ हालाहलंविषमहोदैत्यसूदैर्महात्मनः । कस्माद्दत्तंविनाशाययज्जीर्णंतेनतेजसा १० एतत्सर्वंमहाभागप्रह्लादस्यमहात्मनः । चरितंश्रोतुमिच्छामिमाहात्म्यमनुसूचकम् ११ नहिकौतूहलंतत्रयद्दैत्यैर्नहतोहिसः । अनन्यमनसोविष्णौकःसमर्थोनिपातने १२ तस्मिन्धर्मपरेनित्यंकेशवाराधनोद्यते । स्ववंशप्रभवैर्दैत्यैःकर्तुंद्वेषोतिदुष्करः १३ धर्मात्मनिमहाभागेविष्णुभक्तेविमत्सरे । दैतेयैःप्रहृतंयस्मात्तन्ममाख्यातुमर्हसि १४ प्रहरंतिमहात्मानोविपक्षाअपिनेदृशे । गुणैःसमन्वितेसाधौकिंपुनर्यःस्वशुक्रजः १५ तदेतत्कथ्यतांसर्वंविस्तरान्मुनिपुंगव । दैत्येश्वरस्यचरितंश्रोतुमिच्छाम्यशेषतः । १६ । । इतिश्रीविष्णुपुराणेप्रथमेअंशेप्रह्लादचरितेषोडशोध्यायः १६ । । पराशरउवाच । । मैत्रेयश्रूयतांसम्यक्चरितंतस्यधीमतः । प्रह्लादस्यसदोदारचरितस्यमहात्मनः १ दितेःपुत्रोमहावीर्योहिरण्यकशिपुःपुरा । त्रैलोक्यंवशमानिन्येब्रह्मणोवरदर्पितः २ इंद्रत्वमकरोद्दैत्यःसचा

थितम् १ क्षुण्णःप्रहतोपि २ यत्रयस्मिन्प्रह्लादेबंधैर्बद्धेपिविचलतिसतितस्यविक्षिप्तांगसमाहतासतीवसुधाक्षोभंजगाम ३ ४ ५ किंनिमित्तमित्यादिनाश्रुतमर्थमनूद्यनिमित्तमात्रेप्रश्नः ६ अब्धिसलिलेक्षिप्तअनंतरंतैराक्रांतआचितःकस्मात् ७ दंतानांभूमिंविषयंनिरूपितःप्रापितः ८ ९ १० ११ कौतूहलव्याजेनापिविष्णुभक्तचरितंपृच्छति तस्मिन्निति १२ १३ १४ १५ १६ इतिश्रीविष्णवाकूतचंद्रिकायांप्रथमेअंशेटीकायांषोडशाध्यायः १६ प्रह्लादस्यप्रहारास्तेहरिभक्तस्यकीर्तये इहतेनैवबालानांभक्तिशिक्षास्तथेरिताः १ रागःस्वीयेसुतेतस्मिन्द्वेषो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुपरायणे हिरण्यकशिपोर्द्वेषस्तत्राहबलवानिति १ दितेःपुत्रइति भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्ममप्रभोइत्याद्यनेकवरप्रार्थनेसातितथेतिब्रह्मणादत्तैर्वरैर्दर्पितः २ ३ ४ तत्रासात्तस्यहि ण्यकशिपोर्भयात् ५ ६ महात्मानमद्भुतप्रभावम् ७ ८ प्रकृष्टंनृत्तंयासांताःअप्सरसोयत्रतत्रप्रासादेस्फटिकाभ्रमयेस्फटिकाशिलाभिरभ्रशिलाभिश्चरचिते पीयतइतिपानंमद्यादितत्पपौ पान

सीत्सवितास्वयम् । वायुरग्निरपांनाथःसोमश्चाभून्महासुरः ३ धनानामधिपःसोऽभूत्सएवासीत्स्वयंयमः । यज्ञभागानशेषांस्तुसस्वयंबुभुजेऽसुरः ४ देवाःस्वर्गंपरित्यज्यतत्रासान्मुनिसत्तम । विचेरुरवनौसर्वेबिभ्राणामानुषींतनुम् ५ जित्वात्रिभुवनंसर्वंत्रैलोक्यैश्वर्यदर्पितः । उपगीयमानोगंधर्वैर्बुभुजेविषयान्प्रियान् ६ पानासक्तंमहात्मानंहिरण्यकशिपुंतदा । उपासांचक्रिरेसर्वेसिद्धगंधर्वपन्नगाः ७ अवादयञ्जगुश्चान्येजयशब्दानथापरे । दैत्यराजस्यपुरतश्चक्रुःसिद्धामुदान्विताः ८ तत्रप्रनृत्ताप्सरसिस्फटिकाभ्रमयेसुरः । पपौपानंमुदायुक्तःप्रासादेसुमनोहरे ९ तस्यपुत्रोमहाभागः प्रह्लादोनामनामतः । पपाठबालपाठ्यानिगुरुगेहगतार्भकः १० एकदातुसधर्मात्माजगामगुरुणासह । पानासक्तस्यपुरतःपितुर्दैत्यपतेस्तदा । ११ पादप्रणामावनतंसमुत्थाप्यपितासुतम् । हिरण्यकशिपुःप्राहप्रह्लादममितौजसम् १२ । हिरण्यकशिपुरुवाच । । पठ्यतांभवतावत्स सारभूतंसुभाषितम् । कालेनैतावतायत्तेसदोद्युक्तेनशिक्षितम् १३ प्रह्लादउवाच । । श्रूयतांतातवक्ष्यामिसारभूतंतवाज्ञया । समाहितमनाभूत्वायन्मेचेतस्यवस्थितम् १४ अनादिमध्यांतमजमवृद्धिक्षयमच्युतम् । प्रणतोऽस्म्यनुशास्तारंसर्वकारणकारणम् १५ । पराशरउवाच । एतन्निशम्यदैत्येंद्रःकोपसंरक्तलोचनः । विलोक्यतद्गुरुंप्राहस्फुरिताधरपल्लवः १६ ब्रह्मबंधोकिमेतत्तेविपक्षस्तुतिसंहितम् । असारंग्राहितोबालोमामवज्ञायदुर्मते १७ । गुरुरुवाच । दैत्येश्वरनकोपस्यवशमागंतुमर्हसि । ममोपदेशजनितंनायंवदतितेसुतः १८ । हिरण्यकशिपुरुवाच । अनुशास्तोसिकेनेदृक्वत्सप्रह्लादकथ्यताम् । ममोपदिष्टंनेत्येषप्रब्रवीतिगुरुस्तव १९ । प्रह्लादउवाच । शास्ताविष्णुरशेषस्यजगतोयोहृदिस्थितः । तमृतेपरमात्मानंतातकःकेनशास्यते २० । हिरण्यकशिपुरुवाच । कोऽयंविष्णुःसुदुर्बुद्धेयंब्रवीषिपुनःपुनः । जगतामीश्वरस्येहपुरतःप्रसभंमम २१ । प्रह्लादउवाच । नशब्दगोचरंयस्ययोगिध्येयंपरंपदम् । यतोयश्चस्वयंविश्वंसविष्णुःपरमेश्वरः २२ । हिरण्यकशिपु

मेवपपौचकइतिवा ९ प्रस्तुतमाह तस्यपुत्रइति नामतःनाम्ना नामप्रसिद्धौ १० ११ १२ सुभाषितंमंगलरूपम् १३ १४ अनादिमध्यांतंदेशतःपरिच्छेदरहितम् अजंजन्मरहितम् अवृद्धिक्षयंवृद्ध्युपक्षयशून्यम् तत्रहेतुः सर्वकारणानांकारणम् अनुशास्तारंप्रवृत्तिनिवृत्तिहेतुम् जगन्नाथमितिपाठःसुगमः १५ १६ ब्रह्मबंधोब्राह्मणाधम तेत्वयाविपक्षेस्तुत्यासाहितंसंबद्धं किमेतद्ग्राहितःपाठितः १७ १८ १९ २० प्रसभंनिःशंकम् २१ नशब्दस्यगोचरंविषयंनवायोगिध्येयम् यतोवाचोनिवर्तंतेअप्राप्यमनसासहेति श्रुतेः तर्हिनास्त्येवेत्यतआह यतोविश्वंय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वविश्वमितिविश्वस्याभिन्नोनिमित्तोपादानभूतोयोविष्णुःसपरमेश्वरइत्यर्थः २२ २३ नकेवलंममैवकिंतुसर्वासांप्रजानांभवतश्चपरमेश्वरःसएवनकेवलंपरमेश्वरःकिंतुधाताधारयितावि धाताकर्ताचसएव २४ येनाविष्टमानसइत्यन्वयः २५ आक्रम्याधिष्ठायावस्थितः मांत्वदादींश्च मत्त्वदादीनितिपाठेअहंत्वंचआदिर्येषांतानूयुनक्तिप्रवर्तयति २६ २७ २८ गाथापद्यादिः

रुवाच । परमेश्वरसंज्ञोज्ञकिमन्योमय्यवस्थिते । तंचास्तिमर्तुकामस्त्वंब्रवीषिचपुनःपुनः २३ । प्रह्लादउवाच । । नकेवलंतातममप्रजानां सब्रह्मभूतोभवतश्चविष्णुः । धाताविधातापरमेश्वरश्चप्रसीदकोपंकुरुषेकिमर्थम् २४ । । हिरण्यकशिपुरुवाच । । प्रविष्टःकोऽस्यहृदयंदुर्बुद्धेर तिपापकृत् । येनेदृशान्यसाधूनिवदत्याविष्टमानसः २५ । । प्रह्लादउवाच । । नकेवलंमेहृदयंसविष्णुराक्रम्यलोकानखिलानवस्थितः । समांत्वदादींश्चपितःसमस्तान्समस्तचेष्टासुयुनक्तिसर्वगः २६ । । हिरण्यकशिपुरुवाच । निष्क्रम्यतामयंदुष्टःशास्यतांचगुरोर्गृहे । योजितोदु र्मतिंकेनविपक्षवितथस्तुतौ २७ । । पराशरउवाच । । इत्युक्तेसतदादैत्यैर्नीतोगुरुगृहंपुनः । जग्राहविद्यामनिशंगुरुशुश्रूषणोद्यतः २८ का लेऽतीतेसुमहतिप्रह्लादमसुरेश्वरः । समाहूयाब्रवीद्गाथाकाचित्पुत्रकगीयताम् २९ । । प्रह्लादउवाच । । यतःप्रधानपुरुषौयतश्चैतच्चराचर म् । कारणंसकलस्यास्यसमेविष्णुःप्रसीदतु ३० । । हिरण्यकशिपुरुवाच । । दुरात्मावध्यतामेषनानेनार्थोस्तिजीवता । स्वपक्षहानिकर्तृ त्वाद्यःकुलांगारतांगतः ३१ । । पराशरउवाच । । इत्याज्ञप्तास्ततस्तेनप्रगृहीतमहायुधाः । उद्यतास्तस्यनाशायदैत्याःशतसहस्रशः ३२ । । प्रह्लादउवाच । विष्णुशस्त्रेषुयुष्मासुमयिचासौयथास्थितः । दैतेयास्तेनसत्येननाक्रमंत्यायुधानिमे ३३ । । पराशरउवाच । ततस्तैःशतशोदैत्यैःशस्त्रौघैराहतोपिसन् । नावापवेदनामल्पामभूच्चैवपुनर्नवः ३४ । । हिरण्यकशिपुरुवाच । । दुर्बुद्धेविनिवर्तस्ववैरिप क्षस्तवादृतः । अभयंतेप्रयच्छामिमातिमूढमतिर्भव ३५ । । प्रह्लादउवाच । । भयंभयानामपहारिणिस्थितेमनस्यनंतेममकुत्रतिष्ठति । यस्मिन्स्मृतेजन्मजरोद्भवानिभयानिसर्वाण्यपयांतितात ३६ । । हिरण्यकशिपुरुवाच । । भोभोसर्पादुराचारमेनमत्यंतदुर्मतिम् । विषज्वालोज्ज्वलैर्वक्त्रैःसद्योनयतसंक्षयम् ३७ । । पराशरउवाच । । इत्युक्तास्तेनतेसर्पाःकुहकस्तक्षकोंधकः । अदशंतसमस्तेषुगात्रेष्वतिवि

२९ कारणत्वमेवाह यतःप्रधानपुरुषौआविर्भूतौ यतोयाभ्यांप्रधानपुरुषाभ्यांद्वाभ्याम् ३० दुर्ज्ञेयआत्माअंतःकरणंयस्यसइतिवास्तवोर्थः स्वपक्षहानिकर्तृत्वाद्विरोधिसंश्रयकारित्वात् कुल स्यअंगारतांदाहकतांकुलेष्वंगारतांभस्मतामधमतामितिवा स्वपक्षस्यतमोगुणस्यसात्त्विकत्वेनहानिकर्तृत्वात्कुलस्यतमःप्रकृतेरंगारतांनाशकतांगतोदैत्यबालकोपदेष्टृत्वादिवास्तवोर्थः ३१ ३२ यथायत्प्रकारंसत्येनमन्निश्चितेनशस्त्रादिषुविष्णुःस्थितःतेनसत्येनहेतुना मेमयि ३३ ३४ ३५ यस्मिन्स्मृतेजन्मजरोद्भवान्यपिभयानियांतितस्मिन्मनसिस्थितेभयंकुत्रतिष्ठेत् ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुराचारंअसुराचारहीनम् अंतेअधिष्ठानेविष्णौदुर्मतिर्येषांतानतिक्रम्यवर्तमानमितिवास्तवोर्थः विषेणयाज्वालाअग्निशिखातयोज्ज्वलैः ३७ अदशंतदष्टवंतः ३८ ३९ मणयःस्वस्तिकाः ए तदशक्यमन्यत्कार्यंप्रशाधिआदिश ४० संकटैःसकीर्णैर्दंतैर्मिश्रामीलिताःसंतोप्रतनाशयत अस्मद्रिपुपक्षैर्वैष्णवैर्भिन्नमस्मत्तःपृथक्कृतम् तथापित्वत्पुत्रःकथंहंतव्यः तत्राह तज्जाआपित स्यविनाशायभवंति यथारणेर्जातोहुताशनस्तन्नाशायतस्मादेतंघ्नतेत्यर्थः ४१ विषाणैर्दंतैरवपीडितः अवपीड्यतेतिपाठेअडभावआर्षः ४२ ४३ पितुरपिभगवद्भक्तिमुत्पादयितुंवि

षोल्बणाः ३८ सत्वासक्तमतिःकृष्णेदश्यमानंमहोरगैः । नविवेदात्मनोगात्रंतत्स्मृत्याह्लादसंस्थितः ३९ । । सर्पाऊचुः । । दंष्ट्रावि शीर्णामणयःस्फुटंतिफणेषुतापोहृदयेषुकंपः । नास्यत्वचःस्वल्पमपीहभिन्नंप्रशाधिदैत्येश्वरकार्यमन्यत् ४० । । हिरण्यकशिपुरुवाच । । हेदि ग्गजाःसंकटदंतमिश्राघ्नतैनमस्मद्रिपुपक्षभिन्नम् । तज्जाविनाशायभवंतितस्ययथारणेःप्रज्वलितोहुताशनः ४१ ततःसदिग्गजैर्बालोभूभृच्छिख रसन्निभैः । पातितोधरणीपृष्ठेविषाणैरवपीडितः ४२ स्मरतस्तस्यगोविंदमिभदंताःसहस्रशः । शीर्णावक्षःस्थलंप्राप्यसप्राहपितरंततः ४३ दंताग जानांकुलिशाग्रनिष्ठुराःशीर्णायदेतेनबलंममैतत् । महाविपत्पातविनाशनोयंजनार्दनानुस्मरणानुभावः४४हिरण्यकशिपुरुवाच ।ज्वाल्यतामसुरावह्नि रपसर्पतदिग्गजाः । वायोसमेधयाग्निंत्वंदह्यतामेषपापकृत् ४५ । । पराशरउवाच । । महाकाष्ठचयच्छन्नमसुरेंद्रसुतंततः । प्रज्वाल्यदानवावह्निंदद हुःस्वामिचोदिताः ४६ । । प्रह्लादउवाच । । तातैषवह्निःपवनेरितोपिनमांदहत्यत्रसमंततोहम् । पश्यामिपद्मास्तरणास्तृतानिशीतानिसर्वा णिदिशांमुखानि ४७ अथदैत्येश्वरंप्रोचुर्भार्गवस्यात्मजाद्विजाः । पुरोहितामहात्मानःसाम्नासंस्तूयवाग्मिनः ४८ राजन्निशम्यतांकोपोबालेतुतन येनिजे । कोपोदेवनिकायेषुननुतेसफलोयतः ४९ तथातथैनंबालंतेसंस्करिष्यामहेवयम् । यथाविपक्षनाशायविनीतस्तेभविष्यति ५० बालत्वंस र्वदोषाणांदैत्यराजास्पदंयतः । ततोत्रकोपमत्यर्थंयोक्तुमर्हसिनार्भके ५१ नत्यक्ष्यतिहरेःपक्षमस्माकंवचनाद्यदि । ततःकृत्यांवधायास्यकरिष्या मोऽनिवर्तिनीम् ५२ । । पराशरउवाच । । एवमभ्यर्थितस्तैस्तुदैत्यराजपुरोहितैः । दैत्यैर्निष्क्रामयामासपुत्रंघातकसंचयात् ५३ ततोगुरु गृहेबालःसवसन्बालदानवान् । अध्यापयामासमुहुरुपदेशांतरेगुरोः ५४ । । प्रह्लादउवाच । । श्रूयतांपरमार्थोमेदैतेयादितिजात्मजाः । न

ष्णोःस्मरणप्रभावंस्वयमाह दंताइति कुलिशंवज्रंतदग्रमिवनिष्ठुराद्दढाः महांतंविपदांपातमागमंनाशयतीतितथा विपत्पापेतिपाठेविपदांकारणंपापंविनाशयतीतितथा ४४ एषपापकृद्य दीतिशेषः इतिवास्तवोर्थः ४५ ४६ दिशांमुखानिनिकटादिग्देशान् ४७ भार्गवस्यात्मजाःशंडामर्कादयः ४८ निशम्यतांनिराक्रियतां अनुतनयेकनिष्ठात्मजे अत्रेतिवापाठः निजेस्वौ रसे देवनिकायेसफलः वधफलकत्वात् ४९ ५० ५१ निवर्तिनींघातिकाम् अनिवर्तिनीमितिच्छेदोवा दुष्प्रतीकाराम् ५२ ५३ प्रदर्श्यहरिभक्तेस्तान्प्रभावान्पितरंप्रति प्रह्लादउपदेशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्हान्दैत्यान्बालानशिक्षयत् गुरोरुपदेशांतरेध्यापनविच्छेदेसतिस्वयमध्यापयामासउपदेशम् ५४ हेदैतेयादित्यपत्यानिदितिजात्मजादितेर्नप्तारः मेमत्तःपरमार्थःश्रूयताम् अन्यथामिथ्यैतन्न
मंतव्यम् तत्रहेतुर्नात्रेति मदुक्तौगुरूपदेशइवलोभादिकारणंनास्ति २५ विष्णुभक्तिमुपदेष्टुंप्रथमतोवैराग्यकारणमाह जन्मेत्यादिचतुर्दशभिः अव्याहताअवश्यंभाविनी ५६ ५७ मृतस्य
जन्मभवतीत्ययंएतदर्थप्रतिपादकप्रमाणभूतः जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यचेत्यादिरूपआगमोस्तियतःअतएतन्नान्यथा अत्रतर्कमप्याह एतच्चतथैवमृतस्यैवजन्म यतःउपादानं
प्राग्भवीयशुभाशुभंकर्मरूपकारणंविनाभवोजन्मनभवति अन्यथाकृतनाशाकृताभ्यागमप्रसंगःस्यात् चकाराज्जातस्यमृत्युरित्यपि ५८ ततःकिमतआह गर्भवासादिपुनर्जन्मनउपपादनं
प्रापणंयावत्तावद्दुःखमेव ५९ननुअन्नपानादिजनितंसुखमप्यस्तिकुतोदुःखमेवोच्यतेइतिचेत्तत्राह क्षुत्तृष्णेति क्षुत्पिपासादिदुःखोपशमंमूढःसुखंमन्यतेपुनःक्षुत्पिपासाद्युत्पत्तेरन्नपानादिसंपा
दनप्रयासाच्चतद्दुःखमेवाहुः ६० दुःखत्वेनप्रसिद्धेव्यायामांगप्रहारादौसुखभ्रमंदृष्टांतत्वेनाह अत्यंतेति अत्यंतंस्तिमितांगानांस्तब्धांगानांव्यायामेनमल्लश्रमादिनासुखमिच्छतांप्रहारोमुष्ट्यादि

चान्यथैतन्मंतव्यंनात्रलोभादिकारणम् ५५ जन्मबाल्यंततःसर्वोजंतुःप्राप्नोतियौवनम् । अव्याहतैवभवतिततोनुदिवसंजरा ५६ ततश्चमृत्युम
ध्येतिजंतुर्दैत्येश्वरात्मजाः । प्रत्यक्षंदृश्यतेचैतदस्माकंभवतांतथा ५७ मृतस्यचपुनर्जन्मभवत्येतच्चनान्यथा । आगमोयंतथैतच्चनोपादानंविनोद्भवः
५८ गर्भवासादियावत्तुपुनर्जन्मोपपादनम् । समस्तावस्थकंतावद्दुःखमेवावगम्यताम् ५९ क्षुत्तृष्णोपशमंतावच्छीताद्युपशमंसुखम् । मन्यतोबल
बुद्धित्वाद्दुःखमेवहितत्पुनः ६० अत्यंतास्तिमितांगानांव्यायामेनसुखैषिणाम् । भ्रांतिज्ञानावृताक्षाणांप्रहारोपिसुखायते ६१ क्वशरीरमशेषाणांश्ले
ष्मादीनांमहाचयः । क्वकांतिशोभासौरभ्यकमनीयादयोगुणाः ६२ मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ । देहेचेत्प्रीतिमान्मूढोभवितानरके
पिसः ६२ अग्नेःशीतेनतोयस्यतृषाभक्तस्यचक्षुधा । क्रियतेसुखकर्तृत्वंतद्विलोमस्यचेतरैः ६४ करोतिहेदैत्यसुतायावन्मात्रंपरिग्रहम् । तावन्मा
त्रंसएवास्यदुःखंचेतसियच्छति ६५ यावतःकुरुतेजंतुःसंबंधान्मनसःप्रियान् । तावंतोस्यनिखन्यंतेहृदयेशोकशंकवः ६६ यत्तद्गृहेतन्मनसियत्र

पातःसुखायतेसुखमिवभवति तथाभ्रांतिज्ञानावृताक्षाणांमोहपिहितदृष्टीनांप्रहारःप्रणयकुपितरमणीचरणाघातोपिसुखायते ६१ तदेवंकामिनांसुखंनिंदति क्वेति महाचयःस्थूलसंघातःक्व कांति
गौरवत्वादि शोभाअलंकारादिकृता सौरभ्यंसौगंध्यम् कमनीयंसौकुमार्य एवमादयोगुणाश्चक्व ६२ किंच मांसेति एवंदेहेस्वीयेस्त्रीदेहेवाप्रीतिमांश्चेत्तर्हिनरकेपिप्रीतिमान्भविष्यति नरकस्याप्ये
तद्रूपत्वात् ६३ किंचवस्तुतःसुखसाधनंकिंचिन्नास्तिदुःखप्रतीकारकएवसुखकर्तृत्वारोपादित्याह अग्नेरिति शीतजन्यदुःखप्रतीकारकमात्रस्याग्नेःसुखकर्तृत्वंशीतेनोपाधिनाक्रियतेआरोप्यतेवि
चारतस्तत्रदुःखाभावस्यैवसत्त्वात् एवंतृषातोयस्यक्षुधाचान्नस्यसुखकर्तृत्वमारोप्यते तथाचभागवते कुर्वन्दुःखप्रतीकारंसुखवन्मन्यतेगृहीति तद्विलोमस्याग्न्याविलोमस्यशीतादेःसुखकर्तृ
त्वमितरैरग्न्यादिभिःकृत्वाआरोप्यते यद्वा नैकांततःसुखसाधनंकिंचिदस्तिदुःखसाधनाग्न्यादीनामेवशीतादिभिःसुखकर्तृत्वानुभवादेवंशीतादेरग्न्यादिभिरित्यर्थः ६४ कलत्रपुत्रमित्रादिसंग्रहो
दुःखहेतुरित्याह करोतीति सपरिग्रहएव ६५अतिसुखसाधनत्वेनाभिमताअतिदुःखंप्रयच्छंतीत्याह यावंतइति शोकाएवशंकवःकीलकानिनिखन्यंतेनिपात्यंते तेषामपगमोपिशोकानपगमादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थःशोकशंकूनांदुरुद्धारत्वमाह यत्किंचिद्वस्तुधनादिगृहेतद्यत्रतत्रावतिष्ठमानस्यनित्यंचिंतयतिमनसितिष्ठतिनकेवलंतत्तिष्ठतिकिंतुतस्यनाशदाहापहरणंयत्तदपिवासनारूपेणअस्यमनसिति
ष्ठत्येव कुतस्तत्रैवतिष्ठतीतिपाठेनाशादिमनसिकुतःनकुतश्चित् किंतुतत्रैवगृहएवतिष्ठतोनष्टमपिमनसिवासनारूपेणस्थितंस्मृतंसद्धनादिव्यथयत्येव अतोवासनात्यागेनैवविशोकतेतिभावः
६७प्रत्यक्षदुःखमुक्त्वाजन्मादिष्वपितदेवानुसंधेयमित्याह जन्मनीतिद्वाभ्याम् तत्कथ्यतां सुखंयदिभवेत् कथ्यतांतस्याभावात्कथयितुमशक्यमितिभावः उपसंहरतिएवमिति ६८ ६९
एवंप्रवृत्तिमार्गेदोषोक्त्यावैराग्यमुत्पाद्यविष्णुसेवायांप्रवर्तयन्नाहतदेवमिति ७० बालानामस्माकंनात्राधिकारइतिशंकायामाह माजानीतेति यथापरिमाणभेदेनभिन्नेषुदेहेषुदेहिनस्तदव
स्थानुसंधातुरेकत्वमेवंजन्मांतरेदेहेष्वपिदेहीएकःशाश्वतोनित्यः अतोजराद्याधर्मादेहस्यनात्मनः तथाचदेहात्मविवेकशून्यानामविरक्तानांनात्राधिकारः आत्मानात्माविवेकवतांविरक्ता

तत्रावतिष्ठतः । नाशदाहापहरणंतत्तस्यास्यैवतिष्ठति ६७ जन्मन्यत्रमहद्दुःखंम्रियमाणस्यवापितत् । यातनासुयमस्योग्रंगर्भसंक्रमणेषुच ६८
गर्भेपिसुखलेशोऽपिभवद्भिरनुमीयते । यदितत्कथ्यतामेवंसर्वदुःखमयंजगत् ६९ तदेवमतिदुःखानामास्पदेऽत्रभवार्णवे । भवतांकथ्यतेसत्यंविष्णु
रेकःपरायणम् ७० माजानीतवयंबालादेहीदेहेषुशाश्वतः । जरायौवनजन्माद्याधर्मादेहस्यनात्मनः ७१ बालोऽहंतावदिच्छातोयतिष्येश्रेयसेयुवा ।
युवाहंवार्धकेप्राप्तेकरिष्याम्यात्मनोहितम् ७२ वृद्धोऽहंममकार्याणिसमस्तानिनगोचरे । किंकरिष्यामिमंदात्मासमर्थेननयत्कृतम् ७३ एवंदुरा
शयाक्षिप्तमानसःपुरुषःसदा । श्रेयसोभिमुखंयातिनकदाचित्पिपासितः ७४ बाल्येक्रीडनकासक्तायौवनेविषयोन्मुखाः । अज्ञानयंत्यशक्त्याचवार्ध
कंसमुपस्थितम् ७५ तस्माद्बाल्येविवेकात्मायतेतश्रेयसेसदा । बाल्ययौवनवृद्धाद्यैर्देहभावैरसंगतः ७६ तदेतद्वोमयाख्यातंयदिजानीतनानृतम् ।
तदस्मत्प्रीतयेविष्णुःस्मर्यतांबंधमुक्तिदः ७७ आयासःस्मरणेकोऽस्यस्मृतोयच्छतिशोभनम् । पापक्षयश्चभवतिस्मरतांतमहर्निशम् ७८ सर्वभूत
हितेतस्मिन्मतिर्मैत्रीदिवानिशम् । भवतांजायतामेवंसर्वक्लेशान्प्रहास्यथ ७९ तापत्रयेणाभिहतंयदेतदखिलंजगत् । तदाशोच्येषुभूतेषुद्वेषंप्रा
ज्ञःकरोतिकः ८० अथभद्राणिभूतानिहीनशक्तिरहंपरम् । मुदंतथापिकुर्वीतहानिर्द्वेषफलंयतः ८१ बद्धवैराणिभूतानिद्वेषंकुर्वंतिचेत्ततः । सु

नांतुभवतामत्राधिकारएवेतिभावः ७१ विपक्षेबाधकमाह बालोहमिति इच्छातोयतिष्येचरिष्यामीत्यर्थः ७२ ७३ दुराशाविषयतृष्णातया पिपासितःश्रेयस्तृष्णावानेव अनेनरज
कादिदृष्टांतःसूचितः रजकोहिगंगाजलस्थइदमिदंप्रक्षाल्यांबुपेयामिति जालिकोपिइममसुंमत्स्यंहत्वापाथःपास्यामीतिपिपासितएवम्रियतेयथाएवंपरमानंदसुधाब्धौविष्णौस्थित्वापिनतत्ररमत
इति ७४ तथाहि बाल्यइति समुपस्थितंप्राप्तंवार्धकमशक्त्यानयंतियापयंतितदापिनश्रेयसेवर्ततइत्यर्थः ७५ अतःश्रेयासिविलंबोनकार्यइत्याह तस्मादिति विवेकआत्मानिवुद्धौयस्यसः
विवेकमेवाह बाल्येति वृद्धशब्दोभावपरः ७६ यदियुष्माकमत्रनास्थातथापिमत्प्रीतयेविष्णुःस्मर्यताम् ७७ अस्तिचेदास्थातदामहाफलत्वात्सुखकरत्वाच्चेदनेवकार्यमित्याहआयासइति
७८ ततःकिमित्याकांक्षायांतत्फलमाशासानेएवाहसर्वभूतेति तस्मिन्विष्णौमतिःसर्वभूतेषुमैत्रीचभवतांजायतांततश्चसर्वक्लेशान्प्रहास्यथ ७९ सर्वभूतेषुमैत्रीदुष्करेतिचेत्तत्राह तापत्रयेणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिहतंक्लिष्टंजगदितियद्यदामतिस्तदातत्रद्वेषंकःकुर्यात्अपिदुःखहानायमैत्रीमेवकुर्यात् ८० अथैवंमतिः भूतानिभद्राणिधनादिसंपदाल्लब्धानिअहमेवधनार्जनेहीनशक्तिःक्लिष्टइतितथापिमु दंहर्षंकुर्वीतनतुद्वेषम् यतोद्वेषस्यहानिरेवफलम् ८१ बद्धवैराणिस्वस्मिन्वैरंकुर्वतिचेत्तदाअतिमोहेनव्याप्तानीतिकृत्वामनीषिणांशोच्यानिअनुकंप्यानितेषुसर्वथाद्वेषोनयुक्तइत्यर्थः ८२ ए तेचद्वेषोपशमप्रकारामध्यमाधिकारिणामेवोक्तानतूत्तमाधिकारिणामित्याह एतइति भिन्नदृशाभेददृष्ट्या भिन्नदृशामितिवापाठस्तत्रभिन्नदर्शनेभ्युपगममंगीकारंकृत्वाद्वेषोपशमोपायभे दाःकथिताः उक्तानामुपायानांपरमार्थसंक्षेपोममममत्तःश्रूयताम् ८३ तमेवाह विस्तारइति सर्वभूतस्यसर्वात्मनोविष्णोरिदंसर्वंजगत् विस्तारोविभूतिः तस्मादात्मवदभेदेनद्रष्टव्यम् ८४ आसुरंभावंरागद्वेषादिस्वभावंसम्यगुत्सृज्ययूयंवयंचनिर्वृतिंयथायेनप्रकारेणप्राप्स्यामस्तथायत्नंकरिष्यामः युगपद्वचनेउत्तमःपुरुषः ८५ तामेवनिर्वृतिंतत्प्रयत्नंचविशिनष्टि येतिचतुर्भिः

शोचान्यतिमोहेनव्याप्तानीतिमनीषिणाम् ८२ एतेभिन्नदृशादैत्याविकल्पाःकथितामया । कृत्वाभ्युपगमंत्वत्रसंक्षेपःश्रूयतांमम ८३ विस्तारः सर्वभूतस्यविष्णोर्विश्वमयंजगत् । द्रष्टव्यमात्मवत्तस्मादभेदेनविचक्षणैः ८४ समुत्सृज्यासुरंभावंतस्माद्यूयंतथावयम् । तथायत्नंकरिष्यामोय थाप्राप्स्यामनिर्वृतिम् ८५ यानाग्निनानचार्केणनेंदुनानैववायुना । पर्जन्यवरुणाभ्यांवानसिद्धैर्नचराक्षसैः ८६ नयक्षैर्नैवदैत्येंद्रैर्नोरगैर्नचकि न्नरैः । नमनुष्यैर्नपशुभिर्दोषैर्नैवात्मसंभवैः ८७ ज्वरादिरागातीसारप्लीहगुल्मादिकैस्तथा । द्वेषेर्ष्यामत्सराद्यैर्वारागलोभादिभिःक्षयम् ८८ नचान्यैर्नीयतेकैश्चिन्नित्यायात्यंतनिर्मला । तामाप्नोत्यमलंन्यस्यकेशवेहृदयंनरः ८९ असारसंसारविवर्तनेषुमाधातोषंप्रसभंब्रवीमि । सर्वत्र दैत्याःसमतामुपेतसमत्वमाराधनमच्युतस्य ९० तस्मिन्प्रसन्नेकिमिहास्त्यलभ्यंधर्मार्थकामैरलमल्पकामे । समाश्रिताद्ब्रह्मतरोरनंतान्निःसंश यंप्राप्स्यथवैमहत्फलम् ९१ । । इतिश्रीविष्णुपुराणेप्रथमेअंशेप्रह्लादानुशासनंनामसप्तदशोध्यायः १७ । । पराशरउवाच । तस्यैवं दानवाश्चेष्टांदृष्ट्वादैत्यपतेर्भयात् । आचचख्युःसचोवाचसूदानाहूयसत्वरः १ । । हिरण्यकशिपुरुवाच । । हेसूदाममपुत्रोऽसावन्येषामपि

यानिर्वृतिर्मोक्षाख्याअग्न्यादिनाअन्यैश्चक्षयंननीयतेतांनिर्वृतिंकेशवेहृदयंन्यस्यकेशवस्मृत्याप्राप्नोतीतिचतुर्थेनान्वयः वेदांतिनस्तुकेशवेतत्पदलक्ष्येहृदयंत्वंपदलक्ष्यंन्यस्यएकत्वेनानुसं धायनिर्वृतिंमुक्तिंप्राप्नोतीतिवदंति तत्राग्न्यादिभिराधिदैविकैर्मनुष्यादिभिराधिभौतिकैरात्मसंभवैराध्यात्मिकैर्द्विविधैर्ज्वरादिभिःशारीरैर्द्वेषादिभिर्मानसैश्चान्यैस्तन्मूलभूतैरविद्याकामकर्मभि रितिविवेक्तव्यम् ८६ ८७ ८८ ८९ सर्वोपदेशसारमाह असारोयःसंसारस्तस्मिन्विवर्तनानिदेवमनुष्यतिर्यगादिजन्मानितेषुतत्तदुचितैर्भोगैस्तोषंमायातनप्राप्नुतकिंतुसर्वभूतेषुसमतांसमद र्शित्वंउपेतप्राप्नुततदेवाच्युतस्याराधनम् ९० ततःकिमतआह तस्मिन्निति प्रसन्नेप्रीतेसतिनकिमपिदुर्लभंतथापित्रिवर्गोनप्रार्थ्यःतुच्छत्वात् तर्किमोक्षःप्रार्थनीयोनेत्याह समाश्रितात्सामा न्यतरोरेवायाचितफलप्राप्तिर्नियतायदितदाब्रह्मतरोरप्रार्थितंमोक्षरूपंमहत्फलंप्राप्स्यथेतिकिंवाच्यमिति ९१ इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांप्रथमेअंशेप्रह्लादशासनं नामटीकायांसप्तदशोध्यायः १७ पुरोधसोदैत्यपतेर्हंतुकामान्स्वकृत्यया प्रह्लादोष्टादशेनष्टानजीवयदितीर्यते १ चेष्टामुपदेशरूपाम् १ कुमार्गस्यदेशकउपदेष्टा २ ज्ञातेसतिप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीकारंकरिष्यतीत्यतआह अविज्ञातंयथास्यात्तथादीयताम् २ ३ ४ अनंतशब्दस्योच्चारणेनावृत्तिपाठेनाभिमंत्र्यतदुपरिजप्त्वातस्मैनिवेद्येतिवा ५ अनंतस्यनाम्नःख्यात्याकीर्तनेन स्मृतीतिपाठेस्मृत्यातदनुसंधानेननिर्वीर्यमतोऽविकारंकंपादिशून्यंयथास्यादेवंजरयामास ६ ७ ८ सुतस्यातिशक्तिंज्ञात्वाब्राह्मणानामशक्यंनास्तीतितत्रतान्नियुंक्ते त्वर्यतामिति ९ १० त्रै

दुर्मतिः । कुमार्गदेशकोदुष्टोहन्यतामविलंबितम् २ हालाहलंविषंतस्यसर्वभक्ष्येषुदीयताम् । अविज्ञातमसौपापोवध्यतांमाविचार्यताम् ३ । । पराशरउवाच । । तेतथैवततश्चक्रुःप्रह्लादायमहात्मने । विषदानंयथाज्ञप्तंपित्रातस्यमहात्मनः ४ हालाहलंविषंघोरमनंतोच्चारणेनसः । अभिमंत्र्यसहान्नेनमैत्रेयबुभुजेतदा ५ अविकारंसतद्भुक्त्वाप्रह्लादःस्वस्थमानसः । अनंतख्यातिनिर्वीर्यंजरयामासतद्विषम् ६ ततःसूदाभयत्रस्ताजीर्णंदृष्ट्वामहाविषम् । दैत्येश्वरमुपागम्यप्रणिपत्येदमब्रुवन् ७ दैत्यराजविषंदत्तमस्माभिरतिभीषणम् । जीर्णंतच्चसहान्नेनप्रह्लादेनसुतेनते ८ । । हिरण्यकशिपुरुवाच । । त्वर्यतांत्वर्यतांसद्योहेहेदैत्यपुरोहिताः । कृत्यांतस्यविनाशायउत्पादयतमाचिरम् । ९ । । पराशरउवाच । । सकाशमागम्यततःप्रह्लादस्यपुरोहिताः । सामपूर्वमथोचुस्तेप्रह्लादंविनयान्वितम् १० । । पुरोहिताऊचुः । । जातस्त्रैलोक्यविख्यातआयुष्मान्ब्रह्मणःकुले । दैत्यराजस्यतनयोहिरण्यकशिपोर्भवान् ११ किंदेवैःकिमनंतेनकिमन्येनतवाश्रयः । पितातेसर्वलोकानांत्वंतथैवभविष्यसि १२ तस्मात्परित्यजैतांत्वंविपक्षस्तवसंहिताम् । वाचंपितासमस्तानांगुरूणांपरमोगुरुः १३ । प्रह्लादउवाच । । एवमेतन्महाभागाःश्लाघ्यमेतन्महाकुलम् । मरीचेःसकलेप्यस्मिंस्त्रैलोक्येकोन्यथावदेत् १४ पिताचममसर्वस्मिञ्जगत्युत्कृष्टचेष्टितः । एतदप्यवगच्छामिसत्यमत्रापिनानृतम् १५ गुरूणामपिसर्वेषांपितापरमकोगुरुः । यदुक्तंभ्रांतिरत्रापिस्वल्पापिहिनविद्यते १६ पितागुरुर्नसंदेहःपूजनीयःप्रयत्नतः । तत्रापिनापराध्यामीत्येवंमनसिमेस्थितम् १७ यत्वेतत्किमनंतेनेत्युक्तंयुष्माभिरीदृशम् । कोब्रवीतियथायुक्तंकिंतुनैतद्वचोर्थवत् १८ इत्युक्त्वासोभवन्मौनीतेषांगौरवयंत्रितः । प्रहस्यचपुनःप्राहकिमनंतेनसाध्विति १९ साधुभोःकिमनंतेनसाधुभोगुरवोमम । श्रूयतांयदनंतेनयदिखेदंनयास्यथ २० धर्मार्थकाममोक्षाख्याःपुरुषार्थाउदाहृताः । चतुष्टयमिदंयस्मात्तस्मात्किंकिमिदंवृथा २१ मरीचि

लोक्यविख्यातेब्रह्मणःकुले ११ स्तवेनस्तुत्यासंहितांसंबद्धांवाचंपरित्यज १२ १३ मरीचेःकश्यपपितुरेतत्कुलंत्रैलोक्येश्लाघ्यमेवअन्यथाकोवदेन्नकोपि १४ उत्कृष्टंनीतिशास्त्राविरुद्धंचेष्टितंयस्यसः उपालंभशंकांनिराकरोति नानृतामिति १५ १६ तत्रापिपूजायांनापराध्यामिनान्यथाकरोमिनस्खलामीतियावत् १७ यथायुक्तंयुक्तमनतिक्रांतम् यद्वा यथावत्प्रकारकदोषेणायुक्तंतथाकोब्रवीति किंतुसामान्यतएतद्वचोनार्थवादिति १८ १९ किमनंतेनसाधुभोइतिपुनरुक्तिःसोपालंभत्वख्यापनाय २० पुरुषार्थचतुष्टयमिदमनंतेनहेतुनेतिपूर्वेणान्वयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मादेवंतस्मात्तदिदंकिमनंतेनेतिवचःकिंवृथैवेत्यर्थः यद्वाइदंपुरुषार्थचतुष्टयंयस्मादनंताद्भवतितस्मात्किंस्यादितीदंनिरर्थकंवाक्यंकिंवृथैवोच्यतइत्यर्थः २१ पुरुषार्थचतुष्टयहेतुत्वमुदाहरन्नेवाह मरीचिमिश्रैरितिचतुर्भिः मरीचिमिश्रैर्मरीचिमुख्यैस्तत्संहितैर्वा २२ २३ संपद्भोगसाधनधनादिमत्त्वम् ऐश्वर्यंस्वातंत्र्यम् माहात्म्यंज्ञानादिकृतंमहत्त्वम् ज्ञानंतत्त्वविवेकः संततिःकुलप्रवाहः कर्माणिचअग्निहोत्रादीनि एतेषांमुक्तेश्चमूलंहरेराराधनमेवअतःकिमपिनालभ्यम् एकतालभ्यमितिपाठेएकतयासमदृष्ट्यालभ्यमाराधनमित्यर्थः २४ यतोधर्मादिफलंभव

मिश्रैर्दक्षेणतथैवान्यैरनंततः । मर्धःप्राप्तस्तथैवान्यैरर्थःकामस्तथापरैः २२ तत्तत्त्ववेदिनोभूत्वाज्ञानध्यानसमाधिभिः । अवापुर्मुक्तिमपरेपुरुषाध्यस्तबंधनाः २३ संपदैश्वर्यमाहात्म्यज्ञानसंततिकर्मणाम् । विमुक्तेश्चैवनालभ्यंमूलमाराधनंहरेः २४ यतोधर्मार्थकामाख्यंविमुक्तिश्चफलंद्विजाः । तेनापिहिकिमित्येवमनंतेनकिमुच्यते २५ किंचात्रबहुनोक्तेनभवंतोगुरवोमम । वदंतिसाधुवासाधुविवेकोऽस्माकमल्पकः २६ पुरोहिताऊचुः । । दह्यमानस्त्वमस्माभिरग्निनाबालरक्षितः । भूयोनवक्ष्यसीत्येवंनैवंज्ञातोस्यबुद्धिमान् २७ यद्यस्मद्वचनान्मोहग्राहंनत्यक्ष्यतेभवान् । ततःकृत्यांविनाशायतवस्त्रक्ष्यामदुर्मते २८ । । प्रह्लादउवाच । । कःकेनहन्यतेजंतुर्जंतुःकःकेनरक्ष्यते । हंतिरक्षतिचैवात्माह्यसत्साधुसमाचरन् २९ । । पराशरउवाच । । इत्युक्तास्तेनतेक्रुद्धादैत्यराजपुरोहिताः । कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम् ३० अतिभीमासमागम्यपादन्यासक्षतक्षितिः । शूलेनसासुसंक्रुद्धातंजघानाशुवक्षसि ३१ तत्तस्यहृदयंप्राप्यशूलंबालस्यदीप्तिमत् । जगामखंडितंभूमौतत्रापिशतधागतम् ३२ यत्रानपायीभगवान्हृद्यास्तेहरिरीश्वरः । भंगोभवतिवज्रस्यतत्रशूलस्यकाकथा ३३ अपायेतत्रपापैश्चपातितादैत्ययाजकैः । तानेवसाजघानाशुकृत्यानाशंजगामच ३४ कृत्ययादह्यमानांस्तान्विलोक्यसमहामतिः । त्राहिकृष्णेत्यनंतेतिवदन्नभ्युपपद्यत ३५ सर्वव्यापिञ्जगन्नाथजगत्स्रष्टर्जनार्दन । त्राहिविप्रानिमानस्माद्दुःसहान्मंत्रपावकात् ३६ यथासर्वेषुभूतेषुसर्वव्यापीजगद्गुरुः । विष्णुरेवतथासर्वेजीवंत्वेतेपुरोहिताः ३७ यथासर्वगतंविष्णुंमन्यमानोनपापकम् । चिंतयाम्यरिपक्षेपिजीवंत्वेतेतथाद्विजाः ३८ येहंतुमागतादत्तैर्यैर्विषैर्यैर्हुताशनः । यैर्दिग्गजैरहंक्षुण्णोदष्टःसर्पैश्चयैरहम् ३९ तेष्वहंमित्रपक्षेचसमःपापोस्मिनक्वचित् । यथातेनाद्यसत्येनजीवंत्वसुरयाजकाः ४० । । पराशरउ

तितेनाप्यनंतेनाकिमितिभवद्भिःकिमुच्यतइत्यन्वयः २५ सोपालंभोक्तिंगमयति किंचेति २६ एवंविपक्षस्तुतियुक्तंभूयोनवक्ष्यसीतिमत्वापूर्वमस्माभिस्त्वंरक्षितोसिअबुद्धिमानितित्वंनज्ञातोसि २७ मोहग्राहंमोहेनदुराग्रहम् २८ असत्समाचरन्नात्मानंहंतिसाधुसमाचरन्नात्मैवात्मानंरक्षतीत्यन्वयः २९ ३० पादस्यन्यासैःपातैःक्षताक्षितिर्यस्याःसा खंडितंभिन्नंसज्जगामपपात ३१ तत्रहृदि ३२ ३३ ३४ अभ्युपपद्यतरक्षार्थंतदभिमुखमधावदित्यर्थः अडभावश्छांदसः ३५ ३६ ३७ पापकंदुःखम् ३८ ३९ पापोनष्टविचिंतकः ४० बलंसामर्थ्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीर्यतेजः ४१ ४२ ४३ इतिश्रीवैष्णवाकूतचंद्रिकायांप्रथमेअंशेअष्टादशोध्यायः १८ । प्रह्लादस्योनविंशेतुपुनःकदनमुल्बणम् अचलैश्चाचितस्याब्धौभगवत्स्तुतिरुच्यते
१ सहजनैसर्गिकम् १ २ ३ सामान्यःसमानः ४ किंचअन्येषांपापानितज्जन्यदुःखानिचनचिंतयतिनाशास्तेतस्यपापागमोदुःखागमोनास्तिहेत्वभावात्परद्रोहादिनिमित्ताभावात् ५

वाच । । इत्युक्तेतेनतेसर्वेसंहृष्टाश्चनिरामयाः । समुत्तस्थुर्द्विजाभूयस्तंचोचुःप्रश्रयान्वितम् ४१ । । पुरोहिताऊचुः । । दीर्घायुरप्रतिहत
बलवीर्यसमन्वितः । पुत्रपौत्रधनैश्वर्ययुक्तोवत्सभवोत्तम ४२ इत्युक्त्वातंततोगत्वायथावृत्तंपुरोहिताः । दैत्यराजायसकलमाचचख्युर्महामुने ४३
इतिश्रीविष्णुपुराणेप्रथमेअंशेअष्टादशोध्यायः १८ । । ७ । । पराशरउवाच । । हिरण्यकशिपुःश्रुत्वातांकृत्यांवितथीकृताम् ।
आहूयपुत्रंपप्रच्छप्रभावस्यास्यकारणम् १ । । हिरण्यकशिपुरुवाच । । प्रह्लादसुप्रभावोसिकिमेतत्तेविचेष्टितम् । एतन्मंत्रादिजनितमुता
होसहजंतव २ । । पराशरउवाच । । एवंपृष्टस्तदापित्राप्रह्लादोऽसुरबालकः । प्रणिपत्यपितुःपादाविदंवचनमब्रवीत् ३ । । प्रह्लादउ
वाच । नमंत्रादिकृतंचैतन्नचनैसर्गिकंमम । प्रभावएषसामान्योयस्ययस्याच्युतोहृदि ४ अन्येषांयोनपापानिचिंतयत्यात्मनोयथा । तस्यपापा
गमस्तातहेत्वभावान्नविद्यते ५ कर्मणामनसावाचापरपीडांकरोतियः । तद्बीजंजन्मफलतिप्रसूतंतस्यचाशुभम् ६ सोहंनपापमिच्छामिनकरोमिव
दामिच । चिंतयन्सर्वभूतस्थमात्मन्यपिचकेशवम् ७ शारीरंमानसंदुःखंदैवंभूतभवंतथा । सर्वत्रशुभचित्तस्यतस्यमेजायतेकुतः ८ एवंसर्वेषुभूते
षुभक्तिरव्यभिचारिणी । कर्तव्यापंडितैर्ज्ञात्वासर्वभूतमयंहरिम् ९ । । पराशरउवाच । । इतिश्रुत्वासदैत्येंद्रःप्रासादशिखरेस्थितः । क्रोधांध
कारितमुखःप्राहदैतेयकिंकरान् १० दुरात्माक्षिप्यतामस्मात्प्रासादाच्छतयोजनात् । गिरिपृष्ठेपतत्वस्मिञ्शिलाभिन्नांगसंहतिः ११ ततस्तांचिक्षि
पुःसर्वेबालंदैतेयकिंकराः । पपातसोप्यधःक्षिप्तोहृदयेनोद्वहन्हरिम् १२ पतमानंजगद्धात्रीजगद्धातरिकेशवे । भक्तियुक्तंदधारैनमुपसंगम्यमेदिनी
१३ ततोविलोक्यतंसुस्थमविशीर्णास्थिपंजरम् । हिरण्यकशिपुःप्राहशंबरंमायिनांवरम् १४ । । हिरण्यकशिपुरुवाच । । नास्माभिःशक्य
तेहंतुमयंदुर्वृत्तबालकः । मायांवेत्तिभवांस्तस्मान्माययैनंनिषूदय १५ । । शंबरउवाच । । सूदयाम्येषदैत्येंद्रपश्यमायाबलंमम । सहस्रमा

तत्परपीडनंबीजंजन्मफलतिनिष्पादयति तस्यजन्मनःअशुभंप्रसूतंप्रसवः तद्बीजजन्मेतिप्रभूतमितिचपाठेतद्बीजवज्जन्मयस्याशुभस्यतत्प्रभूतमधिकंफलतिदुःखरूपेणवर्धतइत्यर्थः ६
७ ८ एवंसर्वभूतमयंहरिंज्ञात्वासर्वभूतेषुभक्तिःकार्या ९ क्रोधेनांधकारितंजातांधकारामिवदुःप्रेक्षंमुखंयस्य १० प्रह्लादस्यब्राह्मणानांचान्यतराविनाशात्कपटकृत्येतिमत्वादैत्याना
दिशति दुरात्मेति ११ १२ १३ १४ वास्तवैरुपायैर्हंतुमशक्यत्वात्तद्वधेमायिनंनियुंक्ते नास्माभिरिति निषूदयविनाशय १५ सहस्रमात्रमन्यूनानतिरिक्तंकोटीशतंयथातथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्य १६ १७ १८ सुष्ठुदर्शनंसुदर्शनंशुद्धज्ञानमयम् १९ अतएवतेनमायासहस्रंप्रत्येकंविनाशितम् २० दृश्येषुवधोपायेषुप्रतिघातमसौकरोतीत्यदृश्यंवायुंनियुंक्ते संशोषकमिति २१ लघुशीघ्रम् लघुरितिपाठेवेगवान्शीतोतिरूक्षःशीतज्वरप्रायः २२ तेनाविष्टंव्याप्तम् धरणीधरंवायुभक्षकशेषस्वरूपम् २३ २४ २५ राज्ञांराज्यफलप्रदमित्यन्वयः २६ २७ २८ मित्रेषुसहजप्राकृतकृत्रिमेषु एवमरिवर्गेषुचत्रिविधेषु त्रिषुकालेषुक्षयवृद्धिसाम्यसमयेषु मध्यस्थोपित्रिविधःस्वस्यशत्रोश्चभूम्यनंतरःक्षयवृद्ध्युदासीनदूरस्थःस्वस्यशत्रोर्वाविषयस्थानिगृह्यसा

त्रंमायानांपश्यकोटीशतंयथा १६ । । पराशरउवाच । । ततःससृजेमायांप्रह्लादेशंबरासुरः । विनाशमिच्छन्दुर्बुद्धिःसर्वत्रसमदर्शिनि । १७ समाहितमनाभूत्वाशंबरेपिविमत्सरः । मैत्रेयसोपिप्रह्लादःसस्मारमधुसूदनम् १८ ततोभगवतातस्यरक्षार्थंचक्रमुत्तमम् । आजगामसमाज्ञप्तंज्वालामालिसुदर्शनम् १९ तेनमायासहस्रंतच्छंबरस्याशुगामिना । बालस्यरक्षतादेहमेकैकश्येनसूदितम् २० संशोषकंततोवायुंदैत्येंद्रइदमब्रवीत् । शीघ्रमेषममादेशाद्दुरात्मानीयतांक्षयम् २१ तथेत्युक्त्वातुसोप्येनंविवेशपवनोलघु । शीतोतिरूक्षःशोषायतद्देहस्यातिदुःसहः २२ तेनाविष्टमथात्मानंसुबुद्धादैत्यबालकः ।हृदयेनमहात्मानंदधारधरणीधरम् २३ हृदयस्थस्ततस्तस्यतंवायुमतिशोषणम् ।पपौजनार्दनःक्रुद्धःसययौपवनःक्षयम् २४ क्षीणासुसर्वमायासुपवनेसंगतेक्षयम् । जगामसोपिभवनंगुरोरेवमहामतिः २५ अहन्यहन्यथाचार्योनीतिंराज्यफलप्रदाम् । ग्राहयामासतंबालंराज्ञामुशनसाकृताम् २६ गृहीतनीतिशास्त्रंतंविनीतंसयदागुरुः । मेनेतदैनंतत्पित्रेकथयामासशिक्षितम् २७ । । आचार्यउवाच । गृहीतनीतिशास्त्रस्तेपुत्रोदैत्यपतेकृतः । प्रह्लादस्तत्त्वतोवेत्तिभार्गवेणयदीरितम् २८ । । हिरण्यकशिपुरुवाच । । मित्रेषुवर्तेतकथमरिवर्गेषुभूपतिः । प्रह्लादत्रिषुकालेषुमध्यस्थेषुकथंचरेत् २९ कथंमंत्रिष्वमात्येषुबाह्येष्वभ्यंतरेषुच । चरेषुपौरवर्गेषुशंकितेष्वितरेषुच ३० कृत्याकृत्यविधानंचदुर्गाटविकसाधनम् । प्रह्लादकथ्यतांसम्यक्तथाकंटकशोधनम् ३१ एतच्चान्यच्चसकलमधीतंभवतायथा । तथामेकथ्यतांज्ञातुंतवेच्छामिमनोगतिम् ३२ । । पराशरउवाच । । प्रणिपत्यततःपादौपितुःप्रश्रयभूषणः । प्रह्लादःप्राहदैत्येंद्रंकृतांजलिपुटस्थितः ३३ । । प्रह्लादउवाच । ममोपदिष्टंसकलंगुरुणानात्रसंशयः । गृहीतंचमयाकिंतुनसदेतन्मतंमम ३४ सामचोपप्रदानंचभेददंडौतथापरौ । उपायाःकथिताह्येतेमित्रादीनां

म्यकर्त्ताचेति २९ मंत्रिषुबुद्धिसहायेषु अमात्येषुकार्यसहायेषु बाह्येषुशुल्काद्यधिकृतेषु अभ्यंतरेषुअंतःपुरमहानसाद्यधिकृतेषु चरेषुगूढपुरुषेषुदूतेषु शंकितेषुजिह्वावशीकृतेषुभूपेषु इतरेषु तद्विपरीतेषुअसत्संगिषुच ३० कृत्याकृत्यविधानंसंधिविग्रहादिषुकुत्रकिंकार्यंकुत्रकिमकार्यमित्येतत्प्रकारकम् दुर्गाटविकसाधनम् दुर्गंपर्वतोदकादि आटवीकामहारण्यवासिनःपुलिंदम्लेच्छादयः तेषांसाधनंवशीकरणम् कंटकाश्चौराःक्षुद्रशत्रवोवातेषांशोधनमुन्मीलनम् ३१ अन्यच्चसामभेदादि ३२ प्रश्रयोविनयःसएवभूषणंयस्यसः ३३ ३४ कुपितस्यस्तुत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिःसाधनंसाम ऐक्यमत्येनस्थितानांभयादिजननेनपृथक्करणंभेदः भूम्यर्थादेःसमयेनदानमुपप्रदानम् क्लेशेनार्थाहरणंदंडःइत्येतउपायाः ३५ माक्रुधःक्रोधंमाकुरु ३६ सर्वभूतात्मकेसर्व भूतानामात्मनिक्षेत्रज्ञे परमात्मनिसर्वजीवनियंतरि ३७ परमात्मानिमास्तुलोकेषुमित्रामित्रकथास्तुतत्राह त्वयीतिसर्वत्रास्तिचेत्तर्हिपृथक्भेदःकुतः ३८ दुष्टाःरागद्वेषहेतुकाआरंभाउद्यमा स्तेषामुक्तिविस्तरैर्नीतिशास्त्रैरलम् दृष्टारंभेतिपाठेदृष्टारंभाऐहिकमात्रार्थारंभाः शोभनेनिदत्तेकर्मणिआत्मविद्यायांवा ३९ ननुआयुर्वेदोधनुर्वेदोगांधर्वश्चेतितेत्रयः अर्थशास्त्रचतुर्थास्तुवि द्याअष्टादशैवचेतिस्मृतेर्दंडनीतिरपिविद्यैवतत्कथमविद्यांतर्गतैरित्युच्यतेतत्राह विद्याबुद्धिरिति बालःखद्योतमग्निंकिंनमन्यतेऽपितुमन्यतएव ४० शोभनेयत्नःकर्तव्यइतियदुक्तंतदेवशोभनं

तुसाधने ३५ तानेवाहंनपश्यामिमित्रादींस्तातमाक्रुधः । साध्याभावेमहाबाहोसाधनैःकिंप्रयोजनम् ३६ सर्वभूतात्मकेतातजगन्नाथेजगन्मये । परमात्मनिगोविंदेमित्रामित्रकथाकुतः ३७ त्वय्यस्तिभगवान्विष्णुर्मयिचान्यत्रचास्तिसः । यतस्ततोऽयंमित्रंमेशत्रुश्चेतिपृथक्कुतः ३८ तदेभिरल मत्यर्थंदुष्टारंभोक्तिविस्तरैः । अविद्यांतर्गतैर्यत्नःकर्तव्यस्तातशोभने ३९ विद्याबुद्धिरविद्यायामज्ञानात्तातजायते । बालोऽग्निंकिंनखद्योतमसुरेश्वरम न्यते ४० तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये । आयासायापरंकर्मविद्यान्याशिल्पनैपुणम् ४१ यदेतदवगम्याहमसारंसाध्यमुत्तमम् । निशाम यमहाभागप्रणिपत्यब्रवीमियत् ४२ नचिंतयतिकोराज्यंकोधनंनाभिवाञ्छति । तथापिभाव्यमेवैतदुभयंप्राप्यतेनरैः ४३ सर्वएवमहाभागमहत्त्वं प्रतिसोद्यमः । तथापिपुंसांभाग्यानिनोद्यमाभूतिहेतवः ४४ जडानामपिलोकानामशूराणामपिप्रभो । भाग्यभोग्यानिराज्यानिसंत्यनीतिमताम पि ४५ तस्माद्यतेतपुण्येषुयइच्छेन्महतींश्रियम् । यतितव्यंसमत्वेचनिर्वाणमपिचेच्छता ४६ देवामनुष्याःपशवःपक्षिवृक्षसरीसृपाः । रूपमेतद नंतस्यविष्णोर्भिन्नमवस्थितम् ४७ एतद्विजानतासर्वंजगत्स्थावरजंगमम् । द्रष्टव्यमात्मवद्विष्णुर्यतोऽयंविश्वरूपधृक् ४८ एवंज्ञातेसभगवानना दिःपुरुषोत्तमः । प्रसीदत्यच्युतस्तस्मिन्प्रसन्नेक्लेशसंक्षयः ४९ । । पराशरउवाच । । एतच्छ्रुत्वासकोपेनसमुत्थायवरासनात् । हिरण्यक शिपुःपुत्रंपदावक्षस्यताडयत् ५० उवाचचसकोपेनसामर्षःप्रज्वलन्निव । निष्पीड्यपाणिनापाणिंहंतुकामोजगद्यथा ५१ हेविप्रचित्तेहेराहोहेबलेसुम

कर्मादिकमाह तत्कर्मेति अपरमर्थकामाद्यर्थकर्मआयासायश्रमार्थमेव अन्याविद्याअर्थकामादिशास्त्रंशिल्पनैपुणंऐंद्रजालिकादिशिल्पिविद्यावत्कौशलमात्रमेव तुच्छफलत्वात् ४१ तदे तद्राज्यादिसाध्यमसारंतुच्छंज्ञात्वाउत्तमंसाध्यंयत्प्रकर्षेणनत्वाब्रवीमितन्निशामयशृण्वित्यन्वयः ४२ किंचराज्यादेःश्रेष्ठफलत्वेपितदर्थंपुण्यएवयत्नःकर्तव्योनतुदुष्टनीतिज्ञानोद्यममात्रेतस्य व्यभिचारित्वादित्याह नेतित्रिभिः भाव्यंप्राक्तनपुण्यवशाद्भवितव्यमेतदुभयंराज्यंधनंचनरैःपुरुषैःप्राप्यतइति ४३ महत्त्वंराज्यधनादिविभूतिंप्रतिभाग्यमेवभूतेःराज्यादिसंपत्ते र्हेतवोनतूद्यमाः ४४ तदेवाह जडानांअदक्षाणामिष्टानिष्टविवेकशून्यानांभाग्येनैवभोग्यानिराज्यानिभवंति ४५ पूर्वोक्तद्वयमुपसंहरति तस्मादिति यइच्छेदितिसंभावनामात्रम् ४६ समत्वदृष्टितत्फलंचाह देवाइतित्रिभिः ४७ ४८ क्लेशानांसंक्षयआत्यंतिकोनाशः ४९ ५० सामर्षःअसहनः ५१ अयंसर्वोपायैर्हंतुमशक्यउपेक्षितश्चविष्णुभक्त्युपदेशेनलोकान्नाश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येदितिसमुद्रेनागपाशैर्बद्धाक्षिप्तःपर्वतैराचितःसर्वहरात्कालादेवमारेष्यतीतिमत्वाआह हेविप्रचित्तेइतित्रिभिः हेबलेसुमहार्णवेअतिगंभीरसमुद्रभागे हेबलैषमहार्णवइतिवापाठः हेबलेषमहार्णवइतिपाठेएकाराकारलोपाद्बलेर्बलस्यवासंबोधनम् ५२ ५३ दोषोपशांतिहेतुत्वाद्दुष्टानांवधोप्युपकारएव ५४ ५५ उद्वेलोलंघिततीरः ५६ ५७ निश्छिद्रैर्निरंतरैःपर्वतैश्चीयतामुपर्युपरिक्षिप्तैराक्रम्यताम् ५८ ५९ ६० ६१ ६२ आह्निकवेलायांदिननिर्वर्त्यकृत्यसमये आवश्यकत्वान्नात्मत्राणार्थंतुष्टावेतिभावः ६३ ६४ ब्रह्मण्यानांदेवायश्रेष्ठाय गावश्च

हार्णवे । नागपाशैर्दृढैर्बद्धाक्षिप्यतांमाविचार्यताम् ५२ अन्यथासकलोलोकस्तथादैतेयदानवाः । अनुयास्यंतिमूढस्यमतमस्यदुरात्मनः ५३ बहुधावारितोऽस्माभिरयंपापस्तथाप्यरेः । स्तुतिंकरोतिदुष्टानांवधएवोपकारकः ५४ । । पराशरउवाच । । ततस्तेसत्वरादैत्याबद्धातंनागबंधनैः । भर्तुराज्ञांपुरस्कृत्यचिक्षिपुःसलिलार्णवे ५५ ततश्चचालचलताप्रङ्गादेनमहार्णवः । उद्वेलोऽभूत्परंक्षोभमुपेत्यचसमंततः ५६ भूर्लोकमखिलंदृष्ट्वाप्लाव्यमानंमहांभसा । हिरण्यकशिपुर्दैत्यानिदमाहमहामुने ५७ दैतेयैःसकलैःशैलैस्तत्रैववरुणालये । निश्छिद्रैःसर्वतःसर्वैश्चीयतामेषदुर्मतिः ५८ नाग्निर्दहतिनैवायंशस्त्रैश्छिन्नोनचोरगैः । क्षयंनीतोनवातेननविषेणनकृत्यया ५९ नमायाभिर्नचैवोच्चात्पातितोनचदिग्गजैः बालोऽतिदुष्टचित्तोऽयंनानेनार्थोस्तिजीवता ६० तदेषतोयधावत्रसमाक्रांतोमहीधरैः । तिष्ठत्वब्दसहस्रांतेप्राणान्हास्यतिदुर्मतिः ६१ ततोदैत्यादानवाश्चपर्वतैस्तंमहोदधौ । आक्रम्यचक्रुश्चयनंयोजनानिसहस्रशः ६२ सचितःपर्वतैरंतःसमुद्रस्यमहामतिः । तुष्टावाह्निकवेलायामेकाग्रमतिरच्युतम् ६३ नमस्तेपुंडरीकाक्षनमस्तेपुरुषोत्तम । नमस्तेसर्वलोकात्मन्नमस्तेतिग्मचक्रिणे ६४ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच । जगद्धितायकृष्णायगोविंदायनमोनमः ६५ ब्रह्मत्वेसृजतेविश्वंस्थितौपालयतेनमः । रुद्ररूपायकल्पांतेनमस्तुभ्यंत्रिमूर्तये ६६ देवायक्षासुराःसिद्धानागागंधर्वकिंनराः । पिशाचाराक्षसाश्चैवमनुष्याःपशवश्चये ६७ पक्षिणःस्थावराश्चैवपिपीलिकसरीसृपाः । भूम्यापोग्निर्नभोवायुःशब्दस्पर्शस्तथारसः ६८ रूपंगंधोमनोबुद्धिरात्माकालस्तथागुणाः । एतेषांपरमार्थश्चसर्वमेतत्त्वमच्युत ६९ विद्याविद्येभवान्सत्यमसत्यंचविषामृते । प्रवृत्तंचनिवृत्तंचकर्मवेदोदितंभवान् ७० समस्तकर्मभोक्ताचकर्मोपकरणानिच । त्वमेवविष्णोसर्वाणिसर्वकर्मफलंचयत् ७१

हविराश्रयाःब्राह्मणाश्चमंत्राश्रयास्तेषांहितायोपकर्त्रे ६५ ६६ विश्वरूपत्वेनस्तौति देवाइत्यादिना सर्वमेतत्त्वमेवेतितृतीयेनान्वयः यक्षाश्चासुराश्चते यक्षाइतिसाविसर्गपाठेदेवामेघादेवोमेघेसुरेराज्ञिस्यान्नपुंसकमिंद्रियइत्यभिधानात् नागाःसौरसेयाः ६७ सरीसृपाःकाद्रवेयाः ६८ आत्माहंकारः गुणाःसत्त्वादयः एतेषांपरमार्थस्तत्त्वंकारणंत्वम् ६९ विद्याविद्येप्रमाभ्रांतीतयोर्विषयौसत्यमसत्यंचविषामृतेअनर्थार्थौ मृषामृषेतिपाठेभ्रांतेःफलंमृषासंसारः प्रमायाःफलममृषामोक्षइत्यर्थः ७० ७१ तवैवसच्चिद्रूपस्यसर्ववस्तुषुअस्तिभातीतिरूपेणव्याप्तिः ऐश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यैशक्त्यतिशयंगुणांश्चसत्यसंकल्पादीन्सूचयतीतितथा ऐश्वर्यगुणाःसंसूचकायस्याइतिवा ७२ अतएवयोगिनस्त्वांचिंतयंतित्वामेवयाजकायजंते ७३ तेतवमहद्रूपंविश्वंब्रह्मांडंअत्रस्थितं जगदेतत्ततोपिब्रह्मांडात्सूक्ष्मंरूपमित्यन्वयः ततोपिसूक्ष्मरूपाणिभूतभेदाजरायुजादिचतुर्विधादेहास्तेष्वंतरात्माख्यंक्षेत्रज्ञसंज्ञमतीवसूक्ष्मंरूपम् ७४ तस्मादपिपरंसूक्ष्मादिविशेषणानामविषयेवर्तमानंयत्किंचिदचिंत्यंतवरूपमस्तितस्मैपुरुषोत्तमाख्यायतेरूपायनमः ७५ नन्वेवंभूतस्यकथंसूक्ष्मस्थूलाद्यनेकरूपत्वमित्याशंक्यतदुपपादकशक्तिद्वयंप्रणमति सर्वभूतेष्वितिद्वाभ्यां अपराजडशक्तिःप्रकृत्याख्यात्रिगुणाश्रया ७६ वाचांमनसांचातिक्रांतोविषयोययासा यस्मादविशेषणाजातिगुणादिविशेषणशून्याज्ञानीजीवःज्ञानंबुद्धिस्तद्द्वयमपिपरिच्छेद्यंघटादिवत्प्रकाश्यंयस्याःसा यद्वाज्ञानिज्ञानैर्जीवज्ञानैर्घटादिवृत्तिरूपादिभिःपरिच्छेद्यातांपरांचिच्छक्तिंईश्वरींईश्वरस्यस्वरूपभूतांवंदे परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेतिश्रुतेः ७७

मय्यन्यत्रतथाशेषभूतेषुभुवनेषुच । तवैवव्याप्तिरैश्वर्यगुणसंसूचिकाप्रभो ७२ त्वांयोगिनश्चिंतयंतित्वांयजंतेचयज्विनः । हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ७३ रूपंमहत्तेस्थितमत्रविश्वंततश्चसूक्ष्मंजगदेतदीश । रूपाणिसूक्ष्माणिचभूतभेदास्तेष्वंतरात्माख्यमतीवसूक्ष्मम् ७४ तस्माच्चसूक्ष्मादिविशेषणानामगोचरेयत्परमार्थरूपम् । किमप्यचिंत्यंतवरूपमस्तितस्मैनमस्तेपुरुषोत्तमाय ७५ सर्वभूतेषुसर्वात्मन्याशक्तिरपरातव । गुणाश्रयानमस्तस्यैशाश्वतायैसुरेश्वर ७६ यातीतगोचरावाचांमनसांचाविशेषणा। ज्ञानिज्ञानपरिच्छेद्यातांवंदेचेश्वरींपराम् ७७ ओंनमोवासुदेवायतस्मैभगवतेसदा । व्यतिरिक्तंनयस्यास्तिव्यतिरिक्तोखिलस्ययः ७८ नमस्तस्मैनमस्तस्मैनमस्तस्मैमहात्मने । नामरूपंनयस्यैकोयोऽस्तित्वेनोपलभ्यते ७९ यस्यावताररूपाणिसमर्चंतिदिवौकसः । अपश्यंतःपरंरूपंनमस्तस्मैपरात्मने ८० योंतस्तिष्ठत्यशेषस्यपश्यतीशःशुभाशुभम् । तंसर्वसाक्षिणंविष्णुंनमस्तेपरमेश्वरम् ८१ नमोस्तुविष्णवेतस्मैयस्याभिन्नमिदंजगत् । ध्येयःसजगतामाद्यःप्रसीदतुममाव्ययः ८२ यत्रोतमेतत्प्रोतंचविश्वमक्षयमव्ययम् । आधारभूतःसर्वस्यप्रसीदतुसमेहरिः ८३ ॐनमोस्तुविष्णवेतुभ्यंनमस्तस्मैपुनःपुनः । यत्रसर्वंयतःसर्वंयःसर्वंसर्वसंश्रयः ८४ सर्वगत्वादनंतस्यसएवाहमवस्थितः । मत्तःसर्वमहंसर्वंमयिसर्वंसनातने ८५ अहमेवाक्षयोनित्यःपरमात्मात्मसंश्रयः । ब्रह्म

अतःपूर्वोक्तरीत्यानिरतिशयैश्वर्यावगमाद्द्वादशाक्षरमंत्रप्रतिपाद्यरूपेणप्रणमति ओंनमइतिद्वाभ्यां सुवर्णस्यकुंडलादिवत् यस्यकार्यमखिलंनव्यतिरिक्तंकार्याच्चव्यतिरिक्तोयइत्यर्थः ७८ वासुदेवस्यनमस्कारानंतरंत्रिव्यूहस्यनमस्कारत्रिरावृत्तिर्नमस्तस्माइति आदरातिशयार्थंवानमस्कारावृत्तिः व्यूहनिदानरूपेणप्रणमति नामोति ७९ एतादृशस्यार्चनादिकंकथमितिचेदतआह यस्येति ८० तर्हिइंद्रादीनांकथंपूज्यत्वंतत्राह योंतरिति वस्तुतस्तेष्वप्यंतर्यामिणएवपूज्यत्वमितिभावः ८१ जडस्यापिजगतस्तद्रूपेणपूज्यत्वमास्तिकिंपुनर्देवानामित्याह नमोस्त्विति अभिन्नत्वेतुजगतामाद्यःकारणमिति ८२ एतदुपपादयन्नाह यत्रोतमिति यस्मिन्नव्ययेप्रत्यगात्मनिविश्वंजगदोतंदीर्घतंतुषुपटवद्ग्रथितम् प्रोतंचतिर्यक्तंतुषुपटवदनुस्यूतम् अक्षरंप्रवाहरूपेणनित्यमिति ८३ संक्षेपतःसर्वात्मत्वंसंस्मरन्प्रणमति ओंनमइति विष्णवेकारणत्वेनसर्वव्यापकायभक्त्यतिशयेननमसःपौनरुक्त्यम् सर्वात्मकंविष्णुंस्वाभेदेनसाक्षात्कुर्वन्नंतरेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिलषति यत्रेतिसार्धद्वयेन ८४ ८५ अग्रेसृष्टेःपूर्वंअंतेप्रलयानंतरम् ८६ इतिश्रीवैष्णवाकूतचंद्रिकायांप्रथमेअंशेएकोनविंशोध्यायः १९ समाधिस्थस्यतस्याथगतेवंधेच लेषुच हरिराविर्वरंदत्त्वागतोविंशइतीर्यते एवंसर्वाभेदेनचिंतयन्नच्युतमात्मानंमेनेऽपश्यत् तदैवतन्मयत्वंतदभेदमवाप ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेः १ आत्मानंप्रह्लादोहमितिविस्मृतवान् २ भावनायोगात्पूर्वकृतात् क्षीणपापस्यध्वस्तकर्मवासनामलस्यज्ञानमयोच्युतोंतःकरणेब्रह्माकारतयापरिणतायांबुद्धौ ३ जीवात्मपरमात्मनोरेकीकरणंयोगस्तत्प्रभावात्त्रुटितंछिन्नम् ४ का ननंमहावनम् वनंक्षुद्रवनम् ५ ६ जगद्दृष्ट्वेति आरब्धकर्मवशादित्यर्थः ७ ८ व्युत्थायापिअभ्यासवशात्पुनःस्तौति ॐनमइति ओंरक्षकायनमः अवनादोमितिस्मृतिवचनात् पर

संज्ञोहमेवाग्रेतथांतेचपरःपुमान् ८६ इतिश्रीविष्णुपुराणेप्रथमेअंशेएकोनविंशोध्यायः १९ । ।छ। । पराशरउवाच। । एवंसचिंतयन्विष्णुमभेदेनात्मनोद्विज । तन्मयत्वमवापाग्र्यंमेनेचात्मानमच्युतम् १ विसस्मारतथात्मानंनान्यत्किंचिदजानत । अहमेवाव्ययोऽनंतःपरमात्मेतिचिंतयन् २ तस्यतद्भावनायोगात्क्षीणपापस्यवैक्रमात् । शुद्धेंतःकरणेविष्णुस्तस्थौज्ञानमयोऽच्युतः ३ योगप्रभावात्प्रह्लादेजातेविष्णुमयेसुरे । झटित्युरगबंधैस्तैर्मैत्रेयत्रुटितंक्षणात् ४ भ्रांतग्राहगणःसोर्मिर्ययौक्षोभंमहार्णवः । चचालचमहीसर्वासशैलवनकानना ५ सचतंशैलसंघातंदैत्यैर्न्यस्तमथोपरि । प्रक्षिप्यसलिलात्तस्मान्निश्चक्राममहामतिः ६ दृष्ट्वासचजगद्भूयोगगनाद्युपलक्षणम् । प्रह्लादोऽस्मीतिसस्मारपुनरात्मानमात्मना ७ तुष्टावचपुनर्धीमाननादिंपुरुषोत्तमम्। एकाग्रमतिरव्यग्रोप्यतवाक्कायमानसः ८ प्रह्लादउवाच। ओंनमःपरमार्थायस्थूलसूक्ष्माक्षराक्षर । व्यक्ताव्यक्तकलातीतसकलेशनिरंजन ९ गुणाञ्जनगुणाधारनिर्गुणात्मन्परास्थित । मूर्तामूर्तमहामूर्तेसूक्ष्ममूर्तेस्फुटास्फुट १० करालरूपसौम्यात्मन्विद्याविद्यामयाच्युत । सदसद्रूपसद्भावसदसद्भावभावन ११ नित्यानित्यप्रपंचात्मन्निष्प्रपंचामलाश्रित । एकानेकनमस्तुभ्यंवासुदेवादिकारण १२ यःस्थूलसूक्ष्मःप्रकटप्रकाशोयःसर्वभूतोनचसर्वभूतः । विश्वंयतश्चैतदविश्वहेतोर्नमोस्तुतस्मैपुरुषोत्तमाय १३ पराशरउवाच। । तस्यतच्चेतसोदेवस्तुतिमित्थंप्रकुर्वतः । आविर्बभूवभगवान्पीतांबरधरोहरिः १४ ससंभ्रमस्तमालोक्यसमुत्थायाकुलाक्षरम् । नमोस्तुविष्णवेत्येतद्व्याजहारा

मार्थायमोक्षरूपाय परमार्थार्थेतिपाठेहेपरमार्थज्ञानस्वरूप हेअर्थदृश्यरूप स्थूलजाग्रद्दृश्यरूप सूक्ष्मस्वप्नदर्शनरूप क्षराक्षरकार्यकारण व्यक्ताव्यक्तदृश्यादृश्य कलातीतनिरवयव सकलसावयव ईशनियामकनिरंजननिर्लेप ९ गुणाञ्जनगुणाननक्तिस्वसत्ताप्रकाशाभ्यामनुरंजयतीतितथा गुणानामाधार निर्गुणात्मन्नित्यत्रहेतुगर्भसंबोधनंपरास्थितगुणेभ्यःपरतःस्थितेति मूर्तपृथिव्यप्तेजोरूप अमूर्तवाय्वाकाशरूप महामूर्तेविभो सूक्ष्ममूर्तेतन्मात्रादिरूप भक्तानांस्फुट अन्येषामस्फुट १० करालरूपभयंकर सौम्यानामात्मन् विद्याविद्यामयसत्यमिथ्याज्ञानरूप तथापिअच्युतवस्तुतोनित्य सत्प्रत्यक्षंअसत्परोक्षंतयोःसद्भावपरमार्थतयोरेवसदसद्भावयोर्भावनउत्पादक ११ नित्यानित्येकारणकार्येतत्प्रपंचरूप वस्तुतोनिष्प्रपंच अमलैराश्रित आराधित परमार्थेत्यादिष्वादिकारणांतेषुषट्त्रिंशत्संबोधनेषुसर्वत्रतुभ्यंनमइतिप्रत्येकमनुषज्यते १२ स्थूलंपृथिव्यादिसूक्ष्मंतन्मात्रादितत्स्वरूपोजडरूपइतियावत् प्रकटप्रकाशश्चित्स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपत्वात् प्रकटाप्रकाशइतिपाठेयोगिनांप्रकटःसंसारिणामप्रकाशः अविश्वहेतौःसर्वकारणव्यतिरिक्तत्वात् १३ तस्मिन्हरावेवचेतोयस्य १४ नमोस्तुविष्णवेतिसंधिरार्षः १५ अतिते जस्त्वित्वाद्विशिष्यापश्यन्प्रार्थयते अवलोकनंप्रत्यक्षदर्शनंतस्यदानेनध्यानादंतःपवित्रमपिमांभूयःपुनःपावय १६ आत्मानंप्रदर्श्याह कुर्वतइति १७ हेअच्युतअच्युताएकांताभक्तिरस्तु १८ एकांतभक्तिःपरमप्रीत्यधीनेतितांप्रार्थयति येति यायादृशीसातादृशीप्रीतिर्हृदयान्मापसर्पतुनापयातु सदाहृदयेतिष्ठत्वित्यर्थः यद्वाहेमापलक्ष्मीपतेसाविषयप्रीतिर्मेममहृदयात्सर्पतुयातु वि

सकृत्द्विज १९ प्रह्लादउवाच । देवप्रपन्नार्तिहरप्रसादंकुरुकेशव । अवलोकनदानेनभूयोमांपावयाव्यय १६ श्रीभगवानुवाच । कुर्वतस्तेप्रसन्नोहं भक्तिमव्यभिचारिणीम् । यथाभिलषितोमत्तःप्रह्लादव्रियतांवरः १७ । । प्रह्लादउवाच । । नाथयोनिसहस्रेषुयेषुयेषुव्रजाम्यहम् । तेषुतेष्व च्युताभक्तिरच्युतास्तुसदात्वयि १८ याप्रीतिरविवेकानांविषयेष्वनपायिनी । त्वामनुस्मरतःसामेहृदयान्मापसर्पतु १९ । । श्रीभगवानुवाच । मयिभक्तिस्तवास्त्येवभूयोप्येवंभविष्यति । वरश्चमत्तःप्रह्लादव्रियतांयस्तवेप्सितः २० । । प्रह्लादउवाच । । मयिद्वेषानुबंधोभूत्संस्तुतावुद्य तेतव । मत्पितुस्तत्कृतंपापंदेवतस्यप्रणश्यतु २१ शस्त्राणिपातितान्यंगेक्षिप्तोयच्चाग्निसंहतौ । दंशितश्चोरगैर्दत्तंयद्विषंममभोजने २२ बद्धासमुद्रे यत्क्षिप्तोयच्चितोस्मिशिलोच्चयैः । अन्यानिचाप्यसाधूनियानियानिकृतानिमे २३ त्वयिभक्तिमतोद्वेषादघंतत्संभवंचयत् । त्वत्प्रभावात्प्रभोसद्यस्ते नमुच्येतमेपिता २४ । । श्रीभगवानुवाच । । प्रह्लादसर्वमेतत्तेमत्प्रसादाद्भविष्यति । अन्यंचतेवरंदद्मिव्रियतामसुरात्मज २५ । । प्रह्ला दउवाच । कृतकृत्योऽस्मिभगवन्वरेणानेनयत्त्वयि । भवित्रीत्वत्प्रसादेनभक्तिरव्यभिचारिणी २६ धर्मार्थकामैःकिंतस्यमुक्तिस्तस्यकरेस्थिता । सम स्तजगतांमूलेयस्यभक्तिःस्थिरात्वयि २७ । । श्रीभगवानुवाच । । यथातेनिश्चलंचेतोमयिभक्तिसमन्वितम् । तथात्वंमत्प्रसादेननिर्वाणंपर माप्स्यसि २८ इत्युक्त्वांतर्दधेविष्णुस्तस्यमैत्रेयपश्यतः । सचापिपुनरागम्यववंदेचरणौपितुः २९ तंपितामूर्ध्न्यवघ्रायपरिष्वज्यचपीडितम् । जी वसीत्याहवत्सेतिबाष्पार्द्रनयनोद्विज ३० प्रीतिमांश्चाभवत्तस्मिन्ननुतापीमहासुरः । गुरुपित्रोश्चकारैवशुश्रूषांसोपिधर्मवित् ३१ पितर्युपरतिंनीते नरसिंहस्वरूपिणा । विष्णुनासोपिदैत्यानांमैत्रेयाभूत्पतिस्ततः ३२ ततोराज्यद्युतिंप्राप्यकर्मशुद्धिकरींद्विज । पुत्रपौत्रांश्चसुबहूनवाप्यैश्वर्यमेवच

पयप्रीतौत्वत्स्मरणायोगादिति नापसर्पत्वितिवापाठः १९ २० २१ २२ शिलोच्चयैःपर्वतैर्यच्चितआक्रांतोस्मि २३ प्राक्तनयच्छब्दानांतत्संभवमित्यनेनान्वयः तेनपापेनमेपितामु च्येत मुच्यत्वितिपाठेपरस्मैपदमार्षम् २४ २५ २६ भक्त्यामामभिजानातितमेवाविदित्वातिमृत्युमेतीत्यतोभक्त्यैवकृतार्थोस्मिकिमन्येनात्रिवर्गेणेत्यतआह धर्मेति २७ निर्वाणंविदे हकैवल्यम् २८ २९ पीडितंगाढंयथास्यात् ३० विष्णुप्रसादक्षीणपापस्यपुत्रस्नेहानुतापौ ३१ पुनश्चकालांतरेब्रह्मशापादुद्भूतेनविष्णुद्वेषेणातिक्रोधात्तंहंतुमुद्यतेतात्पितरिनृसिंहरूपेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुनोपरतिंनीतेप्रापितेसातिप्रह्लादोदैत्यानांपतिरभूत् ३२ राज्यद्युतिंराज्यलक्ष्मीम् कर्मशुद्धिकरींभोगैःप्रारब्धकर्मक्षयकरीम् ३३ क्षीणाधिकारःक्षीणप्रारब्धकर्मा पुण्यपापविवर्जितःतत्त्व ज्ञानेनपूर्वसर्वकर्मनाशादन्येषांचानुत्पादात् तत्सुकृतदुष्कृतेधुनुतइत्यादिश्रुतेः ३४ ३५ ३६ अहोरात्रंनिरंतरंयत्पापंतत्सकृच्छृण्वन्पठन्वाविशेषेणसवासनंअपोहातिनिरस्यति ३७ नकेवलंपापंनिरस्यतिअभ्युदयंचाप्नोतीत्याह पौर्णमास्यामिति अमावास्यांअमावास्यायामित्यर्थः गोःप्रकृष्टंदानंप्रकर्षश्चदेशकालादिकृतः ३८ सर्वदाश्रवणस्यफलमाह प्रह्लादमिति

३३ क्षीणाधिकारःसयदापुण्यपापविवर्जितः । तदासौभगवद्ध्यानात्परंनिर्वाणमाप्तवान् ३४ एवंप्रभावोदैत्योऽसौमैत्रेयासीन्महामतिः । प्रह्लादोभगवद्भक्तोयंत्वंमामनुपृच्छसि ३५ यस्त्वेतच्चरितंतस्यप्रह्लादस्यमहात्मनः । शृणोतितस्यपापानिसद्योगच्छंतिसंक्षयम् ३६ अहोरात्रकृतंपापंप्रह्लादचरितंनरः । शृण्वन्पठंश्चमैत्रेयव्यपोहतिनसंशयः ३७ पौर्णमास्याममावास्यामष्टम्यामथवापठन् । द्वादश्यांचैतदाप्नोतिगोप्रदानफलंद्विज ३८ प्रह्लादंसकलापत्सुयथारक्षितवान्हरिः । तथारक्षतियस्तस्यशृणोतिचरितंसदा ३९ इतिश्रीविष्णुपुराणेप्रथमेअंशेविंशतितमोध्यायः २० । पराशर उवाच । । संह्लादपुत्रश्चायुष्मान्शिबिर्बाष्कलएवच । विरोचनस्तुप्राह्लादिर्बलिर्जज्ञेविरोचनात् १ बलेःपुत्रशतंत्वासीद्बाणज्येष्ठंनराधिपात् । हिरण्याक्षसुताश्चापिसर्वएवमहाबलाः २ उत्कूरःशकुनिश्चैवभूतसंतापनस्तथा । महानाभोमहाबाहुःकालनाभस्तथापरः ३ अभवन्दनुपुत्राश्चद्विमूर्धाशंकरस्तथा । अयोमुखःशंकुशिराःकपिलःशंबरस्तथा ४ एकचक्रोमहाबाहुस्तारकश्चमहाबलः । स्वर्भानुर्वृषपर्वाचपुलोमाचमहासुरः ५ एतेदनोःसुताःख्याताविप्रचित्तिश्चवीर्यवान् । स्वर्भानोस्तुप्रभाकन्याशर्मिष्ठावार्षपर्वणी ६ उपदानवीहयशिराःप्रख्यातावरकन्यका । वैश्वानरसुतेचोभेपुलोमाकालकातथा ७ उभेतेतुमहाभागेमारीचेस्तुपरिग्रहः । ताभ्यांपुत्रसहस्राणिषष्टिर्दानवसत्तमाः ८ पौलोमाकालकंजाश्चमारीचतनयाःस्मृताः । ततोपरेमहावीर्यादानवाश्चातिनिर्घृणाः ९ सिंहिकायामथोत्पन्नाविप्रचित्तेःसुतास्तथा । व्यंशःशल्यश्चबलवान्नभश्चैवमहाबलः १० वातापीनमुचिश्चैवइल्वलःखसृमस्तथा । अंजकोनरकश्चैवकालनाभस्तथैवच ११ स्वर्भानुश्चमहावीर्यश्चक्रयोधीमहाबलः । एतेवैदानवाःश्रेष्ठादनुवंशावि

सापेक्षयास्वभक्तेषुदोषद्रोहासहिष्णुना वरंदत्त्वापिहारिणाप्रह्लादारिर्निपातितः ३९ इतिश्रीवैष्णवाकूतचंद्रिकायांप्रथमेअंशेप्रह्लादचरितंनामविंशोध्यायः २० एकविंशेपुनर्वंशःकश्यपस्यनिरूपितः यत्रमातुःशुचित्वेनमरुतःसुरतांगताः १ आयुष्मान्नाम्नाप्राह्लादिःप्रह्लादपुत्रः १ नराणांप्रजानामधिपादितिबलेर्विशेषणम् बाणोज्येष्ठोयस्मिन्तत् २ ३ एवंतावददितेर्दितेश्चवंशावुक्तौइदानींक्रमप्राप्तानामन्यासांकश्यपपत्नीनांवंशान्वक्ष्यन्दनोर्वंशमाह अभवन्निति सार्धैर्नवभिः ४ ५ ख्याताइतिविशेषणेनपुराणांतरेषुचदनोःशतंपुत्रागणितावैश्वानरादयश्चसूचिताः ६ उपदानव्यादयश्चतस्रःवैश्वानरकन्यकाः वैश्वानरसुतायास्तुचतस्रश्चानुदर्शनाः उपदानवीहयशिराःपुलोमाकालकातथेतिभागवतात् प्रख्यातावरकन्यका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिसर्वासांविशेषणम् ७ मारीचेःकश्यपस्यपरिग्रहोभार्या ताभ्यांपुलोमाकालकाभ्याम् ८ सिंहिकायांहिरण्यकशिपोर्भगिन्याम् ९ १० ११ १२ सिंहावलोकनन्यायेनाह प्रह्लादस्ये तिभावितात्मनःप्रह्लादस्येत्यन्वयः १३ ताम्रावंशमाह षडिति सुताःकन्यकाः १४ शुचिसहितागृध्रिकाशुचिगृध्रिका उलूक्याअपरिसंख्यानाच्छुक्येवउलूकीकेचित्तुउलूकप्रत्युलूकका नितिपाठित्वाउलूकाञ्शुकान्प्रत्यलूकान् काकानितिव्याचक्षते १५ सुग्रीवीअश्वादीन्व्यजायतेत्यन्वयः १६ ताम्रावंशाःप्रकीर्तिताइत्युपसंहारः १७ गरुडंविशिनष्टि सुपर्णइति पततां श्रेष्ठःपक्षिणामुत्तमः सुरसायाः सहस्रंजज्ञइतिशेषः १८ कद्रोर्वंशमाह काद्रवेयाइति १९ नैकमस्तकाअनेकशिरसः २० २१ दंदशूकाअतिशयदंशनशीलाः विषोल्बणाःउत्कटवि

वर्धनाः १२ एतेषांपुत्रपौत्राश्चशतशोथसहस्रशः । प्रह्लादस्यचदैत्यस्यनिवातकवचाःकुले १३ समुत्पन्नाःसुमहातपसाभावितात्मनः । षट्सु ताःसुमहासत्त्वास्ताम्रायाःपरिकीर्तिताः १४ शुकीश्येनीचभासीचसुग्रीवीशुचिगृध्रिका । शुकीशुकानजनयदुलूकीप्रत्यलूककान् १५ श्येनीश्ये नान्तथाभासीभासान्गृध्रांश्चगृद्ध्र्यपि । शुच्यौदकान्पक्षिगणान्सुग्रीवीतुव्यजायत १६ अश्वानुष्ट्रान्गर्दभांश्चताम्रवंशाःप्रकीर्तिताः । विनताया स्तुपुत्रौद्वौविख्यातौगरुडारुणौ १७ सुपर्णःपततांश्रेष्ठोदारुणःपन्नगाशनः । सुरसायाःसहस्रंतुसर्पाणाममितौजसाम् १८ अनेकशिरसांब्रह्मन्खे चराणांमहात्मनाम् । काद्रवेयास्तुबलिनःसहस्रममितौजसः १९ सुपर्णवशगाब्रह्मञ्जज्ञिरेनैकमस्तकाः । तेषांप्रधानभूतास्तेशेषवासुकितक्षकाः २० शंखःश्वेतोमहापद्मःकंबलाश्वतरौतथा । एलापत्रस्तथानागःकर्कोटकधनंजयौ २१ एतेचान्येचबहवोदंदशूकाविषोल्बणाः । गणक्रोधवशं विद्धितस्याःसर्वेचदंष्ट्रिणः २२ स्थलजाःपक्षिणोब्जाश्चदारुणाःपिशिताशिनः । गास्तुवैजनयामाससुरभिर्महिषांस्तथा २३ इरावृक्षलतावल्ली स्तृणजातीश्चसर्वशः । खसातुयक्षरक्षांसिमुनिरप्सरसस्तथा २४ अरिष्टातुमहासत्वान्गंधर्वान्समजीजनत् । एतेकश्यपदायादाःकीर्तिताःस्था णुजंगमाः २५ येषांपुत्राश्चपौत्राश्चशतशोथसहस्रशः । एषमन्वंतरेसर्गोब्रह्मन्स्वारोचिषेस्मृतः २६ वैवस्वतेचमहतिवारुणेविततेक्रतौ । जुह्वान स्यब्रह्मणोवैप्रजासर्गइहोच्यते २७ पूर्वंयत्रतुसप्तर्षीनुत्पन्नान्त्सप्तमानसान् । पुत्रत्वेकल्पयामासस्वयमेवपितामहः २८ गंधर्वभोगिदेवानांदानवा

षाः क्रोधवशायावंशमाह गणमिति क्रोधवशंक्रोधवशायाजातंविद्धिइत्यन्वयः तद्गणस्थान्विशिनष्टि तेसर्वेदंष्ट्रिणःराक्षसाःसर्पाश्च रक्षोगणंक्रोधवशास्वनामानमजीजनत् दंष्ट्रिणांनियुतं तेषांभीमसेनादगात्क्षयमितिमात्स्योक्तेः २२ स्थलजाअब्जाश्चजलजाःमांसाशिनोदारुणाःपक्षिणस्तस्याजाताइतिविद्धिइत्यन्वयः सुरभेरिरायाःखसायामुनेरारिष्टायाश्चपंचानांवंशमाहगा स्त्रितिद्वाभ्याम् तुशब्दोरुद्रगणंसमुच्चिनोति २३ २४ २५ एषोव्यवहितपूर्वोक्तः २६ वारुणेवरुणकर्तृकेक्रतौवितेक्रियमाणे जुह्वानस्यहोमंकुर्वतोब्रह्मणोयःप्रजासर्गउच्यतेपुराणां तरेषुसइहवर्तमानेवैवस्वतमन्वंतरेस्मृतइत्यन्वयः २७ एवंकथातत्र क्रतौव्यापृतेब्रह्मणादेवकन्यादर्शनस्कन्नेस्वरेतसिअग्नौहुतेजाताःसप्तर्षयःपुत्रत्वेनकल्पिताइति २८ गंधर्वभोगिदेवा दीनांविरोधइतिशेषः ततोविरोधेदेवानांदानवानांचभोद्विजाः दितिर्विनष्टपुत्रावैतोषयामासकश्यपमितिब्रह्मपुराणानुरोधात् गंधर्वभोगिदेवानांपितामहइतिवान्वयः यद्वागंधर्वादीनांमध्येनष्टौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रौयस्याःसादितिःकश्यपंतोषयामासेत्यन्वयः तेनोनपंचाशन्मरुतोदेवाअपिदितेरेवपुत्राइत्युक्तंभवति २९ छंदयामासप्रलोभितवान् ३० ३१ ३२ समाहिताश्रीविष्णुध्यानपरा शुचिनीशौचवतीशौचिनीतिक्वचित्पाठः शौचादिनियमवतीशरच्छतंवर्षशतंयदिगर्भंधारयिष्यसितदातवपुत्रइंद्रंहनिष्यति शौचादिनियमवैकल्येतुविष्णुध्यानशुद्धचित्तायास्तवपुत्रोदेवबंधुरमरोभविष्यतीतिगूढोभिसंधिः ३३ ३४ अंतरप्रेप्सुः शौचच्छिद्रान्वेषी ३५ अंतरमेबाह अकृत्वेति ३६ आहारयामासआनीतवती ३७ पाट्यमानःछिद्यमानः ३८ ३९ यदुक्तंमारोदीरितिते

नांचसत्तम । दितिर्विनष्टपुत्रावैतोषयामासकश्यपम् २९ तयाचाराधितःसम्यक्कश्यपस्तपतांवरः । वरेणच्छंदयामाससाचवव्रेततोवरम् ३० पुत्रमिंद्रवधार्थायसमर्थममितौजसम् । सचतस्यैवरंप्रादाद्भार्यायैमुनिसत्तमः ३१ दत्त्वाचवरमत्युग्रंकश्यपस्तामुवाचह । शक्रंपुत्रोनिहंतातेयदिगर्भंशरच्छतम् ३२ समाहितातिप्रयताशुचिनीधारयिष्यसि । इत्येवमुक्त्वातांदेवींसंगतःकश्यपोमुनिः ३३ दधारसाचतंगर्भंसम्यक्शौचसमन्विता । गर्भमात्मवधार्थायज्ञात्वातन्मघवानपि ३४ शुश्रूषुस्तामथागच्छद्विनयादमराधिपः । तस्याश्चैवांतरप्रेप्सुरतिष्ठत्पाकशासनः ३५ ऊनेवर्षशतेतस्याददर्शांतरमात्मनः । अकृत्वापादयोःशौचंदितिःशयनमाविशत् ३६ निद्रामाहारयामासतस्याःकुक्षिंप्रविश्यसः । वज्रपाणिर्महागर्भंतंचिच्छेदाथसप्तधा ३७ सपाट्यमानोवज्रेणप्ररुरोदातिदारुणम् । मारोदीरितितंशक्रःपुनःपुनरभाषत ३८ सोऽभवत्सप्तधागर्भस्तमिंद्रःकुपितःपुनः । एकैकंसप्तधाचक्रेवज्रेणारिविदारिणा ३९ मरुतोनामदेवास्तेबभूवुरतिवेगिनः । यदुक्तंवैमघवतातेनैवमरुतोऽभवन् । देवा एकोनपंचाशत्सहायावज्रपाणिनः ४० इतिश्रीविष्णुपुराणेप्रथमेअंशेएकविंशतितमोध्यायः २१ । पराशरउवाच । यदाभिषिक्तःसपृथुःपूर्वं राज्येमहर्षिभिः । ततःक्रमेणराज्यानिददौलोकपितामहः १ नक्षत्रग्रहविप्राणांवीरुधांचाप्यशेषतः । सोमंराज्येददद्ब्रह्मायज्ञानांतपसामपि २ राज्ञांवैश्रवणंराज्येजलानांवरुणंतथा । आदित्यानांपतिंविष्णुंवसूनामथपावकम् ३ प्रजापतीनांदक्षंतुवासवंमरुतामपि । दैत्यानांदानवानांचप्रह्लादमधिपंददौ ४ पितॄणांधर्मराजंतुयमंराज्येऽभ्यषेचयत् । ऐरावतंगजेंद्राणामशेषाणांपतिंददौ ५ पतत्रिणांचगरुडंदेवानामपिवासवम् । उच्चैःश्रवसम

नमरुतोभवन्निति किंचिदक्षरसाम्यान्निरुक्तिः वज्रंपाणौयस्येतिवज्रपाणिः तस्यवज्रपाणिनः छांदसोनुगागमः यद्वावज्रोपलक्षितःपाणिर्वज्रपाणिःसयस्यास्ति व्रीह्यादित्वादिनिः ४० इतिश्रीविष्णुपुराणेप्रथमेअंशेएकविंशतितमोध्यायः २१ । सृष्टेषुसंघशोधीशाःपृथुप्रभृतयःकृताः विभूतयोभगवतोद्वाविंशेव्रतयेरिताः १ तदेवंदेवादीनांसृष्टिमुक्त्वाइदानींतत्तदधिपतिविधानमुखेनाविष्णोर्विभूतीर्वक्तुमाह यदेत्यादिना १ नक्षत्रादीनांतपोतानांराज्येददद्दत्तवान् अदधादितिपाठेदधारेत्यर्थः २ राज्ञांराज्येवैश्रवणंकुबेरम् विष्णुंवामनम् ३ प्रजापतीनांकर्दमादीनांमरुतांदितिपुत्राणाम् अन्येषामपिदेवानांवासवंददौ ४ ५ वृषभंशिववाहनम् चतुष्पदानांसर्वेषांवाहनानांचसर्वशः महेश्वरध्वजःश्रीमान्गोवृषोधिपतिःकृतइतिहरिवंशदर्शना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त ६ सिंहमीश्वरंराजानम् प्लक्षंपर्कटिम् ७ ८ वैराजस्यब्रह्मसूनोः पुत्रमितिशेषः राजानंदीप्तिमंतंसुधन्वानंराजानंक्षत्रियाणाम् तनयमितिपाठोवा ९ १० अच्युतमितिकेतुमतोविशेषण
म् ११ पर्जन्यस्यपुत्रमितिशेषः १२ १३ उक्तानामनुक्तानांचतत्तत्पतीनांभगवद्विभूतित्वमाह एतइतिसार्धैःपंचभिः स्थितौ प्रवृत्तस्यविष्णोर्विभूतिभूताःशक्तिभूताः १४ १५ १६

श्वानांवृषभंतुगवामपि ६ शेषंतुनागराजानंमृगाणांसिंहमीश्वरम् । वनस्पतीनांराजानंप्लक्षमेवाभ्यषेचयत् ७ एवंविभज्यराज्यानिदिशांपालाननंत
रम् । प्रजापतिपतिर्ब्रह्मास्थापयामाससुव्रत ८ पूर्वस्यांदिशिराजानंवैराजस्यप्रजापतेः । दिशःपालंसुधन्वानंराजानंसोऽभ्यषेचयत् ९ दक्षिणस्यां
दिशितथाकर्दमस्यप्रजापतेः । पुत्रंशंखपदंनामराजानंसोऽभ्यषेचयत् १०पश्चिमस्यांदिशितथारजसःपुत्रमच्युतम् । केतुमंतंमहात्मानंराजानमभि
षिक्तवान् ११ तथाहिरण्यरोमाणंपर्जन्यस्यप्रजापतेः उदीच्यांदिशिदुर्धर्षंराजानंसोऽभ्यषेचयत् १२ तैरियंपृथिवीसर्वासप्तद्वीपासपत्तना । यथात्र
देशमद्यापिधर्मतःप्रतिपाल्यते १३ एतेसर्वेप्रवृत्तस्यास्थितौविष्णोर्महात्मनः । विभूतिभूताराजानोयेचान्येमुनिसत्तम १४ येभविष्यंतियेऽतीताःस
र्वेभूतेश्वराद्विज । तेसर्वेसर्वभूतस्यविष्णोरंशाद्विजोत्तम १५ येचदेवाधिपतयोयेचदैत्याधिपास्तथा । दानवानांचयेनाथायेनाथाःपिशिताशिनाम्
१६ पशूनांयेचपतयःपतयोयेचपक्षिणाम् । मनुष्याणांचसर्पाणांनागानांचाधिपाश्चये १७ वृक्षाणांपर्वतानांचग्रहाणांचापियेऽधिपाः । अतीतावर्त
मानाश्चयेभविष्यंतिचापरे १८ तेसर्वेतस्यदेवस्यविष्णोरंशसमुद्भवाः । नहिपालनसामर्थ्यमृतेविश्वेश्वरंहरिम् १९ स्थितौस्थितंमहाप्राज्ञभ
वत्यन्यस्यकस्यचित् २० सृजत्येषजगत्सृष्टौस्थितौपातिसनातनः । हंतिचैवांतकलेपिरजःसत्त्वादिसंश्रयः २१ चतुर्विभागसंसृष्टौचतुर्धासं
स्थितःस्थितौ । प्रलयंचकरोत्यंतेचतुर्भेदोजनार्दनः २२ एकेनांशेनब्रह्मासौभवत्यव्यक्तमूर्तिमान् । मरीचिमिश्राःपतयःप्रजानामन्यभागतः
२३ कालस्तृतीयस्तस्यांशःसर्वभूतानिचापरः । इत्थंचतुर्धासंसृष्टौवर्ततेऽसौरजोगुणः २४ एकांशेनस्थितोविष्णुःकरोतिप्रतिपालकम् । म
न्वादिरूपीचान्येनकालरूपोपरेणच २५ सर्वभूतेषुचान्येनसंस्थितःकुरुतेस्थितिम् । सत्वंगुणमुपाश्रित्यजगतःपुरुषोत्तमः २६ आश्रित्यतम
सौवृत्तिमंतकालेतथाप्रभुः । रुद्रःस्वरूपोभगवानेकांशेनभवत्यजः २७ अभ्यंतकादिरूपेणभागेनान्येनवर्तते । कालस्वरूपोभागोऽन्यःसर्वभूता
निचापरः २८ विनाशंकुर्वतस्तस्यचतुर्धैवमहात्मनः । विभागकल्पनाब्रह्मन्कथ्यतेसर्वकालिकी २९ ब्रह्मादक्षादयःकालस्तथैवाखिलजंतवः ।

१७ १८ अत्रहेतुमाह नहीति स्थितौस्थितंहरिमृतेपालनशक्तिरन्यस्यनभवतीत्यन्वयः १९ २० अतएवमुख्यःसृष्ट्यादिकर्तासएवेत्याह सृजत्यशेषइति सृष्टौसृष्टिकाले स्थितौस्थिति
काले अंतकत्वेतद्दशायाम् २१ तदेवंसृष्ट्यादिकर्तृत्वंचतुर्धाविभजति चतुर्विभागइत्यष्टभिः संसृष्टौसम्यक्सृष्टौ २२ अन्यभागतःअन्येनभागेन २३ रजएवगुणोयस्यसः २४ अप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणांशेनजगतःस्थितिमित्यन्वयः २५ २६ २७ २८ सार्वकालिकीसर्वकल्पगता २९ एतेचब्रह्मादयोहरेरेवविभूतयइत्याह ब्रह्मादक्षादयइति ३० ३१ ३२ ब्रह्मादीनांसृष्ट्यादिकर्तृत्वमुक्तमेवकालभेदेनाह जगदादाविति द्वाभ्याम् ३३ ३४ कालाख्यभगवद्विभूतेस्तुसर्वत्रसर्वदासृष्टिनिमित्तत्वमित्याह कालेनेति ३५ एतदेवस्थितिप्रलययोरुपदिशति एषएवेति एषसृष्टौचतुर्द्धाविभागोयउक्तः अयंस्थितावप्युपदिश्यतइत्यन्वयः ३६ नहिपालनसामर्थ्यमित्यत्रपालकानांविष्णुत्वेयुक्तेरुक्तत्वादिदानींस्रष्टॄणांसंहर्तॄणांचविष्णुत्वेयुक्तिमाह यत्किंचिदिति सत्त्वजातेनप्राणिमात्रेण तस्यसंभूतौसंभूतिनिमित्तम् तत्सत्त्वंप्राणिमात्रम् तत्सर्वमितिवापाठः हरेस्तनुःकायइत्यर्थः ३७ ३८ उक्तंब्रह्मादीनांविष्णुस्वरूपत्वमुपसंहरति एवमिति

विभूतयोहरेरेतज्जगतःसृष्टिहेतवः ३० विष्णुर्मन्वादयःकालःसर्वभूतानिचद्विज । स्थितेर्निमित्तभूतस्यविष्णोरेताविभूतयः ३१ रुद्रःकालांतकाद्याश्चसमस्ताश्चैवजंतवः । चतुर्धाप्रलयायैताजनार्दनविभूतयः ३२ जगदादौतथामध्येसृष्टिराप्रलयाद्द्विज । धात्रामरीचिमिश्रैश्चाक्रियतेजंतुभिस्तथा ३३ ब्रह्मासृजत्यादिकालेमरीचिप्रमुखास्ततः । उत्पादयंत्यपत्यानिजंतवश्चप्रतिक्षणम् ३४ कालेननविनाब्रह्मासृष्टिनिष्पादकोद्विज । नप्रजापतयःसर्वेनचैवाखिलजंतवः ३५ एषएवविभागोऽयंस्थितावप्युपदिश्यते । चतुर्द्धादेवदेवस्यमैत्रेयप्रलयेतथा ३६ यत्किंचित्सृज्यतेयेनसत्त्वजातेनवैद्विज । तस्यसृज्यस्यसंभूतौतत्सत्त्वंवैहरेस्तनुः ३७ हंतिवायत्कचित्किंचिद्भूतंस्थावरजंगमम् । जनार्दनस्यतद्रौद्रंमैत्रेयांतकरंवपुः ३८ एवमेवजगत्स्रष्टाजगत्पातातथैवच । जगद्भक्षयिताचैषसमस्तस्यजनार्दनः ३९ सर्गस्थित्यंतकालेषुत्रिधैवंसंप्रवर्तते । गुणंप्रवृत्त्यापरमंपदंतस्यागुणंमहत् ४० तत्त्वज्ञानमयंवापिस्वयंवेद्यमनौपमम् । चतुःप्रकारंतदपिस्वरूपंपरमात्मनः ४१ । । मैत्रेयउवाच । । चतुःप्रकारतांतस्यब्रह्मभूतस्यवैमुने । समाचक्ष्वयथान्याय्यंयदुक्तंपरमंपदम् ४२ । । पराशरउवाच । । मैत्रेयकारणंप्रोक्तंसाधनंसर्ववस्तुषु । साध्यंचवस्त्वभिमतंयत्साधयितुमात्मनः ४३ योगिनोमुक्तिकामस्यप्राणायामादिसाधनम् । साध्यंचपरमंब्रह्मपुनर्नावर्ततेयतः ४४ साधनालंबनंज्ञानंमुक्तयेयोगिनांहियत् । सभेदःप्रथमस्तस्यज्ञानभूतस्यवैमुने ४५ युंजतःक्लेशमुक्त्यर्थंसाध्यंयद्ब्रह्मयोगिनः । तदालंबनविज्ञानंद्वितीयोंऽशोम

द्वाभ्याम् ३९ एवमुक्तक्रमेणगुणस्यप्रवृत्त्याक्षोभेणत्रिधाब्रह्मादिरूपःसन्सृष्ट्यादौसंप्रवर्तते तस्यतुपरमंपदम् अगुणम् अतोमहत्पूर्णम् ४० तत्प्राप्तिकरोपदेशार्थंचातुर्विध्यमुपाक्षिपति तत्त्वेति ४१ ब्रह्मणोनिर्भेदत्वात्कथंचातुर्विध्यमितिपृच्छति चतुःप्रकारतामिति ४२ सत्यंस्वतोभेदाभावेपिस्वाभिव्यंजकधीवृत्तिभेदात्भेदइतिमत्वाहमैत्रेयेत्यष्टभिः सर्वेष्वपिवस्तुषुयत्कारणंतत्साधनंचोक्तम् यच्चात्मनःसाधयितुमभिमतंतत्साध्यंचोक्तमित्यर्थः ४३ प्रस्तुतेचमुक्तिकामस्ययोगिनोमुक्तेःसाधनंप्राणायामादि प्राणानामायामादयःशोधकाःसंतियस्यतज्जीवस्वरूपम् ब्रह्मादिनिः निःकर्तृरूपाद्विभक्तात्मरूपत्वंपदार्थशुद्धिंविनामुक्तेरसंभवात् साध्यंतचत्पदलक्ष्यम् परमंब्रह्मनित्यंसुखरूपत्वात् ४४ ततःकिमतआह साधनेति साधनंदेहादिविविक्तजीवात्मस्वरूपंतदालंबनंशुद्धत्वंपदार्थविषयंज्ञानंसएवचतुर्भेदज्ञानभूतस्यब्रह्मणःप्रथमोभेदः ४५ क्लेशमुक्त्यर्थंयुंजतोयोगमभ्यस्यतोयोगिनोयत्साध्यंब्रह्मतदालंबनंतत्पदलक्ष्यचिदानंदस्वरूपब्रह्मविषयंज्ञानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयोंशः४ ६तयोरुभयोरविभागेनयद्ब्रह्मैवाहंअहमेवब्रह्मेतिअद्वैतमयंअखंडात्मकतत्त्वविषयंयत्ज्ञानंसोन्यस्तृतीयस्तद्भागोमयोदितः ४७ एतस्यत्वंपदार्थतत्पदार्थतदैक्यविषयस्यज्ञानत्रय स्ययोविशेषयतिपरिच्छिनत्तीतिविशेषोज्ञानतत्कार्यतस्यनिराकरणंवृत्तिव्याप्त्यानाशनंतद्द्वारेणाविद्याख्यावरणभंगमात्रद्वारेणदर्शितमपरोक्षीकृतंयदात्मस्वरूपंतद्वृत्तदेकाकारंविष्णोर्ज्ञानमयस्य परमपदाख्यंज्ञानंचतुर्थमुक्तमितितृतीयेनान्वयः अविद्यायानिवृत्तायामप्यविरतवर्तिन्यामखंडात्मविषयबुद्धिवृत्तौप्रतिफलितंयत्स्वरूपचैतन्यंतद्विष्णोःपरमंपदमित्यर्थः ४८ तदेवद्वादश भिःपदैरुपलक्ष्यति निर्व्यापारंसृष्ट्यादिचेष्टाशून्यम् अतएवानाख्येयंनिर्देशानर्हं किंतुव्याप्तिमात्रमनंशम् अनौपमंसर्वज्ञानविलक्षणत्वात् यतआत्मसंबोधविषयंस्वप्रकाशमित्यर्थः तत्रापि सत्तामात्रंअसत्त्वव्यावृत्तिमात्रम् तत्रहेतुलक्षणंव्यावर्तकधर्मशून्यम् ४९ तत्रहेतुः प्रशांतंविक्षेपरहितम् अतएवाभयंद्वितीयास्फूर्तेः तत्किंज्ञानत्वेनसविषयंसाश्रयंच न शुद्धंनिर्विषयंअज न्यत्वादनाश्रयंच असंश्रितमितिवापाठेसएवार्थः अतएवविषयरूपाकाराभावादविभाव्यंभावनायाअविषयम् दुर्विभाव्यमितिबापाठः ५० एवंभूतज्ञानस्वरूपेयेलीनास्तेकृतार्थाभवंतीत्याह

हामुने ४६ उभयोस्त्वविभागेनसाध्यसाधनयोर्हियत् । विज्ञानमद्वैतमयंतद्भागोऽन्योमयोदितः ४७ ज्ञानत्रयस्यचैतस्यविशेषोयोमहामुने । तन्निरा करणद्वारदर्शितात्मस्वरूपवत् ४८ निर्व्यापारमनाख्येयंव्याप्तिमात्रमनौपमम् । आत्मसंबोधविषयंसत्तामात्रमलक्षणम् ४९ प्रशांतमभयंशुद्धम विभाव्यमसंश्रयम् । विष्णोर्ज्ञानमयस्योक्तंतज्ज्ञानंपरमंपदम् ५० तत्रान्यज्ञानरोधेनयोगिनोयांतियेलयम् । संसारकर्षणोत्तीर्णायांतिनिर्बीजतांद्विज ५१ एवंप्रकारममलंनित्यंव्यापकमव्ययम् । समस्तभेदरहितंविष्णवाख्यंपरमंपदम् ५२ तद्ब्रह्मपरमोयोगीयतोनावर्ततेपुनः । अपुण्यपुण्योपर मेक्षीणक्लेशोतिनिर्मलः ५३ द्वेरूपेब्रह्मणस्तस्यमूर्तंचामूर्तमेवच । क्षराक्षरस्वरूपेतेसर्वभूतेष्ववस्थिते ५४ अक्षरंतत्परंब्रह्मक्षरंसर्वमिदंजगत् । ए कदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणीयथा ५५ तत्राप्यासन्नदूरत्वाद्बहुत्वस्वल्पतामयः । ज्योत्स्नाभेदोऽस्तिस्तच्छक्तेतद्वन्मैत्रेयविद्यते ५६ ब्रह्मविष्णु शिवब्रह्मप्रधानाब्रह्मशक्तयः । ततश्चदेवामैत्रेयन्यूनादक्षादयस्ततः ५७ ततोमनुष्याःपशवोमृगपक्षिसरीसृपाः । न्यूनान्यूनतराश्चैववृक्षगुल्मादय

तत्रेति चतुर्थज्ञानस्वरूपेअन्यज्ञानंब्रह्मविद्यास्वरूपंतस्यनिरोधेनदग्धेंधनानलवदुपरमेण अविद्यानिरोधेनेतिपाठेअविद्यानाशेनयेलयंऐक्ययांतिसंसारएवकृष्यतइतिकर्षणंक्षेत्रंतस्मिन्नुत्तिर्बीजा वापःकाम्यादिकर्मकरणंतस्मिन्निर्बीजतांनिर्वासनतांतेयांति अविद्याकामकर्माभावात्पुनर्नजायंतइत्यर्थः तंकामकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतिश्रुतेः ५१ तर्हियोगीकिंभवतीत्यतआह एवमितिद्वाभ्याम् एतंप्रकारंपरमंपदम् ब्रह्मैवयोगीभवतीतिशेषः ५२ ५३ तत्प्राप्तिसाधनोपासनार्थमाह द्वेरूपेइति मूर्तामूर्तेएवदर्शयति क्षराक्षरेति ५४ क्षराक्षरेरूपेव्याचष्टे अ क्षरमिति क्षरंसर्वमिदंसोपाधिचेतनात्मकंजगत् नन्वक्षरस्यपरब्रह्मणस्तद्विलक्षणंक्षररूपंकथंस्यादित्याशंक्यदृष्टांतेनोपपादयति एकदेशेति प्रादेशिकस्याप्यग्नेर्दीपादेर्दाहकस्यापितद्वि लक्षणाज्योत्स्नायथातत्प्रकाशशक्तिविस्तारस्तथाब्रह्मणःस्वविलक्षणोयंशक्तिविस्तारोब्रह्मादिरूपंजगत् एकदेशस्थितस्येंदोरितिवापाठः ५५ तेजोदृष्टांतेनैवब्रह्मादीनांतारतम्यमपिसंभ वतीत्याह तत्रापिदृष्टांतभूतेतेजस्यपिआसन्नत्वाद्बहुत्वंदूरत्वादल्पत्वमित्येवंरूपोज्योत्स्नाभेदोस्तियथातद्वद्ब्रह्मशक्तिभूतेषुब्रह्मादिस्थावरांतेषुक्षेत्रज्ञेषुआविद्यावरणस्वल्पत्वबहुत्वशात्तारतम्यंव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तत इत्यर्थः वक्ष्यतिच तथातिरोहितत्वाच्चशक्तिः क्षेत्रज्ञसंज्ञिता सर्वभूतेषुभूपालतारतम्येनदृश्यतइति ५६ दार्ष्टांतिकमाह ब्रह्मेतिद्वाभ्याम् ५७ ५८ तदेवंक्षरंसर्वंब्रह्मणएवरूपमित्युपपाद्योपसंहरति तदेतदिति आविर्भावतिरोभावौआधिक्यन्यूनभावौजन्मनाशौचउपाधिवशादेवंभूतविकल्पवदपितदेतज्जगद्वस्तुतोक्षयंआविर्भावादिशून्यंनित्यंब्रह्मणोरूपामित्यर्थः ५९ ततः किमित्याकांक्षायांतत्कारणीभूतपरमेश्वरोपास्तिंप्रस्तौति सर्वशक्तीति सृष्ट्यादिसर्वशक्त्याश्रयोमहाविष्णुर्मूर्तसहस्रशीर्षादियुक्तंविशुद्धोर्जितसत्त्वात्मकंब्रह्मणएवापरंनविद्यतेपरंश्रेष्ठंयस्मात्तद परंरूपम् तदेवाह यद्योगिभिर्योगारंभेषुपूर्वमादावेवचिंत्यते ६० तच्चिंतनप्रयोजनमाह सालंबनइति यत्रचिंतनेऽव्याहतेविक्षेपरहितेसतिसालंबनोध्येयसहितःसबीजओंकारादिमंत्रजपसहितश्चमनसिसंस्थितःकाष्ठापन्नोमहायोगःसमाधिरूपोजायतइत्यन्वयः ६१ यच्चिंत्यतइत्यत्रयच्छब्देनोक्तस्यब्रह्मस्वरूपस्यविष्णोःसर्वश्रेष्ठत्वमाह सपरइतिद्वाभ्याम् ब्रह्मणःसर्वशक्तीनांब्र

स्ततः ५८ तदेतदक्षयंनित्यंजगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवत् ५९ सर्वशक्तिमयोविष्णुःस्वरूपंब्रह्मणोपरम् । मूर्त्तंयद्योगिभिःपूर्वंयोगारंभेषुचिंत्यते ६० सालंबनोमहायोगःसबीजोयत्रसंस्थितः । मनस्यव्याहतेसम्यग्युंजतांजायतेमुने ६१ सपरःसर्वशक्तीनां ब्रह्मणःसमनंतरः । मूर्त्तंब्रह्ममहाभागसर्वब्रह्ममयोहरिः ६२ तत्रप्रोतमिदंसर्वमोतंचैवाखिलंजगत् । ततोभवज्जगत्तस्मिन्सजगच्चाखिलंमुने ६३ क्षराक्षरमयोविष्णुर्बिभर्त्यखिलमीश्वरः । पुरुषाव्याकृतमयंभूषणास्त्रस्वरूपवत् ६४ मैत्रेयउवाच । । भूषणास्त्रस्वरूपस्थंयथैतदखिलंजगत् । बिभर्त्तिभगवान्विष्णुस्तन्ममाख्यातुमर्हसि ६५ पराशरउवाच । । नमस्कृत्वाप्रमेयायविष्णवेप्रभविष्णवे । कथयामियथाख्यातंवसिष्ठेनममाभवत् ६६ आत्मानमस्यजगतोनिर्लेपमगुणामलम् । बिभर्तिकौस्तुभमणिस्वरूपंभगवान्हरिः ६७ श्रीवत्ससंस्थानधरमनंतेचसमाश्रितम् । प्रधानंबुद्धिरप्यास्तेगदारूपेणमाधवे ६८ भूतादिर्मिंद्रियादिंचद्विधाहंकारमीश्वरः । बिभर्तिशंखरूपेणशार्ङ्गरूपेणचस्थितम् ६९ बलस्वरूपमत्यंतंजवनांतरितानिलम् । चक्रस्वरूपंचमनोधत्तेविष्णुःकरेस्थितम् ७० पंचरूपातुयामालावैजयंतीगदाभृतः । साभूतहेतुसंघातभूतमालाचवैद्विज ७१

ह्मादीनांमध्येसपरःश्रेष्ठः अतःसमनंतरःअतिनिकटः यतोमूर्तपुरुषसंस्थानंब्रह्मैवसः तत्रहेतुःसर्वब्रह्ममयः कृत्स्नब्रह्मस्वरूपोनतुब्रह्मादिवदंशभूतः ६२ तत्रापिहेतुः तत्रेतितस्मिन्नखिलं जगदोतंप्रोतंचतंतुषुपटवदनुस्यूतम् तदपिकुतइत्यतआह ततोजगत्तस्मिंस्तिष्ठतिचजगच्चसएवकारणात्मकत्वात्कार्यस्य ६३ तदेवंहरेःश्रैष्ठ्यमुक्त्वातदुपासनंवक्तुंभूमिकांरचयति क्षराक्षरेति कार्यकारणात्मकोविष्णुःपुरुषाव्याकृतमयंपुरुषप्रधानात्मकमिदंजगद्भूषणास्त्ररूपेणबिभर्ति ६४ सूचितमुपासनंविशेषतोबुभुत्सुःपृच्छति भूषणेति ६५ प्रभविष्णवेसर्वसामर्थ्ययुक्ताय तेनभूषणायुधरूपेणजगद्धारणसामर्थ्यंकिंचित्रमितिभावः यथाममवसिष्ठेनसमाख्यातमभवत्तथाकथयिष्यामि ६६ अस्यजगतःआत्मानंपुरुषंनिर्लेपंधर्माधर्मरहितंअगुणंचतत्अमलंरागादिरहितंचतम् ६७ प्रधानंचश्रीवत्ससंस्थानधरंअनंतेसमाश्रितमास्तइत्यन्वयः श्रीवत्सश्चप्रदक्षिणावर्तरोमावलिविशेषः बुद्धितत्त्वमपिगदारूपेणास्ते ६८ भूतादितामसंइंद्रियादिंराजसमहंकारंक्रमेणशंखस्वरूपेणशार्ङ्गरूपेणचस्थितंबिभर्ति ६९ बलस्वरूपंसर्वसामर्थ्यरूपम् चलस्वरूपमितिवापाठःवेगेनांतारितःअतिक्रांतोनिलोयेनतन्मनःसात्त्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काहंकाररूपंचक्रस्वरूपंधत्ते ७० पंचरूपामुक्तामाणिक्यमरकतेंद्रनीलवज्रसमानवर्णाहरेर्यावैजयंत्याख्यामालासाभूतहेतूनांपचतन्मात्राणांसंघातःपंक्तिःभूतमालाचमहाभूतपंक्तिश्चसा सूक्ष्मस्थूलभूतमपीत्यर्थः भूतसंघातोद्भूतमालेतिपाठेअर्थतःसएवार्थः ७१ ७२ अविद्यैवचर्मज्ञानावरकःकोशस्तत्संस्थितंबिभर्ति ७३ उक्तमेवभूषणादिस्वरूपमनुवदन्नेवतद्धारणप्र

यानींद्रियाण्यशेषाणिबुद्धिकर्मात्मकानितु । शररूपाण्यशेषाणितानिधत्तेजनार्दनः ७२ बिभर्त्तियच्चासिरत्नमच्युतोऽत्यंतनिर्मलम् । विद्यामयंतुत त्ज्ञानमविद्याचर्मसंस्थितम् ७३ इत्थंपुमान्प्रधानंचबुद्ध्यहंकारमेवच । भूतानिचहृषीकेशेमनःसर्वेंद्रियाणिच । विद्याविद्येचमैत्रेयसर्वमेतत्समाश्रि तम् ७४ अस्त्रभूषणसंस्थानस्वरूपंरूपवर्जितः । बिभर्तिमायारूपोऽसौश्रेयसेप्राणिनांहरिः ७५ सविकारंप्रधानंयत्पुमांश्चैवाखिलंजगत् । बिभ र्तिपुंडरीकाक्षस्तदेवंपरमेश्वरः ७६ याविद्यायातथाविद्यायत्सद्यच्चासदव्ययम् । तत्सर्वंसर्वभूतेशेमैत्रेयेमधुसूदने ७७ कलाकाष्ठानिमेषादिदिनर्त्व यनहायनैः । कालस्वरूपोभगवानपरोहरिरव्ययः ७८ भूर्लोकोथभुवर्लोकःस्वर्लोकोमुनिसत्तम । महर्जनस्तपःसत्यंसप्तलोकाइमेविभुः ७९ लो कात्ममूर्त्तिःसर्वेषांपूर्वेषामपिपूर्वजः । आधारःसर्वविद्यानांस्वयमेवहरिःस्थितः ८० देवमानुषपश्वादिस्वरूपैर्बहुभिर्विभुः । स्थितःसर्वेश्वरोऽनंतोभूत मूर्त्तिरमूर्त्तिमान् ८१ ऋचोयजूंषिसामानितथैवाथर्वणानिच । । इतिहासोपवेदाश्चवेदांतेषुतथोक्तयः ८२ वेदांगानिसमस्तानिमन्वादिगदितानि

योजनमाह इत्थमितिसार्धाभ्याम् ७४ अस्त्रभूषणसंस्थानस्वरूपंसमाश्रितमेतत्सर्वंबिभर्ति वस्तुतोरूपवर्जितः मायारूपंयस्यसः श्रेयसेउपासकानांसर्वपुरुषार्थसिद्धये ७५ उक्तमर्थमु पसंहरति सविकारमितिद्वाभ्याम् ७६ ७७ ननुकालस्यसर्वकारणत्वात्कालात्मकमेवेदंसर्वंकथंविष्ण्वात्मकमित्याशंक्यकालरूपोपिहरिरेवेत्याह कलेति ७८ इदानींहरेःसर्वात्मकत्वदार्ढ्या यजडानांचेतनोपाधीनांदेवादिदेहानांतदात्मकत्वमाह भूर्लोकेत्यादिनासर्वाणितद्वपुरित्यंतेन सप्तलोकानितिपाठेव्याप्येतिशेषः ७९ लोकात्मालोकरूपामूर्तिर्यस्यसः ८० ८१ ऋगादयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदाः इतिहासोभारतादिः उपवेदाआयुर्वेदादयः ८१ मन्वादिगदितानिधर्मशास्त्राणिशास्त्राणिमीमांसादीनि अनुवादाःकल्पसूत्रादयः ८३ ८४ किंबहुनोक्तेनसर्वाणिवस्तुजातानितन्मू

च । शास्त्राण्यशेषाण्याख्यातान्यनुवादाश्चयेक्वचित् ८३ काव्यालापाश्चयेकेचिद्गीतकान्यखिलानिच । शब्दमूर्त्तिधरस्यैतद्वपुर्विष्णोर्महात्मनः । ८४ यानिमूर्तान्यमूर्तानियान्यत्रान्यत्रवाक्वचित् । संतिवैवस्तुजातानितानिसर्वाणितद्वपुः ८५ अहंहरिःसर्वमिदंजनार्दनोनान्यत्ततःकारणकार्यजातम् । ईदृङ्मनोयस्यनतस्यभूयोभवोद्भवाद्वंद्वगदाभवंति ८६ इत्येषतेंशःप्रथमःपुराणस्यास्यवैद्विज । यथावत्कथितोयस्मिञ्श्रुतेपापैःप्रमुच्यते ८७ कार्तिक्यांपुष्करस्नानेद्वादशाब्देतुयत्फलम् । तदस्यश्रवणेसर्वंफलमाप्नोतिमानवः ८८ देवर्षिपितृगंधर्वयक्षादीनांतुसंभवम् । भवंतिशृण्वतःपुंसोदेवाद्यावरदामुने ८९ । । इतिश्रीविष्णुपुराणेप्रथमेअंशेद्वाविंशोध्यायः २२ । । प्रथमांशःसमाप्तः । । ७ । । ७ ।

त्रैयालिकाब्देयुगलंतुयुग्मं शून्यैकयातेसितपक्षमाधवे ॥ गौर्य्यांश्वनिथ्यांशनिवासरेस्मिन् विष्णोःपुराणंप्रददौतुमैत्रे ॥ त्रेतायुगोदयेऽक्षस्थे जिह्वोविरविशाम्पतिरितिशेषः ॥ ॥

मश्चमिति श्रीदेवशर्मणोज्ञेयं २

तिरित्याह यानीति ८५ एवंसर्वात्मकविष्णुज्ञानस्यसंसारच्छेदःफलमित्याह अहमिति भवतीतिभवोदेहःतदुद्भवाद्वंद्वगदारागादिद्वंद्वोगानभवंतीतिसर्वपुराणार्थः ८६ ८७ श्रवणस्यापिफलमाह कार्तिक्यामिति स्पष्टमन्यत् ८८ ८९ । इतिश्रीरत्नगर्भभट्टाचार्यविरचितायांवैष्णवाकूतचंद्रिकायांप्रथमेअंशेद्वाविंशोध्यायः २२ । । ७ । । ७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीविष्णुपुराणे प्रथमांशः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीविष्णुपुराणे द्वितीयांश प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः । । अस्यटीकास्थमुद्धृत्यव्याख्यासारंमनीषया । श्रीरत्नगर्भकृतिनाप्रथमोंऽशोनिरूपितः । १ । सृष्टिशेषप्रसंगानुप्रसंगेनानुवर्ण्यते । द्वितीयांशेथभूगोलज्योतिश्चक्रा दिसंस्थितिः । २ । तत्रापिप्रथमाध्यायेप्रियव्रतकथास्यच । वंशप्रस्तावतोयत्रभूगोलमपिसूचितम् । ३ । उक्तानुवादपूर्वकंप्रियव्रतवंशमनूक्तंपृच्छति भगवन्निति चतुर्भिः सर्गसंबंधिय

मैत्रेयउवाच । । भगवन्सम्यगाख्यातंममैतदखिलंत्वया । जगतांसर्गसंबंधियत्पृष्टोसिमयागुरो १ योयमंशोजगत्सृष्टिसंबद्धोगदितस्त्वया । त त्राहंश्रोतुमिच्छामिभूयोपिमुनिसत्तम २ प्रियव्रतोत्तानपादौसुतौस्वायंभुवस्ययौ । तयोरुत्तानपादस्यध्रुवःपुत्रस्त्वयोदितः ३ प्रियव्रतस्यनैवोक्ता भवताद्विजसंततिः । तामहंश्रोतुमिच्छामिप्रसन्नोवक्तुमर्हसि ४ । । पराशरउवाच । । कर्दमस्यात्मजांकन्यामुपयेमेप्रियव्रतः । सम्राट्कुक्षी चतत्कन्येदशपुत्रास्तथापरे ५ महाप्राज्ञामहावीर्याविनीतादयिताःपितुः । प्रियव्रतसुताख्यातास्तेषांनामानिमेशृणु ६ आग्नीध्रश्चाग्निबाहुश्चवपु ष्मान्द्युतिमांस्तथा । मेधामेधातिथिर्भव्यःसवनःपुत्रएवच ७ ज्योतिष्मान्दशमस्तेषांसत्यनामासुतोऽभवत् । प्रियव्रतस्यपुत्राणांप्रख्याताबलवी र्यतः ८ मेधाग्निबाहुपुत्रास्तुत्रयोयोगपरायणाः । जातिस्मरामहाभागानराज्यायमनोदधुः ९ निर्ममाःसर्वकालंतुसमस्तार्थेषुवैमुने । चक्रुःक्रिया यथान्यायमफलाकांक्षिणोहिते १० प्रियव्रतोददौतेषांसप्तानांमुनिसत्तम । विभज्यसप्तद्वीपानिमैत्रेयसुमहात्मनाम् ११ जंबुद्वीपंमहाभागःसोऽग्नी ध्रायददौपिता । मेधातिथेस्तथाप्रादात्प्लक्षद्वीपमथापरम् १२ शाल्मलेचवपुष्मंतंमहेंद्रमभिषिक्तवान् । ज्योतिष्मंतंकुशद्वीपेराजानंकृतवान्प्रभुः । १३ द्युतिमंतंचराजानंक्रौंचद्वीपेसमादिशत् । शाकद्वीपेश्वरंचापिभव्यंचक्रेप्रियव्रतः १४ पुष्कराधिपतिंचक्रेसवनंचापिसप्रभुः १५ जंबुद्वीपेश्व रोयस्तुआग्नीध्रोमुनिसत्तम । तस्यपुत्राबभूवुर्हिप्रजापतिसमानव १६ नाभिःकिंपुरुषश्चैवहरिवर्षइलावृतः । रम्योहिरण्वान्षष्ठस्तुकुरुर्भद्राश्वए वच १७ केतुमालस्तथाचान्यःसाधुचेष्टोनृपोऽभवत् । जंबुद्वीपविभागांस्तुतेषांविप्रनिशामय १८ पित्रादत्तंहिमाह्वंतुवर्षंनाभेस्तुदक्षिणम् । हेमकूटंतथावर्षंददौकिंपुरुषायसः १९ तृतीयंनैषधंवर्षंहरिवर्षायदत्तवान् । इलाव्रतायप्रददौमेरुर्यत्रतुमध्यगः २० नीलाचलाश्रितंवर्षंरम्याय प्रददौपिता । श्वेतंयदुत्तरंतस्मात्पित्रादत्तंहिरण्वते २१ यदुत्तरंशृंगवतोवर्षंतत्कुरवेददौ । मेरोःपूर्वेणयद्वर्षंभद्राश्वायप्रदत्तवान् २२ गंधमादन

थाजगद्भूवेत्यादियत्पृष्टोसि १ जगत्सृष्टौवाचकत्वेनसंबद्धोयोयमंशोभागस्त्वयोक्तस्तत्रसृष्ट्यंशेशेषभूतांसृष्टिंश्रोतुमिच्छामि २ ध्रुवोवंशप्रवर्तकस्त्वयोदितः ३ शेषमेवपृच्छति प्रियव्रत स्येति ४ आत्मजामौरसींकन्याकन्यानाम्नीमितिवा तत्कन्येप्रियव्रतकन्ये ५ ६ पुत्रःपुत्रसंज्ञः ७ ज्योतिष्मान् सत्यनामायथार्थनामातेजस्वीत्यर्थः ८ ९ १० तेषामवशिष्टानाम् ११ १२ १३ १४ १५ प्रजापतिसमानवभृग्वादिनवब्रह्मसमाः १६ १७ १८ हिमेनहिमवताआह्वासंज्ञायस्यतदेवमुत्तरत्रापितत्तत्पर्वतोपलक्षितंतत्तद्वर्षनामज्ञेयम् १९ २० तस्मान्नीला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चलाश्रयाच्छ्वेतंश्वेतागिर्युपलक्षितम् २१ २२ २३ शालग्रामंहरिक्षेत्रम् २४ तेषांतेषु २५ विपर्ययोकालमरणादिः नमृत्युभयंपरिक्षिप्तादायुषःप्रागितिशेषः नोत्तमाधममध्यमाःशीला दीनांसमत्वाज्जात्यादीनांतुवैषम्यमस्त्येव २६ अष्टासुवर्षेषुसामान्यतोव्यवस्थामुक्त्वानाभेर्वर्षस्यभारतसंज्ञाकारणंवक्तुमाह हिमाह्वमिति २७ २८ २९ ३० ३१ वीटाकंदुकः शिलामयःगोकर्णकृष्णमंजर्योवीटायत्स्फुटितंपुनः मुखेधृतंतुवीराणांवीटंतत्प्राणधारणमित्यौषधिविशेषंव्याख्यातवंतःश्रीविमलबोधपादाः महाध्वानंमहाप्रस्थानम् वीराध्वानमितिपाठे

वर्षंतुकेतुमालायदत्तवान् । इत्येतानिददौतेभ्यःपुत्रेभ्यःसनरेश्वरः २३ वर्षेष्वेतेषुतान्पुत्रानभिषिच्यसभूमिपः । शालग्रामंमहापुण्यंमैत्रेयतपसेययौ २४ यानिकिंपुरुषादीनिवर्षाण्यष्टौमहामुने । तेषांस्वाभाविकीसिद्धिःसुखप्रायाह्ययत्नतः २५ विपर्ययोनतत्रास्तिजरामृत्युभयंनच । धर्माधर्मौ नतेष्वास्तांनोत्तमाधममध्यमाः २६ नतेष्वस्तियुगावस्थाक्षेत्रेष्वष्टासुसर्वदा । हिमाह्वंयस्यवैवर्षंनाभेरासीन्महात्मनः २७ तस्यर्षभोभवत्पुत्रो मेरुदेव्यांमहाद्युतिः । ऋषभाद्भरतोजज्ञेज्येष्ठःपुत्रशतस्यसः २८ कृत्वाराज्यंसधर्मेणतथेष्ट्वाविविधान्मखान् । अभिषिच्यसुतंज्येष्ठंभरतंपृथिवीप तिः २९ तपसेसमहाभागःपुलस्त्यस्याश्रमंययौ । वानप्रस्थविधानेनतत्रापिकृतनिश्चयः ३० तपस्तेपेयथान्यायंयदाचसमहीपतिः । तपसाक र्षितोत्यर्थंकृशोधमनिसंततः ३१ नग्नोवीटांमुखेदत्त्वामहाध्वानंततोगतः । ततश्चभारतंवर्षमेतल्लोकेसुगीयते ३२ भरताययतःपित्रादत्तंप्रतिष्ठता वनम् । सुमतिर्भरतस्यासीत्पुत्रःपरमधार्मिकः ३३ कृत्वासम्यग्ददौतस्मैराज्यमिष्टमखःपिता । पुत्रसंक्रामितश्रीस्तुभरतःसमहीपतिः ३४ योगाभ्यासरतःप्राणाञ्शालग्रामेऽत्यजन्मुने । अजायतचविप्रोऽसौयोगिनांप्रवरेकुले ३५ मैत्रेयतस्यचरितंकथयिष्यामितेपुनः । सुमतेस्तेजस स्तस्मादिंद्रद्युम्नोव्यजायत ३६ परमेष्ठीततस्तस्मात्प्रतिहारस्तदन्वयः । प्रतिहर्तेतिविख्यातउत्पन्नस्तस्यचात्मजः ३७ भुवस्तस्मात्तथोद्गीथःप्र स्तारस्तत्सुतोऽभवत् । पृथुस्ततस्ततोनक्तोनक्तस्यापिगयःसुतः ३८ नरोगयस्यतनयस्तत्पुत्रोऽभूद्विराट्ततः । तस्यपुत्रोमहावीर्योधीमांस्तस्मा द्व्यजायत ३९ महांतस्तत्सुतश्चाभून्मनस्युस्तस्यचात्मजः । त्वष्टात्वष्टुश्चविरजोरजस्तस्याप्यभूत्सुतः ४० शतजिद्रजसस्तस्यजज्ञेपुत्रशतंमुने । विष्वग्ज्योतिःप्रधानास्तेयैरिमावर्धिताःप्रजाः ४१ तैरिदंभारतंवर्षंनवभेदमलंकृतम् । तेषांवंशप्रसूतैश्चभुक्तेयंभारतीपुरा ४२ कृतत्रेतादिसर्गेण

पिसएवार्थः ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० विश्वज्योतिःप्रधानोमुख्योयेषांतेविश्वज्योतिरितिवापाठः सुगमः ४१ ननुपूर्वमुत्तानपादादयःसार्वभौमाःप्रोक्ताइ दानींप्रियव्रतादयःसार्वभौमाउच्यंते तन्नसंगच्छते अतःक्रमोवक्तव्यइतितत्राह तेषामिति तेषांप्रियव्रतान्वयप्रसूतानांवंशेप्रसूतैरियंभूमिर्भुक्तापश्चादुत्तानपादादिभिरित्यर्थः ४२ कियंतं कालमेतैर्भुक्तेत्यतआह कृतत्रेतादीनांसर्गेणसांसर्गेणमेलनेनयद्युगंचतुर्युगात्मकमेवयुगमितियावत्तेनसंख्येयेनप्रतियोगिनाआख्यायतेनिरूप्यतेयाएकसप्ततिस्तावंतंकालमित्यन्वयःयुगाख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेकसप्ततिमितिपाठःसुगमः ४३ एतदेवस्पष्टयति एषइति वाराहेस्मिन्कल्पेयदास्वायंभुवःपूर्वस्यप्रथममन्वंतरस्याधिपोभवत्तदाएषप्रियव्रतवंश्यानांराज्ञांसर्गोस्वारोचिषादावुत्तानपादवंश्यानामित्यर्थः यद्वा स्वायंभुवस्यमनोःसर्गोवंशः एषएतावत्कालावच्छिन्नइत्यर्थः येनेदंजगदापूरितमितिसर्गस्यैवविशेषणम् मन्वंतराधिपः मन्वंतरंव्याप्यराजेत्यर्थः इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांद्वितीयेंशेप्रथमोध्यायः १ प्रियव्रतचरित्रोक्तिसूचितंभूमिमंडलम् प्रश्नोत्तराभ्यांगदितुंद्वितीयउपचक्रमे उक्तानुवादपूर्वकंभुवनकोशंसविशेषंपृच्छति कथितइति स्वयंभुवोंऽशत्वान्मनुरेवस्वयंभूस्तदीयःप्रियव्रतादिसर्गः कथितःतत्कथनेद्वीपवर्षादिविभागोक्त्यासूचितंभूमंडलंश्रोतुमिच्छामि १ देवादीनांपुर्योनगर्योयावत्यः २ एतेद्वादशप्रश्नाः एषांचवक्ष्यमाणैः संख्यासंस्थानादिभिर्यथायोगमुत्तराणिद्रष्टव्यानि ३ ४ ५ जंब्वादयोद्वीपाःसप्त लवणादिभिःसप्तभिःसमुद्रैः प्रमाणतः समंयथास्यादेवंसमंतादावृत,

युगाख्यात्वेकसप्ततिः ४३ एषस्वायंभुवःसर्गोयेनेदंपूरितंजगत् । वाराहेतुमुनेकल्पेपूर्वमन्वंतराधिपः ४४ इतिश्रीविष्णुपुराणेद्वितीयेंशेप्रथमोध्यायः १ । । मैत्रेयउवाच । । कथितोभवतात्रह्मन्सर्गःस्वायंभुवोहिमे । श्रोतुमिच्छाम्यहंत्वत्तःसकलंमंडलंभुवः १ यावंतःसागराद्वीपास्तथावर्षाणिपर्वताः । वनानिसरितःपुर्योदेवादीनांतथामुने २ यत्प्रमाणमिदंसर्वंयदाधारंयदात्मकम् । संस्थानमस्यचमुनेयथावद्वक्तुमर्हसि ३ । । पराशरउवाच । । मैत्रेयश्रूयतामेतत्संक्षेपाद्वदतोमम । नास्यवर्षशतेनापिवक्तुंशक्योतिविस्तरः ४ जंबुप्लक्षादयोद्वीपाःशाल्मलिश्चापरोद्विज । कुशःक्रौंचस्तथाशाकःपुष्करश्चैवसप्तमः ५ एतेद्वीपाःसमुद्रैस्तुसप्तसप्तभिरावृताः । लवणेक्षुसुरासर्पिर्दधिदुग्धजलैःसमम् ६ जंबुद्वीपःसमस्तानामेतेषांमध्यसंस्थितः । तस्यापिमेरुर्मैत्रेयमध्येकनकपर्वतः ७ चतुराशीतिसाहस्रोयोजनैरस्यचोच्छ्रयः । प्रविष्टःषोडशाधस्ताद्वात्रिंशन्मूर्ध्निविस्तृतः ८ मूलेषोडशसाहस्रेविस्तारस्तस्यभूभृतः । भूपद्मस्यास्यशैलोऽसौकर्णिकाकारसंस्थितः ९ हिमवान्हेमकूटश्चनिषधश्चास्यदक्षिणे । नीलःश्वेतश्चशृंगीचउत्तरेवर्षपर्वताः १० लक्षप्रमाणौद्वौमध्येदशहीनास्तथापरे । सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्चते ११ भारतंप्रथमंवर्षंततःकिंपुरुषंस्मृतम् । हरिवर्षंतथै

इतिद्वयोरन्वयः ६ ७ अशीतिरेवाशीतिः सहस्रमेवसाहस्रंचतुराधिकानिआशीतिःसहस्राणि योजनैःप्रमाणंयस्यसमेरोरुच्छ्रयः शतसहस्रयोजनप्रमाणोमेरुस्तत्रबहिरुच्छ्रयः चतुरशीतिसहस्रयोजनोदृश्यते भूम्यांप्रविष्टः खातःषोडशयोजनसहस्राणीतिशेषः एवमुत्तरत्रापि ८ अतएवमूलेनसंकुचितत्वान्मूर्ध्निविस्तृतत्वात्कनकगौरत्वाद्दलाकृतिः द्वीपांतरभूम्यामध्यगत्वाच्चभूपद्मस्यकर्णिकाकारसंस्थितः ९ भारतंवर्षमारभ्यमेरोर्दक्षिणोत्तरतः स्थितानांषण्णांवर्षाणांमर्यादापर्वतानाह हिमवानितिअस्यमेरोर्वर्षाणांव्यवच्छेदकाःपर्वताः १० लक्षप्रमाणौद्वौमध्येजंबुद्वीपस्य मेरोरुभयतःप्राक्पश्चिमदैर्घ्येणलक्षप्रमाणौद्वौनिषधनीलौएतयोर्मंडलाकारजंबुद्वीपपरममध्यवर्तित्वाभावाल्लक्षप्रमाणत्वाभावेपिस्थूलदृष्ट्यातथोक्तम् अपरेहेमकूटादयोयथाक्रमंदशदशयोजनसहस्रहीनाः दशेतिवीप्सार्थःनिषधमपेक्ष्यहेमकूटोदशहीनः एवंनीलमपेक्ष्यश्वेतः तंचापेक्ष्यशृंगीति यथोक्तंवाराहे द्वीपस्यमंडलीभावाद्वासवद्वीप्रकीर्तितेइति तेतावद्विस्तारिणःसहस्रद्वययोजनपृथवश्च लवणोदधिपर्यंताःसहस्रद्वयविस्तृताइत्यागमदर्शनात् ११ १२ उत्तरंमेरोरितिशेषः यथावैभारतंधनुराकृतितथेत्यर्थः धनुःसंस्थेस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेज्ञेयेद्वेवर्षेदक्षिणोत्तरे दीर्घाणितत्रचत्वारिचतुरस्त्रमिलावृतमिविवायूक्तेः १३ नवसाहस्त्रमिति एतेषांभारतादीनांमध्येएकैकंवर्षंविस्तारतोनवसहस्त्रयोजनप्रमाणम् १४ नवसाहस्त्रे त्यत्रनवेत्यंतंवीप्सार्थंज्ञेयम् चतुर्दिशंनवनवसाहस्त्रमित्यर्थः तेनइलावृतंमेरुणासहस्त्राणिचतुस्त्रिंशत् भद्राश्वकेतुमालेप्रत्येकंद्वात्रिंशदित्यर्थसिद्धम् सहस्त्रेमाल्यवहगंधमादनाविति पूर्व पश्चिमतोलक्षप्रमाणता किंचात्रइलावृतेअन्येचत्वारःपर्वताः १५ विष्कंभाधारकाः १६ तेषुमंदरादिषुपूर्वादिक्रमेणकदंबादयश्चत्वारःपादपाएकादशशतयोजनोच्छ्रयाःगिरिकेतवोध्व

वान्यन्मेरोर्दक्षिणतोद्विज १२ रम्यकंचोत्तरंवर्षंतथैवतुहिरण्मयम्। उत्तराःकुरवश्चैवयथावैभरतंतथा १३ नवसाहस्त्रमेकैकमेतेषांद्विजसत्तम। इलावृतं चतन्मध्येसौवर्णोमेरुरुच्छ्रितः १४ मेरोश्चतुर्दिशंतत्रनवसाहस्त्रविस्तृतम्। इलावृतंमहाभागचत्वारश्चात्रपर्वताः १५ विष्कंभारचितामेरोर्योजनायुत मुच्छ्रिताः। पूर्वेणमंदरोनामदक्षिणेगंधमादनः। विपुलःपश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्थितः १६ कदंबस्तेषुजंबुश्चपिप्पलोवटएवच। एकादशशतायामाः पादपागिरिकेतवः १७ जंबुद्वीपस्यसाजंबूर्नामहेतुर्महामुने। महागजप्रमाणानिजंब्वास्तस्याःफलानिवै १८ पतंतिभूभृतःपृष्ठेशीर्यमाणानिसर्वतः। र सेनतेषांप्रख्यातातत्रजंबूनदीतिवै। सरित्प्रवर्त्ततेसाचपीयतेतन्निवासिभिः १९ नस्वेदोनचदौर्गंध्यंनजरानेंद्रियक्षयः। तत्पानस्वस्थमनसांजनानांत त्रजायते २० तीरमृत्तद्रसंप्राप्यसुखवायुविशोषिता। जांबूनदाख्यंभवतिसुवर्णंसिद्धभूषणम् २१ मेरोःपूर्वेणभद्राख्यंकेतुमालंचपश्चिमे। वर्षेद्वेतुमुनि श्रेष्ठतयोर्मध्यमिलावृतम् २२ वनंचैत्ररथंपूर्वंदक्षिणंगंधमादनम्। वैभ्राजंपश्चिमेतद्वदुत्तरेनंदनंस्मृतम् २३ अरुणोदंमहाभद्रमसितोदंसमानसम्। सरांस्येतानिचत्वारिदेवभोग्यानिसर्वदा २४ शीतांतश्चक्रमुंजश्चकुररीमाल्यवांस्तथा । वैकंकप्रमुखामेरोःपूर्वतःकेसराचलाः २५ त्रिकूटशिशिर श्चैवपतंगोरुचकस्तथा । निषधादयोदक्षिणतस्तस्यकेसरपर्वताः २६ शिखिवासाःसवैदूर्यःकपिलोगंधमादनः । यारुधिप्रमुखास्तद्वत्पश्चिमे केसराचलः। मेरोरनंतरांगेषुजठरादिष्विवस्थिताः २७ शंखकूटोथऋषभोहंसोनागस्तथापरः। कालंजराद्याश्चतथाउत्तरेकेसराचलाः २८ च तुर्दशसहस्त्राणियोजनानांमहापुरी। मेरोरुपरिमैत्रेयब्रह्मणःप्रथितादिवि २९ तस्याःसमंततश्चाष्टौदिशासुविदिशासुच । इंद्रादिलोकपालानांप्र

जाइवराचिताः १७ नामहेतुर्नामप्रवृत्तिहेतुः फलप्रमाणंवायुनोक्तम् अरत्नीनांशतान्यष्टावेकषष्ट्यधिकानिच फलप्रमाणंसंख्यातमृषिभिस्तत्त्वदर्शिभिरिति १८ तन्निवासिभिरिला वृतस्थैः १९ इंद्रियक्षयःपुंशक्तिह्रासः २० तस्यफलस्यरसम् सुखवायुःसुखस्पर्शोवायुःतेनशोषितासतीतीरमृत्तिकासिद्धानांभूषणंसुवर्णंभवति २१ तयोर्मध्यमित्यनुवादस्तत्स्थप र्वतेषुवनादिकथनार्थः तथाचमार्कंडेयपुराणम् शैलेषुमंदराद्येषुचतुर्ष्वपिद्विजोत्तम वनानियानिचत्वारिसरांसिचनिबोधमेइति २२ २३ २४ मेरोःकर्णिकास्थानीयत्वाच्छीतांतादयःकेसर स्थानीयाः २५ २६ मेरोरनंतरांगेषुजठरादिष्वितिपश्चादग्रेपिकेसरपर्वतस्थानत्वेनसंबध्यते अनंतरांगेष्वतिसमीपेषुअतएवजठरादयइवपूर्वदक्षिणपश्चिमोत्तरदेशवर्तिन्याज्जठरादयोपते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वित्यर्थः २७ २८ २९ लोकपालानांपुरःसार्धत्रिसहस्रयोजनाः तामनुपरितोलोकपालानामष्टानांयथादेशंयथायथारूपंतुरीयमानेनपुरोष्टावुपक्लृप्ताइतिशुकोक्तेः ३० तत्रगंगागमनमाह विष्णुपादेति त्रिधाविक्रमतोविष्णोःपादात्पादकृतब्रह्मांडशुषिरात् विनिष्क्रांतासतीदिवोंतरिक्षाद्ब्रह्मणःपुर्यांपतति ३१ सातत्रपतितासतीवायुवेगाच्चतुर्धाभेदंप्राप्नोति ३२ शैलाच्छैलंयातीत्यत्रवायुनोक्तंसीतातुशिखरभ्रष्टेत्युपक्रम्य एवंशतसहस्राणिदारयंतीमहानदी निपपाततदासीताजठरेसिद्धसेविते तस्मादुपगताशैलंदेवकूटंतरंगिणीत्यादि ३३ तथैवालकनंदापीतिकेसराचलादिक्रमेणनिषधहेमकूटाद्यतिक्रम्येत्यर्थः सप्तभेदाभूत्वेति तत्रमत्स्यः स्रोतांसित्रिपथायास्तुप्रत्यपद्यंतसप्तधा नलिनीह्लादिनीचैवपावनीचैवप्राच्यगाः सीताचक्षुश्चसिंधुश्चातिस्रस्तावैप्रतीच्यगाः सप्तमीत्वनुगागंगांदक्षिणेनभगीरथमिति ३४ एवंचक्षुर्भद्रेअपिकेसराचलान्वर्षमर्यादागिरींश्चातीत्यपश्चिमोत्तरसमुद्रौगच्छतः ३५ ३६ एवंतावत्सप्तवर्षाणिमर्यादागिरिभिःसहोक्ताभद्राश्वपूर्वतोमेरोःकेतुमालंचपश्चिममित्युक्तयोर्वर्षयोर्मर्यादापर्वतावाह आनीलेति उत्तरोनीलोदक्षिणोनिषधः तत्पर्यंतआयामोययोस्तौ तत्रप

ख्याताःप्रवराःपुरः ३० विष्णुपादविनिष्क्रांताप्लावयित्वेंदुमंडलम् । संमताद्ब्रह्मणःपुर्यांगंगापततिवैदिवः ३१ सातत्रपतितादिक्षुचतुर्धाप्रतिपद्यते। सीताचालकनंदाचचक्षुर्भद्राचवैक्रमात् ३२ पूर्वेणशैलात्सीतातुशैलंयात्यंतरिक्षगा । ततश्चपूर्ववर्षेणभद्राश्वेनैतिसार्णवम् ३३ तथैवालकनंदापिदक्षिणेनैवभारतम् । प्रयातिसागरंभूत्वासप्तभेदामहामुने ३४ चक्षुश्चपश्चिमगिरीनतीत्यसकलांस्ततः । पश्चिमंकेतुमालाख्यंवर्षंगत्वैतिसार्णवम् ३५ भद्रातथोत्तरगिरीनुत्तरांश्चतथाकुरून् । अतीत्योत्तरमंभोधिंसमभ्येतिमहामुने ३६ आनीलनिषधायामौमाल्यवद्गंधमादनौ । तयोर्मध्यगतोमेरुःकर्णिकाकारसंस्थितः ३७ भारताःकेतुमालाश्चभद्राश्वाःकुरवस्तथा । पत्राणिलोकपद्मस्यमर्यादाशैलबाह्यतः ३८ जठरोदेवकूटश्चमर्यादापर्वतावुभौ । तौदक्षिणोत्तरायामावानीलनिषधायतौ ३९ गंधमादनकैलासौपूर्वपश्चायतावुभौ ।अशीतियोजनायामावर्णवांतर्व्यवस्थितौ ४०

श्चिमेमाल्यवान्पूर्वस्मिन्गंधमादनः तथैवेलावृतमपरेणपूर्वेणचमाल्यवद्गंधमादनावानीलनिषधायामाविति शुकोक्तेः केचित्तुतयोर्वैपरीत्यमाहुः वायुपुराणदर्शनात् चतुस्त्रिंशत्सहस्राणिगंधमादनपर्वतः उदग्दक्षिणतश्चायमानीलनिषधायतः चत्वारिंशत्सहस्राणिपरिवृद्धोमहीतलात् सहस्रमवगाढश्चतावदेवचविस्तृतः पूर्वेणमाल्यवाञ्शैलस्तत्प्रमाणःप्रकीर्तितइति तेनदैर्घ्यादिमानमपिव्यक्तंभवति तयोर्माल्यवद्गंधमादनयोर्मध्यगतोमेरुरिलावृतेनसहितइतिद्रष्टव्यम् ३७ लोकेजंबुद्वीपंतदेवपद्मंतस्यपत्राणि भारतकुरुवर्षयोर्भद्राश्वकेतुमालयोश्चपरस्परंसमानत्वादाभिमुख्येनावस्थानाच्चपत्रसादृश्यान्मर्यादाशैलागंधमादनाहिमवन्माल्यवच्छृंगिणस्तेषांबाह्यतःस्थिताः ३८ इदानींमेरोश्चतुर्दिक्षुद्वौद्वौपरिधिपर्वतौप्रमाणसंस्थानाभ्यांदर्शयति जठरइत्यादिपंचभिः इलावृतवर्षएवावांतरविभागहेतुत्वान्मर्यादापर्वताविति वर्षपर्वताविति चोक्तम् नववर्षपर्वतानामुक्तत्वादन्यवर्षस्यात्राभावाच्च ३९ अशीतियोजनआयामोविस्तारोययोस्तौमाल्यवद्गंधमादनमध्यादर्णवांतर्गतौ केचित्तुमर्यादाशैलबाह्यतइत्यग्रेणापिसंबध्यते तेनगंधमादनादिमर्यादापर्वतेभ्यःपरतएवभद्राश्वादिचतुर्वर्षसीमामूलस्थिताजठरादयःपर्वताःप्रतीयंते पांडवानांतीर्थयात्रायांहिमवतोदक्षिणतएवगंधमादनारोहणश्रवणात् अशीतियोजनायामावित्यत्रअशीतिसहस्रयोजनेतिज्ञेयंमेरोश्चतुर्दिशमितिव्यवधानेपिबोद्धव्यमितिवदंति ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वौजठरदेवकूटौयथाआनीलनिषधायतौतथैवोभावपिस्थितौ यथाहशुकः अष्टाभिरेतैःपरिविस्तृतोग्निरिवचकास्तिकांचनगिरिरिति ४१ ४२ ४३ ४४ तेषांशैलानामंतरेमध्येद्रोण्यःदरीविशेषाःसंति सिद्धाअणिमाद्यष्टसिद्धियुक्ताःचारणादेवगायकास्तैःसेविताः ४५ ४६ ४७ भौमाभूम्युद्भवाःस्वर्गाःसुखविशेषास्तदाश्रयाः ४८ ४९ ५० विश्वरूपेणव्यापकभावेनसर्वत्र तत्रहेतुः सर्वआधाराधेयरूपः ५१ ५२ निरातंकाः नीरोगाःवर्षाणांदशद्वादशवासहस्राणिस्थिरायुषइतिनियमोक्तिरिलावृतादिस्थानभेदविवक्षया तेषुदेवोनवर्षतियतोभौमान्यभांसिन

निषधःपारियात्रश्चमर्यादापर्वतावुभौ । मेरोःपश्चिमदिग्भागेयथापूर्वौतथास्थितौ ४१ तौदक्षिणोत्तरायामावानीलनिषधायतौ । त्रिशृंगोजारुधिश्चैवउत्तरौवर्षपर्वतौ ४२ पूर्वपश्चायतावेतावर्णवांतर्व्यवस्थितौ । इत्येतेमुनिवर्योक्तामर्यादापर्वतास्तव ४३ जठराद्यास्थितामेरोर्येषांद्वौद्वौचतुर्दिशम् । मेरोश्चतुर्दिशंयेतुप्रोक्ताःकेसरपर्वताः ४४ शीतांताद्यामुनेतेषामतीवहिमनोरमाः । शैलानामंतरद्रोण्यःसिद्धचारणसेविताः ४५ सुरम्याणितथातासुकाननानिपुराणिच । लक्ष्मीविष्णवग्निसूर्यादिदेवानांमुनिसत्तम ४६ तास्वायतनवर्याणिजुष्टानिनरकिन्नरैः । गंधर्वयक्षरक्षांसितथादैतेयदानवाः ४७ क्रीडंतितासुरम्यासुशैलद्रोणीष्वहर्निशम् भौमास्त्वेतेस्मृताःस्वर्गाधर्मिणामालयामुने ४८ नैतेषुपापकर्तारोयांतिजन्मशतैरपि । भद्राश्वेभगवान्विष्णुरास्तेहयशिराद्विज ४९ वराहःकेतुमालेतुभारतेकूर्मरूपधृक् । मत्स्यरूपश्चगोविंदःकुरुष्वास्तेसनातनः ५० विश्वरूपेणसर्वत्रसर्वःसर्वेश्वरोहरिः । सर्वस्याधारभूतोसौमैत्रेयास्तेखिलात्मकः ५१ यानिकिंपुरुषाद्यानिवर्षाण्यष्टौमहामुने । नतेषुशोकोनायासोनोद्वेगःक्षुद्भयादिकम् ५२ सुस्थाःप्रजानिरातंकाःसर्वदुःखविवर्जिताः । दशद्वादशवर्षाणांसहस्राणिस्थिरायुषः ५३ नतेषुवर्षतेदेवोभौमान्यंभांसितेषुवै। कृतत्रेतादिकानैवतेषुस्थानेषुकल्पना ५४ सर्वेष्वेतेषुवर्षेषुसप्तसप्तकुलाचलाः । नद्यश्चशतशस्तेभ्यःप्रसृतायाद्विजोत्तम ५५ । इतिश्रीविष्णुपुराणेद्वितीयेंशेद्वितीयोध्यायः २। । पराशरउवाच । । उत्तरंयत्समुद्रस्याहिमाद्रेश्चैवदक्षिणम् । वर्षंतद्भारतंनामभारतीयत्रसंततिः १ नवयोजनसाहस्रोविस्तारोस्यमहामुने । कर्मभूमिरियंस्वर्गमपवर्गंचगच्छताम् २ महेंद्रोमलयःसह्यःशुक्तिमान्ऋक्षपर्वतः । विंध्यश्चपारियात्रश्चसप्तात्रकुलपर्व

दीगतान्येवसंति ५३ ५४ कुलाचलामुख्याः पर्वताः तेभ्यःप्रसृतायानद्यस्ताश्चशतशःसंति ५५ इतिश्रीरत्नगर्भभटाचार्यकृतायांवैष्णवाकूतचंद्रिकायांद्वितीयेंशेद्वितीयोध्यायः २ नदीनांपर्वतानांचयथास्थानंविभागशः भारतस्यप्रशंसाचतृतीयइतिवर्ण्यते १ नवभेदंविभज्योक्तंजंबुद्वीपंस्वरूपतः कर्मणांसाधनीभूतंभारतंपुनरुच्यते २ उत्तरमिति समुद्रस्यमूलभूतस्यनतुसगरसुतखातस्य तत्राप्यवांतरद्वीपानांभारतत्वात् भारतीभरतसंबाधिनीसंततिः १ अत्रैवश्रेयःसाधनमनुष्ठेयमन्यत्रतदसंभवादितिदर्शयन्नाह कर्मभूमिरिति स्वर्गमपवर्गंचगच्छतांपुंसां उभयसाधनभूतानांप्रवृत्तिनिवृत्तिकर्मणाम् भूरियम् किंपुरुषादिवर्षाष्टकेपुष्करद्वीपेचकर्मणएवाभावात् प्लक्षादिद्वीपपंचकेकेवलंनिवृत्तमेवकर्मनान्यत् तथावक्ष्यतिहि यथोक्तकर्मकारिस्त्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्यादि २ समस्तपुरुषार्थसाधनगंगादिपुण्यनदीनांजन्मभूमयः शैलाश्चात्रैवसंतीत्याह महेंद्रइति ३ तस्मात्सर्वशुभाशुभमत्रेत्यनेनैवकर्मणाप्राप्यतइत्याह अतइति स्वर्गःस्वर्गलोकादिः मुक्तिंचतुर्विधां अपिशब्दात्कर्मसाध्यानन्यानपिलोकानित्यर्थः ४ इहैवप्रवृत्तिनिवृत्त्युभयकर्मसाध्यस्वर्गापवर्गादिप्राप्तिमनुवदन्नन्यत्रतदभावंदर्शयति इतइति केवलामुक्तिश्चान्यत्रापि स्यात् तदुपर्यपिबादरायणः संभवादितिदेवादीनामपिब्रह्मविद्याधिकारस्यसूचनात् मध्योभूर्लोकः अंतोनरकादिः कर्मउभयात्मकंनविधीयतेशास्त्रेणनप्रतिपाद्यते ५ इंद्रद्वीपाद्याः समुद्रवेलामारभ्याहिमवदंतामध्येसगरसुतखातांतरिताःसहस्रयोजनविस्ताराःभारतवर्षांतरद्वीपानवैवसामान्यतोज्ञेयाः भारतस्यास्यवर्षस्यनवभेदान्निबोधत सागरांतरिताज्ञेयास्तेत्वगम्याःपरस्पर

ताः ३ अतःसंप्राप्यतेस्वर्गोमुक्तिमस्मात्प्रयांतिच । तिर्यक्त्वंनरकंवापियांत्यतःपुरुषामुने ४ इतःस्वर्गश्चमोक्षश्चमध्यश्चांतश्चगम्यते । नखल्वन्यत्रमर्त्यानांकर्मभूमौविधीयते ५ भारतस्यास्यवर्षस्यनवभेदान्निशामय । इंद्रद्वीपःकशेरूमांस्ताम्रवर्णोगभस्तिमान् ६ नागद्वीपस्तथासौम्योगांधर्वस्त्वथवारुणः । अयंतुनवमस्तेषांद्वीपःसागरसंवृतः ७ योजनानांसहस्रंतुद्वीपोयंदक्षिणोत्तरात् । पूर्वेकिरातायस्यस्युःपश्चिमेयवनाःस्थिताः ८ ब्राह्मणाःक्षत्रियावैश्यामध्येशूद्राश्चभागशः । इज्यायुद्धवणिज्याद्यैर्वर्तयंतोव्यवस्थिताः ९ वेदस्मृतिमुखाश्चान्याःपारियात्रोद्भवामुने । नर्मदासुरसाद्याश्चनद्योविंध्यविनिर्गताः १० तापीपयोष्णीनिर्विंध्याप्रमुखाऋक्षसंभवाः । गोदावरीभीमरथीकृष्णावेण्यादिकास्तथा ११ सह्यपादोद्भवानद्यःस्मृताःपापप्रणाशनाः । कृतमालाताम्रपर्णीप्रमुखामलयोद्भवाः १२ त्रिसामाऋषिकुल्याद्यामहेंद्रप्रभवाःस्मृताः । ऋषिकुल्याकुमाराद्याःशुक्तिमत्पादसंभवाः १३ शतद्रुचंद्रभागाद्याहिमवत्पादनिःसृताः । आसांनद्युपनद्यश्चसंत्यन्याश्चसहस्रशः १४ तास्विमेकुरुपांचालामध्यदेशादयोजनाः । पूर्वदेशादिकाश्चैवकामरूपनिवासिनः १५ पुंड्राःकलिंगामगधादाक्षिणात्याश्चकृत्स्नशः । तथापरांताःसौराष्ट्राःशूराभीरास्तथार्बुदाः १६ मालूकामालवाश्चैवपारियात्रनिवासिनः । सौवीराःसैंधवाहूणाःशाल्वाःशाकलवासिनः १७ मद्रारामास्तथांबष्ठाःपारसीकादयस्तथा । आसांपिबंतिसलिलंवसंतिसरितांसदा १८ समीपतोमहाभागहृष्टपुष्टजनाकुलाः । चत्वारिभारतेवर्षेयुगान्यत्रमहामुने १९ कृतंत्रेता

मितिवायूक्तेः ६ अयंतुसंचाराश्रयदेशेभारताख्यस्तेषांनवमइतिसंबंधः तुशब्दादन्योपिसागरांतरितःसहस्रयोजनात्मकश्चेत्यर्थः केचिद्व्याख्यांतरंकुर्वते तथाहि भारतस्यास्यवर्षस्यनवभेदाःप्रकीर्तिताः अष्टाभिर्गिरिभिर्भिन्नायेत्वगम्याःपरस्परम् हिमाचलादासमुद्रंगिरयस्तेव्यवस्थिताः याम्योत्तरेणराजेंद्रनामतस्तानिमाञ्शृणु सुमालीहेममालीचशंभुःकार्तस्वराकरः वैदूर्यपर्वतश्चैवराजतोमणिमाञ्शिखी इंद्रद्वीपःकशेरूमान्ताम्रवर्णोगभस्तिमान् नागद्वीपस्तथासौम्योगांधर्वस्त्वथवारुणः तेषांतुनवमोमध्येद्वीपोनाम्नातुमध्यमः अस्मिन्मन्वंतरेक्षिप्तःसागरैस्तुचतुर्दिशम् वैदूर्यपर्वतात्पूर्वेदक्षिणेनहिमालयात् पश्चाच्चकांचनगिरेरुदगेवतुलावणात् वेष्टितैःसागरैःसर्वैर्नानासंचालयैर्नृप इत्यत्रव्याख्यानेचतुर्दिशंखननेसहस्रयोजनत्वानुपपत्तिः ७ ८ वर्तयंतइतिस्वार्थेणिच् ९ १० ११ १२ क्रमाविवक्षयाशुक्तिमत्पादसंभवानांनदीनांपश्चान्निर्देशः १३ उपनद्यःक्षुद्रप्रभावाः १४ तास्विति इमेकुरुपंचालादिनानादेशवर्तिनोजनाः तासुनदी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षु वसंति आसांजलानिपिबंतिचेतिचतुर्थेनान्वयः १५ १६ १७ १८ चत्वारीति क्रमेणधर्मपादह्रासादियुगधर्माअत्रैवनान्यत्रेत्यर्थः १९ २० यज्ञैर्यज्ञस्यपुरुषोभोक्तायज्ञस्वरूपो विष्णुरत्रैवइज्यते अन्यद्वीपेषुप्लक्षादिषुअन्यथासोमवायुसूर्यादिरूपः २१ २२ २३ स्वर्गेदेवत्वप्राप्तेरपिमानुष्यमतिदुर्लभमितिदेवगीतंप्रमाणयति गायंतीति स्वर्गश्चास्पदंप्राप्यंस्थानंतस्य हेतुभूते मार्गभूतेइतिवापाठः भारताख्येभूभागेयेपुरुषाभवंतितेचसुरत्वादस्माकंसुरत्वमपेक्ष्यभूयोधिकंधन्याः उपचीयमानसुकृतसंचयात् २४ भारतस्यमोक्षहेतुत्वमप्याह कर्मणीति तां कर्ममहीमवाप्यअसंकल्पितानितानिप्रसिद्धानिफलानियेषांतानिकर्माणिविष्णौसंन्यस्यसमर्प्यअमलाःसंतस्तस्मिन्ननंतेलयमैक्यंप्रयांति तमालयमितिपाठेआलयंस्थानमित्यर्थः २५ युष्मा कमपिस्वर्गभोगानंतरंभारतेजन्मभविष्यतीतिचेत्तन्नज्ञायतइत्याह जानीमेति स्वर्गप्रदेकर्मणिभोगेनविलीनेसतिकुत्रदेहबंधंजन्मप्राप्स्यामइतिनजानीमः येत्वत्रभारतेमनुष्याः संतितेखलुनि

द्वापरश्चकलिश्चान्यत्रनक्वचित् । तपस्तप्यंतियतयोजुह्वतेचात्रयाज्विनः । दानानिचात्रदीयंतेपरलोकार्थमादरात् २० पुरुषैर्यज्ञपुरुषोजंबुद्वीपे सदेज्यते । यज्ञैर्यज्ञमयोविष्णुरन्यद्वीपेषुचान्यथा २१ अत्रापिभारतंश्रेष्ठंजंबुद्वीपेमहामुने । यतोहिकर्मभूरेषाअतोन्याभोगभूमयः २२ अत्रजन्म सहस्राणांसहस्रैरपिसत्तम । कदाचिल्लभतेजंतुर्मानुष्यंपुण्यसंचयम् २३ गायंतिदेवाःकिलगीतकानिधन्यास्तुयेभारतभूमिभागे । स्वर्गापवर्गा स्पदहेतुभूतेभवंतिभूयःपुरुषाःसुरत्वात् २४ कर्माण्यसंकल्पिततत्फलानिसंन्यस्यविष्णौपरमात्मरूपे । अवाप्यतांकर्ममहीमनंतेतस्मिल्लयंयेत्वम लाःप्रयांति २५ जानीमनैतत्क्वयंविलीनेस्वर्गप्रदेकर्मणिदेहबंधम् । प्राप्स्यामधन्याःखलुतेमनुष्यायेभारतेनेंद्रियविप्रहीनाः २६ नववर्षंतुमैत्रे यजंबुद्वीपमिदंमया । लक्षयोजनविस्तारंसंक्षेपात्कथितंतव २७ जंबुद्वीपंसमावृत्यलक्षयोजनविस्तरः। मैत्रेयवलयाकारःस्थितःक्षारोदधिर्बहिः २८ इतिश्रीविष्णुपुराणेद्वितीयेंशेतृतीयोध्यायः ३ पराशरउवाच । । क्षारोदेनयथाद्वीपोजंबुसंज्ञोऽभिवेष्टितः। संवेष्ट्यक्षारमुदधिंप्लक्षद्वीपस्तथास्थितः १ जंबुद्वीपस्यविस्तारःशतसाहस्रसंमितः । सएवद्विगुणोब्रह्मन्प्लक्षद्वीपउदाहृतः २ सप्तमेधातिथेःपुत्राःसप्तद्वीपेश्वरस्यवै। ज्येष्ठःशांतनवोनामाशिशि रस्तदनंतरः ३ सुखोदयस्तथानंदःशिवःक्षेमकएवच । ध्रुवश्चसप्तमस्तेषांप्लक्षद्वीपेश्वराहिते ४ पूर्वंशांतनवंवर्षंशिशिरंसुखदंतथा । आनंदंचशि

श्चितंधन्याः अनायासेनस्वर्गस्यमोक्षस्यवाप्राप्तेःइंद्रियविप्रहीनाःअंधपंग्वादयस्तेनभवंति इंद्रियवत्त्वमात्रेणतदुभयसिद्धेः २६ लक्षयोजनविस्तारमिति इलावृतंविहायषड्वर्षैःचतुःपंचाशद्योज नसहस्राणिहिमवदादिषट्पर्वतैर्द्वादशसहस्राणिइलावृतसुमेरुभ्यांचतुस्त्रिंशत्सहस्राणीत्येवंलक्षयोजनविस्तारमिति २७ २८ इतिश्रीवैष्णवाकूतचंद्रिकायांद्वितीयेंशेतृतीयोध्यायः३ प्लक्षद्वीपा दिवर्षाद्रिसरिद्वर्णेज्यकल्पनाः क्षारोदादिसमुद्रांश्चचतुर्थेवर्णयन्मुनिः अथप्लक्षादिद्वीपान्वर्षाद्रिसरिद्विर्वर्णपूज्यादिभेदेनववर्णयति क्षारोदेनेत्यादिना अत्रजंबुद्वीपोलवणोदधिश्चविस्तारतोलक्ष योजनप्रमाणौतदपेक्षयाउत्तरोत्तरंद्वीपाब्धियुग्मंपूर्वपूर्वद्वीपाब्धियुग्माद्द्विगुणंद्रष्टव्यम् प्लक्षादिद्वीपपंचकेद्वीपप्रमाणैरुभयतःसमुद्रस्पर्शिभिःसप्तभिर्मर्यादागिरिभिर्विभक्तानिउभयतःसमुद्रस्पर्शी निसप्तसप्तवर्षाणि पुष्करद्वीपेतुमध्यतोवलयाकारेणमानसोत्तरेणविभक्तेद्वेवर्षे सर्वत्रवर्षयति संज्ञाभिरेववर्षाणांसंज्ञाः शैलनद्यादयश्चस्वस्वसंज्ञाभिरेवस्पष्टनिर्दिष्टाइतिसामान्यार्थः विशेषतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातत्स्मृतंकुशद्वीपमितिप्रसिद्धम् ४४ ४५ ४६ ४७ ४८ ४९ क्रौंचद्वीपेप्रथमः शैलः क्रौंचः तेनैवद्वीपोपिक्रौंचः सप्तमोमहाशैलः पंचमश्चैत्रइतिपाठेमहाशैलइतिदुंदुभिविशेषणम् ५० पूर्वस्मात्पूर्वस्मात्परस्परमुत्तरोत्तरंद्विगुणाः तेषुद्वीपेषुयेशैलास्तेपियथाद्वीपास्तथोत्तरोत्तरंहिद्विगुणविस्तारोच्छ्रयाइत्यर्थः ५१ ५२ ५३ नद्योनदीः ५४ ५५ रुद्रस्वरू

मेशृणु ४९ क्रौंचश्चवामनश्चैवतृतीयश्चांधकारकः । देवावृत्पंचमश्चात्रतथान्यःपुंडरीकवान् ५० दुंदुभिश्चमाहाक्रौंचोद्विगुणस्तेपरस्परम् । द्वीपाद्वीपेषुयेशैलायथाद्वीपानितेतथा ५१ सर्वेष्वेतेषुरम्येषुवर्षशैलवरेषुच । निवसंतिनिरातंकाःसहदेवगणैःप्रजाः ५२ पुष्कराःपुष्कलाधन्यास्तिग्माश्चात्रमहामुने । ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चानुक्रमोदिताः ५३ तेतत्रनद्योमैत्रेययाःपिबंतिशृणुष्वताः । सप्तप्रधानाःशतशस्तत्रान्याःक्षुद्रनिम्नगाः ५४ गौरीकुमुद्वतीचैवसंध्यारात्रिर्मनोजवा । ख्यातिश्चपुंडरीकाचसप्तैतावर्षनिम्नगाः ५५ तत्रापिवर्णैर्भगवान्पुष्कराद्यैर्जनार्दनः । यागैरुद्रस्वरूपस्थइज्यतेयज्ञसन्निधौ ५६ क्रौंचद्वीपःसमुद्रेणदधिमंडोदकेनच । आवृतःसर्वतःक्रौंचद्वीपतुल्येनमानतः ५७ दधिमंडोदकश्चापिशाकद्वीपेनसंवृतः । क्रौंचद्वीपस्यविस्ताराद्द्विगुणेनमहामते ५८ शाकद्वीपेश्वरस्यापिभव्यस्यसुमहात्मनः। सप्तैवतनयास्तेषांददौवर्षाणिसप्तसः ५९ जलदश्चकुमारश्चसुकुमारोषणीवकः । कुसुमोदःसमौदाकिःसप्तमश्चमहाद्रुमः ६० तत्संज्ञान्येवतत्रापिसप्तवर्षाण्यनुक्रमात् । तत्रापिपर्वताःसप्तवर्षविच्छेदकारिणः ६१ पूर्वस्तत्रोदयगिरिर्जलाधारस्तथापरः । तथारैवतकःश्यामस्तथैवास्तेगिरिर्द्विज ६२ आंबिकेयस्तथारम्यःकेसरीपर्वतोत्तमः शाकस्तत्रमहावृक्षःसिद्धगंधर्वसेवितः६३ यत्रत्यवातसंस्पर्शादाह्लादोजायतेपरः। तत्रपुण्याजनपदाश्चातुर्वर्ण्यसमन्विताः ६४ नद्यश्चात्रमहापुण्याःसर्वपापभयापहाः।सुकुमारीकुमारीचनलिनीरेणुकाचया ६५ इक्षुश्चधेनुकाश्चैवगभस्तीसप्तमीतथा । अन्यास्त्वयुतशस्तत्रक्षुद्रनद्योमहामुने ६६ महीधरास्तथासंतिशतशोथसहस्रशः । ताःपिबंतिमुदायुक्ताजलदादिषुयेस्थिताः । वर्षेषुतेजनपदाःस्वर्गादभ्येत्यमेदिनीम् ६७ धर्महानिर्नतेष्वस्तिनसंघर्षःपरस्परम् । मर्यादाव्युत्क्रमोनापितेषुदेशेषुसप्तसु ६८ मगाश्चमागधाश्चैवमानसामंदगास्तथा । मगाब्राह्मणभूयिष्ठामागधाःक्षत्रियास्तुते ६९ वैश्यास्तुमानसाज्ञेयाःशूद्रास्तेषांतुमंदगाः । शाकद्वीपेषुतैर्विष्णुःसूर्यरूपधरोमुने ७० यथोक्तैरिज्यतेसम्यक्कर्मभिर्नियतात्मभिः । शा

पेणस्थितः रुद्रस्वरूपस्थः यज्ञसंनिधौयज्ञशलायाम् ५६ दध्नोमंडःसारस्तदेवोदकंयास्मिंस्तेन ५७ ५८ ५९ ६० ६१ ६२ शाकोवृक्षविशेषः अंतः खरस्पर्शः बहिर्मृदुस्पर्शः अंतःखरा वहिःस्निग्धास्त्रियःशाकदलोपमाद्दतिवसिष्ठोक्तेः ६३ ६४ ६५ ६६ स्वर्गादभ्येत्येति स्वर्गःभोगानंतरंपुण्यशेषेणमेदिनीमभ्येत्यजलदादिवर्षेषुयेस्थिताजातास्तेताःपिबंतीत्यन्वयः ६७ धर्महानिःनित्यादिक्रियाविरहः संघर्षःकलहः मर्यादाश्रुतिस्मृत्युक्तआचारस्तस्यातिक्रमोलंघनम् ६८ ब्राह्मणभूयिष्ठाःपूर्वोक्तेषुसर्वेषुब्राह्मणेषुमगाःश्रेष्ठाःयद्वायेभारतेब्राह्मणेषुमध्येभूयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठाश्रेष्ठास्तेतत्रमगामगनामानः ६९ ७० ७१ ७२ ७३ ७४ पुष्करेमानसोत्तरस्यवलयाकारत्वोक्त्याप्लक्षादिषुतिर्यग्रेखाकाराउभयतोब्धिस्पर्शिनोवर्षपर्वतागम्यंते ७५ ७६ द्वीपवलयं वलयाकारंद्वीपम् तेनपर्वतेनविच्छिन्नंवर्षद्वयमपिवलयाकारंजातम् ७७ ७८ ७९ अंततःमानसोत्तराद्रेरंतइत्यर्थः ८० सत्यानृतेनचास्तांफलजनकत्वाभिप्रायेणप्रोक्ते ८१ तुल्यवेषाःस मानभूषणाः तुल्यमुखाइतिवा एकरूपिणःसमानांगसन्निवेशाः ८२ वर्णाश्रमाचारैर्नित्यनैमित्तिकैरावश्यकैर्वाहीनम् धर्माहरणंकाम्यकर्मानुष्ठानंतेनचवर्जितम् ८३ ८४ न्यक्रियंक्समं

कद्वीपस्तुमैत्रेयक्षीरोदेनसमंततः ७१ शाकद्वीपप्रमाणेनवलयेनचवेष्टितः । क्षीराब्धिःसर्वतोब्रह्मन्पुष्कराख्येनवेष्टितः ७२ द्वीपेनशाकद्वीपात्तुद्वि गुणेनसमंततः । पुष्करेसवनस्यापिमहावीतोभवत्सुतः ७३ धातकिश्चतयोस्तत्रद्वेवर्षेनामचिह्निते । महावीतंतथैवान्यद्धातकीषंडसंज्ञितम् ७४ एकश्चात्रमहाभागप्रख्यातोवर्षपर्वतः । मानसोत्तरसंज्ञोवैमध्यतोवलयाकृतिः ७५ योजनानांसहस्राणिऊर्ध्वंपंचाशदुच्छ्रितः । तावदेवचविस्ती र्णःसर्वतःपरिमंडलः ७६ पुष्करद्वीपवलयंमध्येनविभजन्निव । स्थितोऽसौतेनविच्छिन्नंजातंतद्वर्षकद्वयम् ७७ वलयाकारमेकैकंतयोर्मध्येतथागिरिः । दशवर्षसहस्राणितत्रजीवंतिमानवाः ७८ निरामयाविशोकाश्चरागद्वेषविवर्जिताः । अधमोत्तमौतेष्वास्तांनवध्यवधकौद्विज ७९ नेर्ष्यासूयाभयंरो षोदोषोलोपादिकोनच । महावीतंबहिर्वर्षंधातकीखंडमंततः ८० मानसोत्तरशैलस्यदेवदैत्यादिसेवितम् । सत्यानृतेनतत्रास्तांद्वीपेपुष्करसंज्ञिते । ८१ नतत्रनद्यःशैलावाद्वीपेवर्षद्वयान्विते । तुल्यवेषास्तुमनुजादेवास्तत्रैकरूपिणः ८२ वर्णाश्रमाचारहीनंधर्माहरणवर्जितम् । त्रयीवार्तादंडनीति शुश्रूषारहितंचयत् ८३ वर्षद्वयंतुमैत्रेयभौमःस्वर्गोयमुत्तमः । सर्वस्यसुखदःकालोजरारोगादिवर्जितः ८४ पुष्करेधातकीखंडेमहावीतेचवैमुने । न्यग्रोधःपुष्करद्वीपेब्रह्मणःस्थानमुत्तमम् ८५ तस्मिन्निवसतिब्रह्मापूज्यमानःसुरासुरैः ८६ स्वादूदकेनोदधिनापुष्करःपरिवेष्टितः । समेनपुष्कर स्यैवविस्तारान्मंडलात्तथा ८७ एवंद्वीपाःसमुद्रैश्चसप्तसप्तभिरावृताः । द्वीपश्चैवसमुद्रश्चसमानौद्विगुणौपरौ ८८ पयांसिसर्वदासर्वसमुद्रेषुसमा निवै । न्यूनातिरिक्ततातेषांकदाचिन्नैवजायते ८९ स्थालीस्थमग्निसंयोगादुद्रेकिसलिलंयथा । तथेंदुवृद्धौसलिलमंभोधौमुनिसत्तम ९० अन्यूना

ततोभूमिरुणद्धीतिन्यग्रोधःपुष्करमेव सप्रजापतिरेकःपुष्करपर्णेसमभवादितिश्रुतेः यस्मिन्बृहत्पुष्करंज्वलच्छिखामलकनकपत्रायुतंभगवतःकमलासनंपरिकल्पितामितिशुकोक्तेश्च ८५ ८६ ८७ उपसंहरतिएवमिति द्वीपश्चेतिपाठक्रमाद्द्वीपाद्बहिःसमुद्रोयःसतद्द्वीपसमानः जंबुद्वीपलवणसमुद्रौलक्षयोजनप्रमाणौ एवंततःपरौद्वीपसमुद्रौद्विगुणप्रमाणावित्यादि ८८ ८९ अनुभवसिद्धंन्यूनातिरिक्तत्वंदृष्टांतेनसमर्थयति स्थालीस्थमिति यथास्थालीस्थंप्रस्थादिपरिमितजलंतीव्राग्निसंयोगादुद्रेकिविरलावयवंसदुद्रेकयुक्तंभवतिअग्निसंयोगस्योपरमेयथापूर्वंतिष्ठ तितथेंदुवृद्धौपूर्णिमायांतज्जलमत्यंतमुद्रिच्यतेतथाशुक्लकृष्णयोः पक्षयोःप्रत्यहमिंदोरुदयेअनतिरिक्ताएवापःकिंचिद्वर्धंतेऽस्तमनेषुचान्यूनाएवकिंचनक्षसंतीत्यर्थः अमावास्यायांचंद्रोदय।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिकचिद्व्याख्यायते १ २ ३ ४ पूर्वादिक्रमेणप्लक्षद्वीपमाह पूर्वपूर्वदिग्भागेस्थितम् ५ तेषांपूर्वादिवर्षाणाम् ६ ७ ८ पुण्याःपुण्यशालिनःचिरात्पंचवर्षसहस्रांतेम्रियंते ९ १० ११ १२ अवसर्पिणीह्रासवती उत्सर्पिणीवृद्धिमतीनदीनास्तिनदीतिजातिमात्रापेक्षयैक्यंनदीतिस्थानेनवैइतिपाठेनसर्पिणीत्याद्यध्याहृतप्रजाविशेषणम् यथाभारतेवर्षेकृतादित्रेतांतंप्रजावर्धते द्वापरादिकलियुगांतह्रसतितथातेषुनास्तीत्यर्थः १३ युगावस्थाचतुष्पात्सकलोधर्मइत्याद्युक्ताधर्मपादव्यवस्थाचनास्ति कृतादीनांव्यवस्थेयंधर्मपादव्यवस्थावेति सूर्यसिद्धांतात् त्रेतायुगसा

वंचैवक्षेमकंध्रुवमेवच ५ मर्यादाकारकास्तेषांतथान्येवर्षपर्वताः । सप्तैवतेषांनामानिशृणुष्वमुनिसत्तम ६ गोमेदश्चैवचंद्रश्चनारदोदुंदुभिस्तथा । सोमकःसुमनाःशैलोवैभ्राजश्चैवसप्तमः ७ वर्षाचलेषुवर्षेषुसर्वेष्वेतेषुचानघाः । वसंतिदेवगंधर्वसहिताःसततंप्रजाः ८ तेषुपुण्याजनपदाश्चिरात्म्रियतेजनः । नाधयोव्याधयोवापिसर्वकालसुखंहितत् ९ तेषांनद्यश्चसप्तैववर्षाणांतुसमुद्रगाः । नामतस्ताःप्रवक्ष्यामिश्रुताःपापंहरंतियाः १० अनुतप्ताशिखीचैवविपापात्रिदिवाक्रतुः । अमृतासुकृताचैवसप्तैतास्तत्रनिम्नगाः ११ एतेशैलास्तथानद्यःप्रधानाःकथितास्तव । क्षुद्रनद्यस्तथाशैलास्तत्रसंतिसहस्रशः १२ ताःपिबंतिसदाहृष्टानदीर्जनपदास्तुते । अवसर्पिणीनदीतेषांनचैवोत्सर्पिणीद्विज १३ नचैवास्तियुगावस्थातेषुस्थानेषुसप्तसु । त्रेतायुगसमःकालःसर्वदैवमहामते १४ प्लक्षद्वीपादिषुब्रह्मञ्शाकद्वीपांतिकेषुवै । पंचवर्षसहस्राणिजनाजीवंत्यनामयाः १५ धर्माःपंचस्वथैतेषुवर्णाश्रमविभागजाः । वर्णास्तत्रापिचत्वारस्तान्निबोधगदामिते १६ आर्यकाःकुरवश्चैवविविंशाभाविनश्चये । विप्रक्षत्रियवैश्यास्तेशूद्राश्चमुनिसत्तम १७ जंबुवृक्षप्रमाणस्तुतन्मध्येसुमहांस्तरुः । प्लक्षस्तन्नामसंज्ञोयंप्लक्षद्वीपोद्विजोत्तम १८ इज्यतेतत्रभगवान्तैर्वर्णैरार्यकादिभिः । सोमरूपीजगत्स्रष्टासर्वःसर्वेश्वरोहरिः १९ प्लक्षद्वीपप्रमाणेनप्लक्षद्वीपसमावृतः । तथैवेक्षुरसोदेनपरिवेषानुकारिणा २० इत्येषतवमैत्रेयप्लक्षद्वीपउदाहृतः । संक्षेपेणमयाभूयःशाल्मलंमेनिशामय २१ शाल्मलस्येश्वरोवीरोवपुष्मांस्तत्सुताञ्शृणु । तेषांतुनामसंज्ञानिसप्तवर्षाणितानिवै २२ श्वेतोथहरितश्चैवजीमूतोरोहितस्तथा । वैद्युतोमानसश्चैवसुप्रभश्चमहामुने २३ शाल्मलेनसमुद्राऽसौद्वीपेनेक्षुरसोदकः । विस्तारद्विगुणेनाथसर्वतःसंवृतःस्थितः २४ तत्रापिपर्वताःसप्तविज्ञेयारत्नयोनयः । वर्षाभिव्यंजकास्तेतुतथासप्तैवनिम्नगाः २५ कुमुदश्चोन्नतश्चैवतृतीयःसुबला

न्यंचयागक्रियाधर्मसस्यादिसंपत्तिभिर्धर्मैः १४ १५ एतेषुप्लक्षादिशाकांतेषुपंचसु एतेन पुष्करेतदभावःसूचितः पंचतथेतेष्वितिपाठेपंचधर्माब्रह्मचर्याहिंसासत्यास्तेयापरिग्रहाइत्युक्ताः सामान्यधर्मावर्णाश्रमजन्याविशेषधर्माश्चेत्यर्थः १६ १७ तस्यप्लक्षस्यनाम्नासंज्ञायस्यसतथा १८ ११ परिवेषोमंडलंतदनुकारिणातत्सदृशेन २० इत्येषतवेतिमैत्रेयमेमत्तःनिशामय जानीहि २१ २२ २३ २४ २५ विशल्यकरणीचैवमृतसंजीवनीतथा सुवर्णकरणीचान्यासंधिनीचमहौषधिः इत्याद्यामहौषध्योयत्रयोहनुमताआनीयप्रतिनीतःसद्रोणश्चतुर्थः२६ २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२८ २९ ३० ३१ संस्थानंसंस्थितिर्यस्मिन्तं संस्थितमितिपाठेयज्ञेसंस्थितमित्यर्थः ३२ ३३ ३४ ३५ ३६ तेषांनामान्येवनामानियस्याःसातन्नामावर्षाणांपद्धतिःपंक्तिः ३७ ३८ भारतेयेब्राह्मणादयस्तेत्रकुशद्वीपेदम्यादयश्चत्वारोवर्णाःक्रमोदिताः ३९ वर्णत्वेहेतुःस्वस्याधिकारःसंसारस्तस्यक्षयाययथोक्तंनिवृत्तंकर्मतत्कारित्वात्पूज्यंदर्शयन्पूर्वोक्तमर्थंस्पष्टयति तत्रेति

हकः । द्रोणोयत्रमहौषध्यःसचतुर्थोमहीधरः २६ कंकस्तुपंचमःषष्ठोमहिषःसप्तमस्तथा । ककुद्मान्पर्वतवरःसरिन्नामानिमेशृणु २७ योनीतोयावितृष्णाचचंद्राशुक्लाविमोचनी । निवृत्तिःसप्तमीतासांस्मृताःस्ताःपापशांतिदाः २८ श्वेतंचलोहितंचैवजीमूतंहरितंतथा । वैद्युतंमानसंचैवसुप्रभंनामसप्तमम् २९ सप्तैतानितुवर्षाणिचातुर्वर्णयुतानिच । शाल्मलेयेतुवर्णाश्चवसंत्येतेमहामुने ३० कपिलाश्चारुणाःपीताःकृष्णाश्चैवपृथक्पृथक् । ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चैवयजंतितम् ३१ भगवंतंसमस्तस्यविष्णुमात्मानमव्ययम् । वायुभूतंमखश्रेष्ठैर्यज्विनोयज्ञसंस्थितिम् ३२ देवानामत्रसान्निध्यमतीवसुमनोरमे । शाल्मलिश्चमहावृक्षोनामनिर्वृत्तिकारकः ३३ एषद्वीपःसमुद्रेणसुरोदेनसमावृतः । विस्तराच्छाल्मलस्यैवसमेनतुसमंततः ३४ सुरोदकःपरिवृतःकुशद्वीपेनसर्वतः । शाल्मलस्यतुविस्ताराद्द्विगुणेनसमंततः ३५ ज्योतिष्मतःकुशद्वीपेसप्तपुत्राःशृणुष्वतान् । उद्भिदोवेणुमांश्चैववैरथोलंबनोधृतिः ३६ प्रभाकरोथकपिलस्तन्नामावर्षपद्धतिः । तस्यांवसंतिमनुजाःसहदैतेयदानवैः ३७ तथैवदेवगंधर्वयक्षाकिंपुरुषादयः । वर्णास्तत्रापिचत्वारोनिजानुष्ठानतत्पराः ३८ दमिनःशुष्मिणस्नेहामंदेहाश्चमहामुने । ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चानुक्रमोदिताः ३९ यथोक्तकर्मकर्तृत्वात्स्वाधिकारक्षयायते । तत्रतेतुकुशद्वीपेब्रह्मरूपंजनार्दनम् । यजंतःक्षपयंत्युग्रमधिकारफलप्रदम् ४० विद्रुमोहेमशैलश्चद्युतिमान्पुष्पवांस्तथा । कुशेशयोहरिश्चैवसप्तमोमंदराचलः ४१ वर्षाचलास्तुसप्तैतेतत्रद्वीपेमहामते । नद्यश्चसप्ततासांचशृणुनामान्यनुक्रमात् ४२ धूतपापाशिवाचैवपवित्रासंमतिस्तथा । विद्युदंभामहीचान्यासर्वाःपापहरास्त्विमाः ४३ अन्याःसहस्रशस्तत्रक्षुद्रनद्यस्तथाचलाः । कुशद्वीपेकुशस्तंबःसंज्ञयातस्यतत्स्मृतम् ४४ तत्प्रमाणेनसद्वीपोघृतोदेनसमावृतः । घृतोदश्चसमुद्रोऽसौक्रौंचद्वीपेनसंवृतः ४५ क्रौंचद्वीपोमहाभागश्रूयतांचापरोमहान् । कुशद्वीपस्यविस्ताराद्द्विगुणोयस्यविस्तरः ४६ क्रौंचद्वीपेद्युतिमतःपुत्राःसप्तमहात्मनः । तन्नामानिचवर्षाणितेषांचक्रेमहीपतिः ४७ कुशलोमन्दगःश्चोष्णःपीवरोप्यंधकारकः । मुनिश्चदुंदुभिःश्चैवसप्तैतेतत्सुतामुने ४८ अत्रापिदेवगंधर्वसेविताःसुमनोरमाः । वर्षाचलामहाबुद्धेतेषांनामानि

अधिक्रियतेनियुज्यतेजीवोस्मिन्निति अधिकारःसंसारस्तदेवफलंतत्प्रदकर्मक्षपयंतोयजंतीत्यर्थः यद्वास्वाधिकारक्षयायसत्त्वशुद्ध्यात्मज्ञानेनकर्माधिकारनिवृत्त्यर्थंअधिकारफलप्रदंअधिक्रियतेनेनेत्यधिकारोऽहंकारस्तत्फलप्रदमज्ञानम् शेषंसमानम् एतच्चप्लक्षादिषुपंचस्वपिद्रष्टव्यम् धर्मःपंचस्वथैतेषुइतिपंचानांसाधर्म्यस्योक्तत्वात् ४० ४१ ४२ ४३ तस्यकुशस्तंबस्यसंज्ञ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावात्कथंपरमवृद्धिरितिचेन्न चंद्रस्यसूर्यप्रविष्टत्वात्सूर्योदयस्यैवतदुदयत्वात् ९० ९१ परमवृद्धिह्रासयोःप्रमाणमाह दशेति अंगुलीनांदशोत्तराणिपंचशतानिसमुद्रजलानांवृद्धिह्रासौ शास्त्रतः तत्तीरस्थैर्वान्वयव्यतिरेकाभ्यांदृष्टावित्यन्वयः तत्रेत्थंगणनाप्रतिपदमारभ्य प्रतिपत्तिथौसपादचतुरंगुलवृद्ध्याप्रतिपदिसपादचतुरंगुला द्वितीयायांसार्द्धाष्टांगुलावृद्धिरित्यादिवृद्धि क्रमेणपौर्णमासीपर्यंतमंगुलीनांदशोत्तरपंचशतानिभवंति एवंचपूर्णिमायांतावत्येववृद्धिःचंद्रस्योदयेस्तमयेचह्रासस्तावानेव तथैवामावास्यायामपीतिभावः अन्येतुप्रतिपद्यारभ्योत्तरो त्तरमेकैकांगुलवृद्ध्याविंशत्युत्तरशतांगुलंभवति पंचेतिवीप्सार्थेशतानीत्येकत्वेबहुवचनमित्याहुः ९२ भुज्यतइतिभोजनंभक्ष्यभोज्यलेह्यपेयाख्यंचतुर्विधंप्रयत्नांविनैवस्वयमुपस्थितंभुंज ते षड्रसाःकटुम्लमधुरलवणकषायतिक्ताख्यायत्रतत् ९३ लोकानांप्रजानांसंस्थितिःपरिसमाप्तिर्यत्रसा अलोकसंस्थितिरितिपाठःसुगमः अतःसमस्तप्राणिविवर्जितासप्तसागरद्वीपवत्या पूर्वोक्तायाभूमेर्द्विगुणा कांचनीभूमिर्योगिभिर्दृश्यते ९४ लोकआलोकःअलोकस्तमःउभयतस्तत्संबंधाल्लोकालोकः तावंतिअयुतप्रकृतिभूतानिसहस्राणियोजनायुतमुच्छ्रितइत्यर्थः यद्वा

नतिरिक्ताश्चवर्धंत्यापोद्रसंतिच । उदयास्तमनेष्विंदोःपक्षयोःशुक्लकृष्णयोः ९१ दशोत्तराणिपंचैवअंगुलीनांशतानिवै । अपांवृद्धिक्षयौदृष्टौसामु द्रीणांमहामुने ९२ भोजनंपुष्करद्वीपेतत्रस्वयमुपस्थितम् । षड्रसंभुंजतेविप्रप्रजाःसर्वाःसदैवहि ९३ स्वादूदकस्यपुरतोदृश्यतेलोकसंस्थितिः । द्विगुणाकांचनीभूमिःसर्वजंतुविवर्जिता ९४ लोकालोकस्ततःशैलोयोजनायुतविस्तृतः । उच्छ्रायेणापितावंतिसहस्राण्यचलोहिसः ९५ ततः स्तमःसमावृत्यतंशैलंसर्वतःस्थितम् । तमश्चांडकटाहेनसमंतात्परिवेष्टितम् ९६ पंचाशत्कोटिविस्तारासेयमुर्वीमहामुने । सहैवांडकटाहेनसद्वीपा ब्धिमहीधरा ९७ सेयंधात्रीविधात्रीचसर्वभूतगुणाधिका । आधारभूतासर्वेषांमैत्रेयजगतामिति ९८ इतिश्रीविष्णुपुराणेद्वितीयेंशेचतुर्थोध्यायः ४ पराशरउवाच । । विस्तारएषकथितःपृथिव्याभवतोमया । सप्ततिस्तुसहस्राणिद्विजोच्छ्रायोऽपिकथ्यते १ दशसाहस्रमेकैकंपातालंमुनिसत्तम ।

अयुतसंख्यानिसहस्राण्युच्छ्रितः सूर्यालोकस्यापिव्यवधायकत्वादित्यर्थः ९५ तमस्तमोभूमिः ९६ पंचाशत्कोटीति अत्रायंगणनाक्रमः पूर्वोक्तद्वीपाब्धिद्वैगुण्यक्रमेणमेरोरुभय तःसप्तलक्षाधिकपंचकोटिप्रमाणासाब्धिद्वीपवतभूमिः ततोद्विगुणाचतुर्दशलक्षोत्तरदशकोटिप्रमाणाकांचनीभूमिर्मेरोरेकतः उभयतस्तुअष्टाविंशतिलक्षाधिकविंशतिकोटिप्रमाणासंपद्य तेततोलोकालोकउभयतोविंशतिसहस्रपरिमितः ततस्तमोभूमिरशीतिसहस्रोत्तरचतुःषष्टिलक्षाधिकचतुर्विंशतिकोटिप्रमाणा एतेनह्यलोकपरिमाणंचव्याख्यातमितिशुकोक्तेः तदेवंप चाशत्कोटिविस्तारासेयमुर्वीततोंडकटाहःसमवर्तुलःपंचाशत्कोटिविस्तरः अंडमध्यगतःसूर्योद्यावाभूम्योर्यदंतरम् सूर्याडगोलयोर्मध्येकोट्यःस्युःपंचविंशतिरितिशुकोक्तेः क्वचित्क्वचि त्पुराणेषुविरोधोयदिदृश्यते कल्पभेदादिभिस्तत्रव्यवस्थासद्भिरिष्यतां सेयमुर्वीकटाहेनसहद्वीपाब्धिभूधरैः सहवर्त्तमानाधात्रीपालयित्रीविधात्रीजनयित्री कांचन्यादिभूमेरत्रानुपयोगादि तियोजना यद्वापूर्वोक्तरीत्यासाब्धिद्वीपाभूमिःसप्तलक्षाधिकपंचकोटिप्रमाणाशुद्धोदाब्धिमपेक्ष्यद्विगुणाकांचनीभूमिरुभयतोद्वादशलक्षाधिकपंचकोटिप्रमाणालोकालोकोविंशतिसहस्रप्रमा णः तमोभूमिरशीतिसाहस्रोत्तराशीतिलक्षाधिकचतुर्दशकोटिप्रमाणा तदेवंमेरोरुभयतःपंचविंशतिकोट्योभवंति तथांडकटाहोप्युभयतएतत्समानइतिसर्वंसमंजसम् पुराणांतरविरोधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पभेदव्यवस्थेवशरणमिति ९७ धात्रत्रिगादिगुणायतोऽतः सर्वभूतेभ्यआकाशादिभ्योगुणाधिकाश्रेष्ठेत्यर्थः यद्वागुणाधिकापंचगुणत्वात् आधारभूताअधिकरणंमूलभूतावाकर्मभूमित्वा दिति ९८ इतिश्रीवैष्णवाकूतचंद्रिकायांरत्न॰चतुर्थोध्यायः ४ ॥ प्रसंगात्सप्तपातालंसप्तभूमिकभेदवत् भुवोधोवर्ण्यतेनंतमस्तकेणुप्रमाणकम् १ दशसाहस्रमिति प्रत्येकंसहस्रयोजनोच्छ्रि ताः सप्तभूमिकाः ततोनवसहस्रोच्छ्रितमेकैकंपातलंभूविवरमित्यर्थः तथाचशिवरहस्यम् सहस्रयोजनान्येषांतलाभ्यंतरनेमयः प्रत्येकशोंतराण्येषांसहस्राणिनवाध्वनामिति १ २ महाख्यं महातलंपंचमं सिताःशर्कराःस्थूलवालुका यासुताः शैल्याःशिलामय्यःकांचनाः कांचनमय्यश्चताश्चतथा ह्रस्वश्छांदसः ३ तेष्वतलादिषु ४ पातालेभ्योदिवमभ्यागतःसन्नारदःस्वर्गसदांदे

अतलंवितलंचैवनितलंचगभस्तिमान् २ महाख्यंसुतलंचाग्र्यंपातालंचापिसप्तमम् । शुक्लाःकृष्णारुणाःसितशर्कराःशैल्यकांचनाः । भूमयोयत्रमै त्रेयवरप्रासादशोभिताः ३ तेषुदानवदैत्येयजातयःशतसंघशः । निवसंतिमहानागजातयश्चमहामुने ४ स्वर्लोकादपिरम्याणिपातालानीतिनारदः । प्राहस्वर्गसदांमध्येपातालेभ्योगतोदिवम् ५ आह्लादकारिणःशुभ्रामणयोयत्रसुप्रभाः । नागाभरणभूषासुपातालंकेनतत्समम् ६ दैत्यदानव कन्याभिरितश्चेतश्चशोभिते । पातालेकस्यनप्रीतिर्विमुक्तस्यापिजायते ७ दिवार्करश्मयोयत्रप्रभांतन्वंतिनातपम् । शशिनश्चनशीतायनिशिद्यो तायकेवलम् ८ भक्ष्यभोज्यमहापानमुदितैरतिभोगिभिः । यत्रनज्ञायतेकालोगतोपिदनुजादिभिः ९ वनानिनद्योरम्याणिसरांसिकमलाकराः । पुं स्कोकिलानांलापाश्चमनोज्ञान्यंबराणिच १० भूषणानिचरम्याणिगंधाढ्यंचानुलेपनम् । वीणावेणुमृदंगानांनादैस्तूर्याणिचद्विज ११ एतान्यन्या निचोदारभाग्यभोग्यानिदानवैः । दैत्योरगैश्चभुज्यंतेपातालांतरगोचरैः १२ पातालानामधश्चास्तेविष्णोर्यातामसीतनुः । शेषाख्यायद्गुणान्वक्तुं नशक्तादैत्यदानवाः १३ योऽनंतःपठ्यतेसिद्धैर्देवदेवर्षिपूजितः । सहस्रशिरसाव्यक्तस्वस्तिकामलभूषणः १४ फणामणिसहस्रेणयःसविद्योतय न्दिशः । सर्वान्करोतिनिर्वीर्याद्धितायजगतोऽसुरान् १५ फणामणिसहस्रेणयःसविद्योतयन्दिशः । सर्वान्करोतिनिर्वीर्यान्हितायजगतोऽसुरान् १६ मदाघूर्णितनेत्रोऽसौयःसदैवैककुंडलः । किरीटस्रग्धरोभातिसाग्निःश्वेतइवाचलः १७ नीलवासामदोत्सिक्तःश्वेतहारोपशोभितः । साभ्रगंगाप्र पातोऽसौकैलासाद्रिरिवोन्नतः १८ लांगलासक्तहस्ताग्रोबिभ्रन्मुसलमुत्तमम् । उपास्यतेस्वयंकांत्यायोवारुण्याचमूर्त्तया १९ कल्पांतेयस्यवक्त्रे

वादीनांमध्येप्राह ५ नागानामाभरणैःकृतायाभूषाःशोभास्तन्निमित्तंशुभ्राःशुद्धामणयोयत्रपातालेतत्केनसमंनकेनापिनिरुपममित्यर्थः ६ विमुक्तस्यविगतरागस्यापि ७ प्रभामालोकमात्रम् शशिनश्चरश्मयः ८ भक्ष्यंलड्डुकादिभोज्यंभक्तादिमहापानंमदिरादितैःकृत्वामुदितैःअतिभोगिभिःसुखातिशयशालिभिः ९ पुंस्कोकिलाभिलापाइतिवापाठः १० तूर्याणिनृत्यगीतवाद्या नि सुनादैर्नादितानीतिपाठेवनादीनांविशेषणम् ११ पातालानामंतरंमध्यंगोचरोविषयोयेषांतैः १२ पातालानांभूविवराणां अधइत्यत्रत्रिंशत्सहस्रोद्देशेनंतइतिशुकोक्तंमानंज्ञेयम् तामसी संहारकत्वात् १३ सहस्रशिरसेतिविशेषणेतृतीया सहस्रशिरसइतिवापाठः स्वस्तिकंफणास्थरेखाविशेषःतदेवामलंभूषणंयस्यसः १४ १५ १६ साग्निरितिकिरीटस्रजोरग्निसादृश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्ष्यमाणाश्चपापशेषेणात्रपात्यंते २५ व्रतेषुलोपकःप्रारब्धचांद्रायणादिव्रतत्यागी स्वयोग्यादाश्रमाद्विच्युतः २६ स्कंदंतेरेतोवकिरंति २७ पच्यंतेक्लिश्यंतेयात्यंतइतिपाठेपापाधिक्यक्रमेणयात्यंतइत्यर्थः शिवधर्मादिषुतथैवदर्शनात् २८ २९ वर्णाश्रमविरुद्धंनृत्यगीतादिव्यसनरूपंकर्म ३० नरकस्थानांदुःखातिशयंदर्शयितुंस्वर्गस्थदेवदर्शनंदेवानांचवैराग्यार्थंनरकस्थदर्शनमाह अधःशिरोभिरिति तथाचोक्तम् सलिलतटासन्नानामवाङ्मुखीदृश्यतेयथाछाया तद्वत्स्थितिरसुराणांमन्यंतेतेप्यधोविबुधान्इति असुराणांनारकिणाम् तथावायुः पश्यंतिनारकान्सर्वान्यथादेवाअधोमुखान् नारकाश्चतथादेवान्सर्वान्पश्यंत्यऽधोमुखानिति अधःस्थितानधोमुखान्देवान्नारकांश्चपरस्परंपश्यंतिजानंतीत्यर्थः चिरनिरंतरजन्माभ्याससंस्कारेणपृथिव्याकृष्टिशक्तिविशेषेणचगृहतलसंचारिणांपिपीलिकादीनामिवनारकिणांपतनाभावः अतएवयातनाभावेहेतुत्वेनाकृष्टिशक्तिर्महतीपृथिव्याइतिज्योतिःशास्त्रेउक्तम् तथाचदेवानांनारकिदर्शनात्स्वर्गप्रदकर्मक्षयेपापहेतुकनरकपातशंकयादुःखानिवृत्तिः नारकिणांचतादृक्समृद्धदेवदर्शनेनातिदुःखमित्युक्तंभवति ३१ पातकिनांनरकभोगानंतरंस्थावराद्यासूत्तरोत्तरमुत्कृष्टासुनवधाविभिन्नासुयो

संदंशयातनामध्येपततस्तावुभावपि २६ दिवास्वप्नेषुस्कंदंतेयेनराब्रह्मचारिणः । पुत्रैरध्यापितायेचतेपतंतिश्वभोजने २७ एतेचान्येचनरकाः शतशोऽथसहस्रशः । येषुदुष्कृतकर्माणःपच्यंतेयातनागताः २८ तथैवपापान्येतानितथान्यानिसहस्रशः । भुज्यंतेयानिपुरुषैर्नरकांतरगोचरैः२९ वर्णाश्रमविरुद्धंचकर्मकुर्वंतियेनराः । कर्मणामनसावाचानिरयेषुपतंतिते ३० अधःशिरोभिर्दृश्यंतेनारकैर्दिविदेवताः । देवाश्चाधोमुखान्सर्वान्धःपश्यंतिनारकान् ३१ स्थावराःकृमयोजाश्चपक्षिणःपशवोनराः । धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्चयथाक्रमम् ३२ सहस्रभागःप्रथमोद्वितीयानुक्रमात्तथा । सर्वेह्येतेमहाभागयावन्मुक्तिसमाश्रया ३३ यावंतोजंतवःस्वर्गेतावंतोनरकौकसः । पापकृन्नरकंयातिप्रायश्चित्तपराङ्मुखः ३४ पापानामनुरूपाणिप्रायश्चित्तानियद्यथा । तथातथैवसंस्मृत्यप्रोक्तानिपरमर्षिभिः ३५ पापेगुरूणिगुरुणिस्वल्पान्यल्पेचतद्विदः । प्रायश्चित्तानि

निषुयथासंभवंजन्मक्रममाह स्थावराइति अब्जामत्स्यादयःधार्मिकाःनरेष्वेवपुण्यकृतःकेचिन्मोक्षिणश्चमुमुक्षवःयथाक्रमंभवंति ३२ तेषांच पूर्वबाहुल्यमुत्तरोत्तरमल्पत्वंचाह सहस्रेति सहस्रभागःसहस्रगुणःप्रथमःपूर्वनिर्दिष्टःस्थावराख्यजीवः किमपेक्ष्येत्यतआह द्वितीयेति द्वितीयःकृमिवर्गस्तदनुक्रमात्तदपेक्षया एवमुत्तरत्रापीति सहस्रंभागंप्रथमाद्वितीयानुक्रमास्तथाइतिपाठेद्वितीयोनुक्रमउपदेशो एषांद्वितीयस्थानेनुक्रांतायेकृमयस्तेसहस्रभागप्रथमाःसहस्रभागात्सहस्रगुणाःप्रथमाः प्रथमनिर्दिष्टाःस्थावरायेषांतेतथा सर्वेष्वेतेषुपूर्वपूर्वसहस्रगुणमधिकंउत्तरोत्तरंसहस्रगुणन्यूनमित्यर्थः प्रथमादितिपाठःसुगमः मुक्तिसमाश्रयाःमुमुक्षवोज्ञाननिष्ठायावत्तावत्पर्यंतमेवपूर्वपूर्वमेपक्ष्यउत्तरोत्तरेषांन्यूनजन्मक्रमः ततःपरंमुक्तिः एतच्चसंसारबाहुल्यकथनंमुक्तेर्दुर्लभत्वसूचनार्थं वस्तुतस्तुस्थावरादिजन्मक्रमस्यप्रायिकत्वात्तदुक्तमादित्यपुराणे व्युत्क्रमेणापिमानुष्यंप्राप्यतेपुण्यगौरवात् विचित्रागतयःपुंसांकर्मणांगुरुलाघवैरिति ३३ तदेवंनारकाःपापभोगानंतरंस्थावरादिजन्मक्रमेणयथात्रिदशाभवंतिएवंदेवाअपिपुण्यक्षयेपापवशान्नारकाभवंतीतिवैराग्यार्थमाह यावंतइति नरकौकसोभवंतीतिशेषः अत्रयावत्तावदितिसंख्यासाम्यंप्रायिकम् पापिनांनरकापवादमाह पापकृदिति यःप्रायश्चित्तंनकरोतिसएवनरकंयातिनतुकृतप्रायश्चित्तः ३४ तच्चप्रायश्चित्तंकर्मक्रियाज्ञानरूपेणत्रिविधंतत्रकर्मरूपंप्रायश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तंपापतारतम्येनाह पापानामिति यत्पापंगुरुलघुवायथाज्ञानाज्ञानकृतंतथातथातत्तदनुरूपाणिप्रायश्चित्तानिवेदार्थंस्मृत्वाप्रोक्तानि ३५ अनुरूपत्वमेवाह पापइति. तद्विदःप्रायश्चित्ततारत
म्यविदःजगुःस्फुटमूचुः ३६ सर्वोत्कृष्टंसुकरंचश्रीकृष्णभक्तिलक्षणम् प्रायश्चित्तमाह प्रायश्चित्तानीति तपस्तप्तकृच्छ्रादिकर्माणिदानजपादीनितदात्मकानिप्रायश्चित्तानियानितेभ्यःसर्वे
भ्यःकृष्णानुस्मरणंपरंश्रेष्ठम् स्मरणंचकीर्तनं चिंतनंचात्रज्ञेयम् उभयोरेववाक्यशेषेउपसंहारात् ३७ ननुकृष्णानुस्मरणस्यपापक्षयहेतुत्वंसकृत्कृतस्यावशेनापियन्नाम्नीत्यादिषु आवृत्त्या
कृतस्यच पापक्षयश्चभवतिस्मरतांतमहर्निशमित्यादिषुश्रूयते तच्चकथमविरोधइत्याशंक्यकृष्णस्मरणस्यसकृत्कृतस्यपापक्षयहेतुत्वमावृत्त्याकृतस्यतुसवासनपापक्षयहेतुत्वंव्यवस्थापयति
कृतेपापइतिद्वाभ्याम् पापेकृतेयस्यपुंसोऽनुतापःप्रायश्चित्तचिकीर्षाप्रजायतेतस्यहरिसंस्मरणमेकमेवपरंश्रेष्ठंप्रायश्चित्तम् ३८ प्रातरादिषुतुनारायणंसंस्मरन्सद्यस्तत्क्षणात् सवासनपापक्ष
यंततःपरंनारायणंचाप्नोति नरइत्यनेनअधिकारिविशेषणाभावःसूचितः तथाचविष्णुधर्मे चक्रायुधस्यनामानिसदासर्वत्रकीर्तयेत् नाशौचंकीर्तनेतस्यसपवित्रकरोयतः हरिर्हरतिपापानिदुष्ट
चित्तैरपिस्मृतः अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकः अज्ञानादथवाज्ञानादुत्तमश्लोकनामयत् संकीर्तितमघंपुंसोदहत्येधोयथानलइत्यादि दहतीत्यंतेनसवासनपापक्षयउन्नीयते ३९

**मैत्रेयजगुःस्वायंभुवादयः ३६ प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै । यानितेषामशेषाणांकृष्णानुस्मरणंपरम् ३७ कृतेपापेनुतापोवैयस्य
पुंसःप्रजायते । प्रायश्चित्तंतुतस्यैकंहरिसंस्मरणंपरम् ३८ प्रातर्निशितथासंध्यामध्याह्नादिषुसंस्मरन् । नारायणमवाप्नोतिसद्यःपापक्षयान्न
रः ३९ विष्णुसंस्मरणक्षीणसमस्तक्लेशसंचयः । मुक्तिंप्रयातिस्वर्गाप्तिस्तस्यविघ्नोनुमीयते ४० वासुदेवेमनोयस्यजपहोमार्चनादिषु । तस्यां
तरायोमैत्रेयदेवेंद्रत्वादिकंफलम् ४१ क्वनाकपृष्ठगमनंपुनरावृत्तिलक्षणम् । क्वजपोवासुदेवेतिमुक्तिबीजमनुत्तमम् ४२ तस्मादहर्निशंविष्णुंसं
स्मरन्पुरुषोभुवि । सयातिनरकंशुद्धंसंक्षीणाखिलपातकः ४३ मनःप्रीतिकरःस्वर्गोनरकस्तद्विपर्ययः । नरकस्वर्गसंज्ञेवैपापपुण्येद्विजोत्तम ४४**

तथापापक्षयपूर्वकनारायणात्मकमुक्तिप्राप्तिमवदन्स्वर्गफलस्यतुच्छत्वमाह विष्णिवति क्षीणःसमस्तक्लेशानांरागादिवासनानांसंचयःसमूहोयस्यसः विघ्नःकालविलंबेहेतुः ४० किंचजप
होमादिषुसाद्गुण्यार्थमपिकृतंहरिस्मरणंमुक्तावेवपर्यवस्यतीत्याह वासुदेवइति हरिस्मरणेनमुक्तिंप्राप्स्यतःपुंसोजपहोमादिसाध्यंदेवेंद्रत्वादिकमंतरायोविघ्नप्रायएव ४१ तदाह क्वेति नाक
पृष्ठंसत्यलोकस्तद्गमनमपिपुनरावृत्तिफलकम् वासुदेवेतिजपस्यकीर्त्तनस्यमुक्तिबीजस्यनानुरूपंकिंपुनर्वक्तव्यम् देवेंद्रत्वादिकमित्यर्थः ४२ यस्मात्सकृत्कीर्त्तनंस्मरणंचसर्वपापक्षयंतस्मा
दावृत्त्याकृतंतत्पापसंस्कारनाशनमित्युपसंहरति तस्मादिति सम्यक्क्षीणंपुनःप्ररोहायोग्यमखिलंपातकंयस्यसःसंस्मरणंचात्रनामोपहितस्यविष्णोःकीर्तनरूपोपहितचिंतनरूपम् पूर्वोक्तयो
श्चिंतनकीर्तनरूपयोरुपसंहाररूपत्वात् स्वप्नेपियन्नामस्मृतिरितिपुराणांतरोक्तेः एतच्चश्रवणस्याप्युपलक्षणम् यन्नामसकृच्छ्रवणात्पुल्कसकोपिमुच्यतेसंसारादितिहंतिकल्मषम् श्रोत्रंगतो
हरिरित्यादिवचनेभ्यः नचैवंद्वादशाब्दादिप्रायश्चित्तस्मृतेरानर्थक्यंशंकनीयम् नामादौश्रद्धाशून्यानांतत्रैवप्रवृत्तेरित्यलंविस्तरेण ४३ तदेवंहरिभक्तिरूपंसर्वसुलभंसर्वपापप्रायश्चित्तमुक्त
मिदानींब्रह्मज्ञानरूपंसर्वपापप्रायश्चित्तंवक्तुंस्वर्गनरकतत्साधनप्रपंचस्यामिथ्यात्वमाह मनःप्रीतिकरइति सार्धैःपंचभिः तद्विपर्ययोमनोदुःखकरःअतःस्वप्नगतमनःप्रीतिदुःखकरवस्तुवत्स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् १७ अभ्रंमेघःगंगेवप्रपातोनिर्झरश्चताभ्यांसहितः १८ कांत्यावारुण्यातदधिष्ठातृदेवतया १९ २० शेखरीभूतंमुकुटवत्स्थितंअनायासेनधृतमित्यर्थः २१ वीर्यंबलंप्रभावःप्रतापःस्वरूपंतत्त्वंरूपमाकारः २२ अशक्यत्वेहेतुमाह यस्येति पुष्पमालासादृश्यमतिलघुत्वबोधनाय कइति नकोपीत्यर्थः २३ २४ २५ लागितंचर्चितमनुलिप्तंहरिचंदनंयस्यश्वासानिलेनापास्तंविक्षिप्तंदिक्षुपटवासतांजलादिसुगंधीकरणचूर्णतांयातीत्यर्थः दिक्क्षोदवासतामितिपाठेदिशामधिवासचूर्णतामित्यर्थः २६ ज्योतींषिग्रहनक्षत्रादीनि निमित्तेउत्पातशकुनादौपठितं

ष्योविषानलशिखोज्ज्वलः । संकर्षणात्मकोरुद्रोनिष्क्रम्यात्तिजगत्त्रयम् २० सबिभ्रच्छेखरीभूतमशेषांक्षितिमंडलम् । आस्तेपातालमूलस्थःशेषोऽशेषसुरार्चितः २१ तस्यवीर्यंप्रभावश्चस्वरूपंरूपमेवच । नहिवर्णयितुंशक्यंज्ञातुंचत्रिदशैरपि २२ यस्यैषासकलापृथ्वीफणामणिशिखारुणा ।आस्तेकुसुममालेवकस्तद्वीर्यंवदिष्यति २३ यदाविजृंभतेनंतोमदाघूर्णितलोचनः । तदाचलतिभूरेषासाद्रितोयासकानना २४ गंधर्वाप्सरसःसिद्धाःकिंनरोरगचारणाः । नांतंगुणानांगच्छंतितेनानंतोऽयमव्ययः २५ यस्यनागवधूहस्तैर्लागितंहरिचंदनम् । मुहुःश्वासानिलापास्तंयातिदिक्पटवासताम् २६ यमाराध्यपुराणर्षिर्गर्गोज्योतींषितत्त्वतः । ज्ञातवान्सकलंचैवनिमित्तपठितंफलम् २७ तेनेयंनागवर्येणशिरसाविधृतामही । बिभर्तिमालांलोकानांसदेवासुरमानुषाम् २८ इतिश्रीविष्णुपुराणेद्वितीयांशेपंचमोध्यायः ५ । । पराशरउवाच । । ततश्चनरकान्विप्रभुवोधःसलिलस्यच । पापिनोयेषुपात्यंतेताञ्शृणुष्वमहामुने १ रौरवःसूकरोरोधस्तालोविशसनस्तथा । महाज्वालस्तप्तकुंभःसवनोथविमोहनः २ रुधिरांधोवैतरणीकृमीशःकृमिभोजनः । असिपत्रवनंकृष्णोलालाभक्षश्चदारुणः ३ तथापूयवहःपापोवह्निज्वालोह्यधःशिराः । संदंशःकृष्णसूत्रश्चतमश्चावीचिरेवच ४ श्वभोजनोथाप्रतिष्ठोह्यवीचिश्चतथापरः । इत्येवमादयश्चान्येनरकाभृशदारुणाः ५ यमस्यविषयेघोराःशस्त्राग्निभयदायिनः । पतंतियेषुपुरुषाःपापकर्मरतास्तुये ६ कूटसाक्षीतथासम्यक्पक्षपातेनयोवदेत् । यश्चान्यदनृतंवक्तिसनरोयातिरौरवम् ७ भ्रूणहापुरहंताचगोघ्नश्चमुनिसत्तम । यांतितेनरकंघोरंयश्चोच्छ्वासनिरोधकः ८ सुरापोब्रह्महाहर्त्तासुवर्णस्यचसूकरे । प्रयातिनरकेयश्चतैःसंसर्गमुपैतिवै ९ राजन्यवैश्यहातालेतथैवगुरुतल्पगः । त

प्रतिपादितंशुभाशुभलक्षणंफलंचज्ञातवान् २७ तेनविधृतासतीमहीलोकानांमालांश्रेणींबिभर्ति आधेयसहितायाःपृथिव्याःसएवाधारइत्यर्थः २८ इति० अं० अध्या० ५ भूर्लोकाधःप्रसंगेननरकेतीव्रयातना अतलादिसुखश्रोतृवैराग्यायेहवर्ण्यते १ ततः पातालेभ्यः तथाचकौर्मे पातालानिसंख्यायोक्तं तेषामधस्तान्नरकारौरवाद्याःप्रकीर्तिताइति भुवःसर्वस्याःअधःसलिलस्यतमोगर्त्तोदकस्यऊर्ध्वं तथाचशिवतंत्रे सप्तसागरमानश्चगर्तोदस्तदनंतरमिति एतेषामधोयेनरकास्ताञ्शृणु भागवतेच अंतरएवपृथिव्यास्तुदिशिदक्षिणस्यामधस्ताद्भूमेरुपरिष्टादंडजलाशयस्येति १ रौरवादीनांनामभिःस्वरूपंज्ञेयम् २ ३ ४ ५ विषयेअधिकारे ६ योजानन्नवदतिअन्यथावावदतिसकूटसाक्षी यस्तुधर्माधिकृतःसन्नसम्यगन्यायंवदेत् यश्चान्यद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृतंवदाति ७ भ्रूणोगर्भः विशिष्टब्राह्मणोवा सूत्रप्रवचनाध्यायीभ्रूणइतिबौधायनोक्तेः पुरहंतापुरविलुंपकः उच्छ्वासनिरोधकःउच्छ्वासंनिरुध्यप्राणिघाती ८ सुवर्णस्याशीतिरक्तिकापरिमित स्यब्राह्मणस्वामिकस्य संसर्गमिति संवत्सरेणपततिपतितेनसहाचरन् याजनाध्ययनाद्यौनात्सद्यःपतितत्समइतिस्मृत्युक्तम् ९ राजन्यवैश्यौसवनस्थौ महापातकप्रसंगात् सवनस्थौक्ष त्रियवैश्यौनिम्नब्रह्महाभवतीतिस्मृतेः तालेयत्रप्राणिनस्तालवत्पात्यंते राज्ञोभटान्दूतान् १० साध्वीभार्यातस्याविक्रयकर्ता वध्यपालःकारागृहरक्षकः केसरिविक्रयीअश्वविक्रयी भक्तम नुगतंशरणागतंवा ११ आक्रोष्टापरापवादवक्ता १२ वेदविक्रयः वेतनेनवेदाध्यापकः १३ मर्यादाशिष्टाचारादिसिद्धोधर्मःतस्यदूषकः रत्नदूषयितासद्रत्नदूषकः १४ दुरिष्टिर्विफलायो गोऽभिचारोवातत्कर्त्ता परिवर्जयित्वाअश्नाति १५ कर्णिनोदुराकर्षान्बाणविशेषान् १६ असतांकृष्णाजिनादीनांअसद्योवाप्रतिग्रहीता १७ नक्षत्रसूचकःनक्षत्रगणनाजीवः वेगीसाह

सकुंभेस्वसागामीहंतिराजभटांश्चयः १० साध्वीविक्रयकृद्वध्यपालःकेसरिविक्रयी। तप्तलोहेपतंत्येतेयश्चभक्तंपरित्यजेत् ११ सुतांस्नुषांचाभिगामी महाज्वालेनिपात्यते। अवमंतागुरूणांयोयश्चाक्रोष्टानराधमः १२ वेददूषयितायश्चवेदविक्रयकश्चयः। अगम्यगामीयश्चस्यात्तेयांतिसवनंद्विज १३ चौरोविमोहेपततिमर्यादादूषकस्तथा। देवद्विजपितृद्वेष्टारत्नदूषयिताचयः १४ सयातिकृमिभक्षेवैकृमीशेचदुरिष्टिकृत्। पितृदेवातिथीन्यस्तुपर्य श्नातिनराधमः १५ लालाभक्षेसयात्यग्रेशरकर्ताचवेधकः। करोतिकर्णिनोयश्चयश्चखड्गादिकृन्नरः १६ प्रयांत्येतेविशसनेनरकेभृशदारुणे। असत्प्र तिग्रहीतातुनरकेयात्यधोमुखे १७ अयाज्ययाजकस्तत्रतथानक्षत्रसूचकः। वेगीपूयवहंचैकोयातिमिष्टान्नभुङ्नरः १८ लाक्षामांसरसानांचतिलानांल वणस्यच। विक्रेताब्राह्मणोयातितमेवनरकंद्विज १९ मार्जारकुक्कुटच्छागश्ववराहविहंगमान्। पोषयन्नरकंयातितमेवद्विजसत्तम २० रंगोपजीवीकै वर्त्तःकुंडाशीगरदस्तथा। सूचीमाहिषिकश्चैवपर्वकारीचयोद्विज२१आगारदाहीमित्रघ्नःशाकुनिर्ग्रामयाजकः। रुधिरांधेपतंत्येतेसोमंविक्रीणतेचये२२ मधुहाग्रामहंताचयातिवैतरणींनरः। रेतःपानादिकर्तारोमर्यादाभेदिनश्चये २३ तेकृष्णेयांत्यशौचाश्चकुहकाजीविनश्चये। असिपत्रवनंयातिवन च्छेदीवृथैवयः २४ औरभ्रिकोमृगव्याधोवह्निज्वालेपतंतिवै। पात्यतेद्विजतत्रैवयश्चापाकेषुवह्निदः २५ व्रतेषुलोपकोयश्चस्वाश्रमाद्विच्युतश्चयः

सिकःपुत्रादीन्परित्यज्यमिष्टान्नभोक्ता १८ तमेवपूयवहमेव १९ कुक्कुटादीनांपृथगुपादानंदोषाधिक्यसूचनाय २० रंगोपजीवीनटमल्लादिवृत्तिः कैवर्तोधीवरवृत्तिःकुंडाशीचतुःषष्टिपलैः शुद्धैःकुंडंप्रस्थचतुष्टयम् तावदन्नभोजीपत्यौजीवतिजारजः कुंडस्तदन्नाशीतिवासूचीपिशुनः माहिषिकःमहिषोपजीवी यद्वामहिषीत्युच्यतेभार्यासाचेत्स्यात्स्वैरचारिणी तद्दोषंसहतेय स्तुसवैमाहिषिकःस्मृतइतिस्मृत्युक्तःपर्वकारीअपर्वसुलोभेनपर्वक्रियाप्रवर्तकः पर्वगामीतिपाठेपर्वसुस्त्रीगामी २१ शाकुनिःपक्षिजीवी शुभाशुभनिमित्तशकुनोपजीवीवा ग्रामयाजको ग्रामार्थेयष्टा सोमंसोमलतांयागंवा २२ मधुहामध्वावासघातकः मर्यादाभेदिनःग्रामादिसीमातिक्रमकर्तारः २३ कुहकंवचनंइंद्रजालादिकंवाआजीवोवृत्तिर्येषांते वृथायज्ञार्थसमिधा दिकार्यंविनावनच्छेदीअसिपत्रवनंयाति २४ औरभ्रिकोमेषजीवी मृगव्याधोमृगयाजीवी अपाकेषुअपक्कमृद्भांडादिषुवह्निदःकुंभकारवृत्तिरित्यर्थः पात्यतेनीयते पात्यंतइतिपाठेपूर्वोक्ताव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्गनरकौमिथ्यैवेतिभावः मिथ्याभूतस्वर्गनरकानुपपत्तिगम्येअपिपुण्यपापेमिथ्यैवेत्याशयेनाह नरकेति आयुर्घृतमितिवत्साधनेसाध्योपचारः ४४ दुःखसुखसाधनानांचामिथ्यात्वमाह वस्त्वेकमिति एकंदुःखादिकसाधनंनवस्त्वात्मकंसत्यं विरुद्धानेकस्वभावतत्वात्कुहकवत् नचानुभवसिद्धत्वाद्विरुद्धगुणपरिणामत्वेनतदुपपादनीयम् अनुभवस्यस्वप्नवदप्युपपत्तेः विचारतोगुणानामप्यनिर्वचनीयत्वाच्च ४५ एतदेवोपपादयति तदेवेतिद्वाभ्याम् ४६ मनसःपरिणामःस्वप्नमनोरथवच्चित्तविलासमात्रमित्यर्थः ४७ किंतर्हिसत्यमित्यतआहज्ञानमिति ज्ञानात्मकंब्रह्मैवपरमार्थइतिशेषः तर्हिकुतोस्यबंधमोक्षावित्यतआह ज्ञानमेवेति अविद्याहंकारादिरूपेणप्रतीयमानंज्ञानमेवबंधायेष्यते चशब्दाद्विद्यारूपतयातन्निरसनेनज्ञानमेवमोक्षायचेष्यतइत्यर्थः ४८ अविद्यातदध्यस्तंचविद्यातन्निरसनीयंचज्ञानमेवेत्याह ज्ञानात्मकमिति तदेवंप्रायश्चित्तप्रसंगेऽध्यासापवादाभ्यांब्रह्मात्मकमेवसर्वमितिकथनात्तदनुसंधानमपरोक्षपर्यंतंमु

वस्त्वेकमेवदुःखायसुखायेष्योद्भवायच । कोपायचयतस्तस्माद्वस्तुदुःखात्मकंकुतः ४५ तदेवप्रीतयेभूत्वापुनर्दुःखायजायते । तदेवकोपायततःप्रसादायचजायते ४६ तस्माद्दुःखात्मकंनास्तिनचकिंचित्सुखात्मकम् । मनसःपरिणामोऽयंसुखदुःखोपलक्षणः ४७ ज्ञानमेवपरंब्रह्मज्ञानंबंधायचेष्यते ४८ ज्ञानात्मकमिदंविश्वंनज्ञानाद्विद्यतेपरम् । विद्याविद्येहिमैत्रेयज्ञानमेवोपधारय ४९ एवमेतन्मयाख्यातंभवतोमंडलंभुवः । पातालानिचसर्वाणितथैवनरकाद्विज ५० समुद्राःपर्वताश्चैवद्वीपवर्षाणिनिम्नगाः । संक्षेपात्सर्वमाख्यातंकिंभूयःश्रोतुमिच्छसि ५१ । इतिश्रीविष्णुपुराणेद्वितीयेंशेषष्ठोध्यायः ६ । मैत्रेयउवाच । । कथितंभवताब्रह्मन्ममैतदखिलंत्वया । भुवर्लोकादिकाँल्लोकाञ्श्रोतुमिच्छाम्यहंगुरो १ तथैवग्रहसंस्थानंप्रमाणानियथातथम् । समाचक्ष्वमहाभागमह्यंत्वंपरिपृच्छते २ । पराशरउवाच । । रविचंद्रमसोर्यावन्मयूखैरवभास्यते । ससमुद्रसरिच्छैलातावतीपृथिवीस्मृता ३ यावत्प्रमाणापृथिवीविस्तारपरिमंडलात् । नभस्तावत्प्रमाणंवैव्यासमंडलतोद्विज ४ भूमेर्योजनलक्षेतुमैत्रेयरविमंडलम् । लक्षेदिवाकरस्यापिमंडलंशशिनःस्थितम् ५ पूर्णेशतसहस्रेतुयोजनानांनिशाकरात् । नक्षत्रमंडलंकृत्स्नमुपरिष्टात्प्रकाश

ख्यंप्रायश्चित्तमित्युक्तंभवति नकर्मणालिप्यतेपापकेनेत्यादिश्रुतेः नहिज्ञानेनसदृशंपवित्रमिहाविद्यतइतिस्मृतेश्च यद्वाप्रपंचोमिथ्याब्रह्मैवसत्यमित्युक्तेश्चप्रायश्चित्ताग्रहोनकर्तव्यः किंतुब्रह्मप्राप्तयेतत्साक्षात्कारएवकर्तव्यइतितात्पर्यार्थः ४९ उक्तानुवादपूर्वकंशिष्यप्रश्नावसरार्थमाह एवमितिद्वाभ्याम् ५० ५१ इतिश्रीवैष्णवाकूतचंद्रिकायांद्वितीयेंशेषष्ठोध्यायः ६ । ७ । सप्तमेग्रहतन्मानभुवर्लोकादिसंस्थितिः दशोत्तरावृतिर्बाह्येसाचानंतेनुवर्ण्यते १ भवतामान्येनत्वयेत्यन्वयः अखिलंजगदितिवापाठः १ ग्रहाणांसंस्थानंकस्योपरिकस्तिष्ठतीतितेषांसन्निवेशम् प्रमाणानितेषामंतरयोजनसंस्था २ भूलोकप्रमाणेनैवभुवर्लोकंवक्तुंतन्मानंतावदाह रवीति तावतीपृथ्वीलोकाख्या ३ यावत्प्रमाणापंचाशत्कोटिप्रमाणा विस्तारोलोकालोकभूपरिमाणं परिमंडलंतस्यैववृत्तपरिमाणंतयोर्द्वंद्वैक्यंतस्मात् विस्तारपरिमंडलेतिवापाठः व्यासमंडलतःविस्तारमंडलाभ्यांनभोभुवर्लोकाख्यंतावत्प्रमाणम् द्यावापृथिव्योर्लोकालोकपरिच्छिन्नयोरंतरालवर्त्तीभुवर्लोकोपितावानित्यर्थः ४ स्वर्लोकमाह भूमेर्भूमिमवधीकृत्य सूर्यस्वलक्षोच्छ्रितत्वोक्त्याभुवर्लोकस्यतावत्प्रमाणमुक्तंभवति दिवाकरस्योपरिष्टादितियोज्यम् ५ शतसहस्रेल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेपूर्णे ६ ७ लक्षद्वयेनोपलक्षिते ८ सौरिःशनैश्चरः ९ मेधीभूतःपुंसिमेधिखलेदारुन्यस्तंयत्पशुबंधनेतद्वत्स्थितः १० उत्सेधेनउच्छ्रायेणपंचदशलक्षप्रमाणेन इज्याफलस्ययागादिकर्मफलस्यभोगभूरेषात्रैलोक्यलक्षणा चस्त्वर्थे इज्यात्वत्रभारतवर्षएवप्रतिष्ठितासमाप्ता उक्तंहि यतोहिकर्मभूरेषाअतोन्याभोगभूमयइति अतोभारतभूमिस्थेनधर्मेयतितव्यमितिभावः ११ कल्पोब्राह्मदिनंतत्पर्यंतमेवमहर्लोकेवसंतितदंतेजनोलोकंयांतीतिकल्पवासिनोभृग्वादयः केचित्तुकल्पवासिनःकल्पायुषोमन्वंतराधिकारिणः इंद्राद्याहताधिकारामहर्लोकवासिनः विनिवृत्ताधिकारास्तुमहर्लोकनिवासिनइतिशैवायुक्तेरितिवदंति तस्योच्छ्रायमानमाह एकेति १२ महर्लोकानंतरमुच्छ्रायेणद्वेकोटीजनोलोकःयत्रतेकथिताःप्रसिद्धाःसनंदनाद्याःसंतिसः

ते ६ द्वेलक्षेचोपरिब्रह्मन्बुधोनक्षत्रमंडलात् । तावत्प्रमाणभागेतुबुधस्याप्युशनास्थितः ७ अंगारकोपिशुक्रस्यतत्प्रमाणेव्यवस्थितः । लक्षद्वयेनभौमस्यस्थितोदेवपुरोहितः ८ सौरिर्बृहस्पतेश्चोर्ध्वंद्विलक्षेसमवस्थितः । सप्तर्षिमंडलंतस्माल्लक्षमेकंद्विजोत्तम ९ ऋषिभ्यस्तुसहस्राणांशतादूर्ध्वंव्यवस्थितः । मेधीभूतःसमस्तस्यज्योतिश्चक्रस्यवैध्रुवः १० त्रैलोक्यमेतत्कथितमुत्सेधेनमहामुने । इज्याफलस्यभूरेषाइज्यावात्रप्रतिष्ठिता ११ ध्रुवादूर्ध्वंमहर्लोकोयत्रतेकल्पवासिनः । एकयोजनकोटीतुमहर्लोकोभिधीयते १२ द्वेकोटीतुजनोलोकोयत्रतेब्रह्मणःसुताः । सनंदनाद्याःकथितामैत्रेयामलचेतसः १३ चतुर्गुणोत्तरेचोर्ध्वंजनलोकात्तपःस्मृतः । वैराजायत्रतेदेवाःस्थितादाहविवर्जिताः १४ षड्गुणेनतपोलोकात्सत्यलोकोविराजते । अपुनर्मारकायत्रब्रह्मलोकोहिसस्मृतः १५ पादगम्यंतुयत्किंचिद्वस्त्वास्तिपृथिवीमयम् । सभूर्लोकःसमाख्यातोविस्तारोस्यमयोदितः १६ भूमिसूर्यांतरंयस्तुसिद्धादिमुनिसेवितः । भुवर्लोकस्तुसोप्युक्तोद्वितीयोमुनिसत्तम १७ ध्रुवसूर्यांतरंयस्तुनियुतानिचतुर्दश । स्वर्लोकःसोपिकथितोलोकसंस्थानचिंतकैः १८ त्रैलोक्यमेतत्कृतकंमैत्रेयपरिपठ्यते । जनस्तपस्तथासत्यमितिचाकृतकंत्रयम् १९ कृतकाकृतकोमध्येमहर्लोकइतिश्रुतिः । शून्योभवतिकल्पांतेयोत्यंतंनविनश्यति २० एतेसप्तमयालोकामैत्रेयकथितास्तव । पातालानिचसप्तैवब्रह्मांडस्यैवविस्तरः २१ एतदंडकटाहेनतिर्यक्चोर्ध्वमधस्तथा । कपित्थस्ययथाबीजंसर्वतोवैसमावृतम् २२ दशोत्तरेणपयसामैत्रेयांडंचतद्वृतम् । सर्वोंबुपरिवारोसौव

१३ चतुर्गुणोत्तरेजनलोकादष्टकोटिउच्छ्रायआकाशेव्याप्तस्तपोलोकःस्मृतः दाहविवर्जितइतिदेवापेक्षयानतुजनलोकस्थापेक्षयातेषामपिनित्यंदाहाभावात् १४ जनलोकापेक्षयैवषड्गुणेनद्वादशकोटिउच्छ्रायेणतपोलोकानंतरंसत्यलोकः नतुतपोलोकापेक्षयाषाड्गुण्यंमंतव्यम् तथासत्यष्टचत्वारिंशकोटिउच्छ्रायत्वेनसत्यलोकस्यब्रह्मांडेऽवकाशाभावात्सत्यलोकांडकटाहांतरंचतुर्दशलक्षन्यूनकोटिद्वयंतमसासहज्ञेयम् सूर्याडगोलयोरंतःकोट्यःस्युःपंचविंशतिरितिशुकोक्तेः सत्यलोकएवकक्षाभेदेनब्राह्मविष्ण्यात्परंविष्णुलोकशिवलोकौवायुकूर्मादिपुराणवर्णितौज्ञेयौ अपुनर्मारकाःपुनर्मृत्यूशून्याः १५ महर्लोकादीनामुत्सेधप्रमाणमुक्तम् भूरादिलोकत्रयस्यप्रत्येकमुत्सेधव्यवस्थामाह पादगम्यमितित्रिभिः चरणसंचारयोग्यंगिरिशिखरादियावत्तावदुत्सेधोभूर्लोकइत्यर्थः विस्तारोस्यमयोदितःसर्वलोकावधिःकिंचिदधिकपंचविंशतिकोटिप्रमाणः १६ नियुतानिलक्षाणि १७ १८ त्रैलोक्यंकृतकंप्रतिकल्पंकार्यं जनादित्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्राधारदंडइत्यर्थः तस्याक्षोमेरोर्मूर्धनिकृतोमानसोत्तरेकृतोत्तरभागोयत्रप्रोतंरविरथचक्रंमानसोत्तरेपरिभ्रमतीतिशुकोक्तेः ३ चक्रस्वरूपमाह त्रिनाभीति तिस्रोनाभयोमेखलावच्चक्रपिंडिकायत्रसंतितास्मिन् त्रिनाभिमत्त्वंचशीतोष्णवर्षाख्यकालत्रयवत्त्वंअतीतादिकालत्रयवत्त्वंवा पूर्वाह्णादित्रययुक्तत्वमित्यपरे पंचारेपंचइद्वत्सरेडावत्सरादयःअराःशलाकायस्यतस्मिन् षण्णेमिनिषट्ऋतवोनेमयःप्रांतवलयाकारायस्यसंतितस्मिन् कालात्मकत्वादक्षयात्मके संवत्सरमयेसंवत्सरावयवद्वादशमासारंभकत्वात्तद्रूपेणोपास्यत्वाद्वाअहरादिसंवत्सरकालमयेनराशिचक्रेणनिरवयवःसर्वगतःकालेभिव्यज्यतइतितस्मिन्त्रिनाभित्वादिविशिष्टेचक्रेकृत्स्नंनिरवशेषंकालचक्रंप्रतिष्ठितंस्थितम् सूर्यगत्यधीनत्वात्कालचक्रंकालोपलक्षणभूतंज्योतिश्चक्रमितिकेचित् ४ अक्षांतरप्रमाणमाह चत्वारिंशदिति सार्धपंचचत्वारिंशत्सहस्रप्रमाणःसइत्यर्थः ५ इदानीमुक्ताक्षद्वयप्रमाणंह्रस्वदीर्घयुगयोरपीत्यतिदिशतिअक्षप्रमाणमितिअक्षयोर्दीर्घह्रस्वयोःप्रमाणंयद्युगार्द्धयोर्युगंचअर्धंचअर्थाद्दीर्घयुगस्य ह्रस्वयुगमितियावत्तयोरुभयोःतत्प्रमाणमित्यर्थः ह्रस्वाक्षह्रस्वयुगयोःप्रयोजनमाह ह्रस्वइति ह्रस्वोक्षस्तस्ययुगस्यअर्धंह्रस्वयुगंराश्मिबद्धमेतद्वयंध्रुवाधारंदीर्घाक्षयुगमूलप्राप्तेह्रस्वाक्षयुगेउर्ध्वाभूततैलिकयंत्रवदुपरिवातरश्मिबद्धेध्रुवेलक्षयोजनमूर्ध्वमाकृष्टेतिष्ठतः तत्ररविरथमंडलम् यदाह भूमेर्योजनलक्षेतुसौरंमैत्रंवमंडलमिति अन्यथामानसोत्तरशैलेपंचाशत्सहस्रयोजनोच्छ्रायेरथस्थित्यालक्षयोजनेविरथस्थित्यनुपपत्तिः वस्तुतस्तुसार्द्धेत्यादेःसप्ताधिकसार्द्धकोटिप्रमाणेमेरूपरिषोडशसहस्रयोजनस्थितोत्त

त्मके । संवत्सरमयेकृत्स्नंकालचक्रंप्रतिष्ठितम् ४ चत्वारिंशत्सहस्राणिद्वितीयोऽक्षोविवस्वतः । पंचान्यानितुसार्धानिस्यंदनस्यमहामते ५ अक्षप्रमाणमुभयोःप्रमाणंतद्युगार्धयोः । ह्रस्वोक्षस्तद्युगार्धंचध्रुवाधारंरथस्यवै ६ द्वितीयेक्षेतुतच्चक्रंस्थितंवैमानसाचले। हयाश्वसप्तच्छंदांसितेषांनामानिवैशृणु ७ गायत्रीसबृहत्युष्णिग्जगतीत्रिष्टुबेवच । अनुष्टुप्पंक्तिरित्युक्ताश्छंदांसिहरयोरवेः ८ मानसोत्तरशैलेतुपूर्वतोवासवीपुरी । दक्षिणेनयमराग्रेमानसाचलोपर्यर्धलक्षयोजनस्थितदक्षिणाग्रेध्रुवरश्मिद्वयगृहीतोभयाग्रेदक्षिणोत्तरतिर्यग्भूतेभगवत्तेजोमयेमहाक्षेआधारमात्रेसंवत्सरात्मकालचक्रतयोपास्यंरविरथचक्रंप्रतिष्ठितमित्यर्थः केचित्तुदीर्घयुगस्यप्रयोजनाभावादेवंव्याचक्षते अक्षप्रमाणमितिसान्निध्याद्ह्रस्वाक्षप्रमाणंयद्युगार्धयोर्युगखंडयोःसंहत्यतत्प्रमाणमित्यर्थः अर्धयोर्युगखंडयोःसंहत्यतत्प्रमाणमित्यर्थः अर्धयोःपृथगुपादनंप्रयोजनद्वैविध्यात् तथाहिज्योतिश्चक्राधारमहाक्षोपरिह्रस्वाक्षस्तदुपरिरथोनिबद्धः ह्रस्वाक्षमध्यादीषादंडोरथाद्विगुणदीर्घःप्रत्यङ्मुखः द्विगुणोस्यरथोपस्थादीषादंडःप्रमाणतइतिमात्स्योक्तः तस्यचाग्रेतिर्यक्निबद्धंयुगम् तस्याक्षस्यचउत्तरकोटीमहाक्षांतर्गताशीत्यधिकशतमंडलेषूत्तरायणदक्षिणायनयोरथस्याकर्षणविकर्षणार्थंवातरश्मिनिबद्धेयुगस्यनुदक्षिणार्धेसप्ताश्वाइति यथालैंगमात्स्यवायवीयेषु युगाक्षकोटिसंबद्धैर्द्वैरश्मीस्यंदनस्यतु ध्रुवेणभ्रमतोरश्मीविचक्रयुगयोरिव युगाक्षकोटिगौतस्यदक्षिणेस्यंदनस्यतु ध्रुवेणप्रगृहीतौतौरश्मीयौनयतोरविं भ्रमतोमंडलानिस्युःखेचरस्यरथस्यतु भ्रमंतमनुगच्छेतेध्रुवंरश्मीतुतावुभौ ह्रसतस्तस्यरश्मीतुमंडलेषूत्तरायणे वर्धतोदक्षिणेचैवभ्रमतोमंडलानितु आकृष्येतेयदातौतुध्रुवेणाधिष्ठितौतदा सोभ्यंतरगतःसूर्योभ्रमतेमंडलानितु ध्रुवेणमुच्यमानाभ्यांरश्मिभ्यांपुनरेवतु तथैवबाह्यतःसूर्योभ्रमतेमंडलानिचेति एवं सर्वाधारभूतोमहाक्षउभयतोरश्मिबद्धःप्रवहाख्यवायुवेगवशाच्चक्रंभ्रामयन्प्रत्यक्भ्रमतितद्वशाच्चसूर्यचंद्रादयःप्रत्यहमेवमेरुंप्रदक्षिणंकुर्वंति स्वगत्यातुमेरुंवामतःकुर्वंतोरथपूर्वभागबद्धध्रुवरश्मिवशात्प्रागपियांति अश्विन्यादितोभरण्यादिषुप्राग्वर्तिषूपलंभात्सव्येनचलन्दक्षिणेनकरोतीतिशुकोक्तेः अतएवदक्षिणोत्तरकाष्ठयोर्बाह्याभ्यंतरमंडलेषुसूर्यगत्यादिनानिह्रस्वमध्यमदीर्घाणिभवंतीत्यलमतिविस्तरेण ६ तत्रगच्छतःसूर्यस्यगायत्र्यादिच्छंदोरूपेणोपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यान्हयानाह हयाश्चेति ७ गायत्र्यादीनिच्छंदांसिहरयोहयाउक्ताइत्यान्वयः ८ उदयाद्युपलक्षणस्थानविशेषदर्शनार्थमाह मानसेति पूर्वतइत्यादिभारतवर्षस्थानापेक्षयाउच्यते पूर्वादिदिग्विभागस्यसूर्यदर्शनाद्यपेक्षत्वेनानियमस्यवक्ष्यमाणत्वात् ९ वस्वोकसाराअमरावती याम्यायमस्यपुरी १० इदानीमैंद्रींपुरीमवधीकृत्यसूर्योदयास्तमयादिवक्तुमुत्तरायणांतेत्यंतमुत्तरांदिशंगतस्यदक्षिणांदिशंप्रतिपरावृत्तिलक्षणांसूर्यगतिमाह काष्ठांगतइति दक्षिणतोयाकाष्ठादिक्तांगतः इषुर्यथाशीघ्रंगच्छतितथा ११ ततश्चैंद्रीप्रभृतीनामुपरिसंचारेणाहोरात्रव्यवस्थानकारणंरविर्भवतिप्रसंगाद्रवेरसाधारणधर्मानाह देवयानइति क्लेशानांरागादीनांसंक्षयेसतियोगिनांक्रममुक्तिभाजांदेवयानःपरःश्रेष्ठःअपुनरावृत्तिलक्षणःपंथाश्चरविरेवभवति तेअर्चिरभिसंभवंतीत्यादिश्रुतेः १२ येनप्रकारेणाहोरात्र्यादिकारणंरविस्तमाह दिवसस्येति पंचाभिः रविर्दिवसस्यमध्येसर्वद्वीपेषुव्यवस्थितःसन्सर्वकालंनिशार्धस्यसंमुखोभवतितत्समानसूत्रनिपातेनिशार्धंभवतीत्यर्थः १३ तथा उदयास्तमनेसर्वकालंसंमुखेपरस्परंसमानसूत्रनिपातेभवतइत्यर्थः सूर्यस्यैवदिवसोदयास्तमयनिशार्धादिकारित्वमितिभावः सर्वकालंसर्वद्वीपेष्वित्युक्त्याकालदेशेभेदेपिनेदंव्यभिचारीतिगम्यते दिशाशुप्राच्यादिषु तेनयदाअमरावत्यांमध्यंदिनंतदातत्संमुखेमुख्यायामर्धरात्रंसंयमन्यामुदयः तत्संमुखेविभावर्यामस्तमनमित्याद्यूह्यम् विदिशासुआग्नेय्यादिष्वप्ययंनियमः तथाहि यदा

स्यान्याप्रतीच्यांवरुणस्यच ९ उत्तरेणचसोमस्यतासांनामानिमेशृणु । वस्वोकसाराशक्रस्ययाम्यासंयमनीतथा । पुरीमुख्याजलेशस्यसोमस्यचविभावरी १० काष्ठांगतोदक्षिणतःक्षिप्तेषुरिवसर्पति । मैत्रेयभगवान्भानुर्ज्योतिषांचक्रसंयुतः ११ अहोरात्रव्यवस्थानकारणंभगवान्रविः । देवयानःपरःपंथायोगिनांक्लेशसंक्षये १२ दिवसस्यरविर्मध्येसर्वकालंव्यवस्थितः । सर्वद्वीपेषुमैत्रेयनिशार्धस्यचसम्मुखः १३ उदयास्तमनेचैवसर्वकालंतुसम्मुखे । दिशास्वशेषासुतथामैत्रेयविदिशासुच १४ यैर्यत्रदृश्यतेभास्वान्सतेषामुदयःस्मृतः । तिरोभावंचयत्रेतितत्रैवास्तमनंरवेः । १५ नैवास्तमनमर्कस्यनोदयःसर्वदासतः । उदयास्तमनाख्येहिदर्शनादर्शनेरवेः १६ शक्रादीनांपुरेतिष्ठन्स्पृशत्येषपुरत्रयम् । विकर्णौद्वौविकर्ण

ऐशान्यांमध्यंदिनंतदानैर्ऋत्यामर्धरात्रंआग्नेय्यामुदयोवायव्यामस्तमनम् चशब्दादैंद्र्यादिनैकयामः याम्यायामेकशेषारात्रिः वारुण्यांरात्र्येकयामःसौम्यायामेकशेषंदिनमित्यादिज्ञेयम् एवंपूर्वत्रापि १४ तत्रहेतुः यैर्यत्रेति यद्वासवितुरेकस्यएकदाविरुद्धानेकधर्मवत्त्वंकुतइत्यतआह यैर्यत्रेति यैर्यत्रस्थैःसर्वदाप्रथमंदृश्यतेयत्रसतत्रतेषामुदयः उदयत्वेनव्यवहार्यः तिरोभावमदर्शनम् १५ नैतेवस्तुभूतेइत्याह नैवेति मुख्यौउदयास्तमयौमध्याह्नएवसतोऽर्कस्यनस्तइत्यन्वयः निगमयति उदयास्तेति नैकट्यदूरत्वादिनादर्शनादर्शनाद्येवोदयास्तमयादिनतुमेरुच्छायाकृतमेव तन्मेरूर्ध्वंरविसत्त्वेनबाह्यद्वीपेषुच्छायाभावप्रसक्त्याउदयादिव्यवहारोनस्यात् द्वात्रिंशत्सहस्रयोजनपरिमितायामेरुच्छायायाराद्यादिव्यवहारोसामर्थ्याच्च यथावायुः विदूरभावादर्कस्यप्रोद्यत·स्याद्विरश्मिता रक्तताचविरश्मित्वाद्रक्तत्वाच्चाप्यनुष्णता प्रोद्यतउदयतः मत्स्यः विदूरभावादर्कस्यभूमेर्लेखागतस्यच हीयंतेरश्मयोयस्मात्तेनरात्रौनदृश्यतइति लेखामंडलरेखा तेनदर्शनाद्यधीनत्वात्समुद्रतीरस्थानांद्रष्टॄणांसमुद्रमध्यादिवोद्यन्नन्येषांभूमिंभित्त्वेवोद्यन्नस्तंवागच्छन्नदृश्यः परंनवस्तुतइति सएवनकदाचनास्तमेतिनोदेतीतिश्रुतेः अद्योवाएषप्रातरुदेतीत्यादिश्रुतिस्तुद्रष्टृभावानुवादरूपा यच्चज्योतिःशास्त्रमन्यथाभूगोलज्योतिश्चक्रप्रतिपादकंतत्प्रतीत्यनुगुणगणिततात्पर्यकत्वेनतदंशेअर्थवादिकामिति १६ दर्शनादर्शनयोरवधिमाह शक्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाकृतकंताद्विपरीतम् १९ महर्लोकस्यकृतत्वेहेतुमाह शून्यइति २० आवरणानिवक्तुमुक्तमनुवदति एतइति चकारादनंतदेहादिज्ञेयम् २१ एतच्चतुर्दशभुवनात्मकंपृथिव्यावरणरूपेणांडकटाहेनवृतम् सचांडकटाहःकोटियोजनविस्तारः सप्तसागरमानस्तुगर्तोदस्तदनंतरम् कोटियोजनमानस्तुकटाहःसंव्यवस्थितः इतिस्वच्छंदभैरवतंत्रोक्ते २२ कटाहस्यदशोत्तरेणदशगुणेन सर्वतइतिसर्वावरणेषुसंबध्यते दशोत्तरेणेतिसवह्नयादिभिस्तृतीयांतैःसंबध्यतेनतुकटाहेन तस्यदशोत्तरत्वाभावात् संबंधेवाच्छिनत्तिन्या येनोक्तम् अंबुपरिवारःजलात्मकमावरणम् २३ तामसाहंकारेणभूतादिर्महतामहत्तत्त्वेन २४ २५ प्रधानस्यतुनदशोत्तरत्वंनवातस्यावरणांतरमित्याह अनंतस्येति कार्यस्यहिपरिच्छेदः ततश्चावरणंप्रधानंतुनतथेतिभावः नविद्यतेसंख्यानंप्रमाणंचयस्यतम् तथाव्यापिसर्वगतम् वैप्रसिद्धं नाहरित्यादिश्रुतिपुराणेषु अतःसमस्तस्यकार्यस्यहेतुभूतम् २६ व्यापित्वमाह अंडानामिति ईदृशानामुक्तसंस्थानानांईदृशानांतुजा

ह्निनावेष्टितोबहिः २३ वह्निश्चवायुनावायुर्मैत्रेयनभसावृतः । भूतादिनानभःसोऽपिमहतापरिवेष्टितः २४ दशोत्तराण्यशेषाणिमैत्रेयैतानिसप्तवै । महांतंचसमावृत्यप्रधानंसमवस्थितम् २५ अनंतस्यनतस्यांतंसंख्यानंचापिविद्यते । तदनंतमसंख्यातप्रमाणंव्यापिवैयतः । हेतुभूतमशेषस्यप्रकृतिःपरमामुने २६ अंडानांतुसहस्राणांसहस्राण्ययुतानिच । ईदृशानांतथातत्रकोटिकोटिशतानिच २७दारुण्यग्निर्यथातैलंतिलेतद्वत्पुमानपि । प्रधानेवास्थितोव्यापिचेतनात्मात्मवेदनः २८ प्रधानंचपुमांश्चैवसर्वभूतात्मभूतया । विष्णुशक्त्यामहाबुद्धेवृतौसंश्रयधर्मिणौ २९तयोःसैवपृथग्भावकारणंसंश्रयस्यच । क्षोभकारणभूताचसर्गकालेमहामते ३० यथाशैत्यंजलेवातोबिभर्तिकणिकागतम् । जगच्छक्तिस्तथाविष्णोःप्रधानपुरुषात्मकम् ३१ यथाचपादपोमूलस्कंधशाखादिसंयुतः । आदिबीजात्प्रभवतिबीजान्यन्यानिवैततः ३२ प्रभवंतिततस्तेभ्योभवंत्यन्येपरेद्रुमाः । तेपितल्लक्षणद्रव्यकारणानुगतामुने ३३ एवमव्याकृतात्पूर्वंजायंतेमहदादयः । विशेषांतास्ततस्तेभ्यःसंभवंतिसुरादयः । तेभ्यश्चपुत्रास्तेषांचपुत्राणामपरेसुताः ३४ बीजाद्वृक्षप्ररोहेणयथानापचयस्तरोः । भूतानांभूतसर्गेणनैवास्त्यपचयस्तथा ३५ सन्निधानाद्यथाकाशकालाद्याःकारणंतरोः । तथैवापरि

तानीतिपाठांतरम् २७ तच्चपुरुषाधिष्ठितमेवजगतोहेतुरित्याह दारुणीति काष्ठेयथाप्रकाशस्वभावःसूक्ष्मोग्निरवस्थितः तिलेचतैलंयथातद्वच्चैतन्यश्चासावात्माचेतितथा आत्मवेदनःस्वप्रकाशः २८ तयोरपिपरमेश्वराधिष्ठितत्वमाह प्रधानंचेतिद्वाभ्यां विष्णोःस्वरूपभूतयाचिच्छक्त्यावृतौअधिष्ठितौसंश्रयधर्मिणौअंधपंगुन्यायेनपरस्परसापेक्षौ २९ साविष्णुशक्तिःप्रलयकालेपिकालात्मनास्थितासतीतयोःपृथग्भावेकारणंस्थितिकालेसंश्रयस्यचकारणम् सर्गकालेक्षोभकारणभूताचेत्यर्थः ३० एवंप्रधानपुरुषद्वाराजगदाश्रयत्वेपिनिर्लेपत्वंदृष्टांतेनदर्शयति यथेतिजलेस्थितंशैत्यंकणिकाद्वारेणगतंवातोयथाबिभर्तितथाजलस्थानीयप्रधानपुरुषस्थशैत्यस्थानीयंजगत्कणिकास्थानीयमहत्तत्त्वद्वारागतंवातस्थानीयाविष्णुशक्तिर्बिभर्तीत्यन्वयःकणिकाशतमितिपाठेजलेस्थितंकणिकाशतंशैत्यंचवातोयथाबिभर्तीतिदृष्टांतः ३१ साक्षात्परंपरयावाजातानांविकाराणांप्रधानकारणानुगतिंबहुविधविकारोत्पादनेपिअपक्षयाभावंचदृष्टांतेनदर्शयति यथाचेतिसार्धैश्चतुर्भिः अन्यानिबीजानिततःपादपात्प्रभवंति ३२ ततोनंतरंतेभ्योबीजेभ्योऽन्येपादपास्तद्बीजेभ्योपरेतेपिद्रुमास्तल्लक्षणंयद्द्रव्यंशिंशपादिस्वभावरूपंतदेवकारणंतेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुगताः ३३ विशेषाःपंचमहाभूतानिएकादशेंद्रियसहितानितेभ्योदेवादयःतेपिसुखदुःखमोहस्वभावेनाव्यक्तेनानुगताः तस्यत्वधिष्ठानभूतोविष्णुर्निर्विकारएवेतिभावः ३४ ३५ सर्वकारण भूतस्यापिविष्णोर्निर्विकारत्वंदृष्टांतेनाह संनिधानादिति संनिधानमात्राद्विकारत्वंविनैवउपादानत्वस्यप्रकृतिद्वारकत्वेनहरेःस्वतोभावात् ३६ प्रागसतांमहदादीनांअव्यक्तादुत्पत्त्यंगीकारेण प्राप्तमसत्कार्यवादंतथाविष्णुंविनैवप्रकृतेःप्रपंचोत्पत्तिशंकांचदृष्टांतेननिवारयन्नाह व्रीहीतित्रिभिः व्रीहिबीजेसंतएवयथामूलनालादयआत्मनःस्वस्यप्ररोहहेतुसामग्र्यमभिव्यक्तिकारणपौष्क ल्यंविष्णुशक्तिभूमिजलादिसंयोगसंपत्तिंप्राप्याविर्भवंतिनपुनर्दृष्टसामग्रींविनैवात्यंतासंतएवजायंते सदेवसौम्येदमग्रआसीत् यतोवाइमानिभूतानिजायंतेइत्यादिश्रुतेः ३७ ३८ दार्ष्टांतिक माह तथेति ३९ ननुसर्वकारणंब्रह्मैवश्रुतिषुप्रसिद्धंनतुविष्णुः तत्राह सचेति सविष्णुःपरब्रह्मैव तत्कुतइत्यपेक्षायांविष्णोःसकाशादुद्भूतंजगत्तत्रैवचस्थितमित्यादिनापूर्वोक्तंविष्णोःस्वरू पंस्मारयति यतःसर्वंजातमितिशेषः जगदित्युक्तेजंगममात्रंप्रतीयेतेत्यतआह सर्वमिति ४० विष्णुर्ब्रह्मैवेत्युक्तंतद्ब्रह्मकीदृशमित्यतआह तद्ब्रह्मेति तच्छ्रुतिप्रसिद्धंपरंधामतेजः तत्किंसूर्या

णामेनविश्वस्यभगवान्हरिः ३६ व्रीहिबीजेयथामूलंनालंपत्रांकुरौयथा । कांडंकोषस्तथापुष्पंक्षीरंतद्वच्चतंडुलः ३७ तुषःकणश्चसंतोवैयांत्याविर्भाव मात्मनः । प्ररोहहेतुसामग्र्यमासाद्यमुनिसत्तम ३८ तथाकर्मस्वनेकेषुदेवाद्यास्तनवःस्थिताः । विष्णुशक्तिंसमासाद्यप्ररोहमुपयांतिवै ३९ स चविष्णुःपरंब्रह्मयतःसर्वमिदंजगत् । जगच्चयोयत्रचेदंयस्मिंश्चलयमेष्यति ४० तद्ब्रह्मपरमंधामसदसत्परमंपदम् । यस्यसर्वमभेदेनजगदेतच्च राचरम् ४१ सएवमूलप्रकृतिर्व्यक्तरूपीजगच्चसः । तस्मिन्नेवलयंयातिसर्वंतत्रचतिष्ठति ४२ कर्ताक्रियाणांसचइज्यतेक्रतुःसएवतत्कर्मफलंचत स्ययत् । युगादियत्साधनमप्यशेषतोहरेर्नकिंचिद्व्यतिरिक्तमस्तिवै ४३ । । इतिश्रीविष्णुपुराणेद्वितीयेंशेसप्तमोध्यायः ७ । । पराशरउवाच व्याख्यातमेतद्ब्रह्मांडसंस्थानंतवसुव्रत । ततःप्रमाणसंस्थातेसूर्यादीनांशृणुष्वमे १ योजनानांसहस्राणिभास्करस्यरथोनव । ईशादंडस्तथैवास्य द्विगुणोमुनिसत्तम २ सार्धकोटिस्तथासप्तनियुतान्यधिकानिवै । योजनानांतुतस्याक्षस्तत्रचक्रंप्रतिष्ठितम् ३ त्रिनाभिमतिपंचारेषण्णेमिन्यक्षया

दिरूपंनेत्याह सदसतोःपरंकारणमाश्रयइतियावत् यस्यसत्स्वरूपस्यब्रह्मणोभेदेनजगद्भवतिप्रतीयतेचतद्ब्रह्म अतोविष्णुब्रह्मणोर्लक्षणाभेदेनब्रह्मैवविष्णुरिति ४१ तस्यैवपुनःसर्वात्मतादा ढ्यार्थमाह सएवेति ४२ नतुकर्मनिर्मितमेवेदंविष्णोःस्वीकारेपिकर्मपरतंत्रत्वात्तदेवमूलमित्याशंकांनिराकुर्वन्सर्वात्मत्वंनिगमयति कर्त्तेति तस्यकर्मणःफलंसाधनंचयदित्यन्वयः ४३ इतिश्रीवि॰ द्वि॰ सप्तमोध्यायः ७ अष्टमेज्योतिषांचक्रंसंस्थामानादिभेदतः विष्णोःपदप्रसंगेनगंगाप्यत्रैवकीर्त्यते १ गर्गादिविबुधैःपूर्वंज्योतिश्चक्रंप्रकाशितम् खद्योतवन्मयातत्र द्योत्यतेस्वानुसारतः २ ततोब्रह्मांडव्याख्यानानंतरम् सूर्यादीनांसूर्यरथादीनाम् १ योजनानांसहस्राणिनवभास्करस्यरथइत्यन्वयः सचमंडलाकारः नवयोजनसाहस्रेविस्तारोभास्करस्यतु विस्तारात्त्रिगुणश्चैवपरिणाहोस्यमंडलमितिब्रह्मांडदर्शनात् ईशादंडोरथमध्यदंडःयत्रयुगंबध्यते सचरथाद्विगुणःअष्टादशसहस्रयोजनः २ सार्द्धकोटिरिति योजनानांसार्धकोटिर्यथातथा नियुतानिलक्षाणिसप्तसार्द्धानि तथैवकूर्मपुराणदर्शनात् सार्धसप्तपंचाशल्लक्षाधिककोटिरेकाभवति पुष्करद्वीपमध्यांतरालस्यतावत्परिमाणत्वात् तस्यैकचक्रस्यराविरथस्यतावत्परिमाणोक्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीनामिति शक्राद्यन्यतमस्यपुरेतिष्ठंस्तत्पुरंतदभितः पुरद्वयंचेत्येवंपुरत्रयंतदंतरालस्थौविकर्णौकोणौचस्पृशतिरश्मिभिर्भासयति तथाअग्न्याद्यन्यतरकोणस्थस्तंकोणंतमभितः कोणद्वयंचत दंतरालपुरद्वयंचस्पृशति लोकालोकमध्यमंडलार्धंप्रकाशयतिअर्द्धंचरात्रिंकरोतीत्यर्थः १७ सन्निधानादिकृतमेवरश्मीनांवृद्धिह्रासमंदत्वादिकमित्याह उदितइति १८ दिग्विभागेषूदयास्त मनेएवनिमित्तेइत्याह उदयास्तेति यत्रयस्योदेतिसातस्यपूर्वादिक्यत्रास्तमेतिसाप्रतीची तथाचश्रुतिः यस्मादसावादित्यःसर्वाःप्रजाः प्रत्युदेतितस्मात्सर्वएवमन्यतेमांप्रत्युदगादिति तेनपुरस्ता दुद्यंतंसूर्यंपश्यतोदक्षिणवामपार्श्वयोर्दक्षिणोत्तरेदिशावित्युक्तंभवति १९रश्मिविस्तारावधिमाह यावदिति आदित्यःस्वस्यसंमुख्येपृष्ठपार्श्वयोश्चकदंबगोलकन्यायेनलोकालोकपर्यंतंतपतीत्यर्थः उपर्यधस्तपनंचभविष्यपुराणकथितमेवज्ञेयम् यथा सूर्योगोभिर्जगत्सर्वमादीपयतिसर्वतः त्रीणिरश्मिशतान्यस्यभूर्लोकंद्योतयंतिवै त्रीणित्रीणितथाचान्यौद्वौलोकौप्रतपंत्युत शतंवापिअधस्ता त्तुपातालंतापयत्युतइति मेरौविशेषमाह ऋतइति २०तत्रहेतुमाह येयइति प्रतीपंप्रातिकूल्येनव्यावृत्त्यागच्छंतीत्यर्थः२१यस्मात्सूर्यप्रभाःप्रतिहन्यंतेतस्मात्तत्कृतविशेषाभावात् उत्तरस्यांदिशि

स्थास्त्रीन्कोणान्द्वेपुरेतथा १७ उदितोवर्धमानाभिरामध्याह्नंतपद्रविः । ततःपरंह्रसंतीभिर्गोभिरस्तंनियच्छति १८ उदयास्तमनाभ्यांचस्मृतेपूर्वा परेदिशौ१९ यावत्पुरस्तात्तपतितावत्पृष्ठेचपार्श्वयोः । ऋतेमरगिरेर्मेरोरुपरिब्रह्मणःसभाम् २० येयेमरीचयोऽर्कस्यप्रयांतिब्रह्मणःसभाम् । तेते निरस्तास्तद्ग्रासाप्रतीपमुपयांतिवै २१ तस्माद्दिश्युत्तरस्यांवैदिवारात्रिःसदैवहि । सर्वेषांद्वीपवर्षाणांमेरुरुत्तरतोयतः २२ प्रभाविवस्वतोरात्रावस्तं गच्छतिभास्करे । विशत्यग्निमतोरात्रौवह्निर्दूरात्प्रकाशते २३ वह्निपादस्तथाभानुंदिनेष्वाविशतिद्विज । अतीववह्निसंयोगादतःसूर्यःप्रकाशते २४ ते जसीभास्कराग्रेयेप्रकाशोष्णस्वरूपिणी । परस्परानुप्रवेशादाप्याय्येतेदिवानिशम् २५ दक्षिणोत्तरभूम्यर्धेसमुत्तिष्ठतिभास्करे । अहोरात्रंविशत्यं भस्तमःप्राकाश्यशीलवत् २६ आताम्राहिभवंत्यापोदिवानक्तंप्रवेशनात्। दिनंविशतिचैवांभोभास्करेऽस्तमुपागते । तस्माच्छुक्लीभवंत्यापोनक्तमह्नः

ब्रह्मसभाप्रदेशेसदादिवा प्रभाबहुल्यात् सदारात्रिश्चदिनकरकिरणाभावात् तत्सभायाउत्तरत्वंकुतइत्यतआह सर्वेषामिति उद्यंतंरविंपश्यतांवामभागस्यैवोत्तरत्वात् सर्वेषांमेरुरुत्तरतइत्यर्थः य द्वालोकालोकपर्यंतंसर्वतः सर्वदासूर्यकिरणव्याप्तेरुक्तत्वाद्रात्रिदिवसव्यवहाराभावशंकायांदिवसरात्र्योर्व्यवहारंसर्वदोत्तरत्वंचाह तस्मादिति यतउदयदेशसापेक्षपूर्वादिव्यवहारात् मेरुरुत्तर तस्तस्मादेवकारणाद्भारतवर्षादिस्थानानामन्यतमान्प्रतिदिवारात्रिश्चउत्तरस्यांदिशिसर्वदाअस्त्येव तथाहि भारतेक्रमेणदिवारात्र्यादिव्यवहारउत्तरान्कुरूनपेक्ष्यउत्तरत्वंच एवमुत्तरेषुकुरुषुत योर्व्यवहारः भारतमपेक्ष्यउत्तरत्वंच तथाकेतुमालेतयोर्व्यवहारः भद्राश्वमपेक्ष्योत्तरत्वंच तथाभद्राश्वेक्रमेणदिवारात्रयोर्व्यवहारः केतुमालमपेक्ष्योत्तरत्वंच एवमन्यवर्षद्वीपेष्वपिरात्रि व्यवहा रस्यतयोरुत्तरत्वस्यचव्यभिचारःकदाचिदपिनास्तीत्यर्थः रात्रौचसूर्यस्यविदूरभावएवहेतुर्नतुमेरुच्छायेत्युक्तमेव २२ इदानीमर्काग्निप्रभयोःकालभेदेनान्योन्यप्रवेशादुपचितत्वमाहप्रभेतिवि भिः विवस्वतःप्रभायाश्चतुर्थांशेग्निप्रविशति प्रभाहिसौरीपादेनेतिवायूक्तेः २३ वह्नेःपादचतुर्थांशोदिने भानुंप्रविशतितस्तावन्मात्रप्रवेशाद्भानोरुष्णत्वेप्यदाहकत्वंवह्नेश्चाह्निदाहकत्वमविरु द्धम् २४ २५ अहोरात्रप्रसंगात्तयोरप्सुप्रवेशमुपासनार्थमाह दक्षिणेति मेरोर्दक्षिणभूम्यर्द्धे भास्करेसमुत्तिष्ठतिदिनेसतितमः शीलवतीरात्रिरंभः प्रविशति तथामेरोरुत्तरभूम्यर्द्धे भास्करेसमुत्तिष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिरात्रौसत्यांप्रकाशशीलवदहरंभःप्रविशतीत्यर्थः प्राकाश्यंप्रकाशः स्वार्थेष्यञ् तमःप्राकाश्यशीतलमितिपाठेऽभोविशेषणम् २६ एतदेवोपपादयति आताम्राइतिसार्धेनईषत्ताम्रा दिवादिनेनक्तंरात्रेःप्रवेशात् भास्करेऽस्तमुपागतेसति उपेयुषीतिवापाठः नक्तंरात्रौ २७ एवंप्रसंगादहोरात्राणांरवेरुत्तरायणदक्षिणायनगतिभिर्दैर्घ्यसाम्यलघुत्वानिनिरूपयति एवमित्या दिनाउषारात्रिरित्यतःप्राक्तनेनग्रंथेन पुष्करमध्येनमानसोत्तरशिखरेणमेदिन्यामानसोत्तरमंडलोपलक्षितायास्त्रिंशोंऽशःसैवरवेर्मुहूर्त्तगतिः तथावायूक्तम् नवकोट्यःप्रसंख्यातायोजनैःपरिमंडल म् तथाशतसहस्राणिचत्वारिंशच्चपंचच अहोरात्रात्पतंगस्यगतिरेषाविधीयते पूर्णाःशतसहस्राणामेकत्रिंशत्तुताःस्मृताः पंचाशच्चतथान्यानिसहस्राण्याधिकानितु मौहूर्तिकीगतिर्ह्येषासूर्यस्यतु विधीयते मध्येनपुष्करस्याथभ्रमतोदक्षिणायनइति एवंमंडलांतरेऽपित्रिंशांशएवरवेर्मौहूर्त्तिकीगतिर्ज्ञेया २८ कुलालचक्रपर्यंतस्थोजंतुरिवज्योतिश्चक्रप्रांतस्थोऽर्कोमेदिनींमानसोत्तरशिखरप्रां

प्रवेशनात् २७ एवंपुष्करमध्येनयदायातिदिवाकरः। त्रिंशद्भागस्तुमेदिन्यास्तदामौहूर्तिकीगतिः २८ कुलालचक्रपर्यंतोभ्रमन्नेषदिवाकरः। करोत्य हस्तथारात्रिंविचरन्मेदिनींद्विज २९ अयनस्योत्तरस्यादौमकरंयातिभास्करः। ततःकुंभंचमीनंचराशेराश्यंतरंद्विज ३० त्रिष्वेतेष्वथभुक्तेषुततोवैषुव तींगतिम्। प्रयातिसविताकुर्वन्नहोरात्रंततःसमम्। ततोरात्रिःक्षयंयातिवर्धतेनुदिनंदिनम् ३१ ततश्चमिथुनस्यांतेपरांकाष्ठामुपागतः। राशिंकर्कटकं प्राप्यकुरुतेदक्षिणायनम् ३२ कुलालचक्रपर्यंतोयथाशीघ्रंनिवर्तते। दक्षिणेप्रक्रमेसूर्यस्तथाशीघ्रंनिवर्तते। अतिवेगितयाकालंवायुमार्गबलाच्चलन् ३३ तस्मात्प्रकृष्टांभूमिंतुकालेनाल्पेनगच्छति। सूर्योद्वादशभिःशैघ्र्यान्मुहूर्तैर्दक्षिणायने ३४ त्रयोदशार्धमृक्षाणामह्नानुचरतेद्विज। मुहूर्तैस्तावदृक्षाणिनक्त मष्टादशैश्चरन् ३५ कुलालचक्रमध्यस्थोयथामंदंप्रसर्पति।तथोदगयनेसूर्यःसर्पतेमंदविक्रमः ३६ तस्माद्वीर्येणकालेनभूमिमल्पांतुगच्छति। अष्टाद शमुहूर्तंयदुत्तरायणपश्चिमम्। अहोभवतितत्रापिचरतेमंदविक्रमः ३७ त्रयोदशार्धमह्नातुऋक्षाणांचरतेरविः। मुहूर्तैस्तावदृक्षाणिरात्रौद्वादशभिश्चर न् ३८ अधोमंदतरंनाभ्यांचक्रंभ्रमतिवैयथा। मृत्पिंडवच्चक्रमध्येध्रुवोभ्रमतिवैतथा ३९ कुलालचक्रनाभिस्तुयथातत्रैववर्तते।ध्रुवस्तथाहिमैत्रेयतत्रैवप

तरूपांत्यजनुत्तरायणस्याहश्चरात्रिंचपूर्ववैपरीत्येनकरोति २९ तदेवप्रत्यहमर्हद्व्यारात्रिह्रासेनचदर्शयन्नाह अयनस्येतिसार्धद्वाभ्याम् ३० उत्तरायणमध्यएवविषुवत्मेषराशिस्तत्संबंधिनींवै षुवतींगतिंयाति ३१ ततोहोरात्रासाम्यानंतरंदक्षिणायनेदिनह्रासेनरात्रिवृद्धिंवक्तुमाह ततश्चेतिसार्धैश्चतुर्भिः परांकाष्ठामुत्तरायणांतम् ३२ तत्रज्योतिश्चक्रप्रांतस्यैवशीघ्रनिवर्त्तनेहेतुर्वायुरेव मार्गस्तद्बलादतिवेगितयाकालंदिनरूपंचलञ्शीघ्रंनिवर्त्ततइत्यर्थः ३३ प्रकृष्टांचक्रप्रांतावर्त्तरूपांभूमिंकियानसौकालइत्यतआह सूर्यइति ३४ त्रयोदशार्धंसार्धत्रयोदशनक्षत्रावच्छि न्नज्योतिश्चक्रार्धोपलक्षितप्रदेशंतावन्नक्षत्रोदयपर्यंतामिति तावदृक्षाणिसार्द्धत्रयोदशनक्षत्राणिनक्तंरात्रौमुहूर्तैरष्टादशभिश्चरन्अह्नाऋक्षाणांत्रयोदशार्धंचरतइत्यन्वयः इदंचद्वादशाष्टादशमु हूर्त्तत्वमहोरात्रयोर्देशविशेषापेक्षयोक्तंनतुसर्वत्रेतिज्ञेयम् ३५ उत्तरायणेहोरात्रयोः पूर्ववैपरीत्यंस्पष्टयति कुलालेतिसार्द्धैस्त्रिभिः चक्रमध्यस्थोनाभिनेम्यंतरालस्थः ३६ उत्तरायणस्यपश्चिम महःअंत्यदिनंभवतितत्रमंदविक्रमश्चरति ३७ ३८ ध्रुवस्यतथागतिवैषम्यंनास्तीत्याह अधोमंदतरमितिद्वाभ्याम् अधोनाभ्यांमध्यभागाधःप्रदेशेकुलालचक्रंयथामंदतरमत्यल्पंभ्रमतिअत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तत्रस्थोपिमृत्पिंडोयथामंदतरमेवभ्रमतितथाज्योतिश्चक्रनाभिस्तत्रस्थोध्रुवश्च ३९ यथाचनाभिःपरिवर्ततेतत्रस्थोमृत्पिंडोभ्रमन्नापितत्स्थानंनत्यजतितथैवध्रुवोभ्रमन्नापितत्स्थानंनत्यज
तीत्यर्थः ४० उक्तमेवार्थसंक्षेपेणानूद्यस्पष्टयति उभयोरिति काष्ठयोर्दक्षिणोत्तरयोर्दिशोः दिवामंदाशीघ्राचनक्तंचमंदाशीघ्रावा ४१ तदेवाह मंदेति द्वितीयार्द्धेशीघ्रानिशियदाचास्यत
दामंदादिवागतिरितिपाठे अनिशिअदिवेतिच्छेदः पूर्वार्द्धोक्तानुवादोवा ४२ एवंगतिभेदाद्गंतव्यमार्गभेदशंकायामाह एकेति तत्रहेतुमाह अहोरात्रेणेति राशयोराशीन्समस्तान्द्वादशैव
भुंक्तेयस्मात्तस्मादित्यर्थः ४३ तत्रसमसंख्यायाविभागमाह षडेवेति ४४ तर्हिवैचित्र्यंकथमित्यतआह राशीति अहोरात्रयोर्मध्येल्पकालभोग्याराशयोयत्रतस्याल्पता दीर्घकालभोग्यारा
शयोयत्रतस्यदीर्घता अल्पकालभोग्याराशयोयत्रतस्यतुल्यतेत्यर्थः ४५ राशिवर्गस्यनस्वरूपतोदिनरात्रिवैचित्र्यहेतुत्वंकिंतुभुज्यमानस्येत्याह दिनादेरिति तद्भोगेनतस्यराशिवर्गक्रांतचक्र

रिवर्तते ४० उभयोःकाष्ठयोर्मध्येभ्रमतोमंडलानितु। दिवानक्तंचसूर्यस्यमंदाशीघ्राचवैगतिः ४१ मंदाह्नियस्मिन्नयनेशीघ्रानक्तंतदागतिः। शीघ्रादिवा
यथाचास्यतथामंदागतिर्निशि ४२ एकप्रमाणमेवैषमार्गंयातिदिवाकरः। अहोरात्रेणयोभुंक्तेसमस्ताराशयोद्विज ४३ षडेवराशयोभुंक्तेरात्रावन्याश्च
षट्दिवा ४४ राशिप्रमाणजनितादीर्घह्रस्वात्मतादिने। तथानिशायांराशीनांप्रमाणैर्लघुदीर्घता ४५ दिनादेर्दीर्घह्रस्वत्वंतद्भोगेनैवजायते ४६ उत्तरेप्र
क्रमेशीघ्रानिशिमंदागतिर्दिवा। दक्षिणेत्वयनेचैवविपरीताविवस्वतः ४७ उषारात्रिःसमाख्याताव्युष्टिश्चाप्युच्यतेदिनम्। प्रोच्यतेचतथासंध्याउषा
व्युष्ट्योर्यदंतरम् ४८ संध्याकालेतुसंप्राप्तेरौद्रेपरमदारुणे। मंदेहाराक्षसाघोराःसूर्यमिच्छंतिखादितुम् ४९ प्रजापतिकृतःशापस्तेषांमैत्रेयरक्षसा
म्। अक्षयत्वंशरीराणांमरणंचदिनेदिने ५० ततःसूर्यस्यतैर्युद्धंभवत्यत्यंतदारुणम्। ततोद्विजोत्तमास्तोयंप्रक्षिपंतिमहामुने ५१ ओंकारब्रह्मसं
युक्तंगायत्र्याचाभिमंत्रितम्। तेनदह्यंतितेपापावज्रीभूतेनवारिणा ५२ अग्निहोत्रेहूयतेयासमंत्राप्रथमाहुतिः। सूर्योज्योतिःसहस्रांशुस्तयादीप्य
तिभास्करः ५३ ओंकारोभगवान्विष्णुस्त्रिधामावचसांपतिः। तदुच्चारणतस्तेतुविनाशंयांतिराक्षसाः ५४ वैष्णवोंशःपरःसूर्योयोंतर्ज्योतिरसंभव

प्रदेशस्यपरिवर्तनेनतावद्राशिवर्गोदयेनच राशिदीर्घह्रस्वत्वंचज्योतिश्चक्राकर्षविकर्षहेतुकंज्योतिःशास्त्रेज्ञेयम् ४६ गतिवैचित्र्यंविशेषतोनिगमयति उत्तरइति ४७ अहोरात्रप्रसंगा
त्तयोःसंधिरूपांसंध्यांतत्रकार्यंचाह उषाइत्यादिनापालनोद्यतइत्यंतेन उच्यतेश्रुत्येतिशेषः रात्रिर्वाउषअहर्व्युष्टिरितिश्रुतेः ४८ तत्रसोपाख्यानंसंध्योपासनप्रकारमाह संध्याकालइतिचतु
र्भिः ४९ प्रजापतिनाकृतोवरोपिशापः दुःखसाधनत्वात्तथाचश्रुतिः रक्षांसिहवापुरोनुवाकइत्यादि ५० ५१ ॐकारएवब्रह्मतद्वाचकत्वात्तथापातञ्जलिः तस्यवाचकःप्रणवइति
तेनसंयुक्तंअभिमंत्रितम् तेनतोयेन दह्यंतिदह्यंते ५२ द्विजप्रक्षिप्तेनवारिणारवेर्विजयमुक्त्वाहोमाद्दीप्तिप्रकर्षमाह अग्निहोत्रइति सूर्योज्योतिरिति अग्निहोत्रेप्रातःप्रथममाहुतिमंत्रप्रतीकग्र
हणम् ५३ ॐकारस्वरूपमाह त्रीणिधामानिब्रह्मविष्णुशिवरूपाणितेजांसिवाच्यानियस्यऋग्यजुःसामरूपाणिवास्थानानियस्यसतथा अतएववचसांवेदानांपतिःअग्रणीः तद्यथाशकुनैःस
र्वाणिपर्णानिसंदृब्धानिएवमोंकारेणसर्वावाक्संदृब्धाइतिश्रुतेः ५४ ओंकारोच्चारोपासितःकथंरक्षांसिहंतीत्याह वैष्णवोंऽशइतिद्वाभ्याम् असंप्लवंविषयोपरागरहितमांतरंचिन्मयंज्योतिः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेरकःप्रवृत्तिहेतुः तत्प्रेरकमितिपाठेसओंकारः प्रेरकउद्दीपकोयस्यज्योतिषस्तत्प्रेरकम् ५५ तेनहेतुनाअघानिपापात्मकानि यानिवैइतिवापाठः ५६ सहंतीतिनिंदार्थवादेनास्यनित्यताज्ञापिता ५७ अभिरक्षितःरक्षोवधेसहकारित्वात् ५८ अथसंध्यादेःकालभेदंदर्शयितुंकाष्ठादिस्वरूपंतावदाह काष्ठेतिद्वाभ्याम् समेतेमिलिते ५९ दिवसानामहर्भागैराशिभिःसहह्रासवृद्धीभवतः संध्यायास्तुह्रासवृद्धीनस्तःसातुसदामुहूर्तमात्रेव ह्रासवृद्धौदिवसानामितिशेषः अर्धोदायत्पूर्वंनाडीद्वयप्रमाणाप्रातःसंध्याअर्धास्तमयानंतरंनाडीद्वयंसायंसंध्येत्यर्थः ६० वैषुवतादिनस्यप्रातःकालादिव्यवस्थामाह लेखोऽर्धोदयः तमारभ्यमुहूर्त्तत्रयेणप्रत्येकंप्रातरादिकालः ६१ ६२ ५३ दशपंचमुहूर्तायस्मिन्नहनितस्यमुहूर्तास्त्रयःसायाह्नइत्यर्थः एतेचत्रिमुहूर्ताःपंचदशमुहूर्तात्मकेत्रिंशन्नाडीकेंह्निसंभवंति अन्यदातुमुहूर्ताएवद्वादशाष्टादशपर्यंतह्रासवृद्धिगोचराभवंति अन्येतुपंचदशधाविभक्तस्याह्नाएकोभागोमुहूर्तस्तत्रिकंप्रत्येकंप्रातरादि

म् । अभिधायकओंकारस्तस्यसप्रेरकःपरः ५५ तेनतत्प्रेरितंज्योतिरोंकारेणाथदीप्तिमत् । दहत्यशेषरक्षांसिमंदेहाख्यान्यघानिवै ५६ तस्मान्नोल्लंघनंकार्यंसंध्योपासनकर्मणः । सहंतिसूर्यंसंध्यायानोपास्तिंकुरुतेहियः ५७ततःप्रयातिभगवान्ब्राह्मणैरभिरक्षितः । वालखिल्यादिभिश्चैवजगतःपालनोद्यतः ५८ काष्ठांनिमेषादशपंचचैवत्रिंशच्चकाष्ठागणयेत्कलांताम् । त्रिंशत्कलाश्चैवभवेन्मुहूर्तस्तैस्त्रिंशताराज्यहनीसमेते ५९ ह्रासवृद्धीलवहर्भागैर्दिवसानांयथाक्रमम् । संध्यामुहूर्तमात्रावैह्रासवृद्धौसमास्मृता ६० लेखात्प्रभृत्यथादित्येत्रिमुहूर्तंगतेतुवै । प्रातस्तानेस्मृतःकालोभागश्चाह्नस्तुपंचमः ६१तस्मात्प्रातस्तनात्कालात्त्रिमुहूर्तस्तुसंगवः । मध्याह्नस्त्रिमुहूर्तस्तुतस्मात्कालात्तुसंगवात् ६२ तस्मान्माध्याह्निकात्कालादपराह्णइतिस्मृतः । त्रयएवमुहूर्तास्तुकालभागःस्मृतोबुधैः । अपराह्णेव्यतीतेतुकालःसायाह्नउच्यते ६३ दशपंचमुहूर्ताहोमुहूर्तास्त्रयएवच । दशपंचमुहूर्तावैअहर्वैषुवतंस्मृतम् ६४ वर्धतेहोह्रसतिचअयनेदक्षिणोत्तरे । अहस्तुग्रसतेरात्रिंरात्रिर्ग्रसतिवासरम् ६५ शरद्वसंतयोर्मध्येविषुवत्तुविभाव्यते । तुलामेषगतेभानौसमरात्रिंदिनंतुतत् ६६ कर्कटावस्थितेभानौदक्षिणायनमुच्यते । उत्तरायणमप्युक्तंमकरस्थेदिवाकरे ६७ त्रिंशन्मुहूर्तंकथितमहोरात्रंतुयन्मया । तानिपंचदशब्रह्मन्पक्षइत्यभिधीयते ६८ मासःपक्षद्वयेनोक्तोद्वौमासौचार्कजावृतुः । ऋतुत्रयंचाप्ययनंद्वेयनेवर्षसंज्ञितम् ६९ संव

कालइतिवदंति तथाचस्मृतिःमुहूर्तत्रितयंप्रातस्तावानेवतुसंगवः मध्याह्नस्त्रिमुहूर्तःस्यादपराह्णोपितादृशः सायाह्नस्त्रिमुहूर्तस्तुसर्वकर्मविगर्हितइति पूर्वोक्तस्यप्रपंचोदशपंचइतिसार्धैस्त्रिभिःदशपंचमुहूर्तावैषुवतंदिनंस्मृतम् ६४ वर्धतइत्यादौयथासंभवंयोज्यम् अहःरात्रिंग्रसतेराज्यवयवानात्मसात्करोति एवंरात्रिरपि ६५ शरद्वसंतयोर्मध्यइतिशरन्मध्येतुलाख्यंवसंतमध्येमेषाख्यंविषुवद्भवति विषुवानितिपाठेपुंस्त्वमार्षम् ६६ ६७ इदानींसूर्यगतिप्रसंगात्तत्कृतंसंवत्सरादिपंचकंवक्तुमाह त्रिंशदितिसार्द्धैश्चतुर्भिः अत्रयद्यपिसावनादीनिप्रतीयंते तथापितैरदूरविप्रकर्षात्सौराणितानिलक्ष्यंते सूर्यगत्यैवत्वयनाद्यभिधानात् ६८ ६९ चतुर्मासविकल्पिताइति दर्शाद्दर्शश्चांद्रास्त्रिंशद्दिवसैस्तुसावनोमासः सौरोर्कराशिभोगान्नाक्षत्रश्चेंदुमंडलतइत्युक्तैश्चांद्रसावनसौरनाक्षत्रैश्चतुर्विधैर्मासैर्विकल्पिताविशेषेणविकल्पिताः पंचसंवत्सरादयएकंयुगमितियोनिश्चयःसर्वकालस्ययुगमन्वंतरादेर्निश्चयइत्यभिधीयते वत्सरादिपंचकस्यवादत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्युगादेरारंभादयमर्थः चैत्रमासस्यशुक्लप्रतिपद्विनिष्टाअश्विनीप्रथमपादस्थेचंद्रेसूर्येयदासंक्रांतिर्भवतितदाताद्दग्योगेचतुर्विधानामपिमासानांयुगपत्प्रवृत्तिः पंचाब्दांतेसमाप्तिश्चेतियोग वशाच्चयुगसंज्ञा तथाचयुगपत्प्रवृत्तचतुर्मासारब्धत्वाच्चतुर्मासविकल्पितत्वंपंचाब्दानाम् ७० ७१ अथवैषुवतंकालंवक्तुंशृंगवतःस्वरूपमाह यइतिसार्द्धैस्त्रिभिः ७२ ७३ तदेवस्पष्टयति मेषादाविति ७४ तदेतिमेषतुलयोःप्रथमदिने उभयमहश्चरात्रिश्च ७५ प्रसंगाद्विषुवदंतरमाह प्रथमइतिचतुर्भिः प्रथमेकृत्तिकाभागेमेषांतेयदाभास्वान्तदाविशाखानांचतुर्थांशेदृश्चिको पक्रमेशशीअवश्यंतिष्ठतितदाचंद्रार्कयोः षड्राशिव्यवधानेविषुवावस्थितिरूपंमहाविषुवम् ७६ विशाखायांतृतीयमंशकंतुलांतंकृत्तिकाशिरसिमेषांतेचंद्रंतदाविजानीयात् ७७ तदासावपिम

त्सरादयःपंचचतुर्मासविकल्पिताः । निश्चयःसर्वकालस्ययुगमित्यभिधीयते ७० संवत्सरस्तुप्रथमोद्वितीयःपरिवत्सरः । इडावत्सरस्तृतीयश्च चतुर्थश्चानुवत्सरः ७१ इद्वत्सरःपंचमश्चकालोऽयंयुगसंज्ञितः । यःश्वेतस्योत्तरेशैलःशृंगवानितिविश्रुतः ७२ त्रीणितस्यतुशृंगाणिरौरसौशृंगवा न्स्मृतः । दक्षिणंचोत्तरंचैवमध्यंवैषुवतंतथा ७३ शरद्वसंतयोर्मध्येनभानुःप्रतिपद्यते । मेषादौचतुलादौचमैत्रेयविषुवत्स्थितः७४ तदातुल्यमहोरा त्रंकरोतितिमिरापहः । दशपंचमुहूर्तंवैतदेतदुभयंस्मृतम् ७५ प्रथमेकृत्तिकाभागेयदाभास्वांस्तदाशशी । विशाखानांचतुर्थांशेमुनेतिष्ठत्यसंशय म् ७६ विशाखानांयदासूर्यश्चरत्यंशंतृतीयकम् । तदाचंद्रंविजानीयात्कृत्तिकाशिरसिस्थितम् ७७ तदैवविषुवाख्योवैकालःपुण्योऽभिधीयते । तदादानानिदेयानिदेवेभ्यःप्रयतात्मभिः ७८ ब्राह्मणेभ्यःपितृभ्यश्चमुखमेतत्तुदानजम् । दत्तदानस्तुविषुवेकृतकृत्योऽभिजायते ७९ अहोरात्रार्ध मासौतुकलाकाष्ठाःक्षणास्तथा । पौर्णमासीतथाज्ञेयाअमावास्यातथैवच । सिनीवालीकुहूश्चैवराकाचानुमतिस्तथा ८० तपस्तपस्यौमधुमाधवौ चशुक्रःशुचिश्चायनमुत्तरंस्यात् । नभोनभस्योथइषश्चसोर्जःसहःसहास्याविदिदक्षिणंस्यात् ८१ लोकालोकस्तुयःशैलःप्रागुक्तोभवतोमया। लोकपालास्तुचत्वारस्तत्रतिष्ठंतिसुव्रत ८२ सुधामाशंखपालश्चकर्दमस्यात्मजौद्विज । हिरण्यरोमाचैवान्यश्चतुर्थःकेतुमानपि ८३ निर्द्वंद्वानिरभी मानाविश्वस्तानिष्परिग्रहाः । लोकपालाःस्थिताह्येतेलोकालोकेचतुर्दिशम् ८४ उत्तरंयदगस्त्यस्यअजवीथ्याश्चदक्षिणम्। पितृयानःसवैपंथावैश्वा

हाविषुवाख्यःपुण्यकालोभिधीयते अयंचविशाखाकृत्तिकायुक्तपौर्णमासीद्वयरूपःकालःकदाचिदेवभवति ७८ दानजंदानायजातंदेवादीनांमुखम् मुखमेतत्तुदेवानामितिवायूक्तेः मुखंमु ख्यमितिवा ७९ कालावयवकथनपुरःसरममावास्यापौर्णमास्योर्द्वैविध्यंपुण्यविशेषायस्मृत्युक्तंदर्शयतिअहोरात्रार्धेरितिसार्धेन अहोरात्राधिमासावित्यपिपाठांतरम् दृष्टचंद्रासिनीवालीनष्टचं द्राकुहूः इत्यमावास्याभेदौपूर्णचंद्राकाकलाहीनचंद्राराअनुमतिरितिपौर्णमासीभेदौ ८० ऋतुत्रयंचाप्ययनमित्युक्तमयनद्वयंविविच्याह तपइति मध्वादिपर्यायतइत्यादिशब्दोक्तंमासषट्कं ऋतुत्रयमुत्तरायणम् श्रावणादिपर्यायनभइत्यादिशब्दोक्तंमासषट्कंऋतुत्रयम् दक्षिणायनमित्यर्थः एतच्चस्थूलदृष्ट्यैवोक्तम् ८१ लोकालोकशृंगादगस्त्यस्थानात्पितृयानादिकंवक्ष्यन् प्र थमंतावद्बुद्धिस्थान्लोकपालानाह लोकालोकेतित्रिभिः यथाहमत्स्यः लोकपालाःस्थिताह्येतेलोकालोकचतुर्दिशम् उत्तरंयदगस्त्यस्यशृंगंदेवर्षिपूजितमिति ८२ ८३ ८४ तत्रपितृया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमाह उत्तरमितिसार्धैःपंचभिः तत्रज्योतिश्चक्रेवीथीक्रमोवायुनोक्तः सर्वग्रहाणांत्रीण्येवस्थानानिद्विजसत्तमाः स्थानंजारद्रवंमध्यंतथैरावतमुत्तरम् वैश्वानरंदक्षिणतोनिर्दिष्टमिहतत्त्वतइति तदेवमुत्तरमध्यदक्षिणरूपमार्गत्रयंप्रत्येकंवीथीत्रयेणत्रिधाविभज्यते यथावायुनैवस्पष्टमुक्तम् अश्विनीकृत्तिकायाम्यानागवीथीतिशब्दिता रोहिण्यार्द्रामृगशिरोगजवीथ्यभिधीयते पुष्याश्लेषेतथादित्यावीथीचैरावतीस्मृता एतास्तुवीथयस्तिस्रउत्तरोमार्गउच्यते पूर्वोत्तरेचफल्गुन्यावथवैरावतीस्मृता हस्तचित्रातथास्वातीगोवीथीत्यभिधीयते ज्येष्ठाविशाखानुराधावीथिजारद्रवीतथाएतास्तुवीथयस्तिस्रोमध्यमोमार्गउच्यते मूलाषाढोत्तराषाढाअजवीथीतिशब्दिता श्रवणंचधनिष्ठाचमार्गाशताभिषिक्तथा वैश्वानरीभाद्रपदेरेवतीकार्तिकीबुधैः एतास्तुवीथयस्तिस्रोदक्षिणोमार्गउच्यतइति याम्याभरणीआदित्यापुनर्वसुः मार्गामृगवीथी एवंस्थितेअगस्त्यादुत्तरमजवीथ्याश्चदक्षिणेपितृयानःपंथाः किंत्वगस्त्यनिकटवर्तिनोवैश्वानरपथाद्बहिर्वैश्वानरवीथींविहायमृगवीथ्येवपितृयानामित्यर्थः ८५ तत्रपितृयानेमहात्मानः महतियज्ञादौकर्मणिआत्मामनोयेषांतेतथाभूताः भूतारंभःप्रजोत्पादनंकृतंकृतिःकर्मयस्यतद्ब्रह्मप्रशंसंतःप्रवृत्तकर्मप्रतिपादकंवेदभागमेवस्तुवंतः

नरपथाद्बहिः ८५ तत्रासतेमहात्मानऋषयोयेऽग्निहोत्रिणः । भूतारंभकृतंब्रह्मशंसंतऋत्विगुद्यताः ८६ लोकारंभंप्रारभंतेतेषांपंथाःसदक्षिणः । चलितंतेपुनर्ब्रह्मस्थापयंतियुगेयुगे ८७ संतत्यातपसाचैवमर्यादाभिःश्रुतेनच । जायमानास्तुपूर्वेतुपश्चिमानांगृहेषुवै ८८ पश्चिमाश्चैवपूर्वेषांजायंतेनिधनेष्विह । एवमावर्तमानास्तेतिष्ठंत्याभूतसंप्लवम् ८९ सवितुर्दक्षिणंमार्गंश्रिताह्याचंद्रतारकम् ९० नागवीथ्युत्तरंयच्चसप्तर्षिभ्यश्चदक्षिणम् । उत्तरःसवितुःपंथादेवयानस्तुसस्मृतः ९१ तत्रतेवशिनःसिद्धाविमलाब्रह्मचारिणः । संततिंतेजुगुप्संतितस्मान्मृत्युर्जितश्चतैः ९२ अष्टाशीतिसहस्राणियतीनामूर्ध्वरेतसाम् । उदक्पंथानमर्यम्णःस्थिताह्याभूतसंप्लवात् ९२ तेऽसंप्रयोगाल्लोभस्यमैथुनस्यचवर्जनात् । इच्छाद्वेषाप्रवृत्त्याचभूतारंभविवर्जनात् ९४ पुनश्चकामासंयोगाच्छब्दादेर्दोषदर्शनात् । इत्येभिःकारणैःशुद्धास्तेऽमृतत्वंहिभेजिरे ९५ आभूतसंप्लवस्थानम

ऋत्विगुद्यतायुगांतरेयज्ञोच्छेदेसतिऋत्विग्भागेनयज्ञानुष्ठानायोद्यताः ८६ लोकानामारंभउत्पत्तिर्यस्मात्तत्कर्मप्रारभंते चलितंछिन्नसंप्रदायंब्रह्मवेदंस्थापयंतिच ८७ संतत्यावंशोत्पादनेन मर्यादाभिर्वर्णाश्रमव्यवस्थाभिः श्रुतेनशास्त्रप्रवर्तनेन पूर्वेपितरः पश्चिमानांपुत्राणांगृहेषुदारेषु ८८ पश्चिमाःपुत्राश्चपूर्वेषांस्वपुत्रत्वेनस्थितानांनिधनेगृहेषुआधिकारिककर्मवशाद्वेदादिसंप्रदायप्रवर्तनायजायंते यथावायुः प्राप्तेत्रेतायुगेचैवपुनःसप्तर्षयस्त्विह प्रवर्तयंतितान्वर्णानाश्रमांश्चपृथक्पृथक् तेषामेवान्वयेधीराउत्पद्यंतेपुनःपुनः जायमानःपितापुत्रेपुत्रःपितरिचैवहि एवमावर्तमानास्तेद्वापरेषुपुनःपुनः कल्पानांभाष्यविद्यानांज्ञानशास्त्रकृतश्चयेइति ८९ दक्षिणंमार्गंधूमादिमार्गमाश्रिताः श्रुतिश्च अथयेग्रामइष्टापूर्त्तेदत्तमित्युपासतेतेधूममभिसंभवंतिधूमाद्रात्रिंरात्रेरपरपक्षमित्यादिः आचंद्रतारकंचंद्रतारासीमाभूतंमार्गम् ९० देवयानमाह नागवीथीतिषड्भिः सर्वोत्तरमार्गस्योत्तरावीथीनागवीथीतस्याउत्तरंसप्तर्षिपर्यंतंदेवयानःपंथाः ९१ वशिनोजितेंद्रियाः ९२ ९३ लोभस्यतृष्णायाअसंप्रयोगाद्वर्जनादिच्छाद्वेषाभ्यामप्रवृत्त्यामप्रयत्नाभावेनभूतारंभविवर्जनाद्भूतानामारंभोयस्मादृष्टात्तस्यविवर्जनात् ९३ पुनश्चत्यक्तस्यापिकामस्ययोगभ्रंशस्यासंयोगादभावात् कामसंयोगादितिपाठेकामस्यरूयाद्यभिलाषस्यसंयोगात्संबंधाद्धेतोस्तन्निवृत्त्यर्थंशब्दादेर्विषयस्यदोषदर्शनात् अमृतत्वंअमृतत्वद्वारभूतंचिरकालस्थायित्वंभेजिरे ९५ तदेवाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आभूतसंप्लवेति ब्रह्माहःपर्यंतंयत्स्थानंतदेवामृतत्वमुपचारात्कथ्यते उपचारबीजमाह त्रैलोक्येति अपुनर्मारःपुनर्मरणरहितः क्रममुक्तिस्थानत्वात् पितृयानेपुनःपुनरावृत्तिर्देवयानेपुनरावृत्तिर्ना स्तीत्यर्थः ९६ भूतसंप्लवस्थानोक्तिप्रसंगात्तदवधिकमन्यदप्याह ब्रह्महत्येति ब्रह्महत्याश्वमेधाभ्यांयत्पापंपुण्यंचतत्कृतस्तदवधिकोविधिःपापपुण्यविधानम् यद्वाब्रह्महत्याश्वमेधाभ्यांताववधीकृ त्यपापपुण्यकृतस्तत्प्रतियोगिकोविधिर्मर्यादा ततोधिकेपापपुण्येनस्तइत्यर्थःतदेवाह आभूतेतितयोर्ब्रह्महत्याश्वमेधयोःफलंदुःखंसुखंच आसमंताद्भूतसंप्लवःसंहारोयस्मिन्नेतेकल्पावसानेतत्रां तःसमाप्तिर्यस्यतत् उक्तंवेदेनेतिशेषः अवधिरितिपाठेसएवार्थः ९७ ९८ सप्तर्षितोदक्षिणतोदेवयानमुक्त्वातदूर्ध्वोत्तरतोविष्णुपदव्यवस्थितिमाह उर्ध्वेतियावत्समाप्ति उर्ध्वउत्तरंचतत्सप्तर्षि भ्यउत्तरस्यांदिशिऊर्ध्वंयत्रध्रुवस्तिष्ठतिएतद्विष्णुपदं भुवस्याप्याधारभूतंव्योम्न्येवस्वयमनाधारंभूम्यपेक्षयादिव्यंतृतीयंस्थानामित्यर्थः ९९ तदेवविशिनष्टि निर्धूतेतिपंचाभिः१०० क्षीणाअशेषा

मृतत्वंविभाव्यते । त्रैलोक्यस्थितिकालोऽयमपुनर्मारउच्यते ९६ ब्रह्महत्याश्वमेधाभ्यांपापपुण्यकृतोविधिः । आभूतसंप्लवांतांतंफलमुक्तंतयोर्द्वि ज ९७ यावन्मात्रप्रदेशेतुमैत्रेयावस्थितोध्रुवः । क्षयमायातितावत्तुभूमेराभूतसंप्लवे ९८ उर्ध्वोत्तरमृषिभ्यस्तुध्रुवोयत्रव्यवस्थितः । एतद्विष्णु पदंदिव्यंतृतीयंव्योम्निभास्वरम् ९९ निर्धूतदोषपंकानांयोगिनांसंयतात्मनाम् । स्थानंतत्परमंविप्रपापपुण्यपरिक्षये १०० अपुण्यपु ण्योपरमेक्षीणाशेषास्तिहेतवः । यत्रगत्वानशोचंतितद्विष्णोःपरमंपदम् १०१ धर्मध्रुवाद्यास्तिष्ठंतियत्रतेलोकसाक्षिणः । तत्साध्योत्पन्नयोगेद्धास्त द्विष्णोःपरमंपदम् १०२ यत्रोतमेतत्प्रोतंचयद्भूतंसचराचरम् । भाव्यंचविश्वंमैत्रेयतद्विष्णोःपरमंपदम् १०३ दिवीवचक्षुराततंयोगिनांतन्म यात्मनाम् । विवेकज्ञानदृष्टंचतद्विष्णोःपरमंपदम् १०४ यस्मिन्प्रतिष्ठितोभास्वान्मेढीभूतःस्वयंध्रुवः । ध्रुवेतुसर्वज्योतींषिज्योतिष्वंभोमुचोद्विज १०५ मेघेषुसंततावृष्टिर्वृष्टेश्चापोथपोषणम् । आप्यायनंचसर्वेषांदेवादीनांमहामुने १०६ ततआज्याहुतिर्द्वारपोषितास्तेहविर्भुजः। वृष्टेःकारणतां यांतिभूतानांस्थितयेपुनः १०७ एवमेतत्पदंविष्णोस्तृतीयममलात्मकम् । आधारभूतंलोकानांत्रयाणांवृद्धिकारणम् १०८ ततःप्रभवतिब्रह्मन्स र्वपापहरासरित् । गंगादेवांगनांगानामनुलेपनपिंजरा १०९ वामपादांबुजांगुष्ठनखस्रोतोविनिर्गता । विष्णोर्बिभर्तियांभक्त्याशिरसाहर्निशं

अस्तेर्जन्मनोहेतवोयेषांते अशेषास्तिहेतवइतिपाठेक्षीणाअशेषास्तेनानादेहातेर्हेतवोयेषांते १०१ तत्साध्योत्पन्नयोगेद्धास्तैर्धर्मादिभिःसाध्यमानोयोयोगःसमाधिस्तेनेद्धादीप्ताः तत्सात्म्ये तिपाठेतस्यविष्णोःसात्म्येनसमानैश्वर्येणइंद्रियवशीकरणरूपेणउत्पन्नोयोयोगस्तेनेद्धाइत्यर्थः १०२ १०३ दिवीवचक्षुराततंव्याप्तमिवप्रतिबुद्धतयासकलप्रकाशकंचक्षुर्नेत्रंसूर्योवातन्म यात्मनांयोगिनांविवेकरूपंयत्ज्ञानंतेनदृष्टमित्यन्वयः पाठांतरेविवेकज्ञानेनोपाधिनिवृत्त्यावृद्धमपरिच्छिन्नतयाअवभातमित्यर्थः एतेनतद्विष्णोरितिमंत्रार्थःसूचितः १०४ इदानींध्रुवाधारत यातद्वाराविश्वपोषकत्वमाह यस्मिन्निति चतुर्भिः यस्मिन्पदेभास्वान्दीप्तिमान्मेढीभूतःस्थिराधारःअंभोमुचोमेघाःतेज्योतिःषुज्योतिःपोष्यत्वात् १०५ वृष्टेर्हेतोरोषधिद्वारादेवादीनांपोष णंवृद्धिराप्यायनंतृप्तिः १०६ वृष्टेःकारणतांयांतीति एतदुक्तंगीतासु देवान्भावयतानेनतेदेवाभावयंतुवइत्यादि १०७ उपसंहरातिएवमिति १०८ विष्णुपदस्यजगदाश्रयत्वकारणत्वेउ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तेजगत्पावनत्वंचाह ततइति ततोविष्णुपदात् गंगातुपूर्वमेवत्रिविक्रमपादांगुष्ठभिन्नब्रह्मांडसुषिरोद्भवापिततःप्रभृतिदेवादिसेव्यत्वेनप्रकटीभवतीत्यर्थः तदाह देवांगनेति पिंजरापीता १०९ विष्णोर्वामनरूपस्यवामपादांबुजांगुष्टनखात्स्रोतोरूपेणविनिर्गता ११० सप्तऋषयःप्राणायामपरायणाःअघमर्षणंकुर्वंतस्तिष्ठंति उह्यमानाइतस्ततश्चाल्यमानाजटायेषांते सिच्यमानजटाइत्यपिपाठः १११ भूयोधिकतमांचांद्रतेजसोऽबिंधनत्वात्उपक्षपंरजनीषु उपक्षयमितिपाठेक्षयसमीपेपौर्णमास्यामित्यर्थः ११२ ११३ दिक्षुचतसृषुभेदेनयागतिःसैवचतुर्भेदलक्षणं यस्याः सा १४ शर्वोमहादेवः दक्षिणंभेदम् अधिकंशतादेव १५ जटाकलापाद्धिमालयपतनादिक्रमेणास्थिशर्करा अस्थिचूर्णानिप्लावयित्वा पापान्ब्रह्मद्रुहोपि १६ समात्रयंवर्षत्रयम्

ध्रुवः ११० ततःसप्तर्षयोयस्याःप्राणायामपरायणाः । तिष्ठंतिवीचिमालाभिरुह्यमानजटाजले १११ वार्योघैःसंततैर्यस्याःप्लावितंशशिमंडलम् । भूयोधिकतमांकांतिंवहत्येतदुपक्षपम् ११२ मेरुपृष्ठेपतत्युच्चैर्निष्क्रांताशशिमंडलात् । जगतःपावनार्थाययाप्रयातिचतुर्दिशम् ११३ सीताचालकनंदाचचक्षुर्भद्राचसंस्थिता । एकैवयाचतुर्भेदादिग्भेदागतिलक्षणा ११४ भेदंचालकनंदाख्यंयस्याःसर्वोपिदक्षिणम् । दधारशिरसाप्रीत्यावर्षाणामधिकंशतम् ११५ शंभोर्जटाकलापाच्चविनिष्क्रांतास्थिशर्कराः । प्लावयित्वादिवंनिन्येयापापान्सगरात्मजान् ११६ स्नातस्यसलिलेयस्याःसद्यःपापंप्रणश्यति । अपूर्वपुण्यप्राप्तिश्चसद्योमैत्रेयजायते ११७ दत्ताःपितृभ्योयत्रापस्तनयैःश्रद्धयान्वितैः । समात्रयंप्रयच्छंतितृप्तिंमैत्रेयदुर्लभाम् ११८ यस्यामिष्ट्वामहायज्ञैर्यज्ञेशंपुरुषोत्तमम् । द्विजभूपाःपरामृद्धिमवापुर्दिविचेहच ११९ स्नानादिधूतपापाश्चयज्जलेयतयस्तथा । केशवासक्तमनसःप्राप्तानिर्वाणमुत्तमम् १२० श्रुताभिलषितादृष्टास्पृष्टापीतावगाहिता । यापावयतिभूतानिकीर्तिताचदिनेदिने १२१ गंगागंगेतियैर्नामयोजनानांशतेष्वपि । स्थितैरुच्चारितंहंतिपापंजन्मत्रयार्जितम् १२२ यतःसापावनार्थायत्रयाणांजगतामपि । समुद्भूतापरंतत्तुतृतीयंभगवत्पदम् १२३ । । इतिश्रीविष्णुपुराणेद्वितीयेंशेऽअष्टमोध्यायः ८ । । पराशरउवाच । । तारामयंभगवतःशिशुमाराकृतिप्रभो । दिविरूपंहरेर्यत्तुतस्यपुच्छेस्थितोध्रुवः १ सैषभ्रमन्भ्रामयतिचंद्रादित्यादिकान्ग्रहान् । भ्रमंतमनुतंयांतिनक्षत्राणिचचक्रवत् २ सूर्याचंद्रमसौ

११७ हेद्विज भूपाइत्युपलक्षणम् १८ १९ १२० २१ २२प्रस्तुतंविष्णुपदंनिगमयति यतइति त्रयाणामितिसगरपुत्राणांपरित्राणायपातालेष्वपिव्याप्तिरुक्ता तिसृणामितिपाठश्छांदसः २३ इतिश्रीविष्णुपुराणेरत्नगर्भभट्टाचार्यरचितायांवैष्णवाकूतचंद्रिकायांद्वितीयेंशेऽष्टमोध्यायः ८ नवमेतुग्रहादीनामाधारत्वंध्रुवेब्रुवन् शिशुमाराकृतिंप्राहरूपंतारामयंहरेः १ तारामयंनक्षत्रसमूहात्मकम् शिशुमारोगोधाकृतिर्जंतुस्तद्वदाकृतिर्यस्यतद्भगवतोरूपंयत्तस्यदक्षिणावर्तकुंडलीभूतदेहस्यपुच्छेपुच्छाग्रेध्रुवःस्थितइत्यर्थः १ सैषइति सोऽचिलोपेचेत्पादपूरणमितिसुलोपेवद्धिः सएषध्रुवःशिशुमारवशेनभ्रमन्ग्रहान्भ्रामयति नक्षत्राणिचतंभ्रमंतमनुयांति २ तत्रहेतुमाह सूर्येति ताराअश्विन्यादिनक्षत्राणिअन्यानिवियद्गतानिवाभौमादिभिर्ग्रहैःसह वातसमूहमयैर्वैवैबंधनैर्ध्रुवेबद्धानियतोतस्तमनुयांतीत्यर्थः वाताश्चकूर्मोक्ताः आवहःप्रवहश्चैवतथैवानुवहःपरः संवहोविवहश्चैवतदूर्ध्वंस्यात्परावहः तथापरिवहश्चोर्ध्ववायोर्वैसप्तनेमयइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३ शिशुमारस्याश्रयंदर्शयन्नाह शिशुमारेति ज्योतिषांनक्षत्राणाम् धाम्नांसूर्यादीनांबायनंदिवियच्छिशुमाराकृतियद्रूपंप्रोक्तंतस्यापिहृदिस्थितःस्वयंतारारूपोनारायणएवाधारआश्रयइत्यन्वयः परंधाम्नामितिपाठेशिशुमाराकृतिपरंश्रेष्ठंरूपंनक्षत्रादीनामाधारआश्रयःतस्यचनारायणआश्रयइत्यर्थः ४ सध्रुवःप्रजापतिंनारायणमाराध्यतारामयस्यशिशुमारस्यपुच्छेव्यवस्थितः ५ तदेवस्पष्टयतिआधारइति ६ तदाधारंभान्वाधारम् ७ तदेवाह विवस्वानितिसार्धेन ८ वर्षतीतियदुक्तंतत्प्रकारमाह विवस्वानंशुभिरितिचतुर्भिः ९ धूमाग्न्यनिलमूर्तीनांजलाधारत्वमत्रपद

तारानक्षत्राणिग्रहैःसह। वातानीकमयैर्बंधैर्ध्रुवेबद्धानितानिवै ३ शिशुमाराकृतिप्रोक्तंयद्रूपंज्योतिषांदिवि। नारायणोयनंधाम्नांतस्याधारःस्वयंहरिः ४ उत्तानपादपुत्रस्तुतमाराध्यप्रजापतिम् । सताराशिशुमारस्यध्रुवःपुच्छेव्यवस्थितः ५ आधारःशिशुमारस्यसर्वाध्यक्षोजनार्दनः । ध्रुवस्य शिशुमारश्चध्रुवेभानुर्व्यवस्थितः ६ तदाधारंजगच्चेदंसदेवासुरमानुषम् । येनविप्रविधानेनतन्ममैकमनाःशृणु ७ विवस्वानष्टभिर्मासैरादायापोरसात्मिकाः । वर्षत्यंबुततश्चान्नमन्नादप्यखिलंजगत् ८ विवस्वानंशुभिस्तीक्ष्णैरादायजगतोजलम् । सोमंपुष्णात्यथेंदुश्चवायुनाडीमयैर्दिवि ९ नालैर्विक्षिपतेऽभ्रेषुधूमाग्न्यनिलमूर्तिषु । नभ्रश्यंतियतस्तेभ्योजलान्यभ्राणितान्यतः १० अभ्रस्थाःप्रपतंत्यापोवायुनासमुदीरिताः । संस्कारंकालजनितंमैत्रेयासाद्यनिर्मलाः ११ सरित्समुद्रभौमास्तुतथापःप्राणिसंभवाः । चतुःप्रकाराभगवानादत्तेसवितामुने १२ आकाशगंगासलिलंतथादायगभस्तिमान् । अनभ्रगतमेवोर्व्यांसद्यःक्षिपतिरश्मिभिः १३ तस्यसंस्पर्शनिर्धूतपापपंकोद्विजोत्तम । नयातिनरकंमर्त्योदिव्यंस्नानंहितत्स्मृतम् १४ दृष्टसूर्यंहियद्वारिपतत्यभ्रंविनादिवः । आकाशगंगासलिलंतद्गोभिःक्षिप्यतेरवेः १५ कृत्तिकादिषुऋक्षेषुविषमेष्वंबुयद्दिवः । दृष्टार्कंपततिज्ञेयंतद्गांगंदिग्गजोज्झितम् १६ युग्मर्क्षेषुचतत्तोयंपतत्यर्कोज्झितंदिवः । तत्सूर्यरश्मिभिःसद्यःसमादायनिरस्यते १७ उभयंपुण्यमत्यर्थंनृणांपापहरंद्विज । आकाशगंगासलिलंदिव्यंस्नानंमहामुने १८ यत्तुमेघैःसमुत्सृष्टंवारितत्प्राणिनांद्विज । पुष्यत्योषधयःसर्वाजीवनायामृतंहितत् १९ तेनवृद्धिंपरांनीतःसलिलेनौषधीगणः । साधकःफलपाकांतःप्रजानांद्विजजायते २० तेनयज्ञान्य

व्युत्पत्त्यासमर्थयति नभ्रश्यंतीति १० तर्हिकथंभ्रश्यंतीत्यतआह अभ्रस्थाइति तर्हिसदैवकिमापोनपतंतिवायोःसत्त्वादित्यतआह संस्कारमिति संस्कारंवेगाख्यंकालकृतमासाद्यवक्ष्यमाणचतुःप्रकारकत्वेपिनिर्मलाःपतंतीति यद्वापूर्वसरित्समुद्रादियोनित्वात्कथमेकरसाइत्यतआह संस्कारमिति संस्कारमभ्रगर्भवासकृतंमाधुर्यादिरूपातिशयमासाद्यनिर्मलाःपूर्वविकाररहिताः ११ विकारहेतुमाह सरिदिति सरित्समुद्रस्थाभौमाश्चेत्यर्थः प्राणिसंभवादेहस्थाः १२ वृष्टिप्रसंगात्तत्कृतंदिव्यंस्नानमाह आकाशेतिषड्भिः सद्यःग्रहणानंतरमेव १३ १४ तदेवस्पष्टयति दृष्टसूर्यंयथास्यात् १५अनभ्रवृष्टौविशेषमाह कृत्तिकादिषुकृत्तिकामृगशीर्षादिविषमनक्षत्रेषुस्थितेऽर्केदृष्टार्कमनभ्रंयदंबुपतति १६एवंयुग्मर्क्षेषुरोहिण्यादिषुसमनक्षत्रेषुस्थितेर्केइतिज्ञेयम् सूर्याक्रां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनक्षत्रैरेवदृष्ट्यादिव्यवहारात् आर्द्रादीनिप्रवर्षंतिनक्षत्राणित्रयोदशोतिगर्गोक्तैः १७ १८ प्रस्तुतमाह यत्त्विति त्रिभिः ओषधयओषधीःप्राणिनांजीवनायपुष्यति १९ साधकःदृष्टादृष्टहेतुत्वात् २० तत्रादृष्टहेतुत्वमाह तेनेति तैर्यज्ञैः २१ अध्यायार्थमुपसंहरति एवमितिचतुर्भिः वेदधारणंचद्विजपोषणद्वारा २२ २३ २४ तस्यशिशुमारस्यहृदिस्थितःसन्सर्वभूतानांविभर्ताविधारकः बिभर्तीतिपाठेसर्वभूतानामितिकर्मणिशेषेषष्ठी तस्यतुधारकांतरंनास्तीत्याह सनातनःसदास्वेमहिम्निवर्तमानः २५ । । इतिश्रीवैष्णवाकूतचंद्रिकायांद्वितीयेंशेनवमोध्यायः ९ । । रथस्यदशमेभानोरयनद्वयचंक्रमाः निरूप्यंतेतथामासिमासियेसप्तकागणाः १ अथसूर्यरथस्याधिकारिणोवक्ष्यन्नुत्तरायणदक्षिणायनयोराभ्यंतरबाह्ययोर्गतव्यानिमंडलान्याह अशीतीति काष्ठयोरुत्तरदक्षिणसीम्नोरंतरंमध्येप्रत्येकमशीत्यधिकशतंमंडलंभानोर्गतिः तत्प्रकारमाह आरोहणावरोहाभ्यामितिक्रस्वाक्षयुगकोटिबद्धौवायुपाशौयदाध्रुवेणाकृष्येतेतदाउत्त

थाप्रोक्तान्मानवाःशास्त्रचक्षुषः । कुर्वंत्यहरहस्तैश्चदेवानाप्याययंतिते २१ एवंयज्ञाश्चवेदाश्चवर्णाश्चद्विजपूर्वकाः । सर्वदेवनिकायाश्चपशुभूतगणाश्चये २२ वृष्ट्याधृतमिदंसर्वमन्नंनिष्पाद्यतेयया । सापिनिष्पाद्यतेवृष्टिःसवित्रामुनिसत्तम २३ आधारभूतःसवितुर्ध्रुवोमुनिवरोत्तम । ध्रुवस्याशिशुमारोऽसौसोपिनारायणाश्रयः २४ हृदिनारायणस्तस्याशिशुमारस्यसंस्थितः । बिभर्तासर्वभूतानामादिभूतःसनातनः २५ । इतिश्रीविष्णुपुराणेद्वितीयेंशेनवमोध्यायः ९ । । पराशरउवाच । । अशीतिमंडलशतंकाष्ठयोरंतरंद्वयोः । आरोहणावरोहाभ्यांभानोरब्देनयागतिः १ सरथोऽधिष्ठितोदेवैरादित्यैर्ऋषिभिस्तथा । गंधर्वैरप्सरोभिश्चग्रामणीसर्पराक्षसैः २ धाताक्रतस्थलाचैवपुलस्त्योवासुकिस्तथा । रथकृद्ग्रामणीर्हेतिस्तुंबुरुश्चैवसत्तम ३ एतेवसंतिवैचैत्रेमधुमासेसदैवहि । मैत्रेयस्यंदनेभानोःसप्तमासाधिकारिणः ४ अर्यमापुलहश्चैवरथौजाःपुंजिकस्थला । प्रहेतिःकच्छनीरश्चनारदश्चरथेरवेः ५ माधवेनिवसंत्येतेशुचिसंज्ञेनिबोधमे ६ मित्रोऽत्रिस्तक्षकोरक्षःपौरुषेयोथमेनका । हाहारथस्वनश्चैवमैत्रेयैतेवसंतिवै ७ वसिष्ठोवरुणोरंभासहजन्याहुहुर्बुधः । रथचित्रस्तथाशुक्रेवसंत्याषाढसंज्ञिते ८ इंद्रोविश्वावसुःस्रोतएलापत्रस्तथांगिराः । प्रम्लोचाचनभस्यंतेसर्पश्चार्केवसंतिवै ९ विवस्वानुग्रसेनश्चभृगुरापूरणस्तथा । अनुम्लोचाशंखपालोव्या

रायणेउत्तरकाष्ठापर्यंतंप्रत्यहमेकैकमंडलभ्रमणेनारोहणंभवति यदातुतौपाशौप्रसर्प्येतेतदाबाह्यतएकैकमंडलभ्रमणेनदक्षिणकाष्ठापर्यंतमवरोहणंभवतितथाहमत्स्यः आकृष्येतेयदातौतुध्रुवेणसमधिष्ठितौ तदासोऽभ्यंतरेसूर्योभ्रमतेमंडलानितु ध्रुवेणमुच्यमानेनपुनारश्मियुगेनतु तथैवबाह्यतःसूर्योभ्रमतेमंडलानितु सुमेरुप्रदेशस्योच्चत्वात्सूर्यस्यारोहणमुत्तरायणे ततोगंगाप्रपातदर्शनादतएवदक्षिणायनेऽवरोहः साशीत्याशीत्यशीतीतिपाठत्रयंचेत्समानार्थकमेवज्ञेयम् १ देवैरादित्यैःआदित्याएवदेवास्तैःग्रामणीर्यक्षः २ तानेवसप्तसप्तआदित्यादीन्प्रतिमासंगणयति धातेत्यादिना विष्णुशक्त्युपबृंहिताइत्यंतेन धातासूर्यः रथकृत्संज्ञोग्रामणीर्यक्षः हेतीराक्षसः ३ मधोर्वसंतस्यसंबंधिनिमासेचैत्रे ४ रथोजाःयक्षःप्रहेतीराक्षसः कच्छनीरःसर्पः नारदोगंधर्वः ५ माधवेवैशाखे शुचिसंज्ञेज्येष्ठे शुचिर्ग्रीष्मोग्निशृंगारेआषाढेशुद्धमंत्रिणि ज्येष्ठेचपुंसिधवलेशुद्धेनुपहतेत्रिषुइतिनानार्थदर्शनात् ६ मित्रआदित्यः पौरुषेयोरक्षोराक्षसः रथस्वनोयक्षः७ वरुणःसूर्यः रंभाअप्सराः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहजन्येतिनामांतरेणतस्याएवविशेषणंफाल्गुनेवक्ष्यमाणरंभाव्यावृत्त्यर्थतयारथचित्रइतियक्षसर्पयोरेकंनाम वत्सासहजन्येइतिपाठेवत्सःसर्पःदेवताद्वंद्वत्वाद्दीर्घत्वंग्रीष्ममासयोः ऋषिरत्रिर्वसिष्ठश्चतक्षकोवत्सएवचेतिब्रह्मपुराणदर्शनात् बुधोराक्षसः आषाढसंज्ञिकइतिव्याख्यानादाषाढएवशुक्रः ८ इंद्रःसूर्यः स्रोतोयक्षःएलापत्रोनागः नभसिश्रावणे सर्पोराक्षसः अर्केअर्करथे ९ उग्रसेनोगंधर्वःआपूरणोयक्षः शंखपालःसर्पः व्याघ्रोराक्षसः १० सुरुचिर्गंधर्वः वातोराक्षसःधनंजयःसर्पः सुषेणोयक्षः ११ विश्वावसुसंज्ञएवापरोयंगंधर्वः पर्जन्यःसूर्यः ऐरावतःसर्पः सेनजित्संज्ञौयक्षराक्षसौ सेनजिच्चापइतिपाठेआपोराक्षसः१२ अंशुकाश्यपाभ्यांयुक्तस्तार्क्ष्यः मध्यमपदलोपीसमासः अंशुरादित्यः तार्क्ष्योयक्षःमहापद्मःसर्पः चित्रसेनोगंधर्वः विद्युद्राक्षसः १३

घ्रोभाद्रपदेतथा १० पूषाचसुरुचिर्वातोगौतमोथधनंजयः । सुषेणोऽन्योघृताचीचवसंत्याश्वयुजेरवौ ११ विश्वावसुर्भरद्वाजःपर्जन्यैरावतौतथा । विश्वाचीसेनजिच्चापिकार्तिकेचाधिकारिणः १२ अंशुकाश्यपतार्क्ष्यस्तुमहापद्मस्तथोर्वशी । चित्रसेनस्तथाविद्युन्मार्गशीर्षाधिकारिणः । १३ ऋतुर्भगस्तथोर्णायुःस्फूर्जःकर्कोटकस्तथा । अरिष्टनेमिश्चैवान्यापूर्वचित्तिर्वराप्सराः १४ पौषेमासिवसंत्येतेसप्तभास्करमंडले । लोकप्रकाशनार्थायविप्रवर्याधिकारिणः १५ त्वष्टाथजमदग्निश्चकंबलोथतिलोत्तमा । ब्रह्मापेतोऽथऋतजिद्धृतराष्ट्रश्चसप्तमः १६ माघेमासेवसंत्येतेसप्तमैत्रेयभास्करे । श्रूयतांचापरेसूर्यैफाल्गुनेनिवसंतिये १७ विष्णुरश्वतरोरंभासूर्यवर्चाश्चसत्यजित् । विश्वामित्रस्तथारक्षोयज्ञापेतोमहात्मनः १८ मासेष्वेतेषुमैत्रेयवसंत्येतेतुसप्तकाः । सवितुर्मंडलेब्रह्मन्विष्णुशक्त्युपबृंहिताः १९ स्तुवंतिमुनयःसूर्यंगंधर्वैर्गीयतेपुरः । नृत्यंत्यप्सरसोयांतिसूर्यस्यानुनिशाचराः २० वहंतिपन्नगायक्षैःक्रियतेभीषुसंग्रहः । वालखिल्यास्तथैवैनंपरिवार्यसमासते २१ सोऽयंसप्तगणःसूर्यमंडलेमुनिसत्तम । हिमोष्णवारिवृष्टीनांहेतुःस्वसमयागतः २२ । इतिश्रीविष्णुपुराणेद्वितीयेंशेदशमोध्यायः १०। मैत्रेयउवाच । यदेतद्भगवानाहसगणःसप्तकोरवेः । मंडलेहिमतापादेःकारणंतन्मयाश्रुतम् १ व्यापाराश्चापिकथितागंधर्वोरगरक्षसाम् । ऋषीणांवालखिल्यानांतथाचाप्सरसांगुरो २ यक्षाणांचरथेभानोर्विष्णुशक्तिधृतात्मनाम् । किंत्वादित्यस्ययत्कर्मतन्नात्रोक्तंमहामुने ३ यदिसप्तगणोवारिहिममुष्णं

भगःसूर्यः ऊर्णायुर्गंधर्वः स्फूर्जोराक्षसः अरिष्टनेमिर्यक्षः १४ १५ त्वष्टासूर्यःकंबलःसर्पः ब्रह्मापेतोराक्षसः ऋतजिद्यक्षः धृतराष्ट्रोगंधर्वः १६ सूर्यैसूर्यरथे ७७ विष्णुःसूर्यः अश्वतरःसर्पः सूर्यवर्चोगंधर्वः सत्यजिद्यक्षः यज्ञापेतोराक्षसः महात्मनःसवितुरित्यग्रेणान्वयः १८ १९ एषांव्यापारविशेषानाह स्तुवंतीति अनुपृष्ठेनिशाचरायांतीत्यन्वयः २० वहंतिवहनानुकूलतयासंनह्यंतीत्यर्थः संनह्यंतिरथंनागाइतिशुकोक्तेः अभीषुसंग्रहःरश्मियोजनम् नित्यव्यापृतानाह वालखिल्याइति२१सर्वेषांसाधारणंकर्माह सोयमिति सप्तगणःसूर्यादिः स्वस्यहिमादेर्यःसमयस्तमागतःप्राप्तःसन्हिमादेर्वृष्टीनांहेतुरित्यर्थः २२ । । इतिश्रीविष्णुपुराणेद्वितीयेंशेदशमोध्यायः १०। ।गणत्वेनाविशेषेपिविष्णोरंशप्रवेशतः प्राधान्यंवृष्टिहेतुत्वेरवेरत्रानुवर्ण्यते १ उक्तानुवादपूर्वकंरवेर्विशेषंपृच्छति यदेतादितिपंचभिः सप्तकोगणएवहिमादेःकारणमितियद्भगवानाह एतन्मयाश्रुतम् संसप्तकइतिपाठः १ व्यापाराःकर्माणि २ ३ मारुतुतत्ततःकिमतआह य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीति रवेःकिमसाधारणंकर्मयेनकर्मणादृष्ट्यादिसूर्याज्जायतइतिउच्यते यद्यपिविवस्वानष्टभिरित्यादिनारवेःकर्मोक्तमेवतथापितन्मंडलस्थानांसर्वेषामेवसमानंकर्मेत्याक्षेपः ४ ५ विष्णुश क्त्यधिष्ठानात्सूर्यस्यप्राधान्येनसर्वोप्ययंव्यवहारोयुक्तइतिपरिहरति मैत्रेयेत्यादिनायावदध्यायपरिसमाप्ति ६ यद्यस्माद्याविष्णोःस्वरूपभूतापराश्रेष्ठासर्वप्रकाशिकासैषासूर्यात्मिकातप तिउपासिताचसतीजगतोंहःपापंहरति अतःसप्तगणनध्येप्राधान्येनाधिकोरविरित्यर्थः सैषात्रय्येवविद्यातपतीतिश्रुतेः सर्वशक्तिरितिपाठेसर्वात्मिकासर्वजनिकाशक्तिरितिवा ७ अतए वभेदविवक्षयाह सैवेति यात्रयीजगतःस्थित्यांस्थितयेस्थितिनिमित्तभूतासापालनायोद्यतोविष्णुरेवेत्यर्थःसचविष्णुःसवितुर्मंडलभूतस्यांतास्तिष्ठति सैवेतिवापाठः ८ मासभेदेप्रातरादिकाल

चवर्षति । तत्किमत्ररवेर्येनवृष्टिःसूर्यादुदीर्यते ४ विवस्वानुदितोमध्येयात्यस्तमितिकिंजनः । ब्रवीत्येतत्समंकर्मयदिसप्तगणस्यतत् ५ पराशरउवाच । । मैत्रेयश्रूयतामेतद्यद्भवान्परिपृच्छति । तथासप्तगणोप्येकःप्राधान्येनाधिकोरविः ६ यातुशक्तिःपराविष्णोर्ऋग्यजुःसामसंज्ञि ता । सैषात्रयीतपत्यंहोजगतश्चहिनस्तियत् ७ सैषविष्णुःस्थितःस्थित्यांजगतःपालनोद्यतः । ऋग्यजुःसामभूतोंतःसवितुर्द्विजतिष्ठति ८ मासि मासिरविर्योयस्तत्रतत्रहिसापरा । त्रयीमयीविष्णुशक्तिरवस्थानंकरोतिवै ९ ऋचस्तपंतिपूर्वाह्णेमध्याह्नेथयजूंषिवै । बृहद्रथंतरादीनिसामान्यह्नः क्षयेरवौ १० अंगमेषात्रयीविष्णोर्ऋग्यजुःसामसंज्ञिता । विष्णुशक्तिरवस्थानंमासादित्येकरोतिसा ११ नकेवलंरवौशक्तिर्वैष्णवीसात्रयीमयी । ब्रह्माथपुरुषोरुद्रस्त्रयमेतत्रयीमयम् १२ सर्गादौऋङ्मयोब्रह्मास्थितौविष्णुर्यजुर्मयः । रुद्रःसाममयोंतायतस्मात्तस्याशुचिर्ध्वनिः १३ एवंसासा त्त्विकीशक्तिर्वैष्णवीयात्रयीमयी । आत्मसप्तगणस्थंतंभास्वंतमधितिष्ठति १४ तयाचाधिष्ठितःसोतिजाज्वलीतिस्वरश्मिभिः । तमःसमस्तजगतां नाशंनयतिचाखिलम् १५ स्तुवंतितंवैमुनयोगंधर्वैर्गीयतेपुरः । नृत्यंत्यप्सरसोयांतितस्यचानुनिशाचराः १६ वहंतिपन्नगायक्षैःक्रियतेऽभीषुसं ग्रहः । वालखिल्यास्तथैवैतंपरिवार्यसमासते १७ नोदेतानास्तमेताचकदाचिच्छक्तिरूपधृक् । विष्णुर्विष्णोःपृथक्तस्यगणःसप्तमयोप्ययम् १८ स्तंभस्थदर्पणस्येवयोयआसन्नवान्नरः । छायादर्शनसंयोगंससंप्राप्नोत्यथात्मनः १९ एवंसावैष्णवीशक्तिर्नैवापैतिततोद्विज । मासानुमासंभास्वं

भेदेवातस्याव्याप्तिमाह मासिमासीतिद्वाभ्याम् ९ १० उपसंहरति अंगंमूर्तिर्मासादित्येमासिमास्यादित्ये ११ नकेवलंसाशक्तिःसूर्यस्याधिष्ठात्रीकिंतुब्रह्मादीनामपीत्याह नेति पुरुषोवि ष्णुः त्रयीमयंत्रय्यधिष्ठितम् १२ तदेवाह सर्गेति यस्मात्साममयोरुद्रःसर्वांतकःतस्मात्तस्यसाम्नोध्वनिरशुचिर्देशकालादिविशेषवद्वेदांतरस्यानध्यायहेतुर्नसदाशुचिरित्यर्थःनसामध्वनावृग्यजु षीइतिगौतमस्मृतेः सामध्वनिध्वस्तसमस्तपातकमितिपुराणांतराच्च १३ सावैष्णवीशक्तिरात्मसप्तगणस्थंस्वाधिष्ठेयेसप्तगणोस्थितंभास्वंतमतिशयेनाधिकृत्यातिष्ठति १४ जाज्वलीतिअ तिशयेनज्वलतिप्रकाशते १५ अतःप्राधान्यादृषिमुख्याःस्वस्वव्यापारैस्तंसेवंतइत्याह स्तुवंतीतिद्वाभ्याम् १६ १७ सप्तगणानांमासिमास्यन्वयव्यतिरेकाभ्यांविष्णोरप्यागमापायित्वंप्रसज्ये ततद्वारयाति नोदेताउदयंनगंतानास्तमेताअस्तंनगंता तदधिष्ठाताविष्णुःप्रतिमासमागमापायीनभवतिकिंतुतदधिष्ठेयःसप्तमयःसप्तभिःसंपाद्यःसर्वोप्ययंगणःआगमापायीतस्याविष्णोःपृथगेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८ एतदेवदृष्टांतेनस्पष्टयति स्तंभेतिद्वाभ्याम् स्तंभेनिखातदर्पणस्ययोयोजनःसान्निध्यंप्राप्नोतिससर्वोपिछायादर्शनसंबंधंतत्रदृश्यमानप्रतिबिंबसंबंधंयथाप्राप्नोति १९ तथासूर्यरथेसदानपग
तावैष्णवीशक्तिर्मासानुमासंप्रतिमासंरथगतंभास्वंतमधितिष्ठतिआत्मसात्करोति २० अधिष्ठायतद्वारापित्राद्याप्यायनादिकरोतीत्याह पितृदेवेति पित्रादीनाप्याययन्तर्पयन्परिवर्ततिप
रिभ्रमति २१ तर्पणप्रकारमाह सूर्येतिद्वाभ्याम् तर्पितःशुक्लप्रतिपदमारभ्यपूरितःकृष्णप्रतिपदमारभ्यप्रत्यहमेकैककलांशेनसुरैःपीयते प्रथमांपिबतेवह्निर्द्वितीयांपिबतेयमःइत्यादिषूक्तंपानं
ज्ञेयम् शश्वत्प्रतिमासम् २२ ततश्चतुर्दश्यंतेद्विकलंपीतंपानावशेषंकृष्णपक्षक्षयेदर्शेपितरःपिबंति तथात्वेनचंद्रतर्पणप्रकारेणद्वाराभास्करात्पित्रादितर्पणंभवति २३ इदानींमनुष्यादितर्पण
प्रकारमाह आदत्तइतिद्वाभ्याम् भूतानांपुष्ट्यर्थंयासस्यवृद्धिस्तस्यै २४ २५ नतुतृप्तानांकिंपानादिनेत्यतआह पक्षेति शश्वत्तत्तद्दिनम् पक्षादिपर्यंतमेवयत्तृप्तिंप्रयच्छंतिअतःपुनस्तदपेक्षेतिभा

तमध्यास्तेतत्रसंस्थितम् २० पितृदेवमनुष्यादीन्ससदाप्याययन्प्रभुः । परिवर्तत्यहोरात्रकारणंसविताद्विज २१ सूर्यरश्मिःसुषुम्नोयस्तर्पित
स्तेनचंद्रमाः । कृष्णपक्षेऽमरैःशश्वत्पीयतेवैसुधामयः २२ पीतंतुद्विकलंसोमंकृष्णपक्षक्षयेद्विज । पिबंतिपितरःशेषंभास्करात्तर्पणंतथा २३ आद
त्तेरश्मिभिर्यंतुक्षितिसंस्थंरसंरविः । तमुत्सृजतिभूतानांपुष्ट्यर्थंसस्यवृद्धये २४ तेनप्रीणात्यशेषाणिभूतानिभगवान्रविः । पितृदेवमनुष्यादीनेव
माप्याययत्यसौ २५ पक्षतृप्तिंतुदेवानांपितॄणांचैकमासिकीम् । शश्वत्तृप्तिंचमर्त्यानांमैत्रेयार्कःप्रयच्छति २६ । । इतिश्रीविष्णुपुराणेद्वितीयेंशेए
कादशोध्यायः ११ । । पराशरउवाच । । रथस्त्रिचक्रःसोमस्यकुंदाभास्तस्यवाजिनः । वामदक्षिणतोयुक्तादशतेनचरत्यसौ १ वीथ्याश्रयाणि
ऋक्षाणिध्रुवाधारेणवेगिना । ह्रासवृद्धिक्रमस्तस्यरश्मीनांसवितुर्यथा २ अर्कस्येवहितस्याश्वाःसकृद्युक्तावहंतिते । कल्पमेकंमुनिश्रेष्ठवारिगर्भसमु
द्भवाः ३ क्षीणंपीतंसुरैःसोममाप्याययतिदीप्तिमान् । मैत्रेयैककलंसंतंरश्मिनैकेनभास्करः ४ क्रमेणयेनपीतोऽसौदेवैस्तेननिशाकरम् । अप्याय
त्यनुदिनंभास्करोवारितस्करः ५ संभृतंचार्धमासेनतत्सोमस्थंसुधामृतम् । पिबंतिदेवामैत्रेयसुधाहारायतोऽमराः ६ त्रयस्त्रिंशत्सहस्राणित्रयस्त्रिंश

वःतस्मादहरहर्मनुष्याअशनमिच्छंतिअर्धमासेदेवाइज्यंतेमासिमासिपितृभ्यःक्रियतइतिश्रुतेः २६ इतिश्रीविष्णुपुराणेद्वितीयेंशेएकादशोध्यायः ११ ॥ छ ॥ पूर्वैश्चतुर्भिरध्यायैर्ज्यो
तिश्चक्राधिपस्यहि रवेरुक्तास्थितिःसोमप्रभृतीनामिहोच्यते १ रथस्त्रिचक्रइति कुंदाभाःश्वेताः रविरथाद्विशेषमाह वामतोदक्षिणतश्चयुक्तास्तस्यरथस्याश्वादशेति १ क्वचरतीत्यतआह वी
थ्योनागवीथ्यादयोमार्गाःतदाश्रयाणिऋक्षाणिअश्विन्यादीनिनक्षत्राणिअधिकृत्य वीथिर्गृहांगणेपंक्तौनाट्येरूपकवर्त्मनोरितिविश्वाभिधानात् ह्रासवृद्धीइति उदयास्तमनयोरल्पतामध्ये
चवृद्धिरिति २ अर्कस्येवेतिदृष्टांतेनसूर्यरथाश्वाअपिसकृद्युक्ताइतिप्रतीयतेवारिगर्भसमुद्भवाअमृतोद्भवाः ३ क्षीणस्यपुनःसूर्येणपूर्णस्यसोमस्यापितृतर्पकतामाह क्षीणामितिचतुर्भिःएककलं
संतंदेवपीतशेषपंचदश्याःकलायाअपिपितृभिःपीतत्वाद्रश्मिनैकेनसुषुम्नाख्येन ४ येनक्रमेणप्रतिपदमारभ्यदेवैर्वह्न्यादिभिरेकैकाकलासोमस्यपीता शुक्लपक्षेतुतेनैवक्रमेणानुदिनमेकैक
कलावृद्ध्याआप्याययतीत्यर्थः वारितस्करःअलक्षितजलग्रहणात् तथाचतेनवारिणासोममाप्याययतीतिभावः ५ सुखंधीयतइतिसुधा अमृतंमृत्युनिराकरणम् ६ पितृसंख्यामाह त्रयस्त्रिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शदधिकशतत्रययुक्तषट्त्रिंशत्सहस्रपरिमितादेवाःक्षणदाकरंचंद्रंपिबंति ७ पितृणांसोमपानप्रकारमाह कलेतिसार्द्धैःषड्भिः ८ अमावास्यापदंनिरुच्यतत्प्रवेशक्रममाह अप्स्विति ९ प्र संगात्तत्रतृणादिच्छेदकनिन्दामाह छिनत्तीति १० तदेवंकलात्मकेपंचदशभागेकिंचिच्छिष्टेजलादिषुभागत्रयप्रवेशात् चतुर्थावशेषेजघन्यंपश्चात्सोमंपितरःपर्युपासतेपानार्थंसेवंते ततश्च द्विकलंसोमंपितरःपिबंति तत्किंकलाद्वयमेवपिबंतितत्राह तस्यसोमस्यावशिष्टादेवपीतशेषाअतःपुण्यापंचदशीयाकलातामेवपिबंति द्विलवमितिपाठेसोममुपास्याद्विलवंकालंव्याप्यतांक लांपिबंतीत्यर्थः द्विकलाकारशिष्टेतिपाठःस्पष्टः १२ सोमस्यगभस्तिभ्योनिर्गतंसुधामृतंपीत्वेतिशेषः १३ अन्ननिष्पादनद्वारापितृदेवाद्याप्यायनमाह एवमितिद्वाभ्याम् सितेपक्षेदेवाना प्याययति तत्रदेवयज्ञानुष्ठानात् तस्मादापूर्यमाणपक्षेयजतइतिश्रुतेः कृष्णपक्षेपितॄन् अपरपक्षेपितॄणामितिस्मृतेः अप्परमाणुभिःअपांसूक्ष्मैरंशैः शीतैर्हिमात्मकैः १४ वीरुधोलताद्याः

च्छतानिच । त्रयस्त्रिंशत्तथादेवाःपिबंतिक्षणदाकरम् ७ कलाद्वयावशिष्टस्तुप्रविष्टःसूर्यमंडलम् । अमाख्यरश्मौयद्वत्सत्यमावास्याततःस्मृता ८ अ प्सुतास्मिन्नहोरात्रेपूर्वंवसतिचंद्रमाः । ततोवीरुत्सुवसतिप्रयात्यर्कंततःक्रमात् ९ छिनत्तिवीरुधोयस्तुवीरुत्संस्थेनिशाकरे । पत्रंवापातयत्येकंब्रह्मह त्यांसविंदति १० शेषेपंचदशेभागेकिंचिच्छिष्टेकलात्मके । अपराह्णेपितृगणाजघन्यंपर्युपासते ११ पिबंतिद्विकलंसोमंशिष्टातस्यतुयाकला । सुधा मृतमयीपुण्यातामिंदोःपितरोमुने १२ निःसृतंतदमावास्यांगभस्तिभ्यःसुधामृतम् । मासतृप्तिमवाप्याग्र्यांपितरःसंतिनिर्वृताः १३ सौम्याबर्हिष दश्चैवअग्निष्वात्ताश्चतेत्रिधा । एवंदेवान्सितेपक्षेकृष्णेपक्षेतथापितॄन् । वीरुधश्चामृतमयैःशीतैरप्परमाणुभिः १४ वीरुदोषधिनिष्पत्त्यामनुष्यपशु कीटकान् । आप्याययतिशीतांशुःप्राकाश्याह्लादनेनतु १५ वार्यग्निद्रव्यसंभूतोरथश्चंद्रसुतस्यच । पिशंगैस्तुरगैर्युक्तःसोष्टाभिर्वायुवेगिभिः १६ सवरूथःसानुकर्षोयुक्तोभूसंभवैर्हयैः । सोपासंगपताकस्तुशुक्रस्यापिरथोमहान् १७ अष्टास्रिःकांचनःश्रीमान्भौमस्यापिरथोमहान् । पद्मराग ारुणैरश्वैःसंयुक्तोवह्निसंभवैः १८ अष्टाभिःपांडुरैर्युक्तेवाजिभिःकांचनेरथे । तस्मिंस्तिष्ठतिवर्षंवैराशौराशौबृहस्पतिः १९ आकाशसंभवैरश्वैःशबलैः स्यंदनंयुतम् । समारुह्यशनैर्यातिमत्तगामीशनैश्चरः २० स्वर्भानोस्तुरगाह्यष्टौभृंगाभाधूसरंरथम् । सकृद्युक्तास्तुमैत्रेयवहंत्यविरतंसदा २१ आ दित्यान्निःसृतोराहुःसोमंगच्छतिपर्वसु । आदित्यमेतिसोमाच्चपुनःसौरेषुपर्वसु २२ तथाकेतुरथस्याश्वाअष्टौतेवातरंहसः । पलालधूमवर्णाभाला

ओषधयःफलपाकांतास्तासांनिष्पत्त्या प्राकाश्यंप्रकाशःआह्लादनंप्रीतिजननंचद्वंद्वैक्यंतेनच १५ इदानींबुधादिरथसंस्थाप्रकारमाह वारीत्यादिनाप्रवहस्तेनसंस्मृतइत्यंतेन पिशंगैःपिंग लैः १६ वरूथोरथस्यतिरोधायकोरथावयवविशेषः वरूथोरथगुप्तिर्यातिरोधत्तेरथस्थितम् रथस्याधस्थितंकाष्ठमनुकर्षोनिगद्यतइत्युक्तत्वात् उपासंगोरथोपस्थः १७ अष्टास्रिरष्टकोणः १८ १९ शबलैर्नानावर्णैः २० स्वर्भानोराहोः भृंगाभाःकृष्णाः धूसरमीषत्पांडुरम् अविरतमविच्छेदम् सदायावत्कल्पम् २१ आदित्यादिति पर्वसुपौर्णमासीषु सौरेषुपर्वसुदर्शेषुअर्केंद्वो रुपरितृतीयस्थानचारीराहुःअर्कस्यइंदोर्वाग्रहणकालेधोगत्वातदाच्छादनेचितंतमोमयंभूबिंबंगृहीत्वातेनतौमेघवदाच्छादयित्वातत्कालंप्रत्यक्षतामेति तथोक्तंमात्स्यकूर्मादिषु स्वर्भानोस्तुबृह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्स्थानंतृतीयंयत्तमोमयम् तुल्ययोगस्तुस्वर्भानुर्भूत्वाधस्तौप्रसर्पति उद्धृत्यपृथिवीच्छायांनिर्मितोमंडलाकृतिरिति २२ पलालंनिष्फलधान्यकांडंतद्वद्धूमवर्णाः लाक्षारसवदरुणकियद वयवाः पलालधूमवर्णाभालाक्षारसनिभाननाइतिब्रह्मपुराणदर्शनात् २३ २४ ग्रहर्क्षताराणांधिष्ण्यानिमंडलानि उचितचारेणस्वस्वोचितगत्या २५ ताराइतिज्योतिःसमूहोपलक्षणम् प्रवहवायुनाभ्रमंतस्तंध्रुवंभ्रामयंति २६ तैलपीडास्तैलिकाः स्वयंभ्रमंतोयथाचक्रंतैलयंत्रंभ्रामयंति वातविद्धानिप्रवहवातप्रेरितानि २७ निगमयतिअलातेति यस्माज्ज्योतींषिप्रकर्षेणव हतितेनहेतुनासवायुःप्रवहःस्मृतः सर्वज्योतिर्वहवायोःप्रवहव्युत्पत्त्यासप्तापिवायुस्कंधाःप्रवहस्यैवभेदाइतिप्रतीयते २८ प्रस्तुतंशिशुमारमुपासनार्थंविशेषतोवक्तुमाह शिशुमारइति २९ तद्दर्शनफलमाह यदद्वेतिसार्धेन तत्तस्मात्प्रमुच्यते ३० अभ्यधिकानिव्यवस्थितजीवितकालादधिकानितावंतिचतुर्दशवर्षाणिजीवंतिच संस्थानविशेषमाहउत्तानपादइतिसार्धैस्त्रिभिः

क्षारसनिभारुणाः २३ एतेमयाग्रहाणांवैतवाख्यातारथानव । सर्वेध्रुवेमहाभागप्रबद्धावायुरश्मिभिः २४ ग्रहर्क्षताराधिष्ण्यानिध्रुवेबद्धान्यशेष तः । भ्रमंत्युचितचारेणमैत्रेयानिलरश्मिभिः २५ यावंत्यश्चैवतारास्तास्तावंतोवातरश्मयः । सर्वेध्रुवनिबद्धास्तेभ्रमंतोभ्रामयंतितम् २६ तैलपीडा यथाचक्रंभ्रमंतोभ्रामयंतिवै । तथाभ्रमंतिज्योतींषिवातविद्धानिसर्वशः २७ अलातचक्रवद्यांतिवातचक्रेरितानितु । यस्माज्ज्योतींषिवहतिप्रवहस्ते नसंस्मृतः २८ शिशुमारस्तुयःप्रोक्तःसध्रुवोयत्रतिष्ठति । संनिवेशंचतस्यापिशृणुष्वमुनिसत्तम २९ यदद्वाकुरुतेपापंदृष्ट्वातंनिशिमुच्यते । या वंत्यश्चैवतारास्ताःशिशुमाराश्रितादिवि ३० तावंत्येवतुवर्षाणिजीवंत्यभ्यधिकानितु । उत्तानपादस्तस्याथविज्ञेयोत्युत्तरोहनुः ३१ यज्ञोधरश्चवि ज्ञेयोधर्मोमूर्धानमाश्रितः । हृदिनारायणश्चास्तेअश्विनौपूर्वपादयोः ३२ वरुणश्चार्यमाचैवपश्चिमेतस्यसक्थिनी। शिश्नःसंवत्सरस्तस्यमित्रोऽपानं समाश्रितः ३३ पुच्छेऽग्निश्चमहेंद्रश्चकश्यपोथतथाध्रुवः । तारकाशिशुमारस्यनास्तमेतिचतुष्टयम् ३४ इत्येषसन्निवेशोवःपृथिव्याज्योतिषांतथा । द्वीपानामुदधीनांचपर्वतानांचकीर्तितः ३५ वर्षाणांचनदीनांचयेचतेषुवसंतिवै । तेषांस्वरूपमाख्यातंसंक्षेपाच्छ्रूयतांपुनः ३६ यदंबुवैष्णवः कायस्ततोविप्रवसुंधरा । पद्माकारासमुद्भूतापर्वताब्ध्यादिसंयुता ३७ ज्योतींषिविष्णुर्भुवनानिविष्णुर्वनानिविष्णुर्गिरयोदिशश्च । नद्यःसमुद्रा

उत्तानपादादिषुतारारूपेषुतदवयवत्वंविधीयते उत्तानःदक्षिणइतियावत् हनुःकपोलावयवः ३१ अधरोनीचःवामइत्यर्थः ३२ सक्थिनीऊरू अपानंगुदम् ३३ तारकामयस्यशिशुमार स्यपुच्छेस्थितमग्न्यादिचतुष्टयंनास्तमेति अत्युन्नतपुच्छत्वादंतर्धानाभावान्नित्यंदृश्यते न्यस्तमेतदितिपाठेन्यस्तंनिहितमित्यर्थः ३४ उक्तस्यप्रपंचस्यविष्ण्वात्मतांवक्तुंतमुपसंहरति इत्येषइ तिअध्यायपरिसमाप्तेः ३५ नानारूपाणांपृथिव्यादीनांकार्याणांकारणभूतविष्ण्वेकरूपतोक्तिःसंक्षेपः ३६ यदंबुब्रह्मांडांतस्थगर्भोदकरूपंजलंतद्विष्णोर्विराजःकायोमूर्तिः ततःपद्माकारा मेरुकर्णिकासमवर्तुलापातालद्वीपवर्षादिदलापृथिवीसमुद्भूतानततःपृथग्भूताइत्यर्थः ३७ तथाज्योतिरादयोपिततएवजातास्तदभिन्नाएवेत्याह ज्योतींषीति यदस्तिनास्तिवर्तमानंतद्विपरीतम तीतमनागतंच यद्वाभावस्वरूपमभावस्वरूपंचप्रतीयमानंतत्सर्वंसएव ३८ ननुअखंडस्यविष्णोर्विरुद्धानेकरूपत्वंकथमित्याशंक्यनानात्वस्यकाल्पनिकत्वमाह ज्ञानेति ज्ञानमेवस्वरूपंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वंयस्यसएवासौभगवान्यतःअतोऽशेषमूर्तिर्ज्ञेयप्रपंचमूर्तिर्वस्तुभूतोनपरमार्थगत्याज्ञेयप्रपंचस्वरूपोनभवतीत्यर्थःकथंतर्हिज्योतींषिविष्णुरित्युक्तंतत्राह ततोहीतिहियस्माज्ज्ञानस्वभावस्तस्मा
त्तद्विज्ञानाधिष्ठानेविजृंभितानिकल्पितानिजानीहि लिंगव्यत्ययश्छांदसः३९ बाधाभावात्प्रपंचस्यकथंकल्पितत्वंतत्राह यदाप्रतिबंधककर्मक्षयेसर्वंसर्वत्वेनप्रतीयमानंनिजरूपिनिजंसच्चिदानं
दात्मकंरूपंयस्यास्तितत्रानिरस्ताअसंभावनादयोदोषायस्यतथाभूतंज्ञानंस्फुरतितदासंकल्पतरोराविद्याध्यासरूपस्यफलानिवस्तुषुवस्तुभेदाः कार्यकारणप्रवाहानभवंतिविलीयंतइत्यर्थः य
त्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येत्केनकंजिघ्रेदितिश्रुतेः४० आदावंतेचयन्नास्तिवर्तमानेपितत्तथेतिन्यायेनाप्यात्मव्यतिरिक्तस्यावस्तुत्वमाह वस्त्विति क्वचिद्देशेकालेचजन्माद्यवस्थाहीनं
सदैकरूपंवस्तुकिमस्तिअपितुनास्त्येवप्रत्युतान्यथात्वंअभूत्वाचभावित्वंयाति तथाचदृश्यंनवस्तुजन्मादिसत्त्वात् शुक्तिरजतवदित्यर्थः यद्वाअन्यथात्वंमृदादीनांघटादिरूपत्वं तद्घटा
दितथानमिथ्येत्यर्थः ४१ अन्यथात्वमेवोदाहरन्मिथ्यात्वंद्रढयति महीति महीघटत्वंप्राप्ताआलक्ष्यतेघटभावानंतरंकपालिकालक्ष्यतेततोनंतरंचूर्णरजःस्वरूपिणीततश्चाणुरतिसूक्ष्मरूपा

अंश २

श्चसएवसर्वोयदस्तियन्नास्तिचविप्रवर्य ३८ ज्ञानस्वरूपोभगवान्यतोसावशेषमूर्तिर्नतुवस्तुभूतः । ततोहिशैलाब्धिधरादिभेदाञ्जानीहिविज्ञान
विजृंभितानि ३९ यदातुशुद्धंनिजरूपिसर्वंकर्मक्षयेज्ञानमपास्तदोषम् । तदाहिसंकल्पतरोःफलानिभवंतिनोवस्तुषुवस्तुभेदाः ४० वस्त्वस्ति
किंकुत्रचिदादिमध्यपर्यंतहीनंसततैकरूपम् । यच्चान्यथात्वंद्विजयातिभूयोनतत्तथातत्रकुतोहितत्त्वम् ४१ महीघटत्वंघटतःकपालिकाकपालिकाचूर्णर
जस्ततोणुः । जनैःस्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यतेब्रूहिकिमत्रवस्तु ४२ तस्मान्नविज्ञानमृतेऽस्तिकिंचित्क्वचित्कदाचिद्द्विजवस्तुजातम् । वि
ज्ञानमेकंनिजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतम् ४३ ज्ञानंचशुद्धंविमलोविशोकोनिःशेषशब्दादिनिरस्तसंगः । एकंसदैकःपरमंपरेशःसवासुदेवो
नयतोऽन्यदस्ति ४४ सद्भावएषोभवतोमयोक्तोज्ञानंयथासत्यमसत्यमन्यत् । एतत्तुयत्संव्यवहारभूतंतत्रापिचोक्तंभुवनाश्रितंते ४५ यज्ञःप

लक्ष्यतेजनैः स्वकर्मणाप्रतिबंधकेनस्तिमितस्तत्त्वग्राहकआत्मनिश्चयोबुद्धिर्येषांते अत्रघटादिरूपेषुकार्येषुवस्तुकिमालक्ष्यतेतद्ब्रूहिनकिंचिदित्यर्थः सदेवसौम्येदमग्रआसीद्वाचारंभणंविका
रोनामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतेः ४२ तस्मान्मिथ्याभूतमेवप्रपंचज्ञानंज्ञानोपाधिकसत्ताकमतोविज्ञानमेवसद्रूपंप्रतिबंधवशाद्बहुधाभातीत्युपसंहरति तस्मादिति निजानांकर्मणां
भेदेनविभिन्नंचित्तंयेषांतैर्विज्ञानमेकमेववहुधाशत्रुमित्रादिरूपेणाभ्युपेतमंगीकृतम् विज्ञानव्यतिरेकेणद्वितीयंनास्तीत्यर्थः ४३ ननुविज्ञानंविशिष्टज्ञानंवृत्तिरूपंतच्चक्षणिकंतत्कथंस्थायिविषय
रूपेणभातिविरोधादित्याशंक्याह ज्ञानमिति ज्ञानंवृत्तिज्ञानविलक्षणंशुद्धंविषयोपरागहीनंविज्ञानंयदत्राभिहितंसवासुदेवः वसत्यस्मिन्विश्वमितिवासुदेवः स्वप्रकाशश्चेतिवासुदेवःसर्वाधि
ष्ठानमित्यर्थः यतोवासुदेवादन्यन्नास्ति ज्ञानवासुदेवयोस्तुल्यात्मकाविशेषणानिअत्यंताभेदप्रतिपादनार्थानि ४४ ननुअन्यन्नास्तिचेत्भुवनकोशादिनिरूपणंकिमितिकृतमित्याशंक्यतस्य
व्यावहारिकत्वमात्रंनवास्तवत्वमित्याह सद्भावएषोभवइतिसुलोपाभावच्छांदसःज्ञानंवासुदेवइतियत्एषसद्भावःपरमार्थः यत्त्वेतत्प्रत्यक्षादिसिद्धंतत्संव्यवहारेसंव्यवहारनिमित्तभूतं सत्यंत
त्त्वज्ञानात्प्रागबाध्यमानरूपम् व्यावहारिकंसत्यमित्यर्थः तत्रापितत्रैवतेतुभ्यंभुवनाश्रितंवैदिकलौकिककारणकार्याश्रितमुक्तम् ४५ तत्रलौकिकमुक्तप्रायंवैदिकमाह यज्ञःपशुरित्यादिकर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रितमार्गैकर्मकांडैर्दृष्टंकारणंअदृष्टद्वाराभूरादितद्भोगश्चकार्यमितिएतत्सर्वंव्यावहारिकसत्यत्वमाश्रित्यैवोक्तमित्यर्थः ४६ भवत्वेतत्तथापितत्कीर्तनंकिमर्थमित्याशंक्यवैराग्यद्वारावासुदेवभ
जनेनतत्प्राप्त्यर्थमित्याह यच्चेति कर्मवशोजीवःसर्वत्रयोनौव्रजतीतिश्रुत्वायेनभक्त्यादिनालभ्यतत्त्वाज्ञानेनध्रुवंनित्यंअचलंपरिपूर्णमतःसदैकरूपंवासुदेवंविशतितत्कुर्यादित्यर्थः ४७ इति
श्रीविष्णुपुराणेद्वितीयेंशेद्वादशोध्यायः १२ त्रयोदशेथचरितंभरतस्यजडाकृतेः कथितंयत्रविज्ञानंकरामलकवत्कृतं साष्टावरणकंविश्वंजलबुद्बुदवत्स्थितम् ज्ञानाब्धौयत्रतज्ज्ञानंवासुदे
वंबुभुत्सति ॥ येनवासुदेवंप्रविशतितत्कुर्यादित्यत्रोक्तमुपायंबुभुत्सुः प्रथमांशोपक्षिप्तवासुदेवप्रविष्टस्यभरतस्यचरितमुक्तानुवादकपूर्वकंपृच्छति भगवानितिषड्भिः १ प्रधानतःप्रधानम्

शुर्वाह्निरशेषऋत्विक्संवत्सराःस्वर्गमयश्चकामः । इत्यादिकर्माश्रितमार्गदृष्टंभूरादिभोगश्चफलानितेषाम् ४६ यच्चैतद्ध्रुवनगतंमयातवोक्तंसर्वत्र
व्रजतिहिकर्मवश्यएकः । श्रुत्वैतद्ध्रुवमचलंसदैकरूपंतत्कुर्याद्विशतिहियेनवासुदेवम् ४७ । इतिश्रीविष्णुपुराणेद्वितीयेंशेद्वादशोध्यायः १२
मैत्रेयउवाच । । भगवन्सम्यगाख्यातंयत्पृष्टोऽसिमयाखिलम् । भूसमुद्रादिसरितांसंस्थानंग्रहसंस्थितिः १ विष्ण्वाधारंयथाचैतत्त्रैलोक्यं
समवस्थितम् । परमार्थश्चतेप्रोक्तोयथाज्ञानंप्रधानतः २ यत्त्वेतद्भगवानाहभरतस्यमहीपतेः । कथयिष्यामिचरितंतन्ममाख्यातुमर्हसि ३ भरतः
समहीपालःशालग्रामेऽवसत्किल । योगयुक्तःसमाधायवासुदेवेसदामनः ४ पुण्यदेशप्रभावेणध्यायतश्चसदाहरिम् । कथंतुनाभवन्मुक्तिर्यदभूत्स
द्विजःपुनः ५ विप्रत्वेचकृतंतेनयद्भूयःसुमहात्मना । भरतेनमुनिश्रेष्ठतत्सर्वंवक्तुमर्हसि६। । पराशरउवाच । । शालग्रामेमहाभागाभगवन्यस्तमा
नसः । उवाससुचिरंकालंमैत्रेयपृथिवीपतिः ७ अहिंसादिष्वशेषेषुगणेषुगुणिनांवरः । अवापपरमांकाष्ठांमनसश्चापिसंयमे ८ यज्ञेशाच्युतगो
विंदमाधवानंतकेशव । कृष्णविष्णोहृषीकेशेत्याहराजासकेवलम् ९ नान्यज्जगादमैत्रेयकिंचित्स्वप्नांतरेष्वपि । एतत्परंतदर्थंचविनानान्यदचिंतय
त् १० समित्पुष्पकुशादानंचक्रेदेवक्रियाकृते । नान्यानिचक्रेकर्माणिनिःसंगोयोगतापसः ११ जगामसोऽभिषेकार्थमेकदातुमहानदीम् । सस्नौतत्र
तदाचक्रेस्नानस्यानंतरक्रियाः १२ अथाजगामतत्तीर्थजलंपातुंपिपासिता । आसन्नप्रसवाब्रह्मन्नेकैवहरिणीवनात् १३ ततःसमभवत्तत्रपीतप्रायेजले

आद्यादिभ्यश्चेतिप्रथमार्थेतसिः प्रधानंविषयोपरागहीनंज्ञानंपरमार्थोयथातथाख्यातमित्यन्वयः २ भरतस्यचरितंकथयिष्यामीतियत्प्रतिज्ञातंतन्ममकथयतावतैववासुदेवस्यसर्वात्मत्वसंभाव
नादिनिवृत्तिर्भविष्यतीतिभावः ३ ४ कथंकिंप्रकारेणविघ्नेनमुक्तिर्नाभवदित्यपिवक्तुमर्हसीतिपरेणान्वयःज्ञात्वातंविघ्नंपरिहरिष्यामीतिभावः ५ तमेवविघ्नंवक्तुंतद्योगचर्यामाह शालग्रामइ
तिपंचभिः भगवतिन्यस्तंमानसंयेनसः ६ अहिंसादिषुयमनियमेषु तत्साध्येमनसःसंयमेनिरोधेपरांकाष्ठामुत्कर्षमवाप ८ अन्यदातुयज्ञेशेत्यादीनिनामान्येवाहनान्यत् ९ मनसाचैतन्ना
मतदर्थचनामार्थपरंतात्पर्यविषयीभूतंशुद्धमचिंतयन्नान्यत् १० देवक्रियाकृतेपूजार्थंसमित्कुशादीनामादानमुपादानंग्रहणंचक्रेनान्यत् वाङ्मनःकायचेष्टांतदर्थामेवाकरोदित्यर्थः योगयुक्त
स्तापसः ११ तज्जन्मनितस्ययोगविघ्नंवक्तुंहरिणसंगंप्रस्तौति जगामेत्यादिनानिष्ठुरंतंययावित्यंतेन १२ १३ पीतप्रायेजलेअपर्याप्तपानेसतीत्यर्थः १४ आप्लुताउत्पतिता १५ जलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेगेनोह्यमानंनीयमानम् १६ १७ १८ १९ २० उटजाजिरेपर्णशालांगणे २१ एवंपुष्यमाणेतस्यतस्मिन्बंधहेतुंस्नेहातिशयंप्रपंचयति तस्यतस्मिन्नित्यादिना अन्यतःसाधनानुष्ठाने अच्युतेइतिवापाठः २२ २३ २४ खुराग्रक्षत्याखर्परराकारामध्येनिमग्नेत्यर्थः क्षतकर्बुरेतिपाठेखुराग्रक्षतैः कर्बुराकृष्णवर्णा कोकिलाकायसदृशःकर्बुरःसद्भिरुच्यतइतिदर्शनात् ना

तया । सिंहस्यनादःसुमहान्सर्वप्राणिभयंकरः १४ ततःसासहसात्रासादाप्लुतानिम्नगातटम् । अत्युच्चरोहणेनास्यानद्यांगर्भःपपातसः १५ तमुह्यमानंवेगेनवीचिमालापरिप्लुतम् । जग्राहसनृपोगर्भात्पतितंमृगपोतकम् १६ गर्भप्रच्युतिदुःखेनप्रोत्तुंगक्रमणेनच । मैत्रेयसापिहरिणीपपात चममारच १७ हरिणींतांविलोक्याथविपन्नांनृपतापसः । मृगपोतंसमादायपुनराश्रममागतः १८ चकरानुदिनंचासौमृगपोतस्यवैनृपः । पोषणंपुष्यमाणश्चसतेनववृधेमुने १९ चचाराश्रमपर्यंतेतृणानिगहनेषुसः । दूरंगत्वाचशार्दूलत्रासादभ्याययौपुनः २० प्रातर्गत्वातिदूरंचसायमायात्तथाश्रमम् । पुनश्चभरतस्याभूदाश्रमस्योटजाजिरे २१ तस्यतस्मिन्मृगेदूरसमीपपरिवर्तिनि । आसीच्चेतःसमासक्तंनययावन्यतोद्विज २२ विमुक्तराज्यतनयःप्रोज्झिताशेषबांधवः । ममत्वंसचकारोच्चैस्तस्मिन्हरिणपोतके २३ किंवृकैर्भक्षितोव्याघ्रैःकिंसिंहेननिपातितः । चिरायमाणेनिष्क्रांतेतस्यासीदितिमानसम् २४ एषावसुमतीतस्यखुराग्रक्षतिखर्परा । प्रीतयेममयातोऽसौक्रममैणकबालकः २५ विषाणाग्रेणमद्बाहुकंडूयनपरोहिसः । क्षेणेनाभ्यागतोऽरण्यादपिमांसुखयिष्यति २६ एतेलूनशिखास्तस्यदशनैरचिरोद्गतैः । कुशकाशाविराजंतेबटवःसामगा इव २७ इत्थंचिरगतेतस्मिन्सचक्रेमानसंमुनिः । प्रीतिप्रसन्नवदनःपार्श्वस्थेचाभवन्मृगे २८ समाधिभंगस्तस्यासीत्तन्मयत्वाद्दृतात्मनः । संत्यक्तराज्यभोगर्द्धिस्वजनस्यापिभूपतेः २९ चपलेचपलंतस्मिन्दूरगंदूरगामिनि । मृगपोतेऽभवच्चित्तंस्थैर्यंवत्तस्यभूपतेः ३० कालेनगच्छतासोऽथकालंचक्रेमहीपतिः । पितेवसास्त्रंपुत्रेणमृगपोतेनवीक्षितः ३१ मृगमेवतदाद्राक्षीत्त्यजन्प्राणानसावपि । तन्मयत्वेनमैत्रेयनान्यत्किंचिदचिंतयत् ३२ ततश्चतत्कालकृतांभावनांप्राप्यतादृशीम् । जंबूमार्गेमहारण्येजज्ञेजातिस्मरोमृगः ३३ जातिस्मरत्वादुद्विग्नःसंसारस्यद्विजोत्तम । विहायमातरंसोऽथशालग्राममुपाययौ ३४ शुष्कैस्तृणैस्तथापर्णैःसकुर्वन्नात्मपोषणम् । मृगत्वहेतुभूतस्यकर्मणोनिष्कृतिंययौ ३५ तत्रचोत्सृष्टदेहोऽसौजज्ञे

नावर्णेतिवाममप्रीतयेममैणबालकइतिवाक्यभेदादपौनरुक्त्यम् २५ २६ २७ २८ कृपयातन्मयत्वेतदाकारत्वेआदृतःसादरआत्माचित्तंयस्यतस्यहरौसमाधिभंगआसीत् मृगचिंतयैव समाधिभंगआसीन्नराज्यादिचिंतयेत्याह संत्यक्तेति २९ स्थैर्यवतितस्मिंस्थैर्यवदभवदित्यर्थः स्थैर्यवत्सदातदेकाकारंवा ३० कालंचक्रेमृत्युप्रायंकृतवान् ३१ तन्मयत्वेनतदाकारचित्तत्वेन ३२ तत्कालकृतांभावनांमृत्युकालेकृतांमृगचिंताम् जंबुमार्गेकालंजरगिरिप्रदेशेकालंजरात्प्रत्याजगामेतिशुकोक्तेः तीव्रयोगप्रभावाज्जातिस्मरोजातः ३३ ३४ ३५ इदानींमृगत्वहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुकर्मक्षयेतस्यब्राह्मणरूपचरमदेहप्राप्तिंजडचरितंचाह तत्रचेत्यादिनाबभूवाहारवेतनइत्यंतेन ३६ ३७ अधिगतज्ञानःप्राप्तात्मविज्ञानोदेवादीनिसर्वभूतानिआत्मनःसकाशादभेदेनददर्शेत्य न्वयः ऋषभदेवोपदिष्टस्यैवज्ञानस्यप्रतिबंधापगमेसतिआविर्भूतत्वात् ३८ कर्माणिनचददर्शतदनुगुणानिशास्त्राणिचनजगृहे अविद्वदधिकारत्वाच्छास्त्रादीनामितिभावः ३९ जडंसम्यगु च्चारणरहितम् तदप्यसंस्कारगुणंसंस्कारःसाधुत्वापादकोव्याकरणोक्तःगुणमप्रियहितत्वादिस्तद्रहितम् ग्राम्यमश्लीलभाषोक्तिर्लोकोक्तिस्तद्युक्तंयथास्यादेवमभाषत ४० अपध्वस्तवपुःमलिनदे हः छिन्नानिलालायुक्तानिदंतानामंतराणिरंध्राणियस्य ४१ संमाननामित्यादिहिरण्यगर्भोक्तयोगम् ४२ शास्त्रस्थमित्थंश्लोकद्वयंविचिंत्यात्मानंजडोन्मत्ताकृतिंलोकेदर्शयामासेतित्रयाणामन्व

जातिस्मरोद्विजः । सदाचारवतांशुद्धेयोगिनांप्रवरेकुले ३६ सर्वविज्ञानसंपन्नःसर्वशास्त्रार्थतत्त्ववित् । अपश्यत्सचमैत्रेयआत्मानंप्रकृतेःपरम् ३७ आत्मनोधिगतज्ञानोदेवादीनिमहामुने । सर्वभूतान्यभेदेनददर्शसमहामतिः ३८नयपाठगुरुप्रोक्तांकृतोपनयनःश्रुतिम् । नददर्शचकर्माणिशास्त्राणिज गृहेनच ३९ उक्तोपिबहुशःकिंचिज्जडंवाक्यमभाषत । तदप्यसंस्कारगुणंग्राम्यभाषोक्तिसंयुतम् ४० अपध्वस्तवपुःसोऽथमलिनांबरधृग्द्विजः । छि न्नदंतांतरःसर्वैःपरिभूतःसनागरैः ४१ संमाननापरांहानिंयोगर्द्धेःकुरुतेयतः । जनेनावमतोयोगीयोगसिद्धिंचविंदति ४२ हिरण्यगर्भवचनंविचिंत्ये त्थंमहामतिः । आत्मानंदर्शयामासजडोन्मत्ताकृतिंजने ४३ तस्माच्चरेतवैयोगीसतांधर्ममदूषयन् । जनायथावमन्येरन्गच्छेयुर्नैवसंगतिम् ४४ भुंक्तेकुल्माषवाट्यादिशाकंवन्यफलंकणान् । यद्यदाप्नोतिसुबहुतदंतेकालसंयमम् ४५ पितर्युपरतेसोऽथभ्रातृभ्रातृव्यबांधवैः । कारितःक्षेत्रकर्मा दिकदन्नाहारपोषितः ४६ सरुक्षःपीनावयवोजडकारीचकर्मणि । सर्वलोकोपकरणंबभूवाहारवेतनः ४७ तंतादृशमसंस्कारंविप्राकृतिविचेष्टितम् क्षत्तासौवीरराजस्यविष्टियोग्यममन्यत ४८ सराजाशिबिकारूढोगंतुंकृतमतिर्द्विज । बभूवेक्षुमतीतीरेकपिलर्षेर्वराश्रमम् ४९ श्रेयःकिमत्रसंसारे दुःखप्रायेनृणामिति । प्रष्टुंतंमोक्षधर्मज्ञंकपिलाख्यंमहामुनिम् ५० उवाहशिबिकांतस्यमुहुर्वचनचोदितः । नृणांविष्टिगृहीतानोमन्यषांसोऽपिम ध्यगः ५१ गृहीतोविष्टिनाविप्रःसर्वज्ञानैकभाजनः । जातिस्मरोऽसौपापस्यक्षयकामउवाहताम् ५२ ययौजडगतिःसोऽथयुगमात्रावलोकनम् ।

यः ४३ सतांधर्ममदूषयन्अवमानोपिनिषिद्धमकुर्वन् ४४ कुल्माषोयावकः स्याद्यावकस्तुकुल्माषइत्यमरकोशदर्शनात् वाट्योमाषविकारविशेषःतदादि कणान्तंडुलावयवान्यद्यदाप्नोत्यानि षिद्धंतदपिसुबहुयथेष्टंअंतेकालसंयमंकालक्षपणमात्रंयथास्यात् अकालसंयममितिच्छेदेकालनियमंविनेत्यर्थः ४५ भ्रातृव्याभ्रातृपुत्राः ४६ जडवद्विवेकहीनवत्करोतीतिजडकारीकर्मणि विषयेसर्वलोकस्योपकरणवत्सहायः आहारएववेतनंयस्यसः ४७ इदानींतस्यात्मवित्त्वंवक्तुमाख्यानंवदति तादृशमित्यादिनायावदंशसमाप्ति क्षत्ताद्वारथःसारथिर्वा विष्टिर्निर्वर्तनंकर्मात्रयो ग्यंशिविकावाहाकृतित्वादमन्यत तत्रहेतुः विप्रवदाकृतिर्विचेष्टितंचयस्यतं स्मर्यतेहि सायंप्रातर्यदासंध्यांयेविप्रानोउपासते तान्सर्वान्धार्मिकोराजाविष्टिकर्माणिकारयेदिति ४८ विष्टिप्रयोज नमाह सराजेतिद्वाभ्याम् शिविकानरवाह्यंयानम् ४९५०५१५२ युगमात्रस्यहस्तचतुष्टयस्यवर्त्मनःअवलोकनंकुर्वञ्जडगतिर्मंदगतिर्ययौ ५३ किमेतद्विषमंसमंयथास्यात्तथागम्यतामितिनृप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिराहेत्यन्वयः ५४ ५५ शिबिकोद्वाहकास्तुअयमसत्वरंमंदंयातीतिप्रोचुः ५६ किंश्रांतोसिकिंतुनैवयतस्त्वयाल्पमध्वानंशिबिकोढाआनीता किंवाआयाससहोनत्वमसिअपिवासियतः पीवान्स्थूलोबलवान्निरीक्ष्यसे नलोपाभावश्छांदसः ५७ ब्राह्मणःपूर्वोक्तस्यगूढाभिसंधेरभावमाह नाहमिति ५८ राजाव्यवहारविरोधंसमुद्भावयन्नाह प्रत्यक्षंदृश्यसइति प्रत्यक्षसिद्धार्थक्रियाकारित्वेनचनिषेधानुपपत्तिरित्यर्थः ५९ ब्राह्मणस्तुलौकिकप्रतीतेर्मिथ्यात्वाऽभिप्रायेणाह हेभूपममस्वरूपंभवतार्किंदृष्टंतद्वदपश्चान्ममविशेषणंबलवत्वादिवाच्यम् ६० ननूक्तमेवशिबिकाधारोदेहस्वरूपस्त्वमित्याशंक्योद्धरति त्वयेतित्रिभिःएतद्वचनम् ६१ आस्थास्थितिः तौऊरूआधारोयस्यतथाभूतमुदरमिति तथाचस्कंधादीनांभूम्यंतानामेवोत्तरोत्तरस्याधारत्वात् पादाद्यवयवव्यतिरेकेणचदेहानिरूपणात् कथंप्रत्यक्षत्वंभारोवार्किंनिमित्तःस्यादित्यर्थः ६२ ६३ यश्चवाह्यवाहकभावस्त्वयोढाशिबिकाममेत्युक्तःसचमिथ्येत्याह शिबिकायामित्यादि

कुर्वन्मतिमतांश्रेष्ठस्तदन्येत्वरितंययुः ५३ विलोक्यनृपतिःसोऽथाविषमांशिबिकागतिम् । किमेतदित्याहसमंगम्यतांशिबिकावहाः ५४ पुनस्तथैवशिबिकांविलोक्याविषमांहसन् । नृपःकिमेतदित्याहभवद्भिर्गम्यतेऽन्यथा ५५ भूपतेर्वदतस्तस्यश्रुत्वेवंबहुशोवचः । शिबिकोद्वाहकाःप्रोचुरयंयातीत्यसत्वरम् ५६ । । राजोवाच । । किंश्रांतोस्वल्पमध्वानंत्वयोढाशिबिकामम । किमायाससहोनित्यंपीवानसिनिरीक्ष्यसे ५७ । । ब्राह्मणउवाच । । नाहंपीवानचैवोढाशिबिकाभवतोमया।नश्रांतोस्मिनचायासोवोढव्योऽसिमहीपते५८ । । राजोवाच । । प्रत्यक्षंदृश्यसेपीवानद्यापिशिबिकात्वयि । श्रमश्चभारोद्वहनेभवत्येवहिदेहिनाम् । ब्राह्मणउवाच । प्रत्यक्षंभवताभूपयद्दृष्टंममतद्वद । बलवानबलश्चेतिवाच्यंपश्चाद्विशेषणम् ६० त्वयोढाशिबिकाचेतित्वय्यद्यापिचसंस्थिता।मिथ्यैतदप्यत्रभवाञ्शृणोतुवचनंमम ६१ भूमौपादद्वयस्यास्थाजंघेपादद्वयेस्थिते। ऊरुजंघाद्वयावस्थौतदाधारंतथोदरम् ६२ वक्षस्थलंतथाबाहूस्कंधौचोदरसंस्थितौ।स्कंधाश्रितेयंशिबिकाममभारोऽत्रकिंकृतः ६३ शिबिकायांस्थितश्चायंदेहस्त्वदुपलक्षितः । तत्रत्वमहमप्यत्रप्रोच्यतेचेदमन्यथा ६४ अहंत्वंचतथात्वेचभूतैरुह्यामपार्थिव । गुणप्रवाहपतितोभूतवर्गोऽपियात्ययम् ६५ कर्मवश्यागुणाश्चैतेसबाह्याःपृथिवीपते । अविद्यासंचितंकर्मतच्चाशेषेषुजंतुषु ६६ आत्माशुद्धोऽक्षरःशांतोनिर्गुणःप्रकृतेःपरः । प्रवृद्ध्यपचयौनास्यएक

त्वदुपलक्षितस्त्वयातद्व्यतिरिक्तेनोपलक्षितः सौवीरराजोऽहमित्यात्मत्वेनगृह्यमाणोदेहएवशिबिकायांस्थितोनत्वमतस्त्वंशिबिकायामहमप्यत्रभूमाविति अन्यथामिथ्यैवप्रोच्यते ६४ नन्वात्मत्वेनाभिमतयोर्देहयोरेववाह्यवाहकभावोऽस्त्वित्याशंक्यभोक्तृकर्मवशगानांगुणभूतभौतिकानांवत्सार्थदुग्धप्रवृत्तिवद्वहनादिक्रियासंभवात्तत्रौदास्यमेवात्मनइत्याह अहंत्वमन्येचेतिवयंआत्मत्वेनाभिमतादेहाभूतैरुह्यामप्राप्यामहे भूतप्रवृत्त्यधीनत्वाद्भौतिकदेहप्रवृत्तेरित्यर्थः भूतप्रवृत्तौहेतुमाह गुणप्रवाहाः प्रवर्तमानागुणास्तेषुपतितस्तत्रस्थोयाति गुणागुणेषुवर्तंतइतिगीतोक्तेः ६५ तत्रापिहेतुः कर्मवश्याइति कर्मापिअविद्यासंचितंअविद्वत्सुजंतुषुजीवेष्वस्ति ६६ नत्वात्मनएवकर्मवशाद्गुणभौतिकादिभावेनपरिणतस्यवहनक्रियापीनत्वादयोधर्माश्चकिंनस्युरितितत्राह आत्मेति शुद्धःकर्मादिहीनः तत्रहेतुः शांतःरागादिरहितः तत्कुतः निर्गुणः तच्चकुतः प्रकृतेःपरः अतएवप्रवृद्ध्यपचयौनास्य किंचाक्षरोविक्रियाहीनः सर्वजंतुषुएकःवाहकादिभेदशून्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६७ प्रकृतमुपसंहरति यदोपचयापचयौनस्तस्तदापीवानसीतिभाषणंनिर्युक्तिकमित्यर्थः ६८ मद्व्यतिरिक्तेस्कंधेभारोनममेत्युक्तमिदानीमन्याश्रितोभारोयदिमेस्यात्तदाभवदादीनामपिकिंन स्यात्सर्वेषामपिवासर्वोभारःस्यादित्याहभूपादेतिद्वाभ्याम् भूपादादिषुस्थितेयंशिबिकायदिममभारःस्यात्तदासभारस्त्वयाचान्यैश्चसमःस्यात् ६९ नकेवलंसभारःशैलादिभवोऽस्माकंसर्वेषां समःस्यान्नचैवम् तथाचप्राकृतैःकरणैःप्रकृतिकार्यैःसहपुंसःपृथग्भावाद्भारःकतमोमयावोढव्योऽस्तिअपितुनकश्चिदित्यर्थः ८० किंचयैर्द्रव्यैःशिबिकाआरब्धातैरेवसर्वोपिभूतग्रामआरब्धः तथाचसमानप्रकृतिकेषुदेहशिबिकादिषुक्वचिदेवाहंममभावोनसर्वत्रेतिअयुक्तिकमित्याहयद्द्रव्येति ममत्वेनोपबृंहितःसंवर्धितःकथमित्याक्षेपः ७१ जाल्मरूपधरःजडरूपधरः ७२ कोभ वानित्येतद्विशृण्वन्नाह योभवान्यज्जातीयःभवदागमनेयन्निमित्तंप्रयोजनंयच्चकारणंहेतुःतत्सर्वंकथ्यताम् ७३ कोभवानित्यस्योत्तरंवक्तुमशक्यमित्याह श्रूयतामिति अहमोवाच्यार्थःकइ

स्याखिलजंतुषु ६७ यदानोपचयस्तस्यनचैवापचयोनृप । तदापीवानसीतीत्थंकयायुक्त्यात्वयेरितम् ६८ भूपादजंघाकट्यूरुजठरादिषुसंस्थिते । शिबिकेयंयदास्कंधेतदाभारःसमस्त्वया ६९ तथान्यजंतुभिस्तुल्यःशिबिकोत्थोनकेवलम् । शैलद्रुमगृहोत्थोपिपृथिवीसंभवोपिवा ७० यदापुंसः पृथग्भावःप्राकृतैःकरणैर्नृप । वोढव्यःसुमहाभारःकतमोनृपतेमया ७१ यद्द्रव्यशिबिकाचेयंतद्द्रव्योभूतसंग्रहः । भवतोमेखिलस्यास्यममत्वेनोपबृं हितः ७२ । । पराशरउवाच । । एवमुक्त्वाभवन्मौनीसवहञ्शिबिकांद्विज । सोऽपिराजावतीर्योर्व्यांतत्पादौजगृहेत्वरन् ७३ भोभोविसृज्यशि बिकांप्रसादंकुरुमेद्विज । कथ्यतांकोभवानत्रजाल्मरूपधरःस्थितः ७४ योभवान्यन्निमित्तंवायदागमनकारणम् । तत्सर्वंकथ्यतांब्रह्मन्मह्यंशुश्रूषवेत्व या ७५ । । ब्राह्मणउवाच । । श्रूयतांकोऽहमित्येवंवक्तुंभूपनशक्यते । उपभोगनिमित्तंचसर्वत्रागमनक्रिया ७६ सुखदुःखोपभोगौतुतौदेशाद्युपपा दकौ । धर्माधर्मोद्भवोभोक्तुंजंतुर्देहादिमृच्छति ७७ सर्वस्यैवहिभूपालजंतोःसर्वत्रकारणम् । धर्माधर्मौयतस्तस्मात्कारणंपृच्छ्यतेकुतः ७८ । । रा जोवाच । । धर्माधर्मौनसंदेहःसर्वकार्येषुकारणम् । उपभोगनिमित्तंचदेहदेशांतरागमः ७९ यत्त्वेतद्भवताप्रोक्तंकोऽहमित्येतदात्मनः । वक्तुंनशक्य तेश्रोतुंतन्ममेच्छाप्रवर्तते ८० योऽस्तिसोऽहमितिब्रह्मन्कथंवक्तुंनशक्यते । आत्मन्येषनदोषायशब्दोऽहमितियोद्विज ८१ । ब्राह्मणउवाच । श

तिवक्तुंनशक्यइत्यर्थःकिंनिमित्तमित्यस्योत्तरमाह उगभोगेति उपभोगेनप्रयोजनेनागमनक्रियाइत्यर्थः ७४ ७५ ७६ एतदेवस्पष्टयति सुखदुःखेति देशकालादिरुपपादकोययोस्तौ त योर्हेत्वंतरमाह धर्माधर्मेति भोक्तुंकर्तुमृच्छतिगच्छति ७७ यदागमनकारणमितिप्रश्नोत्तरमाह सर्वस्येति हियस्मात्सर्वजंतोःसर्वत्रभोगतत्साधनादौधर्माधर्मावेवकारणंतस्माद्विशिष्यसमाग मकारणंकुतः कस्मात्पृच्छ्यतइत्यर्थः ७८ राजातुद्वितीयतृतीयप्रश्नोत्तरमंगीकृत्यप्रथमप्रश्नोत्तरेसंदिहानःपृच्छति धर्माधर्माविति त्रिभिः ७९ कोऽहमित्यहंशब्दवाच्यत्वमात्मनोवक्तुंनशक्य तइतियदेतद्भवताप्रोक्तंतत्कथंवक्तुंनशक्यतइतिश्रोतुंममेच्छाप्रवर्ततइत्यन्वयः ८० संदेहकारणमाह यआत्मास्वानुभवसिद्धोऽस्तितवाहमितिवाच्यतयाकथंवक्तुंनशक्यतेआत्मनिवाच्येह मितिशब्दोनदोषाय किंचाहंकारेगर्वेप्रतिपाद्येअपार्थत्वेवादोषइत्यर्थः ८१ ब्राह्मणस्तुअहंशब्दस्यात्मवाचकत्वासंभवादशक्यत्वंतत्रवक्तुमित्याह शब्दोऽहमित्यादिना आत्मन्यहमितिश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्दोदोषायनभवतीतियदुक्तंतत्तथैव किंत्वहंशब्दःस्वप्रयोक्तरिवर्तते प्रयोक्ताचानात्मा अतोनात्मन्यात्मज्ञानंभ्रमएव शब्दश्चभ्रांतिलक्षणोभ्रांतिमूलकः वाशब्दश्चार्थे ८२ उक्तमर्थमुपपादय तिजिह्वेति एतेजिह्वादयोनाहंशब्दवाच्याः जिह्वाहमित्यादिप्रयोगाभावाद्वाङ्निष्पादनेहेतवःकारणानितस्माच्च ८३ ननुवाचमेवाहंशब्दवाच्यांब्रवीमिजिह्वादयःकरणानीतिचेत्तत्राह किं हेतुभिर्जिह्वादिभिर्वागेवस्वयमहमितिवदतितथापिवाङ्नाहमितिप्रयोगदर्शनादेतद्वागिंद्रियमित्थमहमितिवक्तुंनयुज्यतेइत्यन्वयः ८४ नतुकेवलावागेवाहमितिकिंतुवागादिविशिष्टःकायइ तितत्राह पिंडःपुंसःपृथग्दृश्यत्वाद्घटवच्छिरःपाण्यादिविलक्षणस्यदेहस्यानिरूपणाच्छिरःप्रभृतिषुचविनिगमनाभावादहमितिसंज्ञांकरोमीत्यर्थः ८५ किंवान्यस्मिन्नात्मनिसतितद्व्यावृत्त येनत्वसौकिंत्वहमितिशब्दःप्रयोक्तव्यः तदेवनास्तिसर्वदेहेष्वात्मनएकत्वादित्याह यदन्यइति यद्यदा तत्तदा यदितदेतिवापाठः ८६ एकात्मत्वेनोत्तरानुपपत्तिमुक्त्वायुगपत्प्रश्नोत्तरानुपप

ब्दोऽहमितिदोषायनात्मन्येषतथैवच । अनात्मन्यात्मविज्ञानंशब्दोवाभ्रांतिलक्षणः ८२ जिह्वाब्रवीत्यहमितिदंतोष्ठंतालुकंनृप । एतेनाहंयतश्चैत द्वाङ्निष्पादनहेतवः ८३ किंहेतुभिर्वदत्येषावागेवाहमितिस्वयम् । तथापिवाङ्नाहमेतद्वक्तुमित्थंनयुज्यते ८४ पिंडःपृथग्यतःपुंसःशिरःपाण्यादिलक्ष णः । ततोऽहमितिकुत्रैतांसंज्ञांराजन्करोम्यहम् ८५ यदन्योऽस्तिपरंकोपिमत्तःपार्थिवसत्तम । तदेषोऽहमयंचान्योवक्तुमेवमपीष्यते ८६ यदास मस्तदेहेषुपुमानेकोव्यवस्थितः । तदाहिकोभवान्सोऽहमित्येतद्विफलंवचः ८७ त्वंराजाशिबिकाचेयंवयंवाहाःपुरःसराः । अयंचभवतोलोकोनसदे तन्नृपोच्यते ८८ वृक्षाद्दारुततश्चेयंशिबिकात्वदधिष्ठिता । क्ववृक्षसंज्ञाजातास्यदारुसंज्ञाथवानृप ८९ वृक्षारूढोमहाराजोनायंवदतितेजनः । नचदारु णिसर्वस्त्वांब्रवीतिशिबिकागतम् ९० शिबिकादारुसंघातोरचनास्थितिसंस्थितः । अन्विष्यतांनृपश्रेष्ठतद्भेदंशिबिकात्वया ९१ एवंछत्रशलाकानांपृ थग्भावोविमृश्यताम् । क्वयातंछत्रमित्येषन्यायस्त्वयितथामयि ९२ पुमान्स्त्रीगौरयंवाजीकुंजरोविहगस्तनूः । देहेषुलोकसंज्ञेयंविज्ञेयाकर्महेतुषु ९३ पुमान्नदेवोननरोनपशुर्नचपादपः । शरीराकृतिभेदास्तुयएतेकर्मयोनयः ९४ वस्तुराजेतियल्लोकेयच्चराजभटात्मकम् । तथान्यच्चनृपेत्थंतुनसत्संक

त्तिमप्याह यदेति बहूनांनिर्धारणेकोभवानितिप्रश्नःअन्यव्यावृत्तयेसोऽहमित्युत्तरंद्वयमपिविफलमित्यर्थः ८८ इदानीमहंशब्दस्यभ्रांतिमूलत्वप्रसंगेनसर्वेषामेवशब्दानामनिर्वचनीयार्थत्वेनत थात्वमाह त्वंराजेत्यादिना एतत्सर्वंसदितिनोच्यतेकिंत्वसदेव ८८ तत्रतावच्छिबिकाकारणस्यानिर्वचनीयतामाह वृक्षादितिद्वाभ्याम् प्रथमंवृक्षःततश्चिरशुष्कंकाष्ठंदारुततश्चतुरस्त्वारचिताशि विकातदावृक्षदारुसंज्ञयोरभावाद्व्यभिचारित्वेनवृक्षदारुणीमिथ्या ८९ तदावृक्षदारुसंज्ञयोरभावंव्यवहारणेदर्शयति वृक्षारूढइति ९० शिबिकायामपिमिथ्यात्वमाह शिबिकेति रचनास्थित्या संस्थितःदारुसंघातएवशिबिकातस्यदारुणोभेदेसाक्वगतेतित्वयैवान्विष्यताम् ९१ उक्तंन्यायंछत्रेअतिदिशति एवमिति तथातमेवन्यायंतदभिमानिषुचेतनत्वेनगृहीतेष्वपिदर्शयति एषइति मयिमद्देहेत्वयित्वद्देहेचविमृश्यताम् शिरःपाण्यादिविभागे नत्वंनाहमित्यर्थः ९२ एवमन्येपिचेतनात्मविवक्षयाप्रयुज्यमानाःशब्दानसदर्थाइत्याह पुमांस्त्रीति कर्मैवहेतुर्येषांतेषु ९३ उक्तमर्थंव्यतिरेकमुखेनद्रढयतिपुमानिति ९४ तर्हिअवस्तुत्वेकथंप्रतीतिरितितत्राह वस्त्विति संकल्पनामयंमनोरथमात्रविलसितम् ९५ तर्हिकिंसत्तत्राह यत्त्विति परिणामादिजनित संज्ञां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरंकालांतरेणापियन्नप्राप्नोतितत्परमार्थवस्तु तत्किम् भवदादिलोकगोचरोनभवतीत्यर्थः यद्वाअत्रतच्चकिं नकिमपि राजादीनांबाल्यादिपरिणामित्वादवस्तुत्वादित्यर्थः परिणामादिसंभूत मितिसामान्यविशेषभावेनवायोजनीयम् ९६ वर्तमानकालेपिप्रतियोगिभेदेनसंज्ञांतरादवस्तुत्वमाह त्वंराजेति ९७ शिरःपाण्याद्यवयवानामात्मत्वेनआत्मीयत्वेनवानिरूपणायोगात्तद्व्यतिरि क्तआत्मानतुस्थौल्यादिगुणविशिष्टोदेहइत्याह त्वंकिमेतदिति ९८ ननुतथासेनाकाननादिवदवयवसमूहरूपोऽहंवस्तुभूतःकिंनस्यात्तत्राह समस्तेति अवयवेभ्यःपृथगेकरूपेणव्यवस्थितः समूहस्थानीयः शब्दाद्यविषयतयाकोऽहमितिस्वयमेवचिंतय वीक्ष्यमाणःसकापिनास्तीत्यर्थः यद्वातर्हिकोऽयमात्मेत्यतआह समस्तेति अवयवोपचयापचयद्रष्टृत्वेनपृथग्व्यवस्थितःस्वप्रका शत्वेनचशब्दाद्यविषयत्वात्स्वयमेवकोऽहमितिविचिंतयतदैवसद्रष्टव्यइत्यर्थः ९९ अतोयदुक्तंकोहमितिवक्तुंनशक्यतइतितत्सुष्ठूक्तमित्युपसंहरतिएवमिति एवमभिन्नेआत्मतत्त्वेव्यवस्थिते

ल्पनामयम् ९५ यत्तुकालांतरेणापिनान्यसंज्ञामुपैतिवै । परिणामादिसंभूतंतद्वस्तुनृपतच्चकिम् ९६ त्वंराजासर्वलोकस्यपितुःपुत्रोरिपोरिपुः । पत्न्याःपतिःपितासूनोःकंत्वांभूपवदाम्यहम् ९७ त्वंकिमेतच्छिरःकिंतुशिरस्तवतथोदरम् । किमुपादादिकंत्वंवैतवैतत्किंमहीपते ९८ समस्तावय वेभ्यस्त्वंपृथग्भूपव्यवस्थितः । कोऽहमित्यत्रनिपुणोभूत्वाचिंतयपार्थिव ९९ एवंव्यवस्थितेतत्त्वेमयाहमितिभाषितुम् । पृथक्करणनिष्पाद्यंश क्यतेनृपतेकथम् १०० । । इतिश्रीविष्णुपुराणेद्वितीयांशेत्रयोदशोध्यायः १३ । । पराशरउवाच । । निशम्यतस्येतिवचःपरमार्थसमन्वितम् । प्रश्रयावनतोभूत्वातमाहनृपतिर्द्विज १ । । राजोवाच । । भगवन्यत्त्वयाप्रोक्तंपरमार्थमिदंवचः । श्रुतेतस्मिन्भ्रमंतीवमनसोममवृत्तयः २ एतद्वि वेकविज्ञानंयदशेषेषुजंतुषु । भवतादर्शितंविप्रतत्परंप्रकृतेर्महत् ३ नाहंवहामिशिबिकांशिबिकानमयिस्थिता । शरीरमन्यदस्मत्तोयेनेयंशिबिकाधृ ता ४ गुणप्रवृत्त्याभूतानांप्रवृत्तिःकर्मचोदिता । प्रवर्तंतेगुणाश्चैतेकिंममेतित्वयोदितम् ५ एतस्मिन्परमार्थज्ञममश्रोत्रपथंगते । मनोविह्वलतामे तिपरमार्थार्थितांगतम् ६ पूर्वमेवमहाभागंकपिलर्षिमहंद्विज । प्रष्टुमभ्युद्यतोगत्वाश्रेयःकिंत्वत्रशंसमे ७ तदंतरेचभवतायदिदंवाक्यमीरितम् । ते नैवपरमार्थार्थेत्वयिचेतःप्रधावति ८ कपिलर्षिर्भगवतःसर्वभूतस्यवैद्विज । विष्णोरंशोजगन्मोहनाशायोर्वीमुपागतः ९ सएवभगवान्नूनस्माकंहित

सतिपृथक्करणेनान्यव्यवच्छेदेननिष्पाद्यमुच्चार्यमेषोऽहमित्युत्तरंभाषितुंकथंशक्यमित्यर्थः । । इतिश्रीविष्णुपुराणेद्वितीयांशेत्रयोदशोध्यायः१३। । परमार्थविवेकेपिश्रेयोर्थेजातसंशयः इह तस्यविवेकायराजापृच्छत्पुनःपुनः १ तत्रतावत्पूर्वाध्यायशेषेयत्तुकालांतरेणापीत्यादिनापरमार्थवस्तुसामान्यतःकथितंतत्रैवपरमार्थेश्रेयसिचअभिन्नतयाप्रतीतेअथचनानाशास्त्रैरनेकधाप्रति पाद्यमानेसंदिहानोराजापृच्छति भगवन्निति दशाभिः २ तत्किमयासंदिग्धतयाप्रतिपादितंयेनमनोवृत्तयोभ्रमंतीतितत्राह एतदिति यदेतद्विवेकेनदेहादिभिन्नतयाविज्ञानमशेषेषुजंतुषुसा क्षित्वेनप्रतिपादितंतत्प्रकृतेःपरमंमहद्बृहद्ब्रह्मवदर्शितंनात्रार्थेसंशयोस्तीत्यर्थः ३ ४ ५ किंत्वेतस्मिन्नाहंवहामीत्यादिभवद्वाक्येश्रुतेसतिमनोविह्वलतांसंदेहंयाति शास्त्रसिद्धांतभेदादित्यर्थः परमा र्थेअर्थितांबुभुत्सुतांगतम् ६ एतज्ज्ञानाधिकारितामात्मनोदर्शयति पूर्वमितिचतुर्भिः ७ ८ ९ १० अखिलानियानिविज्ञानानितत्त्वज्ञानानितान्येवजलवीचयोयस्मिन्सउदधिर्भवानतःपर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्थभूतंश्रेयोवदेत्यन्वयः ११ पूर्वंपरमार्थार्थितांगतमित्युक्ताइदानींकिंश्रेयःपरमंतद्वदेत्यभिधानात्परमार्थश्रेयसोरैक्यमनेनावगतमितिमन्वानोब्रह्मणस्तयोर्भेदमाह भूयःपृच्छसीति अप
रमार्थार्थानिनविद्यतेपरमार्थभूतोर्थोयेषुतानितथा १२ तान्येवश्रेयांस्युत्तरोत्तरश्रेष्ठानिसप्तउपन्यस्यति देवतेतित्रिभिः योधनादीनिवांछतितस्यतद्धनाद्येवश्रेयइत्यन्वयः १३ फलेऽनभिसं
हितेअसंकल्पितेयत्कर्मक्रियतेतत्संकल्पितराज्यादिफलेभ्यःप्रधानंमुख्यंश्रेयः १४ आत्माध्येयइतिपरमात्मध्यानंश्रेयइत्यर्थः तस्यैवध्यातुरात्मनासंयोगऐक्योपपादनमपरंश्रेयइत्यर्थः विवे
किनस्त्विति पाठेसएवार्थः १५ १६ एवंश्रेयांस्युपन्यस्यतेषामपरमार्थत्वंदर्शयति धर्मांपेत्यादिनासंक्षेपतःश्रूयतांममेत्यंतेन कामप्राप्तिरुपलक्षणंनिमित्तंयस्यव्ययस्यस्वर्गकामसाधनस्यप

काम्यया। प्रत्यक्षतामत्रगतोयथैतद्भवतोद्विज १० तन्ममप्रणतायत्वंयच्छ्रेयःपरमंद्विज।तद्वदाखिलविज्ञानजलवीच्युदधिर्भवान् ११। ।ब्राह्मणउवा
च। ।भूयःपृच्छसिकिंश्रेयःपरमार्थंनपृच्छसि। श्रेयांस्यपरमार्थार्थान्यशेषाण्येवभूपते १२ देवताराधनंकृत्वाधनसंपदमिच्छति। पुत्रानिच्छतिराज्यंच
श्रेयस्तस्यैवतन्नृप १३ कर्मयज्ञात्मकंश्रेयःस्वर्लोकफलदायियत्। श्रेयःप्रधानंचफलेतदेवानभिसंहिते १४ आत्माध्येयःसदाभूपयोगयुक्तैस्तथापरः।
श्रेयस्तस्यैवसंयोगःश्रेयोयोऽपरमात्मना १५ श्रेयांस्येवमनेकानिशतशोऽथसहस्रशः।संत्यत्रपरमार्थास्तुनत्वेतेश्रूयतांचमे १६ धर्मायत्यजतेकिंतुप
रमार्थोधनंयदि। व्ययश्चक्रियतेकस्मात्कामप्राप्त्युपलक्षणः १७ पुत्रश्चेत्परमार्थाख्यःसोऽप्यन्यस्यनरेश्वर। परमार्थभूतःसोऽन्यस्यपरमार्थोहित
त्पिता १८ एवंनापरमार्थोऽस्तिजगत्यत्रचराचरे। परमार्थोहिकार्याणिकारणानामशेषतः १९ राज्यादिप्राप्तिरत्रोक्तापरमार्थतयायदि। परमार्था
भवंत्यत्रनभवंतिचवैततः २० ऋग्यजुःसामनिष्पाद्यंयज्ञकर्ममतंतव। परमार्थभूतंतत्रापिश्रूयतांगदतोमम २१ यत्तुनिष्पाद्यतेकार्यंमृदाकरणभूत
या। तत्कारणानुगमनाज्जायतेनृपमृन्मयम् २२ एवंविनाशिभिर्द्रव्यैःसमिदाज्यकुशादिभिः। निष्पाद्यतेक्रियायातुसाभवित्रीविनाशिनी २३ अ
नाशीपरमार्थश्चप्राज्ञैरभ्युपगम्यते। तत्तुनाशिनसंदेहोनाशिद्रव्योपपादितम् २४ तदेवाफलदंकर्मपरमार्थोयतोमतः। मुक्तिसाधनभूतत्वात्परमा
र्थोनसाधनम् २५ ध्यानंचैवात्मनोभूपपरमार्थार्थशब्दितम्। भेदकारिपरेभ्यस्तत्परमार्थोनभेदवान् २६ परमात्मात्मनोर्योगःपरमार्थइतीष्यते। मि

रमार्थतानास्तीत्यर्थः १७ पुत्रोपिनपरमार्थइत्याह पुत्रइतिद्वाभ्याम् यस्यपुत्रःपरमार्थःसोप्यन्यस्यपुत्रत्वात्परमार्थःस्यात् १८ एवंतत्पितातत्पितेत्येवमपरमार्थःकोपिनास्तीत्यतिप्रसंगःस्या
त् हियस्मादस्मिन्पक्षेकार्याणिजन्यानिपुत्रादीन्यशेषतःसर्वाणिकारणानांजनकानांपरमार्थःस्यादिति एवंनपरमार्थइतिपाठेऽयमर्थः पुत्रस्यपरमार्थत्वपक्षेकारणानांकार्याण्येवपर्यवसितःपर
मार्थोयःसएवंभूतःपरमार्थइहजगतिनास्ति वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतिविरोधादिति १९ राज्यादीनिपरमार्थाभवंतिचेतिकाक्वायोज्यम् किंतुस्वरूपविरोधादाग
मापायित्वाच्चराज्यादिनपरमार्थइत्यर्थः ततस्तदा २० यज्ञादिफलस्याप्यपरमार्थत्वंदृष्टांतेनसाधयन्नाह ऋगितिचतुर्भिः यज्ञकर्मेत्यत्रयज्ञफलंविवक्षितम् २१ २२ क्रियायानिष्पाद्यतेक्रिया
द्वारादृष्टस्वर्गादिफलंयन्निष्पाद्यतेतद्विनाशिभवोदित्यर्थः २३ ननुभवतुनामविनाशित्वंततःकिमतआह अनाशीति २४ तदसंकल्पितफलंकर्माफलदमित्येतन्नास्तिमुक्तिसाधनत्वात्ततश्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यार्थत्वान्नपरमार्थइत्यर्थः २५ परेभ्योदेहादिभ्योभेदकारिभेदविषयम् तद्विविक्ततयात्मनोध्येयत्वाद्भेदवांश्चभेदविषयश्चनपरमार्थः भेदवतोमिथ्यात्वादितिभावः २६ अथपरमात्मात्मनो योंगऐक्योपपादनमितीष्यतइतिमतंतत्रतयोरभेदश्चेदैक्योपपादनंकुतः भेदश्चेत्तत्राह अन्यद्द्रव्यमिति नाहिघटंपटयितुंकोपिशक्नोतीत्यर्थः २७ तस्मादशेषाण्येतानिश्रेयांस्येव तुशब्दोव्य तिरेके परमार्थस्त्वन्यःसचश्रूयतामित्यन्वयः २८ एकःसजातीयरहितः व्यापीआकाशवत् प्राप्यदेशशून्यः समोननैय्यायिकाद्यात्मवत्प्रतिनियताविशेषवान् शुद्धोरागादिदोषविधुरःनिर्गु णःसत्त्वादिगुणहीनःअतएवप्रकृतेः परः जन्मवृद्ध्यादिरहितः षड्भावविकारविकलःसर्वगतःसर्वद्वैतभ्रमाधिष्ठानतयातेषामात्मत्वेनवर्तमानः अव्ययःसर्वगतोपितद्वतधर्मेणव्ययेनासंसृष्टः २९ स्वरूपलक्षणमाह परज्ञानमयइति परेतिक्षणिकज्ञानव्यवच्छेदाय अतएवासद्भिर्नामजात्यादिभिःकालत्रयेपिसंसर्गरहितः विभुरीश्वरःस्वतंत्रइत्यर्थः ३० ननुप्रतीतिविरुद्धमेतत्प्रतिदेहमा त्मज्ञानयोर्भेदानुभवादित्यतआह तस्येति आत्मपरदेहेषुतत्तद्देहाकारतयासतःस्फुरतोपिएकमयमेकाकारंयद्विज्ञानंस्वप्रकाशमपरिच्छिन्नंसएवपरमार्थः भेददर्शनंभ्रांतमुपाधिसंबंधकृतंअतो

थ्यैतदन्यद्द्रव्यंहिनैतितद्द्रव्यतांयतः २७ तस्माच्छ्रेयांस्यशेषाणिनृपैतानिनसंशयः। परमार्थस्तुभूपालसंक्षेपाच्छ्रूयतांमम २८ एकोव्यापीसमःशुद्धो निर्गुणःप्रकृतेःपरः।जन्मवृद्ध्यादिरहितआत्मासर्वगतोऽव्ययः २९ परज्ञानमयोसद्भिर्नामजात्यादिभिर्विभुः। नयोगवान्नयुक्तोऽभून्नैवपार्थिवयोक्ष्य ति३० तस्यात्मपरदेहेषुसतोप्येकमयंहितत्।विज्ञानंपरमार्थोयद्द्वैतिनोतथ्यदर्शिनः ३१ वेणुरंध्रविभेदेनभेदःषड्जादिसंज्ञितः।अभेदव्यापिनोवायो स्तथातस्यमहात्मनः ३२ एकत्वंरूपभेदश्चबाह्यकर्मप्रवृत्तिजः। देवादिभेदमध्यास्तेनास्त्येवावरणोहिसः ३३ इतिश्रीविष्णुपुराणेद्वितीयेंशेचतु र्दशोध्यायः १४। । पराशरउवाच। । इत्युक्तेमौनिनंभूयश्चिंतयानंमहीपतिम्। प्रत्युवाचाथविप्रोऽसावद्वैतांतर्गतांकथाम् १। । ब्राह्मण उवाच। । श्रूयतांनृपशार्दूलयद्गीतमृभुणापुरा। अवबोधंजनयतानिदाघस्यद्विजन्मनः २ ऋभुर्नामाभवत्पुत्रोब्राह्मणःपरमेष्ठिनः। विज्ञानत त्त्वसद्भावोनिसर्गादेवभूपते ३ तस्यशिष्यानिदाघोऽभूत्पुलस्त्यतनयःपुरा। प्रादादशेषविज्ञानंसतस्मैपरयामुदा ४ अवाप्तज्ञानतत्त्वस्यनतस्याद्वै

द्वैतिनः अपरमार्थदर्शिनः ३१ एतदेवदृष्टांतेनदर्शयति वेणुरंध्रेतिद्वाभ्याम् अभेदस्यव्यापिनोवायोर्नादात्मनापरिणतस्य वायुरापद्यतेशब्दतामितिशिक्षाकारवचनात् यथावेणुरंध्रोपाधिभेदे नषड्जऋषभादिसंज्ञितोभेदस्तथातस्यमहतोपरिच्छिन्नस्यआत्मनः ३२ स्वतएकत्वंभेदस्तुदेवमनुष्यादिरूपोबाह्यकर्मप्रवृत्तिजःबाह्यानामात्मनःपृथग्भूतानांयाकर्मणःप्रवृत्तिःप्रवर्तनंतस्मादृष्ट द्वाराजातः यद्वाकर्मप्रवृत्तिःकर्मफलंतज्जातोभेदोनस्वतः बाह्यकर्मावृत्तिप्रजइतिपाठेबाह्यानांदेहादीनांकर्मभिर्यावृत्तिरावरणंततःप्रजायतइत्यर्थः देवादिभेदंदेवादयोभिद्यंतेनेनेतिदेवादिभेद आधिदैविकादिभेदहेतुरहंकारस्तमध्यास्तेआश्रित्यप्रवर्ततेसएवदेवादिभेदोनास्तिहियस्मादावरणः आवरणजन्यआविद्यकइत्यर्थः देवादिभेदेऽपध्वस्तइतिपाठेदेवादिभेदेअहंकारेऽपध्वस्ते सुषुप्त्यादौनष्टेसतिसभेदोनास्त्येव हियस्मादावरणेहंकारेसतिभेदोनान्यदेत्यर्थः यद्वायस्मात्सआत्माऽवरणःवरणमाच्छादनमविद्यातत्कार्यंचतद्रहितः ३३। । इतिवैष्णवाकूतचंद्रिकायां द्वितीयेंशेचतुर्दशोध्यायः १४। । श्रुतेप्रमाणतस्तत्त्वेतत्रासंभावनाकुलम् निदाघाख्यानमननैर्नृपबुद्धिमदीदिपत् इतिप्रमाणोपपत्तिभ्यामात्मैक्येसकृदुक्तेप्यसंभावनयामौनिनंतूष्णींभूतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिंतयानमद्वैतमंतर्गतंयस्यांतांकथांप्रत्युवाच १ २ निसर्गात्स्वभावाद्विज्ञातस्तत्त्वस्यसद्भावोयाथार्थ्ययेनसः ३ ४ द्वैतासक्त्यातस्याद्वैतवासनांनतर्कयामास ५ देविकायानद्याः ६ योगज्ञःकाम्यकर्मरूपोपायनिपुणः ७ निदाघमवलोककःअवलोकितुम् ८ अतिथ्यपेक्षयाद्वारस्यावलोकनगोचरेदृष्टियोग्यस्थाने ९ १० तच्चित्तपरीक्षार्थमाहभोविप्रवर्येति ११ यावको यवविकारःवट्यानितृणानिवाटीभवानिकंदमूलानिवा १२ मृष्टंस्वादु संयावःपिष्टविकृतिस्तंतुसंज्ञिभा द्रप्सोदध्योदनः द्रप्संदधिघनेतरदितितुअमरसिंहः फाणितंविकृतिर्गौडीतिहलायुधः

तवासनाम् । सऋभुस्तर्कयामासनिदाघस्यनरेश्वर ५ देविकायास्तटेवीरनगरंनामवैपुरम् । समृद्धमतिरम्यंचपुलस्त्येननिवेशितम् ६ रम्योप वनपर्यंतेसतस्मिन्पार्थिवोत्तम । निदाघनामायोगज्ञऋभुशिष्योऽवसत्पुरा ७ दिव्येवर्षसहस्रेतुसमतीतेऽस्यतत्पुरम् । जगामसऋभुःशिष्यंनिदा घमवलोककः ८ सतस्यवैश्वदेवांतेद्वारालोकनगोचरे । स्थितस्तेनगृहीतार्घोनिजवेश्मप्रवेशितः ९ प्रक्षालितांघ्रिपाणिंचकृतासनपरिग्रहम् । उवा चसद्विजश्रेष्ठोभुज्यतामितिसादरम् १० भोविप्रवर्यभोक्तव्यंयदन्नंभवतोगृहे । तत्कथ्यतांकदन्नेषुनप्रीतिःसततंमम ११ निदाघउवाच सक्तुयावक वाट्यानामपूपानांचमेगृहे । यद्रोचतेद्विजश्रेष्ठतत्त्वंभुङ्क्ष्वयथेच्छया १२ । । ऋभुरुवाच । । कदन्नानिद्विजैतानिमृष्टमन्नंप्रयच्छमे । संयावपाय सादीनिद्रप्स्यफाणितवंतिच १३ । । निदाघउवाच । । हेहेशालिनिमद्गेहेयत्किंचिदतिशोभनम् । भक्ष्योपसाधनंमृष्टंतेनास्यान्नंप्रसाधय १४ ब्राह्मणउवाच । । इत्युक्तातेनसापत्नीमृष्टमन्नंद्विजस्ययत् । प्रसाधितवतीतद्वैभर्तुर्वचनगौरवात् १५ तंभुक्तवंतमिच्छातोमृष्टमन्नंमहामुनिम् । निदाघःप्राहभूपालप्रश्रयावनतःस्थितः १६ । । निदाघउवाच । । अपितेपरमातृप्तिरुत्पन्नातुष्टिरेवच । अपितेमानसंसुस्थमाहारेणकृतंद्वि ज १७ क्वनिवासीभवान्विप्रक्वागंतुंसमुद्यतः । आगम्यतेचभवतायतस्तच्चद्विजोच्यताम् १८ । । ऋषिरुवाच । । क्षुद्यस्यतस्यभुक्तेऽन्नेतृप्ति र्ब्राह्मणजायते । नमेक्षुदभवत्तृप्तिंकस्मान्मांपरिपृच्छसि १९ वह्निनापार्थिवेधातौक्षपितेक्षुत्समुद्भवः । भवत्यंभसिचक्षीणेनृणांतृडपिजायते २० क्षु त्तृष्णेदेहधर्माख्येनममैतेयतोद्विज । क्षुत्तृट्समुद्भवाभावात्तृप्तिरस्त्येवमेसदा २१ मनसःसुस्थतातुष्टिश्चित्तधर्माविमौद्विज । चेतसोयस्यतत्पृच्छपु मानेभिर्नयुज्यते २२ क्वनिवासस्तवेत्युक्तंक्वगंतासिचयत्त्वया । कुतश्चागम्यतेतत्रत्रितयेपिनिबोधमे २३ पुमान्सर्वगतोव्यापीत्याकाशवदयंयतः।

तद्वंति १३ शालिनीगृहिणी भक्ष्यस्योपसाधनमुपदंशः १४ १५ १६ तृप्तिःपूर्तिःक्षुन्निवृत्तिर्वा तुष्टिर्हर्षः सुस्थंनिवृत्तक्षोभम् १७ १८ १९ २० देहधर्माख्येदेहधर्माभ्यांपार्थिवाप्यधा तुक्षयाभ्यामाख्यायेतेइतितथा तेचतद्वाराप्राणधर्मौ अशनापिपासेप्राणस्येतिश्रुतेः ममप्राणभिन्नस्यएतेनस्तः क्षुत्तृट्समुद्भवदुःखाभावसाम्यात्तृप्तिरस्त्येवेत्युपचारः २१ सुस्थतातुष्टि श्चयौघर्मौपृष्टौइमौचित्तस्य अतोयस्यचेतसश्चित्तस्यइमौधर्मौतच्चित्तमेवपृच्छ नत्वहंपुमान्प्रश्नार्हः यतएभिःप्राणचित्तधर्मैःसृष्ट्यादिभिर्नयुज्यते २२ क्वनिवासइत्यादिनापूर्वप्रश्नार्थस्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानुवादः प्रश्नास्थशब्दस्यान्यथात्वात् २३ वायुवत्सर्वगतत्वंव्यावर्तयति व्यापीति २४ उक्तन्यायमन्यत्राप्युपदिशति त्वंचेति ननुत्वंगंतात्वमागंताअन्येयांतीत्यादिप्रतीतिविरुद्धंकिमु च्यतइतितत्राह नचत्वमिति त्वंपदादिवाच्यगमनादिक्रियाविशिष्टात्मनउद्दिश्यत्वंपदादिलक्ष्यशुद्धात्मभावोविधीयते युष्मदस्मदादिविभागशून्यमात्मतत्त्वमेकमेव व्यवहारस्तुमिथ्यैवेत्य र्थः २५ मृष्टामृष्टप्रश्नखंडनेनतृप्त्यादिप्रश्नवन्मृष्टामृष्टप्रश्नोपितेनकृतइतिगम्यते मेमांप्रति तेत्वयातत्रमृष्टामृष्टप्रस्तावे यद्वाइदंमृष्टमिदंनेतिमयोक्तेअयंकिंवक्ष्यतीतिएषामेमयातवजिज्ञा साकृता अयंभावः मयामृष्टप्रस्तावेकृतेअद्वैतवासनयाआत्माश्रितंकिंत्वंवक्ष्यसीतितवजिज्ञासैवकृतानतुमृष्टवांछयातदुक्तम् मृष्टामृष्टयोरनिर्वचनीयत्वात् २६ तदेवाह किमितिद्वाभ्याम् अस्वादुअमृष्टम् अथवामृष्टमन्नंभुंजानस्यपुंसःकिमपिनियतमस्तिअपितुनैवास्ति तत्कुतस्तत्राह यदेवान्नंमृष्टंतदेवातितृप्तस्यउद्वेगकारकंसदमृष्टंभवति २७ तथातिक्षुधितस्यामृष्टमपिमृष्टं

कुतःकुत्रक्वगंतासीत्येतदप्यर्थवत्कथम् २४ सोऽहंगंतानचागंतानैकदेशनिकेतनः । त्वंचान्येचनचत्वंचनान्येनाहमथाप्यहम् २५ मृष्टंनमृष्टमप्येषा जिज्ञासामेकृतातव । किंवक्ष्यतीतितत्रापिश्रूयतांद्विजसत्तम २६ किमस्वाद्वथवामृष्टंभुंजतोऽन्नंद्विजोत्तम । मृष्टमेवयदामृष्टंतदेवोद्वेगकारकम् २७ अमृष्टंजायतेमृष्टंमृष्टादुद्विजतेजनः । आदिमध्यावसानेषुकिमन्नंरुचिकारकम् २८ मृन्मयंहिगृहंयद्वन्मृदालिप्तंस्थिरीभवेत् । पार्थिवोऽयंतथादेहःपा र्थिवैःपरमाणुभिः २९ यवगोधूममुद्गादिघृततैलपयोदधि । गुडःफलादीनितथापार्थिवाःपरमाणवः ३० तदेतद्भवताज्ञात्वामृष्टामृष्टविचारियत् । त न्मनःसमतालंबिकार्यंसाम्यंहिमुक्तये ३१ । । ब्राह्मणउवाच । । इत्याकर्ण्यवचस्तस्यपरमार्थाश्रितंनृप । प्रणिपत्यमहाभागोनिदाघोवाक्यम ब्रवीत् ३२ प्रसीदमद्धितार्थायकथ्यतांयस्त्वमागतः । नष्टोमोहस्तवाकर्ण्यवचांस्येतानिमेद्विज ३३ । । ऋभुरुवाच । । ऋभुरस्मितवाचार्यः प्रज्ञादानायतेद्विज । इहागतोऽहंयास्यामिपरमार्थस्तवोदितः ३४ एवमेकमिदंविद्वन्नभेदिसकलंजगत् । वासुदेवाभिधेयस्यस्वरूपंपरमात्मनः । ३५ । । ब्राह्मणउवाच । । तथेत्युक्त्वानिदाघेनप्रणिपातपुरःसरम् । पूजितःपरयाभक्त्याइच्छातःप्रययावृभुः ३६ इ०वि०द्वितीयेंशेपंचदशो ध्यायः । । ब्राह्मणउवाच । । ऋभुर्वर्षसहस्रंतुसमतीतेनरेश्वर । निदाघज्ञानदानायतदेवनगरंययौ १ नगरस्यबहिःसोऽथनिदाघंददृशेमुनिः ।

जायते तत्स्वादुतांजनयतीतिन्यायात् तदेवंमृष्टादेवान्नाज्जनःकदाचिदुद्विजतेयदातदाआदिमध्यावसानेषुनियतंरुचिकारकमृष्टंकिमन्नमस्तिनकिंचिदित्यर्थः २८ तर्हित्वयाकिमितिमृष्ट मेवभुक्तंतत्राह मृन्मयंहीति पार्थिवैःपरमाणुभिःसूक्ष्मैर्भक्ष्यांशैर्लिप्तउपबृंहितःभक्ष्यांशानुसारेणस्थिरीभवेत् अतोदेहस्यस्थैर्यतारतम्योपयोगितयामृष्टंभुक्तंनमृष्टार्थितयेतिभावः २९ केतेपार्थि वाइतितत्राह यवेति ३० प्रतिपादितमेवार्थंपरप्रयोजनायोपदिशति तदेतन्मदुक्तंज्ञात्वानिश्चित्यमृष्टामृष्टेत्युपलक्षणंमृष्टामृष्टादिविचारशीलंयन्मनस्तत्समतालंबिकृत्वातत्तद्विकल्पहीनंव स्तुमात्रविषयंकार्यंयत्नतः यस्मान्मनसःसाम्यंमुक्तयेभवति ३१ ३२ ३३ प्रज्ञादानायएकात्मकज्ञानदानाय ३४ तदेवाह अभेदिभेदवन्नभवति ३५ ३६ । । इतिश्रीरत्नगर्भ भट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांद्वितीयेंशेपंचदशोध्यायः १५ । । असकृच्छ्रुतमद्वैतंदुर्ज्ञेयमितिसूचयन् ऋभुस्त्रनिदाघायविज्ञानंपुनरादिशत् १ २ अस्पृश्यस्पर्शशंकयाजनसंम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवर्जयंतं क्षुधाक्षामःकृशःकंठोयस्यतम् ३ स्वीयमाचार्यत्वंप्रच्छादयितुंअभिवाद्य ४ ५ ६ परिलोकःपरिजनः परलोकइतिपाठेसएवार्थः ७ ८ ९ १० ११ अधःशब्दनिगाद्यमित्यत्र उर्ध्वाधोभावस्यापेक्षिकत्वान्मिथ्यात्वमेवइतिऋभोर्गूढाभिसंधिमज्ञात्वाशृंगग्राहिकतयोर्ध्वाधःशब्दसंकेतंग्राहयितुंआरुह्यतदर्थंदर्शयति श्रूयतामिति १२ तदारोहणापराधंपरिहरति दृष्टां

महाबलपरीवारेपुरंविशतिपार्थिवे २ दूरस्थितंमहाभागंजनसंमर्दवर्जकम् । क्षुत्क्षामकंठमायातमरण्यात्ससमित्कुशम् ३ दृष्ट्वानिदाघंसऋभुरुपगम्याभिवाद्यच । उवाचकस्मादेकांतेस्थीयतेभवताद्विज ४ । । निदाघउवाच । । भोविप्रजनसंमर्दोमहानेषनरेश्वरे । प्रविविक्षौपुरंरम्यंतेनात्रस्थीयतेमया ५ । ऋभुरुवाच । । नराधिपोऽत्रकतमःकतमश्चेतरोजनः । कथ्यतांमेद्विजश्रेष्ठत्वमभिज्ञोमतोमम ६ । । निदाघउवाच । योऽयंगजेंद्रमुन्मत्तमद्रिशृंगसमुच्छ्रयम् । अधिरूढोनरेंद्रोयंपरिलोकस्तथेतरः ७ । । ऋभुरुवाच । । एतौहिगजराजानौयुगपद्दर्शितौमम । भवतानविशेषेणपृथक्त्वेनोपलक्षणौ ८ तत्कथ्यतांमहाभागविशेषोभवतानयोः । ज्ञातुमिच्छाम्यहंकोऽत्रगजःकोवानराधिपः ९ । । निदाघउवाच । । गजोयोयमधोब्रह्मन्नुपर्यस्यैवभूपतिः । वाह्यवाहकसंबंधंकोनजानातिवैद्विज १० । । ऋभुरुवाच । । जानाम्यहंयथाब्रह्मंस्तथामामेवबोधय । अधःशब्दनिगाद्यंकिंकिंचोर्ध्वमभिधीयते ११ ब्राह्मणउवाच । इत्युक्तःसहसारुह्यनिदाघःप्राहतंगुरुम् । श्रूयतांकथयाम्येषयन्मांत्वंपरिपृच्छसि १२ उपर्यहंयथाराजात्वमधःकुंजरोयथा । अवबोधायतेब्रह्मन्दृष्टांतोदर्शितोमया १३ । ऋभुरुवाच । । त्वंराजवद्विजश्रेष्ठस्थितोहंगजवद्यदि । तदेवत्वंसमाचक्ष्वकतमस्त्वमहंयथा १४ । । ब्राह्मणउवाच । । इत्युक्तःसत्वरस्तस्यप्रगृह्यचरणावुभौ । निदाघःप्राहभगवानाचार्यस्त्वमृभुर्ध्रुवम् १५ नान्यस्याद्वैतसंस्कारसंस्कृतंमानसंतथा । यथाचार्यस्यतेनत्वांमन्येप्राप्तमहंगुरुम् १६ । । ऋभुरुवाच । तवोपदेशदानायपूर्वंशुश्रूषणादृतः । गुरुस्तेहमृभुर्नाम्नानिदाघसमुपागतः १७ तदेतदुपदिष्टंतेसंक्षेपेणमहामते । परमार्थसारभूतंयत्तदद्वैतमशेषतः १८ ब्राह्मणउवाच । एवमुक्त्वाययौविद्वान्निदाघंसऋभुर्गुरुः । निदाघोप्युपदेशेनतेनाद्वैतपरोभवत् १९ सर्वभूतान्यभेदेनददृशेसतदात्मनः । तथाब्रह्मततोमुक्तिमवापपरमांद्विजः २० तथात्वमपिधर्मज्ञतुल्यात्मरिपुबांधवः । भवसर्वगतंजानन्नात्मानमवनीपते २१ सितनीलादिभेदेनयथैकंदृश्यतेन

तइति १३ तदेवत्वंममाचक्ष्वकतमस्त्वमित्याक्षेपोक्त्यानचत्वंनचान्येनाहमप्यहमितिपूर्वोक्तमहमित्यादेर्मिथ्यात्वंस्मारितम् १४ ततश्चरणौप्रगृह्यनिदाघःक्षमयन्नाहध्रुवंत्वंममाचार्यइति १५ तेनतादृशसंस्कारवत्त्वेनइहप्राप्तंगुरुंत्वांमन्ये १६ १७परमार्थत्वेनाभिमतेष्वशेषेषुयत्सारभूतंतदद्वैतमेव १८ तथाआत्माभेदेनब्रह्मापिददृशे २० सर्वगतंसर्वाधिष्ठानत्वेनानुगतम् २१ अप्रत्यक्षेप्यात्मनिप्रत्यक्षभ्रममाकाशदृष्टांतेनसंभावयन्पूर्वोपदिष्टमर्थंनिगमयति सितनीलेतिद्वाभ्याम् २२ यदिहप्रपंचेस्तितत्समस्तमेकोऽच्युतएवेत्यनात्मभेदंनिरस्यात्मभेदंनिराकरोति सोह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति २३ जातिस्मरणेनाप्तोबोधोयेनसः अयंभावः भरतजन्मस्मरणेनतज्जन्मनिऋषभदेवोपदिष्टंज्ञानंप्रतिबंधकापगमेसतिस्वयमाविर्भूतामिति २४ तच्चरितवक्तृश्रोत्रोरपितदेवफलमा

भः। भ्रांतिदृष्टिभिरात्मापितथैकःसन्पृथक्पृथक् २२ एकःसमस्तंयदिहास्तिकिंचित्तदच्युतोनास्तिपरंततोऽन्यत्। सोऽहंसचत्वंसचसर्वमेतदात्मस्वरूपंत्यजभेदमोहम् २३ पराशरउवाच। इतीरितस्तेनसराजवर्यस्तत्याजभेदंपरमार्थदृष्टिः। सचापिजातिस्मरणाप्तबोधस्तत्रैवजन्मन्यपवर्गमाप २४ इतिभरतनरेंद्रवृत्तसारंकथयतियश्चशृणोतिभक्तियुक्तः। सविमलमतिरेतिनात्ममोहंभवतिचसंसरणेषुमुक्तियोग्यः २५ इतिश्रीविष्णुपुराणेद्वितीयेंशेषोडशोध्यायः १६। । द्वितीयांशःसमाप्तः २। ।छ। ।छ। । ।छ। ।छ। ।छ। ।छ।

ह इतीति २५॥ ॥ इतिश्रीवैष्णवाकूतचंद्रिकायांद्वितीयांशेषोडशोध्यायः १६॥ समाप्तो द्वितीयांशः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीविष्णुपुराणे द्वितीयांशः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीविष्णुपुराणे तृतीयांश प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः । । अंशद्वयेनसृष्ट्यादिद्विसप्तभुवनोक्तिभिः । अध्यारोप्यनिषिद्धंतद्राजाद्विजसदुक्तिभिः । १ । तृतीयेंशेमनुव्यासधर्माद्याःस्थितिहेतवः । वर्ण्यंतेत्रनिषेधायकौरव्यपृत नायथा । २ । तत्रापिप्रथमेध्यायेसप्तमन्वंतराणितु । भवद्भूतानिकथितान्यवताराहरेरपि । ३ । वृत्तकीर्त्तनपूर्वकंमन्वंतराणांस्वरूपंपृच्छाति कथितेतिचतुर्भिः १ २ ३ ४ इहवाराह कल्पेयथाक्रममित्यनेनक्रमप्राप्तंवर्तमानमपिमन्वंतरंज्ञेयम् ५ ६ ७ कल्पस्यादौस्वायंभुवमन्वंतरंतुकथितंप्रथमांशे देवायामाऋषयोमरीच्यादयः चकारादिंद्रोयज्ञः मनुपुत्रौप्रियव्रतोत्ता

मैत्रेयउवाच । । कथितागुरुणासम्यग्भूसमुद्रादिसंस्थितिः । सूर्यादीनांचसंस्थानंज्योतिषामपिविस्तरात् १ देवादीनांतथासृष्टिर्ऋषीणामपिव र्णिता । चातुर्वर्ण्यस्यचोत्पत्तिस्तिर्यग्योनिगतस्यच २ ध्रुवप्रह्लादचरितंविस्तराच्चत्वयोदितम् । मन्वंतराण्यशेषाणिश्रोतुमिच्छाम्यनुक्रमात् ३ मन्वं तराधिपांश्चैवशक्रदेवपुरोगमान् । भवताकथितानेताञ्श्रोतुमिच्छाम्यहंगुरो ४ पराशरउवाच । अतीतानागतानीहयानिमन्वंतराणिवै । तान्यहं भवतेसम्यक्कथयामियथाक्रमम् ५ स्वायंभुवोमनुःपूर्वोमनुःस्वारोचिषस्तथा । औत्तमिस्तामसश्चैवरैवतश्चाक्षुषस्तथा ६ षडेतेमनवोऽतीताःसांप्र तंतुरवेःसुतः । वैवस्वतोयंयस्यैतत्सप्तमंवर्त्ततेंतरम् ७ स्वायंभुवंतुकथितंकल्पादावंतरंमया । देवास्तत्रर्षयश्चैवयथावत्कथितामया ८ अतऊर्ध्वं प्रवक्ष्यामिमनोःस्वारोचिषस्यतु । मन्वंतराधिपान्सम्यग्देवर्षींस्तत्सुतांस्तथा ९ पारावताःसतुषितादेवाःस्वारोचिषेंतरे । विपश्चिच्चैवदेवेंद्रोमैत्रेया सीन्महाबलः १० ऊर्जस्वलस्तथाप्राणोदत्तोग्निर्ऋषभस्तथा । निश्चरश्चोर्वरीवांश्चतत्रसप्तर्षयोभवन् ११ चैत्रकिंपुरुषाद्याश्चसुताःस्वारोचि षस्यतु । द्वितीयमेतत्कथितमंतरंशृणुचोत्तमम् १२ तृतीयेत्वंतरेब्रह्मन्नौत्तमिर्नामयोमनुः । सुशांतिर्नामतत्रेंद्रोमैत्रेयासीत्सुरेश्वरः १३ सुधामाना स्तथासत्याःशिवाश्चासन्प्रदर्शनाः । वशवर्तीतिपंचैतेगणाद्वादशकाःस्मृताः १४ वसिष्ठतनयास्तत्रसप्तसप्तर्षयोभवन् ।प्रजाःपरमदिव्याद्यास्तस्यौ त्तमिमनोःसुतः १५ तामसस्यांतरेदेवाःसुरूपाहरयस्तथा । सत्याश्चसुधियश्चैवसप्तविंशतिकागणाः १६ शिखीत्विंद्रस्तथाचासीच्छतयज्ञोपलक्ष णः । सप्तर्षयश्चयेतेषांतत्रनामानिमेशृणु १७ ज्योतिर्धामापृथुःकाव्यश्चैत्रोग्निर्वमकस्तथा ।पीवरश्चर्षयोप्येतेसप्ततत्रापिचांतरे १८ ततःख्यातिः शतहयोजानुजंघादयस्तथा।पुत्रास्तुतामसस्यासन्राजानःसुमहाबलाः १९ पंचमेवापिमैत्रेयरैवतोनामनामतः।मनुर्विभुश्चतत्रेंद्रोदेवांश्चैवांतरेशृणु

नपादौकथितौ ८ देवर्षीन्देवानृषींश्च तत्सुतान्मनुपुत्रान् ९ पारावतास्तुषिताश्चदेवगणौ विपश्चित्संज्ञोदेवेंद्रः १० ११ उत्तममुत्तमसंबंधिमन्वंतरम् १२ उत्तमएवौत्तमिः १३ द्वादश काद्वादशानांद्वादशानामेकैकोगणइत्येवमेतेपंचगणाःस्मृताः १४ १५ सप्तविंशतिकाःसप्तविंशतीनांगणाः १६ शतयज्ञोपलक्षणःशतक्रतुः तत्रतामसेमन्वंतरेयेसप्तऋषयस्तेषांनामानि मेशृण्वित्यन्वयः १७ ज्योतिर्धामेत्यन्वर्थकंनाम १८ १९ रैवतोनामनामतइति नामप्रसिद्धोनामतःसंज्ञयैवनतुरेवतपुत्रः २० प्रत्येकंचतुर्दशभूताएतेगणाः २१ २२ २३ २४ २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ २० प्रमिताभाभूतरजोवैकुंठाःससुमेधसः । एतेदेवगणास्तत्रचतुर्दशचतुर्दश २१ हिरण्यरोमावेदश्रीरूर्ध्वबाहुस्तथापरः । वेदबाहुःसुधामा
चपर्जन्यश्चमहामुनिः २२ एतेसप्तर्षयोविप्रतत्रासन्रैवतेंतरे । बलबंधुस्तुसंभाव्यःसत्यकाद्याश्चतत्सुताः २३ नरेंद्राःसुमहावीर्याबभूवुर्मुनि ३
सत्तम । स्वारोचिषश्चौत्तमिश्चतामसोरैवतस्तथा २४ प्रियव्रतान्वयाह्येतेचत्वारोमनवस्तथा । विष्णुमाराध्यतपसालराजर्षिःप्रियव्रतः २५ म
न्वंतराधिपानेतांल्लब्धवानात्मवंशजान् । षष्ठेमन्वंतरेचासीच्चाक्षुषाख्यस्तथामनुः २६ मनोजवस्तथैवेंद्रोदेवानपिनिबोधमे । आद्याःप्रसृताभव्या
श्चपृथगाश्चादिवौकसः २७ महानुभावालेखाश्चयेचैतेह्यष्टकागणाः । सुमेधाविरजाश्चैवहविष्मानुत्तमोमधुः २८ अतिनामासहिष्णुश्चसप्तास
न्नितिचर्षयः । ऊरुपुरुशतद्युम्नप्रमुखाःसुमहाबलाः २९ चाक्षुषस्यमनोःपुत्राःपृथिवीपतयोभवन् । विवस्वतःसुतोविप्रश्राद्धदेवोमहाद्युतिः ३०
मनुःसवर्ततेधीमान्सांप्रतंसप्तमेंतरे । आदित्यवसुरुद्राद्यादेवाश्चात्रमहामुने ३१ पुरंदरस्तथैवात्रमैत्रेयत्रिदशेश्वरः । वसिष्ठःकश्यपोथात्रिर्जमद
ग्निःसगौतमः ३२ विश्वामित्रभरद्वाजौसप्तसप्तर्षयोभवन् । इक्ष्वाकुर्नभगश्चैवधृष्टःशर्यातिरेवच ३३ नरिष्यंतश्चविख्यातोनाभागोदिष्टएवच ।
करुषश्चपृषध्रश्चवसुमाँल्लोकविश्रुतः ३४ मनोर्वैवस्वतस्यैतेनवपुत्राश्चधार्मिकाः । विष्णुशक्तिरनौपम्यासत्वोद्रिक्तास्थितौस्थिता । मन्वंतरेष्व
शेषेषुदेवत्वेनाधितिष्ठति ३५ अंशेनतस्यजज्ञेसौयज्ञःस्वायंभुवेंतरे । आकूत्यांमानसोदेवउत्पन्नःप्रथमेंतरे ३६ ततःपुनःसवैदेवःप्राप्तेस्वारोचिषें
तरे । तुषितायांसमुत्पन्नोह्यजितस्तुषितैःसह ३७ उत्तमेचांतरेचैवतुषितस्तुपुनःसवै । सत्यायामभवत्सत्यःसत्यैःसहसुरोत्तमैः ३८ तामस
स्यांतरेचैवसंप्राप्तेपुनरेवहि । हर्यायांहरिभिःसार्द्धंहरिरेवबभूवह ३९ रैवतेप्यंतरेदेवःसंभूत्यांमानसोभवत् । संभूतोमानसैःसार्धंदेवैर्देववरोह
रिः ४० चाक्षुषेचांतरेदेवोवैकुंठःपुरुषोत्तमः । विकुंठायामसौजज्ञेवैकुंठैर्देवतैःसह ४१ मन्वंतरेतुसंप्राप्तेतथावैवस्वतेद्विज । वामनःकश्यपाद्वि
ष्णुरदित्यांसंबभूवह ४२त्रिभिःक्रमैरिमाँल्लोकाञ्जित्वायेनमहात्मना । पुरंदरायत्रैलोक्यंदत्तंनिहतकंटकम् ४३ इत्येतास्तनवस्तस्यसप्तमन्वंतरे १
षुवै । सप्तवैवाभवन्विप्रयाभिःसंरक्षिताःप्रजाः ४४ यस्माद्विश्वमिदंसर्वंतस्यशक्त्यामहात्मनः । तस्मात्संप्रोच्यतेविष्णुर्विशेर्धातोःप्रवेशना

ष्णोराधिष्ठातृत्वंदर्शयति विष्णुशक्तिरित्यादिनायावदध्यायसमाप्ति देवत्वेनयज्ञादिरूपदेवभावेन ३५ तस्यविष्णोरंशेनस्वायंभुवमन्वंतरेआकूत्यांमातरियज्ञसंज्ञउत्पन्नोजज्ञेबभूवेत्यर्थः
यद्वाप्रथमेंतरेवसरेब्रह्मणोमानसोयउत्पन्नोरुचिस्तस्मात्पितुर्जज्ञइति ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ उक्तमेवार्थंविष्णुपदनिरुक्त्यादर्शयन्मन्वादिषुचतदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेशमाह यस्मादितिद्वाभ्याम् महात्मनःस्वरूपभूतया प्रवेशनात्प्रवेशनार्थात् ४५ ४६ । । इतिश्रीवैष्णवाकूतचंद्रिकायांतृतीयांशेप्रथमोध्यायः १ । । द्वितीयेसप्तमन्वादीन्वक्ष्यन्ना
दौखेःसुतः यथासावर्णिरभवदितिहासंतमब्रवीत् १ मनुःश्राद्धदेवः २ छायांस्वसदृशीमन्यांस्त्रियंसूर्यतेजःसहिष्णुंनिर्मायभर्तुःशुश्रूषणेयुयोज स्वयंचतपसेययावित्यन्वयः ३ अत्रमनुं
सावर्णिं तपतींसंवरणस्यराज्ञोभार्याम् ४ छायैवसंज्ञारूपेणस्थिताछायासंज्ञासाकदाचित्स्वापत्यत्रयस्त्रहवतीआत्मनिपादप्रहारोद्यताययमायपादस्तेपतत्वितिशापंददौतदातिनिर्दयत्वेनान्ये

त् ४५ सर्वेचदेवामनवःसमस्ताःसप्तर्षयोयेमनुसूनवश्च । इंद्रश्चयोयस्त्रिदशेशभूतोविष्णोरशेषास्तुविभूतयस्ताः ४६ इतिश्रीमद्विष्णुपुराणेतृ
तीयांशेप्रथमोध्यायः १ मैत्रेयउवाच । प्रोक्तान्येतानिभवतासप्तमन्वंतराणिवै । भविष्याण्यपिविप्रर्षेममाख्यातुंत्वमर्हसि १ पराशरउवाच सू
र्यस्यपत्नीसंज्ञाभूत्सुतायाविश्वकर्मणः । मनुर्यमोयमीचैवतदपत्यानिवैमुने २ असहंतीतुसाभर्तुस्तेजच्छायांयुयोजवै । भर्तुःशुश्रूषणेरण्यंस्व
यंचतपसेययौ ३ संज्ञेयमित्यथार्कश्चच्छायायामात्मजत्रयम् । शनैश्चरंमनुंचान्यंतपतींचाप्यजीजनत् ४ छायासंज्ञाददौशापंयमायकुपितायदा ।
तदान्येयमसौबुद्धिरित्यासीद्यमसूर्ययोः ५ ततोविवस्वानाख्यातेतयैवारण्यसंस्थिताम् । समधिदृष्ट्यादृशेतामश्वांतपासिस्थितान् ६ वाजिरूपधरः
सोपितस्यांदेवावथाश्विनौ । जनयामासरेवंतंरेतसोंतेचभास्करः ७ आनिन्येचपुनःसंज्ञांस्वस्थानंभगवान्रविः । तेजसःशमनंचास्यविश्वक
र्माचकारसः ८ भ्रामिमारोप्यसूर्यंतुतस्यतेजोविशातनम् । कृतवानष्टमंभागंनव्यशातयताव्ययम् ९ यत्सूर्याद्वैष्णवंतेजःशातितंविश्वकर्मणा ।
जाज्वल्यमानमपतत्तद्भूमौमुनिसत्तम १० त्वष्टैवतेजसातेनविष्णोश्चक्रमकल्पयत् । त्रिशूलंचैवरुद्रस्यशिबिकांधनदस्यच ११ शक्तिंगुहस्यदेवा
नामन्येषांबयदायुधम् । तत्सर्वंतेजसातेनविश्वकर्माव्यवर्धयत् १२ छायासंज्ञासुतोयोसौद्वितीयःकथितोमनुः।पूर्वजस्यसवर्णोसौसावर्णिस्तेनसोच्य
ते १३ तस्यमन्वंतरंह्येतत्सावर्णिकमथाष्टमम् । तच्छृणुष्वमहाभागभविष्यंकथयामिते १४ सावर्णिस्तुमनुर्योसौमैत्रेयभवितातः । सुतपाश्चा
मिताभाश्चमुख्याश्चापितदासुराः १५ तेषांगणस्तुदेवानामेकैकोविंशकःस्मृतः । सप्तर्षीनपिवक्ष्यामिभविष्यान्मुनिसत्तम १६ दीप्तिमान्गाल
वोरामःकृपोद्रौणिस्तथापरः । मत्पुत्रस्तुतथाव्यासऋष्यशृंगश्चसप्तमः १७ विष्णुप्रसादादनघःपातालांतरगोचरः । विरोचनसुतस्तेषांबलिरिं

यंसंज्ञेतियमसूर्ययोर्बुद्धिरभूदित्यर्थः ५ ततश्चातिनिर्बंधंपृष्टयातयानाहंसंज्ञाकिंतुतस्याइच्छायेतिआख्यातेविवस्वान्सूर्यःसमाधिनोत्तरकुरुष्वरण्येऽश्वांवडवारूपांतपसिस्थितांसंज्ञांददृशेददर्श ६
ततःसोपिविवस्वानश्वरूपधरस्तस्यामश्विनौदेवौरेवंतंचेतित्रयमजीजनत् रेतसोंतइतिरेवतनामनिरुक्तिभिः ७ ८ भ्रामिंचक्राकारंतक्षयंत्रम् तेजसोविशातनंकृशतांअष्टमंभागंनव्यशातयद्य
तोव्ययम् ९ १० धनदस्यशिबिकामस्त्रम् ११ १२ पूर्वजस्यश्राद्धदेवस्यसवर्णःमनुरितिसमानवर्णत्वात्सूर्यपुत्रत्वात्तुल्यरूपत्वाद्वा १३ १४ विंशकःविंशतिसंख्याकः १५ १६ १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८ १९ २० अद्भुतसंज्ञइंद्रः २१ २२ २३ २४ २५ २६ सुक्षेत्रादयोब्रह्मसावर्णपुत्राः २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ अंश

द्रोभविष्यति १८ विरजाश्चोर्वरीवांश्चनिर्मोहाद्यास्तथापरे । सावर्णस्यमनोःपुत्राभविष्यंतिनरेश्वराः १९ नवमोदक्षसावर्णोमैत्रेयभवितामनुः ।
पारामरीचिगर्भाश्चनिर्मोहाद्यास्तथात्रिधा २० भविष्यंतितदादेवाएकैकोद्वादशोगणः । तेषामिंद्रोमहावीर्योभविष्यत्यद्भुतोद्विज २१ सवनो ३
द्युतिमान्भव्योवसुर्मेधामृतिस्तथा । ज्योतिष्मान्सप्तमःसत्यस्तत्रैतेचमहर्षयः २२ धृतकेतुर्दासकेतुःपंचहस्तोनिरामयः । पृथुश्रवाद्याश्चतथाद
क्षसावर्णकात्मजाः २३ दशमोब्रह्मसावर्णिर्भविष्यतिमुनेमनुः । सुधामानोविरुद्धाश्चशतसंख्यास्तथासुराः २४ तेषामिंद्रश्चभविताशांतिर्नामम
हाबलः । सप्तर्षयोभविष्यंतियेतदाताञ्शृणुष्वच २५ हविष्मान्सुकृतिःसद्योह्यपांमूर्तिस्तथापरः । नाभागोप्रतिमौजाश्चसत्यकेतुस्तथैवच ।
२६ सुक्षेत्रश्चोत्तमौजाश्चहरिषेणादयोदश । ब्रह्मसावर्णपुत्राश्चरक्षिष्यंतिवसुंधराम् २७ एकादशश्चभविताधर्मसावर्णिकोमनुः । विहंगमाःकाम
गमानिर्माणरतयस्तथा २८ गणास्तेतेतदामुख्यादेवानांचभविष्यताम् । एकैकस्त्रिंशकस्तेषांगणश्चेंद्रश्चवैवृषः २९ निश्चरश्चाग्नितेजाश्च
वपुष्मान्विष्णुवारुणिः । हविष्मांस्तनयश्चैतेभाव्याःसप्तर्षयस्तथा ३० सर्वगःसर्वधर्माचदेवानीकादयस्तथा । भविष्यंतिमनोस्तस्यतनयाः
पृथिवीश्वराः ३१ रुद्रपुत्रस्तुसावर्णोभविताद्वादशोमनुः । ऋतधामाचतत्रेंद्रोभविताशृणुमेसुरान् ३२ हरितालोहितादेवास्तथासुमनसोद्विज ।
सुकर्माणश्चताराश्चदशकाःपंचवैगणाः ३३ तपस्वीसुतपाश्चैवतपोमूर्तिस्तपोरतिः । तपोधृतिर्द्युतिश्चान्यःसप्तमस्तुतपोधनः ३४ देववानुपदेवश्च
देवश्रेष्ठादयस्तथा । मनोस्तस्यमहावीर्याभविष्यंतिसुतान्नृपाः ३५ त्रयोदशोरौच्यनामाभविष्यतिमुनेमनुः । सुत्रामाणःसुकर्माणःसुधर्माणस्तथा
मराः ३६ त्रयस्त्रिंशद्विभेदास्तेदेवानांयेतुवैगणाः । दिवस्पतिर्महावीर्यस्तेषामिंद्रोभविष्यति ३७ निर्मोहस्तत्त्वदर्शीचनिःप्रकंपोनिरुत्सुकः । धृति
मानव्ययश्चान्यःसप्तमःसुतपामुनिः ३८ सप्तर्षयस्त्विमेतस्यपुत्रानपिनिबोधमे । चित्रसेनविचित्राद्याभविष्यंतिमहीक्षितः ३९ भौत्यश्चतुर्दश
श्चान्योमैत्रेयभवितामनुः । शुचिरिंद्रःसुरगणास्तत्रपंचशृणुष्वतान् ४० चाक्षुषाश्चपवित्राश्चकनिष्ठाभ्राजिरास्तथा । वाचावृद्धाश्चवैदेवाःसप्तर्षीन
पिमेशृणु ४१ अग्निबाहुःशुचिःशुक्रोमागधोऽग्नीध्रएवच । युक्तस्तथाजितश्चान्योमनुपुत्रानतःशृणु ४२ उरुर्गभीरबुध्याद्यामनोस्तस्यसुतान्नृप । क
थितामुनिशार्दूलपालयिष्यंतियेमहीम् ४३ चतुर्युगांतेवेदानांजायतेकिलविप्लवः । प्रवर्तयंतितानेत्यभुविसप्तर्षयोदिवः ४४ कृतेकृतेस्मृतेर्विप्रप्रणे २

४० ४१ ४२ ४३ उक्तानांमन्वादीनांकृत्यभेदानाह चतुर्युगांतइति कलौवेदानांविप्लवेउच्छेदेजातेदिविष्ठामहर्षयोभुवमेत्यकृतयुगादौतानेवसंप्रदायेनप्रवर्तयंति ४४ वेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवर्तनमुक्तास्मृतिप्रवर्तनमाह कृतइति स्मृतेर्धर्मशास्त्रस्यमनुसंज्ञस्यतत्तदधिप्रवर्तितानांस्मृतीनामुपलक्षणमेतत् तत्तन्मन्वंतरेयेदेवाःकीर्तिताःतत्तन्नामानःतत्तन्मन्वंतरेयज्ञभुजोभवंति या वन्मन्वंतरंमन्वंतरसमाप्तिपर्यंतम् ४५ ४६ अन्येपिमन्वादयस्तन्मन्वंतराधिकारिणएवेत्याह मनुरिति ४७ ४८ तावत्प्रमाणाचनिशेति तदासूर्यादिपरिस्पंदरूपकालोपाध्यभावेपिभगवतो योगनिद्रानिरूपममायोपाधिपरिच्छिन्नस्यकालस्यतावत्त्वंज्ञेयं ब्रह्मेति दिवाब्रह्मरूपधरोयःसएवभगवान्रात्रौश्रीमन्नारायणरूपेणशेषाहौअनंतनाम्निसर्पेशेतेइत्यर्थः ४९ ५० एवमेवसर्वकल्प

ताजायतेमनुः । देवायज्ञभुजस्तेतुयावन्मन्वंतरंतुतत् ४५ भवंतियेमनोःपुत्रायावन्मन्वंतरंतुतैः । तदन्वयोद्भवैश्चैवतावद्भूःपरिपाल्यते ४६ मनुः सप्तर्षयोदेवाभूपालाश्चमनोःसुताः।मन्वंतरेभवंत्येतेशक्रश्चैवाधिकारिणः ४७ चतुर्दशभिरेतैस्तुगतैर्मन्वंतरैर्द्विज। सहस्रयुगपर्यंतःकल्पोनिःशेषउच्य ते ४८ तावत्प्रमाणाचनिशाततोभवतिसत्तम । ब्रह्मरूपधरःशेतेशेषाहावत्युपप्लवे ४९ त्रैलोक्यमखिलंग्रस्त्वाभगवानादिकृद्विभुः । स्वमायासंस्थि तोविप्रसर्वभूतोजनार्दनः ५० ततःप्रबुद्धोभगवान्यथापूर्वंतथापुनः । सृष्टिंकरोत्यशेषात्माकल्पेकल्पेरजोगुणः ५१ मनवोभूभुजःसेंद्रादेवाःसप्तर्षय स्तथा । सात्त्विकोंशःस्थितिकरोजगतोद्विजसत्तम ५२ चतुर्युगेत्वसौविष्णुःस्थितिव्यापारलक्षणः । युगव्यवस्थांकुरुतेयथामैत्रेयतच्छृणु ५३ कृ तेयुगेपरंज्ञानंकपिलादिस्वरूपधृक् । ददातिसर्वभूतानांसर्वभूतहितेरतः ५४ चक्रवर्तीस्वरूपेणत्रेतायामपिसप्रभुः।दुष्टानांनिग्रहंकुर्वन्परिपातिज गत्त्रयम् ५५ वेदमेकंचतुर्भेदंकृत्वाशाखाशतैर्विभुः। करोतिबहुलंभूयोवेदव्यासस्वरूपधृक् ५६ वेदांस्तुद्वापरेयस्यकलेरंतेपुनर्हरिः । कल्किस्व रूपीदुर्वृत्तान्मार्गेस्थापयतिप्रभुः ५७ एवमेतज्जगत्सर्वंपरिपातिकरोतिच । हंतिचांतेत्वनंतात्मानास्त्यस्माद्व्यतिरेकियत् ५८ भूतंभव्यंभविष्यंच सर्वभूतान्महात्मनः । तदत्रान्यत्रवाविप्रसद्भावःकथितस्तव ५९ मन्वंतराण्यशेषाणिकथितानिमयातव । मन्वंतराधिपाश्चैवकिमन्यत्कथयामिते । ६० । । इतिश्रीविष्णुपुराणेतृतीयेंशेद्वितीयोध्यायः २ । । मैत्रेयउवाच । । ज्ञातमेतन्मयात्वत्तोयथापूर्वमिदंजगत् । विष्णुर्विष्णौविष्णुतश्चन परंविद्यतेततः १ एतत्तुश्रोतुमिच्छामिव्यस्तावेदामहात्मना । वेदव्यासस्वरूपेणयथातेनयुगेयुगे २ यस्मिन्यस्मिन्युगेव्यासोयोयआसीन्महामुने

मन्वंतरादिस्थितिप्रपंचमाह तनःप्रबुद्धइत्यादिनायावदध्यायसमाप्ति ५१ ५२ स्थितयेयोव्यापारःसएवलक्षणमुपाधिर्यस्यसः ५३ ५४ ५५ ५६ ५७ उपसंहरति एवमितिद्वाभ्याम् अत्रचान्यत्रवाकल्पादौतस्माद्व्यतिरेकियद्भूतादितन्नास्तिकिंतुभेदकल्पनाशून्योभगवानेवास्तीत्येषएवसद्भावःपरमार्थःकथितइति ५८ ५० ६० । । इतिश्रीविष्णुपुराणेतृतीयांशेद्विती योध्यायः २ । । स्थितिहेतुप्रसंगेनमुनेःप्रश्नानुसारतः वेदव्यस्तिस्तृतीयेत्रसप्रपंचानुवर्ण्यते १ वेदव्यस्तिंप्रष्टुंसर्वग्रंथतात्पर्यार्थज्ञातमनुवदति ज्ञातमिति यथासर्वंजगद्विष्णुरेवततःपरंनविद्य तेयथाचविष्णौतिष्ठति विष्णोःसकाशाद्यथाभवतितथात्वत्तोमयाज्ञातम् अनेनसर्वोपिकारकाद्यर्थोविष्णावुपलक्ष्यते १ यथावेदाव्यस्ताइतिप्रकारप्रश्नः २ यस्मिन्यस्मिन्नित्याधिकरणप्रश्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योयइतिकर्तृप्रश्नः शाखाभेदानितिशाखासंख्यानाम्नोःप्रश्नः ३ तत्रतावच्छाखाभेदानांसंख्यातोनामतश्चविस्तारोवक्तुमशक्यइत्याह वेदद्रुमस्येति ४ अधिकरणकर्तृस्वरूपप्रश्नयोरुत्तरमाह द्वापरइतिद्वाभ्याम् ५ वीर्यमुत्साहंतेजःप्रागल्भ्यंबलंचग्रहणसामर्थ्यमल्पमवेक्ष्य ६ नन्वपरएववेदव्यासस्तत्कथंभगवान्वेदभेदान्करोतीत्याशंक्यतेसर्वेभगवत्तनवइत्याह ययेति ७ अत्रतावदतीतानागतमन्वंतराणांव्यासानतिविस्तरत्वेनोपेक्ष्यवैवस्वते मन्वंतरेव्यतीतान्व्यासान्भाविनंचैकंतथाशाखाभेदांश्चवक्तुमाह यस्मिन्निति ८ अष्टाविंशतिव्यासाव्यतीतानिवृत्ताधिकाराजाताइत्यर्थः ९ विसर्गलोपश्छांदसः १० प्रजापतिर्मनुः द्वापरेतुपुरावृत्तेमनोःस्वायंभुवेंतरे ब्रह्मामनुमुवाचेदंवेदान्व्यस्यप्रजापतेइतिवायूक्तेः इतएववचनाद्द्वापरादिष्वित्यत्रद्वापरमादिर्ये

तंतमाचक्ष्वभगवाञ्शाखाभेदांश्चमेवद ३ पराशरउवाच। वेदद्रुमस्यमैत्रेयशाखाभेदैःसहस्रशः। नशक्योविस्तरोवक्तुंसंक्षेपेणशृणुष्वतम् ४ द्वापरे द्वापरेविष्णुर्व्यासरूपीमहामुने। वेदमेकंसाबहुधाकुरुतेजगतोहितः५वीर्यंतेजोबलंचाल्पंमनुष्याणामवेक्ष्यवै। हितायसर्वभूतानांवेदभेदान्करोतिसः६ ययासकुरुतेतन्वावेदमेकंपृथक्प्रभुः। वेदव्यासाभिधानात्तुसामूर्तिर्मधुविद्विषः ७ यस्मिन्मन्वंतरेयेयेव्यासास्तांस्तान्निबोधमे। यथाचभेदःशाखानांव्यासेनक्रियतेमुने ८ अष्टाविंशतिकृत्वोवैवेदाव्यस्तामहर्षिभिः। वैवस्वतेंतरेतस्मिन्द्वापरेषुपुनःपुनः ९ वेदव्यासाव्यतीतायेअष्टाविंशतिसत्तमाः। चतुर्धायैःकृतोवेदोद्वापरेषुपुनःपुनः१०द्वापरेप्रथमेव्यस्ताःस्वयंवेदाःस्वयंभुवा। द्वितीयेद्वापरेचैववेदव्यासःप्रजापतिः ११ तृतीयेचोशनाव्यासश्चतुर्थेचबृहस्पतिः। सवितापंचमेव्यासोमृत्युःषष्टेस्मृतःप्रभुः१२सप्तमेचतथैवेंद्रोवसिष्ठश्चाष्टमेस्मृतः। सारस्वतश्चनवमेत्रिधामादशमेस्मृतः१३एकादशेतुत्रिवृषाभरद्वाजस्ततःपरम्। त्रयोदशेत्वांतरिक्षोवप्रीवापिचतुर्दशे १४ त्रय्यारुणःपंचदशेषोडशेतुधनंजयः। कृतंजयःसप्तदशेऋणज्योष्टादशेस्मृतः। १५ ततोव्यासोभरद्वाजोभरद्वाजात्तुगौतमः। गौतमादुत्तमोव्यासोहर्यात्मायोभिधीयते १६ अथहर्यात्मनोवेनःस्मृतोराजस्त्रवास्तुयः। सोमःशुष्मायणस्तस्मात्तृणबिंदुरितिस्मृतः १७ ऋक्षोभूद्भार्गवस्तस्माद्वाल्मीकिर्योभिधीयते।तस्मादस्मत्पिताशक्तिर्व्यासस्तस्मादहंमुने १८ जातुकर्णोभवन्मत्तःकृष्णद्वैपायनस्ततः। अष्टाविंशतिरित्येतेवेदव्यासाःपुरातनाः १९ एकोवेदश्चतुर्धातुयैःकृतोद्वापरादिषु।भविष्येद्वापरेचापिद्रौणिर्व्यासोभविष्यति२०

षांतेषुद्वापरांशेष्वित्यर्थःकल्प्यते शांतनुसमकालंसत्यवत्यांकृष्णद्वैपायनोत्पत्तिप्रसिद्धेः ११ १२ १३ १४ १५ १६ १७ १८ १९ २० इदानींवेदविभागंविवक्ष्यमाणःप्रथमंतावत्प्रणवावच्छिन्नब्रह्मणोवेदाविर्भावंदर्शयितुमाह ध्रुवमिति ध्रुवंवेदादीनांप्रकृतिभूतंओमित्येवंरूपंव्यवस्थितमेकमक्षरंब्रह्मेत्यभिधीयते अत्रहेतुमाह बृहत्त्वादपरिछिन्नरूपब्रह्मात्मकत्वाद्बृंहणत्वात्कारणत्वादाविर्भावकत्वादितियावत् यस्मादुच्चार्यमाणएवबृंहतिबृहंयतितस्मादुच्यतेपरंब्रह्मेतिश्रुतेः ओमित्येकाक्षरंब्रह्मेतिगीतोक्तेश्च २१ तस्यैवंव्यापकत्वंप्रतिपादयन्ब्रह्मप्रकाशकत्वाद्ब्रह्मत्वेनोपास्यंप्रणमति प्रणवेति भूर्भुवःस्वरितिव्याहृतित्रयम् नित्यंप्रणवावस्थितमीर्यतेतेनव्याहृतित्रयात्मकंयदित्यर्थः ऋग्यजुःसामाथर्वाणमितिप्रथमार्थेद्वितीयाएतद्वेदचतुष्टयात्मकंचयत्तस्मैब्रह्मणेप्रणवाख्यायनमइति २२ एवंवाचकप्रणवप्रणामानंतरंतद्वाच्यंब्रह्मप्रणमति जगतइतिसार्धैश्चतुर्भिः जगतःप्रलयोत्पत्त्योर्यत्कारणसंज्ञितंमहतश्चपरमंगुह्यंमुख्यंकारणंतस्मैसुब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेपूजितगुणाधिष्ठात्रेब्रह्मणेनमइत्यन्वयः २३ तदेवविशिनष्टि अगाधंपूर्वापरकालावधिरहितमपारंसर्वगतमक्षय्यंक्षयितुमशक्यंजगतःसंमोहनंतमोगुणःतस्यालयमालयःकिंचसंप्रकाशप्रवृत्तिभ्यांसत्त्वरजोगुणाभ्यांपुरुषस्ययोर्थोभोगापवर्गलक्षणःसप्रयोजनंकार्यंयस्यतत् २४ तदेवाह सांख्यज्ञानंपंचविंशतितत्त्वज्ञानंतद्वतांनिष्ठाप्राप्यस्थानंशमोंतःकरणव्यापारोपरमःदमोबाह्येंद्रियव्यापारोपरमः सएवात्मास्वभावोयेषांतेषांगतिरात्मानात्मविवेककारणंयत्तदव्यक्तमतींद्रियममृतमविनाशिप्रवृत्तंब्रह्मपरिणामवद्ब्रह्मशाश्वतंवस्तुतःसदैकरूपतयावर्तमानम् २५ प्रधानंमहदादिकार्यकत्वेनप्रतीयमानम् यद्वाप्रधीयतेआधीयतेविश्वमिहेतिप्रधानंआत्मयोनिःअनन्यकार्यःस्वतःसिद्धमितियावत् गुहायांहृदयकुहरेप्रकाशमानंसत्त्वंयस्यतच्छस्यतेवेदादिषु अविभागःनिर्भेदंपुंस्त्वमार्षंशुक्लंदीप्तिमत्स्वयंप्रभमितियावत् अक्षरमपक्षयशून्यंबहुधात्मकंबहुप्रकारोपाधिकम् २६ यदेवंभूतंतथापिपरमब्रह्मणेकूटस्थपरिपूर्णायतस्मैप्रणवगम्यायानित्यंनमोनमइतिभक्त्यतिशयोद्योत्यते २७ इदानींवाचकवाच्यप्रणवब्रह्मणएवाभेदविवक्षयाव्याहृत्यादिरूपतामाह यद्रूपमितिसार्धैस्त्रिभिः २८ वासुदेवस्ययत्प्रणवाख्यंरूपमेतदभेदमपित्रिधाव्याहृतिरूपेणभूरा

व्यतीतेममपुत्रेस्मिन्कृष्णद्वैपायनेमुनौ।ध्रुवमेकाक्षरंब्रह्मओमित्येवंव्यवस्थितम् ।बृहत्वाद्बृंहणत्वाच्चतद्ब्रह्मेत्यभिधीयते२१प्रणवावस्थितंनित्यंभूर्भुवस्वरितीर्यते । ऋग्यजुःसामाथर्वाणंयत्तस्मैब्रह्मणेनमः२२जगतःप्रलयोत्पत्तौयत्तत्कारणसंज्ञितम्।महतःपरमंगुह्यंतस्मैसुब्रह्मणेनमः २३ अगाधापारमक्षय्यंजगत्संमोहनालयम् । संप्रकाशप्रवृत्तिभ्यांपुरुषार्थप्रयोजनम् २४ सांख्यज्ञानवतांनिष्ठागतिःशमदमात्मनाम् । यत्तदव्यक्तममृतंप्रवृत्तंब्रह्मशाश्वतम् २५ प्रधानमात्मयोनिश्चगुहासत्त्वंचशस्यते । अविभागस्तथाशुक्लमक्षरंबहुधात्मकम् २६ परमब्रह्मणेतस्मैनित्यमेवनमोनमः २७ यद्रूपंवासुदेवस्यपरमात्मस्वरूपिणः। एतद्ब्रह्मत्रिधाभेदमभेदमपिसप्रभुः २८ सर्वभूतेष्वभेदोऽसौभिद्यतेभिन्नबुद्धिभिः २९ सऋङ्मयःसाममयःसचात्मासयजुर्मयः। ऋग्यजुःसामसारात्मासएवात्माशरीरिणाम् ३० सभिद्यतेवेदमयःसवेदंकरोतिभेदैर्बहुभिःसशाखाम्।शाखाप्रणेतासमस्तशाखाज्ञानस्वरूपोभगवाननंतः ३१। इतिश्रीविष्णुपुराणेतृतीयांशेतृतीयोध्यायः ३ । पराशरउवाच। आद्योवेदश्चतुष्पादःशतसाहस्रसम्मितः। ततोदशगुणः

दिलोकत्रयरूपेणचभेदोयस्यतत् तत्रहेतुमाह सप्रभुःप्रणवात्मावासुदेवएव विभिन्नाभिर्बुद्धिभिर्भिद्यतेभिन्नतयाप्रतीयतेदृश्यतेऽभिन्नाबुद्धिरितिपाठेऽविषमदृष्टिभिःसर्वभूतेष्वभेदोसौदृश्यतेऽतोऽभेदमपितत्स्वरूपं त्रिधाभिद्यतेइतित्रिधाभेदं ज्ञानात्मनाभिन्नंत्रिधाभिन्नंतुभूराद्यात्मनेत्यर्थः २९ किंचऋगादिमयः ऋग्वेदरूपःऋगादिसारःप्रणवस्तदात्माशरीरिणांवेदविभागकर्मणामात्माचसएव ३० प्रणवाख्यंवासुदेवस्यसर्वात्मत्वंनिगमयति सभिद्यतइति सएवभेदमयःसएवभिद्यतेऋगादिरूपेणबहुभिर्भेदैःसशाखंअनेकप्रकारकशाखाकंवेदमात्मानमेवतत्तत्प्रणेतृरूपःसन्सएवकरोति सएवसमस्तशाखारूपश्च तत्रहेतुभूतंविशेषणत्रयमाह ज्ञानस्वरूपोभगवाननंतइति तेनअनंतशाखारूपत्वंतत्प्रणेतृत्वंचोपपद्यतइति ३१ । इतिश्रीविष्णुपुराणेतृतीयेंशेतृतीयोध्यायः ३ । अष्टाविंशेद्वापरेत्रनान्यत्रापिप्रसंगतः कृष्णद्वैपायनेनैववेदाव्यस्ताइतीर्यते १ आद्यईश्वरादुद्भूतःचतुष्पादःऋगादिचतुर्भेदसमूहरूपःयद्वाशतसाहस्रसंमितइत्यर्थः ततःप्रवृत्तोयंकृत्स्नोयज्ञोदशगुणोदशविधःअग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमइतिपंचविधःसएवप्रकृतिविकृतिभेदेनदशविधइतियद्वागृह्योक्तैःपंचयज्ञैःसहदशविधत्वम् १ अत्रमन्वंतरेअष्टाविंशति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमेद्वापरेचतुष्पादमेकंसंतंवेदंचतुर्धाऋग्यजुःसामाथर्वरूपेणपृथग्व्यभजत्प्रभुरीश्वरः अवताररूपः २ तैःपूर्वैःसमस्तैर्मयाचषड्विंशेवेदाव्यस्ताः ३ तत्तस्मादनेनकृष्णद्वैपायनेनकृतवेदविभागेनदृष्टांतेनचतुर्युगेषुसर्वेष्वपिवेदविभागान्पूर्वैःकृतानवधारयजानीहि ४ तदेवंकृष्णद्वैपायनव्यासस्यमुख्यत्वमुक्त्वातत्रहेतुमाह कृष्णेति अतोह्यस्मिन्मन्वंतरेष्टाविंशएवद्वापरेभारताविर्भावइतिगम्यते ५ ६ वेदपारगान्वेदस्यपारंगंतुंसमर्थान् ७ ऋग्वेदश्रावकमितिसमासस्थमपिश्रावकपदमग्रेनुकृष्ययोज्यम् पारगमितिक्वचित्पाठः ८ ९ इतिहासपुराणयोरिति आर्षादिबहुधाख्यानंदेवर्षिचरिताश्रयम् इतिहासमितिप्रोक्तंभविष्यत्भूतधर्मयुक् सर्गादिपंचलक्षणंपुराणम्सर्गाद्यवांतरभेदविवक्षयादशलक्षणंच १० एकआसीदिति

कृत्स्नोयज्ञोऽयंसर्वकामधुक् १ ततोऽत्रमत्सुतोव्यासोष्टाविंशतितमेंतरे। वेदमेकंचतुष्पादंचतुर्धाव्यभजत्प्रभुः२यथातुतेनवैव्यस्तावेदव्यासेनधीमता। वेदास्तथासमस्तैस्तैर्व्यस्ताव्यासैस्तथामया३तदनेनैववेदानांशाखाभेदान्द्विजोत्तम । चतुर्युगेष्वारचितान्समस्तेष्ववधारय ४ कृष्णद्वैपायनंव्यासंविद्धिनारायणंप्रभुम् । कोऽन्योहिभुविमैत्रेयमहाभारतकृद्भवेत् ५ तेनव्यस्तायथावेदामत्पुत्रेणमहात्मना । द्वापरेह्यत्रमैत्रेयतन्मेशृणुयथार्थतः ६ ब्रह्मणाचोदितोव्यासोवेदान्व्यक्तुंप्रचक्रमे । अथशिष्यान्सजग्राहचतुरोवेदपारगान् ७ ऋग्वेदश्रावकंचैवंजग्राहसमहामुनिः । वैशंपायननामानंयजुर्वेदस्यचाग्रहीत् ८ जैमिनिंसामवेदस्यतथैवाथर्ववेदवित् । सुमंतुस्तस्यशिष्योऽभूद्वेदव्यासस्यधीमतः ९ रोमहर्षणनामानंमहाबुद्धिंमहामुनिम् । सूतंजग्राहशिष्यंसइतिहासपुराणयोः १० एकआसीद्यजुर्वेदस्तंचतुर्धाव्यकल्पयत् । चातुर्होत्रमभूद्यस्मिंस्तेनयज्ञमथाकरोत् ११ आध्वर्यवंयजुर्भिस्तुऋग्भिर्होत्रंतथामुने । आग्नीध्रंसामभिश्चक्रेब्रह्मत्वंचाप्यथर्वभिः १२ ततःसऋचउद्धृत्यऋग्वेदंकृतवान्मुनिः । यजूंषिचयजुर्वेदंसामवेदंचसामभिः १३ राज्ञस्त्वथर्ववेदेनसर्वकर्माणिसप्रभुः । कारयामासमैत्रेयब्रह्मत्वंचयथास्थिति १४ सोऽयमेकोमहावेदतरुस्तेनपृथक्कृतः । चतुर्धाथततोजातंवेदपादपकाननम् १५ बिभेदप्रथमंविप्रपैलऋग्वेदपादपम् । इंद्रप्रमतयेप्रादाद्बाष्कलायचसंहिते १६ चतुर्धासबिभेदाथबाष्कलिर्द्विजसंहिते। बौध्यादिभ्योददौतास्तुशिष्येभ्यःसमहामुनिः १७ बौध्याग्निमाठरौतद्वद्याज्ञवल्क्यपराशरौ । प्रतिशाखास्तुशाखायास्तस्यायाजग्रहुर्मुने १८ इंद्रप्रमतिरेकांतुसंहितांस्वसुतंततः । मांडूकेयंमहात्मानंमैत्रेयाध्यापयत्तदा १९ तस्यशिष्यप्रशिष्येभ्यःपुत्रशिष्यान्क्रमाद्ययौ । वेदमित्रस्तुशाकल्यः

यजुर्वेदिकाध्वर्यवक्रियाबाहुल्यात्प्रधानकर्मणश्चयाजनस्यतद्विहितत्वाद्यजुःप्राधान्यादेवमुक्तम् यच्छिष्टंचयजुर्वेदेतेनयज्ञमयुंजत याजनाद्धियजुर्वेदइतिशास्त्रस्यनिश्चयइतिवायुक्तेः होत्रोपलक्षिताश्चत्वारोऋत्विजश्चतुर्होतारःतैरनुष्ठेयंकर्मचतुर्होत्रंतद्यस्मिन्नभूत् जातंतेनचतुर्धाविभक्तेनवेदेनयज्ञमकरोत् ११ चातुर्होत्रमेवाहआध्वर्यवमिति १२ चतुर्धाभेदमाह ततइति ततोवेदराशेः यजूंष्युद्धृत्येत्यनुषंगः सामभिर्गीतात्मकैरुद्धृतैरित्यर्थः १३ राज्ञःसर्वकर्माणिशांतिपुष्ट्यादीनि १४ वेदाएवपादपास्तेभ्यःकाननंशाखाप्रशाखासंततिः तस्यकाननमितिवा १५ प्रथमंऋग्वेदंपादपंद्विधाबिभेद १६ बाष्कलएवबाष्कलिः स्वार्थेइञ् १७ बाष्कलयेदत्तायाःशाखायायाःप्रतिशाखाअवांतरशाखास्ताबौध्यादयोजगृहुः १८ १९ तस्यपैलशिष्यस्यइं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रप्रमतेःशिष्यप्रशिष्येभ्यःशिष्यप्रशिष्याणांपुत्राञ्शिष्यांश्चक्रमाद्ययौ वेदमित्राख्यःशाकल्यइंद्रप्रमतिसंहितामधीतवान् २० ततश्चसएवतस्याःपंचसंहिताश्चकारताश्चशिष्येभ्योमुद्गलादिभ्यो ददौ २१ २२ शाकपूणिस्तुइंद्रप्रमतिशिष्यस्तत्संहितायाःसंहितात्रितयंनिरुक्तंचवेदशब्दनिर्वचनरूपमकरोत् २३ तच्चसंहितात्रितयंक्रौंचादिभ्योऽदात् चतुर्थोनिरुक्तकृन्नामेतिकेचिदिच्छं ति २४ अनुशाखाअवांतरशाखाः बाष्कलिःपैलशिष्यः चतस्रःसंहिताश्चक्रेइत्युक्तंसएवान्यास्तिस्रःसंहिताःकृतवान् अपरएववाशाकल्यसतीर्थ्योबाष्कलिः २५ तच्छिष्याः कालाय

संहितांतामधीतवान् २० चकारसंहिताःपंचशिष्येभ्यःप्रददौचताः । तस्यशिष्यास्तुयेपंचतेषांनामानिमेशृणु २१ मुद्गलोगोखलश्चैववास्यः शालीयएवच । शिशिरःपंचमश्चासीन्मैत्रेयसमहामुनिः २२ संहितात्रितयंचक्रेशाकपूणिरथेतरः । निरुक्तमकरोत्तत्तुचतुर्थंमुनिसत्तम २३ क्रौंचोवै तालकिस्तद्वद्बलाकश्चमहामतिः । निरुक्तकृच्चतुर्थोऽभूद्वेदवेदांगपारगः २४ इत्येताःप्रतिशाखाभ्योप्यनुशाखाद्विजोत्तम । बाष्कलिःश्चापरास्तिस्रः संहिताःकृतवान्द्विज २५ शिष्याःकालायनिर्गार्ग्यस्तृतीयश्चकथाजवः । इत्येतेबह्वृचाःप्रोक्ताःसंहितायैःप्रवर्तिताः २६। । इतिश्रीमद्विष्णुपुराणे तृतीयेंशेचतुर्थोध्यायः ४। । पराशरउवाच ।। यजुर्वेदतरोःशाखाःसप्तविंशन्महामतिः । वैशंपायननामाऽसौव्यासशिष्यश्चकारवै १ शिष्येभ्यः प्रददौताश्चजगृहुस्तेप्यनुक्रमात् । याज्ञवल्क्यस्तुतस्याभूद्ब्रह्मरातसुतोद्विजः २ शिष्यःपरमधर्मज्ञोगुरुवृत्तिपरःसदा । ऋषिर्योऽद्यमहामेरौसमाजे नागमिष्यति ३ तस्यवैसप्तरात्रंतुब्रह्महत्याभविष्यति । पूर्वमेवंमुनिगणैःसमयोऽभूत्कृतोद्विज ४ वैशंपायनएकस्तुतंव्यतिक्रांतवांस्तदा । स्व स्त्रीयंबालकंसोऽथपदास्पृष्टमघातयत् ५ शिष्यमाहचभोःशिष्यब्रह्महत्यापहव्रतम् । चरध्वंमत्कृतेसर्वेनविचार्यमिदंतथा ६ अथाहयाज्ञवल्क्य स्तंकिमेभिर्भगवन्द्विजैः । क्लेशितैरल्पतेजोभिश्चरिष्येहमिदंव्रतम् ७ ततःक्रुद्धोगुरुःप्राहयाज्ञवल्क्यंमहामतिः । मुच्यतांयत्त्वयाधीतंमत्तोविप्राव वमन्यक ८ निस्तेजसोवदस्येतान्यस्त्वंब्राह्मणपुंगवान्। तेनाशिष्येणनार्थोऽस्तिममाज्ञाभंगकारिणा ९ याज्ञवल्क्यस्ततःप्राहभक्त्यैतत्तेमयोदितम्। ममाप्यलंत्वयाधीतंयन्मयातदिदंद्विज १० पराशरउवाच । । इत्युक्त्वारुधिराक्तानिसरूपाणियजूंषिसः । छर्दयित्वाददोतस्मैययौचस्वेच्छयामु

निप्रमुखास्त्रयः २६ इतिश्रीविष्णुपुराणेतृतीयेंशेचतुर्थोध्यायः ४ पंचमेथयजुःशाखाःकथ्यंतेऽत्रसमासतः सेतिहासंतैत्तिरीयवाजिशाखाप्रवर्तनम् १ सप्तविंशत्सप्तविंशतिर्यजुषःप्रधान शाखाः ब्रह्मांडेतुएकाधिकशतमध्वर्युशाखाआपस्तंबोक्ताउक्ताः १ यजुःशाखांतराणामुत्पत्तिंवक्तुंशिष्यांतरमाह याज्ञवल्क्यास्त्विति २ तस्मादेवशाखाद्वयप्रवृत्तिंवक्तुमितिहासमाह ऋ षिरिति अद्यास्मत्समाजेयऋषिर्नागमिष्यति ३ ४ स्वस्त्रीयंस्वसुःसुतंपदास्पृष्टंसंतमघातयत् ऋषिशापवशात्पदास्पृष्टमात्रोसौममारेत्यर्थः ५ समर्थेनान्येनमहापातकेकृतेऽन्येनकथंतप्रा यश्चित्तंकर्तव्यमितीदंनविचार्यंकिंतुतथासाक्षाद्वेदशास्त्रोक्तमुख्यप्रकारेणमदर्थंव्रतंचरतेत्यर्थः ६ ७ विप्रावमन्यकविप्रावमंतः ८ सर्वाञ्शिष्यान्प्रत्युक्तंतन्निषिध्यमयैवकार्यमित्युक्तत्वादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाभंगकारिणेत्युक्तम् ९ ममापिलयागुरुणाअलंलत्तोमयायदधीतंतदिदमितिच्छर्दनमनुचकार १० ११ छर्दितानांसाक्षाद्ग्रहणमनुचितमितितित्तिराःपक्षिणोभूत्वाजगृहुःततोहेतोस्तै त्तिरीयाःप्रसिद्धाः १२ ततोन्येषांचरकाध्वर्यसंज्ञानिर्वक्ति ब्रह्महत्याव्रतमिति १३ ततोसौसूर्यस्तुत्वातत्प्रसदाल्लब्धैर्यजुर्भिःकाण्वाद्याःपंचदशशाखाःकृतवानितिदर्शयन्नाह याज्ञवल्क्यो पीत्यादिनायावदध्यायसमाप्ति १४ विमुक्तेर्द्वारायत्रयीधामवतेत्रयीरूपतेजःशालिने १५ अग्नीषोमभूतायअतोजगतःकारणात्मने तदेवाह भास्करायआतपवृष्टिद्वाराजगत्कारणत्वमि तिभावः तदुपपादयति तेजोबिभ्रतइत्यग्निरूपत्वम् सौषुम्नंबिभ्रतइतिसोमरूपत्वम् उक्तंचसूर्यरश्मिःसुषुम्नोयस्तर्पितस्तेनचंद्रमाइति १६ कलाकाष्ठादिकालोज्ञायतेयेनतथाभूतआत्मा

निः ११ यजूंष्यथविसृष्टानियाज्ञवल्क्येनवैद्विज । जगृहुस्तित्तिरीराभूत्वातैत्तिरीयास्तुतेततः १२ ब्रह्महत्याव्रतंचीर्णंगुरुणाचोदितैस्तुयैः। चरका ध्वर्यवस्तेतुवरणान्मुनिसत्तम १३ याज्ञवल्क्योऽपिमैत्रेयप्राणायामपरायणः । तुष्टावप्रयतःसूर्यंयजूंष्यभिलषंस्ततः १४ । । याज्ञवल्क्यउवाच । नमःसवित्रेद्वारायविमुक्तेःसिततेजसे । ऋग्यजुःसामभूतायत्रयीधामवतेनमः १५ नमोऽग्नीषोमभूतायजगतःकारणात्मने । भास्करायपरंतेजः सौषुम्नमुरुबिभ्रते १६ कलाकाष्ठानिमेषादिकालज्ञानात्मनेनमः । ध्येयायविष्णुरूपायपरमाक्षररूपिणे १७ बिभर्तियःसुरगणानाप्याय्येंदुस्वर श्मिभिः । सुधामृतेनचपितॄंस्तस्मैतृप्त्यात्मनेनमः १८ हिमांबुघर्मवृष्टीनांकर्ताहर्ताचयःप्रभुः । तस्मैत्रिकालरूपायनमःसूर्यायवेधसे १९ योहं तितिमिराण्येकोजगतोऽस्यजगत्पतिः । सत्त्वधामधरोदेवोनमस्तस्मैविवस्वते २० सत्कर्मयोग्योनजनोनैवापःशौचकारणम् । यस्मिन्ननुदितेत स्मैनमोदेवायभास्वते २१ स्पृष्टोयदंशुभिर्लोकःक्रियायोग्योऽभिजायते । पवित्रताकारणायतस्मैशुद्धात्मनेनमः २२ नमःसवित्रेसूर्यायभास्कारा यविवस्वते । आदित्यायादिभूतायदेवादीनांनमोनमः २३ हिरण्मयंरथंयस्यकेतवोमृतधायिनः । वहंतिभुवनालोकिचक्षुषस्तंनमाम्यहम् २४ पाराशरउवाच । । इत्येवमादिभिस्तेनस्तूयमानैःस्तवैरविः । वाजिरूपधरःप्राहव्रियतामितिवांछितम् २५ याज्ञवल्क्यस्तदाप्राहप्रणिपत्यदिवा करम् । यजूंषितानिमेदेहियानिसंतिनमेगुरौ २६ । । पराशरउवाच । । एवमुक्तोददौतस्मैयजूंषिभगवान्रविः । अयातयामसंज्ञानियानिवेत्तिनतद्गु

यस्यतस्मै ध्येयायसर्वेषांध्यानार्हाय धीमहीतिगायत्रीलिंगात् परमाक्षरंब्रह्म अक्षरात्परतःपरइतिश्रुतेः तद्रूपिणे ओंकाररूपिणेइतिवा १७ सुधामृतेनसुधैवामृतममरणसाधनत्वात् तेनतृ प्त्यात्मनेतर्पकाय धृत्यात्मनइतिपाठेधारयित्रे १८ हिमादीनांयावृष्टिस्तत्कर्ताहेमंतवर्षाग्रीष्माख्यत्रिकालरूपाय वेधसेस्रष्ट्रे १९ सत्त्वधामधरःसत्त्वमूर्तिधरः सत्यधामधरइतिपाठेसत्यम बाधितंधामतेजोधरतीतिपचाद्यच् २० सत्कर्मरात्रिसंध्येतरकालविहितंयत्कर्मतद्योग्यः २१ पूर्वोक्तमेवार्थंविधिमुखेनाह स्पृष्टइति २२ भक्त्यतिशयेनपूर्वोक्तैःपर्यायैःसर्वैःप्रणमति सावि त्रइति २३ हिरण्मयंतेजोमयम् केतवोवेदमयाअश्वाःअमृतधायिनःअमृताहाराः एतेनउदुत्यंजातवेदसमित्यादिऋगर्थउक्तः हिरण्मयेरथइतिपाठेकेतवोरश्मयःअमृतंजलंतत्पातारःवहंतिग च्छंतीत्यर्थः २४ २५ २६ अयातयामसंज्ञानिअन्यैरनभ्यस्तानि २७ वाजिनःसमाख्याताः वाजिरूपसूर्यप्रोक्तसंहिताध्यायित्वादित्यर्थः २८ २९ इतिश्रीविष्णुपुराणेतृतीयेंशेपंचमोध्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यः ५ साम्नोथाथर्वणःशाखाभेदाःपौराणिकाअपि अध्येतारश्चकर्तारस्तेषांषष्ठेनिरूपिताः १ तस्यजैमिनेः अस्यजैमिनिपुत्रस्यतौजैमिनिपुत्रपौत्रौजैमिनिनाविभक्तामेकैकांसाहितांस्वस्वका
लेऽधीतवंतौ १ तत्सुतःसुमंतुसुतः तंसंहिताभेदम् २ सुकर्मणःशिष्यावाह हिरण्यनाभइति कौशल्यइतिहिरण्यनाभविशेषणम् येपंचदशशिष्यास्तेभ्यःपंचदशसंहिताहिरण्यनाभेनदत्तास्त
एवोदीच्यसामगाःस्मृताः ३ यैरपरैर्द्विजोत्तमैस्तावंत्यस्तेषांगृहीतॄणांसंख्ययासंख्याताःसंहिताहिरण्यनाभाद्गृहीतास्तेप्राच्यसामगाउच्यंतइत्यन्वयः ४ पौष्यंजिशिष्यानाह लोकाक्षिरिति त

रुः २७ यजूंषियैरधीतानितानिविप्रैर्द्विजोत्तम। वाजिनस्तेसमाख्याताःसूर्योऽश्वःसोऽभवद्यतः २८ शाखाभेदास्तुतेषांवैदशपंचचवाजिनाम्। कण्वा
द्यास्तुमहाभागयाज्ञवल्क्यप्रवर्तिताः २९ ।। इतिश्रीविष्णुपुराणेतृतीयेंशेपंचमोध्यायः ५ । । पराशरउवाच। । सामवेदतरोःशाखाव्यासशि
ष्यःसजैमिनिः। क्रमेणयेनमैत्रेयबिभेदशृणुतन्मम १ सुमंतुस्तस्यपुत्रोऽभूत्सुकर्मास्याप्यभूत्सुतः। अधीतवंतावेकैकांसंहितांतौमहामुनी १ सह
स्रंसंहिताभेदंसुकर्मातत्सुतस्ततः। चकारतंचताच्छिष्यौजग्रहातेमहामती २ हिरण्यनाभःकौशल्यःपौष्यंजिश्चद्विजोत्तम । उदीच्यसामगाःशिष्या
स्तेभ्यःपंचदशस्मृताः ३ हिरण्यनाभात्तावंत्यःसंहितायैर्द्विजोत्तमैः। गृहीतास्तेपिचोच्यंतेपंडितैःप्राच्यसामगाः ४ लोकाक्षिःकुथुमिश्चैवकुसीदीलां
गलिस्तथा। पौष्यंजिशिष्यास्तद्वेदैःसंहिताबहुलीकृताः ५ हिरण्यनाभशिष्यश्चचतुर्विंशतिसंहिताः। प्रोवाचकृतिनामासौशिष्येभ्यःसुमहामतिः ६
तैश्चापिसामवेदोऽसौशाखाभिर्बहुलीकृतः। अथर्वणामथोवक्ष्येसंहितानांसमुच्चयम् ७ अथर्ववेदंसमुनिःसुमंतुरमितद्युतिः । शिष्यमध्यापयामास
कबंधंसोऽपितंद्विधा ८ कृत्वातुदेवदर्शायतथापथ्यायदत्तवान्। देवदर्शस्यशिष्यास्तुमौद्गोब्रह्मबलिस्तथा ९ शौल्कायनिःपिप्पलादस्तथान्येमुनि
सत्तम। पथ्यस्यापित्रयःशिष्याःकृतायैर्द्विजसंहिताः १० जाजलिःकुमुदादिश्चतृतीयःशौनकोद्विज। शौनकस्तुद्विधाकृत्वाददावेकांतुवभ्रवे ११ द्वि
तीयांसंहितांप्रादात्सैंधवायनसंज्ञिने। सैंधवामुंजकेशाश्चभिन्नवेदाद्विधापुनः १२ नक्षत्रकल्पोवेदानांसंहितानांतथैवच । चतुर्थःस्यादांगिरसःशां
तिकल्पश्चपंचमः १३ श्रेष्ठास्त्वथर्वणामेतेसंहितानांविकल्पकाः। आख्यानैश्चाप्युपाख्यानैर्गाथाभिःकल्पशुद्धिभिः १४ पुराणसंहितांचक्रेपुराणा

द्वेदैस्तच्छिष्यप्रशिष्यादिभिः ५ हिरण्यनाभस्योदीच्यसामगशिष्यमध्येकृतिनामाशिष्यः ६ तैःकृतिनाम्नःशिष्यैः ७ ८ देवदर्शःस्वसंहितांचतुर्धाचक्रेतास्तुमौद्गादयश्चत्वारोजगृहुरित्यर्थः ९ प
थ्यकृतास्तिस्रः संहिताजाजल्यादयोजगृहुःयैःस्वसंहिताभिन्नाःकृताः १० ११सैंधवाःसैंधवायनशिष्याः मुंजकेशइतिबभ्रोरेवनामांतरंतच्छिष्यामुंजकेशाःद्विधाद्विःप्रकारोभिन्नोवेदःस्वस्वसंहि
तायैस्तेतथा १२ संहिताभेदानाह नक्षत्रकल्पइति वेदानांसंहितानांचकल्पइत्यन्वयः तत्रनक्षत्रकल्पोनक्षत्रादिपूजाविधिः वेदकल्पोवैतानिकब्रह्मत्वादिविधिः संहिताकल्पःसंहिताविधिः आं
गिरसःकल्पोऽभिचारादिविधिः शांतिकल्पश्चगजाद्यष्टादशमहाशांत्यादिविधिः १३ आख्यानादिभिःसहपुराणसंहितांचक्रे व्यासइतिशेषः तत्रदृष्टोपलब्धकथनमुपाख्यानंप्रचक्षते गाथापितृपृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थ्वादिगीता कल्पशुद्धिर्वाराहादिकल्पनिर्णयः १४ १५ सुमत्यादयस्तस्यरोमहर्षणस्यषट्शिष्यास्तत्कृताःषट्संहिताजगृहुः १६ काश्यपादिभिस्त्रिभिःकृतास्तिस्रः अकृतव्रणएव काश्यपः काश्यपोह्यकृतव्रणइतिवायूक्तेः रौमहर्षणिकाचान्यारोमहर्षणेनपुनःसंक्षेपेणकृता एतासांसंहितानांचतुष्टयेनसारोद्धाररूपमिदंविष्णुपुराणंमुनेमैत्रेयमयाकृतमितिशेषः १७ व्यासकृतान्यष्टादशपुराणान्याह आद्यमितिसार्धैश्चतुर्भिः केचित्तुसंहितानांचतुष्टयेनइदमाद्यंब्राह्ममुच्यतेइतिवदंति १८ १९ २० २१ २२ उक्तेष्वष्टादशपुराणेषुकिमेतत्पुराणंत्वयाकथ्यत इतिआह यदतेदिति मयायदेतत्तवकथ्यतेतदेवानागताख्यानेन पद्मपुराणानंतरं व्यासेनकृतमित्यर्थः यथाहमत्स्यः वराहकल्पवृत्तांतमधिकृत्यपराशरः यत्प्राहधर्मानखिलांस्तदुक्तंवै

र्थविशारदः । प्रख्यातोव्यासशिष्योऽभूत्सूतोवैरोमहर्षणः १५ पुराणसंहितांतस्मैददौव्यासोमहामुनिः । सुमतिश्चाग्निवर्चाश्चमित्रयुःशांतपायनः अकृतव्रणोऽथसावर्णिःषट्शिष्यास्तस्यचाभवन् १६ काश्यपःसंहिताकर्तासावर्णिःशांतपायनः । रौमहर्षणिकाचान्यातिसृणांमूलसंहिता । चतुष्टयेनाप्येतेनसंहितानामिदंमुने १७ आद्यंसर्वपुराणानांपुराणंब्राह्ममुच्यते । अष्टादशपुराणानिपुराणज्ञाःप्रचक्षते १८ ब्राह्मंपाद्मंवैष्णवंचशैवंभागवतंतथा । आथान्यनारदीयंचमार्कंडेयंचसप्तमम् १९ आग्नेयमष्टमंचैवभविष्यंनवमंतथा । दशमंब्रह्मवैवर्तंलैंगमेकादशंस्मृतम् २० वाराहंद्वादशंचैवस्कांदंचात्रत्रयोदशम् । चतुर्दशंवामनंचकौर्मंपंचदशंस्मृतम् २१ मात्स्यंचगारुडंचैवब्रह्मांडंचततःपरम् । सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच २२ सर्वेष्वेतेषुकथ्यंतेवंशानुचरितंचयत् । यदेतत्तवमैत्रेयपुराणंकथ्यतेमया । एतद्वैष्णवसंज्ञंवैपाद्मस्यसमनंतरम् २३ सर्गेचप्रतिसर्गेचवंशमन्वंतरादिषु । कथ्यतेभगवान्विष्णुरशेषेष्वेवसत्तमः २४ अंगानिचतुरोवेदामीमांसान्यायविस्तरः । पुराणंधर्मशास्त्रंचविद्याह्येताश्चतुर्दश २५ आयुर्वेदोधनुर्वेदोगांधर्वश्चैवतेत्रयः । अर्थशास्त्रंचतुर्थंतुविद्यादष्टादशैवतु २६ ज्ञेयाब्रह्मर्षयःपूर्वंतेभ्योदेवर्षयःपुनः । राजर्षयःपुनस्तेभ्यऋषिप्रकृतयस्त्रयः २७ इतिशाखाःप्रसंख्याताःशाखाभेदास्तथैवच । कर्तारश्चैवशाखानांभेदेहेतुस्तथोदितः २८ सर्वमन्वंतरेष्वेवशाखाभेदाःसमाःस्मृताः । प्राजापत्याश्रुतिर्नित्यातद्विकल्पास्त्विमेद्विज २९ एतत्तवोदितंसर्वंयत्पृष्टोऽहमिहत्वया । मैत्रेयवेद

ष्णवंविदुरिति एवमेवब्रह्मादिकथितंव्यासेननिबद्धंब्रह्मपुराणादिकथ्यतेविष्णुपुराणंचक्वचिद्दशसाहस्रम् क्वचिदष्टसाहस्रमित्यादिविकल्पेप्यत्रषट्साहस्रमेवव्याख्यायते २३ अस्यवैष्णवसंज्ञायांहेतुमाह सर्गेचेति २४ पुराणानांवेदोपबृंहणत्वेनधर्मवेदनहेतुत्वाद्धर्मविद्यास्थानेषुचतुर्दशस्वंतर्भावमाह अंगानीति अंगानिशिक्षाकल्पज्योतिश्छंदोनिरुक्तव्याकरणानिषट् चतुरःचत्वारः धर्मशास्त्रंमन्वादिप्रोक्तंस्मृतिशास्त्रम् २५ केवलंदृष्टार्थविद्यास्थानमायुर्वेदादिचतुष्कंब्रुवन्धर्मविद्यास्थानैःसहाष्टादशविद्यास्थानान्याह आयुरिति आयुर्वेदोष्टांगंचिकित्साशास्त्रंधन्वंतरिप्रोक्तम् धनुर्वेदंभृगुप्रोक्तंचतुर्विधमायुधसंधानमोक्षादिविषयम् गांधर्ववेदोभरतमुनिप्रणीतोनृत्यगीतादिविषयःअर्थशास्त्रंबार्हस्पत्यादिनीतिशास्त्रंपूर्वोक्ताश्चतुर्दशेत्यष्टादशविधाइति २६ वेदशाखाप्रसंगात्तद्रष्टॄणामप्यृषीणांभेदानाह ज्ञेयाइति २७ उपसंहरति इतीति प्रसंख्याताःसंख्ययाप्रोक्ताः शाखाभेदाश्चनामतउक्ताः भेदहेतुः पुरुषाणामल्पप्रज्ञत्वादिः २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाखानांपुरुषप्रणीतत्वेनवेदस्यपौरुषेयत्वंस्यादित्यतआह प्राजापत्येति कल्पादौप्रजापतिनादृष्टाश्रुतिर्नित्यैवइमेतुशाखाभेदास्तस्यएवविकल्पास्तद्ग्रहणसौकर्यार्थमवांतरभेदानत्वपूर्वां पुरुषैःकृताइत्यर्थः २९ ३० इतिश्रीविष्णुपुराणेतृतीयांशेशष्ठोध्यायः ६ । वेदशाखाप्रणयनमुक्तंकर्त्रादिभेदतः अथतांत्रिकधर्मश्चसेतिहासोत्रवर्ण्यते १ भूगोलादिप्रसंगानुप्रसंगादनुवर्ण्यते सद्वृतितस्थंजंतूनांभगवद्धर्मसंगतः उक्तमभिनंदन्श्रुतिस्मृतिसारभूतंधर्मंपृच्छति यथावदितिसप्तभिः १ पातालवीथ्यःभूविवरपंक्तयः सप्तलोकाःस्वर्गादयः २ एतत्सप्तद्वीपादिरूपंसर्वम् ३ ४ ५ ६ ७ अयमेवप्रश्नःप्रष्टव्योर्योनकुलेनभीष्मंप्रतिपृष्टस्ततश्चसभीष्मस्तंप्रतियत्प्राहतच्छृणुष्वशृणु ८ सकालिंगकोद्विजोमामुवाचमयाजातिस्मरोमुनिःपृष्टइति ९ तेनजातिस्मरेण

संबद्धंकिमन्यत्कथयामिते ३० । । इतिश्रीविष्णुपुराणेतृतीयेंशेषष्ठोध्यायः ६ । । मैत्रेयउवाच । । यथावत्कथितंसर्वंयत्पृष्टोऽसिमयाद्विज श्रोतुमिच्छाम्यहंत्वेकंतद्भवान्प्रब्रवीतुमे १ सप्तद्वीपानिपातालवीथ्यश्चसुमहामुने । सप्तलोकायेंतरस्थाब्रह्मांडस्यास्यसर्वतः २ स्थूलैःसूक्ष्मैस्तथा स्थूलसूक्ष्मैःसूक्ष्मतरैस्तथा। स्थूलास्थूलतरश्चैतत्सर्वंप्राणिभिरावृतम् ३ अंगुलस्याष्टभागोऽपिनसोऽस्तिमुनिसत्तम। नसंतिप्राणिनोयत्रकर्मबंधनि बंधनाः ४ सर्वेचैतेवशंयांतियमस्यभगवन्किल । आयुषोंतेनतेयांतियातनास्तत्प्रचोदिताः ५ यातनाभ्यःपरिभ्रष्टादेवाद्यास्वथयोनिषु । जंतवःपरि वर्तंतेशास्त्राणामेषनिर्णयः ६ सोऽहमिच्छामितच्छ्रोतुंयमस्यवशवर्तिनः । नभवंतिनरायेनतत्कर्मकथयामलम् ७ । । पराशरउवाच । । अयमेवमुनेप्रश्नोनकुलेनमहात्मना । पृष्टःपितामहःप्राहभीष्मोयत्तच्छृणुष्वमे ८ । । भीष्मउवाच । । पुराममागतोवत्ससखाकालिंगको द्विज । समामुवाचपृष्टोवैमयाजातिस्मरोमुनिः ९ तेनाख्यातमिदंचेदमित्थंचैतद्भविष्यति । तथाचतदभूद्वत्सयथोक्तंतेनधीमता १० सपृष्टश्चम याभूयःश्रद्दधानवताद्विज । यद्यदाहनतद्दृष्टमन्यथाहिमयाक्वचित् ११ एकदातुमयापृष्टंयदेतद्भवतोदितम् । प्राहकालिंगकोविप्रःस्मृत्वातस्यमुने र्वचः १२ जातिस्मरेणकथितोरहस्यःपरमोमम । यमकिंकरयोर्योऽभूत्संवादस्तंब्रवीमिते १३ कालिंगउवाच । स्वपुरुषमभिवीक्ष्यपाशहस्तंवदति यमःकिलतस्यकर्णमूले । परिहरमधुसूदनप्रपन्नान्प्रभुरहमास्मिनृणांनवैष्णवानाम् १४ अहममरगणार्चितेनधात्रायमइतिलोकहिताहितेनियुक्तः।

इदमिदंवर्तमानमेतदित्थमेवंलक्षणंभविष्यतीतिचकलिंगकस्थानेयदाख्यातंतेनचकालिंगकेनमह्यंयथोक्तंतथैवतदभूत् हेवत्सनकुलेत्यन्वयः १० श्रद्दधानमनोयुक्तेनसकालिंगकोद्विजोभूयः पुनःपृष्टःसञ्जातिस्मरवाक्यंयद्यदाहतदन्यथाव्यभिचारिमयानदृष्टमित्यतिविश्वासार्थमुक्तम् ११ प्रकृतमाह एकदेति तस्यजातिस्मरस्यमुनेः १२ तदेवाह जातीति तंसंवादंसंवादविषयार्थं १३ तमेवाह स्वपुरुषमित्यादिसोऽन्यलोकइत्यंतैरेकविंशत्याश्लोकैः पापिजनानयनायउद्यतंपाशहस्तंस्वपुरुषमभिवीक्ष्यविष्णुभक्तान्परित्यज्यान्यानानयेतिस्वप्रतापभंगाभियाआतिरहस्यतयाचक र्णमूलेवदतिस्म १४ नवैष्णवानांप्रभुरित्यत्रहेतुमाह अहमिति प्रजासंयमनायमइतिसंज्ञयालोकहिताहितेशुभाशुभफलदानार्थंधात्रानियुक्तोपिहरिरेवगुरुस्तद्वशगोऽस्मिनस्वतंत्रःयतोममापि संयमनेदंडेविष्णुःप्रभवति हितायसंनियुक्तइतिपाठेदंडोपिपापक्षपणार्थतयाहितएवतस्माअपिसर्वोत्पत्तिप्रलयहेतुत्वेनसर्वात्मकत्वात्सर्वनियंतृत्वेनेत्यर्थः १५ तत्रहेतुमाह कटकेतिद्वाभ्याम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कटकोवलयः कर्णिकाकर्णभूषणम् कटकादिभेदैर्नानारूपैःकार्यैरुपलक्षितमपिअभेदंकारणात्मनाएकमेवेष्यतेयथानथैकएवजगत्कारणभूतोहरिः सुरादिभेदैरुदीर्यते १६ किंचभेदस्य मायौपाधिकत्वान्मायानाशेतुविष्णुरेकएवेत्याह क्षितीति अनिलोद्धूताः क्षितिजलपरमाणवोयथाअनिलस्यांतेअवसानेधरित्र्यादिनासहैकतांयांतितथागुणानांकलुषेणकालुष्येणक्षोभेणयेसुराद योजाताः अंतेगुणक्षोभोपरमेतेनविनासहैकतांयांतीत्यन्वयः १७तर्हियमस्यापिनियंतुर्भक्तिःकथंमनुष्यसाध्येत्यतआह हरिमिति परमार्थतःसर्वात्मत्वेनहरिंयः प्रणमतितंपरित्यज्यव्रज यद्वाहरि प्रणतिमात्रेणपरमार्थतःतमपगतसमस्तपापबंधामित्यन्वयः अग्निदृष्टांतेनभक्तसंसर्गिणोपिव्याज्याइत्युक्तम् येन्येचपापायदपाश्रयाश्रयाःशुध्यंतीतिशुकोक्तेः १८ समस्तस्यधातुःपालकस्य १९ उच्चैरतिशयेनसितंशुद्धंरागादिहीनंमनोयस्यतंविष्णुभक्तंविद्धि भक्तौहेतुंवदन्विशिनष्टि नचलतीति हरेराज्ञेयमितिबुद्ध्यानिजवर्णाश्रमधर्मतोयोनचलतितम् भक्तेश्चिह्नान्याह समम

हरिगुरुवशगोऽस्मिनस्वतंत्रःप्रभवतिसंयमनेममापिविष्णुः १५ कटकमुकुटकर्णिकादिभेदैःकनकमभेदमपीष्यतेयथैकम् । सुरपशुमनुजादिकल्प नाभिर्हरिरखिलाभिरुदीर्यतेतथैकः १६ क्षितिजलपरमाणवोनिलांतेपुनरपियांतियथैकतांधरित्र्या । सुरपशुमनुजादयस्तथांतेगुणकलुषेणसनातने नतेन १७ हरिममरगणार्चितांघ्रिपद्मंप्रणमतियःपरमार्थतोहिमर्त्यः । तमथगतसमस्तपापबंधंव्रजपरिहृत्ययथाग्निमाज्यसिक्तम् १८ । । इतिय मवचनंनिशम्यपाशीयमपुरुषस्तमुवाचधर्मराजम् । कथयममविभोःसमस्तधातुर्भवतिहरेःखलुयादृशोऽस्यभक्तः १९ । । यमउवाच । । नच लतिनिजवर्णधर्मतोयःसममतिरात्मसुहृद्विपक्षपक्षे । नहरतिनचहंतिकिंचिदुच्चैःसितमनसंतमवेहिविष्णुभक्तम् २० कलिकलुषमलेनयस्यना त्माविमलमतेर्मलिनीकृतोस्तमोहे । मनसिकृतजनार्दनंमनुष्यंसततमवेहिहरेरतीवभक्तम् २१ कनकमपिरहस्यवेक्ष्यबुद्ध्यातृणमिवयःसमवै तिवैपरस्वम् । भवतिचभगवत्यनन्यचेताःपुरुषवरंतमवेहिविष्णुभक्तम् २२ स्फटिकगिरिशिलामलःक्वविष्णुर्मनसिनृणांक्वचमत्सरादिदोषः । न हितुहिनमयूखरश्मिपुंजेभवतिहुताशनदीप्तिजःप्रतापः २३ विमलमतिविमत्सरःप्रशांतःशुचिचरितोखिलसत्त्वमित्रभूतः । प्रियहितवचनोस्तमान मायोवसतिसदाहृदितस्यवासुदेवः २४ वसतिहृदिसनातनेचतस्मिन्भवतिपुमाञ्जगतोऽस्यसौम्यरूपः । क्षितिरसमतिरम्यमात्मनोंतःकथयतिचा

तिरिति २० तेष्वपिअस्तमोहेमनसिसततंकृतजनार्दनमतीवभक्तमवेहि किंविशिष्टंकलौवर्तमानस्ययस्यतत्कृतेनपाप्मनात्माबुद्धिर्नमलीनीकृतस्तम् २१ नाहरतीतियदुक्तंताद्विशेषमाह कनकमिति कनकमपिरहस्यपिदृष्ट्वापरस्वंतृणमिवयःसमभैतिजिघृक्षाविमुखोभवतीत्यर्थः अथवाभगवतिअनन्यचेताभवतितम् २२ सितमनसामितिविशेषणंयदुक्तंतदेवकशब्दाभ्यांस्प ष्टयति स्फटिकेतिस्फटिकगिरिशिलेवामलः तुहिनमयूखश्चंद्रस्तस्यरश्मिपुंजेमत्सरादिजदोषस्यविष्णोश्चविरोधोक्त्यातद्दोषरहितस्यैवविष्णुभक्तत्वमित्युक्तंभवति २३ तदेवविधिमुखेनविवृणो ति विमलमतिरिति शुचिशुद्धंचरितंयस्य अखिलानांसत्त्वानांमित्रभूतःअस्तेनिरस्तेमानमायेगर्वालीकेयेनसः २४ तस्यप्रसन्नाताचचिह्नमित्याह वसतीति उक्तमर्थमर्थांतरन्यासेनसमर्थयति क्षितिरसमिति शालपोतोबालतरुशालतरुःचारुतयासुकुमारतयैवरम्यांक्षितिरसंस्वस्यांतर्यथाकथयतिअनुमापयतिएवंसर्वभूतेषुसौम्यतयाविष्णुभक्तोपिविष्णुंहृदिवसंतंसूचयतीत्यर्थः २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यमनियमेति अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाः शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाः धनादिसंपत्समुत्सिक्तोमनसउल्लासोमदः आत्मनिपूज्यताबुद्धिर्मानः पर शुभद्वेषोमत्सरः २६ अपगतकल्मषत्वमेवाह हृदीति असिस्थानेअरीतिक्वचित्पाठः तत्तर्ह्यघानांपापानांविघातकर्ताहरिस्तेनभिन्नंनाशितंसदघंकथंभवतिबलवद्विरोधिनिसत्यपरंनतिष्ठती त्यर्थोतरेणस्पष्टयति कथमिति २७ इदानींभक्तलक्षणान्याहहरतीतिचतुर्भिः २८ सतांविनिंदांकुरुते संतमर्थंनददाति यद्वासंतंविष्णुंतद्भक्तंवानयजतिनपूजयतिनचतस्मैददाति २९ पर

रुतयैवशालपोतः २५ यमनियमविधूतकल्मषाणामनुदिनमच्युतसक्तमानसानाम् । अपगतमदमानमत्सराणांव्रजभटदूरतरेणमानवानाम् २६ हृदियदिभगवाननादिरास्तेहरिरसिशंखगदाधरोव्ययात्मा । तदघमघविघातकर्तृभिन्नंभवतिकथंसतिवांधकारमर्के २७ हरतिपरधनंनिहंतिजंतू न्वदतितथानिशांनिष्ठुराणियश्च । अशुभजनितदुर्मदस्यपुंसःकलुषमतेर्हृदितस्यनास्त्यनंतः २८ नसहतिपरमंपदंविनिंदांकलुषमतिःकुरुतेसता मसाधुः । नयजतिनददातियश्चसंतंमनसिनतस्यजनार्दनोऽधमस्य २९ परमसुहृदिबांधवेकलत्रेसुततनयापितृमातृभृत्यवर्गे । शठमतिरुपयाति योऽर्थतृष्णांतमधमचेष्टमवेहिनास्यभक्तम् ३० अशुभमतिरसत्प्रवृत्तिसक्तःसततमनार्यविशालसंगमत्तः । अनुदिनकृतपापबंधयत्नःपुरुषपशुर्न हिवासुदेवभक्तः ३१ सकलमिदमहंचवासुदेवःपरमपुमान्परमेश्वरःसएकः । इतिमतिरमलाभवत्यनंतेहृदयगतेव्रजतान्विहायदूरान् ३२ कमल नयनवासुदेवविष्णोधरणिधराच्युतशंखचक्रपाणे । भवशरणमितीरयंतियेवैत्यजभटदूरतरेणतानपापान् ३३ वसतिमनसियस्यसोऽव्ययात्मापु रुषवरस्यनतस्यदृष्टिपाते । तवगतिरथवाममास्तिचक्रप्रतिहतवीर्यबलस्यसोऽन्यलोक्यः ३४ । । कालिंगउवाच । । इतिनिजभटशासनाय देवोरवितनयःसकिलाहधर्मराजः । ममकथितमिदंचतेनतुभ्यंकुरुवरसम्यगिदंमयापिचोक्तम् ३५ । । भीष्मउवाच । । नकुलैतन्ममाख्यातं पूर्वंतेनद्विजन्मना । कलिंगदेशादभ्येत्यप्रीयतासुमहात्मना ३६ मयाप्येतद्यथान्यायंसम्यग्वत्सतवोदितम् । यथाविष्णुमृतेनान्यत्राणंसंसारसाग रे ३७ किंकरादंडपाशौवानयमोनचयातनाः । समर्थास्तस्ययस्यात्माकेशवालंबनःसदा ३८ । । पराशरउवाच । । एतन्मुनेतवाख्यातेगी

मसुहृदादिषुशठमतिःसन्नर्थतृष्णांकरोतिअर्थात्तेभ्यएवार्थग्रहीतुंवाञ्छति यद्वापरमसुहृदादौतेषांनिमित्तमन्यायेनाप्यर्थतृष्णांकरोति ३० अनार्यैर्विशालोदीर्घकालोयःसंगस्तेनमत्तः अना र्यविशीलेतिपाठेनीचैर्दुःशीलैश्चयःसंगस्तेनमत्तइत्यर्थः ३१ उक्तमभक्तचिह्नंभक्तचिह्नमाह सकलमिति ३२ तन्नामकीर्त्तनंतदेकशरणताचैकांतभक्तचिह्नमित्याह कमलनयनेति ३३ दू रतरेणत्यजेतियदुक्तंतत्रहेतुमाह वसतीति तस्यदृष्टिपातंयावच्चक्रभ्रमणादतस्तच्चक्रेणप्रतिहतेवीर्यबलेयस्यतस्यतवममचदृष्टिपातविषयेपापिजनानयनेपिनगतिरस्तिसपुनरन्यलोक्यःवैकुंठवा साईःनास्मल्लोकयोग्यः ३४ मममह्यम् तेनजातिस्मरेण कुरुवरहेभीष्म ३५ ३६ ३७ तस्यतंवशीकर्तुंनसमर्थाः केशवालंबनःकेशवाश्रयः ३८ ३९ । । इतिश्रीरत्नगर्भभट्टाचार्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतायांवैष्णवाकूतचंद्रिकायांतृतीयेंशेटीकायांसप्तमोध्यायः यमगीतासमाप्ता ७ । । विष्णोराराधनोपायोनिजधर्मप्रसंगतः सगरौर्वीयसंवादनवाध्याय्यानिरूप्यते १ यथायत्प्रकारेणधर्मेण विष्णोराराधनपरैराज्ञानुष्ठानतत्परैः १ २ ३ ४ ५ स्वर्गिवंद्यंब्रह्मलोकादिपदम् ६ यावद्यत्संख्याकंभूरिस्वल्पंचेतिप्रमाणतः ७ ८ वर्णाश्रमाचारवतेत्यधिकारिविशेषणाद्वेदोक्तेतदविरुद्ध पुराणागमाद्युक्ताचारवानेवतत्राधिकारीनविगीताचारः अन्यःश्रुत्युक्तधर्मपरित्यागेनतद्व्रतधारणश्रवणकीर्तनादिरूपःपंथानभवति ९ यज्ञान्यष्टव्यानिंद्रादीन्यजान्विष्णुंयजति यंकंचनजप

तंवैवस्वतेनयत् । त्वत्प्रश्नानुगतंसम्यक्किमन्यच्छ्रोतुमिच्छसि ३९ । । इतिश्रीविष्णुपुराणेतृतीयेंशेसप्तमोध्यायः ७ । । । मैत्रेयउवाच । भगवन्भगवान्देवःसंसारविजिगीषुभिः । ममाख्याहिजगन्नाथोविष्णुराराध्यतेयथा १ आराधताञ्चगोविंदादाराधनपरैर्नरैः । यत्प्राप्यतेफलंश्रोतुंतवेच्छामिमहामुने २ । । पराशरउवाच । । यत्पृच्छतिभवानेतत्सगरेणमहात्मना । और्वआहयथापृष्टस्तन्मेकथयतःशृणु ३ सगरःप्रणिपत्येदमौर्वंपप्रच्छभार्गवम् । विष्णोराराधनोपायसंबद्धंमुनिसत्तम ४ फलंचाराधितेविष्णौयत्पुंसामभिजायते । सचाहपृष्टोयत्तेनतन्मैत्रेयाखिलंशृणु ५ । । और्वउवाच । । भौमान्मनोरथान्त्सर्वान्स्वर्गिवंद्यंतथास्पदम् । प्राप्नोत्याराधितेविष्णौनिर्वाणमपिचोत्तमम् ६ यद्यदिच्छतियावच्च फलमाराधितेऽच्युते । तत्तदाप्नोतिराजेंद्रभूरिस्वल्पमथापिवा ७ यत्तुपृच्छसिभूपालकथमाराध्यतेहिसः । तदहंसकलंतुभ्यंकथयामिनिबोधमे ८ वर्णाश्रमाचारवतापुरुषेणपरःपुमान् । विष्णुराराध्यतेपंथानान्यस्तत्तोषकारणम् ९ यजन्यज्ञान्यजत्येनंजपत्येनंजपन्नृप । ध्वंस्तथान्यंहिनस्त्येनंसर्वभूतोयतोहरिः १० तस्मात्सदाचारवतापुरुषेणजनार्दनः । आराध्यतेस्ववर्णोक्तधर्मानुष्ठानकारिणा ११ ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चधरणीपते । स्वधर्मतत्परोविष्णुमाराधयतिनान्यथा १२ परापवादपैशून्यमनृतंचनभाषते । अन्योद्वेगकरंचापितोष्यतेतेनकेशवः १३ परपत्नीपरद्रव्यपरहिंसासुयोमतिम् । नकरोतिपुमान्भूपतोष्यतेतेनकेशवः १४ नताडयातिनोहंतिप्राणिनोन्यांश्चदेहिनः । योमनुष्योमनुष्येंद्रतोष्यतेतेनकेशवः १५ देवद्विजगुरूणांयःशुश्रूषासुसदोद्यतः । तोष्यतेतेनगोविंदःपुरुषेणनरेश्वर १६ यथात्मनिचपुत्रेचसर्वभूतेषुयस्तथा । हितकामोहरिस्तेनसर्वदातोष्यतेसुखम् १७ यस्यरागादिदोषेणनतुष्टंनृपमानसम् । विशुद्धचेतसाविष्णुस्तोष्यतेतेनसर्वदा १८ वर्णाश्रमेषुयेधर्माःशास्त्रोक्तानृपसत्तम । तेषुतिष्ठ

न्विष्णुमेवजपतिअन्यंघ्नन्विष्णुमेवहंति यतःपूज्यवध्यादिसर्वरूपोविष्णुः १० तस्मात्तदाज्ञयावर्णाश्रमधर्मान्यागादीन्सदाचारंचकुर्वताविष्णुराराध्यतेतोष्यते सदाचारोऽविगतिशिष्टाचारः ११ उक्तमर्थमेवाधिकारिदर्शनपूर्वकंव्यतिरेकमुखेनद्रढयति ब्राह्मणइति १२ तत्रसाधारणधर्मानाह परेत्यादिषड्भिः परस्यापवादंसमक्षनिंदाम् पैशुन्यंपरोक्षेदोषकथनम् १३ १४ नहंतिनप्राणान्वियोजयतिप्राणिनोजंगमानान्यान्देहिनःस्थावरान् एतेषांनियमेनक्रियमाणानांधर्मत्वेनहरितोषणत्वात् चित्तशोधकत्वम् १५ १६ १७ १८ इदानींहरितोषकान्त्साधारणध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मानाह वर्णेति तिष्ठन्तितिहेतौशतृप्रत्ययः तेषुस्थितिस्तदनुष्ठानमाराधनहेतुरित्यर्थः १९ तत्तर्हितान्श्रोतुमिच्छामिब्रवीहिब्रूहित्यर्थः २० २१ तत्रब्राह्मणस्यावश्यकान्धर्मानाह दानमिति दद्यात्कुर्यात् नित्योदकीनित्यस्नानतर्पणादिकृद्यथाधिकारमौपासनाग्नेस्त्रेतादीनांवापरिग्रहम् २२ धर्मोपार्जननियमानाह वृत्त्यर्थमिति प्रतिग्रहादानंप्रतिग्राह्यस्यगवादेरादानंग्रहणंगुर्वर्थंगुरुरर्थोयस्मिंस्तत् शुक्लार्थादितिपाठे शुक्लःशुद्धोर्थोयस्यतस्माद्विप्रादेः क्रमागतंप्रीतिदायंप्राप्तंचसहभार्यया अविशेषेणसर्वेषांधनंशुल्कमुदाहृतमितिविष्णुवचनात् शुल्कार्थमितिपाठे शुल्कधनोपार्जननिमित्तमित्यर्थः तत्रापिन्यायतःकालपुरुषादिप्रतिग्रहंविनाद्विजोब्राह्मणः २३ २४ ग्राव्णिपाषाणेपारक्येपरकीयेरत्नेवा अस्यब्राह्मणस्येत्युपलक्षणम् पत्न्यामृतावभिगमःशास्यतेश्रुत्याम्यनुज्ञायतेनतुनियम्यते ऋतौभार्यामुपेयादितिश्रुतौपरिसंख्यायाउक्तत्वात् परिसंख्यानियमयोर्भेदात् तथाहिभट्टपादाः विधिरत्यंतमप्राप्तौनियमःपाक्षिकेसति तत्रचान्यत्रचप्राप्तौपरिसंख्येनिगीयतइति अस्यार्थः स्वर्गोपायभूतज्योतिष्टोमस्यात्यंतमप्राप्तस्यप्रापणंविधिः यथाग्निष्टोमेनयजेतेत्यादिः पाक्षिकप्राप्तौसत्यामप्राप्तांशस्यपरिपूरणायनियमेनप्रापणेनियमविधिः यथाव्रीहीनवहंतीत्यत्रवितुषीकरणस्यावहननेननखनिकृंतनादिनाचप्राप्तस्यनखनिकृंतनादिपक्षेपिअवहननस्याप्राप्तांशस्यनियमेनप्रापणम् विधेयस्यतत्रचात्रचप्राप्तौप्राप्तियोग्यतायांअन्यतरनिवृत्तयेपुनःप्रापणंपरिसंख्या यथापंचपंचनखाभक्ष्याऋतौभार्यामुपेयादिति अत्रपंचनखभक्षणादेर्लोकतएवप्राप्तस्याज्ञातत्वाभावात् तत्रस्मृतेरज्ञातज्ञापकत्वलक्षणस्यप्रामाण्यस्यासंभवेनस्वा

न्नरोविष्णुमाराधयतिनान्यथा १९ । । सगरउवाच । । तदहंश्रोतुमिच्छामिवर्णधर्मानशेषतः । तथैवाश्रमधर्मांश्चद्विजवर्यब्रवीहितान् २० । और्वउवाच । । ब्राह्मणक्षत्रियविशांशूद्राणांचयथाक्रमम् । त्वमेकाग्रमनाभूत्वाशृणुधर्मान्मयोदितान् २१ दानंदद्याद्यजेद्देवान्यज्ञैःस्वाध्यायतत्परः । नित्योदकीभवेद्विप्रःकुर्याच्चाग्निपरिग्रहम् २२ वृत्त्यर्थंयाजयेच्चान्यानन्यानध्यापयेत्तथा । कुर्यात्प्रतिग्रहादानंगुर्वर्थंन्यायतोद्विजः २३ सर्वभूतहितंकुर्यान्नाहितंकस्यचिद्द्विजः । मैत्रीकर्मसमस्तेषुब्रह्माणस्योत्तमंधनम् २४ ग्राव्णिरत्नेचपारक्येसमबुद्धिर्भवेद्द्विजः । ऋतावभिगमःपत्न्यां

र्थत्यागात् पंचातिरिक्तपंचनखभक्षणनिषेधादिरूपान्यार्थकल्पनंयुक्तं तत्रउक्तरूपप्रामाण्यसत्त्वात्तदनुरोधेनरागतःप्राप्तस्यबाधोपिन्याय्यएव अतएवनस्वार्थत्यागान्यार्थकल्पननिषेधप्रतियोगिप्रापकप्रमाणबाधकत्वलक्षणदोषत्रयवत्त्वम् एवंश्रौतोदाहरणेपिइमामगृभ्णन्रशनामृतस्येतिपश्वाभिधानीमादत्तइत्यत्राक्रतुफलसाधनाश्वमेधसंबंधिनः पशोरशनांगृहीतवंतइत्येवमर्थकस्यमंत्रस्यार्थप्रकाशनसामर्थ्यलक्षणेनलिंगेनाश्वरशनादानेगर्दभादिरशनादानेचोभयत्रश्रुतेरप्राप्तप्रापकत्वलक्षणप्रामाण्यप्राप्तस्यसंभवान्नतदनुरोधेनस्वार्थत्यागस्ततश्चान्यार्थकल्पनाप्राप्तबाधोनास्तीतिनदोषस्यगंधोपि तर्हिअज्ञातज्ञापकत्वलक्षणप्रामाण्यस्यसर्वत्राविशेषादपूर्वविधिनियमपरिसंख्याविधीनांकोभेदइतिचेन्न प्रमाणांतराद्योग्येउपायेऽपूर्वविधिः पाक्षिकप्राप्तेनियमविधिः श्रुत्यपेक्षयाविलंबितप्रत्यायकप्रमाणेनोभयत्रप्राप्तियोग्यतयापरिसंख्याविधिरितिपूर्वमेवोक्तत्वात् अथापूर्वविधिवत्परिसंख्याविधेरपिअप्राप्तप्रापकत्वेनचारितार्थत्वादन्यनिवृत्तिःफलंतस्यनस्यादितिचेन्न लिंगेनप्राप्स्यतोऽर्थस्यश्रुत्यापूर्वप्रतिपादनवैय्यर्थ्यादन्यनिवृत्तिरूपफलस्यावश्यकत्वात् तथाहि श्रुत्या अश्वरशनादानेविनियुक्तस्यमंत्रस्यपश्चाल्लिंगेनविनियोगासंभवादन्यनिवृत्तिःसुतरांसिद्धैव सैवपरिसंख्याफलम् अपूर्वविधेस्तुअग्निष्टोमादिषुप्रवृत्तिजननस्यसंभवान्नान्यफलाकांक्षेति अतएवभट्टपादाःस्वयमाहुःतंत्रवार्तिके अज्ञातविधिरेकायमतोमंत्रस्यनिश्चितु परिसंख्याफलेनोक्तानविशेषःपुनःश्रुतेति लिंगजन्यभविष्यत्पुनःश्रवणस्यतत्प्रथमतत्तच्छ्रुतिजन्यश्रवणस्यप्रवृत्तिलक्षणफलमात्रेविशेषाभावाच्छ्रुतिजन्यश्रवणस्यान्यनिवृत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलरूपमस्त्येवेत्यवश्यंकल्पनीयमित्यर्थः केचित्तुभट्टमतेपरिसंख्यायाःस्मार्तोदाहरणंनास्तीतिवदंति तत्रपंचपंचनखाभक्ष्याइत्यादिषुउक्तप्रकारेणदोषत्रयाभावात्परिसंख्योदाहरणलेप्यदोषा
त्भेदेनैवपरिसंख्यालक्षणस्यसामान्येनोक्तत्वात् एवमृतौभार्यामुपेयादित्यत्रऋतुकालाऋतुकालयोर्नित्यवत्प्राप्ततयाऽप्राप्तांशपूरणलक्षणफलाभावान्नियमविध्यसंभवेनपरिसंख्यैव तर्हिऋतु
स्नातांतुयोभार्यांसन्निधौनोपगच्छति घोरायांभ्रूणहत्यायांपच्यतेनात्रसंशयइतिदोषश्रवणंनस्यान्निषदोषः मनसिकामेसत्यापितस्यांद्वेषादिनातामनुगच्छतोदोषश्रवणोपपत्तेरितिसंक्षेपः लोकेव्य
वायामिषमद्यसेवानित्यास्तुंजतोर्नहितत्रचोदनेत्यादिशुकोक्तेश्च २५ क्षत्रियधर्मानाह दानानीतिचतुर्भिः २६ शस्त्राजीवोयुद्धजीविका तस्यक्षत्रियस्य प्रथमेकल्पेपक्षेपृथिवीपालनंकर्माभिधीयत
इतिशेषः २७ अत्रहेतुर्धरित्रीति भवंतिनृपतेरंशाः पुण्यात्षड्गुणमादत्तेधर्मेणपरिपालयन्नित्यादिस्मृतेः स्वयमेकेनानुष्ठितधर्मात्प्रतिपालितविप्राद्यनुष्ठितधर्मषष्ठांशोभूयानितिभावः २८ वर्णा
नांसंस्थामर्यादातांकरोतितथा वर्णसंस्कारकइतिपाठेसंस्कारकोगुणाधानकर्ता २९ वैश्यधर्मानप्याहपाशुपाल्यमितिद्वाभ्याम् ३० ३१ शूद्राणामप्याह द्विजातीति द्विजातिसंश्रयंत्रैवर्णि

शस्यतेचास्यपार्थिव २५ दानानिदद्यादिच्छातोद्विजेभ्यःक्षत्रियोपिहि । यजेच्चविविधैर्यज्ञैरधीयीतचपार्थिव २६ शस्त्राजीवोमहीरक्षाप्रवरातस्यजी
विका । तस्यापिप्रथमेकल्पेपृथिवीपरिपालनम् २७ धरित्रीपालनेनैवकृतकृत्योनराधिपः । भवंतिनृपतेरंशायतोयज्ञादिकर्मणाम् २८ दुष्टानांत्रा
सनाद्राजाशिष्टानांपरिपालनात् । प्राप्नोत्यभिमतांल्लोकान्वर्णसंस्थाकरोन्नृपः २९ पाशुपाल्यंवणिज्यंचकृषिंचमनुजेश्वर । वैश्यायजीविकांब्रह्माददौ
लोकपितामहः ३० तस्याप्यध्ययनंयज्ञोदानंधर्मश्चशस्यते । नित्यनैमित्तिकादीनामनुष्ठानंचकर्मणाम् ३१ द्विजातिसंश्रयंकर्मतादर्थ्यंतेनपोषण
म् । क्रयविक्रयजैर्वापिधनैःकारूद्भवेनवा ३२ दानंचदद्याच्छूद्रोपिपाकयज्ञैर्यजेतवा । पित्र्यादिकंचवैसर्वंशूद्रःकुर्वीततेनवै ३३ भृत्यादिभरणार्थायस
र्वेषांचपरिग्रहः । ऋतुकालाभिगमनंस्वदारेषुमहीपते ३४ दयासमस्तभूतेषुतितिक्षानाभिमानिता । सत्यंशौचमनायासोमंगलंप्रियवादिता ३५
मैत्र्यस्पृहातथातद्वदकार्पण्यंनरेश्वर । अनसूयाचसामान्यावर्णानांकथितागुणाः ३६ आश्रमाणांचसर्वेषामेतेसामान्यलक्षणाः । गुणांस्तथापद्धर्मांश्च

कशुश्रूषालक्षणंकर्म तादर्थ्यंतत्पारतंत्र्यंचस्वधर्मः तेनद्विजशुश्रूषालब्धेनात्मपोषणंमुख्यम् आपदितुक्रयविक्रयजैर्वाणिज्यलब्धैस्तदसंभवेतक्षादिकारुकर्मोद्भवेनद्रव्येणपोषणम् शूद्रस्य
द्विजशुश्रूषातयाजीवन्नहीयतेइतिमनूक्तेः ३२ पाकयज्ञैर्वैश्वदेवाख्यैः नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेदितियाज्ञवल्क्योक्तेः पित्र्यादिकंश्राद्धादि तेनद्विजशुश्रूषालब्धेनद्रव्येणकुर्वीत ३३
पुनःसर्वेषांसाधारणधर्मानाह भृत्यादीतिअक्षरद्वयाधिकैः सार्धैस्त्रिभिः एतेपरिग्रहाद्याःसर्वेषांसामान्यलक्षणागुणाइतिचतुर्थेनान्वयः परिग्रहोर्थसंपादनम् ३४ दयापरदुःखप्रहरणेच्छा तिति
क्षाशीतोष्णादिद्वंद्वसहिष्णुता अनभिमानिताआत्मनिश्रेष्ठत्वाद्यभिमानशून्यता सत्यंयथार्थकथनम् शौचंमृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरमितिद्विविधम् शारीरंपीड्यतेयेनसुशुभेना
पिकर्मणा अत्यंततन्नकर्तव्यमनायासःसउच्यतेइत्यनायासः मंगलंशिरःसपुष्पंचरणौसुपूजितावित्याद्युक्तम् ३५ मैत्रीसर्वमित्रभावेनवर्त्तनम् अस्पृहाप्राणयात्रामात्रनिमित्तादन्यत्रानाभिला
षः यदुक्तंअत्युष्णात्सघृतादन्नादच्छिद्राच्चैववाससः अपरप्रेष्यभावाच्चभूयइच्छन्पतत्यधइति अकार्पण्यंयथाशक्तिदानम् अनसूयागुणेषुदोषारोपाभावः ३६ ३७ उक्तरीत्यावैश्यस्यशूद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मप्राप्तौतन्निषेधमाह शूद्रकर्मेति एतयोःक्षत्रियवैश्ययोः ब्राह्मणस्याप्युपलक्षणम् ३८ उभाभ्यांक्षत्रियवैश्याभ्यांब्राह्मणेनापिशक्तस्यमुख्यकल्पनिर्बंधः अशक्तस्यत्वनुकल्पाश्रयएव कर्म संकरंवृत्योर्व्यतिकरम् ३९ उक्तानुवादपूर्वकमाश्रमाधर्मान्वक्तुंप्रतिजानीते ४० इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांतृतीयेंशेअष्टमोध्यायः ८ निरुच्यह रितोपार्थान्वर्णधर्मानशेषतः नद्वादाश्रमधर्माश्चनवमेत्रनिरूपिताः १ व्रतानिप्राजापत्यंतथासौम्यमाग्नेयंवैश्वदैविकमित्यादीनिमधुमांसवर्जनादीनिच चरताकुर्वतावेदोग्राह्यः २ ३ स्थिते ऊर्ध्वाभूतेगुरौशिष्यस्तिष्ठेत् तथाआसतिआसीनेनीचैर्हीनभावेनासीत् प्रतिकूलमेतद्विपरीतंनकुर्यात् ४ तेनैवोक्तःपठेन्नतुशीघ्राध्यापनायगुरुंनियुंजति ५ आचार्येणावगाहिताअपःअवगा

विप्रादीनामिमाञ्शृणु ३७ क्षात्रंकर्मद्विजस्योक्तंवैश्यंकर्मतथापादि । राजन्यस्यचवैश्योक्तंशूद्रकर्मनचैतयोः ३८ सामर्थ्येसतितत्त्याज्यमुभाभ्याम पिपार्थिव । तदेवापादिकर्तव्यंनकुर्यात्कर्मसंकरम् ३९ इत्येतेकथिताराजन्वर्णधर्मामयातव । धर्ममाश्रमिणांसम्यक्ब्रुवतोमेनिशामय ४० इ तिश्रीविष्णुपुराणेतृतीयेंशेअष्टमोध्यायः ८ । । और्वउवाच । । बालःकृतोपनयनोवेदाहरणतत्परः । गुरुगेहेवसेद्भूपब्रह्मचारीसमाहि तः १ शौचाचारवतातत्रकार्यंशुश्रूषणंगुरोः । व्रतानिचरताग्राह्योवेदश्चकृतबुद्धिना २ उभेसंध्येरविंभूपतथैवाग्निंसमाहितः । उपतिष्ठेत्तथाकुर्या द्गुरोरप्यभिवादनम् ३ स्थितेतिष्ठद्व्रजेद्यातिनीचैरासीत्तथासति । शिष्योगुरौनृपश्रेष्ठप्रतिकूलंनसंभजेत् ४ तेनैवोक्तःपठेद्वेदंनान्यचित्तःपुरःस्थितः अनुज्ञातंचभिक्षान्नमश्नीयाद्गुरुणाततः ५ अवगाहेदपःपूर्वमाचार्येणावगाहिताः । समिज्जलादिकंचास्यकल्यंकल्यमुपानयेत् ६ गृहीतग्राह्यवेद श्चततोनुज्ञामवाप्यवै । गार्हस्थ्यमावसेत्प्राज्ञोनिष्पन्नगुरुनिष्कृतिः ७ विधिनावाप्तदारस्तुधनंप्राप्यस्वकर्मणा । गृहस्थकार्यमखिलंकुर्याद्भूपाल शक्तितः ८ निवापेनपितॄनर्चेद्यज्ञैर्देवांस्तथातिथीन् । अन्नैर्मुनींश्चस्वाध्यायैरपत्येनप्राजापतिम् ९ बलिकर्मणाचभूतानिवाक्सत्येनाखिलंजगत् । प्राप्नोतिलोकान्पुरुषोनिजकर्मसमार्जितान् १० भिक्षाभुजश्चयेकेचित्परिव्राड्ब्रह्मचारिणः । तेप्यत्रैवप्रतिष्ठंतेगार्हस्थ्यंतेनवैपरम् ११ मृदाहर णकार्येणतीर्थस्नानायचप्रभो । अटंतिवसुधांविप्राःपृथिवीदर्शनायच १२ अनिकेताह्यनाहारायत्रसायंगृहास्तुते । तेषांगृहस्थःसर्वेषांप्रतिष्ठायो निरेवच १३ तेषांस्वागतदानादिवक्तव्यंमधुरंनृप । गृहागतानांदद्याच्चशयनासनभोजनम् १४ अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्त्तते । सत

हेतकल्यंकल्यंप्रातःप्रातः ६गृहीतोग्राह्योग्रहणार्होवेदोयेनसःनिष्पन्नगुरुनिष्कृतिःदत्तगुरुदक्षिणः७विधिनाब्रह्मार्षादिना स्वकर्मणायाजनादिना ८ निवापेनपिंडदानादिनापितॄनितिपितृयज्ञो दर्शितः यज्ञैर्देवानितिदेवयज्ञः अतिथीनन्नैरितिमनुष्ययज्ञः मुनींश्चस्वाध्यायैरितिब्रह्मयज्ञः अपत्येनप्राजापतिमितिप्रसंगात्ग्रहस्थस्यावश्यकंकर्त्तव्यमित्युक्तम् ९ बलिकर्मणाभूतानीति भूतयज्ञः वाक्सत्येनसत्यवचनेन वात्सल्येनेतिपाठे दातृत्वेनोपकर्तृत्वेनवा १० ११ अटंतिभ्राम्यंति १२ अनिकेताअगृहाः अनाहाराअहारार्थसंचयरहिताःयत्रसायंतत्रैवगृहंयेषांते प्र तिष्ठाआश्रयः योनिर्मातासस्नेहमन्नदानादिनादेहपोषणकृतत्वात् १३ अतस्तेषांगृहागतानांस्वागतोक्तिपूर्वकंमधुरंप्रियंवक्तव्यम् १४ सभग्नाशोतिथिस्तस्मैपापंदत्वेतिनित्यकर्मरूपातिथि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजाभावेनप्रत्यवायोत्पत्तेःपुण्यमादायेतितत्पूजाजन्यपुण्यानुत्पत्तेरेवमुपचर्यते १५ अहंकारआत्मन्युत्कर्षबुद्धिः दंभोलाभार्थधर्माचरणंपरितापोमिथ्यादत्तमित्यनुतापः उपघातःप्रतिघातः ताडनंवाक्पारुष्यंनिष्ठुरता १६ सर्वैर्बंधैर्विमुक्तःसन् १७ कृतंकृत्यंगृहोचितंयेनसः १८ सर्वातिथिपूजकः अतिथिरज्ञातपूर्वः १९ त्रिषवणंस्नानम् त्रिकालंस्नानम् २० अभ्यगतोज्ञातपूर्वः ११ अन्यस्नेहेनेंगुदीतैलादिना तपस्यतस्तपश्चरतः २२ जयेत्प्राप्नुयात् २३ चतुर्थमाश्रमंविश्रामहेतुम् २५ त्रैवर्गिकान्धर्मार्थकामहेतुभूतान्लौकिकवैदिकोद्योगान्त्यक्त्वा ब्रह्मनिष्ठांकुर्यादितिभावः २६ २७ एकरात्रस्थित्यादावपिविशेषमाह तथेति २८ विगताःशांतानिर्वाणाअंगारायस्मिन् भुक्तवंतोजनायस्मिंस्तस्मिन्काले प्रशस्ताःश्रेष्ठास्त्रयोवर्णास्ते

स्मैदुष्कृतंदत्त्वापुण्यमादायगच्छति १५ अवज्ञानमहंकारोदंभश्चैवगृहेसतः । परितापोपघातौचपरुष्यंचनशस्यते १६ यस्तुसम्यक्करोत्येवं गृहस्थःपरमंविधिम् । सर्वबंधविमुक्तोसौलोकानाप्नोत्यनुत्तमान् १७ वयःपरिणतौराजन्कृतकृत्योगृहाश्रमी । पुत्रेषुभार्यांनिक्षिप्यवनंगच्छेत्स हैववा १८ पर्णमूलफलाहारःकेशश्मश्रुजटाधरः । भूमिशायीभवेत्तत्रमुनिःसर्वातिथिर्नृप १९ चर्मकाशकुशैःकुर्यात्परिधानोत्तरीयके । तद्वत्त्रिषवणंस्नानंशस्तमस्यनरेश्वर २० देवताभ्यर्चनंहोमःसर्वाभ्यागतपूजनम् । भिक्षाबलिप्रदानंचशस्तमस्यनरेश्वर २१ वन्यस्नेहेनगात्राणामभ्यंगश्चास्यशस्यते । तपस्यतश्चराजेंद्रशीतोष्णादिसहिष्णुता २२ यस्त्वेतांनियतश्चर्यांवानप्रस्थश्चरेन्मुनिः । सदहत्यग्निवद्दोषाञ्जयेल्लोकांश्चशाश्वतान् २३ चतुर्थश्चाश्रमोभिक्षोःप्रोच्यतेयोमनीषिभिः । तस्यस्वरूपंगदतोममश्रोतुंनृपार्हसि २४ पुत्रद्रव्यकलत्रेषुत्यक्तस्नेहोनराधिप । चतुर्थमाश्रमंस्थानंगच्छेन्निर्धूतमत्सरः २५ त्रैवर्गिकांस्त्यजेत्सर्वानारंभानवनीपते । मित्रादिषुसमोमैत्रःसमस्तेष्वेवजन्तुषु २६ जरायुजांडजादीनांवाङ्मनःकर्मभिःक्वचित् । युक्तंकुर्वीतनद्रोहंसर्वसंगांश्चवर्जयेत् २७ एकरात्रस्थितिर्ग्रामेपंचरात्रस्थितिःपुरे । तथातिष्ठेद्यथाप्रीतिर्द्वेषोवास्यनजायते २८ प्राणयात्रानिमित्तंचव्यंगारेभुक्तवज्जने । कालेप्रशस्तवर्णानांभिक्षार्थंपर्यटेद्गृहान् २९ कृत्वाग्निहोत्रंस्वशरीरसंस्थांशारीरमग्निंस्वमखेजुहोति । विप्रस्तुभिक्षोपगतैर्हविर्भिश्चिताग्निनासव्रजतिस्मलोकान् ३० मोक्षाश्रमंयश्चरतेयथोक्तंशुचिःस्वसंकल्पितबुद्धियुक्तः । अनिंधनंज्योतिरिवप्रशांतंसब्रह्मलोकंजयतिद्विजातिः ३१ । । इतिश्रीमद्विष्णुपुराणेतृतीयेंशेनवमोध्यायः ९ । । सगरउवाच ।

पाम् २९ भिक्षान्नभक्षएवोपासनमाह कृत्वेति अग्निहोत्रंपूर्वंहूयमानंवह्निंस्वशरीरसंस्थंकृत्वाप्राजापत्येष्ट्यनंतरंआत्मन्यग्नीनाधायभिक्षान्नरूपैर्हविर्भिःस्वमुखेकुंडस्थानीयेशरीरंप्राणादियुक्तंजाठरमग्निमुद्दिश्यचिताग्निनाजाठरोग्निर्भुंक्ते नाहमितिचिता चैतन्येनाग्निनाअनुसंधानेनयोजुहोतिसलोकानर्थादग्निहोत्रिणांव्रजतीत्युपासनाफलोक्तिः यद्वालोक्यतइतिलोकोब्रह्मैव बहुलमविवक्षितं विदाग्निनेतिपाठेसएवार्थः ३० इदानीमाश्रमपालनस्यपरमफलमाह मोक्षेति स्वस्मिन्ब्रह्मणिसंकल्पितमिदंविश्वमितिबुद्धियुक्तः ब्रह्मैवलोकस्तं अनिंधनंविधूमम् यथाज्योतिर्विधूममित्यादिश्रुतेः द्विजातिरितिपूर्वश्लोकस्थविप्रस्योक्तिः गतिस्तुर्याश्रमेनास्तिबाहुजोरुजयोःक्वचित् तुर्याश्रमेगतिःप्रोक्तामुखजानांस्वयंभुवेतिदत्तात्रेयोक्तेः ब्राह्मणःप्रव्रजेद्गृहादितिय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मसंवर्त्तबौधायनवचनाच्च ३१ । इतिविष्णुपुराणेतृतीयेंशेनवमोध्यायः ९ । । पुंसःषोडशसंस्कारैर्वर्णाश्रमनिवेशनम् अतस्तानाहदशमेबाहुल्येनद्विजातिषु १ चत्वारआश्रमाएव चातुराश्रम्यंतद्धर्मः कथितः एवंचातुर्वर्ण्यक्रियापि पुंसांक्रियांषोडशसंस्काररूपाम् १ नित्यामहरहःक्रियमाणांप्रत्यवायपरिहारफलां नैमित्तिकींराहुदर्शनादौनिमित्तेसतिविहितामकरणात्प्रत्यवाय प्रदांकाम्यांकामायहितांअग्निष्टोमादिकाम् २ नित्यनैमित्तिकाश्रितमितिकाम्यस्याप्युपलक्षणम् ३ जातस्यपुत्रस्यजातकर्मचआदिक्रियाकांडंचजन्मनःप्राचीनंगर्भाधानपुंसवनादिक्रियासमूहंपिताकुर्वीतेत्यर्थः तदुक्तम् गर्भाधानमृतौपुंसःसवनंस्यंदनात्पुरेति ४ द्विजन्मनांब्राह्मणानांयथावृत्तियथोपचारं दैवंदेवसंबंधिकर्मकुर्यात् अभ्युदयश्राद्धोक्तेनविशेषेणप्रदक्षिणोपचारादिनप देवपितृश्राद्धंकुर्यादित्यर्थः ५तदेवाह दर्भेति दैवेनकराग्रेण ६ प्राजापत्येनकनिष्ठामूलेन तदुक्तम् कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमादिति अशेषद

कथितंचातुराश्रम्यंचातुर्वर्ण्यक्रियातथा । पुंसांक्रियामहंश्रोतुमिच्छामिद्विजसत्तम १ नित्यांनैमित्तिकींकाम्यांक्रियांपुसामशेषतः । समाख्याहि भृगुश्रेष्ठसर्वज्ञोह्यसिमेमतः २ । । और्वउवाच । । यदेतदुक्तंभवतानित्यनैमित्तिकाश्रितम् । तदहंकथयिष्यामिशृणुष्वैकमनानृप ३ जातस्यजातकर्मादिक्रियाकांडमशेषतः । पुत्रस्यकुर्वीतपिताश्राद्धंचाभ्युदयात्मकम् ४ युग्मांस्तुप्राङ्मुखान्विप्रान्भोजयेन्मनुजेश्वर । यथावृत्तितथाकुर्याद्दैवंपित्र्यंद्विजन्मनाम् ५ दर्भायवैःसबदरैर्मिश्रान्पिंडान्मुदायुतः । नांदीमुखेभ्यस्तीर्थेनदद्याद्दैवेनपार्थिव ६ प्राजापत्येनवासर्वमुपचारंप्रदक्षिणम् । कुर्वीततत्तथाशेषवृद्धिकालेषुभूपते ७ ततश्चनामकुर्वीतपितैवदशमेहनि । देवपूर्वंनराख्यंहिशर्मवर्मादिसंयुतम् ८ शर्मेतिब्राह्मणस्योक्तंवर्मेतिक्षत्रसंश्रयम् । गुप्तदासात्मकंनामप्रशस्तंवैश्यशूद्रयोः ९ नार्थहीनंनचाशस्तंनापशब्दयुतंतथा । नामंगल्यंजुगुप्स्यंवानामकुर्यात्समाक्षरम् १० नातिदीर्घंनह्रस्वंवानातिगुर्वक्षरान्वितम् । सुखोच्चार्यंतुतन्नामकुर्याद्यत्प्रवणाक्षरम् ११ ततोनंतरसंस्कारसंस्कृतोगुरुवेश्मनि।यथोक्तविधिमाश्रित्यकुर्याद्विद्यापरिग्रहम् १२ गृहीतविद्योगुरवेदत्त्वाचगुरुदक्षिणाम् । गार्हस्थ्यमिच्छन्भूपालकुर्याद्दारपरिग्रहम् १३ ब्रह्मचर्येणवाकालंकुर्यात्संकल्पपूर्वकम् । गुरोःशुश्रूषणंकुर्यात्तत्पुत्रादेरथापिवा १४ वैखानसोवापिभवेत्प्रव्रजेद्वायथेच्छया । पूर्वसंकल्पितंयादृक्तादृक्कुर्यान्महीपते १५

द्धिकालेषुकन्यापुत्रविवाहेष्वित्यादिनावक्ष्यमाणेषु ७ दशमेहनिअतीतेइतिशेषः तच्चाशौचांतोपलक्षणं अत्रैवकालांतरमप्याह यथा नामधेयंदशम्यांचकेचिदिच्छंतिपार्थिव द्वादश्यामथवाराद्यांमासेपूर्णेतथापरेइतिदेवपूर्वकृतदेवतानामपूर्वकं देवतासंबद्धंनामकुर्यादितिशंखोक्तेः नराख्यंपुरुषवाचकम् तथाप्रांतेशर्मवर्मादिसंयुक्तं यथासोमशर्माइंद्रवर्माचंद्रगुप्तःशिवदासइत्यादि ८ ९ अर्थहीनंडित्थादि अप्रशस्तंदेशभाषायांलज्जावहम् अपशब्दंगुह्यकेशादिजुगुप्स्यंबिभित्सरूपम् समाक्षरंद्व्यक्षरादिनामकुर्यात् १० अतिदीर्घंबह्वक्षरम् ह्रस्वमल्पाक्षरम् प्रवणाक्षरंलघुताक्षरम् ११ अनंतरसंस्कारैर्निष्क्रामणान्नप्राशनचौलोपनयनाख्यैःसंस्कृतः यथोक्तंगुरुशुश्रूषादिलक्षणंविधिमाश्रित्य १२ १३ मध्येनैष्ठिकंब्रह्मचर्यमाह ब्रह्मचर्येणेति वाऽरुचौ गार्हस्थ्यानिच्छायामित्यर्थः कालंकुर्यान्नयतेवैखानसोवानप्रस्थः इच्छाया आश्रमगच्छेत् यावज्जीवंममायमेवाश्रमइतियीदपूर्वसंप्तितंतदातत्रैवातिष्ठेत्नाश्रमांतरंगच्छेत् तत्रापिदृढविरक्तौतुय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिःस्यादेव यदहरेवविरजेत्तदहरेवप्रव्रजेत्इतिश्रुतेः १५ वर्षैरेकगुणामितियवीयस्याश्चोपलक्षणं अन्यथासांगवेदाध्ययनासक्तस्यस्मृत्यनुमताष्टचत्वारिंशद्वर्षावधिकब्रह्मचर्यस्यत्रिंश द्वर्षादूर्ध्वंविवाहेदशवर्षाभवेत्कन्याअतऊर्ध्वंरजस्वलाइतिनियमादितऊर्ध्वंरजस्वलाविवाहापत्तेःअसपिंडांयवीयसीमितिस्मृतेश्च अतिकेशांकेशग्रस्तान् अकेशांनिष्केशप्रायाम् १६ निसर्गतःगर्भावस्थायामेव अविशुद्धांपातकादिदुष्टांसरोगांसहजरोगाम् अतिरोगिणीमुत्कटरोगिणीम् १७ दुष्टांशूद्रादिसंवर्धितां दुष्टवाचाटांबहुविरुद्धदुर्भाषिणीं व्यंगिनींपि तृतोमातृतश्चकुष्ठिनीं कुष्ठिपितृमातृजन्यामित्यर्थः इमश्रूण्येवव्यंजनंपुंस्त्वव्यंजकंतद्युक्ताम् १८ क्षामवाक्यांस्वभावतएवसन्नवचनाम् अनिबद्धेक्षणाम् पक्ष्मभिरसंवृतेक्षणांनि मेषैरपिअनिरुद्धदर्शनांवानिद्रायामपिअर्धनिमीलितनेत्रामितिवा वृत्ताक्षींवर्तुलनयनाम् १९ यस्याहसंत्याःसत्यागंडयोःकूपकौगर्तौभवतःतां नोद्वहेत्तादृशीमितिपुनर्निषधोऽतिदोषख्या

वर्षैरेकगुणांभार्यामुद्वहेत्त्रिगुणःस्वयम् । नातिकेशामकेशांवानातिकृष्णांनपिंगलाम् १६ निसर्गतोविकलांगीमधिकांगींचनोद्वहेत् । नाविशुद्धांसरोगांवाऽकुलजांवातिरोगिणीम् १७ नदुष्टांदुष्टवाचाटांव्यंगिनींपितृमातृतः । नश्मश्रूव्यंजनवतींनचैवपुरुषाकृतिम् १८ नघर्घरस्वरांक्षामवाक्यांकाकस्वरांनवा । नानिबद्धेक्षणांतद्वद्वृत्ताक्षींनोद्वहेत्स्त्रियम् १९ यस्याश्चलामशेजंघेगुल्फौयस्यास्तथोन्नतौ । गंडयोःकूपकौयस्याहसंत्यास्तांचनोद्वहेत् । २० नोद्वहेत्तादृशींकन्यांप्राज्ञःकार्यविशारदः । नातिरुक्षच्छविंपांडुकरजामरुणेक्षणाम् २१ आपीनहस्तपादांचनकन्यामुद्वहेद्बुधः । नावामनांनातिदीर्घांनोद्वहेत्संहतभ्रुवम् । नचातिच्छिद्रदशनांनकरालमुखींनरः २२ पंचमींमातृपक्षाच्चपितृपक्षाच्चसप्तमीम् । गृहस्थस्तूद्वहेत्कन्यांन्याय्येनविधिनानृप २३ ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः । गांधर्वराक्षसौचान्यौपैशाचश्चाष्टमोधमः २४ एतेषांयस्ययोधर्मोवर्णस्योक्तोमहर्षिभिः । कुर्वीतदाराहरणंतेनांत्यंपरिवर्जयेत् २५ सधर्मचारिणींप्राप्यगार्हस्थ्यंसहितस्तया । समुद्वहेद्ददात्येषासम्यगूढामहाफलम् २६ । ।इतिश्रीविष्णुपुराणेतृतीयेंशेदशमोध्यायः १० । सगरउवाच । । गृहस्थस्यसदाचारंश्रोतुमिच्छाम्यहंमुने । लोकादस्मात्परस्माच्चयमतिष्ठन्नहीयते १। और्व

पनायकचित्पुस्तकेऽयमर्धश्लोकोनास्त्येव हंसत्याश्चैवशायतेइतिपाठेएकवचनमार्षं २० पांडुकरजांश्वेतनखाम् २१ संहतेभ्रुवौयस्यास्तांकरालमुखींदंतुरास्याम् २२ पंचमीमिति मातृपक्षात्मातृसंतानात्पंचमींपितृपक्षात्पितृसंतानात्सप्तमीं विहायेतिशेषः पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेतिवचनात् तथाचमातरमारभ्यतत्पितृपितामहादिगणनयापंचपुरुषसंतानवर्तिनी मातृपक्षे पंचमीत्युच्यते संतानभेदस्तमादायगणयेत्यावत्पंचमइति एवंपितृपक्षेसप्तमीतिज्ञेयंतांनोद्वहेत् ततःपरमुद्वहेदित्यर्थः २३ तमेवन्याय्यंविधिंदर्शयितुमष्टौविवाहानाह ब्राह्मइति यथा ब्राह्मोविवाहआहूयदीयतेशक्त्यलंकृता यज्ञस्यऋत्विजेदैवआदायार्षस्तुगोद्वयम् सहोभौचरतांधर्मंप्रजापत्योविधिःस्मृतः आसुरोद्रविणादानाद्गांधर्वःसमयान्मतः राक्षसोयुद्धहरणात्पैशाचःकन्यकाछलादिति २४ एतेषामिति यदाहदेवलः आद्याविवाहाश्चत्वारोधर्मास्तोयप्रदानिकाः अशुल्काब्राह्मणार्हाश्चतारयंतिद्वयोःकुले गांधर्वराक्षसौराज्ञआसुरोवैश्यशूद्रयोः सपापिष्ठोविवाहानांपैशाचःप्रथितोष्टमइति अंत्यंपैशाचम् २५ समुद्वहेत्कुर्यात् एषापूर्वोक्तलक्षणासम्यक्विधितऊढासतिमहाफलंददाति एतत्सम्यगूढंमहाफलमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुस्तकः गणपति । निरुद्धार

पाठेएतद्वार्हस्थ्यंऊढंप्रतिपादितंसदित्यर्थः २६ ॥ ॥ इतिश्रीविष्णुपुराणेतृतीयेंशेदशमोध्यायः १० ॥ ॥ गर्भाधानादिनापुंसःसंस्कृतस्यकृतिंब्रुवन् एकादशेसदाचारान्प्राहश्री हरितोषणान् १ २ ३ ४ ब्राह्मेमुहूर्तेसूर्योदयात्पूर्वतृतीयेमुहूर्ते अर्थंचास्यधर्मस्याविरोधिनम् ५ तयोर्धर्मार्थयोर्दृष्टादृष्टविनाशायदृष्टादृष्टविनाशनिवृत्तये तादर्थ्येचतुर्थीत्यत्रार्थशब्दस्यनि वृत्तेरपिवाचकत्वात् यद्वा विनाशमपनेतुमित्यर्थः क्रियार्थोपपदस्यचकर्मणिस्थानिनइतिचतुर्थी यथारघौवनंगंतुमित्यर्थेवनायपीतप्रतिबद्धवत्सामिति दृष्टादृष्टविनाशायेतिपाठःसुगमः

उवाच । । श्रूयतांपृथिवीपालसदाचारस्यलक्षणम् । सदाचारवतापुंसाजितौलोकावुभावपि २ साधवःक्षीणदोषास्तुसच्छब्दःसाधुवाचकः । ते षामाचरणंयत्तुसदाचारःसउच्यते ३ सप्तर्षयोथमनवःप्रजानांपतयस्तथा । सदाचारस्यवक्तारःकर्तारश्चमहीपते ४ ब्राह्मेमुहूर्तेसुस्थेचमानसेमति मान्नृप । विबुद्धश्चिंतयेद्धर्ममर्थंचास्याविरोधिनम् ५ अपीडयातयोःकाममुभयोरपिचिंतयेत् । दृष्टादृष्टविनाशायत्रिवर्गेसमदर्शिता ६ परित्यजेद र्थकामौधर्मपीडाकरौनृप । धर्ममप्यसुखोदर्कंलोकविद्विष्टमेवच ७ ततःकल्यंसमुत्थायकुर्यान्मैत्रंनरेश्वर। नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवः। ८ दूरादावसथान्मूत्रंपुरीषंचसमुत्सृजेत् । पादावसेचनोच्छिष्टंप्रक्षिपेन्नगृहांगणे ९ आत्मच्छायांतरुच्छायांगोसूर्याग्न्यनिलांस्तथा । गुरुंद्विजातीं श्चबुधोनमेहेतकदाचन १० नकृष्टेसस्यमध्येवागोव्रजेजनसंसदि । नवर्त्मनिननद्यादितीर्थेषुपुरुषर्षभ ११ नाप्सुनैवांभसस्तीरेनश्मशानेसमाचरे त् । उत्सर्गंवैपुरीषस्यमूत्रस्यचविसर्जनम् १२ उदङ्मुखोदिवोत्सर्गंविपरीतमुखोनिशि । कुर्वीतानापदिप्राज्ञोमूत्रोत्सर्गंचपार्थिव १३ तृणैरास्ती र्यवसुधांवस्त्रप्रावृतमस्तकः । तिष्ठेन्नातिचिरंतत्रनैवकिंचिदुदीरयेत् १४ वल्मीकमूषकोत्खातांमृदमंतर्जलांतथा । शौचावशिष्टांगेहाच्चनादद्याल्लेपसं भवाम् १५ अंतःप्राण्यवपन्नांचहलोत्खातांचभूमिप । परित्यजेन्मृदंनैताःसकलाःशौचसाधनम् १६ एकालिंगेगुदेतिस्रोदशवामकरेतथा । हस्त द्वयेचसप्तान्यामृदःशौचोपपादिकाः १७ अच्छेनागंधफेनेनजलेनाबुद्बुदेनच । आचामेतमृदंभूयस्तथादद्यात्समाहितः १८ निष्पादितांघ्रिशौच स्तुपादावभ्युक्ष्यवैपुनः । त्रिःपिबेत्सलिलंतेनतथाद्विःपरिमार्जयेत् १९ शीर्षण्यानिततःखानिमूर्धानंचनृपालभेत्। बाहूनाभिंचतोयेनहृदयंचापिसं

त्रिवर्गेसमदर्शितापरस्परविरोधेनभवत्वितिसमदृष्टिः ६ धर्ममपीति व्याघ्रचोरादिसमाक्रांततीर्थगमनादिअसुखोदर्कंअसुखोत्तरफलं लोकविद्विष्टंसौत्रामण्यादौसुराग्रहादि ७ कल्यमुष सि मैत्रंमित्राधिष्ठितपायुकृतमलोत्सर्गादिग्रामान्नैर्ऋत्यांतदसंभवेस्वावसथाद्दूरे गृहांगणेसदासंचारदेशे ८ ९ आत्मच्छायामिति तान्पुरस्कृत्यनमेहेतेत्यर्थः १० ११ १२ १३ १४ लेपसंभवांगृहलेपनगताम् १५ अंतःप्राण्यवपन्नाचकीटाद्युपहताम् अणुप्राण्यवपन्नामितिपाठेअणुभिरतिसूक्ष्मैःप्राणिभिरवपन्नांयुक्तामित्यर्थः १६ एकाद्याःमृदःशौचोपपादिकाः १७ हस्तशौचमुक्त्वाकक्ष्याचमनपरिभाषामाह अच्छेनअनाविलेन आचामेतेत्याचमनं प्रस्तुत्यतस्यपूर्वांगमाह मृदमिति भूयोमृदमाद्यात् १८ तयानिष्पादितांघ्रिशौचःसन्पुनःपादावभ्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्ष्य सलिलंत्रिःपिबेदित्यन्वयः मुखंद्विःपरिमार्जयेत् १९ शीर्षण्यानिशिरस्यानिखानिइंद्रियच्छिद्राणिआलभेत्स्पृशेत् हृदयंचाप्यसंजयत्इतिपाठेमौनीभूत्वेत्यर्थः अत्रविशेषमाह प्रक्षाल्य पादौहस्तौचत्रिःपिबेदंबुवीक्षितम् संवृत्यांगुष्ठमूलेनद्विःप्रमृज्यात्ततोमुखम् संहताभिस्त्रिभिःपूर्वमास्यंतुसमुपस्पृशेत् अंगुष्ठेनप्रदेशिन्याघ्राणंपश्चादनंतरं अंगुष्ठानामिकाभ्यांतुचक्षुःश्रोत्रंपुनःपुनःकनिष्ठांगुष्ठतोनाभिहृदयंतुतलेनवै सर्वाभिस्तुशिरःपश्चाद्बाहूचाग्रेणसंस्पृशेदिति २० अथप्रातःस्नानस्यमलापकर्षणरूपस्यशौचोत्तरैवोक्तप्रायत्वात् नित्योदकीभवेद्विप्रइतिपूर्वं संक्षेपेणोक्तत्वात् संध्योपासनहोमादीनांचसूर्योदयास्तमयप्रसंगेनोक्तत्वात्तदुपरितनंक्रियाकांडमाह आचांतइति २१ २२ सोमसंस्थाअग्निष्टोमादयःसप्त हविःसंस्थाःअग्न्याधेयाद्याःपा

स्पृशेत् २० आचांतश्चततःकुर्यात्पुमान्केशप्रसाधनम् । आदर्शांजनमांगल्यदूर्वाद्यालभनानिच २१ ततःस्ववर्णधर्मेणवृत्त्यर्थंचधनार्जनम् । कुर्वीतश्रद्धासंपन्नोयजेच्चपृथिवीपते २२ सोमसंस्थाहविःसंस्थाःपाकसंस्थाश्चसंस्थिताः । धनेयतोमनुष्याणांयतेतातोधनार्जने २३ नदीनदतटाकेषु देवखातजलेषुच । नित्यक्रियार्थंस्नायीतगिरिप्रस्रवणेषुच२४ कूपेषूत्धृततोयेनस्नानंकुर्वीतवाभुवि । स्नायीतोद्धृतवच्चैवअथवाभुव्यसंभवे २५शुचिवस्त्रधरःस्नातोदेवर्षिपितृतर्पणम् । तेषामेवहितीर्थेनकुर्वीतसुसमाहितः २६ त्रिरपःप्रीणनार्थायदेवानामपवर्जयेत् । तथर्षीणांयथान्यायंसकृच्चापिप्रजापतेः २७पितृणांप्रीणनार्थायत्रिरपःपृथिवीपते। पितामहेभ्यश्चतथाप्रीणयेत्प्रपितामहान्२८मातामहायतत्पित्रेतत्पित्रेचसमाहितः।दद्यात्पैत्रेणतीर्थेनकाम्यंचान्यच्छृणुष्वमे २९ मात्रेप्रमात्रेतन्मात्रेगुरुपत्न्यैतथानृप । गुरवेमातुलादीनांस्निग्धमित्रायभूभुजे ३० इदंचापिजपेदंबुददद्यात्मेच्छयानृप । उपकारायभूतानांकृतदेवादितर्पणः ३१ देवासुरास्तथायक्षानागागंधर्वराक्षसाः । पिशाचागुह्यकाःसिद्धाःकूष्मांडास्तरवःखगाः ३२ जलेचराभूनिलयावाय्वाहाराश्चजंतवः । प्रीतिमेतेप्रयांत्वाशुमद्दत्तेनांबुनाखिलाः ३३ नरकेषुसमस्तेषुयातनासुचयेस्थिताः । तेषामाप्ययनायैतद्दीयतेसलिलंमया ३४ येबांधवाबांधवावायेन्यजन्मनिबांधवाः ।तेसर्वेतृप्तिमायांतुयेचास्मत्तोयकांक्षिणः ३५ कामोदकप्रदानंतेमयैतत्कथितंनृपायद्दत्वाप्रीणयेदेतामनुष्यःसकलंजगत् ३६ जगदाप्यायनोद्भूतंपुण्यमाप्नोतिचानघ । दत्त्वाकामोदकंसम्यगेतेभ्यःश्रद्धयान्वितः । आचाम्यंचततोदद्यात्सूर्या

कसंस्थाअष्टकाद्याः यथाहगौतमः अष्टकापार्वणश्राद्धंश्रावण्याग्रहायणीचैत्र्या श्वयुजीतिसप्तपाकसंस्थाः अग्न्याधेयमग्निहोत्रम् दर्शपूर्णमासावाग्रयणम् चातुर्मास्यानिनिरूढपशुबंधः सौत्रामणीचेतिसप्तहविर्यज्ञसंस्थाः अग्निष्टोमअत्यग्निष्टोमउक्थः षोडशीवाजपेयोतिरात्रमाप्तोर्यामइतिसप्तसोमसंस्थाइति २३ माध्यंदिनीयस्नानतर्पणान्याह नदीति देवखातोमनुष्याद्यकृतोद्भदः स्नायीतस्नायात् २४ कूपेषुकलशादिभिरुद्धृतेनतोयेनभुवितत्तटभूमौस्नायात् तदसंभवेनघुद्धृतेनशीतलोदकेनगृहएवस्नायात् तत्राप्यशक्तौउष्णोदकेनतत्राप्यशक्तौमंत्रस्नानादि कुर्यादित्यन्यस्मृतिभ्योज्ञेयम् २५ तेषांदेवादीनांतीर्थेनपूर्वोक्तेन २६ त्रिरपइतिशाखाभेदव्यवस्थितमिदम् तत्रभूर्देवान्भुवर्देवांस्तर्पयामीतिएवंत्रिरपोपवर्जयेत् तथर्षीणामपिभूरादिपदयोगेनत्रिरपोदद्यात् प्रजापतिंतर्पयामीतिसकृत् २७ पितृणामिति भूरादिपदयोगेनसामान्यपितृणांतत्प्रयोगंविनास्वपितृणांचेत्यर्थः २८ पैत्रेणतीर्थेनतर्जनी मूलेनकाम्यंफलवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषार्थं २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ हेब्रह्मन्भास्वदादिरूपायतुभ्यंनमः ब्रह्मभास्वतइतिपाठेवेदैःप्रकाशमानायेत्यर्थः जगत्सवित्रेनिश्वजनकायकर्मदायिनेकर्म प्रवर्तकाय ३८ ३९ अपूर्वमनन्यप्रकृतिकंअग्निहोत्रंब्रह्मादिपंचाहुतिकंदेवयज्ञाख्यंहविर्होमंकुर्यादित्यर्थः अप्पूर्वमितिपाठेप्रोक्षणपूर्वकमित्यर्थः ४० भूतयज्ञमाह तच्छेषंहुतशेषंमणि केजलाधारसन्निधौअद्भ्यःपर्जन्यायचक्षिपेत् पृथ्वीपर्जन्याद्भ्यःक्षिपेत्इतिवापाठांतरं ४१ गृहस्यद्वारेधातुर्विधातुश्च मध्येब्रह्मणः ४२ प्राच्यादिषुगृहस्योतिसर्वत्रान्वयः ४३ धन्वंत

यसलिलांजलिम् ३७ नमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे । जगत्सवित्रेशुचयेसवित्रेकर्मदायिने ३८ ततोगृहार्चनंकुर्यादभीष्टसुरपूजनम् जलाभिषेकपुष्पाणांधूपादेश्चनिवेदनैः ३९ अपूर्वमग्निहोत्रंचकुर्यात्प्राग्ब्रह्मणेततः । प्रजापतिंसमुद्दिश्यदद्यादाहुतिमादरात् ४० गृह्याभ्यःका श्यपायाथततोऽनुमतयेक्रमात् । तच्छेषंमणिकेऽद्भ्योथपर्जन्यायक्षिपेत्ततः ४१ द्वारेधातुर्विधातुश्चमध्येचब्रह्मणःक्षिपेत् । गृहस्यपुरुषव्याघ्रदि ग्देवानपिमेशृणु ४२ इंद्रायधर्मराजायवरुणायतथैंदवे । प्राच्यादिषुबुधोदद्याद्धुतशेषात्मकंबलिम् ४३ प्रागुत्तरेचदिग्भागेधन्वंतरिबलिं बुधः । निर्वपेद्वैश्वदेवंचकर्मकुर्यादतःपरम् ४४ वायव्येवायवेदिक्षुसमस्तासुततोदिशाम् । ब्रह्मणेचांतरिक्षायभानवेप्रक्षिपेद्बलिम् ५५ वि श्वेदेवान्विश्वभूतानथोभूतपतीन्पितॄन् । यक्ष्माणंचसमुद्दिश्यबलिंदद्यान्नरेश्वर ४६ ततोऽन्यदन्नमादायभूमिभागेषुवैबुधः । दद्यादशेषभू तेभ्यःस्वेच्छयातत्समाहितः ४७ देवामनुष्याःपशवोवयांसिसिद्धाःसयक्षोरगदैत्यसंघाः । प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमया प्रदत्तम् ४८ पिपीलिकाःकीटपतंगाकाद्याबुभुक्षिताःकर्मनिबंधबद्धाः । प्रयांतुतेतृप्तिमिदंमयान्नंतेभ्योनिसृष्टंसुखिनोभवंतु ४९ येषांनमा तानपितानबंधुर्नैवान्नसिद्धिर्नतथान्नमस्ति । तत्तृप्तयेऽन्नंभुविदत्तमेतत्प्रयांतुतृप्तिंमुदिताभवंतु ५० भूतानिसर्वाणितथान्नमेतदहंचविष्णुर्नयतोन्यद स्ति । तस्मादहंभूतनिकायभूतमन्नंप्रयच्छामिभवायतेषाम् ५१ चतुर्दशोभूतगणोयएषतत्रस्थितायेखिलभूतसंघाः । तृप्त्यर्थमन्नंहिमयानिसृष्टंते षामिदंतेमुदिताभवंतु ५२ इत्युच्चार्यनरोदद्यादन्नंश्रद्धासमन्वितः भुविभूतोपकारायगृहीसर्वाश्रयोयतः ५३ श्वचांडालविहंगानांभुविदद्यात्ततोनरः

स्विलिंबुधोनिर्वपेदित्यन्वयः तदेवंगृहदेवताकोबलिरुक्तः इदानींतदितरदेवताकंबलिमाह वैश्वदेवमित्यादिनाभुविमानवाइत्यंतेन विश्वेदेवादयोदेवाउद्देश्यायत्रबलौतंततःकुर्यात् ४४ तदेवाह वायव्येकोणेवायवेबलिंप्रक्षिपेत् वायवेवायवेइतिपाठेवीप्सयासमस्तासुदिक्षुवायवेवायुमुद्दिश्यप्रक्षिपेदित्यर्थः ततोदिशांप्राच्यैदिशेदक्षिणस्यैदिशेइत्यादिनाबलिंप्रक्षिपेत् मध्येब्र ह्मादित्रयाणाम् ४५ उत्तरतोविश्वेभ्योदेवेभ्यइत्यादिनाबलिंक्षिपेत् दक्षिणतोभूतपत्यादीनामिति ४६ ४७ ४८ ४९ येषामन्नंनास्तियेषांसत्यप्यन्नेनासिद्धिःपाकसाधनंनास्तीत्यर्थः ५० ५१ चतुर्दशइति एषदेवाइत्यादिश्लोकोक्तःकीटपतंगांतश्चतुर्दशसंख्याकोभूतगणः स्वार्थेडप्रत्ययआर्षः यद्वादैवमष्टविधंतैर्यग्योन्यंपंचविधंमानुष्यंचैकविधमितिचतुर्दशभूतगणःतत्रस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताअखिलाभूतसंघास्तत्तदवांतरविशेषाः ५२ यद्यप्यवांतरवाक्यसमाप्त्यापृथक्पृथग्बलिदानंप्रतीयतेतथापिइत्युच्चार्यनरोदद्यादितिवाचनिकमेवैकबलिदानामिति ५३ अपात्राःउत्सर्गायोग्याः पुंस्त्वमार्षंतेषांचभुविदद्यात् ५४ गोदोहनमात्रंघटिकाचतुर्थांशः ५५ तत्रतस्मिन्काले ५६ ५७ अतिथिलक्षणमाह अज्ञातेति नैकग्रामनिवासिनंएकग्रामस्थमिन्नम् ५८ नित्यत्वार्थमपूजनेनिंदामाह अकिंचनादिगुणविशिष्टमतिथिमसंपूज्यभक्तमन्नंभुंजन्भुंजानोधोव्रजति भोक्तुकाममितिपाठेतिथेर्विशेषणम् ५९ स्वाध्यायादिकमस्पृष्ट्वाचरणंवेदावांतरशाखामाचारंवाअपृष्ट्वाअभ्यागतमतिथिं ६० पित्रर्थंनित्यश्राद्धार्थं आशयेत्भोजयेत् विदितआचारःसंभूतिःकुलंयस्य पंचयज्ञियंपंचयज्ञकारिणम् ६१ अन्नाग्रंभोजनाद्यनवशिष्टंअत्रचोक्तम्

येचान्येपतिताःकेचिदपात्राभुविमानवाः ५४ ततोगोदोहमात्रंवैकालंतिष्ठेद्गृहांगणे । अतिथिग्रहणार्थायतदूर्ध्वंवायथेच्छया ५५ अतिथिंतत्रसंप्राप्तंपूजयेत्स्वागतादिना । तथासनप्रदानेनपादप्रक्षालनेनच ५६ श्रद्धयात्वन्नदानेनप्रियप्रश्नोत्तरेणच । गच्छतश्चानुयानेनप्रीतिमुत्पादयेद्गृही ५७ अज्ञातकुलनामानमन्यतःसमुपागतम् । पूजयेदतिथिंसम्यङ्नैकग्रामनिवासिनम् ५८ अकिंचनमसंबद्धमन्यदेशादुपागतम् । असंपूज्यातिथिंभुंजन्भक्तंकामंव्रजत्यधः ५९ स्वाध्यायगोत्रचरणमपृष्ट्वाचतथाकुलम् । हिरण्यगर्भबुद्ध्यातंमन्येताभ्यागतंगृही ६० पित्रर्थंचापरंविप्रमेकमप्याशयेन्नृप । तद्देश्यंविदिताचारसंभूतिंपंचयज्ञियम् ६१ अन्नाग्रंचसमद्धृत्यहंतकारोपकल्पितम् । निर्वापभूतंभूपालश्रोत्रियायोपकल्पयेत् । ६२ दद्याच्चभिक्षात्रितयंपरिव्राड्ब्रह्मचारिणाम् । इच्छयाचनरोदद्याद्विभवेसत्यवारितम् ६३ इत्येतेऽतिथयःप्रोक्ताःप्रागुक्ताभिक्षवश्चये । चतुरःपूजयन्नेतान्नृयज्ञर्णात्प्रमुच्यते ६४ अतिथिर्यस्यभग्नाशोगृहाद्यात्यन्यतोमुखः । सदत्त्वादुष्कृतंतस्मैपुण्यमादायगच्छति ६५ धाताप्रजापतिःशक्रोवह्निर्वसुगणोर्यमा । प्रविश्यातिथिमेतेवैभुंजतेन्नंनरेश्वर ६६ तस्मादतिथिपूजायांयतेतसततंनरः । सकेवलमघंभुंक्तेयोभुंक्तेह्यतिथिंविना ६७ ततःसुवासिनीदुःखीगर्भिणीवृद्धबालकान् । भोजयेत्संस्कृतान्नेनप्रथमंचरमंगृही ६८ अभुक्तवत्सुचैतेषुभुंजन्भुंक्तेतिदुष्कृतम् । मृतश्चनरकंगत्वाश्लेष्मभुग्जायतेनरः ६९ अस्नाताशीमलंभुंक्तेअजपीपूयशोणितम् । असंस्कृतान्नभुङ्मूत्रंबालादिप्रथमंशकृत् ७० तस्माच्छ

ग्रासमात्राभवेद्भिक्षाअग्रंग्रासचतुष्टयम् अग्राण्येवतुचत्वारिहंतकारंप्रचक्षते मनुष्येभ्योहंतेतिमंत्रेणोपकल्पितम् ६२ ६३ इत्येतेतिथयइति अज्ञातकुलनामानमित्यादिनातंमन्येताभ्यागतंगृहीत्यंतेनोक्तएकःपित्रार्थान्नभोक्ताचापरःहंतकारसंप्रदानंचान्यइतितत्र पूर्वमाश्रमाध्यायोक्तश्चपरिव्राड्ब्रह्मचारिणोभिक्षवोभिक्षाजीविनश्चेत्येकोवर्गइत्येतांश्चतुरःपूजयन्मनुष्ययज्ञरूपादृणान्मुच्यते ६४ निंदार्थवादेनातिथिपूजायाआवश्यकत्वमुपसंहरति अतिथिरितित्रिभिः ६५ ६६ ६७ सुवासिनीकृतविवाहापितृगृहस्थाकन्या चरमंपश्चात्गृहीभुंजीत ६८ ६९ अस्नाताशीत्रिविधः स्नानहीनःसन्भोजनशीलःअजपीगायत्र्यादिमंत्रजपहीनःबालादितःप्रथमंभुंजानःशकृत्पुरीषंभुंक्ते ७० प्रसंगाद्भोजनप्रकारमाह तस्मादित्यादिनाप्राणाद्याप्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यनायचेत्यंतेन ७१ अरिष्टमशुभादृष्टंतस्यशांतिः वैरिपक्षाणामुत्पन्नरोगाणामभिचारिकाविनाशशीला ७२ ७३ ७४ ७५ प्राङ्मुखउदङ्मुखोवाभुंजीत ७६ आसंदीदारुमयं त्रिपदादि ७७ अदेशेकुत्सितेस्थाने ७८ अकालेसंध्यादिसमये आकाशइतिपाठेनादृते अग्नयेदत्त्वापरिशिष्टस्यान्नस्याग्रंकिंचिदग्नौक्षिप्त्वानभुंजीत परिशिष्टस्यान्नस्याग्रंनाग्नौक्षिपे दितिविधिः ७९ मंत्राभिमंत्रितंशस्तंभुंजीतेत्यनुषंगः शुष्कंजलोपसेकंविनापक्कंशाकादिकंशल्कादिकंचविनेतिशेषः ८० हारितकेभ्यःअपक्वलेह्यादिभ्यः बादरिकेभ्यइतिपाठेतुबदरविका

णुष्वराजेंद्रयथाभुंजीतवैगृही । भुंजतश्चययथापुंसःपापबंधोनजायते ७१ इहचारोग्यमतुलंबलवृद्धिस्तथानृप । भवत्यरिष्टशांतिश्चवैरिपक्षाभिचारिका ७२ स्नातोयथावत्कृत्वाचदेवर्षिपितृतर्पणम् । प्रशस्तरत्नपाणिस्तुभुंजीतप्रयतोगृही ७३ कृतजप्योहुतेवह्नौश्वेतवस्त्रधरोनृप । दत्त्वातिथिभ्योविप्रेभ्योगुरुभ्यःसांश्रितायच ७४ पुण्यगंधधरःशस्तमाल्यधारीनरेश्वर । नैकवस्त्रधरोप्यार्द्रपाणिपादोनराधिप ७५ विशुद्धवदनःप्रीतोभुंजीतनविदिङ्मुखः । प्राङ्मुखोदङ्मुखोवापिनचैवान्यमनानृप ७६ अन्नंप्रशस्तंपथ्यंचप्रोक्षितंप्रोक्षणोदकैः ।नकुत्सिताहृतंनैवजुगुप्सावदसंस्कृतम् ७७ दत्त्वाभुंजीतशिष्टेभ्यःक्षुधितेभ्यस्तथागृही ।प्रशस्तशुद्धपात्रेषुभुंजीताकुपितोनृप ७८ नासंदीसंस्थितेपात्रेनादेशेचनरेश्वर । नाकालेनातिसंकीर्णेदत्त्वाग्रंचनरोग्नये ७९ मंत्राभिमंत्रितंशस्तंनचपर्युषितंनृप । अन्यत्रफलमांसेभ्यःशुष्कशाकादिकंतथा ८० तद्वद्धारितकेभ्यश्चगुडपक्केभ्यएवच । भुंजीतोद्धृतसाराणिनकदाचिन्नरेश्वर ८१ नाशेषंपुरुषोश्नीयादन्यत्रजगतीपते । मध्वन्नदधिसर्पिर्भ्यःशष्कुल्यश्चविवेकवान् ८२ अश्नीयात्तन्मनाभूत्वापूर्वंतुमधुरंरसम् । लावण्याम्लौतथामध्येकटुतिक्तादिकंततः ८३ प्राग्द्रवंपुरुषोश्नन्वैमध्येचकठिनाशनम् । पुनरंतेद्रवाशीचबलारोग्येनमुंचति ८४ अनिंद्यंभक्षयेदित्थंवाग्यतोन्नमकुत्सयन् । पंचग्रासान्महामौनंप्राणाद्याप्यायनायच ८५ भुक्त्वासम्यगथाचम्यप्राङ्मुखोदङ्मुखोपिवा । यथावत्पुनराचामेत्पाणीप्रक्षाल्यमूलतः ८६ सुस्थःप्रशांतचित्तस्तुकृतासनपरिग्रहः । अभीष्टदेवतानांतुकुर्वीतस्मरणंनरः ८७ अग्निराप्याययत्वन्नंपार्थिवंपवनेरितः । दत्तावकाशंनभसाजरयत्वस्तुमेसुखम् ८८ अन्नंबलायमेभूमेरपामग्न्यनिलस्यच । भवत्वेतत्परिणतौममास्त्वव्याहतंसुखम्८९ प्राणापानसमानानामुदानव्यानयोस्तथा । अन्नंपुष्टिकरंचास्तुममास्त्वव्याहतंसुखम् ९० अगस्तिरग्निर्वडवानलश्चभुक्तंमयान्नंजरयंत्वशेष

रेभ्यइत्यर्थः गुडपक्केभ्यःलड्डुकादिभ्यः गुडभक्षेभ्यइतिपाठेसएवार्थःउद्धृतसाराणिपिण्याकादीनि ८१ नाशेषंनिःशेषंनभुंजीत ८२ तन्मनाअन्नदत्तचित्तःसन् ८३ बलारोग्येनमुंचतित्यजतिसर्वदातद्युक्तोभवतीत्यर्थः ८४ महामौनंसंकेताक्षररहितम् ८५ मूलतःकफोणिपर्यंतम् ८६ ८७ पवनेरितोवह्निर्नभसादत्तावकाशंमयाभुक्तमन्नंजरयतु ततश्चान्नरसेनपार्थिवंदेहधातुंआप्याययत्विति पंचभूतानुग्रहप्रार्थनम् ८८ मत्संबंधिनांभूम्यादीनांबलायान्नमस्तु ८९ ९० अरोगोरोगाभावः ९१ विष्णुर्यथासमस्तदेहादिषुप्रधानभूतोमयोपास्यतेतेनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पासनेनसत्येनपरमार्थतोपिसत्यभूतेनान्नमारोग्यदंसत्परिणाममेत्वित्यन्वयः ९२ एवंविष्णुरत्तेत्यादावपियोज्यम् ९४ ९४ सच्छास्त्रादीतिआदिशब्देनक्रीडादेरपिपरिग्रहः अतएवाविशिनष्टि सन्मार्गाद्यविरोधिनेति ९५ संध्योपास्तौविशेषमाह दिनेति तथाचस्मृतिः प्रातःसंध्यांसनक्षत्रामुपासीतयथाविधि सादित्यंपश्चिमांसंध्यामर्धास्तमितभास्करामिति ९६ सूतकंजन्मनिमित्तमशौचंशावं विभ्रमोवैचित्यंआतुरमातुरत्वंरोगकृतंभीतिरपायाद्याशंकातेभ्योन्यत्र ९७ सूर्येणाभ्युदितः यस्मिन्सुप्तेसूर्यउदेति सूर्येणत्यक्तोयस्मिन्सुप्तेसूर्योस्तमेति आतुरभावा

म्। सुखंचमेतत्परिणामसंभवंयच्छंत्वरोगोममचास्तुदेहे ९१ विष्णुःसमस्तेंद्रियदेहदेहिप्रधानभूतोभगवान्यथैकः । सत्येनतेनान्नमशेषमेतदारोग्यदंमेपरिणाममेतु ९२ विष्णुरत्तातथैवान्नंपरिणामश्चवैतथा । सत्येनतेनवैभुक्तंजीर्यत्वन्नमिदंतथा ९३ इत्युच्चार्यस्वहस्तेनपरिमृज्यतथोदरम्। अनायासप्रदायीनिकुर्यात्कर्माण्यतंद्रितः ९४ सच्छास्त्रादिविनोदेनसन्मार्गाद्यविरोधिना । दिनंनयेत्ततःसंध्यामुपतिष्ठेत्समाहितः ९५ दिनांतसंध्यांसूर्येणपूर्वामृक्षैर्युतांबुधः । उपतिष्ठेद्यथान्यायंसम्यगाचम्यपार्थिव ९६ सर्वकालमुपस्थानंसंध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितः ९७ सूर्येणाभ्युदितोयश्चत्यक्तःसूर्येणचस्वपन् । अन्यत्रातुरभावात्तुप्रायश्चित्तीयतेनरः ९८ तस्मादनुदितेसूर्येसमुत्थायमहीपते । उपतिष्ठेन्नरःसंध्यामस्वपंश्चदिनांतजां ९९ उपतिष्ठेतियेसंध्यांनपूर्वांनचपश्चिमाम् । व्रजंतितेदुरात्मानस्तामिस्रंनरकंनृप १०० पुनःपाकमुपादायसायमप्यवनीपते । वैश्वदेवनिमित्तंवैपत्न्यमंत्रंबलिंहरेत् १०१ तत्रापिश्वपचादिभ्यस्तथैवान्नापवर्जनम्। अतिथिंचागतंतत्रस्वशक्त्यापूजयेद्बुधः १०२ पादशौचासनप्रह्वस्वागतोक्त्याचपूजनम् । ततश्चान्नप्रदानेनशयनेनचपार्थिव १०३ दिनातिथौतुविमुखेगतेयत्पातकंनृप । तदेवाष्टगुणंपुंसांसूर्योढेविमुखेगते १०४ तस्मात्स्वशक्त्याराजेंद्रसूर्योढमतिथिंनरः । पूजयेत्पूजितेतस्मिन्पूजिताःसर्वदेवताः १०५ अन्नशाकाप्रदानेनस्वशक्त्याप्रीणयेत्पुमान् शयनप्रस्तरमहीप्रदानैरथवापितम् १०६ कृतपादादिशौचश्चभुक्त्वासायंततोगृही । गच्छेदस्फुटितांशय्यामपिदारुमयींनृप १०७ नाविशालांनवाभग्नांनासमांमलिनांनच । नचजंतुमयींशय्यामधितिष्ठेदनास्तृताम् १०८ प्राच्यांदिशिशिरःशस्तंयाम्यायामथवानृप । सदैवस्वपतःपुंसोविपरीतंतुरोगदम् १०९ ऋतावुपगमःशस्तःस्वपत्न्यामवनीपते । पुन्नाम्न्यृक्षेशुभेकालेज्येष्ठयुग्मासुरात्रिषु ११० नास्नातांतुस्त्रियंगच्छेन्नातुरांनरज

दितिसूतकादेरुपलक्षणम् प्रायश्चित्तीयतेपातकीभवति ९८ ९९ १०० वैश्वदेवनिमित्तंवैश्वदेवफलसिध्यर्थंपत्नीमंत्रंविनाबलिंहरेत् पत्न्यासार्द्धंबलिंहरेदित्यपिपाठःकुत्रापि १०१ तत्रापिसायमपि १०२ प्रव्हःप्रह्वत्वंप्रणामइत्यर्थः १०३ सूर्येणास्तंगच्छताऊढःप्रापितइवसूर्यास्तमनानंतरमागतइत्यर्थः १०४ १०५ शयनंकंबलादि प्रस्तरःकटतृणादिः महीस्थलमात्रमपि १०६ अस्फुटितामविदीर्णाम् गजदंतमयींतदभावेदारुमयीमपि १०७ १०८ स्वपतःप्राच्यांयाम्यायांचैवशिरः १०९ इदानींविशिष्ययोषिद्रमनमाह यावदध्यायसमाप्ति ऋ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताविति पुन्नामर्क्षाणिदशअश्विनीकृत्तिकारोहिणीपुनर्वसुपुष्यहस्तानुराधाश्रवणपूर्वाभाद्रपदौत्तराभाद्रपदाच ज्येष्ठयुग्मासुरात्रिषु ऋतुकालमारभ्यषष्ठ्यष्टम्यादिषुरात्रिषु तत्रापिज्येष्ठासुवृद्धासुउत्तरोत्तरंशुभास्वित्यर्थः ११० अस्नातामकृतर्तुस्नानाम् रजस्वलांचतुर्थरात्रिप्रभृत्यनुपरतरजस्काम् अनिष्टामनुपजातेच्छांअप्रशस्तांपरिवादादिदूषिताम् ११ अदक्षिणामननुकूलाम् अन्यकामामन्यपुरुषाभिलाषिणीम् एभिर्वक्ष्यमाणैर्गुणैर्युतःपुरुषोव्यवायंव्रजेदित्युत्तरेणान्वयः १२ १३ १४ १५ १६ अन्ययोनौअश्वादियोनौ अयोनौमुखादौ औषधंवृष्यवाजीकरणर

स्वलाम् । नानिष्टांनप्रकुपितांनाप्रशस्तांनगर्भिणीम् ११ नादक्षिणांनान्यकामांनाकामांनान्ययोषितम् । क्षुत्क्षामामतिभुक्तांवास्वयंचैभिर्गुणैर्युतः १२ स्नातःस्रग्गंधधृक्स्फीतोनश्रांतःक्षुधितोपिवा । सकामःसानुरागश्चव्यवायंपुरुषोव्रजेत् १३ चतुर्दश्यष्टमीचैवअमावास्याथपौर्णिमा । पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवच १४ तैलस्त्रीमांससंभोगीपर्वस्वेतेषुवैपुमान् । विण्मूत्रभोजनंनामप्रयातिनरकंनृप १५ अशेषपर्वस्वेतेषुतस्मात्संयमिभिर्बुधैः । भाव्यंसच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः १६ नान्ययोनावयोनौवानोपयुक्तौषधस्तथा । देवद्विजगुरूणांचव्यवायीनाश्रयेभवेत् १७ चैत्यचत्वरतीरेषुनैवनैवचतुष्पथे । नैवश्मशानोपवनसलिलेषुमहीपते १८ प्रोक्तपर्वस्वशेषेषुनैवभूपालसंध्ययोः । गच्छेद्व्यवायंमतिमान्नमूत्रोच्चारपीडितः १९ पर्वस्वभिगमोधन्योदिवापापप्रदोनृप । भुविरोगप्रदोनृणामप्रशस्तोजलाशये १२० परदारान्नगच्छेच्चमनसापिकदाचन । किमुवाचास्थिबंधोपिनास्तितेषुव्यवायिनाम् २१ मृतेनरकमभ्येतिहीयतेत्रापिचायुषः । परदारगतिःपुंसामुभयत्रापिसीदति २२ इतिमत्वास्वदारेषुऋतुमत्सुनरोव्रजेत् । यथोक्तदोषहीनेषुसकामेष्वनृतावपि १२३ । । इतिश्रीविष्णुपुराणेतृतीयेंशेगृहस्थधर्मोनामएकादशोध्यायः ११ । । और्वउवाच । । देवगोब्राह्मणान्सिद्धवृद्धाचार्यांस्तथार्चयेत् । द्विकालंचनमेत्संध्यामग्नीनुपचरेत्तथा १ सदानुपहतेवस्त्रेप्रशस्ताश्चतथौषधीः । गारुडानिचरत्नानिबिभृयात्प्रयतोनरः २ प्रस्निग्धामलकेशश्चसुगंधिश्चारुवेषधृक् । सिताःसुमनसोहृद्याबिभृयाच्चनरःसदा ३ किंचित्परस्वंनहरेन्नाल्पमप्यप्रियंवदेत् । प्रियंवानानृतंब्रूयान्नान्यदोषानुदीरयेत् ४ नान्यश्रियंतथावैरंरोचयेत्पुरुषेश्वर ।

सायनादि देवादीनामाश्रयेगृहेस्थितः आश्रयीतिपाठेसएवार्थः १७ १८ १९ अधन्योधनहानिकृत् १२० यदामनसानगच्छेत्तदावाचातदभिलाषःकिंबक्तव्यइत्यर्थः परस्त्रीव्यवायिनामस्थिबंधोपिनास्ति कृमिकीटादियोनिषुपरिवर्ततइत्यर्थः २१ परदारेषुगतिर्गमनंयस्यसपुसांमध्येसीदति उभयत्रइहपरत्रच तदेवाह मृतेइति भीतिदेतिपाठःसुगमः २२ इतिश्रीरत्नगर्भभट्टाचार्यविरचितायांवैष्ण०तृतीयेंशेएकादशोध्यायः ११ ब्राह्मंमुहूर्तमारभ्यनिशीथांतंसमीरिताः सदाचाराद्वादशेतुतएवानियमेरिताः १ प्रायेणतुगृहस्थानांत्रिवर्गपरचेतसां दृष्टादृष्टप्रधानानांसद्धर्माणामिहोक्तयः १ अनुपहतेअभग्ने प्रशस्ताविष्णुक्रांतादूर्वादयः २ प्रस्निग्धाःअरूक्षाः प्रसिद्धाइतिपाठेअलंकृताःकेशायस्य ३ ४ अन्यश्रियंवैरंचनाभिलषेत् नद्यादी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नांकूलच्छायाम् ५ विद्विष्टादिभिःसहमैत्रींनकुर्वीत बहुभिर्वैरंयस्य अतिकीटकैःअत्यंतकीटवत्पीडकैःकीटकैरितिपाठेकुदेशस्थैरित्यर्थः बंधकीवैश्या क्षुद्रःअल्पलाभोत्सिक्तःअनृतकथोमिथ्यावादी ६ शठःकुटिलः ७ जलौघस्यवेगमग्रेअन्यस्मिन्ननवतीर्णेनावगाहेत्नप्रविशेत् प्रदीप्तंअग्निनाक्रांतम् ८ नकुष्णीयान्नोत्किरेत्असंवृतमुखोजृंभादिनकुर्यात् ९ १० नमृद्नीयान्नमर्दयेत् अमेध्यःअशुचिःसन्ज्योतींषिसूर्यादीनिशस्तानिब्राह्मणादीनिनाभिवीक्षेतज्योतींष्यमेध्याशस्तानीतिपाठेज्योतींषिचक्षुःप्रतिकूलानिअमेध्यानिपुरीषादीनि अशस्तानिअमंगलानि ११

नदुष्टयानमारोहेत्कूलच्छायांनसंश्रयेत् ५ विद्विष्टपतितोन्मत्तबहुवैरातिकीटकैः । बंधकीवंधकीभर्तृक्षुद्रानृतकथैःसह ६ तथातिव्ययशीलैश्चपरिवादरतैःशठैः । बुधोनमैत्रींकुर्वीतनैकःपंथानमाश्रयेत् ७ नावगाहेज्जलौघस्यवेगमग्रेनरेश्वर । प्रदीप्तंवेश्मनविशेन्नारोहेच्छिखरंतरोः ८ नकुर्याद्दंतसंघर्षंनकुष्णीयाच्चनासिकाम् । नासंवृतमुखोजृंभेच्छ्वासकासौचवर्जयेत् ९ नोच्चैर्हसेत्सशब्दंचनमुंचेत्पवनंबुधः । नखान्नवादयेच्छिंद्यान्नतृणंनमहींलिखेत् १० नश्मश्रुभक्षयेल्लोष्टंनमृद्नीयाद्विचक्षणः । ज्योतींष्यमेध्यःशस्तानिनाभिवीक्षेतवैप्रभो ११ नग्नांपरस्त्रियंचैवसूर्यंचास्तमनोदये । नहुंकुर्याच्छवंचैवशवगंधोहिसोमजः १२ चतुष्पथांश्चैत्यतरूञ्श्मशानोपवनानिच । दुष्टस्त्रीसंनिकर्षंचवर्जयेन्निशिसर्वदा १३ पूज्यदेवध्वजज्योतिश्छायांनातिक्रमेद्बुधः । नैकःशून्याटवींगच्छेन्नचशून्यगृहेवसेत् १४ केशास्थिकंटकामेध्यवह्निभस्मतुषांस्तथा । स्नानांभोधरणींचैवदूरतःपरिवर्जयेत् १५ नानार्यानाश्रयेत्कांश्चिन्नजिह्मान्नोचयेद्बुधः । उपसर्पेतनव्यालांश्चिरंतिष्ठेन्नचोत्थितः १६ अतीवजागरस्वप्नेनवृत्तिंनासनंबुधः । नसेवेततथाशय्यांव्यायामंचनरेश्वर १७ दंष्ट्रिणःशृंगिणश्चैवप्राज्ञोदूरेणवर्जयेत् । अवश्यायंचराजेंद्रपुरोवातातपौतथा १८ नस्नायान्नस्वपेन्नग्नोनचैवोपस्पृशेद्बुधः । मुक्तकच्छश्चनाचामेद्देवाद्यर्चांचवर्जयेत् १९ होमदेवार्चनाद्यासुक्रियास्वाचमनेतथा । नैकवस्त्रःप्रवर्तेतद्विजवाचनकेजपे २० नासमंजसशीलैस्तुसहासीतकदाचन । सद्वृत्तसन्निकर्षोहिक्षणार्धमपिशस्यते २१ विरोधंनोत्तमैर्गच्छेन्नावरैश्चसदाबुधः । विवादश्चविवाहश्चसमशीलैर्नृपेष्यते २२ नारभेतकलिंप्राज्ञःशुष्कवैरंनकारयेत् । अप्यल्पहानिःसोढव्यावैरेणार्थागमंत्यजेत् २३ स्नातोनांगानिनिर्मार्जेत्स्नानशाठ्यानपाणिना । नचनिर्धूनयेत्केशानाचामेन्नैवचोत्थितः २४ पादेननाक्रमेत्पादंनपूज्याभिमुखंनयेत् । वेषासनेगु

शवंचकारात्तद्गंधंचनहुंकुर्यात्नजुगुप्सेत तत्रहेतुः शवगंधोहीति विश्वस्याग्नीषोमात्मकत्वेनान्यंशेऊष्मणिहिप्राणेनसहगतेवशिष्टस्यदेहस्यशवस्यगंधःसोमजइति अग्निरूष्मारसःसोमःशरीरंतन्मयंयतइतिवचनात् १२ १३ पूज्यागुरुप्रभृतयः १४ १५ जिह्मान्कुटिलान्नरोचयेत्नेच्छेत् व्यालान्दुष्टमृगान्सर्पान्वानोपसर्पेततत्संमुखंनगच्छेत् १६ अतीवजागरादीन् नचवृत्तिम् आसनमुपवेशनम् शय्यामितिशयनव्यवाययोरुपलक्षणम् व्यायामंश्रमम् १७ अवश्यायंहिमम् १८ उपस्पृशेत् आचामेत् मुक्तकच्छःमुक्तपश्चादंचलः १९ द्विजवाचनकेपुण्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हवाचने २० २१ इष्यतेयथाकथंचिदनुमन्यतेनविधीयते २२ तदेवाह नेति कलिंकलहम् २३ २४ पूज्यानाममिमुखंपादंननयेन्नप्रसारयेत् २५ अपसव्यमप्रदक्षिणम् विपरीतान् अमंगल्यान् प्रदक्षिणंनकुर्यात् २६ २७ २८ सिंघाणकंकठिनश्लेष्मा क्षुतमिति केचित् महाजनेमहाजनसमीपे २९ ईर्ष्युरसहिष्णुः ताश्चयोषितोनाधिकुर्यात्कुत्राप्यधिकारिणीर्न

रोरग्रेभजेतविनयान्वितः २५ अपसव्यंनगच्छेच्चदेवागारचतुष्पथान्। मांगल्यपूजांश्चततोविपरीतानदक्षिणान् २६सोमाग्न्यर्कांबुवायूनांपूज्यानांच नसंमुखम्। कुर्यात्ष्ठीवनविण्मूत्रसमुत्सर्गंचपंडितः २७ तिष्ठन्नमूत्रयेत्तद्वत्यपानंनावमूत्रयेत् । श्लेष्मविण्मूत्ररक्तानिसर्वदैवनलंघयेत् २८ श्लेष्मसिं घाणकोत्सर्गोनान्नकालेप्रशस्यते। बलिमंगलजप्यादौनहोमेनमहाजने २९ योषितोनावमन्येतनचासांविश्वसेद्बुधः। नचैवेर्ष्युर्भवेत्ताश्चनाधिकुर्यात्क दाचन ३० मांगल्यरत्नपुष्पाज्यपूज्याननभिवाद्यच। ननिष्क्रामेद्गृहात्प्राज्ञःसदाचारपरोनृप ३१चतुष्पथान्नमस्कुर्यात्कालेहोमपरोभवेत्। दीनानभ्यु द्धरेत्साधूनुपासीतबहुश्रुतान् ३२ देवर्षिपूजकःसम्यक्पितृपिंडोदकप्रदः । सत्कर्ताचातिथीनांयःसलोकानुत्तमान्व्रजेत् ३३ हितंमितंप्रियंकालेव श्यात्मायोहिभाषते । सयातिलोकानाह्लादहेतुभूतान्नृपाक्षयान् ३४ धीमान्ह्रीमान्क्षमायुक्तआस्तिकोविनयान्वितः । विद्याविनयवृद्धानांयाति लोकाननुत्तमान् ३५ अकालगर्जितादौतुपर्वस्वाशौचकादिषु । अनध्यायंबुधःकुर्यादुपरागादिकेतथा ३६ शमंनयतियःक्रुद्धान्सर्वबंधुरमत्सरी। भीताश्वासनकृत्साधुःस्वर्गस्तस्याल्पकंफलम् ३७ वर्षातपादिकेछत्रीदंडीरात्र्यटवीषुच । शरीरत्राणकामोवैसोपानत्कःसदाव्रजेत् ३८ नोर्ध्वंनति र्यक्दूरंवानिरीक्षन्पर्यटेद्बुधः। युगमात्रंमहीपृष्ठंनरोगच्छेद्विलोकयन् ३९ दोषहेतूनशेषांस्तुवश्यात्मायोनिरस्यति । तस्यधर्मार्थकामानांहानि र्नाल्पापिजायते ४० पापेप्यपापःपुरुषेप्यभिधत्तेप्रियाणियः। मैत्रीद्रवांतःकरणस्तस्यमुक्तिःकरेस्थिता ४१ येकामक्रोधलोभानांवीतरागानगोच रे। सदाचारस्थितास्तेषामनुभावधृतामही ४२ तस्मात्सत्यंवदेत्प्राज्ञोयत्परप्रीतिकारणम्। सत्यंयत्परदुःखायतत्रमौनपरोभवेत् ४३ प्रियंयुक्तं हितंनैतदितिमत्वानतद्वदेत्। श्रेयस्तत्रहितंवाच्यंयद्यप्यत्यंतमप्रियम् ४४ प्राणिनामुपकारायवदेदिहपरत्रच । कर्मणामनसावाचातदेवमतिमा न्भजेत् ४५। । इतिश्रीविष्णुपुराणेतृतीयेंशेसदाचारोनामद्वादशोध्यायः १२। । और्वउवाच। । सचैलस्यपितुःस्नानंजातेपुत्रे

कुर्यात् तास्वितिपाठेंतःपुराधिकारंनकुर्यादित्यर्थः ३० ३१ साधून्बहुश्रुतानुपासीतनेतरान् ३२ ३३ कालेसमयेउचिते ३४ विद्याविनयवृद्धानांविनयस्तत्कर्तृकशिक्षातदान्वितइत्यर्थः ३५ ३६ ३७ ३८ युगमात्रंहस्तचतुष्टयम् ३९ दोषहेतूनुक्तानुक्तांश्च ४० पापेअपराधिनि अपापःअद्रोग्धा परुषभाषिणिप्रियभाषी ४१ येकामादीनांगोचरेनास्पदंभवंतीत्यर्थः अनुभा वैःसत्यादिस्वभावैर्धृता सत्येनोत्तभिताभूमिरितिश्रुतेः ४२ ४३ ४४ उपदेशसारमाह प्राणिनामिति ४५ इतिश्रीविष्णुपुराणेतृतीयेंशेरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांद्वाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोध्यायः १२ त्रयोदशेथश्राद्धानिसानिमित्तान्यवर्णयत् प्रेतक्रियास्तथातासुयथार्हमधिकारिणः १ पितुःपुत्रजन्मकालेसंनिहितस्य १ सव्यक्रमात्प्रदक्षिणक्रमेण नान्यमानसःनअन्यस्मिन्नुत्पन्नपुत्रादौमानसंयस्यसः श्राद्धसमयेतादृशोनभवेदित्यर्थः २ कायेनप्रजापतितीर्थेन ३ ४ सर्ववृद्धौदर्शयति कन्यापुत्रेति ५ पुत्रस्यादिमुखदर्शनेप्रथमतोमुखदर्शने तच्चजन्मकालेसन्निहितस्यैवपितुः तथैवोक्तत्वात् ६ ७ स्नानैः स्नानसाधनैः सचैलाःसर्वधृतवस्त्रसहिताएवस्नाताः ८ अमुकायेतिनामगोत्रोपलक्षणम् ९ गोभिःसमंगवांप्रवेशसमये एतच्चादिवा

विधीयते । जातकर्मयथाकुर्याच्छ्राद्धमभ्युदयेचयत् १ युग्मान्देवांश्चपित्र्यांश्चसम्यक्सव्यक्रमाद्द्विजान् । पूजयेद्भोजयेच्चैवतन्मनानान्यमानसः २ दध्यक्षतैःसबदरैःप्राङ्मुखोदङ्मुखोपिवा । देवतीर्थेनवैपिड़ान्दद्यात्कायेनवानृप ३ नांदीमुखःपितृगणस्तेनश्राद्धेनपार्थिव । प्रीयतेतत्तुकर्तव्यंपुरुषैःसर्ववृद्धिषु ४ कन्यापुत्रविवाहेषुप्रवेशेनववेश्मनः । नामकर्मणिबालानांचूडाकर्मादिकेतथा ५ सीमंतोन्नयनेचैवपुत्रादिमुखदर्शने । नांदीमुखंपितृगणंपूजयेत्प्रयतोगृही ६ पितृपूजाविधिःप्रोक्तोवृद्धावेषसमासतः । श्रूयतामवनीपालप्रेतकर्मक्रियाविधिः ७ प्रेतदेहंशुभैःस्नानैःस्नापितंस्त्रग्विभूषितम् । दग्ध्वाग्रामबहिस्नाताःसचैलाःसलिलाशये ८ यत्रतत्रस्थितायैतदमुकायेतिवादिनः । दक्षिणाभिमुखादद्युर्बांधवाःसलिलांजलिम् ९ प्रविष्टाश्चसमंगोभिर्ग्रामंनक्षत्रदर्शने । कटधर्मांस्ततःकुर्युर्भूमौप्रस्तरशायिनः १० दातव्योऽनुदिनंपिंडःप्रेतायभुविपार्थिव । दिवाचनक्तंभोक्तव्यममांसंमनुजर्षभ ११ दिनानितावदिच्छातःकर्तव्यंविप्रभोजनम् । प्रेतस्तृप्तिंतथायातिबंधुवर्गेणभुंजता १२ प्रथमेह्नितृतीयेवासप्तमेनवमेतथा । वस्त्रत्यागंबहिःस्नानंकृत्वादद्यात्तिलोदकम् १३ चतुर्थेह्निचकर्तव्यंभस्मास्थिचयनंनृप । तदूर्ध्वमंगस्पर्शश्चसपिंडानामपीष्यते १४ योग्याःसर्वक्रियाणांतुसमानसलिलास्तथा । अनुलेपनपुष्पादिभोगादन्यत्रपार्थिव १५ शय्यासनोपभोगश्चसपिंडानामपीष्यते । भस्मास्थिचयनादूर्ध्वंसंयोगोनतुयोषिताम् १६ बालेदेशांतरस्थेचपतितेचमुनौमृते । सद्यःशौचंतथेच्छातोजलाग्न्युद्बंधनादिषु १७ मृतबंधोर्दशाहानिकुलस्यान्नंनभुज्यते । दानंप्रतिग्रहोयज्ञःस्वाध्यायश्चनिवर्तते १८ विप्रस्यैतद्द्वादशाहंराजन्यस्याप्यशौचकम् । अर्धमासश्चवैश्यस्यमासःशूद्रस्यशुद्धये १९

दाहविषयम् कटधर्मान्प्रेतकृत्यानि प्रस्तरस्तृणशय्या १० अनुदिनंयावदाशौचम् भक्तमोदनः अतःपिष्टादिवर्जनमायाति अमांसामित्युक्तेर्मांसव्यतिरिक्तानुज्ञा ११ विप्रभोजनंएतच्च सपिंडसमानोदकविषयम् सपिंडतादिभेदश्चकूर्मोक्तः सपिंडतातुपुरुषेसप्तमेविनिवर्तते समानोदकभावस्तुजन्मनाम्नोरवेदनइति १२ १३ १४ सर्वक्रियाणामुपासनापंचयज्ञादीनाम् १५ १६ बालेजातदंतेविदेशस्थइतिसंवत्सरादूर्ध्वंसद्यःशौचम् संवत्सराभ्यंतरेतुअशौचांतेश्रुतेत्रिरात्रम् देशांतरंतुमहानद्यंतरंयत्रगिरिर्वाव्यवधायकःवाचोयत्रविभिद्यंतेतद्देशांतरमिष्यतइति इच्छातइतिविशेषणादनिच्छयामृतेयथोक्तमशौचादिकार्यम् यदिकश्चित्प्रमादेनम्रियेताग्न्युदकादिना तस्याशौचंविधातव्यंकर्तव्याचोदकक्रियाइतिस्मृतेः १७ मृतोबंधुःसपिंडोयस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्कुलस्यान्नंदशाहंनभोक्तव्यम् तत्कुलस्यतदन्नभोक्तुश्चयावदाशौचंदानादिनिवर्तते १८ एतत्पूर्वोक्तम् १९ आद्यमेकोद्दिष्टश्राद्धमाह अयुजइति अयुजाएकत्रीणीत्येवंविषमसंख्यान् आद्येअशौचानंतरंप्रथमेहनि अंतइतिपाठेअशौचांतइत्यर्थः आद्यमेकादशेहनीतिस्मृतेः २० द्विजभोजनादनंतरंवर्णैर्विप्रादिभिर्वार्याद्याःक्रमात्प्रष्टव्याः ततस्तेशुद्ध्येरन्नित्यन्वयः ब्राह्मणादिभिश्चतुर्भिर्वर्णैश्चत्वारिक्रमात्स्प्रष्टव्यानीत्यर्थः २१ शुद्ध्यनंतरमेवनिजधर्मार्जनैर्जीवेत् जीविकार्थंनिजधर्मेणोपार्जनंकुर्यादित्यर्थः २२ अतःप्रथममासात्परंप्रतिमासंमृततिथौयावदब्दंआह्वानमावाहनम् आदिशब्देनाग्नौकरणादिक्रिया दैवनियोगोवैश्वदेवविप्रामंत्रणंचतद्रहितम् २३ भुक्तवत्सुबहुषु अयुजोभोजयेदित्युक्तत्वात् प्रेतायैकएवपिंडोदेयः २४ प्रश्नश्चाभि

अयुजोभोजयेत्कामंद्विजानाद्येततोदिने । दद्याद्दर्भेषुपिंडंचप्रेतायोच्छिष्टसन्निधौ २० वार्यायुधप्रतोदास्तुदंडस्तुद्विजभोजनात् । स्प्रष्टव्योनंतरंवर्णैः शुद्ध्येरंस्तेततःक्रमात् २१ ततःस्ववर्णधर्मायेविप्रादीनामुदाहृताः । तान्कुर्वीतपुमाञ्जीवेन्निजधर्मार्जनैस्तथा २२ मृताहनिचकर्तव्यमेकोद्दिष्टमतःपरम् । आह्वानादिक्रियादैवनियोगरहितंहितत् २३ एकोर्घस्तत्रदातव्यस्तथैवैकंपवित्रकम् । प्रेतायपिंडोदातव्योभुक्तवत्सुद्विजातिषु २४ प्रश्नश्चतत्राभिरतिर्यजमानैर्द्विजन्मने । अक्षय्यममुकस्येतिवक्तव्यंविरतौतथा २५ एकोद्दिष्टमयोधर्मइत्थमावत्सरात्स्मृतः । सपिंडीकरणंतस्मिन्काले राजेंद्रतच्छृणु २६ एकोद्दिष्टविधानेनकार्यंतदपिपार्थिव । तिलगंधोदकैर्युक्तंतत्रपात्रचतुष्टयम् २७ पात्रंप्रेतस्यतत्रैकंपात्रत्रययुतंतथा । सेचयेत्पितृपात्रेषुप्रेतपात्रंनृपत्रिषु २८ ततःपितृत्वमापन्नेतस्मिन्प्रेतेमहीपते । श्राद्धधर्मैरशेषैस्तुतत्पूर्वानर्चयेत्पितॄन् २९ पुत्रःपौत्रःप्रपौत्रोवाबंधुर्वाभ्रातृसंततिः । सपिंडसंततिर्वापिक्रियार्हानृपजायते ३० तेषामभावेसर्वेषांसमानोदकसंततिः । मातृपक्षस्यपिंडेनसंबद्धायेजलेनच ३१ कुलद्वयेपिचोत्सन्नेस्त्रीभिःकार्याक्रियानृप ३२ संघातांतर्गतैर्वापिकार्याप्रेतस्यचक्रिया । उत्सन्नबंधुरिक्थानांकारयेदवनीपतिः ३३ पूर्वाःक्रियामध्यमाश्चतथाचैवोत्तराःक्रियाः । त्रिप्रकाराःक्रियाह्येतास्तासांभेदंशृणुष्वमे ३४ आदाहवार्यायुधादिस्पर्शाद्यंतास्तुयाःक्रियाः । ताःपूर्वामध्यमामासिमास्येकोद्दिष्टसंज्ञिताः ३५ प्रेतेपितृत्वमापन्नेसपिंडीक्रमणादिषु । क्रियंतेयाःक्रियाःपित्र्याःप्रोच्यंतेतानृपोत्तराः ३६ पितृमातृसपिंडैस्तुसमानसलिलै

रतिःअभिरम्यतामितियजमानेनोक्तैर्द्विजैरभिरताइतिवक्तव्यमित्यन्वयः अक्षय्यममुकस्येतिएकोद्दिष्टविशेषविषयमेतत् उपतिष्ठतामित्यक्षय्यस्थानेविसर्जनेभिरम्यतामितिवदेत् भूयस्तेभिरताःस्मेतिस्मृतेः २५ तस्मिन्कालेपूर्णसंवत्सरेतत्सपिंडीकरणम् २६ २७ पात्रचतुष्टयस्यविनियोगमाह पात्रंप्रेतस्येति २८ श्राद्धधर्मैःस्वधाकारादिभिः तत्पूर्वान्ससपिंडीकृतःपूर्वोयेषांतांस्त्रीन्पूजयेत्चतुर्थस्तुनिवर्ततेतस्मादातृतीयात्पुरुषान्नामगृह्णंतीतिश्रुतेः २९ मुख्यानुकल्पभावेनक्रियाकर्तॄनाह पुत्रइतिसार्धैस्त्रिभिः ३० ३१ पूर्वोक्तानामेवस्त्रीभिर्मुख्यानुकल्पभावेनक्रियाकार्याइत्यर्थः ३२ संघातःसार्थः यात्रिकसमुदायः तत्रमृतस्यतदंतर्गतैःप्रेतक्रियाकार्येत्यर्थः समानप्रवरसमानगोत्रादिरूपःसंघातइतिकेचित् उत्सन्नबंधवोरिक्थानिचयेषांतेषां उत्सन्नबंधुरिक्थार्घादितिपाठेउत्सन्नबंधोःप्रेतस्यरिक्थार्घादित्यर्थः ३३ कर्तृव्यवस्थावक्तुंक्रियात्रैविध्यमाह पूर्वाइतित्रिभिः ३४ आदाहादाहपूर्वावधिकाश्चतावार्यायुधादिस्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्शादिरंतेयासांताश्चतथा दाहाद्याअशौचांतभवाः पूर्वाक्रियाइत्यर्थः ३५ ३६ ३७ तत्रपूर्वाःक्रियाःपित्रादिभिरपियथार्हंकर्तव्याइतिपूर्वेणसंबंधः पुत्राद्यैरेवोत्तराःमध्यमास्तत्तनयैर्यथासंभवं कर्तव्याइतिगम्यते ३८ मृताहानिचेतिचकारादन्वष्टकादिषुपार्वणविधिनाचेत्यर्थः ३८ तस्मादुत्तरक्रियाबाहुल्यादुत्तरक्रियातत्कालविधीञ्शृण्वित्यर्थः ४० इतिश्रीरत्नगर्भभट्टाचार्यविरचितायांत्रयोदशोध्यायः १३ श्राद्धंतत्फलकालांश्चनित्यकाम्यादिभेदतः चतुर्दशेतुकल्पांश्चतत्फलान्यन्ववर्णयत् १ तत्रतावदुत्तरक्रियाणांकालांतरवर्णयिष्यञ्श्राद्धप्रशंसामाह ब्रह्मेति १ २ प्रतिमासंकृष्णपक्षेपंचदश्यांचदर्शेश्राद्धंकुर्वीतेत्यर्थः अष्टकाआग्रहायण्याऊर्ध्वंतिस्रःकृष्णाष्टम्यस्तासु ३ श्राद्धार्हद्रव्यंविशिष्टंचद्विजमागतंविज्ञायेत्यन्वयः ४ समस्तेषु

स्तथा । तत्संघातांतर्गतैश्चराज्ञावाधनहारिणा ३७ पूर्वाःक्रियास्तुकर्तव्याःपुत्राद्यैरेवचोत्तराः । दौहित्रैर्वानरश्रेष्ठकार्यास्तत्तनयैस्तथा ३८ मृताहानिचकर्तव्याःस्त्रीणामप्युत्तराःक्रियाः । प्रतिसंवत्सरंराजन्नेकोद्दिष्टविधानतः ३९ तस्मादुत्तरसंज्ञायाक्रियातांशृणुपार्थिव । यदायदाचकर्तव्या विधिनायेनचानघ ४० इतिश्रीविष्णुपुराणेतृतीयेंशेत्रयोदशोध्यायः १३ । । और्वउवाच । । ब्रह्मेंद्ररुद्रनासत्यसूर्याग्निवसुमारुतान् । विश्वे देवान्ऋषिगणान्वयांसिमनुजान्पशून् १ सरीसृपान्पितृगणान्यच्चान्यान्भूतसंज्ञकान् । श्राद्धंश्रद्धान्वितःकुर्वंस्तर्पयत्यखिलंहितत् २ मासि मास्यसितेपक्षेपंचदश्यांनरेश्वर । तथाष्टकासुकुर्वीतकाम्यान्कालाञ्शृणुष्वमे ३ श्राद्धार्हमागतंद्रव्यंविशिष्टमथवाद्विजम् । श्राद्धंकुर्वीतविज्ञाय व्यतीपातेऽयनेतथा ४ विषुवेचैवसंप्राप्तेग्रहणेशशिसूर्ययोः । समस्तेष्वेवभूपालराशिष्वर्केचगच्छति ५ नक्षत्रग्रहपीडासुदुष्टस्वप्नावलोकने । इ च्छाश्राद्धानिकुर्वीतनवसस्यागमेतथा ६ अमावास्यायदामैत्रविशाखास्वातियोगिनी । श्राद्धैःपितृगणस्तृप्तिंतदाप्नोत्यष्टवार्षिकीम् ७ अमावास्या यदापुष्येरौद्रेचर्क्षेपुनर्वसौ । द्वादशाब्दंतदातृप्तिंप्रयांतिपितरोऽर्चिताः ८ वासवाजैकपादृक्षेपितॄणांतृप्तिमिच्छताम् । वारुणंचाप्यमावास्यादेवानामपि दुर्लभा ९ नवस्वृक्षेष्वमावास्यायदैतेष्ववनीपते । तदातृप्तिप्रदंश्राद्धंपितॄणांशृणुचापरम् १० गीतंसनत्कुमारेणयदैलायमहात्मने । पृच्छतेपितृभक्ता यश्रद्धयावनतायच ११ वैशाखमासस्यतुयातृतीयानवम्यसौकार्तिकशुद्धपक्षे । नभस्यमासस्यतमिस्रपक्षेत्रयोदशीपंचदशीचमाघे १२ एतायुगा द्याःकथिताःपुराणैरनंतपुण्यास्तिथयश्चतस्रः । उपप्लवेचंद्रमसोरवेश्चत्रिष्वष्टकास्वप्ययनद्वयेच १३ पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतो

राशिषुअर्केगच्छतिसतीतिअर्कसंक्रांतीनांश्राद्धकालत्वस्योक्तत्वादयनेविषुवेचेतिपृथगुक्तिःफलातिरेकार्था ५ इच्छाश्राद्धानिकाम्यानि नवसस्यागमइत्येतच्चव्रीहियवव्यतिरिक्तविषयम् तयोर्नित्यश्राद्धनिमित्तत्वात् ६ मैत्रमनुराधा ७ रौद्रमार्द्रा ८ वासवंज्येष्ठा अजैकपात्पूर्वाभाद्रपदा वारुणंशतभिषा एतेषुनक्षत्रेष्वमावास्या पितॄणांदेवानांचतृप्तिंकर्तुमिच्छतांपुंसांदुर्ल भा इच्छतेतिपाठेसएवार्थः ९ नन्वमावास्याश्राद्धत्वान्नित्यतैवतत्कथमेतेषुफलश्रुतिरित्यतआह नवस्विति गोदोहनायप्रणयेत्पशुकामस्येतिवन्नक्षत्रगुणयोगाद्गुणफलविधिरित्यर्थः नि त्यात्पृथगेतानिश्राद्धानीतिवा १० ऐलायपुरूरवसे ११ पंचदशीमाघइत्यत्रकृष्णपक्षइत्यनुषंगः १२ एताःपूर्वोक्तायुगाद्याः १३ १४ पूर्वोक्तैरेववारुणादिनक्षत्रैर्युक्तामाघामावास्याअति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेष्ठेत्याह माघासितइतित्रिभिः पूर्वतुएतैर्नक्षत्रैर्युक्तासामान्याअमावास्येतिशेषः १५ १६ १७ पितॄणामर्चनंकृत्वाआत्मनोदुरितंनिहंतिनाशयति १८ वर्षामघातृप्तिमिति अपरपक्षम घात्रयोदशीश्राद्धेतृप्तिंप्राप्येत्यर्थः १९ वित्तंविशुद्धंशस्तद्रव्यम् चित्तंचविशुद्धंवित्तशाठ्यहीनम् २० एतदेवपितृगीतेःस्पष्टयति पितृगीतानितियावदध्यायसमाप्ति अत्रवित्तचित्तादिपंच

मनुष्यः। श्राद्धंकृतंतेनसमाःसहस्रंरहस्यमेतत्पितरोवदंति १४माघासितेपंचदशीकदाचिदुपैतियोगंयदिवारुणेन। ऋक्षेणकालःसपरःपितॄणांनह्यस्य पुण्यैर्नृपलभ्यतेऽसौ १५ कालेधनिष्ठायदिनामतस्मिन्भवंतिभूपालतदापितृभ्यः। दत्तंजलान्नंप्रददातितृप्तिंवर्षायुतंतत्कुलजैर्मनुष्यैः १६ तत्रैवचेद्भाद्रप दास्तुपूर्वाःकालेतदायत्क्रियतेपितृभ्यः। श्राद्धंपरंतृप्तिमुपेत्यतेनयुगंसमग्रंपितरःस्वपंति १७ गंगांशतद्रुमथवाविपाशांसरस्वतींनैमिषगोमतींवा। अत्रावगाह्यार्चनमादरेणकृत्वापितॄणांदुरितंनिहंति १८ गायंतिवैतत्पितरःसदैववर्षामघातृप्तिमवाप्यभूयः। माघासितांतेशुभतीर्थतोयैर्यास्यामतृप्तिं तनयादिदत्तैः १९ चित्तंचवित्तंचनृणांविशुद्धंशस्तश्चकालःकथितोविधिश्च। पात्रंयथोक्तंपरमाचभक्तिर्नृणांप्रयच्छत्यभिवाञ्छितानि २० पितृगी तांस्तथैवात्रश्लोकांस्तांश्चशृणुष्वमे। श्रुत्वातथैवभवताभाव्यंतत्राहृतात्मना २१ अपिधन्यःकुलेजायादस्माकंमतिमान्नरः। अकुर्वन्वित्तशाठ्यंयः पिंडान्नोनिर्वपिष्यति २२ रत्नवस्त्रमहीयानमहाभोगादिकंवसु। विभवेसतिविप्रेभ्योयोऽस्मानुद्दिश्यदास्यति २३ अन्नेनवायथाशक्त्याकालेऽस्मि न्भक्तिनम्रधीः। भोजयिष्यतिविप्राग्र्यान्तन्मात्रविभवोनरः २४ असमर्थोऽन्नदानस्यधान्यमामंस्वशक्तितः। प्रदास्यतिद्विजाग्रेभ्यःस्वल्पाल्पां वापिदक्षिणाम् २५ तत्राप्यसामर्थ्ययुतःकराग्राग्रस्थितांस्तिलान्। प्रणम्यद्विजमुख्यायकस्मैचिद्रूपदास्यति २६ तिलैःसप्ताष्टभिर्वापिसमवेता ञ्जलाञ्जलीन्। भक्तिनम्रःसमुद्दिश्यभुव्यस्माकंप्रदास्यति २७ यतःकुतश्चित्संप्राप्यगोभ्योवापिगवाह्निकम्। अभावेप्रीणयन्नस्माञ्श्रद्धायुक्तः सदास्यति २८ सर्वाभावेवनंगत्वाकक्षामूलप्रदर्शकः। सूर्यादिलोकपालानामिदमुच्चैःपठिष्यति २९ नमेऽस्तिवित्तंनधनंनचान्यच्छ्राद्धोपयो ग्यंस्वपितॄन्नतोऽस्मि। तृप्यंतुभक्त्यापितरोमयैतौभुजौकृतौवर्त्मनिमारुतस्य ३०। । और्वउवाच। । इत्येतत्पितृभिर्गीतंभावाभा वप्रयोजनम्। यःकरोतिकृतंतेनश्राद्धंभवतिपार्थिव ३१ इतिश्रीविष्णुपुराणेतृतीयेंशेचतुर्दशोध्यायः १४। । और्वउवाच। । ब्राह्मणान्भोजये

कप्राशस्त्येपितृगीताश्लोकाञ्शृणु २१ २२ २३ २४ २५ आममपक्वम् धान्यमानमितिवापाठ :तत्तुपुरुषाहारमात्रम् २६ २७ गवाह्निकमेकस्यागोरेकाहतृप्तिजनकंतृणादि २८ कक्षामूलप्रदर्शकःनिर्धनत्वख्यापनार्थमूर्ध्ववाहुः २९ वित्तंस्वर्णरजतादिइतरत्धनंचनास्तितत्प्रत्ययार्थमयाभुजौमारुतस्यवर्त्मनाकाशेक्षिप्तौ ३० भावाभावप्रयोजनंवित्तस्यभावेअभावेच प्रयोजनंपितृतृप्तियोगहेतुम् ३१ इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांतृतीयेंशेचतुर्दशोध्यायः १४ इतिकृत्यान्विधीनत्रश्राद्धीयब्राह्मणानपि भोक्तुःकर्तुश्चवर्ज्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निप्राहपंचदशेमुनिः १ अथपार्वणश्राद्धप्रायोगान्वक्ष्यन्प्रथमंश्राद्धीयान्ब्राह्मणानाह ब्राह्मणानितित्रिभिः यद्गुणान्यैर्गुणैर्युक्तान् द्वितीयकाठकस्थास्त्रयोऽनुवाकास्त्रिणाचिकेताः तदध्यायीतदनुष्ठाताचत्रिणाचिकेतः मधुवाताइति तृचाध्यायीत्रिमधुःब्रह्ममेतुमामित्याद्यनुवाकत्रयाध्यायीत्रिसुपर्णः षट्अंगानियस्यतंवेदमधीतेवेत्तिवाषडंगवित् १ वेदवित्वेदार्थविचारकः श्रोत्रियस्तदर्थानुष्ठाता योगीयोगाभ्यासी मूर्धानंदिवइत्याद्यृग्विशेषगीतंज्येष्ठसामगः २ आहवनीयादित्रयः सभ्यावसथ्यौचद्वौएतेपंचाग्नयः तेष्वभिरतस्तदुपासकः ३ एतान्प्रथमसार्धश्लोकोक्ताञ्ज्येष्ठसामगांतान् प्रथमेमुख्यकल्पेनिमंत्रयेत् अनंतरानृत्विगादीन् ४ एतेषामसंभवेऽनिषिद्धग्रहणार्थंनिषिद्धानाह मित्रध्रुगितिसार्धैस्त्रिभिः कुनखीनिसर्गतःकुत्सितनखः श्यावदंतः स्वभावतःकृष्णदंतः वह्निवेदोज्झःअधिकारीशक्तश्चसन्नग्निहोत्रवेदाभ्यासत्यागी सोमंसोमलतांविक्रीणीतेसतथाअभिशस्तस्तथासत्येनासत्येनवामहापातकिनेनाभियुक्तः स्ते

च्छ्राद्धेयद्गुणांस्तान्निबोधमे। त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णःषडंगवित् १ वेदविच्छ्रोत्रियोयोगीतथावैज्येष्ठसामगः। ऋत्विक्स्वस्त्रीयदौहित्रजामातृश्वशुरास्तथा २ मातुलोथतपोनिष्ठःपंचाग्न्यभिरतस्तथा। शिष्याःसंबंधिनश्चैवमातृपितृरतश्चयः ३ एतान्नियोजयेच्छ्राद्धेपूर्वोक्तान्प्रथमेनृप। ब्राह्मणान्पितृतुष्ट्यर्थमनुकल्पेष्वनंतरान् ४ मित्रध्रुक्कुनखीक्लीबःश्यावदंतस्तथाद्विज। कन्यादूषयितावह्निवेदोज्झःसोमविक्रयी ५ अभिशस्तस्तथास्तेनःपिशुनोग्रामयाजकः। भृतकाध्यापकस्तद्वद्भृतकाध्यापितश्चयः ६ परपूर्वापतिश्चैवमातापित्रोस्तथोज्झकः। वृषलीसूतिपोष्टाचवृषलीपतिरेवच ७ तथादेवलकश्चैवश्राद्धेनार्हतिकेतनम् ८ प्रथमेह्निबुधःशस्ताञ्छ्रोत्रियादीन्निमंत्रयेत्। कथयेच्चतदैवैषांनियोगान्पैत्र्यदैविकान् ९ ततःक्रोधव्यवायादीनायासंचद्विजैःसह। यजमानोनकुर्वीतदोषस्तत्रमहानयम् १० श्राद्धेनियुक्तोभुक्त्वाचभोजयित्वानियुज्यच। व्यवायीरेतसोगर्तेमज्जयत्यात्मनःपितॄन् ११ तस्मात्प्रथममत्रोक्तंद्विजाग्र्याणांनिमंत्रणम्। अनिमंत्र्यद्विजान्गेहमागतान्भोजयेद्यतीन् १२ पादशौचादिनागेहमागतान्पूजयेद्द्विजान्। पवित्रपाणिराचांतानासनेषूपवेशयेत् १३ पितॄणामयुजोयुग्मान्देवानामिच्छयाद्विजान्। देवानामेकमेकंवापितॄणांचनियोजयेत् १४ तथामातामहश्राद्धेवैश्वदेवसमन्वितम्। कुर्वीतभक्तिसंपन्नस्तंत्रंवावैश्वदेविकम् १५ प्राङ्मुखान्भोजयेद्विप्रान्देवानामुभयार्थकान्। पितृपैतामहानांचभोजये

नश्चोरःपिशुनःनिभृतेपरदोषवक्ताग्रामयाजकः साधारणानांयाजयिता ग्रामार्थंयष्टावा भृतकाध्यापकःवेतनेनाध्यापकः तेनाध्यापितश्च ६ परपूर्वापरस्मैयादत्तातस्याअपरःपतिः मातापित्रोरपातित्यादवापिउज्झकः वृषलीसूतिपोष्टाशूद्रापत्यपोषकः ७ देवलकः देवार्चनपरोविप्रोवित्तार्थीवत्सरत्रयम् सर्वैदेवलकोनामहव्यकव्येषुगर्हितइत्युक्तः केतनंनिमंत्रणम् ८ इदानींप्रयोगमाह प्रथमेह्निपूर्वेद्युः पैत्र्यदैविकान्एतेपैत्र्याएतेदैविकाइतिचकल्पयेत् यद्वापितृदेवसंबंधिनः अक्रोधनैःशौचपरैरितिनियोगान् ९ कथयित्वाचतथाकुर्यादित्याह ततइति १० महांतंदोषमाह श्राद्धइति नियुक्तःपूर्वदिनेभुक्त्वाचपरदिनेव्यवायी एवंकर्तापि ११ अनिमंत्रितानपियतीन्द्विजान्भोजयेत् यतिस्त्रैनैवपूर्वोक्तदोषाभावादितिभावः १२ तांश्चसर्वान्पादशौचादिनापूजयेत् १३ पितॄणामयुजोऽयुग्मान्देवानांयुग्मानिच्छयावायथाशक्तियोजयेत् उभयेषामेकमेकंवा १४ तंत्रेतिपितृमातामहश्राद्धयोरेकमेववैश्वदेवविधानमित्यर्थः तंत्रेतुउद्देश्यानु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठानसाम्येसतिसजातीयानेककार्यकरम् अमावास्यायांतीर्थप्राप्तावेकश्राद्धमिव १५ उभयार्थकान्पितृमातामहीयवैश्वदेवार्थकान्पितृमातामहवर्गश्राद्धीयानुदङ्मुखानितिवान्वयः भोजये द्वाजनार्थमुपवेशयेदित्यर्थः १६ तयोःपितृमातामहवर्गयोः १७ १८ १९ द्विधाकृतान्द्विगुणीकृतान्उशंतस्त्वेतिमंत्रपूर्वम् अतएवविश्वेदेवावाहनेपिमंत्रआयाति २० २१

च्चाप्युदङ्मुखान् १६ पृथक्तयोःकेचिदाहुःश्राद्धस्यकरणंनृप । एकत्रैकेनपाकेनवदंत्यन्येमहर्षयः १७ विष्टरार्थंकुशान्दत्त्वासंपूज्यार्चाविधानतः । कुर्यादावाहनंप्राज्ञोदेवानांतदनुज्ञया १८ यवांबुनातुदेवानांकुर्यादर्चाविधानवित् । स्रग्गंधधूपदीपांश्चदत्त्वातेभ्योयथाविधि १९ पितॄणामपसव्यं तत्सर्वमेवोपकल्पयेत् । अनुज्ञांचततःप्राप्यदत्त्वादर्भान्द्विधाकृतान् २० मंत्रपूर्वंपितॄणांतुकुर्यादावाहनंबुधः । तिलांबुनाचापसव्यंदद्यादर्चादिकं नृप २१ कालेतत्रातिथिंप्राप्तमन्नकामंनृपाध्वगम् । ब्राह्मणैरभ्यनुज्ञातःकामंतमपिपूजयेत् २२ योगिनोविविधैरूपैर्नराणामुपकारिणः । भ्रमंति पृथिवीमेतामविज्ञातस्वरूपिणः २३ तस्मादभ्यर्चयेत्प्राप्तंकालेतत्रातिथिंबुधः।श्राद्धक्रियाफलंहंतिकालेत्रापूजितोतिथिः। जुहुयाद्व्यंजनक्षारवर्जमन्नं ततोऽनले २४ अनुज्ञातोद्विजैस्तैस्तुत्रिःकृत्वःपुरुषर्षभ २५ अग्नयेकव्यवाहनायस्वाहेत्यादौनृपाहुतिः । सोमायवैपितृमतेदातव्यातदनंतरम् । २६ वैवस्वतायचैवान्यातृतीयादीयतेततः । हुतावशिष्टमल्पाल्पंविप्रपात्रेषुनिर्वपेत् २७ ततोऽन्नमिष्टमत्यर्थमभीष्टमतिसत्कृतम् । दत्त्वाजुषध्वमिच्छातोवाचामेतदनिष्ठुरम् २८ भोक्तव्यंतैश्चतच्चित्तैर्मौनिभिःसुमुखैःसुखम् । अक्रुध्यताचाक्षरतादेयंतेनापिभक्तितः २९ रक्षोघ्नंमंत्रपठनंभूमेरास्तरणंतिलैः । कृत्वाध्येयाःस्वपितरःस्तएवाद्विजसत्तम ३० पितापितामहश्चैवतथैवप्रपितामहः । ममतृप्तिंप्रयांत्वद्यविप्रदेहेषुसंस्थिताः ३१ पितापितामहश्चैवतथैवप्रपितामहः । ममतृप्तिंप्रयांत्वग्निहोमाप्यायितमूर्तयः ३२ पितापितामहश्चैवतथैवप्रपितामहः । तृप्तिंप्रयांतुपिंडेनमयादत्तेनभूतले ३३ पितापितामहश्चैवतथैवप्रपितामहः । तृप्तिंप्रयांतुमेभक्त्यायन्मयैतदिहाहृतम् ३४ मातामहस्तृप्तिमुपैतुतस्यापितातथातस्यापितातथान्यः । विश्वेचदेवाःपरमांप्रयांतुतृप्तिंप्रणश्यंतुचयातुधानाः ३५ यज्ञेश्वरोहव्यसमस्तकव्यभोक्ताव्ययात्माहरिरीश्वरोऽत्र । तत्सन्निधानादपयांतुसद्योरक्षांस्यशेषाण्यसुराश्चसर्वे ३६ तृप्तेषुतेषुविकिरेदन्नंविप्रेषुभूपते । दद्यादाचमनार्थायतेभ्योवारिसकृत्सकृत् ३७ सुतृप्तैस्तैरनुज्ञातःसर्वेणान्नेनभूतले । सतिलेनततःपिंडान्सम्यक्दद्यात्समाहितः३८पितृतीर्थेनसतिलान्दद्यादथजलाञ्जलीन्।मातामहेभ्यस्तेनैवपिंडांस्तीर्थेननिर्वपेत् ३९ दक्षिणाप्रवणं

२२ तदाप्राप्तातिथिभोजनेहेतुमाहद्वाभ्याम् योगिनइति २३ २४ व्यंजनंशाकादिक्षारंलवणादितद्वर्जम् २५ २६ वैवस्वताययमायेतिपृथगाहुतिःशाखाभेदव्यवस्थिता २७ २८ अक्रुध्यताचाक्षरताचभक्तितोदेयम् अक्रुद्ध्यतेतिपाठेतत्रकार्येत्यध्याहृत्यपूर्वेणान्वयः २९ ३० ममपित्रादयस्तृप्तिंप्रयांत्वित्यन्वयः ३१ ३२ ३३ ३४ ३५ ३६ ३७ सर्वेणव्यंजनादिसहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनान्नेनपिंडान्दद्यात् ३८ ३९ चोक्षेषुसमीचीनेषु ४० ४१ लेपभुजःपितॄणांचतुर्थाद्याः ४२ ४३ पित्र्येभ्योब्राह्मणेभ्यःसुस्वधेत्याशिषायुक्ताम् एतदाशीःप्रार्थनानंतरंदद्यादित्यतोदक्षिणापिपितृपूर्वैवायाति किंचपश्चाद्विसर्जयेदित्यनेनविसर्जनमपिपितृपूर्वकमित्यतोन्यत्सर्वंदेवपूर्वमेवेत्यर्थादुक्तम् ४४ ४५ ४६ इममेवार्थंवैश्वदेवतंत्रपक्षेप्याह आपादेति प्रादप्रक्षालनात्प्रभृतिदेवार्थानांब्राह्मणानांसर्वंप्रथमंकुर्यात्ततःपितृवर्गाणांततोमाताहवर्गाणामिति विसर्जनंत्विति दक्षिणायाउपलक्षणंपूर्वमेवोक्तत्वात् ४८ ४९ पूज्यैर्मान्यैर्भृत्यैर्बंधुभिश्चसहभुंजीत

चैवप्रयत्नेनोपपादयेत् । अवकाशेषुचोक्षेषुजलतीरेषुचैवहि ४० दक्षिणाग्रेषुदर्भेषुपुष्पधूपादिपूजितम् । स्वपित्रेप्रथमंपिंडंदद्यादुच्छिष्टसन्निधौ । ४१ पितामहायचैवान्यंतत्पित्रेचतथापरम् । दर्भमूलेलेपभुजःप्रीणयेल्लेपघर्षणैः ४२ पिंडैर्मातामहांस्तद्वद्गंधमाल्यादिसंयुतैः । पूजयित्वाद्विजाग्र्याणांदद्याच्चाचमनंततः ४३ पित्र्येभ्यःप्रथमंभक्त्यातन्मनस्कोनरेश्वर । सुस्वधेत्याशिषायुक्तांदद्याच्छक्त्याचदक्षिणाम् ४४ दत्त्वाचदक्षिणांतेभ्यो वाचयेद्वैश्वदेविकान् । प्रीयंतामितियेविश्वेदेवास्तेनइतीरयन् ४५ तथेतिचोक्तेतैर्विप्रैःप्रार्थनीयास्तथाशिषः । पश्चाद्विसर्जयेद्देवान्पूर्वंपित्र्यान्महामते । ४६ मातामहानामप्येवंसहदेवैःक्रमःस्मृतः । भोजनेचस्वशक्त्याचदानेतद्वद्विसर्जने ४७ आपादशौचनात्पूर्वंकुर्याद्देवाद्विजन्मसु । विसर्जनंतुप्रथमंपैत्रमातामहेषुवै ४८ विसर्जयेत्प्रीतिवचःसंमानाभ्यर्चितांस्ततः । निवर्तेताभ्यनुज्ञातआद्वारात्ताननुव्रजेत् ४९ ततस्तुवैश्वदेवाख्यांकुर्यान्नित्यक्रियांबुधः । भुंजीयाच्चसमंपूज्यभृत्यबंधुभिरात्मनः ५० एवंश्राद्धंबुधःकुर्यात्पैत्र्यंमातामहंतथा । श्राद्धैराप्यायितादद्युःसर्वकामान्पितामहाः ५१ त्रीणिश्राद्धेपवित्राणिदौहित्रःकुतपस्तिलाः । रजतस्यतथादानंकथासंदर्शनादिकम् ५२ वर्ज्यानिकुर्वताश्राद्धेकोपोध्वगमनंत्वरा । भोक्तुरप्यत्रराजेंद्रत्रयमेतन्नशस्यते ५३ विश्वेदेवाःसपितरस्तथामातामहानृप । कुलंचाप्यायतेपुंसांसर्वश्राद्धंप्रकुर्वताम् ५४ सोमाधारःपितृगणोयोगाधारश्चचंद्रमाः । ज्येष्ठेयोगिनियोगस्तुतस्माद्भूपालशस्यते ५५ सहस्रस्यापिविप्राणांयोगीचेत्पुरतःस्थितः । सर्वान्भोक्तृस्तारयतियजमानंतथानृप ५६ इतिश्रीविष्णुपुराणेतृतीयेंशेपंचदशोध्यायः १५ । । और्वउवाच । । हविष्यमत्स्यमांसैस्तुशशस्यशकुनस्यच । सौकरच्छागलैणेयरौरवैर्गव

५० ५१ दौदित्रोदुहितुःसुतः कुतपोऽष्टमघटिका दौहित्रमितिपाठेदौहित्रंघृतविशेषः अमावास्यागतेसोमेयाचखादतिगौस्तृणम् दौहित्रीसामतातस्यघृतंदौहित्रमुच्यतइति दौहित्रंखड्गपात्रमितिकेचित् केचित्तुकुतपमितिच्छागलोमजकंबलमाहुः रजतस्यदानंकथासंदर्शनादिकमपिपवित्रम् राजतंरजताक्तंवापितॄणांपात्रमुच्यते रजतस्यतथादानंदर्शनंनामवेष्यतइतिमत्स्यवायूक्तेः ५२ ५३ विश्वेदेवादयआप्यायंतेकुलंचाप्यायतेइति ५४ सोमाधारःपितृगणःअग्निष्वात्तादिराधिकारिकोगणःसोमोपजीवित्वात् योगाधारश्चंद्रमास्तेषामेवयोगबलेनपुनश्चंद्रस्याप्यायनात् तथाचहरिवंशे एतेस्मात्पितरस्तातयोगिनांयोगवर्धनाः आप्याययंतियेपूर्वंसोमंयोगबलेनवै तथावायुः श्राद्धेप्रीताःपुनःसोमंपितरोयोगमाश्रिताः आप्याययंतियोगेनत्रैलोक्यंतेनजी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वति तस्माच्छ्राद्धेयोगिनिमंत्रणंशस्तमिति ५५ ५६ इतिश्रीविष्णुपुराणेतृतीयेंशेश्राद्धकल्पेपंचदशोध्यायः १५ सदाचारप्रसंगात्तुप्रसंगेनाथषोडशे द्रव्याणिश्राद्धयोग्यानितथायोग्यानिचादिशत् तत्रश्राद्धेदेयद्रव्यप्रशंसा हविष्यैर्व्रीह्यादिभिः मत्स्यादीनांनवानांमांसैश्चप्रत्येकमेकैकमासवृद्ध्यापितामहाःपितरस्तृप्तिंप्रयांतीतिद्वयोरन्वयः व्रीह्यादिभिरेकमासंमत्स्यमांसैर्द्वौ मासावित्येवंदशमासांतंमत्स्यामिषेमांसत्वोपचारः एणोहरिणविशेषः रुरुःपृषतस्तदीयैः गदयोगोसदृशःपशुरारण्यकः १ उरभ्रोमेषःतदीयैश्च गव्यंतुपयःपायसंवा संवत्सरंतुगव्येनपयसा पायसेनवेतिस्मृतेः मांसमध्येपाठान्मांसमेवेत्यन्ये तत्तुयुगांतरीणमित्यवधेयम् वार्ध्रीणसमांसैस्तुनित्यंसार्वकालंतृप्यंति वार्ध्रीणसःस्मृतिषुप्रसिद्धः यथा त्रिःपिबंत्रिंद्रियक्षीणंश्वेतंवृद्धम जापतिं वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाःश्राद्धकर्मणीति जलपानेयस्यमुखवत्कर्णौचजलंस्पृशतःसत्रिपिबः यद्वाकृष्णग्रीवोरक्तशिराःश्वेतपक्षोविहंगमः सवैवार्ध्रीणसःप्रोक्तइत्येषानैगमीश्रुतिरिति २ ३ जन्मपितृतुष्टिदम् सत्वस्मिन्जन्मनिपितृणामृणादुत्तीर्णइत्यर्थः ४ प्रसातिकादेवधान्यानि आरण्यानिव्रीहिसदृशानिइतिकेचित् श्यामाकाद्विविधाःश्वेताःकृष्णाश्च वन्यौष

येनच १ उरभ्रगव्यैश्चतथामासवृद्ध्यापितामहाः । प्रयांतितृप्तिंमांसैस्तुनित्यंवार्ध्रीणसामिषैः २ खड्गमांसमतीवात्रकालशाकंतथामधु । शस्तानि मर्मण्यत्यंततृप्तिदानिनरेश्वर ३ गयामुपेत्ययःश्राद्धंकरोतिपृथिवीपते । सफलंतस्यतज्जन्मजायतेपितृतुष्टिदम् ४ प्रसातिकाःसनीवाराश्यामाकाद्विविधास्तथा । वन्यौषधिप्रधानास्तुश्राद्धार्हाःपुरुषर्षभ ५ यवाःप्रियंगवोमुद्गागोधूमाव्रीहयस्तिलाः । निष्पावाःकोविदाराश्चसर्षपाश्चात्रशोभनाः । ६ अकृताग्रयणंयच्चधान्यजातंनरेश्वर । राजमाषानणूंश्चैवमसुरांश्चविवर्जयेत् ७ अलाबुगृंजनंचैवपलांडुंपिंडमूलकम् । गांधारकंकरंभाणिलवणान्यौषराणिच ८ आरक्ताश्चैवनिर्यासात्प्रत्यक्षलवणानिच । वर्ज्यान्येतानिवैश्राद्धेयच्चवाचानशस्यते ९ नक्ताहतमनुत्सृष्टंतृप्यतेनचयत्रगौः । दुर्गंधिफेनिलंचांबुश्राद्धयोग्यंनपार्थिव १० क्षीरमेकशफानांयदौष्ट्रमाविकमेवच । मार्गंचमाहिषंचैववर्जयेच्छ्राद्धकर्मणि ११ षंढापविद्धचांडालपाखंड्युन्मत्तरोगिभिः । कृकवाकुश्वनग्नैश्चवानरग्रामसूकरैः १२ उदक्यासूतकाशौचिमृतहारैश्चवीक्षिते १२ श्राद्धेसुरानपितरोभुंजतेपुरुषर्षभ १३ तस्मात्परिश्रितेकुर्याच्छ्राद्धंश्रद्धासमन्वितः । उर्व्यांचतिलविक्षेपाद्यातुधानान्निवारयेत् १४ नपूतिनैवोपपन्नंकेशकीटादिभिर्नृप

धिप्रधानावक्ष्यमाणाः ५ प्रियंगवःकंगवः व्रीहयःशरत्पक्वानिधान्यानि निष्पावाःशिंब्यः कोविदारावृक्षास्तैश्चतत्फलानिलक्ष्यंते सर्षपाःश्वेताः ६ वर्ज्यानाह आकृताग्रयणमित्यादिनापर्युषितमित्यंतेननवसस्यागमेसाग्रेर्विहिताइतिइष्टिराग्रयणंतन्नकृतंयत्रतत् राजमाषान्अकृष्णमाषान्अणून्रुचिनान् ७ गृंजनंहरितमूलकम् पलांडुंलशुनभेदम् पिंडमूलकंपिंडाकारंमूलकम् एतेनान्यमूलकाभ्यनुज्ञाआयाति गांधारकंशाकभेदः कांजिकंवा कारंभाणिअविकसितालाजाः शाकभेदइत्येके ऊषराणिऊषरभूमिजातानि ८ निर्यासावृक्षरसाआरक्ताःस्वभावतः प्रत्यक्षलवणानिचक्षुर्दृश्यलवणानि यच्चविहितमपिवाचामप्रशस्यतेनिंद्यतइत्यर्थः ९ अनुत्सृष्टमप्रतिष्ठितकूपादिभवम् गौर्यत्रनतृप्यतेऽतिस्वल्पमित्यर्थः १० एकशफावडवाद्याः आविकंमेषीसंबंधि मार्गहरिणीसंबंधि ११ पंढादिभिस्त्रयोदशभिर्वीक्षितेश्राद्धेदेवाः अपविद्धोमहाजनपरित्यक्तः पाखंडीवेदकर्मपरित्यागी रोगीमहारोगी कृकवाकुःकुक्कुटः श्वाकुक्कुरः नग्नाअग्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माध्यायेवक्ष्यमाणाः १२ उदक्यारजस्वला सूतकंजननाशौचं अशौचं मरणनिमित्तंतद्युक्तःमृतहारःशवनिर्हरणवृत्तिः १३ परिश्रितेसर्वतःपरिवृते १४ पूतिदुर्गंधि केशकीटादिभिरुप पन्नंयुक्तंअवपन्नमितिपाठेदूषितमित्यर्थः अभिषवैःकांजिकैः पर्युषितंपक्वंराज्यंतरितम् एतत्सर्वमन्नंपितृनुद्दिश्यनदद्यादित्यर्थः १५ श्रद्धासमन्वितैःपितृनुद्दिश्ययद्दत्तंतदन्नंचतेपितरोयदाहा रायादृशाहारयोग्याजातास्तदाहारतामुपैतीत्यर्थः १६ कलापोहिमवत्पार्श्ववर्तीग्रामविशेषस्तस्योपवनेइक्ष्वाकोःपितृभिर्गीताः १७ अपिदुर्घटत्वमाह १८ वर्षासुभाद्रपदेमघानक्षत्रेत्रयो

नचैवाभिषवैर्मिश्रमन्नंपर्युषितंतथा १९ श्रद्धासमन्वितैर्दत्तंपितृभ्योनामगोत्रतः । यदाहारास्तुतेजातास्तदाहारत्वमेतितत् १६ श्रूयंतेचापिपितृभि र्गीतागाथामहीपते । इक्ष्वाकोर्मनुपुत्रस्यकलापोपवनेपुरा १७ अपिनस्तेभविष्यंतिकुलेसन्मार्गशालिनः । गयामुपेत्ययेपिंडान्दास्यत्यस्माकमा दरात् १८ अपिनःसकुलेजायाद्योनोदद्यात्त्रयोदशीम् । पायसंमधुसर्पिर्भ्यांवर्षासुचमघासुच १९ गौरींवाप्युद्वहेद्भार्यांनीलंवावृषमुत्सृजेत् । यजे तवाश्वमेधेनविधिवद्दक्षिणावता २० । इतिश्रीविष्णुपुराणेतृतीयेंशेश्राद्धकल्पेषोडशोध्यायः १६ । पराशरउवाच । इत्याहभगवानौर्वःस गरायमहात्मने । सदाचारान्पुरासम्यङ्मैत्रेयपरिपृच्छते १ मयाप्येतदशेषेणकथितंभवतेद्विज । समुल्लंघ्यसदाचारंकश्चिन्नाप्नोतिशोभनम् २ । मैत्रेयउवाच । । षण्ढापविद्धप्रमुखाविदिताभगवन्मम । उदक्याद्याश्चयेसर्वेनग्नमिच्छामिवेदितुम् ३ कोनग्नःकिंसमाचारोनग्नसंज्ञांनरोलभेत् नग्नस्वरूपमिच्छामियथावद्वदितंत्वया ४ । पराशरउवाच । । ऋग्यजुःसामसंज्ञेयंत्रयीवर्णावृतिर्द्विज । एतामुज्झतियोमोहात्सनग्नःपातकीस्मृ तः ५ त्रयीसमस्तवर्णानांद्विजसंवरणंयतः । नग्नोभवत्युज्झितायामतस्तस्यामसंशयम् ६ इदंचश्रूयतामन्यद्भीष्मायसुमहात्मने । कथयामासध र्मज्ञोवसिष्ठोमत्पितामहः ७ मयापितस्यगदतःश्रुतमेतन्महात्मनः । नग्नसंबंधिमैत्रेययत्पृष्टोहमिहत्वया ८ देवासुरमभूद्युद्धंदिव्यमब्दंपुराद्विज । तस्मिन्पराजितादेवादैत्यैर्ह्रादपुरोगमैः ९ क्षीरोदस्योत्तरंकूलंगत्वातप्यन्तवैतपः । विष्णोराराधनार्थायजगुश्चेमंस्तवंतथा १० । देवाऊचुः । आराधनायलोकानांविष्णोरीशस्ययांगिरम् । वक्ष्यामोभगवानाद्यस्तयाविष्णुःप्रसीदतु ११ यतोभूतान्यशेषाणिप्रसूतानिमहात्मनः । यस्मिंश्च

दर्शींप्राप्य १९ गौरीमष्टवर्षाम् अष्टवर्षाभवेद्गौरीनववर्षातुरोहिणी दशवर्षाभवेत्कन्याअतऊर्ध्वंरजस्वलेतिस्मृतिः तामुद्वहेत्स्वीकुर्यात् उद्वाहयेदितिपाठः गौरींददन्नाकपृष्ठंवैकुंठंयातिरो हिणीम् कन्यांददद्ब्रह्मलोकंरौरवंतुरजस्वलामितिसंवर्तोक्तेः नीलःस्मृत्युक्तः लोहितोयःसुवर्णेनमुखेपुच्छेचपांडुरः श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यतइति २० । इतिश्रीमद्वैष्णवाकूत चंद्रिकायांतृतीयेंशेषोडशोध्यायः १६ त्रयीधर्मान्वयेश्रेयोनवाध्याय्यानिरूपितम् व्यतिरेकेत्वनर्थाप्तिर्द्वयेनेहनिरूप्यते तत्रसप्तदशेदेवैःस्तुतोविष्णुरजीजनत् मायामोहंयतोमग्नादैत्या नग्नाश्चजज्ञिरे १ २ ३ ४ वर्णानामावृतिःपरिधानम् ५ किंचयतःसैवसंवरणमितिप्रावरणमुत्तरीयमितियावत् अतस्तत्परियोगेपरिधानोत्तरीयहीनइवनग्नोभवतीत्यर्थः ६ एतदेवस्पष्टीक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तुमितिहासंप्रस्तौति ७ ८ देवाश्चासुराश्चयोद्धारोयस्मिंस्तत् ९ १० लोकानामीशस्यविष्णोः ११ प्रसूतानिजातानि प्रभूतानीतिपाठेवृद्धिंगतानि १२ यद्यपितवयाथार्थ्यंतत्त्वंउक्तीनांवच सांगोचरेविषयेनैववर्ततेऽथापिअरातिकृतेनविध्वंसेनपराभवेनविध्वस्तंनाशितंवीर्यंप्रभावोयेषांतेवयंयस्माद्भवार्थिनःकल्याणार्थिनःस्वमत्यनुरूपंस्तोष्यामः १३ तत्रप्रथमंविश्वरूपेणसगुणंस्तुवं तिलमुर्वीत्यादिनातस्मैसर्वात्मनेनमइत्यंतेन समस्तंमनोबुद्ध्यहंकारचित्ताख्यमंतःकरणम् तस्याःप्रकृतेःपरः १४ स्थानेदेशेकालेचतस्मिंस्तस्मिन्नानाभेदयुक्तंविश्वंतवैकमेववपुरित्यर्थः १५ तत्रतवरूपमध्येप्रथमंसर्गेणविश्वोपकाराययत्तवरूपंतस्मैनमः १६ वयमेवतवयत्स्वरूपंतस्मैनमः १७ असंबोधिविवेकशून्यम् १८ यस्मिन्यक्षरूपेनाड्यइंद्रियनाड्योद्दय

लयमेष्यंतिकस्तंसंस्तोतुमीश्वरः १२ तस्याप्यरातिविध्वंसध्वस्तवीर्याभवार्थिनः । त्वांस्तोष्यामस्तवोक्तीनांयाथार्थ्यंनैवगोचरे १३ त्वमुर्वीसलि लंवह्निर्वायुराकाशमेवच । समस्तमंतःकरणंप्रधानंतत्परःपुमान् १४ एकंतवैतद्भूतात्मन्मूर्तामूर्तमयंवपुः । आब्रह्मस्तंबपर्यंतंस्थानकालविभेदव त् १५ तत्रेशतवयत्पूर्वंत्वन्नाभिकमलोद्भवम् । रूपंसर्गोपकारायतस्मैब्रह्मात्मनेनमः १६ शक्रार्करुद्रवस्वश्विमरुत्सोमादिभेदवत् । वयमेवस्वरूपं यत्तस्मैदेवात्मनेनमः १७ दंभप्रायमसंबोधितितिक्षादमवर्जितम् । यद्रूपंतवगोविंदतस्मैदैत्यात्मनेनमः १८ नातिज्ञानवहायस्मिन्नाड्यस्तिमित तेजसि । शद्वादिलोभियत्तस्मैतुभ्यंयक्षात्मनेनमः १९ क्रौर्यमायामयंघोरंयत्स्वरूपंतवासितम् । निशाचरात्मनेतस्मैनमस्तेपुरुषोत्तम २० स्वर्ग स्थधर्मिसद्धर्मफलोपकरणंतव । धर्माख्यंचतथारूपंनमस्तस्मैजनार्दन २१ हर्षप्रायमसंसर्गिगतिमद्गमनादिषु । सिद्धात्मंस्तवयद्रूपंतस्मैसिद्धात्म नेनमः २२ अतितिक्षाधनंक्रूरमुपभोगसहंहरे । द्विजिह्वंतवयद्रूपंतस्मैसर्वात्मनेनमः २३ अवबोधिचयच्छांतमदोषमपकल्मषम् । ऋषिरूपात्म नेतस्मैविष्णोरूपायतेनमः २४ भक्षयत्यथकल्पांतेभूतानियदवारितम् । त्वद्रूपंपुंडरीकाक्षतस्मैकालात्मनेनमः २५ संभक्ष्यसर्वभूतानिदेवा दीन्यविशेषतः । नृत्यत्यंतेचयद्रूपंतस्मैरुद्रात्मनेनमः २६ प्रवृत्त्यारजसोयच्चकर्मणांकारकात्मकम् । जनार्दननमस्तस्मैत्वद्रूपायनरात्मने २७ अष्टाविंशद्विधोपेतंयद्रूपंतामसंतव । उन्मार्गगामिसर्वात्मंस्तस्मैपश्वात्मनेनमः २८ यज्ञांगभूतंयद्रूपंजगतःसिद्धिसाधनम् । वृक्षादिभेदैर्यद्भेदै

नाड्योवा नातिज्ञानवहानातिज्ञानक्षमाः तत्रहेतुः स्तिमिततेजसिअसत्त्वे १९ असितंतमोमयम् २० स्वर्गस्थाःस्वर्गार्हायेधर्मिणःयजमानास्तेषांयःसद्धर्मोयागादिस्तस्ययत्फलंस्वर्गा दितस्योपकरणंप्रापकंधर्माख्यमदृष्टसंज्ञंयद्रूपंतस्मैनमः२१ गमनादिषुगमनीयादिषुअसंसर्गिणीससर्गशून्यागतिर्गत्यादितद्युक्तम् सिद्धाहिजलाग्न्यादिषुगच्छंतास्तिष्ठंतोवासंगच्छंते २२अति तिक्षाअक्षमाधनंसर्वस्वंयस्य उपभोगवशमितिपाठेउपभोगेपितृप्तिरहितम् ३३ अदोषंरागादिहीनम् ऋषिरूपम् ऋष्याकृतिरात्मादेहोयस्यतस्मैतवरूपायनमः २४ यत्काला त्मकंतेरूपंभूतानिभक्षयतितस्मैनमः २५ रुद्रात्मकंतुरूपंभक्षयित्वानृत्यतीतिशैवाः २६ रजसोवृत्त्यायत्कर्मणांकारकात्मकंकर्तृस्वभावंतस्मैनरात्मनेमनुष्यात्मनेनमः २७ अष्टाविंशद्विधो पेतंअष्टाविंशत्प्रकारकम् वधोपेतमितिपाठेएकादशइंद्रियवधाः नवतुष्टिवधाः अष्टौसिद्धिवधाइतिप्रथमेंशेविवृताः २८ जगतःसिद्धिर्वर्तनम् वृक्षादिभेदैर्यद्भेदिभिन्नम् षड्भेदीतिपाठेवृक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुल्मलतावीरुत्तृणत्वक्सारात्मनाषड्भेदि मुख्यात्मनेवृक्षात्मने २९ तवसर्वस्यादेःकारणस्ययद्रूपंतिर्यङ्मनुष्यदेवादीत्यन्वयः ३० इदानींनिर्गुणंब्रह्मप्रणमंति प्रधानादिमयादस्माद्विश्वरूपा द्यदन्यत्परमंअतएवयदन्यतुल्यंनभवतिनिरुपमंतस्मैनमः ३१ पूर्वोक्तमेवदर्शयंतःप्रणमंति शुक्लादीतित्रिभिः शुक्लत्वादीनांक्रियतांनिषेधमुक्त्वासर्वविशेषणनिषेधमाह अगोचरइति ३२

स्तस्मैमुख्यात्मनेनमः २९ तिर्यङ्मनुष्यदेवादिव्योमशब्दादिकंचदत् । रूपंतवादेःसर्वस्यतस्मैसर्वात्मनेनमः ३० प्रधानबुद्ध्यादिमयादशेषाद्य दन्यदस्मात्परमंपरात्मन् । रूपंतवाद्यंनयदन्यतुल्यंतस्मैनमःकारणकारणाय ३१ शुल्कादिदीर्घादिघनादिहीनमगोचरेयच्चविशेषणानाम् । शु द्धातिशुद्धंपरमर्षिदृश्यंरूपायतस्मैभगवन्नताःस्म ३२ यन्नःशरीरेषुयदन्यदेहेष्वशेषजंतुष्वजमव्ययंतत् । यस्माच्चनान्यद्व्यतिरिक्तमास्तिब्रह्मस्वरू पायनताःस्मतस्मै ३३ सकलमिदमजस्ययस्यरूपंपरमपदात्मवतःसनातनस्य । तमनिधनमशेषबीजभूतंप्रभुममलंप्रणताःस्मवासुदेवम् ३४ प राशरउवाच । । स्तोत्रस्यास्यावसानेतुददृशुःपरमेश्वरम् । शंखचक्रगदापाणिंगरुडस्थंसुराहरिम् ३५ तमूचुःसकलादेवाःप्रणिपातपुरःस रम् । प्रसीददेवदैत्येभ्यस्त्राहीतिशरणार्थिनः ३६ त्रैलोक्यंयज्ञभागाश्चदैत्यैर्ह्रादपुरोगमैः । हृतंनोब्रह्मणोप्याज्ञामुल्लंघ्यपरमेश्वर ३७ यद्यप्यशेष भूतस्यवयंतेचतवांशकाः । तथाप्यविद्याभेदेनभिन्नंपश्यामहेजगत् ३८ स्ववर्णधर्माभिरतावेदमार्गानुसारिणः । नशक्यास्तेऽरयोहंतुमस्माभिस्त पसान्विताः ३९ तमुपायममेयात्मन्नस्माकंदातुमर्हसि । येनतानसुरान्हंतुंभवेमभगवन्क्षमाः ४० । । पराशरउवाच । । इत्युक्तोभगवां स्तेभ्योमायामोहंशरीरतः । समुत्पाद्यददौविष्णुःप्राहचेदंसुरोत्तमान् ४१ । । श्रीभगवानुवाच । । मायामोहोऽयमखिलान्दैत्यांस्तान्मो हयिष्यति । ततोवध्याभविष्यंतिवेदमार्गबहिष्कृताः ४२ स्थितौस्थितस्यमेवध्यायावंतःपरिपंथिनः । ब्रह्मणोयेऽधिकारस्यदेवदैत्यादिकाःसुराः ४३ तद्गच्छतनभीःकार्यामायामोहोऽयमग्रतः । गच्छत्वद्योपकारायभवतांभवितासुराः ४४ । । पराशरउवाच । । इत्युक्ताःप्रणिपत्यैनं ययुर्देवायथागतम् । मायामोहोपितैःसार्धंययौयत्रमहासुराः ४५ । । इतिश्रीविष्णुपुराणेतृतीयेंशेमहामोहोत्पत्तिःसप्तदशोध्यायः १७ । । परा शरउवाच । । तपस्यभिरतान्सोऽथमायामोहोमहासुरान् । मैत्रेयददृशेगत्वानर्मदातीरसंश्रयान् १ ततोदिगंबरोमुंडोबर्हिपत्रधरोद्विज । माया मोहोसुराञ्श्लक्ष्णमिदंवचनमब्रवीत् २ । । मायामोहउवाच । । भोदैत्यपतयोब्रूतयदर्थंतप्यतेतपः । ऐहिकंवाथपारत्र्यंतपसःफलमिच्छथ ३

३३ परमपदात्मवंतःपरमंपदंब्रह्मैवात्मास्वरूपंयस्यास्तितस्य ३४ ३५ तवशरणार्थिनोऽस्मानदैत्येभ्यस्त्राहीतितंहरिमूचुरित्यन्वयः ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ स्थितौस्थितिनिमित्तंस्थितस्यब्रह्मणोविकारस्ययेयावंतःपरिपंथिनस्तेसर्वेममवध्याइत्यर्थः ४५ इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवपुराणेतृतीयेंशेसप्तदशोध्यायः १७ इहोच्चं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कायतिक्रमतभेदैः २२ त्रयीमार्गाश्रितांकथामपितत्यजुः २३ नकेवलमेतावत्किंतुकेचिद्विनिंदांवेदानामिति चक्रुरितिशेषः २४ निंदामेवकुतर्कसहितामाह नैतदिति हिंसापरपीडाधर्मायेतियद्वचनंअग्नीषोमीयंपशुमालभेतेत्यादिरूपंतन्नयुक्तिसहम् यतः नहिंस्यात्सर्वभूतानीतिश्रुत्यैवतन्नेष्यते चेष्यतेइतितुपाठःसुगमः २५ शम्यादिसमिद्रूपंकाष्ठंचेदिंद्रेणभुज्यतेतर्हिवरंश्रेष्ठम्पशुर्यतोसौकाष्ठात्कोमलपत्रभुक् २६ यज्ञेहतस्यपशोःसद्गतिरितिचेत्तर्हियजमानेनसद्गत्यर्थंस्वपितार्किंनहन्यते २७ अन्येनश्राद्धेनभुक्तमन्यस्यतृप्तयेचेज्जायतेतर्हिप्र

हंवाक्यंहिंसाधर्मायनेष्यते। हवींष्यनलदग्धानिफलायेत्यर्भकोदितम् २५ यज्ञैरनेकैर्देवत्वमवाप्येंद्रेणभुज्यते । शम्यादियदिचेत्काष्ठंतद्वरंपत्रभुक्पशुः २६ निहतस्यपशोर्यज्ञेस्वर्गप्राप्तिर्यदीष्यते । स्वपितायजमानेनकिंतुतस्मान्नहन्यते २७ तृप्तयेजायतेपुंसोभुक्तमन्येनचेत्ततः । दद्याच्छ्राद्धंश्रद्धयान्नंनवहेयुःप्रवासिनः २८ जनश्रद्धेयमित्येतदवगम्यततोवचः । उपेक्षाश्रेयसीवाक्यंरोचतांयन्मयेरितम् २९ नह्याप्तवादानभसोनिष्पतंतिमहासुराः । युक्तिमद्वचनंग्राह्यंमयान्यैश्चभवद्विधैः ३० मायामोहेनतेदैत्याःप्रकारैर्बहुभिस्तथा । व्युत्थापितायथानैषांत्रयींकश्चिदरोचयत् ३१ इत्थमुन्मार्गयातेषुतेषुदैत्येषुतेऽमराः। उद्योगंपरमंकृत्वायुद्धायसमुपस्थिताः३२ ततोदेवासुरंयुद्धंपुनरेवाभवद्द्विज । हताश्चतेसुरादेवैःसन्मार्गपरिपंथिनः ३३ सद्धर्मकवचास्तेषामभूवन्प्रथमेद्विज। तेनरक्षाभवत्पूर्वंनेशुर्नष्टेचतत्रते ३४ ततोमैत्रेयउन्मार्गवर्तिनोयेभवञ्जनाः। नग्नास्तेतैर्यतस्त्यक्तंत्रयीसंवरणंवृथा ३५ ब्रह्मचारीगृहस्थश्चवानप्रस्थस्तथाश्रमाः। परिव्राड्वाचतुर्थोऽत्रपंचमोनोपपद्यते ३६ यस्तुसंत्यज्यगार्हस्थ्यंवानप्रस्थोनजायते। परिव्राड्वापिमैत्रेयसनग्नःपापकृन्नरः ३७ नित्यानांकर्मणांविप्रतस्यहानिरहर्निशम्। अकुर्वन्विहितंकर्मशक्तःपततिताद्दिने ३८ प्रायश्चित्तेनमहताशुद्धिंप्राप्नोत्यनापदि। पक्षंनित्यक्रियाहानेःकर्तामैत्रेयमानवः ३९ संवत्सरंक्रियाहानिर्यस्यपुंसोऽभिजायते । तस्यावलोकनात्सूर्योनिरीक्ष्यःसाधुभिःसदा ४० स्पृष्टेस्नानंसचैलस्यशुद्धिहेतुर्महामते। पुंसोभवतितस्योक्तानशुद्धिःपापकर्मणः ४१ देवर्षिपितृभूतानियस्यनिश्वस्यवेश्मनि। प्रयांत्यनार्चितान्यत्रनतस्मात्पापकृन्नरः ४२ देवादिनिश्वासहतंशरीरंयस्यवेश्मच। नतेनसंकरंकुर्यात्गृहासनपरिच्छदैः ४३ संभाषणानुप्रश्नादिसहास्यांचैवकुर्वतः। जायते

वासिनोऽन्नंनवहेयुःकिंतुस्वग्रामास्थितःपुत्रादिस्तमुद्दिश्यश्राद्धंदद्यात् २८ ततोनिर्युक्तिकंकेवलंपृथग्जनश्रद्धेयमेतद्यज्ञादिविषयंवचः अतोयुष्माकमत्रोपेक्षैवयुक्ता २९ नन्वाप्तवादेवेदेकथमुपेक्षातत्राह नहीति नहिआप्तवादाःस्वभावतःकेवनवर्तंतेकिंतुयदेवयुक्तिमद्वचनंतन्मयाअन्यैश्चभवद्विधैश्चग्राह्यम् युक्तिश्चपूर्वोक्तरीत्यावेदवादेषुनास्तीतिभावः३० एषांमध्ये ३१ ३२ ३३ ३४ ३५ ३६ गार्हस्थ्यंपरित्यज्यवानप्रस्थःपरिव्राड्वायोनजायतेसचनग्नः ३७ नग्नस्यसंसर्गिणश्चदोषमाह नित्यानामित्यादिनायदेभिरवलोकितामित्यंतेन विहितंनित्यम् पततिपापवान्भवति ३८ एवंपक्षक्रियाहानहेतोःप्रायश्चित्तेनमहताशुद्धिंप्राप्नोतीत्यर्थः एवंमासादिक्रियाहानावधिकंप्रायश्चित्तंज्ञेयम् ३९ तस्यसंवत्सरक्रियालोपकर्तुः ४० ४१ अत्रपृथिव्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेहतादैत्यामायामोहविमोहिताः नग्नसंसर्गदोषोक्तयैशैब्याशतधनुःकथाः १ श्लक्ष्णंमनोहरम् २ ऐहिकंइहलोकेभोग्यंपारत्र्यंपरलोकभोग्यम् ३ ४ एवंधर्ममग्रेवक्ष्यमाणंअसंवृतमुद्घाटितम् ५ अर्हःयोग्यः एतस्मादपरोधर्मोनपरोनश्रेष्ठः ६ एवंप्रकारैर्वाक्यैर्युक्तिदर्शनंशुष्कतर्कवादःतेनवर्धितैः चर्चितैरितिवापाठः ७ अपाकृतादूरीकृताः वेदमार्गापाकरणमेवसप्तधादर्शयतिसा

असुराऊचुः । । पारत्र्यफललाभायतपश्चार्यामहामते । अस्माभिरियमारब्धाकिंवातेत्रविवक्षितम् ४ । । मायामोहउवाच । । कुरुध्वंमवाक्यानियदिमुक्तिमभीप्सथ । अर्हध्वंधर्ममेतंचमुक्तिद्वारमसंवृतम् ५ धर्मोविमुक्तेरर्होऽयंनैतस्मादपरःपरः । अत्रैवावस्थिताःस्वर्गंविमुक्तिंवागमिष्यथ ६ अर्हध्वंधर्ममेतंचसर्वेयूयंमहाबलाः । एवंप्रकारैर्बहुभिर्युक्तिदर्शनवर्द्धितैः ७ मायामोहेनदैत्यास्तेवेदमार्गादपाकृताः । धर्मायैतदधर्मायसदेतन्नसदित्यपि ८ विमुक्तयेत्विदंनैतद्विमुक्तिंसंप्रयच्छति । परमार्थोऽयमत्यर्थंपरमार्थोनचाप्ययम् ९ कार्यमेतदकार्यंचनैतदेवंस्फुटंत्विदम् । दिग्वाससामयंधर्मोधर्मोऽयंबहुवाससाम् १० इत्यनैकांतवादंचमायामोहेननैकधा । तेनदर्शयतादैत्याःस्वधर्मात्त्याजिताद्विज ११ अर्हथेमंमहाधर्मंमहामोहेनतेयतः । प्रोक्तास्तमाश्रिताधर्ममार्हतास्तेनतेऽभवन् १२त्रयीधर्मसमुत्सर्गंमायामोहेनतेसुराः । कारितास्तन्मयाह्यासंस्तथान्येतत्प्रबोधिताः १३ तैरप्यन्येपरेतैश्चतैरप्यन्येपरेचतैः । अल्पैरहोभिःसंत्यक्तातैर्दैत्यैःप्रायशस्त्रयी १४ पुनश्चरक्तांबरधृक्मायामोहोजितेक्षणः । अन्यानाहासुरान्गत्वामृद्वल्पमधुराक्षरम् १५ । । मायामोहउवाच । । स्वर्गार्थंयदिवाञ्छावोनिर्वाणार्थमथासुराः । तदलंपशुघातादिदृष्टंधर्मंनिबोधत १६ विज्ञानमयमेवैतदशेषमवगच्छथ । बुध्यध्वंमेवचःसम्यग्बुधैरेवमुदीरितम् १७ जगदेतदनाधारंभ्रांतिज्ञानार्थतत्परम् । रागादिदुष्टमत्यर्थंभ्राम्यतेभवसंकटे १८ । । पराशरउवाच । । एवंबुध्यतबुध्यध्वंबुध्यतैवमितीरयन् । मायामोहःसदैतेयान्धर्ममत्याजयन्निजम् १९ नानाप्रकारवचनंसतेषांयुक्तियोजितम् । तथातथाचतद्धर्मंतत्यजुस्तेयथायथा २० तेप्यन्येषांतथैवोचुरन्यैरन्येतथोदिताः । मैत्रेयतत्यजुर्धर्मंवेदस्मृत्युदितंपरम् २१ अन्यानप्यन्यपाखंडप्रकारैर्बहुभिर्द्विज । दैतेयान्मोहयामासमायामोहोतिमोहकृत् २२ स्वल्पेनैवहिकालेनमायामोहेनतेसुराः । मोहितास्तत्यजुःसर्वांत्रयीमार्गाश्रितांकथाम् २३ केचिद्विनिंदांवेदानांदेवानामपरेद्विज । यज्ञकर्मकलापस्यतथान्येचद्विजन्मनाम् २४ नैतद्युक्तिस

धर्द्वाभ्याम् धर्मायेति ८ ९ १० अनैकांतवादंफलव्यभिचारिकारणवादंभेदाभेदवादंवादर्शयतइत्येवंस्वधर्मात्त्याजिताइत्युपसंहारः ११ आर्हतानांनामनिरुक्तिमाहार्हथेति १२ संप्रदायप्रवृत्तिमाह त्रयीति १३ १४ आर्हतमतमुक्त्वाबौद्धमतमाह पुनश्चरक्तेतितदाचारप्रदर्शनम् १५ १६ अत्रहिविज्ञानमयंबुद्धिमयमित्यादिनायोगाचाराणामात्मख्यातिवादउक्तः १७ अनाधारामितिमाध्यमिकमतशून्यख्यातिपक्षोक्तिः भ्रांतिज्ञानंचतदर्थश्चतत्परंतन्निष्ठम् १८ एवंबुध्यतेत्यत्रपुनरुक्तिर्बौद्धपदनिरुक्त्यर्था १९ २० २१ अन्यथाखंडप्रकारैर्लो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ४२ गृहादिभिःसंकरंसंसर्गं ४३ सहास्यामेकत्रस्थितिम् साहाय्यमितिपाठेपरस्परंसंभाषादिसमाक्रियत्वम् संवत्सरंकुर्वतस्तेननग्नेनतुल्यत्वंजायते ४४ इदानींभोजनादीनियुगपत्क्रियमाणानिसद्यःपातहेतवइत्याह अथेति ४५ ४६ ब्राह्मणाद्याःस्वधर्मादन्यतोमुखंविमुखंयांतियेतेनग्नसंज्ञांयांतीत्यन्वयः ४७ संकरोगृहादिषु आस्यास्थितिः ४८ ४९ ५० कृतंश्राद्धमित्यन्वयः

तुल्यतापुंसस्तेनैवद्विजवत्सरम् ४४ अथभुंक्तेगृहेतस्यकरोत्यास्यांतथासने । शेतेचाप्येकशयनेससद्यस्तत्समोभवेत् ४५ देवतापितृभूतानितथानाभ्यर्च्ययोऽतिथीन् । भुंक्तेसपातकंभुंक्तेनिष्कृतिस्तस्यकीदृशी ४६ ब्राह्मणाद्याश्चयेवर्णाःस्वधर्मादन्यतोमुखम् । यांतितेनग्नसंज्ञांतुहीनकर्मस्ववस्थिताः ४७ चतुर्णांयत्रवर्णानांमैत्रेयात्यंतसंकरः । तत्रास्यासाधुवृत्तीनामुपघातायजायते ४८ अनभ्यर्च्यऋषीन्देवान्पितृभूतातिथींस्तथा । योभुंक्तेतस्यसंभाषात्पतंतिनरकेनराः ४९ तस्मादेतान्नरोनग्नांस्त्रयीसंत्यागदूषितान् । सर्वदावर्जयेत्प्राज्ञआलापस्पर्शनादिषु ५० श्रद्धावद्भिःकृतंयत्नाद्देवान्पितृपितामहान् । नप्रीणयतियच्छ्राद्धंयदेभिरवलोकितम् ५१ श्रूयतेचपुराख्यातोराजाशतधनुर्भुवि । पत्नीचशैब्यातस्याभूदतिधर्मपरायणा ५२ पतिव्रतामहाभागासत्यशौचदयान्विता । सर्वलक्षणसंपन्नानयेनविनयेनच ५३ सतुराजातयासार्धंदेवदेवंजनार्दनम् । आराधयामासविभुंपरमेणसमाधिना ५४ होमैर्जप्यैस्तथादानैरुपवासैश्चभक्तितः । पूजाभिश्चानुदिवसंतन्मनानान्यमानसः ५५ एकदातुसमंस्नातौतौतुभार्यापतीजले । भागीरथ्याःसमुत्तीर्णौकार्तिक्यांसमुपोषितौ ५६ पाखंडिनमपश्येतामायांतंसंमुखंद्विजा चापाचार्यस्यतस्यासौसखाराज्ञोमहामनाः ५७ अतस्तद्गौरवात्तेनसहालापमथाकरोत् । नतुसावाग्यतादेवीतस्यपत्नीयतव्रता ५८ उपोषितास्मीतिरविंतस्मिन्दृष्टेददर्शच । समागम्ययथान्यायंदंपतीतौयथाविधि ५९ विष्णोःपूजादिकंसर्वंकृतवंतौद्विजोत्तम । कालेनगच्छताराजाममारासौसपत्नजित् ६० अन्वारुरोहतंदेवीचितास्थंभूपतिंपतिम् । सतुतेनापचारेणश्वाजज्ञेवसुधाधिपः ६१ उपोषितेनपाषंडसंभाषोयःकृतोभवत् । सापिजातिस्मराजज्ञेकाशिराजसुताशुभा ६२ सर्वविज्ञानसंपूर्णासर्वलक्षणपूजिता । तांपितादातुकामोभूद्वरायविनिवारितः ६३ तयैवतन्व्याविरतोविवाहारंभतोनृपः । ततःसादिव्यया दृष्ट्यादृष्ट्वाश्वानंनिजंपतिम् ६४ वैदिशाख्यपुरंगत्वातदवस्थंददर्शतम् । तंदृष्ट्वैवमहाभागंश्वानभूतंपतिंतथा ६५ ददौतस्मैवराहारंसत्कारप्रणवंशुभम् । भुंजन्दत्तंतयासोन्नमतिमिष्टमभीप्सितम् ६६ श्वजातिललितंकुर्वन्बहुचाटुचकारवै । अतीवव्रीडिताबालाकुर्वताचाटुतेनसा । प्रणामपूर्वमा

५१ तत्रपाषंडालापदोषंदर्शयितुमितिहासमाह श्रूयतेचेत्यादिनायावत्समाप्ति ५२ ५३ ५४ ५५ ५६ तस्यराज्ञःचापाचार्यस्यधनुर्विद्यागुरोः असौपाषंडीसखेत्यन्वयः ५७ ५८ ५९ ६० तेनापचारेणनग्नसंसर्गेणपापेन ६१ तदेवाह उपोषितेनराज्ञा पाषंडसंभाषआलापः ६२ सर्वस्मिन्नर्थेविज्ञानमबाधितज्ञानंतेनसंपूर्णास्वभावतःपूर्णासर्वज्ञेत्यर्थः ६३ तयाकाशिराजसुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातन्व्वाविनिवारितःसन् ६४ ६५ ६६ ६७ दाक्षिण्याद्गुरोःसखेतिसद्भावाल्ललितंप्रीतिसंभाषणंस्मर्यताम् येनभवान्ममचाटुकारोजातइत्यर्थः चाटुप्रीतिचेष्टा ६८ ६९ ७० मरुप्रपतनंगिरिशृंगात्पातं निरुदकदेशेमहापथगमनंवा शार्गालींशृगालसंबंधिनींयोनिं ७१ ७२ ७३ ७४ ७५ वृकंवनश्वानंअद्रिव्याघ्रंवा ७६ ७७ यदात्मादेहस्त्यक्तस्तदागृध्रतांगतः एनं

२३ हेदंदयितंतंकुयोनिजम् ६७। । पत्न्युवाच। । स्मर्यतांतन्महाराजदाक्षिण्यललितंत्वया। येनश्वयोनिमापन्नोममचाटुकरोभवान् ६८ पाषंडिनंसमाभाष्यतीर्थस्नानादनंतरम्। प्राप्तोसिकुत्सितांयोनिंकिंनस्मरसितत्प्रभो ६९। । पराशरउवाच। । तयैवंस्मारितेतत्रपूर्वजातिकृतेतदा। दध्यौचिरमथावाप्यनिर्वेदमतिदुर्लभम् ७० निर्विण्णचित्तःसततोनिर्गम्यनगरात्ततः। मरुत्प्रपतनंकृत्वाशार्गालींयोनिमागतः ७१ सापिद्वितीयेसंप्राप्तेवर्षेदिव्येनचक्षुषा। ज्ञात्वाशृगालंतंद्रष्टुंययौकोलाहलंगिरिम् ७२ तत्रापिदृष्ट्वातंप्राहशार्गालींयोनिमागतम्। भर्तारमभिचार्वंगीतनयापृथिवीक्षितः ७३। । पत्न्युवाच। । अपिस्मरसिराजेंद्रश्वयोनिस्थस्ययन्मया। प्रोक्तंतत्पूर्वचरितंपाषंडालापसंश्रयम् ७४ पुनस्तयोक्तस्तज्ज्ञात्वासत्यंसत्यमतांवरः। काननेसनिराहारस्तत्याजस्वंकलेवरम् ७५ भूयस्ततोवृकंजातंगत्वातांनिर्जनेवने। स्मारयामासभर्तारंपूर्ववृत्तमनिंदिता ७६ नत्वंवृकोमहाभागराजाशतधनुर्भवान्। श्वाभूत्वात्वंशृगालोभूर्वृकत्वंसांप्रतंगतः ७७। । पराशरउवाच। । स्मारितेनयदात्यक्तस्तेनात्मागृध्रतांगतः। अवापसापुनश्चैनंबोधयामासभामिनी ७८ नरेंद्रस्मर्यतामात्माह्यलंतेगृध्रचेष्टया। पाषंडालापजातोयंदोषोयद्गृध्रतांगतः ७९ ततःकाकत्वमापन्नंसमनंतरजन्मनि। उवाचतन्वीभर्तारमुपलभ्यात्मयोगतः ८० अशेषाभूभृतःपूर्वंवश्यायस्मैबलिंददुः। सत्वंकाकत्वमापन्नोजातोद्यबलिभुक्प्रभो ८१। । पराशरउवाच। । एवमेवचकाकत्वेस्मारितःसपुरातनम्। तत्याजभूपतिःप्रणान्मयूरत्वमवापच ८२ मयूरंतंततःसावैचकारानुगतंशुभा। दत्तैःप्रतिक्षणंहृद्यैस्तृप्तंतज्जातिभोजनैः ८३ ततस्तुजनकोराजावाजिमेधंमहाक्रतुम्। चकारतस्यावभृथेस्नापयामासतंतदा ८४ सस्त्रौस्वयंचतन्वंगीस्मारयामासचापितम्। यथासौश्वशृगालाद्यायोनीर्जग्राहपार्थिवः ८५ स्मृतजन्मक्रमःसोथतत्याजस्वंकलेवरम्। जज्ञेचजनकस्यैवपुत्रोऽसौसुमहात्मनः ८६ ततःसापितरंतन्वीविवाहार्थमचोदयत्। सचापिकारयामासपितातस्याःस्वयंवरम् ८७ स्वयंवरेकृतेसातंसंप्राप्तंपतिमात्मनः। वरयामासभूयोपिभर्तृभावेनभाविनी ८८ बुभुजेचतयासार्धंसंभोगान्नृपनंदनः। पितर्युपरतेराज्यंविदेहेषुचकारह ८९ इयाजयज्ञा

गृध्रमवापबोधयामासच ७८ आत्माराजदेहःस्मर्यतां त्यज्यतामितिपाठेआत्मागृध्रदेहः यद्येनदोषेण ७९ उपलभ्यज्ञात्वाप्राप्यच ८० बलिंकरम् बलिभुक्उपहारपिंडभुक् ८१ ८२ तज्जातिभोजनैर्मयूरजातिभोजनैर्भक्ष्यैः ८३ ८४ ८५ ८६ ८७ आत्मनःपतिंस्वयंवरेवरयामासेत्युक्त्यापतिव्रतयास्वस्यपत्युर्ज्ञातस्यतत्रापिस्वयंवरविषयेवरणेस्त्रीपुरुषयोर्ज्येष्ठकनिष्ठभावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिदोषाभावःसूचितः ८८ ८९ ९० ९१ ९२ ऐंद्रान्लोकानतीत्यकामदुघान्लोकान्प्राप ९३ तामश्वमेधावभृथस्नानजांसिद्धिंपाषंडिसंसर्गजपापक्षयपुण्यवृद्धिरूपां ९४ ९५ ९६ इदानींकैमुतिकन्यायेनपूर्वोक्तमेवप्रायश्चित्तमाह क्रियाहानिरिति ९७ यैस्त्रयीत्यक्तातेषांदर्शनात्सूर्यंपश्येदितिकिंपुनर्वाच्यं परान्नभोजिभिःपाषंडान्नभोजिभिः ९८ पाषंडादयःसर्वेवेदावि रुद्धाएव यदाहुः भ्रष्टःस्वधर्मात्पाषंडोविकर्मस्थोनिषिद्धकृत् यस्यधर्मध्वजोनित्यंसुराध्वजइवोत्थितः प्रच्छन्नानि वपापानिबैडालंनामतद्व्रतम् प्रियंवक्तिपुरोन्यत्रविप्रियंकुरुतेभृशम् त्यक्तोप रोधचेष्टश्चशठोयंकथितोबुधैः संदेहकृद्धेतुभिश्चसत्कर्मसुसहैतुकः अर्वाक्दृष्टिर्नैकृतिकःस्वार्थसाधनतत्परः शठोमिथ्याविनीतश्चबकवृत्तिरुदाहृत इति वाङ्मात्रेणापिनार्चयेत्तैःसंभाष

न्सुबहून्ददौदानानिचार्थिनाम् । पुत्रानुत्पादयामासयुयुधेचसहारिभिः ९० राज्यंभुक्त्वायथान्यायंपालयित्वावसुंधराम् । तत्याजसप्रियान्प्राणा न्संग्रामेधर्मतोनृप ९१ ततश्चितास्थंतंभूयोभर्तारंसाशुभेक्षणा । अन्वारुरोहविधिवद्यथापूर्वंमुदावती ९२ ततोवापतयासार्धंराजपुत्र्यासपार्थिवः । ऐंद्रानतीत्यवैलोकाँल्लोकान्कामदुहोक्षयान् ९३ स्वर्गाक्षयत्वमतुलंदांपत्यमतिदुर्लभं । प्राप्तंपुण्यफलंप्राप्यसंसिद्धिंताद्विजोत्तम ९४ एषपाषंडसं भाषदोषःप्रोक्तोमयाद्विज । तथाश्वमेधावभृथस्नानमाहात्म्यमेवच ९५ तस्मात्पाषंडिभिःपापैरालापस्पर्शनेत्यजेत् । विशेषतःक्रियाकालेयज्ञादौचा पिदीक्षितः ९६ क्रियाहानिर्गृहेयस्यमासमेकंप्रजायते । तस्यावलोकनात्सूर्यंपश्येतमतिमान्नरः ९७ किंपुनर्यैस्तुसंत्यक्तात्रयीसर्वात्मनाद्विज । प रान्नभोजिभिःपापैर्वेदवादविरोधिभिः ९८ पाषंडिनोविकर्मस्थान्बैडालव्रतिकाञ्शठान् । हैतुकान्बकवृत्तींश्चवाङ्मात्रेणापिनार्चयेत् ९९ दूरादपा स्तःसंपर्कःसहास्यापिचपापिभिः । पाषंडिभिर्दुराचारैस्तस्मात्तान्परिवर्जयेत् १०० एतेनग्नास्तवाख्याताद्दृष्ट्याश्राद्धोपघातकाः । येषांसंभाषणात्पुं सांदिनपुण्यंप्रणश्यति १०१ एतेपाषंडिनःपापानत्वेतानालपेद्बुधः । पुण्यंनश्यतिसंभाषादेतेषांतद्दिनोद्भवम् २ पुंसांजटाधरणमौंजवतांवृथैव मोघाशिनामखिलशौचनिराकृतानाम् । तोयप्रदानपितृपिंडबहिष्कृतानांसंभाषणादपिनरानरकंप्रयांति १०४ । । इतिश्रीविष्णुपुराणे तृतीयेंशेअष्टादशोध्यायः १८ । । तृतीयांशसमाप्तः । । छ । । छ । । छ । । छ । । छ । । छ ।

णमपिनकुर्यात् ९९ यदाचैवंतदापूर्वोक्तैःप्राणिभिःसहसंपर्कःसहभोजनादिरूपोदूरादपास्तोनिषिद्धः सहास्यापिनिषिद्धा किंबहुनासर्वात्मनातान्परिवर्जयेत् १०० नग्नपाषंडिनोःपूर्वोक्तदोष मनुवदन्नुपसंहरति एतइतिद्वाभ्यां १०१ १०२सर्वेषांसामान्यदोषमाह पुंसामिति वृथैवेतिविशेषणादथर्वशिरःप्रोक्तशैवपाशुपतव्रताद्यंगभूतजपधारणाद्यनुमन्यते मोघाशिनांदेवतातिथ्यादि पूजांविनान्नभोक्तॄणां अखिलशौचैर्बाह्याभ्यंतरशौचैर्निराकृतानांवर्जितानांतोयप्रदानादिभ्योमायामोहेनबहिष्कृतानामिति १०३तपसोपिस्तुतिश्रेष्ठेत्याविष्कुर्वन्सुरेतरान् तपस्यभिरतान्देवैः स्तुतोविष्णुरसूसुहत् १०३ इतिश्रीविष्णुपुराणेवैष्णवाकूतचन्द्रिकायांतृतीयेंशे अष्टादशोध्यायः १८ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीविष्णुपुराणे तृतीयांशः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीविष्णुपुराणे चतुर्थांशप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः । । धर्मोपधर्मयोःपूर्वमुक्तयोरनुवर्ण्यते मनुवंशश्चतुर्थांशेप्रवर्तकनिवर्तकः १ नेदिष्टवंशंप्रथमेकथयत्रैवतः रेवतींहलिनेप्रादात्स्वसुतांदुहिणाज्ञया २ उक्तानुवादपूर्वकं मनुवंशंपृच्छति भगवन्निति गुरुणात्रयाख्यातम् ३ वीरउत्साहवान् शूरःपराभिभवी ब्रह्माआदिर्मूलकारणंयस्यसःमानवोवैवस्वतस्यमनोःसंबंधी ४ तत्रप्रथमंवंशस्मरणादिफलमाह ब्रह्माद्य मिति ब्रह्मांडतोब्रह्माप्राग्बभूव किंविशिष्टःजगतामादिर्मूलकारणंस्वयंचानादिर्दृष्टकारणशून्यःभगवद्विष्णुमयस्यभगवद्विष्णोर्मूर्तिःरूपमपरिच्छिन्नंस्वरूपं हिरण्यस्यब्रह्मांडस्यगर्भरूपश्चेत्यर्थः ६ तत्रतावददितिर्ह्यजनिष्टदक्षस्यदुहितातांदेवाअनुजायंतेत्यादिश्रुतिसिद्धांवंशानुपूर्वीमाह ब्रह्मणइति दक्षस्यादितिःकन्येतिशेषःनाभागनेदिष्टेतिनाभागस्यनेदिष्टइत्यर्थःक्वचिन्नेदिष्टस्यैवदि

मैत्रेयउवाच । भगवन्यन्नरैःकार्यंसाधुकर्मण्यवस्थितैः । तन्मह्यंगुरुणाख्यातंनित्यनैमित्तिकात्मकम् १ वर्णधर्मास्तथाख्याताधर्मायेवाश्रमेषुवै । श्रोतुमिच्छाम्यहंवंशांस्तांस्त्वंप्रब्रूहिमेगुरो २ । । पराशरउवाच । । मैत्रेयश्रूयतामयमनेकयज्विवीरशूरभूपालालंकृतोब्रह्मादिर्मानवोवंशः ३ तथा चोच्यते । । ब्रह्माद्यंयोमनोर्वंशमहन्यहनिसंस्मरेत् । तस्यवंशसमुच्छेदोनकदाचिद्भविष्यति ४ तस्यवंशानुपूर्वींमशेषपापप्रक्षालनायमैत्रेयैतांशृणु ५ । तद्यथा । । सकलजगतामनादिरादिभूतऋग्यजुःसामादिमयीभगवद्विष्णुमयस्यब्रह्मणोमूर्तिरूपंहिरण्यगर्भोब्रह्मांडतोभगवान्ब्रह्माप्राग्बभू व ६ ब्रह्मणश्चदक्षिणांगुष्ठजन्मादक्षःप्रजापतिर्दक्षस्याप्यदितिरदितेर्विवस्वान्विवस्वतोमनुर्मनोरिक्ष्वाकुनृगधृष्टशर्यातिनरिष्यंतप्रांशुनाभागनेदि ष्टकरूषपृषध्राद्याःपुत्राबभूवुः ७ इष्टिंचमित्रावरुणयोर्मनुःपुत्रकामश्चकार ८ तत्रापहतेहोतुरपचारादिलानामकन्याबभूव ९ सैवमित्रावरु णप्रसादात्सुद्युम्नोनाममनोःपुत्रोमैत्रेयासीत्पुनश्चेश्वरकोपात्स्त्रीसतीसोमसूनोर्बुधस्याश्रमसमीपेबभ्राम १० सानुरागश्चतस्यांबुधःपुरूरवसमा त्मजमुत्पादयामास ११ जातेचतस्मिन्नमिततेजोभिःपरमर्षिभिरिष्टिमयऋङ्मयोयजुर्मयःसाममयोऽथर्वमयःसर्वमयोमनोमयोऽज्ञानमयोकिंचिन्म योभगवान्यज्ञपुरुषस्वरूपीसुद्युम्नस्यपुंस्त्वमभिलषद्भिर्यथावदिष्टः १२ तत्प्रसादादिलापुनरपिसुद्युम्नोऽभवत्तस्याप्युत्कलगयविनतसंज्ञास्त्रयःपुत्रा बभूवुःसुद्युम्नस्तुस्त्रीपूर्वकत्वाद्राज्यभागंनलेभे १३ तत्पित्रातुवसिष्ठवचनात्प्रतिष्ठानंनामनगरंसुद्युम्नायदत्तंतच्चासौपुरूरवसेप्रादात् । पृषध्रस्तु

ष्टइत्यपिसंज्ञा ७ इष्टिंचपुत्रोत्पत्तेःपूर्वमेवचकार यथाहवायुः अकरोत्पुत्रकामस्तुमनुरिष्टिंप्रजापतिः अनुत्पन्नेषुनवसुपुत्रेष्वेतेषुसुव्रतेति ८ सुद्युम्नस्यप्रथमकन्यात्वाद्राज्यानर्हत्वंदर्शयन्नाह तत्रत स्मिन्कर्मणिमनुपत्न्याकन्यार्थंप्रार्थितस्यहोतुरपचारात्कन्यासंकल्परूपादपहतेविकलेजातेसतिकन्याभूत् अपह्नुतेरितिपाठेअपकृष्टाद्धोमाद्धेतोरित्यर्थः ९ ईश्वरकोपादिति महादेवःकिलइ लावृतेपार्वत्यासहरममाणःकेनचिन्निमित्तेनाशपत् योऽस्मिन्वनेप्रवेक्ष्यतिसयोषिद्भविष्यतीति सुद्युम्नस्तंशापमजानन्तत्रप्रविष्टोयोषिद्भूवेति १० तस्यांस्त्रियांपुरूरवसमुत्पादयामासेत्यतःसूर्य वंशएवचंद्रवंशसंभवःसूचितः ११ तस्मिंश्चजातेपरमर्षिभिर्भगवान्यथावदिष्टः व्यवहारतइष्ट्यादिमयः वस्तुतस्तुअकिंचिन्मयः १२ स्त्रीपूर्वकत्वात्पूर्वस्त्रीत्वादित्यर्थः १३ पृषध्रस्यापिराज्यान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्हत्वंप्रसंगादाह पृषध्रइति वसिष्ठेनगोरक्षणेनियुक्तोरात्रौव्रजेप्रविष्टंव्याघ्रंजिघांसुःप्रमादाद्व्रांजघानेतिगुरुणाशप्तःशूद्रत्वमवापेत्यर्थः १४ अत्रपाठक्रमोनविवक्षितः सूचीकटाहन्यायेनाल्पस्यपूर्वं कथनादित्यतआहकरूषादिति १५ नेदिष्टस्यपुत्रोनाभागोवैश्यतांगतोनाभागोनेदिष्टपुत्रोन्यःकर्मणावैश्यतांगतइतिशुकोक्तेः तस्यचपुत्रोत्पत्तेरुत्तरकालमेववैश्यत्वप्राप्त्यातत्पुत्रस्यभलंदनस्य

गुरुगोवधाच्छूद्रत्वमगमत् १४ करूषात्कारूषामहाबलाःक्षत्रियाबभूवुः १५ नाभागोनेदिष्टपुत्रस्तुवैश्यतामगमत् १६ तस्माद्भलंदनःपुत्रोभवद्भ लंदनाद्वत्सप्रिरुदारकीर्तिर्वत्सप्रेःप्रांशुरभवत्प्रजानिश्चप्रांशोरेकोऽभवत् । ततश्चखनित्रस्तस्माच्चक्षुपःक्षुपाच्चातिबलपराक्रमोविंशोऽभवत् । ततो विविंशस्तस्माच्चखनित्रस्ततश्चातिविभूतिर्विभूतेर्भूरिबलपराक्रमःकरंधमःपुत्रोऽभवत् ।तस्मादप्यविक्षिरविक्षेरप्यतिबलःपुत्रोमरुत्तोऽभवत् १७ यस्येमावद्यापिश्लोकौगीयेते । मरुत्तस्ययथायज्ञस्तथाकस्याभवद्भुवि । सर्वंहिरण्मयंयस्ययज्ञवस्त्वतिशोभनम् १८ अमाद्यदिंद्रःसोमेनदक्षि णाभिर्द्विजातयः । मरुतःपरिवेष्टारःसदस्याश्चदिवौकसः १९ मरुत्तश्चक्रवर्तीनरिष्यंतनामानंपुत्रमवापतस्माच्चदमोदमस्यपुत्रोराज्यवर्धनोजज्ञे राज्यवर्धनात्सुधृतिरभूत्ततश्चनरस्तस्माच्चकेवलःकेवलाद्धुंधुमान्धुंधुमतोवेगवान्वेगवतोबुधस्तृणबिंदुस्तस्याप्येकाकन्येलविलानामतंचालंबुषानामव राप्सरास्तृणबिंदुंभेजेतस्यामस्यविशालोजज्ञेयःपुरींवैशालींनामनिर्ममे हेमचंद्रश्चविशालस्यपुत्रोऽभवत्तस्माच्चसुचंद्रस्तत्तनयोधूम्राश्वस्तस्यापिसृं जयोऽभूत्सृंजयात्सहदेवः । ततःकृशाश्वोनामपुत्रोऽभूत् । सोमदत्तःकृशाश्वाज्जज्ञेयोदशाश्वमेधानाजहार । तत्पुत्रश्चजनमेजयोजनमेजयात्स्वमति एतेवैशालकाभूभृतः । श्लोकोप्यत्रगीयते । तृणबिंदोःप्रसादेनसर्वेवैशालकानृपाः दीर्घायुषोमहात्मानोवीर्यवंतोतिधार्मिकाः । शर्यातेःकन्यासुक न्यानामाभवत्यामुपयेमेच्यवनः । आनर्तश्चनामधार्मिकःशर्यातिपुत्रोऽभवदानर्तस्यापिरेवतोनामपुत्रोजज्ञेयोवानर्तविषयंबुभुजेपुरींचकुशस्थलीम ध्युवासरेवतस्यापिरैवतःपुत्रःककुद्मीनामधर्मात्माभ्रातृशतज्येष्ठोऽभवत्तस्यरेवतीनामकन्यातामादायकस्येयमर्हतीतिभगवंतमब्जयोनिंप्रष्टुंजगामताव च्चब्रह्मणोंऽतिकेहाहाहूहूसंज्ञाभ्यांगंधर्वाभ्यामतिताननामदिव्यंगांधर्वमगीयत २० तावच्चत्रिमार्गपरिवर्तैरनेकयुगपरिवर्तेतिष्ठन्नपिरैवतकःशृण्व न्मुहूर्तमिवमेने २० गीतावसानेभगवंतमब्जयोनिंप्रणम्यरैवतकःकन्यायोग्यंवरमपृच्छत् । तंचाहभगवान्कथययोभिमतस्तेवरइतिपुनश्चप्रणम्य

क्षत्रियत्वमविरुद्धमेव अतएवतदन्वयस्यमरुत्तस्यचक्रवर्तित्वंसंगच्छते १६ अविक्षेरेवक्वचिदविक्षिदित्यपिनाम १७ १८ अमाद्यत्सोमपानेनातितृप्त्यात्हृष्टोबभूवेत्यर्थः मरुतोदेवाःपरिवेष्टारःअन्ना दिपरिवेषकाः अतितानंगेयविशेषःदिव्यंदिविभवम् पृथिव्यांतदभावात् गांधर्वंगंधर्वाणांकर्मगीतं गांधारमितिपाठेगांधारग्रामबहुलम् १९ त्रयोमार्गाःषड्जमध्यमगांधाराख्याश्चित्रदक्षिणवर्तिका ख्यावातेषांपरिवर्तैरावर्तनैः परिवर्तीतिपाठेगांधर्वविशेषणम् २० अवनतशिराश्चितयेवावनतमुखःअवनतशिरसमितिपाठेरैवतविशेषणम् २१ अस्यवैवस्वतस्यमनोरष्टाविंशतितमंचतुर्युगंगत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायम् २२ एकाकिनादेयामित्यत्रहेतुमाहभवतइति २३ कन्यायावराभावादुत्पन्नसाध्वसः २४ पूर्वंचिंतितेभ्योन्येभ्योपिअयमेववरःश्रेष्ठइतिवदन्बलदेवायकन्यांदेहीत्याह नह्यादिमध्यांत मितिदशभिः पूर्वयच्छब्दानांसाविष्णुर्धरित्र्यांस्वांशेनावतीर्णइत्यष्टमेनान्वयः आदिमध्याद्यज्ञानेहेतुः कारणतयासर्वगतस्य स्वरूपंतत्त्वम् परंस्वभावंअसाधारणंधर्मं सारंबलम् २५ यस्यविभू तेरवताररूपायाःपरिणामस्यषड्भावविकारस्यकालोनहेतुः अत्रहेतुः अजन्मेति २६ यस्याच्युतस्यप्रसादादहंब्रह्माप्रजासृष्टिकरोभूतः क्रोधाच्चांतकारीरुद्रः मध्येचयस्मात्स्थितिहेतुः पुरुषोवि

भगवतेयथाभिमतानात्मनःसवरान्कथयामासकएषांभगवतेभिमतःकस्मैकन्यामिमांप्रयच्छामीति । ततःकिंचिदवनतशिराःसस्मितोभगवानब्रह्मयो निराह २१ यएतेभवतोभिमतानैतेषांसांप्रतमपत्यापत्यसंततिरप्यवनीतलेस्तिबहूनिहितवात्रैतद्गांधर्वंशृण्वतश्चतुर्युगान्यतीतानिसांप्रतंभूत लेष्टाविंशतितमस्यमनोश्चतुर्युगमतीतप्रायमासन्नोहितत्कलिरन्यस्मैकन्यारत्नमिदंभवतैकाकिनादेयम् २२ भवतोपिमित्रमंत्रिभृत्यकलत्रबंधुबल कोशादयःसमस्ताःकालेनैतेनात्यंतमतीताः २३ पुनरप्युत्पन्नसाध्वसोराजाभगवंतंप्रणम्यपप्रच्छभगवन्नेवमवस्थितेममेयंकस्मैदेयेतिततःसभग वान्किंचिदवनतकंधरंकृतांजलिभूतंसप्तलोकगुरुरब्रह्मयोनिराह २४ । । ब्रह्मोवाच । । नह्यादिमध्यांतमजस्ययस्यविद्मोवयंसर्वगतस्यधातुः । न चस्वरूपंनपरंस्वभावंनचैवसारंपरमेश्वरस्य २५ कलामुहूर्तादिमयश्चकालोनयद्विभूतेःपरिणामहेतुः । अजन्मनाशस्यसमस्तमूर्तेरनामरूपस्यस नातनस्य २६ यस्यप्रसादादहमच्युतस्यभूतःप्रजासृष्टिकरोंतकारी । क्रोधाच्चरुद्रःस्थितिहेतुभूतोयस्माच्चमध्येपुरुषःपरस्मात् २७ मद्रूपमास्था यसृजत्यजोयःस्थितौचयोऽसौपुरुषस्वरूपी । रुद्रस्वरूपेणचयोऽत्तिविश्वंधत्तेतथानंतवपुःसमस्तम् २८ शक्रादिरूपीपरिपातिविश्वमर्केंदुरूपश्चत मोहिनस्ति । पाकाययोऽग्नित्वमुपेत्यलोकान्बिभर्तिपृथ्वीवपुरव्ययात्मा २९ चेष्टांकरोतिश्वसनस्वरूपीलोकस्यतृप्तिंचजलस्वरूपी । ददातिविश्व स्थितिसंस्थितस्तुसर्वावकाशंचनभःस्वरूपी ३० यःसृज्यतेसर्गकृदात्मनैवयःपाल्यतेपालयिताचदेवः । विश्वात्मनःसंक्रियतेंतकारीपृथक्क्रयस्या स्यचयोऽव्ययात्मा ३१ यस्मिञ्जगद्योजगदेतदाद्योयश्चाश्रितोस्मिञ्जगतिस्वयंभूः । ससर्वभूतप्रभवोधरित्र्यांस्वांशेनविष्णुर्नृपतेऽवतीर्णः ३२ कुशस्थलीयातवभूपरम्यापुरीपुराभूदमरावतीव । साद्वारकासंप्रतितत्रचास्तेसकेशवांशोबलदेवनामा ३३ तस्मैत्वमेनांतनयांनरेंद्रप्रयच्छमायाम

ष्णाख्योभूतः २७तर्हिकिंपरमपुरुषोनसृष्ट्यादिकर्ताकिंतुभवदादयएवेत्यतआह मद्रूपमिति अनंतवपुःशेषमूर्तिः २८ शक्रादीत्यादिशब्दात्स्थितिहेतवोज्ञेयाः पंचमहाभूतरूपेणापिपालकत्व माह पाकायेतिसार्धेन २९ ३० तर्हिकिंसृज्यादयस्ततोभिन्नाइत्याशंक्यस्रष्ट्रादीननूयसृज्यादिभिःसहाभेदेनाह यःसृज्यतइतिद्वाभ्याम् विश्वात्मनोविश्वस्यांतकारीसंक्रियतेचअस्यस्रष्ट्रादि त्रयस्यसृज्यादित्रयस्यचयःपृथक्शुद्धचिद्रूपःपृथङ्नयस्येतिपाठेयस्मात्पृथगन्योनास्तीत्यर्थः ३१ अस्मिञ्जगतिआश्रितएतद्व्याप्यास्थितःतत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः ३२ ३३ ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अल्पौजसोऽल्पसामर्थ्यान् ३५ अन्यरूपांकृष्णेनसमुद्राद्द्वादशयोजनपरिमितांभूमिंगृहीत्वाविश्वकर्मद्वारान्यथानिर्मितत्वात्सीरध्वजायहलिने ३६ ३७ ३८ इतिश्रीरत्नगर्भभट्टाचार्य कृतायांवैष्णवाकूतचंद्रिकायांचर्तुर्थेंशेबलदेवविवाहःप्रथमोध्यायः १ धृष्टादिमनुपुत्राणांवंशांस्तच्चरितानिच द्वितीयेतत्प्रसंगेनसौभर्याख्यानमुक्तवान् रैवतस्यभ्रातृशतमध्येकिंतावत्कोपि राजानाभवदित्याशंक्याह यावच्चेतिपुण्यजनसंज्ञाइति विशेषणंसोपलंभम् राक्षसजातिविशेषपरंवा १ एतेक्षत्रप्रसूताइति एतेरथीतरस्यप्रवरागोत्रजाःक्षत्रप्रसूताःक्षत्रियाः अप्रजस्यरथी

नुजायजायाम् । श्लाघ्योवरोऽसौतनयातवेयंस्त्रीरत्नभूतासदृशोहियोगः ३४ पराशरउवाच । इतीरितोऽसौकमलोद्भवेनभुवंसमासाद्यपतिःप्रजा नाम् । ददर्शकृस्वान्पुरुषानशेषानल्पौजसःखल्पविवेकवीर्यान् ३५ कुशस्थलींतांचपुरीमुपेत्यदृष्ट्वान्यरूपांप्रददौस्वकन्याम् । सीरध्वजायस्फटि काचलाभवक्षस्थलायातुलधीर्नरेंद्रः ३६ उच्चप्रमाणामतितामवेक्ष्यस्वलांगलाग्रेणसतालकेतुः । विनामयामाससततश्चसापिबभूवसद्योवनितायथा न्या ३७ तांरेवतींरैवतभूपकन्यांसीरायुधोऽसौविधिनोपयेमे । दत्त्वाचकन्यांसनृपोजगामहिमाचलंवैतपसेधृतात्मा ३८ इतिश्रीविष्णुपुराणेचतुर्थेंशे बलदेवविवाहःप्रथमोध्यायः १ पराशरउवाच । यावच्चब्रह्मलोकात्ककुद्मीरैवतोनामाभ्येति । तावत्पुण्यजनसंज्ञाराक्षसास्तामस्यपुरींकुश स्थलींजग्मुः १ तावच्चास्यभ्रातृशतंपुण्यजनत्रासाद्दिशोभेजे । तदन्वयाश्चक्षत्रियाःसर्वदिक्ष्वभवन् । धृष्टस्यापिधार्ष्टकंक्षत्रंसमभवत् । नभगस्या त्मजोनाभागस्तस्यांबरीषोंबरीषस्यापिविरूपोऽभवत् । विरूपात्पृषदश्वोजज्ञेततश्चरथीतरः तत्रायंश्लोकः एतेक्षत्रप्रसूतावैपुनश्चांगिरसःस्मृ ताः रथीतरस्यप्रवराःक्षत्रोपेताद्विजातयः २ क्षुवतश्चमनोरिक्ष्वाकुर्घ्राणतःपुत्रोजज्ञे ३ तस्यशतप्रवराविकुक्षिनिमिदंडाख्यास्त्रयःपुत्राःशकुनिप्र मुखाःपंचाशत्पुत्राउत्तरापथरक्षितारोबभूवुः । चत्वारिंशदष्टौचदक्षिणापथेभूपालाः ४ सचेक्ष्वाकुरष्टकायामुत्पाद्यश्राद्धार्हंमांसमानयेतिविकुक्षिमाज्ञा पयामास ५ सतथेतिगृहीताज्ञोवनमभ्येत्यानेकान्मृगान्हत्वातिश्रांतोतिक्षुत्परीतोविकुक्षिरेकंशशमभक्षयत् । शेषंचमांसमानीयपित्रेनिवेदयामास । इक्ष्वाकुणापीक्ष्वाकुकुलाचार्यस्तत्प्रोक्षणायप्रचोदितःप्राहअलमनेनामेध्येनदुरात्मनानेनतेपुत्रेणएतन्मांसमुपहृतंयतोनेनशशकोभक्षितः । ततश्चा सौविकुक्षिर्गुरुणैवमुक्तःशशादसंज्ञामवापपित्रापिचपरित्यक्तः ६ पितर्युपरतेचाखिलामेतांपृथ्वींधर्मतःशशास । शशादस्यचपरंजयोनामपुत्रोऽभ

तरस्यभार्यायामंगिरसोजातत्वात् तथापितयोर्योगात्पुनरंगिरसोब्राह्मणाःस्मृताः अतःक्षत्रोपेताद्विजातयइत्यन्वयः २ इक्ष्वाकुनामनिरुक्तिपूर्वकंतस्यवंशमाह क्षुवतःक्षुतंकुर्वतोमनो र्घ्राणतः ३ पुत्रशतस्यैकाधिकपुत्रशतस्यप्रवराः ४ विकुक्षेरेवशशादसंज्ञावक्तुमाह सचेति उत्पाद्यक्रयादिकंविनास्वयंमृगान्हत्वेत्यर्थः ५ एवंशशादोयमितिगुरुणोक्तःशशादसं ज्ञामवापेत्यन्वयः ६ ७ परंजयएवककुत्स्थसंज्ञामवापेतिवक्तुमितिहासमाह इदंचेत्यादिनासंज्ञामवापेत्यंतेन इदंचान्यत्तस्यनामेतिशेषः सकलंजगदेवपरंश्रेष्ठंअयनमाश्रयोयस्यनारायण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यसर्वांतर्यामित्वात्तदर्थंतद्विष्पत्तये ८ अवतीर्यप्रविश्य कार्यःअवश्यंविधेयः उद्योगोयुद्धारंभोयेनपरंजयेनसतथाविधःकार्यःसंपाद्यः ९ सहायकंसाहाय्यम् १० बाढंतथेत्यन्वीप्सितमनु

वत् ७ इदंचान्यत्पुराहित्रेतायांदैवासुरमतिविभीषणंयुद्धमासीत् । तत्रचातिबलिभिरसुरैरमराःपराजिताभगवंतंविष्णुमाराधयांचक्रुःप्रसन्नश्च देवानामनादिनिधनःसकलजगत्परायणोनारायणःप्राहज्ञातमेवमयायुष्माभिर्यदभिलषितंतदर्थमिदंश्रूयताम् ८ परंजयोहिनामशशादस्यचरा जर्षेस्तनयःक्षत्रियवर्यस्तच्छरीरेहमंशेनस्वयमेवावतीर्यतानशेषानसुरान्निहनिष्यामितद्भवद्भिःपरंजयोसुरवधार्थायेहकार्योद्योगःकार्यइत्येतच्छ्रुत्वा प्रणम्यभगवंतंविष्णुममराःपरंजयसकाशमाजग्मुः ९ ऊचुश्चैनंभोभोःक्षत्रियवर्यास्माभिरभ्यर्थितेनभवतास्माकमरातिवधोद्यतानांसहायकंकृ तमिच्छामः १० तद्भवतास्माकमभ्यागतानांप्रणयभंगोनकार्यइत्युक्तःपरंजयःप्राहसकलत्रैलोक्यनाथोयोऽयंयुष्माकमिंद्रःशतक्रतुरस्ययद्यहंस्कंध मारूढोयुष्मदरातिभिःसहयोत्स्येतदाहंभवतांसहायइत्याकर्ण्यसमस्तदेवैरिंद्रेणचबाढमित्येवमन्वीप्सितम् ११ ततश्चशतक्रतोर्वृषभरूपधारिणःक कुत्स्थोतिहर्षसमन्वितोभगवतश्चराचरगुरोरच्युतस्यतेजसाप्यायितोदेवासुरसंग्रामेसमस्तानेवासुरान्निजघानयतश्चवृषभककुत्स्थेनराज्ञानिषूदित मसुरबलंततश्चासौककुत्स्थसंज्ञामवाप । ककुत्स्थस्याप्यनेनाःपुत्रोऽभूदनेनसःपृथुःपृथोर्विष्वगश्वस्तस्यचार्द्रोभूदार्द्रस्ययुवनाश्वस्तस्यश्रावस्तोय श्रावस्तींपुरींनिवेशयामासश्रावस्तस्यबृहदश्वस्तस्यापिकुवलयाश्वोयोऽसावुत्तंकस्यमहर्षेरपकारिणंधुंधुनामानमसुरंवैष्णवेनतेजसाप्यायितःपुत्रस हस्रैरेकविंशतिभिःपरिवृतोजघानधुंधुमारसंज्ञांचावापतस्यचसमस्ताएवपुत्राधुंधुमुखनिश्वासाग्निनाविप्लुष्टाविनेशुः १२ दृढाश्वचंद्राश्वकपिलाश्वास्त्र यःकेवलमवशेषिताःदृढाश्वाद्धर्यश्वस्तस्मान्निकुंभोनिकुंभात्संहताश्वस्ततःकृशाश्वस्तस्मात्प्रसेनजित्ततोयुवनाश्वोऽभवत् । तस्यचापुत्रस्यातिनिर्वेदा न्मुनीनामाश्रममंडलेनिवसतःकृपालुभिस्तैर्मुनिभिरपत्योत्पादनायइष्टिःकृतातस्यांचमध्यरात्रनिवृत्तायांमंत्रपूतजलकलशंवेदीमध्येनिवेश्यतेमुनयः सुषुपुः १३ तेषुचसुप्तेष्वतितृट्परीतःसभूपालस्तमाश्रमंविवेशसुप्तांश्चतान्ऋषीन्नैवोत्थापयामास १४ तच्चकलशजलमपरिमेयमाहात्म्यंमंत्रपूतंप पौ । प्रबुद्धाश्चऋषयःपप्रच्छुःकेनैतन्मंत्रपूतंवारिपीमतत्रहिपीतेराज्ञोऽस्यपत्नीमहाबलपराक्रमंपुत्रंजनयिष्यतीत्याकर्ण्यसराजाजानतामयापीतामि त्याह १५ गर्भश्चयुवनाश्वोदरेऽभवत् । क्रमेणचववृधेप्राप्तसमयश्चदक्षिणकुक्षिमवनीपतेर्निर्भिद्यनिश्चक्रामनचासौममार १६ जातोनामैषकंधा स्यतीतितेमुनयःप्रोचुः १७ अथागत्यदेवराडब्रवीन्मामयंधास्यतीतिततोमांधातानामतोऽभवत् । वल्केत्वस्यप्रदेशिनीदेवराजेनन्यस्तातांपपौतां

मतमित्यर्थः ११ विप्लुष्टादग्धा १२ मध्यरात्रेनिवृत्तायांसमाप्तायाम् १३ सुप्तांश्चनोत्थापयामास शयानंनप्रबोधयेदितिनिषेधात् १४ अत्रएतत्कलशस्थेजलेपीतेसति १५ मुनीनांप्रभावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवनममार १६ कंधास्यतिपास्यतिपातव्यस्तनाभावात् १७ यावदितिसाकल्येमेरोःसर्वतः सूर्यस्यउदयास्तमयनोपलक्षितंसर्वमांधातुः क्षेत्रंअधिष्ठेयदेशउच्यते १८ मांधातुः कन्यावंशंस्वल्प
त्वादत्याश्चर्यत्वाच्चप्रथमंवक्तुंसौभरिचारितमुच्यते बह्वृचइत्यादिना द्वादशाब्द रूपंकालंव्याप्य १९ ललितंक्रीडासुखम् २० निर्वेष्टुकामःउद्वोढुकामः २१ माप्रणयंविभांक्षीःप्रणयभंगंमाका

चामृतस्त्राविणीमासाद्यपीत्वाचाह्वैवव्यवर्द्धत । सतुमांधाताचक्रवर्तीसप्तद्वीपांमहींबुभुजे १८ भवतिचास्यश्लोकः । यावत्सूर्यउदेतिस्मयावच्चप्रति
तिष्ठति । सर्वंतद्यौवनाश्वस्यमांधातुःक्षेत्रमुच्यते १८ मांधाताचशशबिंदुदुहितरंबिंदुमतीमुपयेमे । पुरुकुत्समंबरीषंचमुचुकुंदंचतस्यामपत्यत्रयमु
त्पादयामासपंचाशच्चदुहितरस्तस्यनृपतेर्बभूवुः । बह्वृचश्चसौभरिर्नामऋषिरंतर्जलेद्वादशाब्दंकालमुवास १९ तत्रचांतर्जलेसंमदनामातिबहुप्रजे
तिप्रमाणोमीनाधिपतिरासीत् । तस्यपौत्रदौहित्राःपार्श्वतःपृष्ठतोवक्षःपुच्छशिरसांचोपरिभ्रमंतस्तेनसहाहर्निशमतिनिर्वृतारेमिरे सचापितत्स्पर्शोप
चीयमानहर्षप्रकर्षोबहुप्रकारंतस्यर्षेःपश्यतस्तैरात्मजपौत्रदौहित्रादिभिःसहानुदिवसंबहुप्रकारंरेमे । अथांतर्जलावस्थितःससौभरिरेकाग्रतासमा
धानमपहायानुदिनंतत्तस्यमत्स्यस्यात्मजपौत्रदौहित्रादिभिःसहातिरमणीयंललितमवेक्ष्याचिंतयत् २० अहोधन्यायमीदृशमप्यनभिमतंयोन्यंतर
मवाप्यैभिरात्मजपौत्रादिभिःसहरममाणोऽतीवास्माकंस्पृहामुत्पादयति वयमप्येवंपुत्रादिभिःसहरमयिष्यामः ।इत्येवमभिसमीक्ष्यसतस्मादंतर्ज
लान्निष्क्रम्यनिर्वेष्टुकामःकन्यार्थंमांधातारंराजानमगच्छत् २१ आगमनश्रवणसमनंतरंचोत्थायतेनराज्ञासम्यगर्घादिनापूजितःकृतासनपरिग्रहः
सौभरिरुवाच । निर्वेष्टुकामोऽस्मिनरेंद्रकन्यांप्रयच्छमेमाप्रणयंविभांक्षीः । नह्यर्थिनःकार्यवशाभ्युपेताःककुत्स्थगोत्रेविमुखांःप्रयांति २२
अन्येपिसंत्येवनृपाःपृथिव्यांक्ष्मापालयेषांतनयाःप्रसूताः । किंत्वर्थिनामर्थितदानदीक्षाकृतव्रतंश्लाघ्यमिदंकुलंते २३ शतार्धसंख्यास्तवसंतिकन्या
स्तासांममैकांनृपतेप्रयच्छ । यत्प्रार्थनाभंगभयाद्बिभेमितस्मादहंराजवरातिदुःखात् २४ । । पराशरउवाच । । इतिऋषिवचनमाकर्ण्य
सराजाजराजर्जरितदेहंतमृषिमालोक्यप्रत्याख्यानकातरस्तस्माच्चभगवतःशापतोबिभ्यत्किंचिदधोमुखश्चिरंदध्यौ । । ऋषिरुवाच । । नरेंद्र
कस्मात्समुपैषिचिंतामशक्यमुक्तंनमयात्रकिंचित् । यावश्यदेयातनयातथैवकृतार्थतानोयदिकिंनलब्धम् २५ । । पराशरउवाच । । अथत

र्षीः २२ अर्थितदानेयादीक्षासंकल्पःतत्रकृतंव्रतमर्थिवैमुख्याभावरूपंयेनकुलेनतत् २३ यच्चस्मात्प्रार्थनाभंगात्यद्भयंशंकातस्माद्यदतिदुःखंतस्माद्बिभेमितस्मात्त्वमेकांकन्यांप्रयच्छेत्यन्वयः
२४ यस्मैकस्मैचिदवश्यंदेयातयायदिनोस्माकंकृतार्थतास्यात् तर्हिकिंनलब्धंलाभाभावःकिंस्यात्किंत्वस्माकंलाभःस्यादेव यद्वातर्हिलयाकिंनलब्धंमन्मनोरथपूरणमेवतवमहान्लाभइत्यर्थः
नलब्धेतिपाठेसाकन्याकिंनलब्धालब्धैवेतिसिद्धवन्निर्देशः २५ प्रत्याख्यानोपायमेवदर्शयति वृद्धोयमित्यादि एतत्संचिंत्यअमुनाराज्ञाएवमभिहितमित्यन्वयः २६ तत्रप्रतीकारंविचिंत्यस्वगत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माह एवमिति २७ कन्यांतःपुरस्यरक्षकोवर्षवरःषंढः २८ तत्तदा कन्यायाश्छंदेइच्छायांपरिपंथानंप्रातिकूल्यंनाहंकरिष्यामिइतिप्रतिज्ञातम् इत्याकर्ण्यैतीतिशब्दःइत्यंगीकृतंइत्याकर्ण्येतिका

स्यशापभीतःसप्रश्रयमुवाचासौराजा । । राजोवाच । । भगवन्नस्मत्कुलस्थितिरियंयएवकन्यायाअभिरुचितोऽभिजनवान्वरस्तस्मैकन्याप्र
दीयते । भगवद्याश्चास्मन्मनोरथानामप्यगोचरवर्तिनीकथमप्येषासंजातातदेवमवस्थितेनविद्मःकिंकुर्मइतितन्मयाचिंत्यतइत्यभिहितेतेनभूभुजा
मुनिरचिंतयत् । अहोअयमन्योऽस्मत्प्रत्याख्यानोपायःवृद्धोऽयमनभिमतःस्त्रीणांकिमुतकन्यानामितिअमुनासंचिंत्यैवमभिहितम् २६ एवमस्तुत
थाकरिष्यामीतिसंचिंत्यमांधातारमुवाच २७ यद्येवंतदादिश्यतामस्माकंप्रवेशायकन्यांतःपुरवर्षवरः २८ यदिकन्यैवकाचिन्मामभिलषतितदाहंदा
रसंग्रहंकरिष्यामीतिअन्यथाचेत्तदलमस्माकमेतेनातीतकालारंभेणेत्युक्त्वाविरराम । ततश्चमांधात्रामुनिशापशंकितेनकन्यांतःपुरवर्षवरःसमाज्ञप्तः
कन्यांतःपुरंप्रविशन्नेवभगवानखिलसिद्धगंधर्वमनुष्येभ्योऽतिशयेनकमनीयंरूपमकरोत् । प्रवेश्यचतमृषिमंतःपुरवर्षवरस्ताःकन्याःप्राहभवतीनांजन
यितामहाराजःसमाज्ञापयति । स्वयमस्मान्ब्रह्मर्षिःकन्यार्थीसमभ्यागतोमयाचास्यप्रतिज्ञातंयद्यस्मत्कन्यकाकाचिद्भवंतंवरयतितत्कन्यायाश्छंदेना
हंपरिपंथानंकरिष्यामीत्याकर्ण्यसर्वाएवताःकन्याःसानुरागाःसमन्मथाःकरेणवइवेभयूथपतिंतमृषिमहमहमिकयावरयांबभूवुः २९ अलंभगिन्योह
मिमंवृणोमिवृतोमयानैवतवानुरूपः । ममैवभर्ताविधिनैवसृष्टःसृष्टाहमस्योपशमंप्रयाहि ३० वृतोमयायंप्रथमंमयायंगृहंविशन्नेवविहन्यसेकिं । म
यामयेतिक्षितिपात्मजानांतदर्थमत्यर्थकलिर्बभूव ३१ यदातुसर्वाभिरतीवहार्दाद्धृतःसकन्याभिरनिंद्यकीर्तिः । तदासकन्याधिकृतोनृपाययथावदाचष्ट
विनम्रमूर्तिः ३२ तदवगमात्किमेतत्कथयकिंकरोमीतिकिंमयाभिहितमित्याकुलमतिरनिच्छन्नपिकथमपिराजानुमेने । कृतानुरूपविवाहश्चमह
र्षिःसकलास्ताःकन्यकाःस्वमाश्रममनयत् । तत्रचाशेषशिल्पिशिल्पप्रणेतारंविधातारमिवान्यंविश्वकर्माणमाहूयसकलकन्यानामेकैकस्याःप्रोत्फुल्लपं
कजकूजत्कलहंसकारंडवादिविहंगमाभिरामजलाशयाःसोपवनाःसावकाशाःसाधुशय्यासनपरिच्छदाःप्रासादाःक्रियंतामित्यादिदेश३३ तच्चतथैवानु
ष्ठितमशेषशिल्पविशेषाचार्यस्त्वष्टादर्शितवान् ३४ ततश्चपरमर्षिणासौभारिणाज्ञप्तस्तेषुगृहेष्वनपायीनंदनामामहानिधिरासांचक्रे ३५ ततोनवरत
भक्ष्यभोज्यलेह्याद्युपभोगैरागतानुगतभृत्यादीनहर्निशमशेषगृहेषुताःक्षितीशदुहितरोभोजयामासुः ३६ एकदातुदुहितृस्नेहाकृष्टहृदयःसमहीपति

काक्षिगोलकवदुभयत्रयोज्यः एवमग्रेपि अहंपूर्वमितिसंरंभक्रियाअहमहमिकातया २९ तामेवाह अलंभगिन्यइतिद्वाभ्याम् सृष्टाहमस्यपत्नीतिशेषः उपशमंव्रजएतदर्थंयत्नंमाकुर्वित्यर्थः ३०
विहन्यसेविहंसिविघातंकिंकुरुषे ३१ कन्यानामेवंपत्यर्थंकलहोनुचितइतिविनम्रमूर्तिराचष्ट ३२ सोपवनाउपवनसहिताः परिच्छदाभोगोपकरणानि ३३ तच्चविशिष्टप्रासादरूपंकार्यंतथै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानुष्ठितंदर्शितवान् ३४ आसांचक्रे अवस्थितवान् ३५ आगताअतिथयः अनुगताभृत्यादयश्चतान् ३६ स्फुरंत्यौंशुमालायस्यास्ताम् ३७ प्रवृत्तौयःस्नेहस्तेनयानिनयनांबूनितान्येवगर्भेययो स्तादृशेनयनेयस्यसः प्रवृत्तस्नेहांबुगर्भनयनइतिपाठेप्रवृत्तस्नेहांबुगर्भेनयनेयस्येतिविग्रहः ३८ प्रोत्फुल्लानियानिपद्मानितदाकरभूताजलाशयाश्च भोगोभक्ष्यादेरुपभोगोनुलेपनादेः ३९

रतिदुःखितास्ताःसुखितावाइतिविचिंत्यतस्यमहर्षेराश्रममुपेत्यस्फुरदंशुमालांस्फटिकमयींप्रासादमालामतिरम्योपवनजलाशयांददर्श ३७ प्रविश्यचैकंप्रासादमात्मजांपरिष्वज्यकृतासनपरिग्रहःप्रवृत्तस्नेहनयनांबुगर्भनयनोऽब्रवीत् ३८ अप्यत्रवत्सेभवत्याःसुखमुतकिंचिदसुखमपितेमहर्षिः स्नेहवानुतसंस्मर्यतेस्मद्गृहवासस्योतिउक्तातत्तनयापितरमाह तातातिशयरमणीयःप्रासादोऽत्रातिमनोज्ञमुपवनमतिकलवाक्यविहगाभिरुताःप्रोत्फुल्लपद्माकरजलाशयाः । मनोनुकूलभक्षभोज्यानुलेपनवस्त्रभूषणादिभोगोपभोगोमृदूनिशयनानिसर्वसंपत्समवेतमेतद्गार्हस्थ्यंतथापिकेनवाजन्मभूमिर्नस्मर्यतेत्वत्प्रसादादिदमशेषशोभनम् ३९ किंत्वेतन्ममैकंदुःखकारणंयदस्मद्भर्तास्मद्गृहान्नानिष्क्रामति । ममैवकेवलमतिप्रीत्यासमीपवर्तिनान्यासांमद्भगिनीनामेवंचममसहोदरदुःखिताइत्येवमतिदुःखकारणमित्युक्तस्तयाद्वितीयंप्रासादमुपेत्यस्वतनयांपरिष्वज्योपविष्टस्तथैव पृष्टवान् । तयापितथैवसर्वमेतत्प्रासादाद्युपभोगसुखमाख्यातंममैवकेवलंपार्श्ववर्तिनास्मद्भगिनीनामित्येवमादिश्रुत्वासमस्तप्रासादेषुराजाप्रविवेशतनयांतनयांतथैवापृच्छत्ताभिश्चतथैवाभिहितःपरितोषविस्मयनिर्भरविवशहृदयोभगवंतंसौभरिमेकांतावस्थितमुपेत्यकृतपूजोब्रवीत् ४० दृष्टस्ते भगवन्सुमहानेषसिद्धिप्रभावोनैवंविधमन्यस्यकस्यचिदस्माभिर्विभूतिविलसितमुपलक्षितम् । कियदेतद्भगवंस्तपसःफलमित्यभिपूज्यतमृषिंतत्रैव तेनऋषिवर्येणसहकंचित्कालमभिमतोपभोगंबुभुजेस्वपुरंचजगाम ४१ कालेनमहतातस्यराजतनयासुतासुपुत्रशतंसार्धमभवत् । तदनुदिनानुरूढस्नेहःसतत्रातीवममताविष्टहृदयोभवत् ४२ अप्येतेस्मत्पुत्राःकलभाषिणःपद्मांगच्छेयुःअप्येतेयौवनिनोभवेयुरपिकृतदारानेतान्पश्येयमप्येषांपुत्राभवेयुः । अप्येतत्पुत्रान्पुत्रसमवेतान्पश्येयमेवमादिमनोरथमनुकालसंपत्तिवृत्तिमवेत्यैतत्संचिंतयामास ४३ अहोमेमोहस्यातिविस्तारः । मनोरथानांनसमाप्तिरस्तिवर्षायुतेनापितथाब्दलक्षैः । पूर्णेषुपूर्णेषुपुनर्नवानामुत्पत्तयःसंतिमनोरथानाम् । पद्मांगतायौवनिनश्चजातादारैश्चसंयोगमिताःप्रसूताः । दृष्टाःसुतास्तत्तनयप्रसूतिंद्रष्टुंपुनर्वाञ्छतिमेंतरात्मा ४४ द्रक्ष्यामितेषामपिचेत्प्रसूतिंमनोरथोमेभवितातोऽन्यः । पूर्णेपितत्राप्यपर

परितोषोदुहितृणांसुखेन योगैश्वर्येणचविस्मयःतयोर्निर्भरणेविवशंहृदयंयस्यसः कृतापूजायेनसः अब्रवीत्स्तुतिरूपांचपूजामकरोदित्यर्थः ४० कियदेतदितोप्यधिकंसंभाव्यतइत्यर्थः ४१ तत्रतेषुपुत्रेषु ४२ ममताकृष्टत्वमेवाहअप्येतेइति अनुदिनंकालस्यसंपत्तिराधिक्यंतस्यावृत्तिरनुवर्तनंयत्रमनोरथेतमवेत्यज्ञात्वाअचिंतयत् एतद्वक्ष्यमाणम् ४३ प्रसूताजातापत्याःतेषांसूताद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टाःतस्यपौत्रवर्गस्यतनयाप्रसूतिमपत्यजन्म ४४ महत्योविविधित्साइतिकृत्येच्छाः ४५ एकाशरीरजन्मदुःखंदुःखहेतुः ४६ एषाऋद्धिस्तस्यतपसोंतरायोविघ्नः मुषितोवंचितः ४७ आरूढो जातोयोगःसमाधिर्यस्यसः ४८ इदानींपरिग्रहग्राहगृहीतबुद्धिरपिजनस्यपरिजनस्यदुःखैर्दुःखीयथाहंनभवितातथाचरिष्ये ४९ अतिप्रमाणंमहतांमहीयांसं प्रमाणंज्ञापकमतिक्रम्यवर्तमानं स्वप्रकाशत्वादितिवा सितंबद्धंजीवरूपेण असितंचतद्विपरीतमीश्वररूपेण ५० अशेषौजसिसर्वशक्तौ अव्यक्तंप्रधानंविस्पष्टंमहदादितेतानुरुपाधिर्यस्यतस्मिन्भूयोऽभवायपुनर्जन्माभावा

स्यजन्मनिवार्यतेकेनमनोरथस्य । आमृत्युतोनैवमनोरथानामंतोस्तिविज्ञातामिदंमयाद्य। मनोरथासक्तिपरस्यचित्तंनजायतेवैपरमात्मसंगि। समेस माधिर्जलवासमेत्रमत्स्यस्यसंगात्सहसैवनष्टः। परिग्रहःसंगकृतोममायंपरिग्रहोत्थाश्चमहाविधित्साः ४५ दुःखंयदेवैकशरीरजन्मशतार्धसंख्यंतदिदं प्रसूतम् । परिग्रहेनक्षितिपात्मजानांसुतैरनेकैर्बहुलीकृतंतत् ४६ सुतात्मजैस्तत्तनयैश्चभूयोभूयश्चतेषांस्वपरिग्रहेण । विस्तारमेष्यत्यतिदुःखहेतुः परिग्रहोवैममतानिधानम् । चीर्णंतपोयत्तुजलाश्रयेणतस्यर्द्धिरेषोतपसोंऽतरायः । मत्स्यस्यसंगादभवच्चयोमेसुतादिरागोमुषितोऽस्मितेन ४७ निःसं गतामुक्तिपदंयतीनांसंगादशेषाःप्रभवंतिदोषाः । आरूढयोगोऽपिनिपात्यतेऽधःसंगेनयोगीकिमुताल्पसिद्धिः ४८ अहंचरिष्यामितथात्मनोऽर्थेपरि ग्रहग्राहगृहीतबुद्धिः । यथाहिभूयःपरिहीनदोषोजनस्यदुःखैर्भवितानदुःखी ४९ सर्वस्यधातारमचिंत्यरूपमणोरणीयांसमतिप्रमाणम् । सितासितं चेश्वरमीश्वराणामाराधयिष्येतपसैवविष्णुम्५०तस्मिन्नशेषौजसिसर्वरूपिण्यव्यक्तविस्पष्टतनावनंते । ममाचलंचित्तमपेतदोषंसदास्तुविष्णावभवा यभूयः ५१ समस्तभूतादमलादनंतात्सर्वेश्वरादन्यदनादिमध्यात् । यस्मान्नकिंचित्तमहंगुरूणांपरंगुरुंसंश्रयमेमिविष्णुम् ५२ । । इति श्रीविष्णुपुराणेचतुर्थेंशेद्वितीयोध्यायः २ । । पराशरउवाच । । इत्यात्मानमात्मनैवाभिधायासौसौभरिरपहायपुत्रगृहासनपरिबर्हा दिकमशेषमर्थजातंसकलभार्यासमवेतोवनंप्रविवेश । तत्राप्यनुदिनंवैखानसंनिष्पाद्यमशेषंक्रियाकलापंनिष्पाद्यक्षपितसकलपापःपरिपक्वमनोवृ त्तिरात्मन्यग्नीनारोप्यभिक्षुरभवत् १ भगवत्यासज्याखिलंकर्मकलापमजमविकारममरणादिधर्ममवापपरंपरवतामच्युतपदम् २ इत्येतन्मांधा तुर्दुहितृसंबंधादाख्यातम् ३ यश्चैतत्सौभरिचरितमनुस्मरतिपठतिशृणोत्यवधारयतितस्याष्टौजन्मन्यसन्मतिरसद्धर्मोवामनसोसन्मार्गाचरणमशे

य ५१ यस्मादन्यत्किंचिन्नास्तितमाश्रयंशरणमेमिगच्छामि ५२ इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांचतुर्थेंशेद्वितीयोध्यायः २ तृतीयेसौभरेःसिद्धिर्माधातृतनयान्वयः वर्ण्य तेसगरस्यापिचरितंरिपुघातिनः १ परिपक्वारागादिहीनामनोवृत्तिर्यस्यसः भिक्षुर्यतिरभवत् १ भगवत्यशेषकर्मकलापमासज्यसमर्प्याच्युतपदमवापेतिसंबंधः परवतांपरम् इंद्रियेभ्यःपराह्यर्था अर्थेभ्यश्चपरंमनः मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरित्युक्त्यापरवतामिंद्रियादीनांपरमांतरमित्यर्थः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तसौभरिचरितस्यासंगतिमपाकरोति इत्येतदिति ३ अतःअतःपरम् ४ अंबरीषस्ययुवनाश्वःप्रपितामहसनामायतोहरीताद्धारीताआंगिरसोद्विजाहरितगोत्रप्रवराः अथहारितानामा र्षेयआंगिरसांबरीषयुवानाश्वेतिप्रवरपाठात् ५ इदानीमांधातृतनयस्यवंशंवक्तुंकथांप्रस्तौति रसातलइत्यादिनावरंददुरित्यंतेन मुनेःकश्यपपत्न्याःपुत्राश्चित्रसेनाद्याः अपहृतानिप्रधानर त्नानिआधिपत्यंचयेषांतान्यक्रियंत ६ तैर्भगवान्स्तुतइतिशेषः अर्थात्तेषांस्तवश्रवणेनउन्मीलितेउद्भिन्नेपुंडरीकेइवनयनेयस्य जलशयनःक्षीराब्धिशायी ऐकपद्यपाठेजलशयनरूपाया

षहेयेषुवाममत्वंनभवतीत्यतोमांधातुःपुत्रसंततिरभिधीयते ४ अंबरीषस्यमांधातुस्तनयस्ययुवनाश्वःपुत्रोऽभूत् । तस्माद्धरितोयतोंगिरसोहारीताः ५ रसातलेचमौनेयानामगंधर्वाःषट्कोटिसंख्यास्तैरशेषाणिनागकुलान्यपहृतप्रधानरत्नाधिपत्यान्यक्रियंत ६ तैश्चगंधर्ववीर्यावधूतैरुरगेश्वरैर्भग वानशेषदेवेशस्तवश्रवणोन्मीलितोद्भिन्नपुंडरीकनयनोजलशयनोनिद्रावसानाद्विबुद्धःप्रणिपत्याभिहितोभगवन्नप्यस्माकमेतेभ्योभयमुपशममेष्यती त्याहभगवाननादिपुरुषःपुरुषोत्तमोयौवनाश्वस्यमांधातुःपुरुकुत्सनामापुत्रस्तमहमनुप्रविश्यैतानशेषदुष्टगंधर्वानुपशमंनयिष्यामि ७ इत्याकर्ण्यभ गवतेकृतप्रणामाःपुनर्नागलोकमागताःपन्नगपतयोनर्मदांचपुरुकुत्सानयनायचोदयामासुः ८ साचैनंरसातलेनीतवती रसातलगतश्चासौभगवत्ते जसाप्यायितात्मवीर्यःसकलगंधर्वाञ्जघान ९ पुनश्चस्वभवनमाजगामसकलपन्नगपतयश्चनर्मदायैवरंददुः । यस्तेनुस्मरणसमवेतंनामग्रहणं करिष्यतितस्यसर्वविषभयंनभविष्यतीति । अत्रच नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि । नमोस्तुनर्मदेतुभ्यंरक्षमांविषसर्पतः । इत्युच्चार्याहर्नि शमंधकारप्रवेशेवानसर्पैर्दश्यते १० नचापिकृतानुस्मरणभुजोविषमपिभुक्तमुपघातायभविष्यति ११ पुरुकुत्सायचभवतःसंततिविच्छेदोनभ विष्यतीत्युरगपतयोवरंददुः १२ पुरुकुत्सोनर्मदायांत्रसदस्युमजीजनत्त्रसदस्युसुतःसंभूतस्ततोनरण्यस्तंरावणोदिग्विजयेजघान । अनर ण्यस्यपृषदश्वःपृषदश्वस्यहर्यश्वःपुत्रोऽभवत्ततश्चवसुमनास्तस्यापित्रिधन्वात्रिधन्वनस्त्र्यरुणस्तस्मात्सत्यव्रतोयोऽसौत्रिशंकुसंज्ञामवापचंडालता मुपगतश्चद्वादशवार्षिक्यामनावृष्ट्यांविश्वामित्रकलत्रापत्यपोषणार्थंचांडालप्रतिग्रहपरिहरणायचजाह्नवीतीरन्यग्रोधेमृगमांसमनुदिनंबबंध १३ पारि

निद्रातस्याअवसानात् अवसानेइतिपाठः विबद्धःसन्अपिकिंगंधर्वेभ्योयद्भयंतदुपशममेष्यतीतिप्रणिपत्यतैरभिहितोभगवान्मांधातुःपुरुकुत्सःपुत्रस्तमहमनुप्रविश्यगंधर्वानुपशमंनयिष्या मीत्याहेत्यन्वयः ७ नर्मदांस्वभगिनींपुरुकुत्सस्यभार्यां नर्मदाभ्रातृभिर्दत्तापुरुकुत्सायचोरगैः तयारसातलंनीतोभुजगेंद्रप्रयुक्तयाइतिशुकोक्तेः ८ आप्यायितआत्मादेहोवीर्यंचबलंयस्यसः ९ अत्रचनामग्रहणप्रकारेपुनर्नर्मदेत्यादिअह्निनिशिवाउच्चार्यगर्भगृहेअन्यत्रवाअंधकारेप्रवेशेवापिसर्पैर्नदश्यते १० कृतानुस्मरणंनर्मदास्मरणपूर्वकंअन्नादिभुंजानस्य ११ पुरुकुत्स स्यसंततिंवक्ष्यन्तदुपयुक्तंवरदानमाह पुरुकुत्सायेति १२ अप्रोक्षितभक्षणगुरुधेनुवधपित्राज्ञालंघनरूपैस्त्रिभिःशंकुभिरिवद्वदिव्यथाहेतुभिस्त्रिशंकुसंज्ञामवाप तथाचहरिवंशे पितुश्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परितोषेणगुरोर्दोग्ध्रीवधेनच अप्रोक्षितोप्रयोगाच्चत्रिविधस्तेव्यतिक्रमः एवंत्रीण्यस्यशंकूनितानिदृष्ट्वामहायशाः त्रिशंकुरितिहोवाचत्रिशंकुस्तेनसंस्मृतइति पारिणीयमानविप्रकन्या
हरणात्कुद्धेनपित्राशप्तश्चांडालतामुपागतश्चविश्वामित्रकलत्रापत्यपोषणार्थंकलत्रादिपोषणनिमित्तंसाक्षाच्चांडालप्रतिग्रहपरिहारायचन्यग्रोधेवटवृक्षेबबंध १३ तच्छ्रुत्वापरितुष्टेनस्वर्ग

तुष्टेनचविश्वामित्रेणसशरीरःस्वर्गमारोपितः १४ त्रिशंकोर्हरिश्चंद्रस्तस्माद्रोहिताश्वस्ततश्चहरितोहारिताच्चंचुश्चंचोर्विजयवसुदेवौरुरुकोविजयाद्रुरु
कस्यचवृकस्ततोबाहुर्योऽसौहैहयतालजंघादिभिरवजितोंतर्वत्न्यामहिष्यासहवनंप्रविवेश १५ तस्याश्चसपत्न्यागर्भस्तंभनायगरोदत्तस्तेनास्यागर्भः
सप्तवर्षाणिजठरएवतस्थौसचबाहुर्वृद्धभावादौर्वाश्रमसमीपेममार १६ सातस्यभार्याचितांकृत्वातमारोप्यानुमरणकृतनिश्चयाभूत् । अथैनामती
तानागतवर्तमानकालवेदीभगवानौर्वःस्वस्मादाश्रमान्निर्यायअब्रवीदलमेतेनासद्ग्रहेणाखिलभूमंडलपतिवीर्यपराक्रमोनेकयज्ञकृदरातिपक्षक्षयकर्ता
तवोदरेचक्रवर्तीतिष्ठतिमैवंमैवंसाहासाध्यवसायिनीभवत्वित्युक्तेचसातस्मादनुमरणनिर्बंधाद्विरराम १७ तेनैवभगवतास्वाश्रममानीयतकतिपयादि
नांतरेचसहैवतेनगरेणातितेजस्वीबालकोजज्ञे । तस्यौर्वोजातकर्मादिकंक्रियांनिष्पाद्यसगरइतिनामचकार । कृतोपनयनंचैनमौर्वोवेदाञ्शास्त्राण्यशे
षाणिअस्त्रंचाग्नेयंभार्गवाख्यमध्यापयामास । उत्पन्नबुद्धिश्चमातरमपृच्छत् । अंबकथमत्रवयंकृतातस्ततोस्माकंकइत्येवमादिपृच्छतस्तन्माता
सर्वमवोचत । ततःपितृराज्यहरणामर्षितोहैहयतालजंघादिवधायप्रतिज्ञामकरोत् । प्रायशश्चहैहयाञ्जघानशकयवनकांबोजपारदपल्हवाहन्यमा
नास्तत्कुलगुरुंवसिष्ठंशरणंययुः १८ अथैतान्वसिष्ठोजीवन्मृतकान्कृत्वासगरमाह । वत्सवत्सालमेभिरतिजीवन्मृतकैरनुसृतैः १९ एतेचमयै
वत्वत्प्रतिज्ञापरिपालनायनिजधर्मद्विजसंगपरित्यागंकारिताः २० सतथेतितद्गुरुवचनमभिनंद्यतेषांवेषान्यत्वमकारयत् । यवनान्मुंडितशिरसो
ध्वंमुंडाञ्छकान्प्रलंबकेशान्पारदान्पल्हवांश्चश्मश्रुधरान्निःस्वाध्यायवषट्काारानेतानन्यांश्चक्षत्रियांश्चकारतेचनिजधर्मपरित्यागाद्ब्राह्मणैश्चपरित्य
क्ताम्लेच्छतांययुः । सगरोऽपिस्वमधिष्ठानमागम्यास्खलितचक्रःसप्तद्विपवतीमिमामुर्वींप्रशशास २१ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेतृती
योध्यायः ३ । । पराशरउवाच । । कश्यपदुहितासुमतिर्विदर्भराजतनयाचकेशिनीद्वेभार्येसगरस्यास्ताम् १ ताभ्यांवापत्यार्थमाराधितऔ

मारोपितस्त्रिशंकुः १४ अंतर्वत्न्यागर्भिण्या १५ गरोविषंवृद्धभावाज्जरायाहेतोः १६ चक्रवर्तीतिआशंसायांसिद्धवन्निर्देशःसाहसेऽविचारितकर्मणिअध्यवसायिनीनिश्चयवती १७
तत्कुलगुरुंसगरकुलगुरुम् १८ अनुसृतैरनुगतैः अनुमृतैरितिपाठेअनुपश्चाद्देहत्यागलक्षणमरणवद्भिरलंलयापुनर्हतैरलमित्यर्थः १९ जीवन्मृतत्वंविवृणोति एतेचेति यःस्वधर्मात्परिच
ष्टोविप्रैश्चैवबहिष्कृतः सजीवन्नेवलोकोऽस्मिन्मृतइत्यभिधीयतइतिस्मृतेः २० अस्खलितमप्रतिहतंचक्रंसैन्यमाज्ञावायस्यसः २१ इतिश्रीरत्नगर्भभट्टाचार्यकृतायां० चतुर्थेंशेतृतीयोध्यायः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिलःसागरान्षष्टिसहस्राणियथादहत् सौदासरक्षोभावश्चतथातुर्येनुवर्ण्यते कश्यपदुहितेति कश्यपस्यमरीचिपुत्रस्य विनतातनयायाइत्यग्रेवक्ष्यमाणत्वात् १ समाधिनाचित्तैकाग्र्येण २ अपवृत्तोदुर्वृत्तःअतीतबाल्योगतबालत्वः ३ तत्रबाल्येतीतेपितदेवदुष्टंचरितंयस्यतम् ४ अनुचक्रुरनुसृताः ५ अपध्वस्तानिराकृतायज्ञादयःसन्मार्गायस्मिन्तथाभूतेजगतिसति ६

र्वःपरमेणसमाधिनावरमदात् २ एकावंशधरमेकंपुत्रमपराषष्टिंपुत्रसहस्राणिजनायिष्यतीतियस्यायदाभिमतंतदिच्छयागृह्यतामित्युक्तेकेशिनीपुत्रमेकंसुमतिःपुत्रसहस्राणिषष्टिंवव्रेतथेतिचऋषिणाभिहितेऽल्पैरेवाहोभिरेकैकमसमंजसंनामवंशधरंपुत्रमसूतकेशिनीविनतातनयायास्तुसुमत्याःषष्टिःपुत्रसहस्राण्यभवन् । तस्मादसमंजसोंशुमान्नामकुमारोजज्ञे । सत्वसमंजाबाल्यादेवापवृत्तःपिताचास्यचिंतयदयमतीतबाल्योबुद्धिमान्भविष्यतीति ३ अथतत्रापिवयस्यतीतेतच्चरितमेवैनंपितातत्याज ४ तान्यपिषष्टिःकुमारसहस्राणिअसमंजसश्चरितमनुचक्रुः ५ ततश्चासमंजसश्चरितानुकारिभिःसागरैरपध्वस्तयज्ञादिसन्मार्गेजगतिदेवाःसकलविद्यामयसंसृष्टमशेषदोषैर्भगवतःपुरुषोत्तमस्यांशभूतंकपिलर्षिंप्रणम्यतदर्थमूचुः ६ भगवन्नेभिःसगरतनयैरसमंजसश्चरितमनुगम्यतेकथमेवमेभिरनुसरद्भिर्जगद्भविष्यतीत्यार्तजगत्परित्राणायचभगवतोत्रशरीरग्रहणमित्याकर्ण्यभगवानल्पैरेवदिनैरेतेविनंक्ष्यंतीत्युक्तवान् ७ तत्रांतरेचसगरोहयमेधमारेभेतत्रपुत्रैरधिष्ठितमस्याश्वंकोप्यपहृत्यभुवोविवरंप्रविवेश ८ ततश्चाश्वान्वेषणायतनयान्युयोजततस्तत्तनयाश्चातिनिर्बंधेनवसुधातलमेकैकोयोजनंयोजनमवनेश्चखान ९ पातालेचाश्वंपरिभ्रमंतमवनिपतिनंदनास्तेददृशुः । नातिदूरस्थितंचभगवंतमपघनेशरत्कालेर्कमिवतेजोभिरनवरतमूर्ध्वमधश्चाशेषदिशश्चोद्भासयमानंकपिलर्षिमपश्यन् १० ततश्चोद्यतायुधादुरात्मायमस्मदपकारीयज्ञविघातकर्ताहयहर्ताहन्यतांहन्यतामित्यधावन् । ततश्चतेनापिभगवताकिंचिदीषत्परिवर्तितलोचनेनावलोकिताःस्वशरीरसमुत्थेनाग्निनादह्यमानाविनेशुः ११ सगरोप्यनुगम्याश्वानुसारितत्पुत्रबलमशेषंपरमर्षिकपिलतेजसादग्धमंशुमंतमसमंजसःपुत्रमश्वानयनायचोदयामास १२ सतुसगरतनयखातमार्गेणकपिलमुपगम्यभक्तिनम्रस्तथातथातुष्टावयथैनंभगवानाहगच्छैनंपितामहायाश्वंप्रापयवरंवृणीष्वचपुत्रपौत्रश्चतेस्वर्गाद्गंगामानयिष्यतीति १३ अथांशुमानपिब्रह्मदंडहतानामस्मत्पितॄणांस्वर्गायअस्वर्गयोग्यानांस्वर्गप्राप्तिकरंवरमस्माकंभगवान्प्र

तदर्थंयज्ञादिलोपरूपमर्थम् भगवन्नित्यादिनाआर्तस्वरूपकथनम् ७ अधिष्ठितंसंरक्षितम् ८ ततोनंतरंतत्तनयाःसगरतनयाअतिनिर्बंधेनखुरचिह्नानुसारेणवसुधातलंविविशुरिति पूर्वोक्तस्यैवविशतेर्वचनाविपरिणामेनान्वयः तेषांचैकैकोयोजनमेकैकंयोजनंचखानगर्तंचकारेत्यर्थः चख्नुरितिपाठेतत्तनयाभुमस्तलंचखनुरित्येकवाक्यम् तत्रेयत्तामाह एकैकोर्थात्तेषामेवयोजनंयोजनंचखानेत्यन्यद्वाक्यम् अपघनेअपगतमेघे १० ईषत्परिवर्तितंतिर्यक्कृतंयदेकंलोचनंतेनार्किंचिद्विलोकिताःसंतोविनेशुः ११ कपिलेननिमित्तेनयत्स्वदेहजंतेजस्तेनदग्धम् १२ हेपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रतवपौत्रोगंगामानयिष्यतीति इडागमश्छांदसः १३ ब्रह्मदंडश्चअचिराद्विनंक्ष्यतीतिकपिलोक्तोब्रह्मशापः ब्राह्मणवधोयमोवातद्बलेनहतानांपितॄणांपितॄव्याणांस्वर्गीयस्वर्गभोगायतत्प्राप्तिहेतुंस्वर्गंवव्रे भुवमितितत्रार्थादुक्तम् १४ अभिसंधिपूर्वकंस्नानाद्युपभोगेउपकारकंस्वर्गप्रापकमितियत्तत्केवलंमाहात्म्यमितिनकिंतुअपेतप्राणस्यमृतस्यास्थ्यादियत्रोत्सृष्टंक्षिप्तंसंसृष्टंवाअनभिसंहितमपिशरिरीणंस्वर्गंनयतीतियत्तदपिमाहात्म्यमित्युक्तइत्यन्वयः अस्यगंगाजलस्यसंबंधिभूपतितमस्थ्यादीतिवा १५ सागरंसगरसुतैःखननाद्वर्धितमतएवात्मजप्रीत्यापुत्रत्वेकल्प

यच्छत्वित्याहतंचाहभगवानुक्तमेवैतन्मयापौत्रस्तेत्रिदिवाद्गंगांभुवमानयिष्यतीतितदंभसासंस्पृष्टेष्वस्थिभस्मस्वेतेस्वर्गमारोक्ष्यंति १४ भगवद्विष्णुपादांगुष्ठविनिर्गतजलस्यहितन्माहात्म्यंयन्नकेवलमभिसंधिपूर्वकंस्नानाद्युपभोगेषूपकारकमनाभिसंहितमप्यपेतप्राणस्यास्थिचर्मस्नायुकेशाद्युत्सृष्टंशरीरजंयद्भूपतितंसद्यःशरीरिणंस्वर्गंनयतीत्युक्तःप्रणम्यचभगवतेश्वमादायपितामहयज्ञमाजगाम १५ सगरोप्यश्वमादायतंयज्ञंसमापयामास सागरंचात्मजप्रीत्यापुत्रत्वेकल्पयामास १६ तस्याप्यंशुमतोदिलीपःपुत्रोऽभवद्दिलीपस्यापिभगीरथोयोसौगंगांस्वर्गादिहानीयभागीरथीसंज्ञांयकार १७ भगीरथाच्छ्रुतस्तस्यापिनाभागस्ततोंबरीषस्तस्मात्सिंधुद्वीपस्तस्याप्ययुताश्वस्तत्पुत्रऋतुपर्णोनलसहायोक्षहृदयज्ञोऽभूत् १८ ऋतुपर्णपुत्रःसर्वकामस्तत्तनयःसुदासःसुदासात्सौदासोमित्रसहनामा १९ योऽसावटव्यांमृगयागतोव्याघ्रद्वयमपश्यत् २० ताभ्यांचतद्वनमपमृगंकृतम् २१ सचैकंतयोर्बाणेनजघान२२ म्रियमाणश्चासावतिभीषणाकृतिःकरालवदनोराक्षसोऽभवत् २३ द्वितीयोपिप्रतिक्रियांतेकरिष्यामीत्युक्त्वातर्धानंजगाम २४ कालेनगच्छतासौदासोयज्ञमयजत् परिनिष्ठितयज्ञेचाचार्येवसिष्ठेनिष्क्रांतेतद्रक्षोवसिष्ठरूपमास्थाययज्ञावसानेममसमांसंभोजनंदेयंतत्संस्क्रियतांक्षणादिहागमिष्यामीत्युक्त्वानिष्क्रांतः २५ भूयश्चसूदवेषंकृत्वाराजाज्ञयामानुषंमांसंसंस्कृत्यराज्ञेन्यवेदयत् । असावपिहिरण्यपात्रास्थितंमांसमादायवसिष्ठागमनप्रतीक्षोऽभवत् आगतायचवसिष्ठायनिवेदितवान्२६ सचाचिंतयदहोराज्ञोऽस्यदौःशील्यंयेनैतन्मांसमास्माकंप्रयच्छतिकिमेतद्द्रव्यजातमितिध्यानपरोऽभूदपश्यच्चतन्मानुषंमांसंततश्चक्रोधकलुषीकृतचेताराजानंप्रतिशापमुत्ससर्जयस्मादभोज्यमस्मद्विधानांतपस्विनामवगछन्नपिभवान्मह्यंददातितस्मात्तवैवात्रलोलुपाबुद्धिर्भविष्यतीति २७ अनंतरंचतेनापिभगवतैवाभिहितोऽस्मीत्युक्तेकिंकिंमयैवाभिहि

यामासतस्मिन्पुत्रबुद्धिंकृतवानित्यर्थः १६ भागीरथीसंज्ञायस्यास्ताम् १७ नलस्यसहायःसखाक्षहृदयज्ञःद्यूतादौगणनानिपुणः १८ मित्रंवसिष्ठंप्रतिशप्तुंसमर्थोपिसहतेस्मतेनामित्रसहनामा १९ तस्यैवकल्माषपादसंज्ञांवक्तुंकथांप्रस्तौतियोसाविति २० अपमृगंनिर्मृगं २१ तयोर्व्याघ्रयोः २२ अतिकरालंदारुणंवदनंयस्यसः२३ प्रतिक्रियांवैरनिर्यातनम् २४ परिनिष्ठितःसमापितोयज्ञोयेनतस्मिन्निष्क्रांतेसति ३५ असावपिराजापि २६ अत्रनरमांसेलोलुपास स्पृहाबुद्धिःराक्षसोभविष्यसीत्यर्थः बुद्धिपदंविनालोलुपतेतिपाठेसस्पृहतेत्यर्थः २७ तेनराज्ञामां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभोजनार्थंभगवतैवाभिहितोस्मीत्युक्तःमयैवाभिहितमितिकिंकिमितिसंभ्रमात्समाधौतस्थौ २८ समाधिज्ञानेनावगतार्थःराक्षसकृतमेवैतन्नास्यापराधइतिज्ञातार्थः एतन्मांसभोजनंद्वादशाब्दं भवत्वितिनात्यंतंनयावज्जीवमित्यर्थः २९ भगवानस्मद्गुरुरित्यादिसोपपत्तिवचनेनमदयंत्याप्रसादितः तच्छायांबुवसिष्ठशापार्थंयत्तत्सस्यरक्षार्थंनोर्व्यांअंबुदरक्षार्थंनाकाशेचाविक्षेपकिंतुते

तमितिमुनिरपिसमाधौतस्थौ २८ समाधिविज्ञानावगतार्थश्चास्यानुग्रहंचकारनात्यंतिकमेतद्द्वादशाब्दंभवतोभोजनंभविष्यतीति २९ असावपितुप्र गृह्योदकांजलिंमुनिशापप्रदानायोद्यतोभगवानस्मद्गुरुर्नार्हस्येवंकुलदेवताभूतमाचार्यंशप्तुमितिस्वपत्न्यामदयंत्याप्रसादितःसस्यांबुदरक्षार्थंतच्छायां बुनोर्व्यांनाकाशेचिक्षेपतेनैवस्वपादौसिषेच ३० तेनक्रोधशृतेनांभसादग्धच्छायौतत्पादौकल्माषतामुपगतौ ३१ ततश्चसकल्माषपा दसंज्ञामवाप । वसिष्ठशापात्षष्ठेकालेराक्षसभावमुपेत्याटव्यांपर्यटन्अनेकशोमानुषानभक्षयत् ३२ एकदातुकंचिन्मुनिपुत्रमृतुकालेभार्यायासह संगतंददर्श ३३ तयोश्चतमतिभीषणंराक्षसमवलोक्यत्रासात्प्रधावितयोर्दंपत्योर्ब्राह्मणंजग्राह ३४ ततःसाब्राह्मणीबहुशस्तंयाचितवतीप्रसीदेक्ष्वाकु कुलतिलकभूतस्त्वंमहाराजमित्रसहोनराक्षसोनार्हसिस्त्रीधर्मसुखाभिज्ञोमय्यकृतार्थायामिमंमद्भर्तारमत्तुमित्येवंबहुप्रकारंतस्यांविलपंत्यांव्याघ्रःपशु मिवतंब्राह्मणमभक्षयत् ३५ ततश्चातिकोपसमन्विताब्राह्मणीतंराजानंयस्मादेवंमय्यतृप्तायांत्वयायंमत्पतिर्भक्षितस्तस्मात्त्वमप्यंतमबलोपभोगप्रवृ तौप्राप्स्यसीतिशशापाग्निंविवेशच३६ततस्तस्यद्वादशाब्दपर्ययेविमुक्तशापस्यस्त्रीविषयाभिलाषिणोमदयंतीस्मारयामास ३७ततश्चपरमसौख्यसंभो गंतत्याजवसिष्ठश्चापुत्रिणाराज्ञापुत्रार्थमभ्यर्थितोमदयंत्यांगर्भाधानंचकार । यदाचसप्तवर्षाण्यसौगर्भोजज्ञेततस्तंगर्भमश्मनासादेवीजघानपुत्रश्चा जायततस्यचाश्मकएवनामाभवत् । अश्मकस्यमूलकोनामपुत्रोभवत् । यौसौनिःक्षेत्रेस्मिन्क्ष्मातलेक्रियमाणेस्त्रीभिर्विवस्त्राभिःपरिवार्यरक्षितः । ततस्तंनारीकवचमुदाहरंति । मूलकाद्दशरथस्तस्मादिलिविलस्ततश्चविश्वसहस्तस्माच्चखट्वांगोदिलीपोयोसौदेवासुराणांसंग्रामेदेवताभिरभ्यर्थि तोऽसुरान्जघानस्वर्गेचकृतप्रियैर्देवैर्वरार्थंचोदितः । प्राहयद्यवश्यंवरोग्राह्यस्तन्ममायुःकथ्यतामिति । अनंतरंचतैरुक्तमेकमुहूर्तप्रमाणमायुरित्युक्तो स्खलितगतिनाविमानेनलघिमगुणोमर्त्यलोकमागम्येदमाह । यथानब्राह्मणेभ्यःसकाशादात्मापिमेप्रियतरोनचापिस्वधर्मोल्लंघनंमयाकदाचिदप्य

नांबुनास्वपादौसिषेच ३० क्रोधशृतेनक्रोधाग्नितप्तेन दग्धाच्छायाकांतिर्ययोः कल्माषतांकृष्णपांडुताम् ३१ राक्षसभावमुपेत्यातएवषष्ठेकालेतृतीयदिनांते ३२ इदानींतस्यैवराज्ञऔरस पुत्राभावंवक्तुंकथांप्रस्तौति एकदेत्यादिनास्त्रीसंभोगंतत्याजेत्यंतेन ३३ दंपत्योःप्रधावितयोःपलायितयोर्मध्येब्राह्मणंजग्राह ३४ स्त्रीधर्मोमैथुनंतत्सुखाभिज्ञः ३५ अंतंमृत्युम् ३६ द्वादशाब्दपर्ययेतंब्राह्मण्याःशापंपत्नीस्मारयामास ३७ अस्खलितगतिनादेवविमानेनलघिमगुणोतिशीघ्रगतिःसन्मर्त्यलोकमुपेत्यब्राह्मणप्रियत्वादिनाधर्मेणभगवत्प्राप्तिप्रार्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यनूसमाधौयततेस्मेत्याह यथेत्यादिनावासुदेवाख्येयुयोजेत्यंतेन प्राप्नुयाम् ३८ मुहूर्तंजीवितंप्राप्यज्ञात्वाबुद्ध्यावासुदेवःसर्वमितिज्ञानेनयद्दानंसमर्पणंखंडनमितिवाप्रविलापनमितियावत् तेनाभिसंहिताविषयीकृतास्त्रयोलोकाविष्णौप्रविलापिताइत्यर्थः ३९ अयासीत्प्राप्तः ४० ताटिकाद्युपाख्यानंचरामायणेप्रसिद्धम् ४१ वीर्यंपराक्रमएवशुल्कंमूल्यंयस्यास्तांसीतांलेभे ४२

नुष्ठितंनचसकलदेवमानुषपशुवृक्षादिकेप्यच्युतव्यतिरेकवतीदृष्टिर्ममाभूत् । तथातमेवदेवंमुनिजनानुस्मृतंभगवंतंतमस्खलितगतिःप्रापयेयमि त्यशेषेदेवगुरौभगवत्यनिर्देश्यवपुषिसत्तामात्रात्मन्यात्मानंपरमात्मनिवासुदेवाख्येयुयोज ३८ तत्रैवलयमवापतत्रापिश्रूयते श्लोकोगीतःसप्तर्षिभिः पुरा । खट्वांगेनसमोनान्यःकश्चिदुर्व्यांभविष्यति । येनस्वर्गादिहागत्यमुहूर्तंप्राप्यजीवितम् । त्रयोभिसंहितालोकाबुद्ध्यादानेनचैवहि ३९ खट्वां गतोदीर्घबाहुःपुत्रोभवत् । ततोरघुस्तस्मादप्यजः । अजाद्दशरथोऽस्यापिश्रीभगवानब्जनाभोजगत्स्थित्यर्थमात्मांशेनरामलक्ष्मणभरतशत्रुघ्नरूपि णाचतुर्धापुत्रत्वमयासीत् ४० रामोपिबालएवविश्वामित्रयज्ञरक्षणायगच्छन्ताटिकांजघान ४१ यज्ञेचमारीचमिषुवाताहतंदूरंचिक्षेपसुबाहुप्रमुखांश्च क्षयमनयत् । संदर्शनमात्रेणैवाहल्यामपापांचकार । जनकगृहेचमाहेश्वरंचापमनायासेनैवबभंज । सीतांचायोनिजांजनकराजतनयांवीर्यशुल्कां लेभे ४२ सकलक्षत्रक्षयकारिणमशेषहैहयकुलकेतुभूतंचपरशुराममपास्तवीर्यबलावलेपंचकार ४३ पितृवचनाच्चागणितराज्याभिलाषोभ्रातृभार्या समन्वितोवनंविवेश ४४ विराधखरदूषणादीन्कबंधवालिनौचजघानबद्धाचांभोनिधिमशेषराक्षसकुलक्षयंकृत्वादशाननापहृतांतद्वधापहृतकलंका मप्यनलप्रवेशशुद्धामशेषदेवेशसंस्तूयमानांसीतांजनकराजतनयामयोध्यामानिन्ये ४५ भरतोपिगंधर्वविषयसाधनायोग्रगंधर्वकोटीस्तिस्रोजघानश त्रुघ्नेनाप्यमितबलपराक्रमोमधुपुत्रोलवणोनामराक्षसेश्वरोनिहतोमथुराचनिवेशिताइत्येवमाद्यतुलबलपराक्रमविक्रमणैरतिदुष्टनिबर्हणैरशेषस्यास्य जगतोनिष्पादितस्थितयोरामलक्ष्मणभरतशत्रुघ्नाःपुनर्दिवमारूढाः । येपितेषुभगवदंशेष्वनुरागिणःकोसलनगरजनपदास्तेपितन्मनसस्तत्सलोक तामवापुः ४६ रामस्यतुकुशलवौपुत्रौलक्ष्मणस्यांगदचंद्रकेतूतक्षपुष्करौभरतस्यसुबाहुशूरसेनौचशत्रुघ्नस्य । कुशस्याप्यतिथिरतिथेरपिनिषेधपु त्रोभवत् । निषेधस्यापिनलस्तस्यापिनभोनभसःपुंडरीकस्तत्तनयःक्षेमधन्वातस्यचदेवानीकः । तस्याप्यहीनगुस्ततोरुरुस्तस्यचपारियात्रःपारि यात्राद्दलोदलाच्छलस्तस्याप्युक्थउक्थाद्वज्रनाभस्तस्माच्छंखनाभस्ततोव्युत्थिताश्वस्ततश्चविश्वसहोजज्ञेहिरण्यनाभस्ततोमहायोगीश्वरोजैमिनि

केतुभूतंविनाशकम् वीर्यप्रभावोवलंशक्तिःअपास्तोवीर्यबलनिमित्तोवलेपोमदोयस्यतम् ४३ अगणितोराज्याभिलाषोभिलष्यमाणंराज्यंयेन भ्रातृभार्याभ्यांलक्ष्मणसीताभ्यांसमन्वितः ४४ अपहतकलंकामपिअपहतखेदाम् रामचरितसहभावेनलक्ष्मणचरितमप्युक्तमेवेतिपृथक्नोक्तम् ४५ अतुलबलपराक्रमैर्यानिविक्रमणानिचरितानितैः ४६ प्रसुश्रुतस्तस्यमरोः ४७ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीरत्नगर्भभट्टाचार्यकृतायांचतुर्थेंशेचतुर्थोध्यायः ४ । वसिष्ठस्यनिमेःशापाद्देहत्यागःपरस्परम् राज्ञस्तस्यैववंशोपिपंचमेनुप्रपंच्यते निमिरेवविदेहइतिसंज्ञांवक्तुंकथांप्रस्तौति इक्ष्वाकुतनयोयोसावित्यादिनानिमेषंचक्रुरित्यंतेन १ तदनंतरमागतस्तवापिऋत्विक्भविष्यामितावत्प्रतिपाल्यतांप्रतीक्ष्यतामितिवसिष्ठेनोक्तेनिमिनाचवसिष्ठभयाद्धर्मावलंबानौचित्याच्चवसिष्ठः किमपिनोक्तः २ मौनंसंमतिलक्षणंमितियुक्त्यैवसमन्विच्छितमनुमतमितिमत्वातत्रगत्वायागमकरोत् ३ मामप्रत्याख्यायेतिपूर्वमदुत्तरेप्रत्युत्तरमदत्वैव यद्वा इंद्रयागान्मामनिवार्यैवएतत्कर्मा

शिष्योयतोयाज्ञवल्क्योयोगमवापाहिरण्यनाभस्यपुत्रःपुष्पस्तस्माद्ध्रुवसंधिस्ततःसुदर्शनस्तस्मादग्निवर्णस्ततश्चशीघ्रस्ततोपिमरुःपुत्रोभूत्योसौयोगमास्थायाद्यापिकलापग्राममाश्रितस्तिष्ठति । आगामियुगेसूर्यवंशक्षत्रप्रवर्तयिताभविष्यतीतिप्रसुश्रुतस्तस्यात्मजस्तस्यापिसुगविस्ततश्चामर्षस्तस्यमहस्वान्ततोविश्रुतवान्ततोबृहद्बलोयोर्जुनतनयेनाभिमन्युनाभारतेयुद्धेक्षयमनीयतएतेहीक्ष्वाकुभूपालाःप्राधान्येनमयोदिताः । एतेषांचरितंशृण्वन्सर्वपापैःप्रमुच्यते ४७ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेचतुर्थोध्यायः ४ । । पराशरउवाच । । इक्ष्वाकुतनयोयोसौनिमिर्नामसतुसहस्रसंवत्सरंसत्रमारेभेवसिष्ठंचहोतारंवरयामास १ तमाहवसिष्ठोहमिंद्रेणपंचवर्षशतंयागार्थंप्रथमतरंवृतस्तदनंतरंप्रतिपाल्यतामागतस्तवापिऋत्विक्भविष्यामीत्युक्तेसपृथिवीपतिनानकिंचिदुक्तः २ वसिष्ठोप्यनेनसमन्विच्छितमित्यमरपतेर्यागमकरोत् ३ सोपितत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत् । समाप्तेचामरपतेर्यागेत्वरावान्वसिष्ठोनिमेःकर्मकरिष्यामीत्याजगामतत्कर्मकर्तृत्वंचतद्गौतमस्यदृष्ट्वाअथस्वपतेतस्मैराज्ञेमामप्रत्याख्यायैतदनेनगौतमायकर्मांतरमर्पितंयस्मात्तस्मादयंविदेहोभविष्यतीतिशापंददौ ४ प्रतिबुद्धश्चासाववनीपतिरपिप्राहयस्मान्मामसंभाष्याजानतएवशयानस्यशापोत्सर्गमसौदुष्टगुरुश्चकारतस्मात्तस्यापिदेहःपतितोभविष्यतीतिप्रतिशापंदत्त्वादेहमत्यजत् ५ तच्छापाच्चमित्रावरुणयोस्तेजसिवसिष्ठतेजःप्रविष्टमुर्वशीदर्शनादुद्भूतवीर्यप्रपातयोःसकाशाद्वसिष्ठोदेहमपरंलेभे ६ निमेरपितच्छरीरमतिमनोहरतैलगंधादिभिरुपसंस्क्रियमाणंनैवक्लेदादिकंदोषमवापसद्योमृतमिवतस्थौ ७ यज्ञसमाप्तौचभागग्रहणायागतान्देवानृत्विजऊचुः यजमानायवरोदीयतामितिदेवैश्छंदितोनिमिराह ८ भगवंतोखिलसंसारदुःखसंघातस्यछेत्तारोनह्येतावज्जगत्यन्यद्दुःखमस्तियच्छरीरात्मनोर्वियोगेभवतितदहमिच्छामिसकललोकलोचनेषुवस्तुंनपुनः

तरंनिमेर्मदनुष्ठितपूर्वपूर्वकर्मवत्एतत्कर्मांतरंमदनुष्ठेयंगौतमायसमर्पितम् कर्मणिअंतरमन्यस्यावकाशोदत्तइतिवार्थः शीघ्रदेहपातभयादिदंकर्मारब्धमित्यतोविदेहएवभवत्वितिशापंददौ ४ मामसंभाष्येतिमांविनैवगौतमद्वाराकिमितिकर्मकृतमितिमांप्रत्यनुक्त्वेत्यर्थः ५ तेजसिवीर्ये तेजोलिंगशरीरम् चेतइतिपाठेसएवार्थः पश्चादुद्भूतोवीर्यप्रपातोवीर्यच्युतिर्ययोस्तादृशयोः ६ मृतस्यदेहधारणंयज्ञसमाप्तिंवंशप्रवृत्तिंचोद्दिश्येतिवक्तुंदेहधारणप्रकारमाह निमेरिति ७ छंदितःवरार्थमिच्छांकारितः ८ आसामेवस्थितिंकारितः ९ तत्पुत्रस्यसंज्ञात्रयंतद्वंशप्रवृत्तिंचवक्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माह अपुत्रस्येति १० जननान्मृतदेहेजनमात् ११ संतिष्ठतेसमाप्तिंयातीत्यर्थः १२ आत्मविद्याश्रयिणआत्मविदः १३ इतिश्रीविष्णुपुराणेचतुर्थांशेपंचमोध्यायः ५ सूर्यवंशप्रसंगेन सोमवंशस्तदन्वये ऐलोपिवर्ण्यतेषष्ठेत्रेताग्निर्येनानिर्मितः १ २ ३ अतिशयितंबलंसामर्थ्यं पराक्रमःशौर्यं द्युतिःकांतिः शीलमाचारः चेष्टादानभोगादिलीला अतिबलादिभिर्युक्तैः गुणा

शरीरग्रहणंकर्तुमित्युक्तेदेवैरसावशेषभूतानांनेत्रेष्वासांकारितः ९ ततोभूतान्युन्मेषनिमेषंचक्रुःअपुत्रस्यतस्यभूभुजःशरीरमराजकभीरवस्तेमुन योऽरण्यांममंथुः १० तत्रकुमारोजज्ञेजननाज्जनकसंज्ञांचासाववाप ११ अभूद्विदेहोऽस्यपितेतिसवैदेहोमथनान्मिथिरभूत् । तस्योदारवसुः पुत्रोऽभूत् । ततोनंदिवर्धनस्तस्मात्स्वकेतुस्तस्यापिदेवरातस्ततश्चबृहदुक्थस्तस्यमहावीर्यस्तस्यापिसत्यधृतिस्ततश्चधृष्टकेतुरजायतधृष्टकेतोर्ह र्यश्वस्तस्यचमरुर्मरोःप्रतिबन्धकस्तस्मात्कृतरथस्तस्मात्कृतिस्तस्यविबुधस्तस्यापिमहाधृतिस्तस्यचकृतिरातस्ततोमहारोमाततःसुवर्णरोमातस्यापि ह्रस्वरोमाततःसीरध्वजोऽभूत्तस्यपुत्रार्थंयजनभुवंकृषतःसीरेसीतादुहितासमुत्पन्नासीत्सीरध्वजस्यभ्रातासंकाश्याधिपतिःकुशध्वजनामासीरध्वजस्या पत्यंभानुमान्भानुमतःशतद्युम्नस्तस्यशुचिस्तस्मादूर्जवहोनामपुत्रोजज्ञे । तस्यापिसत्यध्वजस्ततःकुणिःकुणेरंजनस्तत्पुत्रःक्रतुजित्ततोरिष्टनेमिस्त स्माच्छ्रुतायुस्ततःसुपार्श्वस्तस्मात्संजयस्ततःक्षेमारिस्तस्मादनेनास्तस्मान्मीनरथस्तस्यसत्यरथस्तस्यसात्यरथिःसात्यरथेरुपगुस्तस्मात्श्रुतस्त स्माच्छाश्वतस्तस्मात्सुधन्वातस्यापिसुभासस्ततःसुश्रुतस्तस्माज्जयोजयपुत्रोविजयस्तस्यचऋतोनामऋतात्सुनयस्ततोवीतहव्यस्तस्माद्धृतिर्धृतेर्ब हुलाश्वस्तस्यपुत्रःकृतिःकृतौसंतिष्ठतेयंजनकवंशः १२ इत्येतेमैथिलाःप्राचुर्येणतेषामात्मविद्याश्रयिणोभूपालाभविष्यंतीति १३ । इतिश्रीवि ष्णुपुराणेचतुर्थांशेपंचमोध्यायः ५ । । मैत्रेयउवाच । । सूर्यस्यभगवन्वंशःकथितोभवतामम । सोमस्यवंशेत्वखिलाञ्श्रोतुमिच्छामिपार्थिवा न् १ कीर्त्यतेस्थिरकीर्तीनांयेषामद्यापिसंततिः । प्रसादसुमुखस्तन्मेब्रह्मन्नाख्यातुमर्हसि २ । । पराशरउवाच । । श्रूयतांमुनिशार्दूलवंशः प्रथिततेजसः । सोमस्यानुक्रमात्ख्यातायत्रोर्वीपतयोऽभवन् ३ अयंहिवंशोऽतिबलपराक्रमद्युतिशीलचेष्टावद्भिरतिगुणान्वितैर्नहुषययातिकार्त वीर्यार्जुनादिभिर्भूपालैरलंकृतः १ तमहंकथयामिश्रूयतामखिलजगत्स्रष्टुर्भगवन्नारायणनाभिसरोजिनीसमुद्भवाज्जयोनेर्ब्रह्मणःपुत्रोऽत्रिरत्रेःसो मः २ तंचभगवानज्जयोनिरशेषौषधिद्विजनक्षत्राणामाधिपत्येऽभ्यषेचयत् ३ सचराजसूयमकरोत् । तत्प्रसादादत्युत्कृष्टाधिपत्याधिष्ठातृ

गांभीर्यादयः अतिगुणान्वितैश्चालंकृतः १ भगवन्नारायणस्यनाभिसरोजिनीनाभिह्रदस्तत्रजातंयदब्जंतदेवयोनिःकारणंयस्यतस्यजगत्स्रष्टुर्ब्रह्मणःपुत्रइत्यन्वयः २ सोमात्तारायांबुधः पुत्रइतिसोपाख्यानमाह तंचभगवानित्यादिनालज्जाजडमाहसोमस्येत्यंतेन ३ तत्प्रभावादत्युत्कृष्टानामोषध्यादीनामाधिपत्यात्सर्वाधिष्ठातृत्वाच्चएनंसोमंमदआविवेश ४ मदएवावलेपोदो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पस्तस्मात् ५ पार्ष्णिग्राहःसहायः ६ मेसकाशात्समीपतउपलब्धाविद्यायेनसः ७ अतोयत्रबृहस्पतेरपिसकलदेवसैन्यंसहायोयस्यसशक्रोभवत्सहायइतिशेषः ८ तारकामयइतिनामानि
र्वचनंतारकानिमित्तइति ९ देवासुराहवक्षोभेणक्षुब्धंसोद्वेगंहृदयंयस्यतज्जगत् १० अंतःप्रसवांगर्भिणीम् ११ पतिव्रतापत्युश्छंदानुसारिणी सोमेनबलादाहितंगर्भमुत्ससर्ज्ज इषिकास्तं

त्वाच्चैनंमदआविवेश ४ मदावलेपाच्चासौसकलदेवगुरोर्बृहस्पतेस्तारानामपत्नींजहार ५ बहुशस्तुबृहस्पतिचोदितेनब्रह्मणाचोद्यमानःसकल
देवर्षिभिर्याच्यमानोऽपिनमुमोच तस्यहिबृहस्पतिद्वेषादुशनापार्ष्णिग्राहोऽभवत् ६ अंगिरसश्चसकाशोपलब्धविद्योभगवानिंद्रोबृहस्पतेःसाहा
य्यमकरोत् ७ यतश्चोशनाततोहिजंभकुजंभाद्याःसमस्ताएवदैत्यदानवनिकायामहांतमुद्यमंचक्रुः । बृहस्पतेरपिसकलदेवसैन्यसहायःशक्रोऽभवत्
८ एवंचतयोरतीवोग्रःसंग्रामस्तारकानिमित्तस्तारकामयोनामाभवत् । ततश्चसमस्तशस्त्राण्यसुरेषुइंद्रपुरोगमादेवादेवेषुचाशेषदानवामुमुचुः ९ एवं
चदेवासुराहवक्षोभक्षुब्धहृदयंजगद्ब्रह्माणंशरणंजगाम १० ततश्चभगवानप्युशनसंशंकरमसुरान्देवांश्चनिवार्यबृहस्पतेस्तारामदात् । तांचांतःप्रस
वामवलोक्यबृहस्पतिराह ११ नैषममक्षेत्रेभवत्यान्यसुतोधार्यस्तमुत्सृजैनमलमतिधाष्टर्येनैतिसाचतंनैवमुक्तापतिव्रताभर्तृवचनात्तमीषिकास्तंबेग
र्भमुत्ससर्ज १२ सचोत्सृष्टमात्रएवातितेजसादेवानांतेजांस्याचिक्षेप १३ बृहस्पतिमिंदुंचतस्यकुमारस्यातिचारुतयासाभिलाषांदृष्ट्वादेवाःसमुत्प
न्नसंदेहास्तारांप्रपच्छुःसत्यंकथयास्माकमतिसुभगेकस्यायमात्मजःसोमस्याथबृहस्पतेरित्युक्तापिसातारांक्रियानकिंचिदुवाच १४ बहुशोप्यभि
हितायदासौदेवेभ्योनाचचक्षेततश्चसकुमारस्तांशप्तुमुद्यतःप्राहचदुष्टेकस्मान्ममतातंनाख्यासिअद्यैवतेऽलीकलज्जावत्याःशास्तिमयमहंकरोमियथानै
वमन्याप्यतिमंथरवचनाभवतीति १५ अथभगवान्पितामहस्तंकुमारंसन्निवार्यस्वयमपृच्छत्तारांकथयवत्सेकस्यायमात्मजःसोमस्याथबृहस्पते
रित्युक्तालज्जाजडमाहसोमस्येति १६ ततःस्फुरदुच्छ्वसितामलकपोलकांतिर्भगवानुडुपतिस्तमालिंग्यकुमारंसाधुसाधुवत्सप्राज्ञोऽसीतिबुधइतिनामच
क्रे १७ सचाख्यातमेवैतद्यथेलायांपुरूरवसमुत्पादयामास १८ पुरूरवास्त्वतिदानशीलोऽतितेजस्वीयंसत्यवादिनमतिरूपस्विनंमित्रावरुणशापा
न्मानुषेलोकेमयावस्तव्यमितिकृतमतिरुर्वशीददर्श १९ दृष्टमात्रेचयस्मिन्नपहायमानमशेषस्वर्गसुखाभिलाषमपास्यतन्मनाभूत्वातमेवचोपतस्थे

वेमुंजगुच्छे १२ आचिक्षेपअभिभूतवान् १३ माताभस्त्रापितुःपुत्रइत्यादिवचनात्पितुरेवपुत्रःमातैवपुत्रजनकंचेत्यतोस्यकःपितेतितारामेवपप्रच्छुरिति १४ मंथरवचनाअतिविलंबितवाक्
१५ आत्मजऔरसः १६ स्फुरंतीउच्छ्वसितयोर्विकसितयोर्गंडयोःकांतिर्यस्यसः १७ बुधइलायांयथापुरूरवसंजनयामासतथाप्रागेवोक्तम् १८सपुरूरवाउर्वश्यांषट्पुत्राञ्जनयामासेतिवक्तुंकथा
माह पुरूरवास्त्वित्यादिनायावत्समाप्ति अतिरूपंस्वंधनंयस्यास्तितंउर्वशीददर्शेत्यन्वयः१९ मानंगर्वमपहायउपतस्थेअभजत् २० कांतिःशोभा सौकुमार्यंमार्दवम् लावण्यमंगसुंदरत्वम् वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लासःअंगचेष्टासुतात्कालिकोविशेषः अतिशयिताःस्वस्मिन्नधिकीकृताःसकललोकस्त्रीणांकांत्यादयोगुणाययाताम् २१ एवमुभयंतन्मिथुनरूपंतन्मनस्कंअन्योन्यासक्तचित्तमभूत् तदेवाह नास्तिअन्यस्मिन्दृष्टिर्यस्य परित्यक्तंसमस्तमन्यत्प्रयोजनंयेनतत् २२ प्रागल्भ्यादसंकोचात् २३ लज्जयाखंडितंव्यक्ताव्यक्तंशिथिलंवायथास्यादेवंप्राहलज्जाखंडितमितिपाठेतुस्पष्टार्थः २४ शापावसानेयदिगंधर्वामांनेतुमेष्यंतितदासमयभंगापराधमारोप्यगमिष्यामीतिसमयंकरोति भवत्वेवमिति २५ पुरूरवसाआख्याहिसमयमितिपृष्टाउक्तासतीसमयमब्रवीत् २६

२० सोऽपिचतामतिशयितसकललोकस्त्रीकांतिसौकुमार्यलावण्यातिविलासहासादिगुणामवलोक्यतदायत्तचित्तवृत्तिर्बभूव २१ उभयमपितन्मनस्कमनन्यदृष्टिपरित्यक्तसमस्तान्यप्रयोजनमासीत् २२ राजातुप्रागल्भ्यात्तामाह २३ सुभ्रुत्वामहमतिकामोऽस्मिप्रसीदानुरागमुद्वहेत्युक्ता लज्जावखंडितमुखमुर्वशीप्राह २४ भवत्वेवंयदिमेसमयपरिपालनंभवान्करोति २५ आख्याहिमेसमयमित्यथपृष्टापुनरब्रवीत् २६ शयनसमीपेममोरणकद्वयंपुत्रभूतंनापनेयम् २७ भवांश्चमयानग्नोनद्रष्टव्योघृतमात्रंचममाहारइत्येवमेवेतिभूपतिराहतयाचसहावनिपतिरलकायांचैत्ररथादिवनेष्वमलपद्मखंडेषुसरःस्वभिरममाणएकषष्टिंवर्षसहस्राण्यनुदिनप्रवृद्धमानप्रमोदोऽनयत् । उर्वशीचतदुपभोगादनुदिनप्रवृद्धमानानुरागा अमरलोकवासेऽपिनस्पृहांचकार । विनाचोर्वश्यासुरलोकोप्सरसांसिद्धगंधर्वाणांचनातिरमणीयोऽभूत् २८ ततश्चोर्वशीपुरूरवसोःसमयविद्विश्वावसुर्गंधर्वसमवेतोनिशिशयनाभ्यासादेकमुरणकंजहार २९ तस्यचाकाशेनीयमानस्योर्वशीशब्दमशृणोत् । आहचममानाथायाःपुत्रःकेनाप्यपह्रियतेकंशरणमुपायामीत्याकर्ण्यराजानग्नंमांदेवीद्रक्ष्यतीतिनययौअथान्यमप्युरणकमादायगंधर्वाययुस्तस्याप्यपह्रियमाणस्यशब्दमाकर्ण्याकाशेपुनरपिअनाथास्म्यहमभर्तृकाकुपुरुषाश्रयेत्यार्तवाणीबभूव । राजाप्यमर्षवशादंधकारमेतदितिखड्गमादायदुष्टहतोऽसीतिव्याहरन्नभ्यधावत्तावच्चगंधर्वैरतीवोज्ज्वलाविद्युज्जनितातत्प्रभयाचोर्वशीराजानमपगतांबरंदृष्ट्वाऽपवृत्तसमयातत्क्षणादेवापक्रांता ३० परित्यज्यतावुरणकौगंधर्वाःसुरलोकमुपगताःराजापिचतौमेषावादायहृष्टमनाःस्वशयनमायातोनोर्वशींददर्श । तांचापश्यन्नपगतांबरएवोन्मत्तरूपोबभ्राम ३१ कुरुक्षेत्रेचांभोजसरस्यन्याभिश्चतुर्भिरप्सरोभिःसमवेतामुर्वशींददर्श । ततश्चोन्मत्तरूपोजायेहतिष्ठमनसिघोरेतिष्ठवचसीत्यनेकप्रकारंसूक्तमवोचत् ३२ आहचोर्वशीमहाराजअलमने

उरणकोमेषः २७ गंधर्वैःसमयभंगेनउर्वश्यानिर्गमंदर्शयन्नाह विनाचोर्वश्येत्यादिनातत्क्षणादेवापक्रांतेत्यंतेन २८ शयनाभ्यासाच्छयननिकटात् २९ गमनेहेतुरपवृत्तोऽपगतःसमयःस्थितिहेतुर्यस्याःसा ३० ३१ पुनरुर्वशीसंगमादायुःप्रभृतिपुत्रोत्पत्तिंतल्लोकप्राप्त्युपायाग्निंचवक्तुमाह कुरुक्षेत्रइत्यादिनायावदध्यायसमाप्ति अंभोजयुक्तेसरसि हहेजायेतिष्ठमनसिविषयेघोरेनिर्दयेवचसिवाङ्मिश्रणार्थंतिष्ठ यद्वावचसितिष्ठमद्वचनंकुर्वित्यर्थः इत्याद्यनेकप्रकारंसूक्तमितिपदंवेदस्थसूक्तत्वसूचनार्थम् असूक्तमितिपाठेउन्मत्तप्रलापितमित्यर्थः ३२ पुरुषोत्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्षउत्कृष्टःपुरुषइत्यर्थः ३३ सर्वकालमितिस्पृहासफलाभवेदित्यर्थः आस्येतिपाठेआस्यास्थितिः मनुष्यलोकेतथाऽसंभवात्स्वर्गएवायमानीयतामितिभावः ३४ आयुषंआयुर्नामानम् एका मेकैकांनिशाम् एवंवारंवारंपंचपुत्रोत्पत्तयेगर्भमवाप केचित्तुचतसृभिरप्सरोभिःस्वविभूतिभिःसहस्वयंचपुत्रोत्पत्तयेगर्भमवापेतिव्याचक्षते ३५ अस्मत्प्रीत्यातुभ्यंसर्वेवरदाइत्यन्वयः ३६ नान्यदस्माकमित्यादिराजाचाहेत्यन्वयः अन्यदप्राप्यंनास्तीत्यत्रहेतुः विजितेत्यादि ३७ इत्युक्तेइत्यत्रेतिशब्दःपूर्वापरयोःसंबध्यते उर्वशीलोकप्राप्तिश्चअग्निहोत्रसाध्येत्यग्निस्था

नाविवेकचेष्टितेनांतर्वत्न्यहमब्दांतेभवतात्रागंतव्यंकुमारस्तेभविष्यत्येकांचनिशामहंत्वयासहवत्स्यामीत्युक्तःप्रहृष्टःस्वपुरमाजगामतासांचाप्सरसा मुर्वशीकथयामासअयंपुरुषोत्कर्षोयेनाहमेतावंतंकालमनुरागाकृष्टमनसासहोषिता ३३ इत्येवमुक्तास्तामप्सरसऊचुः साधुसाध्वस्यरूपमनेनसहा स्माकमपिसर्वकालमभिरंतुंस्पृहाभवेत् ३४ इत्यब्देचपूर्णेसराजातत्राजगामकुमारंचायुषमसौतदोर्वशीददावेकांचनिशांतेनराज्ञासहोषित्वापंच पुत्रोत्पत्तयेगर्भमवाप ३५ उवाचैनंराजानमस्मत्प्रीत्यामहाराजायसर्वएवगंधर्वावरदाःसंतुष्टास्तस्माद्व्रियतांवरइति ३६ आहराजाचवि जितसकलारातिरविहतेंद्रियसामर्थ्योबंधुमानमितबलकोशोनान्यदस्माकमुर्वशीसालोक्यादप्राप्यमस्तितदहमनयासहोर्वश्याकालंनेतुमभिलषामि ३७ इत्युक्तेगंधर्वाराज्ञेग्निस्थालींददुः ३८ ऊचुश्चएनमग्निमाम्नायानुसारीभूत्वात्रिधाकृत्वोर्वशीसलोकतामनोरथमुद्दिश्यसम्यक्यजेथास्ततोव श्यमभिलषितमवाप्स्यसि ३९ इत्युक्तस्तामग्निस्थालीमादायाजगामांतरटव्यामचिंतयत् । अहोमेतिमूढतायदग्निस्थालीमयानीतानोर्वशीतिअथै नामटव्यामेवाग्निस्थालींतत्याजस्वपुरंचाजगाम ४० व्यतीतार्धरात्रौविनिद्रश्चाचिंतयत्ममोर्वशीसालोक्यप्राप्त्यर्थमग्निस्थालीगंधर्वैर्दत्तासाचमया टव्यांपरित्यक्तातदहंतत्रतदाहरणाययास्यामीत्युत्थायतत्राप्युपगतोनाग्निस्थालीमपश्यत्। शमीगर्भंचाश्वत्थमग्निस्थालीस्थानेदृष्ट्वाचिंतयत्। मया त्रस्थालीनिक्षिप्तासचाश्वत्थःशमीगर्भोभूत्तदेतमेवाहमग्निरूपमादायस्वपुरमभिगम्यारणिंकृत्वातदुत्पन्नाग्नेरुपास्तिंकरिष्यामीति ४१ एवमेवस्वपु रमुपगतोऽरणिंचकार ४२ तत्प्रमाणंचांगुलैःकुर्वन्गायत्रीमपठत् । पठतश्चाक्षरसंख्यान्येवांगुलारण्यभवत् ४३ तत्राग्निंनिर्मथ्याग्नित्रयमा म्नायानुसारीभूत्वाजुहावोर्वशीसालोक्यंचेहफलमभिसंहितवान् ४४तेनैवाग्निविधिनाबहुविधान्यज्ञानिष्ट्वागंधर्वलोकान्प्राप्योर्वश्यासहवियोगंनाप

लींददुः ३८ आम्नायानुसारीवेदविधौदत्तचित्तः गार्हपत्याहवनीयदक्षिणाग्निरूपेणत्रिधाकृत्वा मनोरथमुद्दिश्यकृत्वा ३९ शमीगर्भाश्वत्थमथनादुत्थितएवाग्निराग्निहोत्रोपयुक्तइतिदर्श यन्नाह अन्तरटव्यामिति यद्यप्यग्निंत्रिधाकृत्वाउर्वशीलोकमुद्दिश्ययजेथाइत्येवंगंधर्वैरुक्तंनत्वियमुर्वशीतितथापिमोहवशात्पुरूरवाउर्वशीयमित्यवगत्यइदानीमचिंतयदित्यर्थः ४० शमीग र्भेशम्यागर्भेस्थितमित्यर्थः ४१ एवमेवयथाचिंतितमेवस्वपुरमुपगतोऽरणिंचकार ४२ गायत्र्यक्षरसंख्यान्यंगुलानिव्याप्यारणिरभवदितिगायत्रींपठतातदक्षरसंख्याकाअरणिःकार्येतिभावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४३ इहहोमेभिसंहितवान्कामितवान् ४४ अग्निविधिनाअग्न्युत्पादनेन ४५ त्रेताअग्नित्रयम् ४६ ॥ ॥ इतिश्रीरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांचतुर्थांशेषष्ठोध्यायः ॥ ६ ॥ ॥ आदावमावसोर्वंशःसप्तमेल्पतयोच्यते तत्रजन्ह्वादिराजर्षिदौहित्राद्भार्गवोहरिः तस्यपुरूरवसःषट्पुत्राअभवन् १ अथैनंजह्नुंदेवर्षयःप्रसादयामासुः ततस्तांमुमोच ततोदुहितृत्वेऽनयत्इत्यध्याहारेणयोजनीयम् २ अमूर्तरयामावसवइत्यत्रसंधिरार्षः ३ आत्मनास्वयमेवइंद्रःपुत्रत्वमगच्छत् ४ तदेवाह गाधिरिति ५ कन्यायाःशुल्कंमूल्यम् ६ तेनापि

४५ एकोग्निरादावभवदैलेनत्वत्रमन्वंतरेत्रेताप्रवर्तिता ४६ । । इतिश्रीविष्णुपुराणेचतुर्थेशेषष्ठोध्यायः ६ । । पराशरउवाच । । तस्याप्यायुर्धीमानमावसुविश्वावसुशतायुःश्रुतायुःसंज्ञाःषडभवन्पुत्राः १ अमावसोर्भीमोनामपुत्रोऽभवत् । भीमस्यकांचनःकांचनात्सुहोत्रस्तस्यापिजन्हुर्योसौयज्ञवाटमखिलंगंगांभसाप्लावितमालोक्यक्रोधसंरक्तनयनोभगवंतंयज्ञपुरुषमात्मनिपरेणसमाधिनासमारोप्याखिलामेवगंगामपिबत् । अथैनंदेवर्षयःप्रसादयामासुर्दुहितृत्वेचास्यगंगामनयत् २ जन्होश्चमुजंतुर्नामपुत्रोऽभवत् । तस्याप्यजकस्ततोबलाकाश्वस्तस्मात्कुशःकुशस्यकुशांबकुशनाभामूर्तरयामावसवश्चत्वारःपुत्राबभूवुः ३ तेषांकुशांबःशक्रतुल्योमेपुत्रोभवेदितितपश्चचारतंचोग्रतपसमवलोक्यमाभवत्वन्योऽस्मत्तुल्यवीर्य इत्यात्मनैवास्येंद्रःपुत्रत्वमगच्छत् ४ गाधिर्नामसकौशिकोऽभवत् ५ गाधिश्चसत्यवतींकन्यामजनयत्तांचभार्गवऋचीकोवव्रेगाधिरप्यतिरोषणायतृद्वायचब्राह्मणायदातुमनिच्छन्नेकतःश्यामकर्णानामिंदुवर्चसामनिलरंहसामश्वानांसहस्रंकन्याशुल्कमयाचत ६ तेनापिऋषिणावरुणसकाशादुपलभ्याश्वतीर्थोत्पन्नंतादृगश्वसहस्रंदत्तम् ७ ततस्तामृचीकःकन्यामुपयेमेऋचीकश्चतस्याश्चरुमपत्यार्थंचकारतत्प्रसादितश्चतन्मात्रेक्षत्रवरपुत्रोत्पत्तयेचरुमपरंसाधयामास ८ एषचरुर्भवत्याअयमपरस्त्वन्मात्रासम्यगुपयोज्यइत्युक्त्वावनंजगाम ९ उपयोगकालेचतांमातासत्यवतीमाहपुत्रिसर्वएवात्मपुत्रमतिगुणंसमभिलषतिनात्मजायाभ्रातृगुणेष्वतीवादृतोभवतीत्यर्हसिममत्वमात्मीयंचरुंदातुंमदीयंचरुमात्मनोपयोक्तुम् १० मत्पुत्रेणहिसकलभूमंडलपरिपालनंकार्यम् ११ कियद्ब्राह्मणस्यबलवीर्यसंपदित्युक्त्वासास्वंचरुंमात्रेदत्तवती १२ अथवनादभ्यागम्यसत्यवतीमृषिरपश्यत् १३ आहचैनामतिपापेकिमिदमकार्यंभवत्याकृतमतिरौद्रंतेवपुरालक्ष्यतेनूनंत्वयात्वन्मातृसत्कृतश्चरुरुपयुक्तोनयुक्तमेतत् १४ मयाहित

ऋचीकेन अश्वतीर्थकान्यकुब्जेगंगाप्रदेशविशेषस्तत्रोत्पन्नंजातंतेनपथोद्रतमितिवाउपलभ्यप्राप्य ७तत्प्रसादितः सत्यवत्याप्रसादितः तन्मात्रेसत्यवत्यामात्रेदातुंक्षत्रवरपुत्रोत्पत्तयेतदर्थम् ८ एषभवत्यायमपरस्त्वन्मात्रोपयोज्योभक्षणीयइत्युक्त्वाकुशाद्यर्थंवनंययौ ९ आत्मनोजायायाभ्रातृगुणेषुसर्वोनातीवादृतोभवति मममह्यम् १० हियस्मात् ११ कियत्प्रयोजनमितिशेषः इत्युक्त्वासतीस्वंचरुंमात्रेदत्तवतीस्वयंचमातृचरुंभुक्तवतीतिज्ञेयम् १२ सत्यवतीमृषिरपश्यद्रौद्ररूपामितिशेषः १३ मात्रेसत्कृतःमातृसत्कृतः मातृसत्कइतिपाठेमातुःसन्मातृसंबंधीत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वार्थेकः १४ मुनिरप्याहएवमस्त्विति आत्मावैजायतेपुत्रइतिन्यायात् मुनिवरवशाच्चपुत्रेचरुफलाभावेननचेत् पुत्रेषुपौत्रेष्वितिन्यायाच्चतत्फलंपौत्रेजातमितिभावः १५ भार्गवःभृगुवंशोद्भवःशुनःशेपःपितृविक्रीतोनरमेधेहरिश्चंद्रपरिवर्तेनकृतपशुभावोपिस्तुतैर्देवैर्विश्वामित्रस्यदत्तःपुत्रोदेवरातनाभाऽभवदित्यर्थः १६ ततश्चान्येमधुच्छंदादयःपुत्राऔरसाबभूवुः १७ एवंभार्गवस्यशुनःशेपस्यकौशिकगोत्रत्वंदेवरातप्रवरत्वंचउक्तम् अन्येषांचौरसानांमधुच्छंदादिप्रवरत्वमितिप्रवरभेदाद्बहूनिकौशिकगोत्राणिऋष्यंतरेषुवैवाह्यानिननुसमानप्रवरेषु एतच्चगोत्रांतरेष्वपितुल्य

त्रचरौसकलैवशौर्यवीर्यबलसंपदारोपितात्वदीयेचरावप्यखिलशांतिज्ञानतितिक्षादिकाब्राह्मणसंपत् । एतच्चविपरीतंकुर्वत्यास्तवातिरौद्रास्त्रधारणमारणनिष्ठःक्षत्रियाचारःपुत्रोभविष्यत्यस्याश्चोपशमसुविर्ब्राह्मणाचारइत्याकर्ण्यैवसातस्यपादौजग्राहप्रणिपत्यचैनमाहभगवन्मयैतदज्ञानादनुष्ठितंप्रसादंमेकुरुमैवंविधःपुत्रोभवतुकाममेवंविधःपौत्रोभवत्वित्युक्तोमुनिरप्याहैवमस्त्विति १५ अनंतरंचसाजमदग्निमजीजनत् । तन्माताचविश्वामित्रंजनयामास । सत्यवतीचकौशिकीनद्यभवत् । जमदग्निरिक्ष्वाकुवंशोद्भवस्यरेणोस्तनयांरेणुकामुपयेमे । तस्यांचाशेषक्षत्रवंशहंतारंपरशुरामसंज्ञंभगवतःसकललोकगुरोर्नारायणस्यांशंजमदग्निरजीजनत् । विश्वामित्रपुत्रस्तुभार्गवएवशुनःशेपोनामदेवैर्दत्तस्ततश्चदेवरातनामाभवत् १६ ततश्चान्येमधुच्छंदजयकृतदेवदेवाष्टककच्छपहारीतकाख्याविश्वामित्रपुत्राबभूवुः १७ तेषांचबहूनिकौशिकगोत्राणिऋष्यंतरेषुवैवाह्यानिभवंतीति १६ । इतिश्रीविष्णुपुराणेचतुर्थेंशेसप्तमोऽध्यायः ७ । । पराशरउवाच । । पुरूरवसोज्येष्ठःपुत्रोयस्त्वायुर्नामराहोर्दुहितरमुपयेमे । तस्यांसपंचपुत्राञ्जनयामासनहुषक्षत्रवृद्धरंभरजिसंज्ञास्तथैवानेनाःपंचमःपुत्रोऽभूत् । क्षत्रवृद्धात्सुनहोत्रःपुत्रोऽभवत् । काशलेशगृत्समदास्त्रयोस्याभवन् । गृत्समदस्यशौनकश्चातुर्वर्ण्यप्रवर्तयिताभूत् १ काशस्यकाशिराजस्ततोदीर्घतमाःपुत्रोऽभवत् । धन्वंतरिस्तुदीर्घतमसोभूत्सहिसंसिद्धकार्यकरणःसकलसंभूतिष्वशेषज्ञानवित् २ भगवतानारायणेनचातीतसंभूतावस्मैवरोदत्तः ३ काशिराजगोत्रेऽवतीर्यत्वमष्टधासम्यगायुर्वेदंकरिष्यसियज्ञभाक्भविष्यसीत्यभिहितः ४ तस्यचधन्वंतरेःपुत्रःकेतुमान्केतुमतोभीमरथस्तस्यापिदिवोदासस्ततःप्रतर्दनःसचभद्रश्रेण्यवंशविनाशादशे

म् तथाहि एकएवऋषिर्यत्रप्रवरेष्वनुवर्तते तावत्समानगोत्रत्वमन्यद्भृग्वंगिरोगणादितिसूत्रकारोक्तेः १८ इतिश्रीविष्णुपुराणेचतुर्थेंशेसप्तमोध्यायः ७ आयुषःपंचपुत्रेषुक्षत्रवृद्धस्यसंततिः अल्पाप्रोक्ताष्टमेयत्रजातोधन्वंतरिर्हरिः चातुर्वर्ण्यप्रवर्तयितातद्वंशेचत्वारोवर्णाअभवन्नित्यर्थः १ संसिद्धानिमर्त्यधर्मरहितानिकार्यकरणानिदेहेंद्रियाणियस्यसः सकलसंभूतिषुसर्वेषुजन्मसुअशेषज्ञानवित्सकलशास्त्रज्ञः २ अतीतसंभूतौक्षीराब्धेर्जन्मनि ३ अष्टधेति अष्टप्रकारमायुर्वेदंकरिष्यसि अष्टांगमितिवापाठः तदुक्तम् कायबालग्रहोद्धावाशल्यंदंष्ट्रजराविषयम् अष्टावंगानियस्याहुश्चिकित्सायेषुसंस्थिता यद्वा शल्यंशलाकाभूतविद्याकायशुद्धिश्चअंगतंत्रंरसायनंवाजीकरणंकुमारतंत्रमित्यष्टधा ४ प्रतर्दनस्यैवशत्रुजिद्वत्सइत्याद्याश्चतस्रःसंज्ञानिर्वाक्ति सचेत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाप्रथितइत्यंतेन ५ तेनदिवोदासेनात्मपुत्रःप्रतर्दनोवत्सवत्सेत्युपलालनेनाभिहितस्ततोवत्ससंज्ञोभवत् ६ कुवलयनामानंकुंपृथिवींवलयतिचेष्टयतिपरिवर्तनेनाह्नाभ्रमतीतितया तन्नामा नमश्वंलेभइतिकुवलयाश्वसंज्ञइति ७ षट्षष्टिसहस्रवत्सरंयावदलर्कादपरोनयुवातावत्कालंचालर्कादन्योमेदिनींनबुभुजइत्यन्वयः ८ ९ इतिचतुर्थेशेष्टमोध्यायः ८ रजेःपुत्रशतंचै द्रात्पातितंवर्ण्यतेपदात् नभोनपत्योनवमेक्षत्रवृत्तान्वयःपुनः रजेःपुत्रशतस्यपुत्रानाभवन्निति वक्तुंकथांप्रस्तौति देवासुरेति १ नवयमन्यथाभवानिंद्रइतीदानींवदिष्यामःसिद्धेकार्येन्यथाप्र

षाःशत्रवोनेनजिताइतिशत्रुजिदभवत् ५ तेनचप्रीतिमतात्मपुत्रोवत्सवत्सेत्यभिहितस्ततोवत्सोसावभवत् ६ सत्यव्रततयाऋतध्वजसंज्ञामवा प । पुनश्चकुवलयनामानमश्वंलेभे । कुवलयाश्वइत्यस्यांपृथिव्यांप्रथितः ७ तस्यचवत्सस्यपुत्रोऽलर्कोनामाभवत् । यस्यायमद्यापिश्लो कोगीयते । षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच । अलर्कादपरोनान्योबुभुजेमेदिनींयुवा ८ तथालर्कस्यसन्नतिर्नामात्मजोऽभवत् । ततःसुनीथस्तस्य सुकेतुस्ततोधर्मकेतुस्ततःसत्यकेतुस्तस्माद्विभुस्तत्तनयःसुविभुस्ततश्चसुकुमारस्तस्यापिधृष्टकेतुस्ततश्चवैनहोत्रस्ततश्चभार्गोभार्गस्यभार्गभूरत श्चातुर्वर्ण्यप्रवृत्तिरित्येतेकाश्यपाभूपतयःकथिताःरजेस्तुसंततिःश्रूयतामिति ९ । इतिश्रीविष्णुपुराणेचतुर्थेंशेअष्टमोऽध्यायः८ । पराशरउवाच ।रजेः पुत्रशतान्यातुलवीर्यसाराण्यासन्।देवासुरसंग्रामारंभेपरस्परवधेप्सवोदेवाश्चासुराश्चब्रह्माणंपप्रच्छुः १भगवन्नस्माकमत्रविरोधेकतरःपक्षोजेताभवि ष्यतीत्यथाहभगवान्येषामर्थेरजिरात्तायुधोयोत्स्यतीति अथदैत्यैरुपेत्यरजिरात्मसाहाय्यदानायाभ्यर्थितःप्राहयोत्स्येहंभवतामर्थेयद्यमरजयाद्भवता मिंद्रोभविष्यामीत्याकर्ण्यैतत्तैरभिहितोनवयमन्यथावदिष्यामोयथाकरिष्यामोस्माकमिंद्रःप्रह्लादस्तदर्थमयमुद्यमइत्युक्त्वागतेष्वसुरेषुदेवैरथासाब वर्नीपतिरेवमेवोक्तस्तेनापिचतथैवोक्तंदेवैरिंद्रस्त्वंभविष्यसीतिसमन्वीक्षितम् २ रजिनापिदेवसैन्यसहायेनानेकैर्महास्त्रैस्तदशेषमसुरबलंनिषूदितं अ वजितारातिपक्षश्चेंद्रोरजिचरणयुगुलमात्मशिरसानिपीड्याहभयत्राणदानादस्मत्पिताभवानशेषलोकानामुत्तमोत्तमोभवान्यस्याहंपुत्रस्त्रिलोकेंद्रः३ सचापिराजाप्रहस्याहएवमेवास्त्वनतिक्रमणीयाहिवैरिपक्षादप्यनेकविधचाटुवाक्यगर्भाप्रणतिरित्युक्त्वास्वपुरमाजगाम ४ शतक्रतुरपींद्रत्वंचकार स्व र्यातेचरजौनारदर्षिचोदितारजिसुताःशतक्रतुमात्मपितृपुत्रमाचाराद्राज्यंयाचितवंतः ५ अप्रदानेचावाजित्येंद्रमतिबलिनःस्वयमिंद्रत्वंचक्रुः ततश्चबहु

ह्लादमिंद्रंकरिष्यामःकिंतुसर्वदास्माकमिंद्रःप्रह्लादइत्युक्त्वानिर्गतेषुसमन्वीक्षितमनुमतम् २ भयप्रदानादिति अन्नदाताभयत्राताकन्यादातातथैवच जनिताचोपनेताचपंचैतेपितरःस्मृताइ त्युक्तेः भवानितिपदावृत्तिर्वाक्यभेदात् ३ अनेकविधानिबहूनिचाटूनिप्रियाणिवाक्यानिगर्भेयस्याःसाप्रणतिःवैरिपक्षादवैरिपक्षस्थितस्यापिअनतिक्रमणीयावैरिणाप्रणयादुक्तमसमंतुल्यंकिंपुनर्भ वादृशेनेतिभावः४पितुःस्वपुत्राणांभवतीतिस्मृत्युक्ताचाराद्राज्यमिंद्रत्वमात्मपितुःपुत्रंपुत्रत्वमापन्नमिंद्रंयाचितवंतः ५ अपलतंत्रैलोक्यंयज्ञभागाश्चयस्यसःकिमकर्तव्यंकर्तुमशक्यंस्यादितियोज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् वृथैवस्वबुद्ध्यात्वयाक्लैब्यंकृतमपिज्ञापितेनउपायेनराजिरेवस्वर्गात्पातितःस्यादितिभावः ७ पूर्वजस्यक्षत्रवृद्धस्यायोःपुत्रस्यवंशउक्तः तस्यैववंशांतरमाह क्षत्रवृद्धेत्यादिना ८ ॥ इतिश्री विष्णुपुराणेवैष्णवाकूतचन्द्रिकायांचतुर्थेंशेनवमोध्यायः ९ ॥ ॥ दशमेनाहुषस्याथययातेर्वंशउच्यते यद्गीतेनेहसर्वेषांवैतृष्ण्यमुपजायते १ उपयेमेदेवयानींब्राह्मेणशर्मिष्ठांगांधर्वेणेत्यवधेयम् १

तिथेकालेव्यतीतेबृहस्पतिमेकांतेदृष्ट्वापहृतत्रैलोक्ययज्ञभागःशतक्रतुराह ६ बदरीफलमात्रमप्यर्हसिममाप्यायनायपुरोडाशखंडंदातुमित्युक्तोबृहस्पतिरूचे । यद्येवंपूर्वमेवत्वयाहंचोदितःस्यांतन्मयात्वदर्थंकिमकर्तव्यमिति ७ स्वल्पैरेवाहोभिस्त्वांनिजंपदंप्रापयिष्यामीत्याभिधायतेषामनुदिनाभिचारिकंबुद्धिमोहायशक्रस्यचतेजोवृद्धयेजुहावतेचापितेनबुद्धिमोहेनाभिभूयमानाब्रह्मद्विषोधर्मत्यागिनोवेदवादपराङ्मुखाबभूवुः । ततश्चतानपेतधर्माचारानिंद्रोजघानपुरोहिताप्यायिततेजाश्चत्रिदिवमाक्रमत् । एतदिंद्रस्यस्वपदच्यावनारोहणंश्रुत्वापुरुषःस्वपदभ्रंशंदौरात्म्यंवानचाप्नोति रंभस्त्वनपत्योभवत्क्षत्रवृद्धसुतःप्रतिक्षत्रस्तत्पुत्रःसृंजयस्ततश्चविजयस्तस्माच्चयज्ञकृत्ततस्तस्यहर्षवर्धनोहर्षवर्धनसुतःसहदेवस्तस्मादहीनस्तस्यजयसेनस्ततश्चसंकृतिस्तत्पुत्रःक्षत्रधर्माइत्येतेक्षत्रवृद्धस्यातोनहुषवंशंवक्ष्यामीति ८ इतिश्रीविष्णुपुराणेचतुर्थेंशेनवमोध्यायः । । पराशरउवाच । ययतियययातिसंयात्ययातिवियतिकृतिसंज्ञानहुषस्यषट्पुत्रामहाबलपराक्रमाबभूवुः । यतिस्तुराज्यंनैच्छत्ययातिस्तुभूभृदभवत् । उशनसश्चदुहितरंदेवयानींशर्मिष्ठांचवार्षपर्वणीमुपयेमे १ अत्रानुवंशश्लोकोभवति । यदुंचतुर्वसुंचैवदेवयानीव्यजायत । द्रुह्यंचानुंचपूरुंचशर्मिष्ठावार्षपर्वणी २ काव्यशापाच्चाकालेनैवययातिर्जरामवाप३ प्रसन्नशुक्रवचनाच्चजरांसंक्रामयितुंज्येष्ठंपुत्रंयदुमुवाच ४ त्वन्मातामहशापादियमकालेनैवजरामामुपस्थिता। तामहंतस्यैवानुग्रहात्भवतःसंचारयाम्येकंवर्षसहस्रंनतृप्तोस्मिविषयेषुत्वद्वयसाविषयानहंभोक्तुमिच्छामिनात्रभवताप्रत्याख्यानंकर्तव्यमित्युक्तःसनैच्छत्तांजरामादातुंतंचापिपिताशशापत्वत्प्रसूतिर्नराज्यार्हाभविष्यतीति ५ अनंतरंचद्रुह्युंतुर्वसुमनुंचपृथिवीपतिर्जराग्रहणार्थंस्वयौवनप्रदानायचचोदयामासतैरप्येकैकश्येनप्रत्याख्यातस्ताञ्छशाप । अथशर्मिष्ठातनयमशेषकनीयांसंपूरुंतथैवाहसचातिप्रवणमतिःप्रणम्यपितरंसबहुमानंमहान्प्रसादोयमस्माकमित्युदारमभिधायजरांप्रतिजग्राहस्वकीयंचयौवनंपित्रेददौसोपिचनवंयौवनमासाद्यधर्माविरोधेनयथाकामंयथाकालोपपन्नंयथोत्साहंविषयंचचारसम्यक्प्रजापालनमकरोत् ६ विश्वाच्यासहोपभोगंभुक्त्वाकामानामंतमवाप्स्यामीत्यनुदिनंतन्मनस्कोबभूव ७ अनुदिनंचोपभोगतश्चका

अनुवंशोवंशमनुजातःश्लोकइत्यर्थः २ काव्यशापादिति शर्मिष्ठायांदास्यांययातिनापुत्रोत्पादनंदेवयान्याकथितंश्रुत्वाक्रुद्धस्यशुक्रस्यशापादकालेजरांययातिरवाप ३ प्रसन्नशुक्रवचनादिति पुनःप्रसन्नशुक्रस्ययद्वचनंयस्मिन्जरांसंक्रामयिष्यसितस्मिन्स्थास्यतितदीयंयौवनंचाप्स्यतीतितस्माज्जरांसंक्रामयितुमर्थाद्यौवनंचादातुंयदुमुवाच ४ वयसायौवनेन ५ चचारबुभुजे ६ वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वाच्याअप्सरसा ७ उपभोगतस्तद्वासनातःअभिरम्यान्विषयान्अतीवमेनेअतिशयेनाभिलषितवानित्यर्थः ८ ततश्चनिर्वेदात्कामनिवृत्तिप्रकारमाह नजात्वित्यादिनायावत्समाप्ति कृष्ण वर्त्माअग्निः ९ यदिति तृष्णापूर्तेरशक्यतयादुःखहेतुत्वाद्दोषदृष्टिंकुर्वन्तांत्यजेदितिभावः १० तर्हिविषयत्यागेकथंसुखप्राप्तिस्तत्राह यदासर्वभूतेषुविषयेषुभावंगुणाध्यासंपापकंरागादि जनकंनकुरुतेकिंतुतेषुभौतिकत्वेनसमदृष्टिस्तदाईप्सितालाभजन्यदुःखाभावात्सर्वादिशःसुखाःसुखमय्यः दुःखाभावेसुखत्वोपचारात् ११ ननुसादुस्त्यजेतिचेत्सत्यं दुर्मतिभिर्दुस्त्यजाम

मानतीवाभिरम्यान्मेने ८ ततश्चैवमगायत । नजातुकामःकामानामुपभोगेनशाम्यति । हविषाकृष्णवर्त्मेवभूयएवाभिवर्धते ९ यत्पृथिव्यांव्रीहिय वंहिरण्यंपशवःस्त्रियः । एकस्यापिनपर्याप्तंतदित्यतितृषंत्यजेत् १० यदानकुरुतेभावंसर्वभूतेषुपापकम् । समदृष्टेस्तदापुंसःसर्वाएवसुखादिशः । ११ यादुस्त्यजादुर्मतिभिर्यानजीर्यतिजीर्यतः । तांतृष्णांसंत्यजन्प्राज्ञःसुखेनैवाभिपूर्यते १२ जीर्यंतिजीर्यतःकेशादंताजीर्यंतिजीर्यतः । धनाशा जीविताशाचजीर्यतोपिनजीर्यति १३ पूर्णंवर्षसहस्रंमेविषयासक्तचेतसः । तथाप्यनुदिनंतृष्णाममैतेष्वेवजायते १४ तस्मादेतामहंत्यक्त्वाब्रह्मण्या धायमानसम् । निर्द्वंद्वोनिर्ममोभूत्वाचरिष्यामिमृगैःसह १५ । । पराशरउवाच । । पूरोःसकाशादादायजरांदत्त्वाचयौवनम् । राज्येभिषिच्यपूरुं चप्रययौतपसेवनम् १६ दिशिदक्षिणपूर्वस्यांतुर्वसुंप्रत्यथादिशत् । प्रतीच्यांचतथाद्रुह्युंदक्षिणापथतोयदुम् १७ उदीच्यांचतथैवानुंकृत्वामंडलिनो नृपान् । सर्वपृथ्वीपतिंपूरुंसोभिषिच्यवनंययौ १८ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेदशमोध्यायः १० । । पराशरउवाच । । अतःपरंयया तेःप्रथमपुत्रस्ययदोर्वंशमहंकथयामि । यत्राशेषलोकनिवासिमनुष्यसिद्धगंधर्वयक्षराक्षसगुह्यकर्किंपुरुषाप्सरसोरगविहगदैत्यदानवदेवर्षिद्विजर्षिमु मुक्षुभिर्धर्मार्थकाममोक्षार्थिभिस्तत्फललाभायसदाभिष्टुतापरिच्छेद्यमाहात्म्येनांशेनभगवाननादिनिधनोविष्णुरवततार १ अत्रचयदोर्वंशंनरःश्रुत्वा सर्वपापैःप्रमुच्यते । यत्रावतीर्णोविष्णवाख्यंपरंब्रह्मनिराकृति २ सहस्रजित्क्रोष्टुनलरघुसंज्ञाश्चत्वारोयदुपुत्राबभूवुः । सहस्रजित्पुत्रःशतजित्तस्य हैहयवेणुहयास्त्रयःपुत्राबभूवुः । हैहयाद्धर्मनेत्रस्ततःकुंतिःकुंतेःसाहंजिस्तत्तनयोमहिष्मान्तस्माद्भद्रश्रेण्यस्ततोदुर्दमस्तस्माद्धनकोधनकस्यकृतवी

पिदोषदृष्टिपरश्चेत्त्यक्तुंशक्नोतीत्याह यादुस्त्यजेति सुखेनाभिपूर्यतइतिपूर्वोक्तस्यानुवादः १२ दोषदृष्टिंदर्शयन्तृष्णायाःकालतोपिदुष्पूरतामाह जीर्यतीतिद्वाभ्यां १३ १४ पूर्वोक्तंनिगम यन्कर्तव्यमध्यवस्यति तस्मादिति एतांतृष्णां १५ १६ १७ मंडलिनःखंडदेशाधिपान् १८ । । इतिश्रीविष्णुपुराणेटीकायांरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचंद्रिकायांचतुर्थेंशेद शमोध्यायः १० । । इतःपंचभिरध्यायैर्यदोर्वंशोनिरूप्यते यत्रासुरसुराद्यात्माहरिराविरभूत्स्वयं १ एकादशेर्जुनस्त्वत्रकार्तवीर्योनुवर्ण्यते योगेनैश्वर्यमत्तोसौरामेणविनिपातितः २ अंशेनेति लीलागृहीतमूर्त्युपहितत्वादंशइवांशस्तेनस्वरूपेणावततार १ स्वयंतुनिराकृतिब्रह्मैव नराकृतीतिवापाठः २ अनष्टद्रव्यताचतद्राज्येभवदित्यत्रातीततानविवक्षिताइदानीमपितन्नामाख्याने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्रव्यप्राप्तेः अनष्टद्रव्यताचैवतस्यनामाभिकीर्तनादितिकूर्मोक्तेः ३ माहिष्मत्यांपुर्यांदिग्विजयार्थमागतोरावणस्तेनार्जुनेनबद्धःस्वनगरैकांतेस्थापितइत्यन्वयः कथंभूतेननर्मदाजलावगाह क्रीडायांयन्निपानमतिपानंतेनयोमदोमत्ततातदाकुलेनएवंहिहरिवंशे जलक्रीडासक्तार्जुनबाहुसहस्रबद्धनर्मदाप्रतिस्रोतःप्रसराप्लुतस्वशिबिरोरावणस्तदाभिभवायप्रवृत्तोर्जुनेनबद्धास्वनगरेस्था

र्यकृताग्निकृतवर्मकृतौजसश्चत्वारःपुत्राकृतवीर्यादर्जुनः सप्तद्वीपपतिर्बाहुसहस्रीजज्ञे । योसौभगवदंशमात्रिकुलप्रसूतंदत्तात्रेयाख्यमाराध्यबाहु सहस्रमधर्मसेवानिवारणंधर्मेणपृथिवीजयंधर्मतश्चानुपालनमरातिभ्योऽपराजयमखिलजगत्प्रख्यातपुरुषाच्चमृत्युमित्येतान्वरान्अभिलषितवान्ल भेचतेनेयमशेषद्वीपवतीपृथ्वीसम्यक्परिपालितादशयज्ञसहस्राण्यसावयजत् । तस्यश्लोकोद्यापिगीयते । ननूनंकार्तवीर्यस्यगतिंयास्यंतिपा र्थिवाः । यज्ञैर्दानैस्तपोभिर्वाप्रश्रयेणदमेनच । अनष्टद्रव्यताचतस्यराज्येभवत् ३ एवंपंचाशीतिसहस्राण्यब्दानव्याहतारोग्यश्रीबलपराक्रमो राज्यमकरोत् । माहिष्मत्यांदिग्विजयार्थमागतोनर्मदाजलावगाहनक्रीडानिपानमदाकुलेनायत्नेनैवतेनाशेषदेवदैत्यगंधर्वेशजयोद्भूतमदावलेपो पिरावणःपशुरिवबद्धःस्वनगरैकांतेस्थापितः ४ यःपंचाशीतिवर्षसहस्रोपलक्षणकालावसानेभगवन्नारायणांशेनपरशुरामेणउपसंहृतः । तस्यपु त्रशतप्रधानाःपंचपुत्राबभूवुः शूरशूरसेनवृषणमधुजयध्वजसंज्ञाः । जयध्वजात्तालजंघःपुत्रोभवत् । तालजंघस्यतालजंघाख्यपुत्रशतमासीत्येषां ज्येष्ठोवीतिहोत्रस्तथान्योभरतोभरताद्वृषसुजातौच । वृषस्यपुत्रोमधुरभवत् । तस्यापिवृष्णिप्रमुखंपुत्रशतमासीद्यतोवृष्णिसंज्ञामेतद्गोत्रमवापमधु संज्ञाहेतुश्चमधुरभवद्यादवाश्चयदुनामोपलक्षणात् ५ । । । इतिश्रीविष्णुपुराणेचतुर्थेंशेएकादशोध्यायः ११ । । पराशरउवाच । । क्रो ष्टोश्चयदुपुत्रस्यात्मजोवृजिनीवान्ततश्चस्वाहिस्ततोरुषद्गुरुषद्गोश्चित्ररथस्तत्तनयःशशबिंदुश्चतुर्दशमहारत्नश्चक्रवर्तीअभवत् १ यस्यचशतसहस्रंप त्नीनामभवत्दशलक्षसंख्याश्चपुत्राः । तेषांचपृथुयशाःपृथुकर्मापृथुजयःपृथुकीर्तिःपृथुदानःपृथुश्रवाःषट्पुत्राःप्रधानाः । पृथुश्रवःपुत्रस्तमस्तस्मा दुशनायोवाजिमेधानांशतमाजहार । तस्यचशिनेयुर्नामपुत्रोभूत्तस्यापिरुक्मकवचस्ततःपरावृत्परावृतोरुक्मेषुपृथुरुक्मज्यामघपालितहारितसंज्ञा स्तस्यपंचात्मजाबभूवुः । अत्राद्यापिज्यामघस्यश्लोकोगीयते । भार्यावश्यास्तुयेकेचिद्भविष्यंत्यथवामृताः । तेषांतुज्यामघःश्रेष्ठःशैब्यापतिरभू न्नृपः । अपुत्रातस्यसापत्नीशैब्यानामतथाप्यसौ । अपत्यकामोपिभयान्नान्यांभार्यामविंदत २ सत्वेकदातिप्रभूतगजतुरगसंमर्देनातिदारुणेमहाह

पितइति ५ ॥ इतिविष्णुपुराणेवै॰चं॰चतुर्थेंशेएकादशोध्यायः ११ ॥ द्वादशेक्रोष्टुसंज्ञस्ययदुपुत्रस्यसंततिः वंशकृद्वर्ण्यतेयत्रज्यामघस्त्रीजिताग्रणीः१ चतुर्दशमहांतिरत्नानियस्यसः र त्नानिचात्रस्वस्वजातिश्रेष्ठानिधर्मसंहितोक्तानि चक्रंरथोमणिःखड्गश्चर्मरत्नंचपंचमं केतुर्निधिश्चसप्तैवप्राणहीनानिचक्षते भार्यापुरोहितश्चैवसेनानीरथकृच्चयः पत्यश्वौकलभश्चेतिप्राणिनःसप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्तिताः चतुर्दशोतिरत्नानिसर्वेषांचक्रवर्तिनामिति १ ज्यामघस्यवंध्यापतेरपुत्रस्यभार्यावशत्वमेवपुत्रप्रदमासीदितिवक्ष्यन्कथामाह अत्राद्यापीतियावत्समाप्ति २ अधिष्ठानंनिवासं ३ लोल चंचलंआयतंदीर्घलोचनयुगलंयस्यकन्यारत्नस्यतत् आकुलविलापंचताद्विधुरंबंधुवियुक्तंच ४ अनुरागस्यानुगतोऽधीनोंतरात्मामनोयस्यसः ५ उद्वहामिपरिणेष्यामि ६ शैब्ययाहमनुज्ञातः समुद्वक्ष्यामीतिनिश्चितत्वात् शैब्याज्ञाभाऽवेकन्यारत्नस्यस्नुषात्वेप्यदोषः ७ अधिष्ठानद्वारंपुरद्वारं ८ अनालोचितमविचारितमुत्तरवचनंप्रतिवचनंयेनसः ९ नाहंप्रसूताअपत्यवती अन्याचपुत्रे

वेयुध्यमानःसकलमेवारातिचक्रमजयत् । तच्चारिचक्रमपास्तपुत्रकलत्रबंधुबलकोशंस्वमधिष्ठानंपरित्यज्यदिशःप्रविद्रुतम् ३ तस्मिंश्चविद्रुतेतित्रासा ल्लोलायतलोचनयुगलंत्राहित्राहितातभ्रातरित्याकुलविलापविधुरंराजकन्यारत्नमद्राक्षीत् ४ तद्दर्शनाच्चतस्यामनुरागानुगतांतरात्मासभूयोऽचिंतय त् ५ साध्विदंममापत्यविरहितस्यवंध्याभर्तुःसांप्रतंविधिनापत्यकारणंकन्यारत्नमुपपादितंतदेतदुद्वहाम्यथचैनांस्यंदनमारोप्यस्वमधिष्ठानंनयामि ६ तथैवदेव्याहमनुज्ञातःसमुद्वक्ष्यामीत्यथैनांरथमारोप्यस्वनगरमगच्छत् ७ विजयिनंचराजानमशेषपौरभृत्यपरिजनामात्यसमवेताशैब्याद्रष्टुमधि ष्ठानद्वारमागता ८ साचावलोक्यराज्ञःसव्यपार्श्ववर्तिनींकन्यामीषदुद्भूतामर्षस्फुरदधरपल्लवाराजानमवोचत् । अतिचपलचित्तात्रस्यंदनेकेयमारोपि तेत्यसावप्यनालोचितोत्तरवचनोतिभयात्तामाहस्नुषाममेयमिति ९ । अथैनंशैब्योवाच । । नाहंप्रसूतापुत्रेणनान्यापत्न्यभवत्तव । स्नुषासंबंधवाच्यै षाकतमेनसुतेनते १० । ।पराशरउवाच । । इत्यात्मेर्ष्याकोपकलुषितवचनमुषितविवेकतयादुरुक्तपरिहारार्थमिदमवनीपतिराह ११ यस्तेज निष्यत्यात्मजस्तस्येयमनागतमेवसूर्यानिरूपितेत्याकर्ण्याद्भुतमृदुहासातथेत्याहप्रविवेशचराज्ञासहाधिष्ठानमिति १२ अनंतरंचातिशुद्धलग्नहोरांश कावयवोक्तकृतपुत्रजन्मालापगुणाद्वयसःपरिणाममुपगतापिशैब्यास्वल्पैरेवाहोभिर्गर्भमवाप १३ कालेनचपुत्रमजीजनत् । तस्यचविदर्भइतिपिताना मचक्रेसचतांस्नुषामुपयेमे १४ तस्यांचासौक्रथकैशिकसंज्ञौपुत्रावजनयत् । पुनस्तृतीयंरोमपादसंज्ञंकुमारमजीजनत् । रोमपादाद्बभ्रुर्बभ्रोःपुत्रोधृ तिःकैशिकस्यापिचेदिःपुत्रोभूद्यस्यसंततौचैद्याभूपालाःक्रथस्यस्नुषापुत्रस्यकुंतिरभवत् १५ कुंतेर्वृष्णिर्वृष्णेर्निर्वृतिर्निर्वृतेर्दशार्हस्ततश्चव्योमातस्मा

णविशिष्टातेपत्नीनाभवत् कतमेनसुतेननिमित्तेनस्नुषासंबंधेनउपाधिनावाच्याअपितुनकेनापीत्याक्षेपः १० आत्मनिराज्ञिशैब्यायाईर्ष्याकोपाभ्यांकलुषितंक्षुभितंयद्वचनंतेनमुषितोविवेकोय स्यतयादुरुक्तंअसंभावितार्थमपियद्वचनंतत्परिहारार्थं ११ सूर्यानववर्धूर्निरूपिताकल्पिता १२ अनंतरंचशैब्यागर्भमवापेत्यन्वयः तत्रहेतुः अतिशुद्धायेलग्नहोरांशकावयवास्तेषूक्तंतथास्त्वि तिअस्तुदेवतायाउक्तमुक्तिस्तेनसहकृतोयःशैब्याराजभ्यांपुत्रजन्मात्मकआलापस्तस्यगुणात्साद्गुण्यात् अस्तुदेवताहिशुभाशुभवचनंतथास्त्वित्यनुमोदते तत्रराशीनामुदयोलग्नं राशेरर्धंहोरा राशेनवमोभागोंशकःअवयवोद्वादशांशादिःएतेषुशुभेषुउक्तकृतंचावश्यंभवतीत्यर्थः १३ नचाविदर्भःकथंज्येष्ठानुपयेमे ज्यामघस्यपूर्वप्रतिज्ञातत्वादित्याशूल्यं १४ स्नुषायाज्यामघस्यस्नुषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याःसत्याःपुत्रस्य १५ सत्वतात्एतेवक्ष्यमाणास्तद्वंश्याःसात्वताः १६ १७ ॥ ॥ इतिश्रीविष्णुपुराणेचतुर्थेशेद्वादशोध्यायः १२ ॥ ॥ त्रयोदशोज्यामघस्यसंततौसत्वतान्वयः स्यमंत
कस्यचाख्यानंप्रसंगादनुवर्ण्यते १ सत्वतस्यभजिनादयःसप्तपुत्राबभूवुः १ तद्वैमात्रास्तेषांनिम्न्यादीनांवैमात्राःसापत्नाः २ तस्यबभ्रोःचकारात्देवावृधस्यापिश्लोकोयशोगीयते ३ दूरात्दूरेस्थि

दपिजीमूतस्तस्यापिविकृतिस्ततश्चभीमरथस्तस्मान्नवरथस्तस्माद्दशरथस्ततश्चशकुनिस्ततनयःकरंभिःकरंभेर्देवरातोभवत्तस्माद्देवक्षत्रस्तस्यमधुर्म
धोरनवरथोऽनवरथात्कुरुवत्सस्ततश्चानुरथस्ततःपुरुहोत्रोजज्ञेततश्चांशस्ततश्चसत्वतःसत्वतादेतेसात्वताः १६ इत्येतांज्यामघसंततिंसम्यक्श्रद्धा
समन्वितःश्रुत्वासर्वपापैःप्रमुच्यते १७ । । इतिश्रीविष्णुपुराणेचतुर्थेशेद्वादशोध्यायः १२ । । पराशरउवाच । । भजिनभजमानदिव्यांधक
देवावृधमहाभोजवृष्णिसंज्ञाःसत्वतस्यपुत्राबभूवुः १ भजमानस्यनिमिकृकणवृष्णयस्तथान्येतद्वैमात्राःशताजित्सहस्राजिदयुताजित्संज्ञाः २ दे
वावृधस्यापिबभ्रुःपुत्रोभूत्तस्यचायंश्लोकोगीयते ३ यथैवशृणुमोदूरादपश्यामतथांतिकात् । बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः ४ पुरुषाः
षट्चषष्टिश्चषट्सहस्राणिचाष्टच । येमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि ५ महाभोजस्त्वतिधर्मातस्यान्वयेभोजामार्त्तिकावताबभूवुः६ वृष्णेःसुमित्रो
युधाजिच्चपुत्रोभवत् । ततश्चानमित्रशिनीतथा ७ अनमित्रान्निघ्नोनिघ्नस्यप्रसेनसत्राजितौ । तस्यसत्राजितस्यभगवानादित्यःसखाभवत् ८
एकदात्वंभोधेस्तीरसंश्रयःसूर्यंसत्राजितस्तुष्टावतन्मनस्कतयाचभास्वानभिष्टूयमानोग्रतस्तस्यतस्थौअस्पष्टमूर्तिधरंचैनमालोक्यसत्राजितःसूर्यमा
हयथैवव्योम्निवन्हिपिंडोपममहमपश्यंतथैवाद्याग्रतोगतमप्यत्रनकिंचिद्भगवताप्रसादीकृतंविशेषमुपलक्षयामि ९ इत्येवमुक्तेसूर्येणनिजकंठादुन्मु
च्यस्यमंतकनामामणिरवतार्यएकांतेन्यस्तस्ततस्तमाताम्रोज्वलद्गस्ववपुषमीषदापिंगलनयनमादित्यमद्राक्षीत् । कृतप्रणिपातस्तवादिकंचसत्रा
जितमाहभगवान्वरमस्मत्तोऽभिमतंवृणीष्वेतिसचतदेवमणिरत्नमयाचतसचापितस्मैतद्दत्त्वावियतिस्वधिष्ण्यमारुरोह १० सत्राजितोऽप्यमलम
णिरत्नसनाथकंठतयासूर्यइवतेजोभिरशेषदिगंतराण्युद्भासयन्द्वारकांविवेश ११ द्वारकावासिजनपदस्तुतमायांतमवेक्ष्यभगवंतमनादिपुरुषंपुरु
षोत्तममवनिभारावतारणायांशेनमानुषरूपधारिणंप्रणिपत्याह । भगवन्भवंतमयंनूनंद्रष्टुमायात्यादित्यइत्याकर्ण्यप्रहस्यचतानाहभगवान्नायमा

तंयथाशृणुमःअंतिकात्समीपेस्थितमपिप्रत्यक्षतयातथैवपश्यामःनततःकिंचिदपिन्यूनंअतोवभ्रुर्मनुष्याणांमध्येश्रेष्ठोदेवावृधस्तुदेवैःसमइति ४ बभ्रोर्देवावृधादपिताभ्यामुद्दिष्टमार्गेणपुरुषाःक्र
मेणषट्षष्ट्यादयोमृतत्वंप्राप्ताः बभ्रुदेवावृधाविति पाठेबभ्रुंदेवावृधंवासाद्यइतिशेषः सएवार्थः ५ मृत्तिकावतंनामपुरंतत्रस्थितानृपामार्त्तिकावताः ६ वृष्णेःसुमित्रयुधाजितौपुत्रावित्यर्थः ततः
सुमित्रात् ७ सत्राजित.प्रसंगात्स्यमंतकोपाख्यानमाह तस्येत्यादिनायावत्समाप्ति ८ यथाविशेषमुपलक्षयामितथाकुर्विति प्रथमंवरप्रार्थना ९ धिष्ण्यंस्वस्थानम् १० अमलेनमणिरत्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमण्युत्तमेनसनाथकंठतयाअलंकृतकंठतया ११ विश्रब्धाःनिःशंकाः १२ आत्मनिवेशनेस्वगृहेचक्रेस्थापयामास १३ मणिरत्नेषुमण्युत्तमेषुप्रवरंश्रेष्ठंकनकस्रावकत्वात् भारप्रमाणंगणि
तशास्त्रोक्तं माषोदशार्धगुंजःषोडशमाषोनिगद्यतेकर्षः ससुवर्णश्चसुवर्णैस्तैरेकंपलंचतुर्भिश्च तुलापलशतंप्रोक्तंभारःस्याद्विंशतिस्तुलाइति १४ उपसर्गोरोगादिः १५ तद्रत्नंवरलब्धंशुभदमपि

दित्यःसत्राजितोऽयमादित्यदत्तंस्यमंतकाख्यंमहामणिंबिभ्रदत्रोपायातितदेनंविश्रब्धाःपश्यतइत्युक्तास्तेययुः १२ सचतंस्यमंतकाख्यंमहामणिमा
त्मनिवेशनेचक्रे १३ प्रतिदिनंचतन्मणिरत्नप्रवरमष्टौकनकभारान्स्रवति १४ तत्प्रभावाच्चसकलस्यैवराष्ट्रस्योपसर्गावृष्टिव्यालाग्निचारदुर्भि
क्षादिभयंनभवति १५ अच्युतोऽपितद्रत्नमुग्रसेनस्यभूपतेर्योग्यमेतादितिलिप्सांचक्रेगोत्रभेदभयाच्चशक्तोऽपिनजहार १६ सत्राजितोऽप्यच्यु
तोमामेवयाचयिष्यतीत्यवगतरत्नलोभःस्वभ्रात्रेप्रसेनायतद्रत्नंदत्तवान् १७ तत्रशुचिनाध्रियमाणमशेषसुवर्णस्रावादिकंगुणमुत्पादयतिअन्यथाय
एवधारयतितमेवहंतीतिअसावपिप्रसेनःस्यमंतकेनकंठसक्तेनाश्वमारुह्याटव्यांमृगयामगच्छत् । तत्रचसिंहाद्वधमवापसाश्वंचतंनिहत्यसिंहोप्यमल
मणिरत्नमास्येनादायगंतुमुद्यतऋक्षपतिनाजांबवतादृष्टोघातितः । जांबवानप्यमलंतन्मणिरत्नमादायस्वबिलेप्रविवेशसुकुमारकसंज्ञायचबालकाय
क्रीडनमकरोत् १८ अनागच्छतिचतस्मिन्प्रसेनेकृष्णोमणिरत्नमभिलषितवान्नचप्राप्तवान्नूनमेतदस्यकर्मेत्यखिलएवयदुलोकपरस्परंकर्णाकर्ण्य
कथत् १९ विदितलोकापवादवृत्तांतश्चभगवान्यदुसैन्यपरिवारःप्रसेनाश्वपदवीमनुससारददर्शचाश्वसमेतंप्रसेनंनिहतंसिंहेनाखिलजनपदमध्ये
सिंहपददर्शनकृतपरिशुद्धिःसिंहपदमनुससार २० ऋक्षविनिहितंसिंहमप्यल्पेभूमिभागेदृष्ट्वाततश्चतद्रत्नगौरवादृक्षस्यापिपदान्यनुययौगिरितटे
चसकलमेवयदुसैन्यमवस्थाप्यतत्पदानुसारीऋक्षबिलंप्रविवेशअर्धप्रविष्टश्चधात्र्यासुकुमारकमुल्लापयंत्यावार्णांशुश्राव २१ सिंहःप्रसेनमवधीत्सिं
होजांबवताहतः । सुकुमारकमारोदीस्तवह्येषस्यमंतकः २२ इत्याकर्ण्यलब्धस्यमंतकोदंतःप्रविष्टःकुमारक्रीडनकीकृतंचधात्रीहस्तेतेजोभिर्जाज्वल्य
मानंस्यमंतकंददर्श २३ तंचस्यमंतकाभिलाषचक्षुषमपूर्वपुरुषमागतमवेक्ष्यधात्रीत्राहित्राहीतिव्याजहार २४ तदार्तनादश्रवणानंतरंचामर्षपूर्ण
हृदयःसजांबवानाजगामतयोश्चपरस्परंयुध्यतोर्द्वयोर्युद्धमेकविंशतिदिनान्यभवत् तेचयदुसैनिकास्तत्रसप्ताष्टदिनानितन्निष्क्रांतिमुदीक्षमाणास्तस्थुः

भगवल्लिप्साभंगाद्बह्वनर्थप्रदंजातमितिवक्तुमाह अच्युतोपीति १६ कृष्णस्यअवगतोरत्नेलोभोयेनसः १७ क्रीडनंक्रीडासाधनम् १८ कर्णाकर्णिकर्णेकर्णे कर्ण्याकर्ण्याइतिपाठेकर्णपरंपरया
इत्यर्थः १९ सिंहपददर्शनेनकृतापरिशुद्धिर्येनसः सिंहनैवप्रसेनोहतोनकृष्णेनेतिजनपदेनज्ञातत्वात् तथापिमणिरत्नलोभात्सिंहपदमनुससार २० उल्लापयंत्याआकांक्षाजनकंवचनमुल्लापनं
तत्कुर्वत्या २१ तदेवाह सिंहःप्रसेनमिति लब्धस्यमंतकस्योदंतोवार्तायेनसः लब्धस्यमंतकोन्तरितिपाठेज्ञातस्यमंतकअंतःप्रविष्टइत्यर्थः २२ जाज्वल्यमानमतिप्रकाशमानम् २३ तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णंस्यमंतकस्याभिलाषसूचकंचक्षुर्यस्यतम् २४ व्याक्षेपोविलंबः कृताध्यवसायाःकृतनिश्चयाः २५ उपरतक्रियाकलापंमृतक्रियासमूहंश्राद्धादिकम् २६ बलप्राणपुष्टिरभूदितिप्र संगाच्छ्राद्धप्रशंसाउक्ता तस्मादवश्यंश्राद्धादिकर्तव्यमितिभावः २७ किमुतावतिगोचरैर्मनुष्यैस्तत्रापिनराणामवयवभूतैरंगभूतैःक्रीडासाधनैरस्मद्विधैर्जेतुंनशक्यइतिकिंपुनवर्क्तव्यमित्यर्थः

अनिष्क्रममाणेचमधुरिपावसाववश्यमत्रबिलेत्यंतनाशमाप्तोभविष्यत्यन्यथातस्यकथमेतावंतिदिनानिशत्रुजयेव्याक्षेपोभवतीतिकृताध्यवसायाद्वार कामागताहतःकृष्णइतिकथयामासुः २५ तद्बांधवाश्चतत्कालोचितमखिलमुपरतक्रियाकलापञ्चक्रुः २६ तत्रचास्ययुध्यमानस्यातिश्रद्धादत्तविशि ष्टपात्रोपयुक्तान्नतोयादिनाकृष्णस्यबलप्राणपुष्टिरभूत् २७ इतरस्यानुदिनमतिगुरुपुरुषभिद्यमानस्यातिनिष्ठुरप्रहारपीडिताखिलावयवस्यनिराहा रतयाचबलहानिः । निर्जितश्चभगवताजांबवान्प्रणिपत्याहअसुरसुरयक्षगंधर्वराक्षसादिभिरप्यखिलैर्भगवान्नजेतुंशक्यःकिमुतावनिगोचरैरल्पवीर्यै र्नरावयवभूतैश्चतिर्यग्योन्यनुसृतिभिःकिंपुनरस्मद्विधैरवश्यंभगवतोऽस्मत्स्वामिनोनारायणस्यसकलजगत्परायणस्यांशेनभवताभवितव्यमित्युक्तः २८ तस्मैभगवानखिलमवनिभारावतारमाचचक्षे २९ प्रीत्यांजितकरतलस्पर्शनेनचैनमपगतयुद्धखेदंचकार ३० सचप्रणिपत्यैनंपुनरपिप्रसाद्य जांबवतींनामकन्यांगृहागमनार्घभूतांग्राहयामास ३१ स्यमंतकमणिमप्यसौप्रणिपत्यतस्मैप्रददौअच्युतोप्यतिप्रणतात्तस्मादग्राह्यमपितन्मणिर त्नमात्मशोधनायजग्राह ३२ सहजांबवत्याद्वारकामाजगामभगवदागमनोद्भूतहर्षोत्कर्षस्यद्वारकावासिजनस्यकृष्णावलोकनात्तत्क्षणमेवातिप रिणतवयसोपिनवयौवनमिवाभवत् । आनकदुन्दुभिंचदिष्ट्यादिष्ट्येतिचसकलयादवाःस्त्रियश्चसभाजयामासुः ३३ भगवानपियथानुभूतम शेषयादवसमाजेयथावदाचचक्षेस्यमंतकंचसत्राजितायदत्त्वामिथ्याभिशस्तिंविशुद्धिमवापजांबवतींचांतःपुरेनिवेशयामाससत्राजितोऽपिमयास्याभूत मलिनमारोपितमितिजातसंत्रासःस्वसुतांसत्यभामांभगवतेभार्यांददौ ३४ तांचाक्रूरकृतवर्मशतधन्वप्रमुखायादवाःपूर्ववरयामासुः । ततस्तत्प्रदा नादवज्ञातमात्मानंमन्यमानाःसत्राजितेवैरानुबंधंचक्रुः । अक्रूरकृतवर्मप्रमुखाश्चशतधन्वानमूचुः । अयमतिदुरात्मासत्राजितोयोऽस्माभिर्भवताचा भ्यर्थितोप्यात्मजामस्मान्भवंतंचाविगणय्यकृष्णायदत्तवान्तदलमनेनजीवताघातयित्वैनंतन्महारत्नंत्वयाकिंनगृह्यते वयमप्यभ्युपपत्स्यामः । य

२८ अवनेर्भारस्यावतारोयस्मात्तमात्मानमखिलंजन्मादिसहितंआचचक्षेआख्यातवान् यद्वाभारावतारंकृतंकरिष्यमाणंचाख्यातवान् २९ यथातिलादिस्नेहयुक्तकरेणमर्दयञ्श्रममपन यतिकश्चित्तथाप्रीत्यांजितंम्रक्षितयुक्तंयत्करतलंतस्यस्पर्शनेन ३० कन्यांग्राहयामासदत्तवान् ३१ आत्मशोधनायलब्धमपिमणिंक्वचिन्निधायागतइतिदुर्जनखनिवारणाय ३२ दिष्ट्यादि ष्ट्याभद्रंभद्रमित्यानंदेनापूजयन् ३३ प्रसंगागतस्यमंताख्यानजांबवतीविवाहवत्सत्यभामाविवाहमाह सत्राजितोपीति अभूतमलिनंमिथ्यादुर्यशः ३४ कृष्णेमिथ्यादोषारोपेफलं व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तुमाह तांचेत्यादिनामणिरत्नमपहृतमित्यंतेन अभ्युपपत्स्यामःसाहाय्यंकरिष्यामः यदिवैरानुबंधमप्यच्युतःकारिष्यतीत्यंगीकृतत्वादच्युतबलभद्राभ्यामुभाभ्यांवैरानुबंधेसाहाय्याकरणेपि नदोषइतिभावः ३५ कृष्णस्यान्यत्रगमनंविनासत्राजितवधासंभवात्तत्प्रसंगमाह जतुगृहेति सर्वज्ञोपिकृष्णःकुल्यार्थमागतश्चेत्तर्हिपांडवामृताएवेतिदुर्योधनस्यतदन्वेषणादिबलशैथिल्या र्थंकुलोचितकरणायवारणावतंहस्तनापुरंगतइत्यर्थः ३६ इदानीमर्थनिमित्तान्बहूननर्थान्वक्ष्यन्कृष्णस्यपुनरापिमिथ्याभियोगप्रसंगमाह पितृवधामर्षेत्यादिनानरकादिकंनाभूदित्यंतेन

द्यच्युतस्तवापिवैरानुबंधंकरिष्यतीति ३५ एवमुक्तस्तथेत्यसावप्याहजतुगृहदग्धानांचपांडुनंदनानांविदितपरमार्थोपिभगवान्दुर्योधनप्रयत्नशैथि ल्यार्थंकुल्यकरणायवारणावतंगतः ३६ गतेचतस्मिन्सुप्तमेवसत्राजितंशतधन्वाजघानमणिरत्नंचाददेपितृवधामर्षपूर्णाचसत्यभामाशीघ्रंस्यंदना रूढावारणावतंगत्वाभगवतेहंप्रतिपादितेतिअक्षांतिमताशतधन्वनास्मत्पिताव्यापादितः । तच्चस्यमंतकमणिरत्नमपहृतंतदियमस्यावहासनातदालो च्ययदत्रयुक्तंतत्क्रियतामितिकृष्णमाह ३७ तयाचैवमुक्तःपरितुष्टांतःकरणोपिकृष्णःसत्यभामामर्षताम्रलोचनःप्राहसत्येममैषावहासनानाहमेतां तस्यदुरात्मनःसहिष्ये ३८ नह्यनुल्लंघ्यवरपादपंतत्कृतनीडाश्रयिणोविहंगावध्यंतेतदलमत्यर्थममुनास्मत्पुरतःशोकप्रेरितवाक्यपरिकरेणेत्यु क्त्वाद्वारकामभ्येत्यबलदेवमेकांतेवासुदेवःप्राहमृगयागतंप्रसेनमटव्यांमृगपतिर्जघानसत्राजितोप्यधुनाशतधन्वनानिधनंप्रापितः ३९ तदुभ यविनाशात्तन्मणिरत्नमावाभ्यांसामान्यंभविष्यति ४० तदुत्तिष्ठारुह्यतांरथः । शतधनुर्निधनायोद्यमंकुर्वित्याभिहितस्तथेतिसमन्विच्छितवान् । कृतो द्योगौचतावुभावुपलभ्यशतधन्वाकृतवर्माणमुपेत्यपार्ष्णिपूरकर्मनिमित्तमचोदयत् । आहचैनंकृतवर्मानाहंबलभद्रवासुदेवाभ्यांसहविरोधायालमित्यु क्तश्चाक्रूरमचोदयत् । आहचासावपिनाहिकश्चिद्भगवतापादप्रहारपरिकंपितजगत्त्रयेणासुरवनितावैधव्यकारिणाप्रबलरिपुचक्राप्रतिहतचक्रेणचाक्रि णामदमुदितनयनावलोकितारिबलविशातनेनातिगुरुर्वैरिवारणाकर्षणाविष्कृतमहिमारुसरिणसीरिणाचसहसकलजगद्वंद्यानाममराणामपियोद्धुंसम र्थः । किमुताहंतदन्यतःशरणमभिलष्यताम् ४१ इत्युक्तःशतधनुराहयद्यस्मत्परित्राणसमर्थंभवानात्मानमवगच्छतितदयमस्मन्मणिःसंगृह्यर

अस्यएतत्कर्तृकावहासनापरिभवः ३७ परितुष्टांतःकरणोपीत्यस्यायंभावःमदाज्ञालंघनफलमेतादृशमेवतस्यचापुत्रस्यतन्मणिरत्नंसत्यभामायाएवेति ममद्विषयिणीअवहासना ३८ सत्राजितस्यवधेकथंभगवतोऽवहासनेत्यतआह अनुलंघ्येति अत्रपादपस्थानेभगवान्पक्षिस्थानेसत्राजितः ३९ आवाभ्यामावयोः ४० भगवताचक्रिणाकृष्णेनसीरिणाबलभद्रेणचस हामराणांमध्येकश्चिद्योद्धुंनसमर्थइत्यन्वयः त्रिविक्रमावतारेपादप्रहारेणपरिकंपितंजगत्त्रयंयेन प्रबलरिपुचक्रेषुशत्रुसैन्येष्वप्रतिहतंचक्रंयस्यतेनचक्रिणासीरिणाच किंभूतेन मदमुदितनयना भ्यांविलोकितेनैवारिपुबलंनिशातयतीतितथातेन अतिगुरवोमहांतोवैरिणोरिपवएव वारणास्तेषामाकर्षणेनाविष्कृतोमहिमायेनतथाविधःसीरोहलमस्यास्तीतितथाभूतेन४१ स्यमंतकमणिन्यासे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदितेभगवान्ज्ञास्यतिसत्राजितवधेऽक्रूरस्यापि साहाय्यमस्तीतितन्माभूदित्युक्तम् यद्यंतायामपीति ४२ अतुलवेगांअतिशीघ्रगामिनींशतयोजनवाहिनींतावद्वर्त्मएकेनाह्नागंतुंसमर्थाम् ४३ वाह्यमानावहनायप्रेर्यमाणा ४४ लोकेहिसर्वस्यसर्वत्रधनार्थमविश्वासइतिदर्शयितुंसर्वज्ञोपिभगवान्बलदेवंप्रतिपुनराह अत्रैवेति ४५ तंश्रीकृष्णंआक्षिप्यतिरस्कृत्य ४६ प्रा

क्ष्यतामित्युक्तःसोप्याहयद्यंतायामप्यवस्थायांनकस्मैचिद्भवान्कथयिष्यतितदहमेनंग्रहीष्यामितथेत्युक्तेक्रूरस्तन्मणिरत्नंजग्राह ४२ शतधनुरप्यतुलवेगांशतयोजनवाहिनींवडवामारुह्यापक्रांतःशैब्यसुग्रीवमेघपुष्पबलाहकाश्वचतुष्टययुक्तरथावस्थितौबलदेववासुदेवौतमनुप्रयातौ ४३ साचवडवाशतयोजनप्रमाणंमार्गमतीत्यपुनरपिवाह्यमानामिथिलावनोद्देशेप्राणानुत्ससर्जशतधनुरपितांपरित्यज्यपदातिरेवाद्रवत् ४४ कृष्णोऽपिबलभद्रमाहतावदत्रैवस्यंदनेभवतास्थेयमहमेनमधमाचारंपदातिनमनुगम्ययावद्घातयामि । अत्रहिभूभागेदृष्टदोषाहयानैतेऽश्वाभवतेमंभूमिभागमुल्लंघ्यनेयाः ४५ तथेत्युक्त्वाबलभद्रोरथएवतस्थौकृष्णोऽपिद्विक्रोशमात्रंभूमिभागमनुसृत्यदूरस्थस्यैवचक्रंक्षिप्त्वाशतधनुषःशिरश्चिच्छेदतच्छरीरांबरादिषुचबहुप्रकारमन्विष्यन्नपिस्यमंतकंमणिंनावापयदातदोपगम्यबलभद्रमाहवृथैवास्माभिर्घातितःशतधनुर्नप्राप्तमखिलजगत्सारभूतंतन्मणिरत्नमित्याकर्ण्योद्भूतकोपोबलभद्रोवासुदेवमाहधिक्त्वांयस्त्वमर्थलिप्सुरेतच्चतेभ्रातृत्वान्मर्षयेतदयंपंथाःस्वेच्छयागम्यताम् । नमेद्वारकयानबन्धुभिःकार्यमलमेभिर्ममाग्रतोलीकशपथैरित्याक्षिप्यतंकथंचित्प्रसाद्यमानोऽपिनतस्थौविदेहपुरींप्रविवेश ४६ जनकश्चार्घपूर्वकमेवैनंगृहंप्रवेशयामासतत्रैवचतस्थौवासुदेवोऽपिद्वारकामाजगाम । यावच्चजनकराजगृहेबलभद्रोऽवतस्थेतावद्धार्तराष्ट्रोदुर्योधनस्तत्सकाशाद्गदाशिक्षामशिक्षत् ४७ वर्षत्रयांतेचबभ्रूग्रसेनप्रभृतिभिर्यादवैर्नतद्रत्नंकृष्णेनापहृतमितिकृतावगतिभिर्विदेहपुरींगत्वाबलदेवंसंप्रत्याय्यद्वारकामानीतः ४८ अक्रूरोऽप्युत्तममणिसमुद्भूतसुवर्णध्यानपरःसततंयज्ञानीजे ४९ सवनगतौहिक्षत्रियवैश्यौनिघ्नन्ब्रह्महाभवतीत्यतोदीक्षाकवचंप्रविष्टएवतस्थौद्विषष्टिवर्षाणि ५० एवंतन्मणिप्रभावात्तत्रोपसर्गदुर्भिक्षमरकादिकंनाभूत् ५१ अथाक्रूरपक्षीयैर्भोजैःशत्रुघ्नेसात्वतस्यप्रपौत्रेव्यापादितेभोजैःसहाक्रूरोद्वारकामपहायापक्रांतः ५२ तदपक्रांतिदिनादारभ्यतत्रोपसर्गव्यालानावृष्टिमरकाद्युपद्रवाबभूवुः । अथयादवबलभद्रोग्रसेनसमवेतोऽमंत्रयद्भगवानुरगारिकेत

संगिकमाह यावच्चेति अशिक्षदकरोत् ४७ तदेवंसर्वज्ञयोःश्रीकृष्णबलभद्रयोर्मण्यर्थेशपथादिकंभक्तस्याक्रूरस्यचज्ञात्वाकृष्णायमण्यप्रदानंधनदोषदर्शनार्थमेवोक्तं बलभद्रागमनमाह वर्षत्रयेति संप्रत्याय्यशपथादिनाविश्वास्य ४८ सुवर्णध्यानपरःएतावद्भिःसुवर्णैःकिंक्रियतइतिविचारपरः ४९ सवनगतौदीक्षितौ ५० मरकोजनमारी ५१ अथरामादीनांकृष्णेस्यमंतकापहारशंकानिरासंवक्तुमाह अथाक्रूरेत्यादिनायावदध्यायसमाप्ति ५२ उरगारिकेतनोगरुडध्वजः यद्यतइदंप्रचुरोपद्रवागमनंएतन्निमित्तमालोच्यतामित्यर्थः ५३ श्वफल्कगांदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्योर्माहात्म्योक्तिस्तत्पुत्राक्रूरमाद्दिमख्यापनार्था ५४ गर्भेकन्यापूर्वमासीदितिनिश्चयोज्योतिःशास्त्रादिना ५५ एवंपूर्वोक्तागुणायस्यमिथुनस्यतस्मात् ५६ इतिपूर्वोक्तप्रकारेणातिगुणव
त्यक्रूरेइतोनिष्क्रांततयानिमित्तेसतिअपरनिमित्तानुसरणेनालंव्यर्थमित्यर्थः५७कृष्णश्चिंतयामासेत्युक्त्याभगवतस्तस्यसर्वज्ञस्यसतस्तत्परामर्शेनमणिसंभावनंलोकवृद्धानुसरणमात्रंनतत्त्वतः अ

नःकिंयदिदमेकदैवप्रचुरोपद्रवागमनमेतदालोच्यताम् ५३ इत्युक्तेअंधकनामायदुवृद्धःप्राहअस्याक्रूरस्यपिताश्वफल्कोयत्रयत्राभूत्तत्रतत्रदुर्भिक्ष
मरकानावृष्ट्यादिकंनाभूत् ५४ काशिराजस्यविषयेत्यंतानावृष्ट्यांश्वफल्कोनीयतततस्तत्क्षणादेवदेवोववर्षकाशिराजस्यपत्न्याश्चगर्भेकन्यापूर्वमासी
त् ५५ सापिपूर्णेऽपिप्रसूतिकालेनैवनिश्चक्रामएवंचतस्यगर्भस्यद्वादशवर्षाण्यनिष्क्रामतोययुःकाशिराजश्चगर्भस्थांतामात्मजामाहपुत्रिकस्मान्नजा
यसेनिष्क्रम्यतामास्यंतेद्रष्टुमिच्छाम्यहंस्वकांचमातरंकिमत्रचिरंक्लेशयसीत्युक्तेगर्भस्थैवव्याजहारतातयद्येकैकांगांदिनेदिनेब्राह्मणेभ्योददासितदा
हमन्यैस्त्रिभिर्वर्षैरस्माद्गर्भान्निष्क्रमिष्यामीति । एतच्चतद्वचनमाकर्ण्यराजाब्राह्मणायदिनेदिनेगांप्रादात्सापितावताकालेनजातातततस्तस्याःपितागां
दिनीतिनामचकारतांचगांदिनींकन्यांश्वफल्कायोपकारिणेगृहागतायार्घभूतांप्रादात्साचगांदिनीप्रतिदिनंयावज्जीवंब्राह्मणायगांदत्तवतीतस्यामयम
क्रूरःश्वफल्काज्जज्ञेतस्यैवंगुणमिथुनादुत्पत्तिः५६तत्कथमस्मिन्नपक्रांतेत्रमरकदुर्भिक्षाद्युपद्रवानभविष्यंतितदयमानीयतामित्यलमतिगुणवत्यपरान्वे
षणेनेति ५७यदुवृद्धांधकस्यतद्वचनमाकर्ण्यकेशवोग्रसेनबलभद्रपुरोगमैर्यदुभिःकृतापराधतितिक्षाभवमभयंदत्त्वाश्वाफल्किःस्वपुरमानीतःतत्रचाग
तएवतत्स्थस्यमणेरनुभावादनावृष्टिमरकदुर्भिक्षव्यालाद्युपद्रवःशशामकृष्णश्चचिंतयामासस्वल्पमेतत्कारणंयदयंगांदिन्यांश्वफल्केनाक्रूरोजातःसुम
हांश्चायमनावृष्टिदुर्भिक्षमरकाद्युपद्रवशमनकारीप्रभावः ५८ तन्नूनमस्यसकाशेसमहामणिःस्यमंतकाख्यस्तिष्ठतितस्यह्येवंविधाःप्रभावाःश्रूयंते ।
अयमपियज्ञादनंतरमन्यत्क्रतुंतरमनंतरंतस्माद्यज्ञांतरंयजतीति स्वल्पोपादानंचास्यासंशयमत्रासौवरमणिस्तिष्ठतीतिकृताध्यवसायोऽन्यत्प्रयोजन
मुद्दिश्यसकलयादवसमाजमात्मगेहेएवाचीकरत् ५८ अत्रचोपविष्टेष्वखिलेषुयादवेषुपूर्वप्रयोजनमुपन्यस्यपर्यवसितेचतस्मित्प्रसंगागतपरिहासक
थामक्रूरेणसहकृत्वाजनार्दनस्तमक्रूरमाह ५९ दानपतेजानीमएववयंयथाशतधन्वनातदिदमखिलजगत्सारभूतंस्यमंतकरत्नंसमर्पितम् । तदेत
द्राष्ट्रोपकारकंभवतःसकाशेतिष्ठतीतितिष्ठतु सर्वएववयंतत्प्रभावफलभुजःकिंत्वेषबलभद्रोऽस्मानाशंकितवान्तदस्मत्प्रीतयेदर्शयेत्यभिहितःसरत्नःसोऽ

न्यथासमस्तमंगलमूर्तौभगवतिकृष्णेसतितदरिष्टदर्शनमपिदुर्घटमिति तथाहशुकः इत्यंगोपदिशंत्येकेविस्मृत्यप्रागुदाहृतम् मुनिवासानिवासोकिंघटेतारिष्टदर्शनमिति तस्मादेतल्लोकानुसरणं
परप्रत्ययेनस्वापवादपरिहारपरमेवेति ५७ अल्पोपादानम् स्वल्पजीविकाद्रव्यंअन्यत्प्रयोजनंविवाहादिकमुद्दिश्यसमाजंसमुदायमचीकरत्कारयामास ५८ यदर्थंयादवाःसमाहूतास्तदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पन्यस्ययुक्तमयुक्तंवेतिपृष्ट्वा ५९ दानपतेइतिसंबोधनंसाकूतम् ६० धारणेक्लेशेनक्लेशहेतुनियमेनभोगेषुअसंगिमानसंयस्यसोहंस्वसुखस्यकलांलेशमपिनवेद्मि ६१ तर्हिकिमितिमयि नोक्तंतत्राह एतावन्मात्रंस्वल्पमपिअशेषराष्ट्रोपकारकमपिअयंधारयितुंनशक्नोतीत्यशक्तंमांभवान्मंस्यतेइतिभियाआत्मनामयातुभ्यंनोदितंच अस्याशेषराष्ट्रेतिपाठे अस्यराज्ञःउग्रसेनस्येत्य

चिंतयत् ६० किमत्रानुष्ठेयमन्यथाचेद्रवीम्यहंतत्केवलांबरतिरोधानमन्विष्यंतोरत्नमेतद्दृक्ष्यंतीत्यन्वेषणंनक्षेममितिसंचिंत्यतमखिलजगत्कारणभूतंनारायणमाहाक्रूरोभगवन्ममैतत्स्यमंतकरत्नंशतधनुषासमर्पितम् । अपयातेचतस्मिन्नद्यश्वःपरश्वोवाभगवान्मांयाचयिष्यतीतिकृतमतिरतिकृच्छ्रेणैतावत्कालमधारयम् । अस्यचधारणक्लेशेनाहमशेषोपभोगेष्वसंगिमानसोनवेद्मिस्वसुखकलामपि ६१ एतावन्मात्रमप्यशेषराष्ट्रोपकारिधारयितुंनशक्नोतीतिमांभगवान्मंस्यतइत्यात्मनानचोदितम् ६२ तदिदंस्यमंतकरत्नंगृह्यतामिच्छयायस्याभिमतंतस्यसमर्प्यतांततःसोऽधोवस्त्रंनिगोपितातिलघुकनकसमुद्गकंप्रकटीकृतवान् ६३ ततश्चनिष्क्राम्यस्यमंतकमणिंतत्रयदुसमाजेमुमोचमुक्तमात्रेचतेनातिकांत्यातदखिलमास्थानमुद्योतितम् ६४ आहाक्रूरःसएषमणिर्यःशतधन्वनास्माकंसमर्पितोयस्यायंसएवगृह्णात्विति । तमालोक्यसर्वयादवानांसाधुसाध्वितिविस्मितवचसांवाचोऽश्रूयंत । तमालोक्यममायमच्युतेनैवसामान्यःसमन्विच्छितइतिबलभद्रःसस्पृहोऽभवत् ६५ ममेदंपितृधनमित्यतीवचसत्यभामास्पृहांचकार । बलसत्याननावलोकनात्कृष्णोऽप्यात्मानंचक्रांतरावस्थितमिवमेने ६६ सकलयादवसमक्षंचाक्रूरमाहएतद्धिमणिरत्नमात्मसंशोधनायैषांयदूनांदर्शितम् । एतच्चममबलभद्रस्यसामान्यंपितृधनंचैतत्सत्यभामायानान्यस्य ६७ एतत्सर्वकालंशुचिनाब्रह्मचर्येणचध्रियमाणमशेषराष्ट्रस्योपकारकमशुचिनाध्रियमाणमाधारमेवहंति ६८ अतोऽहमस्यषोडशस्त्रीसहस्रपरिग्रहादसमर्थोधारणे ६९ कथंचैतत्सत्यभामास्वीकरोत्वार्यबलभद्रेणापिमदिरापानाद्यशेषोपभोगपरित्यागःकथंकार्यः । तदलंयदुलोकोऽयंबलभद्रोहंसत्याचत्वांदानपतेप्रार्थयामः । एतद्भवानेवधारयितुंसमर्थस्त्वत्स्थंचास्यराष्ट्रस्योपकारकंतद्भवानाशेषराष्ट्रोपकारनिमित्तमेतत्पूर्ववद्धारयतुत्वयान्यथानवक्तव्यमित्युक्तोदानपतिस्तथेत्युक्त्वाजग्राहतन्महारत्नंततःप्रभृतिचाक्रूरःप्रकटेनैवातितेजसाजाज्वल्यमानेनात्मकंठासक्तेनादित्यइवांशुमालीचचार ७० इत्येतांभगवतोमिथ्याभिशस्तिक्षालनायःस्मरतिनतस्यकदाचिदल्पापिमिथ्याभि

र्थः ६२ कनकसमुद्गकंसुवर्णसंपुटकम् ६३ आस्थानंसभा ६४ ममबलभद्रस्यात्मनासहायंमणिःसामान्यःसाधारणइतिअच्युतेनकृष्णेनैवसमन्विच्छितःस्वीकृतइतिहेतोःसस्पृहोऽभवत् इच्छेर्लिंगेधातोःक्तः ६५ चक्रयोरंतरावस्थितमिवसंशयितमात्मानंमेने गोचक्रांतरेतिपाठेशकटचक्रबलीवर्दांतर्गतमिवेत्यर्थः ६६ नान्यस्यएतन्नयभिन्नस्य ६७ ततःकिमतआह एतदिति आधारंधारकमेवहंति ६८ षोडशस्त्रीसहस्रपरिग्रहादितिब्रह्मचर्यंनैवघटतइतिकथनार्थंहेतुः ६९ ततःप्रभृतिप्रकटनेति बलभद्रसत्यभामाद्यभ्यसूयाभावात् भक्तेऽक्रूरेभगवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापितमितिलोकभयाच्चमणिंगुप्तंभगवदनुमतमेवाधारयत् इदानीमभिशस्तिपरिहारायस्वयमेवकेवलंप्रकटीकृतमक्रूरोधृतवानित्यर्थः ७० ७१ ॥ ॥ इतिश्रीविष्णुपुराणेटीकायांरत्नग
र्भे त्रयोदशोध्यायः १३ ॥ ॥ क्रमागतावृष्णिवंशाःशैनेयाद्याश्चतुर्दशे वर्ण्यंतेशिशुपालस्यसायुज्यंचात्रसूच्यते १ सत्वतस्यसप्तमः पुत्रोवृष्णिस्तत्पुत्रौअनमित्रशिनीतत्रान
मित्रस्यनिप्नस्तस्यप्रसेनसत्राजितावित्येकोवंशउक्तस्तत्प्रसंगात्स्यमंतकहरणमुक्तमिदानीमनमित्रानुजस्यशिनेर्वंशउच्यतेअनमित्रस्यानुजइत्यादिनाइतिशैनेयाइत्यंतेन १ पुनश्चानमित्रस्य

शस्तिर्भवतिअव्याहतेंद्रियश्चाखिलपापमोक्षमवाप्नोति ७१ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेत्रयोदशोध्यायः १३ । । पराशरउवाच । । अ
नमित्रस्यानुजःशिनिर्नामाभवत्तस्यापिसत्यकःसत्यकात्सात्यकिर्युयुधाननामाततोप्यसंगस्तत्पुत्रश्चतूणिस्तूणेर्युगंधरइतिशैनेयाः १ अनमित्रस्यै
वान्वयेपृश्निस्तस्मात्श्वफल्कस्तत्प्रभावःकथितएव।श्वफल्कस्यकनीयांश्चित्रकोनामाभवद्भ्राता।श्वफल्कादक्रूरोगांदिन्यामभवत् । तथोपमद्गुमृदर
विशारिमेजयगिरिक्षत्रोपक्षत्रशत्रुघ्नारिमर्दनधर्मधृक्दृष्टशर्मगंधमीजावाहप्रतिवाहाख्याःपुत्राःसुताराख्याचकन्यादेववानुपदेवश्चाक्रूरपुत्रौपृथुविपृथु
प्रमुखाश्चित्रकस्यपुत्राबहवोऽभवन् २ कुकुरभजमानशुचिकंबलबर्हिषाख्यास्तथांधकस्यचत्वारःपुत्राः ३ कुकुराद्धृष्टस्तस्माच्चकपोतरोमाततश्च
विलोमातस्मादपितुंबुरुसखाभवसंज्ञश्चंदनोदकदुंदुभिस्ततश्चाभिजित्ततःपुनर्वसुस्तस्याप्याहुकःपुत्रआहुकीकन्याभूत् ४ आहुकस्यदेवकोग्रसे
नौद्वौपुत्रौदेववानुपदेवश्चसुदेवोदेवरक्षितोदेवकस्यापिचत्वारःपुत्रास्तेषांचवृकदेवोपदेवादेवरक्षिताश्चौदेवाशांतिदेवासहदेवादेवकीचसप्तभगिन्यस्ता
श्चसर्वाएववसुदेवउपयेमे । उग्रसेनस्यापिकंसन्यग्रोधसुनामकंकशंकुस्वभूमिराष्ट्रपालयुद्धपालयुद्धमुष्टितुष्टिमत्संज्ञाःपुत्राः । कंसाकंसवतीसुतनु
राष्ट्रपालीकंकीचोग्रसेनतनूजाः ५ भजमानाच्चविदूरथःपुत्रोभवत् । विदूरथाच्छूरःशूराच्छमीशमिनःप्रतिक्षत्रस्तस्मात्स्वयंभोजस्ततश्चहृदीकः ६
ततश्चकृतवर्मशतधनुर्देवमीढुषाद्याबभूवुः ७ देवमीढुषस्यापिशूरस्यापिमारिषानामपत्न्यभवत् ८ तस्यांचासौदशपुत्रानजनयद्वसुदेवपूर्वा
न्वसुदेवस्यजातमात्रस्यैवएतद्गृहेभगवदंशावतारमव्याहतदृष्ट्यापश्यद्भिर्देवैर्दिव्यानकादुंदुभयश्चवादिताः ९ ततस्तदैवानकदुंदुभिसंज्ञामवाप ।
तस्यापिदेवभागदेवश्रवाअनाधृष्टिकरुंधकवत्सवालकसृंजयश्यामशमीकगंडूषसंज्ञानवभ्रातरोबभूवुः । पृथाश्रुतदेवाश्रुतकीर्तिश्रुतश्रवाराजाधि

वंशांतरमाह अनमित्रस्येत्यादिनाबहवोभवन्नित्यंतेन २ अंधकस्यसात्वतपुत्रस्यकुकुरादयःपुत्राः ३ तत्रकुकुरस्यवंशमाह कुकुरादित्यादिनाउग्रसेनतनूजाइत्यंतेन भवसंज्ञस्यैवोपना
मचंदनोदकदुंदुभिरिति ४ तनूजाःकन्याः ५ भजमानस्यसात्वतपुत्रस्यकृमिकृकणदृष्णयइत्येकोवंशउक्तः इदानींतस्यैववंशांतरमाह भजमानादित्यादिनायावदध्यायसमाप्ति ६ ह
दिकात्कृतवर्मशतधनुर्देवमीढुषाद्याःपुत्राबभूवुः देववार्हाद्याइतिपाठेदेवपदेनदेवमीढुषएवोक्तः ७ देवमीढुषस्यपुत्रोयःशूरस्तस्यमारिषानामपत्न्यभूदित्यर्थः ८ आनकाःपटहाः दुंदुभयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेर्यः ९ कानीनःकन्यकावस्थायांजातः १० अनाचारःस्वपुत्रादिद्वेषःविक्रमःशौर्यताभ्यांसंपन्नः ११ अक्षताःपूर्णावीर्यादिगुणायस्यसः वीर्यंबलम् शौर्यंउत्साहः पराक्रमःप्रभावः समाक्रांताःत्रैलोक्येश्वरायेनतथाभूतःप्रभावोयस्यसः १२ बहुकालमुपभुक्तंभगवत्सकाशादवाप्तंशरीरपातोद्भवपुण्यफलंयेनसः १३ अवांतरान्वयभेदात्तत्रशब्दस्यपुनरुक्तिर्नदोषाय १४

देवीचवसुदेवादीनांपंचभगिन्योऽभवन् । शूरस्यकुंतिभोजनामासखाभवत् । तस्मैचापुत्रायपृथामात्मजांविधिनाशूरोददत्तांचपांडुरुवाहतस्यांच धर्मानिलशक्रैर्युधिष्ठिरभीमार्जुनाख्यास्त्रयःपुत्राःसमुत्पादिताःपूर्वमनूढायाश्चभगवताभास्वताकर्णाख्यःकानीनःपुत्रोजन्यत १० तस्याश्चसपत्नीमाद्रीनामाभवत् । तस्यांचनासत्यदस्राभ्यांनकुलसहदेवौपांडोःपुत्रौजनितौ । श्रुतदेवांतुवृद्धशर्मानामकारूषउपयेमेतस्यांदंतवक्त्रोनाममहासुरोजज्ञेश्रुतकीर्तिमपिकेकयराजउपयेमेतस्यासंतर्दनादयःपंचकैकेयाःपुत्राबभूवुःराजाधिदेव्यामावंत्यौविंदानुविंदौजज्ञाते । श्रुतश्रवसमपिचेदिराजोदमघोषनामाउपयेमेतस्यांशिशुपालमुत्पादयामास । सहिपूर्वमप्यनाचारविक्रमसंपन्नोदैत्यादिपुरुषोहिरण्यकशिपुरभूत् ११ यश्चभगवतासकललोकगुरुणाघातितःपुनरप्यक्षतवीर्यशौर्यसंपत्पराक्रमगुणःसमाक्रांतत्रैलौक्येश्वरप्रतापोदशाननोऽभवत् १२ बहुकालोपभुक्तभगवत्सकाशावाप्तशरीरपातोद्भवपुण्यफलोऽथभगवतैवराघवरूपिणासोपिनिधनमुपनीतश्चेदिराजदमघोषपुत्रःशिशुपालनामाभवत् १३ शिशुपालत्वेचभगवतोभूभारावतारणायावतीर्णांशस्यपुंडरीकनयनाख्यस्योपरिद्वेषानुबंधमतितरांचकारभगवताचनिधनमुपनीतः । तत्रैवपरमात्मभूतमनसस्तदेकाग्रतयातत्रैवसायुज्यमवाप १४ भगवान्हिप्रसन्नोयथाभिलषितंददातिअप्रसन्नोऽपिनिघ्नन्दिव्यमनुपमस्थानंप्रयच्छति १५ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेचतुर्दशोध्यायः १४ । । मैत्रेयउवाच । । हिरण्यकशिपुत्वेचरावणत्वेचविष्णुना । अवापनिहतोभोगानप्राप्यानमरैरपि १ नलयंतत्रतेनैवनिहतःसकथंपुनः । संप्राप्तःशिशुपालत्वेसायुज्यंशाश्वतेहरौ ३ एतदिच्छाम्यहंश्रोतुंसर्वंधर्मभृतांवर । कौतूहलपरेणैतत्पृष्टोमेवक्तुमर्हसि ३ । । पराशरउवाच । । दैत्येश्वरस्यतुवधायाखिललोकोत्पत्तिस्थितिविनाशकारिणाऽपूर्वतनुंगृह्णतानृसिंहरूपमाविष्कृतंतत्रहिरण्यकशिपोर्विष्णुरयमित्येवंनमनस्यभूत् ४ निरतिशयपुण्यजातसंभूतमेतत्सत्त्वमितिरजोद्रेकप्रेरितैकाग्रमतिस्तद्भवनायोगात्ततोवाप्तवधहैतुकीं

भगवद्द्वेषादपिसायुज्यमुपपादयति भगवान्हीति दिव्यत्वेप्यनुपमस्थानंतथाप्रयच्छतीति १५ इतिश्रीविष्णुपुराणेचतुर्थेंशेचतुर्दशोध्यायः । हरेर्जनिःपंचदशेसंख्यानुक्तिश्चयादवे सायुज्यंशिशुपालस्यसोपपत्तिकमुच्यते १ विष्णुनैवनिहतत्वात्प्राग्जन्मन्येवकिंनमुक्तइतिहिरण्यकशिपुत्वइत्यादिप्रश्नार्थः १ २ ३ वस्तुशक्त्याभगवन्नामकीर्तनध्यानादिनाक्षीणकल्मषस्यतत्साक्षात्कारेणैवान्येषामपिमोक्षः ततःशिशुपालत्वेचतत्संभवात्समुक्तोनातःप्रागित्युत्तरार्थः सनकाद्यनुग्रहात्तृतीयजन्मन्येवावश्यंभावित्वान्मोक्षस्यतत्रैवतद्धेतुत्वसंभवमाह दैत्येश्वरस्येत्यादिनाकिमुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तिमतामित्यंतेन ४ रजोद्रेकेतिसंधिरार्षः निरतिशयपुण्यैत्यादिरूपारजसउद्रेकेणप्रेरिताएकाग्रातन्मात्रविषयिणीमतिर्यस्यसः तद्भावनारूपात्योगात्ततोवाप्तवधएवहेतुर्यस्यास्ताम् अखिलत्रैलोक्यमध्येआधिक्याधारिणीमतिशयितांभोगसंपदमवापेत्यन्वयः ५ अतस्तस्मिन्मनसोनालंबनीकृतविषयीकृतेपरब्रह्मभूतेतदालयंसायुज्यंनावापेत्यनुषंगः ६ दशाननत्वे पिअस्यदाशरथिरूपदर्शनमेवपूर्वमासीत् विपद्यमानस्यतस्यांतःकरणेमानुषबुद्धिरेवाभून्नायमच्युतइत्यासक्तिर्निश्चयोभूदित्यर्थः ७ अच्युतविनिपातमात्रात्फलंश्रेष्ठंजन्मऐश्वर्यंचाव्याहतं

निरतिशयामेवाखिलत्रैलोक्याधिक्यधारिणींदशाननत्वेभोगसंपदमवाप ५ नातस्तस्मिन्ननादिनिधनेपरब्रह्मरूपेभगवत्यनालंबनीकृतेमनसस्तत्र लयम् ६ दशाननत्वेप्यनंगपराधीनतयाजानकीसमासक्तचेतसोदाशरथिरूपधारिणस्तद्रूपदर्शनमेवासीत् । नायमच्युतइत्यासक्तिर्विपद्यतोंतः करणस्यमानुषबुद्धिरेवकेवलमभूत् ७ पुनरच्युतविनिपातमात्रफलमखिलभूमंडलश्लाघ्यचेदिराजकुलजन्माव्याहतंचैश्वर्यंशिशुपालत्वेचावाप ८ तत्रत्वखिलान्येवभगवन्नामकारणान्यभवन्। ततश्चतत्कारणकृतानांतेषामशेषाणामेवाच्युतनाम्नामनवरतमनेकजन्मसंवर्धितविद्वेषानुबंधिचित्तोविनिं दन्संतर्जनादिषूच्चारणमकरोत् ९ तच्चरूपमुत्फुल्लपद्मदलामलाक्षमत्युज्ज्वलपीतवस्त्रधार्यममलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बा हुशंखचक्रगदाधरमतिप्रौढवैरानुभावादटनभोजनस्नानासनशयनादिष्ववस्थांतरेषुनैवापययावस्यात्मचेतसः १० ततस्तमेवाक्रोशेषूच्चारयंस्तमे वहृदयेधारयन्नात्मवधायभगवदस्त्रचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपंपरमब्रह्मस्वरूपमपगतरागद्वेषादिदोषंभगवंतमद्राक्षीत् ११ तावच्चभगव च्चक्रेणाशुव्यापादितस्तेनतत्स्मरणदग्धाखिलाघसंचयोभगवतैवांतमुपनीतस्तस्मिन्नेवलयमुपययौएतत्तवाभिहितंभगवानिहकीर्तितःसंस्मृतश्चद्वेषा नुबंधेनाखिलसुरासुरादिदुर्लभंफलंप्रयच्छतिकिमुतसम्यक्भक्तिमताम् १२ वसुदेवस्यानकदुन्दुभेःपौरवीरोहिणीमदिराभद्रावैशलीदेवकीप्रमुखा बह्व्यःपत्न्योऽभवन् १३ बलभद्रसारणशठदुर्मदादीन्पुत्रान्रोहिण्यामानकदुन्दुभिरुत्पादयामासबलभद्रोऽपिरेवत्यांनिशठोल्मुकौपुत्रावजनयत्। मार्ष्टिमार्ष्टिमच्छिशुसत्यधृतिप्रमुखाःसारणस्यात्मजाः । भद्राश्वभद्रबाहुदुर्गमभूताद्यारोहिण्याःकुलजाः १४ नंदोपनंदकृतकाद्यामदिरायास्तन

केवलमभूत् ८ तदंतेचमोक्षसहेतुकमाह तत्रत्वित्यादिनालयमुपययावित्यंतेनतत्रशिशुपालत्वेऽच्युतनाम्नामुच्चारणमकरोदितिसंबंधः किंविशिष्टानांभगवन्नामकरणानिकेशिकंसवधच क्रधारणादीनियान्यभवन्तैःकारणैःप्रवृत्तिनिमित्तैः कृतानांसंकेतितानांकेशवकंसध्वसिचक्रपाणिप्रभृतीनाम् तर्जनंवाक्ताडनंतदनेनभगवन्नामकीर्तनाद्वृत्तिरुक्ता ९ साकारध्याननिष्ठा माह तच्चरूपमिति तद्रूपमटनादिष्वात्मनःशिशुपालस्यचेतसोनैवापययावित्यन्वयः आत्मनोबुद्धेश्चेतश्चनैवापययावितिवार्थः १० ततश्चकीर्तनध्यानाभ्यांशुद्धांतःकरणस्यमोक्षहेतुसाक्षा त्कारमाह ततइतिआक्रोशेष्वाक्षेपोक्तिषु भगवताअस्तंक्षिप्तंयच्चक्रंतस्यांशुमालाभिरुज्ज्वलम् ११ १२ शिशुपालजन्मप्रसंगागतंसमाप्यप्रकृतवंशमाह वसुदेवस्येति पौरवीपुरुवंशोद्भवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिरोहिण्याविशेषणम् अतएवपौरव्यानपृथग्वंशकीर्तनम् १३ रोहिण्याःप्राधान्येनबलभद्रादीन्वंशानुक्त्वाअन्यानपिवंशानाह भद्राश्वेति आद्यशब्देनापिंडारकौशिनिरयोर्ग्रहणम् अत्रपौर व्याइतिपाठेपिरोहिणीनाम्न्याइत्यर्थः ऐतेषामेवरोहिण्यास्तनयादशेतिहरिवंशेग्रहणात् कुलजावंशाः १४ कीर्तिमदादीनांप्राग्जन्मसंज्ञयैवकीर्तनमकृतनाम्नामेवतेषांकंसेनहननात् १५ रोहिण्यास्तनयस्यसतोदेवकीपुत्रत्वंबलदेवस्यसमर्थयितुमाहानंतरंचेति देवकीजठरादाकृष्यरोहिणीजठरंनीतवती १६ अनेनोपाधिनासंकर्षणसंज्ञांनिर्वक्ति कर्षणाच्चेति १७ सकलंजग

याः भद्रायाश्चोपनिधिगदाद्यावैशल्यांकौशिकमेकमजनयदानकदुंदुभिर्देवक्यामपिकीर्तिमत्सुषेणोदापिभद्रसेनऋजुदासभद्रदेहाख्याःषट्पुत्राज ज्ञिरे १५ तांश्चसर्वानेवकंसोघातितवान् । अनंतरंचसप्तमंगर्भमर्धरात्रेभगवत्प्रहितायोगनिद्रारोहिण्याजठरमपकृष्यनीतवती १६ कर्ष णाच्चासावपिसंकर्षणाख्यामवाप १७ ततःसकलजगन्महातरुमूलभूतोभूतातीतभविष्यादिसकलसुरासुरमुनिमनुजमनसामप्यगोचरोऽब्जभव प्रमुखैरनलप्रमुखैश्चप्रणम्यावनिभारावतरणायप्रसादितोभगवाननादिमध्योदेवकीगर्भेसमवततारवासुदेवः १८ तत्प्रसादविवर्धितमानातिमाना चयोगनिद्रानंदगोपपत्न्यायशोदायागर्भमधिष्ठितवती १९ सुप्रसन्नादित्यचंद्रादिग्रहमव्यालादिभयंसुस्थमानसमखिलमेवैतज्जगदपास्तधर्मम भवत्तस्मिंश्चपुंडरीकनयनेजायमाने २० जातेनचतेनाखिलमेवैतत्सन्मार्गवर्तिजगदक्रियत भगवतोप्यत्रमर्त्यलोकेऽवतीर्णस्यषोडशसहस्राण्ये कोत्तरशताधिकानिस्त्रीणामभवन् । तासांचरुक्मिणीसत्यभामाजांबवतीजालहासिनीप्रमुखाअष्टौपत्न्यःप्रधानाः। तासुचाष्टायुतानिलक्षंचपुत्राणांभ गवानखिलमूर्तिरनादिमानजनयत् २१तेषांचप्रद्युम्नचारुदेष्णसांबादयस्त्रयोदशप्रधानाःप्रद्युम्नोहिरुक्मिणस्तनयांकुमुद्वतींनामोमयेमे । तस्या मस्यानिरुद्धोजज्ञे । अनिरुद्धोपिरुक्मिणएवपौत्रींसुभद्रांनामोपयेमे । तस्यामस्यवज्रोऽभवत् २१ वज्रस्यप्रतिबाहुस्तस्यापिसुचारुरेवमनेकश तसाहस्रपुरुषसंख्यस्ययदुकुलस्यपुरुषसंख्यावर्षशतैरपिज्ञातुंनशक्यतेयतोहिश्लोकावत्रचरितार्थौ २२ तिस्रःकोट्यःसहस्राणामष्टाशीतिशता निच । कुमाराणांगृहाचार्याश्चापयोग्यासुयेरताः २३ संख्यानंयादवानांकःकरिष्यतिमहात्मनाम् । यत्रायुतानामयुतंलक्षेणास्तेशताधिकम्

देवमहातरुस्तस्यमूलभूतः भूतवर्तमानाअतीताश्चयेसुरासुरादयस्तेषांमनसामप्यगोचरः अब्जभवोब्रह्मातत्प्रमुखैरीश्वरावतारैः अनलप्रमुखैर्देवैश्चप्रसादितोवासुदेवोदेवकीगर्भेसमवतता रेत्यन्वयः १८ मानःसन्मानः अतिमानोमहिमातत्प्रसादेनविवर्धितौतौयस्याःसायोगनिद्रायशोदायागर्भमधिष्ठितवतीप्राप्ता १९ तस्मिञ्जायमानेसुप्रसन्नादित्यचंद्रादिग्रहामित्यादिविशेषणे नविशिष्टंजगदभवादित्यन्वयः २० तासुसर्वासुअष्टायुतानिलक्षंचेति एतेनरुक्मिण्यादीनांअष्टपत्नीनांदशपुत्राअन्यासांयथासंभवंपुत्राज्ञेयाः अनादिमानादिमाद्भिन्नः २१ चरितार्थौयथार्थौ २२ अष्टाशीतिलक्षाधिककोटित्रयपरिमिताश्चापयोग्यासुचापशिक्षासुगृहस्थिताआचार्याः शिक्षकाःएकआचार्योबहून्पाठयतीत्यतःशिष्याअधिकाःकृतविद्याबालाश्चततोऽधिकाइत्यतोया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दवाअसंख्याताइत्यर्थः २३ यत्रयदुकुलेसंख्यानंअयुतानांलक्षेणसहायुतंदशोत्तरशतकोटिःतदपिशताधिकमास्तेअधिकस्यज्ञातुमशक्यत्वात्संख्यानंनास्तीतिभावः अयुतंलक्षेणास्ते सदाहुकइतिपाठेआहुकउग्रसेनपिताअयुतानामयुतंचतेनदशोत्तरकोटिमितेनविशिष्टआस्तइत्यर्थः २४ यादवानामसंख्यत्वेदुर्जयत्वेचहेतुमाह देवासुरेति देवासुरसंग्रामेदेवैर्हताइत्यर्थः २५ एकाभ्यधिकंकुलशतंवृष्णिमधुसात्वतेत्यादिभेदेन २६ प्रमाणेकार्याकार्यनियमेप्रभुत्वेपालकत्वेच निदेशस्थायिनःवचनस्थावभूवुःवद्धुरितिपाठेपुत्रपौत्रैर्वृद्धिंप्राप्ताइत्यर्थः २७ २८ ॥ ॥ इतिश्रीविष्णुपुराणेचतुर्थेंशेपंचदशोध्यायः १५ ॥ ॥ षोडशेतुर्वसोर्वंशोमरुत्तांतोनुवर्ण्यते ययातिशापाद्दुष्यंतंपौरवंयःसमास्थितः एषयदोर्वंशः एवंयदुवंशंसविस्तरमभिधायतदनुजस्यतुर्व

२४ देवासुरहतायेतुदैतेयाःसुमहाबलाः । तेचोत्पन्नामनुष्येषुजनोपद्रवकारिणः २५ तेषामुत्सादनार्थायभुविदेवोयदोःकुले । अवतीर्णःकुलशतंयत्रैकाभ्यधिकंद्विज २६ विष्णुस्तेषांप्रमाणेचप्रभुत्वेचव्यवस्थितः । निदेशस्थायिनस्तस्यबभूवुःसर्वयादवाः २७ प्रसूतिंवृष्णिवीराणांयःशृणोतिनरःसदा । ससर्वपातकैर्मुक्तोविष्णुलोकंप्रपद्यते २८ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेपंचदशोध्यायः १५ । । । पराशरउवाच । । इत्येषसमासतस्तेकथितस्तुर्वसोर्वंशमवधारयत १ तुर्वसोर्वह्निरात्मजोवह्नेर्गोभानुस्ततश्चत्रैशांबस्तस्माच्चकरंधमः । तस्मादपिमरुत्तःसोऽनपत्योऽभवत् । ततश्चपौरवंदुष्यंतंपुत्रमकल्पयदेवंययातिशापात्तद्वंशःपौरवंवंशमाश्रितवान् २ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेषोडशोध्यायः १६ । । पराशरउवाच । । द्रुह्योस्तुतनयोबभ्रुस्ततःसेतुःसेतुपुत्रआरद्धान्नामतदात्मजोगांधारस्ततोधर्मोधर्माद्धृतोधृताद्दुर्गमः । ततःप्रचेताःप्रचेतसःपुत्रशतम् । अधर्मबहुलानांम्लेंच्छानामुदीच्यादीनामाधिपत्यमकरोत् १ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेसप्तदशोध्यायः १७ । । पराशरउवाच । ययातेश्चतुर्थस्यपुत्रस्यानोःसभानरचाक्षुषपरमेक्षसंज्ञास्त्रयःपुत्राबभूवुः । सभानरपुत्रःकालानरःकालानरात्सृंजयःसृंजयात्पुरंजयस्तस्माज्जनमेजयस्ततोमहामणिस्तस्माच्चमहामनास्तस्मादुशीनरतितिक्षूद्वौपुत्रावुत्पन्नौउशीनरस्यापिशिबिनृगनरकृमिदर्व्याख्याःपंचपुत्राबभूवुः । वृषदर्भसुवीरकैकेयमद्रकाश्चत्वारःशिबिपुत्राः । तितिक्षोरुषद्रथःपुत्रोभूत्ततोहेमोहेमात्सुतपास्तस्माद्बलिर्यस्यक्षेत्रेदीर्घतमसाअंगवंगकलिंगसुह्मपुंड्राख्यंबालेयंक्षत्रमजनयत् १ तन्नामसंततिसंज्ञाश्चपंचविषयाबभूवुः २ अंगसुतःपारस्ततोदिविरथस्तस्माद्धर्मरथस्ततश्चित्ररथोरोमपादसंज्ञोयस्यपुत्रोदशरथो

सोर्वंशमाह तुर्वसोरितियावत्समाप्ति १ ययातिशापादिति अत्रयद्यपिराज्यानर्हत्वरूपएवशापःप्रतीयतेतथापितुर्वसुंप्रतिविशिष्यसंतत्युच्छेदलक्षणःशापोपीतएवज्ञायते २ ॥ ॥ इतिश्रीविष्णुपुराणेचतुर्थेंअंशेषोडशोध्यायः १६ ॥ ॥ द्रुह्योःसप्तदशेवंशःसंक्षेपादनुवर्ण्यते म्लेंच्छानांयउदीच्यानामाधिपत्यमथाकरोत् ज्येष्ठानुक्रमवशात्तुर्वसुकनिष्ठस्यशर्मिष्ठापुत्रस्यद्रुह्योर्वंशमाह द्रुह्योरिति म्लेंच्छानामितिम्लेंच्छाधिपत्यकथनाद्ययातिशापपरिणामेम्लेंच्छभावःसूचितः १ ॥ ॥ इतिश्रीविष्णुपुराणेवैष्णवाकूतचन्द्रिकायां टी० चतुर्थेंशेसप्तदशोध्यायः १७ ॥ ॥ अष्टादशेनुजस्यानोर्वंशःसमनुवर्णितः प्रातिलोम्यात्समुत्पत्तेर्योसौसूतत्वमागतः १ बलेःक्षेत्रेभार्यायांजातत्वाद्बालेयम् १ तन्नामेति तेषामंगादीनांनामानियासांसंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीनांतासांसंज्ञायेषांतेविषयादेशावभूवुः २ ततश्चित्ररथइति यस्यपुत्रोरोमपादसंज्ञोदशरथोजज्ञे यस्मैअजपुत्रोदशरथःस्वकन्यांदुहितृत्वेयुयोजदत्तवानित्यर्थः ३ चंपांपुरीम् ४ प्रातिलो
म्येनब्रह्मक्षत्रयोरंतरालेसंकरेसंभूतिर्जन्मयस्यास्तस्याः सुतायांपत्न्याम् ब्राह्मण्यांक्षत्रियाज्जातःसुतइतिस्मृतेः अतोमातृवद्वर्णसंकराइतिवचनाद्विजयःसूतएव अतश्चकर्णोपितद्वंश्यत्वात्सूत
त्वेनख्यातः ५ मंजूषागतंकाष्ठपंजरस्थंपृथयाकुंत्याअपविद्धंकन्यावस्थायांजातत्वाल्लज्जयापरित्यक्तंकर्णपुत्रमवाप मातापितृभ्यामुत्सृष्टंतयोरन्यतरेणवा यंपुत्रंपरिगृह्णीयादपविद्धःसउच्यत
इतिस्मृतेः ६ इत्येतेअंगाअंगवंश्याः ७ ८ इतिश्रीविष्णुपुराणेचतुर्थेंशेअष्टादशोध्यायः १८ ऊनविंशेक्रमप्राप्तःपूरोर्वंशोनिरूप्यते दुष्यंताद्यत्रभरतोयन्नाम्नाभारतास्त्विमे ऋतेयु
रित्यादिशब्दाःप्रथमैकवचनांतानुकरणानि एतानिनामानियेषामात्मजानांते इत्येतेरौद्राश्वस्यात्मजाइतिपाठःसुगमः १ दुष्यंतोमृगयार्थमरण्यंगतोविश्वामित्रान्मेनकायांजातांशकुंतलांना

जज्ञे । यस्मादजपुत्रोदशरथःशांतांनामकन्यामनपत्यायदुहितृत्वेयुयोज ३ रोमपादाच्चतुरंगस्तस्माच्चपृथुलाक्षस्ततश्चंपोयश्चंपांनिवेशयामास
४ चंपस्यहर्यंगस्ततोभद्ररथस्ततोबृहद्रथोबृहत्कर्माच। बृहत्कर्मणश्चबृहद्भानुस्तस्माद्बृहन्मनास्ततोजयद्रथोजयद्रथाद्ब्रह्मक्षत्रांतरालसंभूत्यांपत्न्यां
विजयंनामपुत्रमजीजनत् ५ विजयश्चधृतिंपुत्रमवापतस्यापिधृतव्रतःपुत्रोऽभूत् । धृतव्रतात्सत्यकर्मासत्यकर्मणस्त्वधिरथोयोऽसौगंगांगतोमंजूषा
गतंपृथापविद्धंकर्णंपुत्रमवाप ६ कर्णाद्वृषसेनइत्येतेअंगाः ७ अतश्चपूरोर्वंशंश्रोतुमर्हसीति ८ । इतिश्रीविष्णुपुराणेचतुर्थेंशेअष्टादशोध्यायः १८
पराशरउवाच । ।पूरोर्जनमेजयःपुत्रस्तस्यापिप्रचिन्वान्प्रचिन्वतःप्रवीरस्तस्मान्मनस्युर्मनस्योश्चाभयदस्तस्यापिसुद्युम्नस्ततोबहुगवस्तस्यसं
यातिःसंयातेरहंयातिस्ततोरौद्राश्वः । ऋतेयुःकक्षेयुःस्थंडिलेयुर्घृतेयुर्जलेयुःस्थलेयुःसंततेयुर्धनेयुर्वनेयुर्नामानोरौद्राश्वस्यदशात्मजाबभूवुः १ ऋ
तेयोरंतिनारःपुत्रोभूत्तंसुमप्रतिरथंध्रुवंचरंतिनारःपुत्रमवाप । अप्रतिरथात्कण्वस्तस्यापिमेधातिथिर्यतःकाण्वायनाद्विजाबभूवुः। तंसोरनिलस्ततोदु
ष्यंताद्याश्चत्वारःपुत्राबभूवुः । दुष्यंताच्चक्रवर्तीभरतोभवत् । यन्नामहेतुर्दैवैःश्लोकोगीयते । माताभस्त्रापितुःपुत्रोयेनजातःसएवसः । भरस्वपुत्रंदु
ष्यंतमावमंस्थाःशकुन्तलाम् २ रेतोधाःपुत्रउन्नयतिनरदेवयमक्षयात् । त्वंचास्यधातागर्भस्यसत्यमाहशकुन्तला ३ भरतस्यचपत्नीनांयेनवपुत्रा

मकन्यांकण्वाश्रमेदृष्ट्वागांधर्वेणविवाहेनसंगम्यगर्भमाधायस्वपुरंगतःसर्वंविसस्मारतांचजातपुत्रांकण्वप्रहितेनाशिष्येणानीतांस्मृत्वापिलोकापवादभयादस्वीकुर्वंतंदुष्यंतंप्रतिदेवैर्गीतोयंश्लोको
मातेति भस्त्राचर्मपुटकंतत्स्थानीयामातावीर्याधारमात्रांकिंतुपितुर्निषेक्तुरेवपुत्रः किंचयेनपित्राजातोजनितःसएवपुत्रः तदंशभूतवीर्योपादानत्वात् अत्मावैजायतेपुत्रइतिवचनाच्च अतःपुत्रं
भरस्वबिभृहि शकुंतलांचनिर्दोषांमावमंस्थाइतिभरतनामनिरुक्तिरपि २ किंचरेतोधाःरेतसाधीयतेविधीयतेरेतोधाः कर्मण्यसुन् औरसःपुत्रोयमक्षयान्नरकात्तत्रस्थंपितरंउन्नयतिउर्ध्वंस्व
र्गंनयति यद्वारेतोधाःरेतःसेक्तातंपुत्रंउन्नयति ततःकिमतआह त्वंचास्यभरतस्यरेतोधाःरेतःसेक्ताइतिसत्यमेवाह अतोभरस्वेत्यर्थःनामनिरुक्तिरूपैकार्थपरत्वाच्छ्लोकइत्येकवचनमविरुद्धम्
३ नैतेपुत्राममानुरूपामत्सदृशाभवंतीतिभरतेनोक्तास्तेषांमातरोऽसत्पुत्रमातृत्वेनवेनमातरमंगइवास्मान्परित्यज्यवनंयास्यतीतिपरित्यागभयात्तान्पुत्रान्घ्नंतुर्घातितवत्यः ४ वितथेव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थेसति दीर्घतमसेति अत्रेयंकथा बृहस्पतेरग्रजस्यउतथ्यस्यममताख्यायांभार्यायांबृहस्पतिःकामाभिभूतोरेतोसृजत् तच्चगर्भंप्रविशत्गर्भस्थितेनस्थानसंकोचभयात्पार्ष्ण्याघातेनापास्तं बहिःपतितमपिअमोघवीर्यतयाभरद्वाजनामापुत्रोभवत् गर्भस्थश्चबृहस्पतिनाशप्तोंयोदीर्घतमानाम्नाभवत्सभरद्वाजोदेवैर्दत्तः ५ तत्रचभरद्वाजनामनिरुक्तिपरस्तन्मातापित्रोर्विवादरूपःश्लोकोदेवैःपठितः ६ मूढेममतेद्वाजंद्वाभ्यांआवाभ्यांजातमिमंपुत्रंभरपुषाणएवंब्रुवंतंबृहस्पतिंममताहहेबृहस्पतेत्वमेवेमंद्वाजंभरइतिपरस्परमुक्त्वापरित्यज्यपितरौममताबृहस्पतीयस्माद्यातौत

बभूवुः । नैतेममानुरूपाःपुत्राइत्यभिहितास्तन्मातरोजघ्नुःपरित्यागभयात् ४ ततोस्यपुत्रजन्मनिवितथेपुत्रार्थिमरुत्स्तोमयाजिनोदीर्घतमसापाष्ण्यपास्तबृहस्पतिवीर्यादुतथ्यपत्नीममतासमुत्पन्नोभरद्वाजाख्योनामपुत्रोमरुद्भिर्दत्तः ५ तस्यापिनामनिर्वचनश्लोकःपठ्यते ६ मूढेभरद्वाजमिमंभरद्वाजंबृहस्पते यातौयदुक्त्वापितरौभरद्वाजस्ततस्त्वयामिति ७ भरद्वाजश्चवितथेपुत्रजन्मनिमरुद्भिर्दत्तस्ततोवितथसंज्ञामवाप ८ वितथस्याभवन्मन्युःपुत्रोभूत्बृहत्क्षत्रमहावीर्यनरगर्गाद्याअभवन्मन्युपुत्राः । नरस्यसंकृतिःसंकृतेःरुचिरधीरंतिदेवौ । गर्गाच्छिनिस्ततोगार्ग्याःशैन्याःक्षत्रोपेताद्विजातयोबभूवुः ९ महावीर्यादुरुक्षयोनामपुत्रोभूत्तस्यत्रय्यारुणपुष्करिणौकपिश्चपुत्रत्रयमभूत् । तच्चत्रितयमपिपश्चाद्विप्रतामुपजगाम । बृहत्क्षत्रस्यसुहोत्रःसुहोत्राद्धस्तीयइदंहस्तिनापुरमारोपयामास । अजमीढद्विमीढपुरुमीढास्त्रयोहस्तिनस्तनयाः । अजमीढात्कण्वःकण्वान्मेधातिथिर्यतःकाण्वायनाद्विजाः १० अजमीढस्यान्यःपुत्रोबृहदिषुर्बृहदिषोर्बृहद्वसुस्ततश्चबृहत्कर्मातस्माज्जयद्रथस्ततोपिविश्वजित्ततःसेनजिद्रुचिराश्वकाश्यदृढधनुर्वत्सहनुसंज्ञाःसेनजितःपुत्राः रुचिराश्वतः पृथुसेनस्तस्मात्पारः पारान्नीपस्तस्यैकशतंपुत्राणांतेषांप्रधानः कांपिल्याधिपतिः समरः ११ समरस्यापिपारसंपारसदश्वास्त्रयः पुत्राःपारात्पृथुः पृथोःसुकृतिः सुकृतेर्विभ्राजस्ततश्चानुहोयःशुकदुहितरंकृत्वीनामोपयेमे १२ अनुहाद्ब्रह्मदत्तस्ततोविष्वक्सेनस्तस्योदकसेनोभल्लाटस्तस्यात्मजोद्विमीढोद्विमीढस्ययवीनरसंज्ञस्तस्यापिधृतिमांस्ततः सत्यधृतिस्ततश्चदृढनेमिस्तस्माच्चसुपार्श्वस्ततः सुमतिस्ततश्चसन्नतिमान्सन्नतिमतःकृतोऽभूत्यंहिरण्यनाभोयोगमध्यापयामासयश्चतुर्विंशतिंप्राच्यसामगानांचकारसंहिताः १३ कृताच्चोग्रायुधोयेनप्राचुर्येणनीपक्षयःकृतः १४ उग्रायुधात्क्षेम्यस्तस्मात्सुवीरस्तस्यनृपंजयस्ततोबहुरथइत्येतेपौरवाः । अजमीढ

तःभरद्वाजशब्दोक्तेर्भरद्वाजसंज्ञोभूदित्यर्थःयातौयदुःखादितिपाठेविवदमानावित्यध्याहार्यम् ७ भरद्वाजस्यैवभरतपुत्रत्वदशायांवितथनाम्नोनिरुक्तिमाहभरद्वाजश्चेति पितृभ्यांगतेसतिमरुद्भिर्भृतोपिमरुत्स्तोमयागतुष्टैस्तस्यवितथेपुत्रजन्मनियतोदत्तस्ततोवितथसंज्ञामवापेत्यर्थः ८ ततस्ताभ्यांगार्ग्याःशैन्याश्चगर्गवंश्यत्वाच्छिनिवंशत्वाच्चसमाख्याताःक्षत्रियाएवकेनचित्कारणेनब्राह्मणाश्चबभूवुः ९ अजमीढस्यकण्वादिरेकोवंशःबृहदिष्वादिरपरोवंशःनीलादिरपरःऋक्षादिश्चापरः १० कांपिल्यंनगरंतस्याधिपतिः ११ शुकस्यव्यासपुत्रस्य दुहितरंहरिवंशेतथै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदर्शनात् १२ यःकृतश्चतुर्विंशतिसंहिताश्चकार १३ नीपाःक्षत्रियविशेषाःतेषांक्षयःकृतः १४ पंचानांविषयाणांमदीयानांदेशानाम् १५ शरद्वतोगौतमात् स्कन्नंस्खलितम् १६ कृपये तिनामनिरुक्त्यर्थम् १७ कुरुणास्वेनोपलक्षितंक्षेत्रंदेवप्रसादाद्धर्मकारणंक्षेत्रंचकार १८ शकलद्वयरूपंजन्मयस्यजरयाराक्षस्यासंधितोयोजितः १९ इतिश्रीविष्णुपुराणेवैष्णवाकूतचंद्रि

स्यनीलिनीनामपत्नीतस्यांनीलसंज्ञःपुत्रोऽभवत् । तस्माच्छांतिः शांतेः सुशांतिः सुशांतेःपुरुजानुस्ततश्चक्षुस्ततोहर्यश्वस्तस्मान्मुद्गलसृंजय बृहदिषुप्रवीरकांपिल्याःपंचानामेतेषांविषयाणांरक्षणायालमेतेमत्पुत्राइतिपित्राभिहिताअतःपंचालाः १५ मुद्गलाच्चमौद्गल्याःक्षेत्रोपेताद्विजातयोबभूवुः । मुद्गलाद्वध्र्यश्वोवध्र्यश्वाद्दिवोदासोऽहल्याचमिथुनमभूत्शरद्वतोऽहल्यायांशतानंदोभवत्शतानंदात्सत्यधृतिर्धनुर्वेदांतगोजज्ञे । सत्यधृतेस्तु वराप्सरसमुर्वशींदृष्ट्वारेतःस्कन्नंतच्छरस्तंबेपपात १६ तच्चद्विधागतमपत्यद्वयंकुमारःकन्यकाचाभवत् । मृगयामुपगतःशांतनुर्दृष्ट्वाकृपयाजग्राह १७ततःसकुमारःकृपःकन्याचाश्वत्थाम्नोजननीकृपीद्रोणपत्न्यभवत् । दिवोदासस्यमित्रयुर्मित्रयोश्च्यवनोनामराजाच्यवनात्सुदासस्ततःसौदासःसहदेवस्तस्यापिसोमकस्ततोजंतुःशतपुत्रज्येष्ठोभवत् । तेषांयवीयान्पृषतःपृषताद्द्रुपदस्तस्माद्धृष्टद्युम्नस्तस्माद्धृष्टकेतुः । अजमीढस्यअन्यऋक्षनामा पुत्रोभूत् । ऋक्षात्संवरणःसंवरणात्कुरुर्यइदंधर्मक्षेत्रंकुरुक्षेत्रंचकार १८ सुधनुर्जन्हुपरिक्षित्प्रमुखाःकुरोःपुत्राबभूवुः । सुधनुषःसुहोत्रस्तस्माच्च्यवनश्च्यवनात्कृतकस्ततश्चोपरिचरोवसुर्बृहद्रथप्रत्यग्रकुशांबमावेल्लमत्स्यप्रमुखावसोःपुत्राःसप्ताजायंत । बृहद्रथात्कुशाग्रस्तस्माद्वृषभस्ततःपुष्पवांस्तस्मात्सत्यधृतस्तस्मात्सुधन्वातस्यचजंतुः । बृहद्रथाच्चान्यःशकलद्वयजन्माजरयासंधितोजरासंधनामातस्मात्सहदेवस्ततःसोमापिस्ततःश्रुतश्रवाइत्येतेमागधाभूभृतः १९ । । इतिश्रीविष्णुपुराणेचतुर्थेंशेएकोनविंशोध्यायः १९ । । पराशरउवाच । परिक्षितःजनमेजयश्रुतसेनोग्रसेनभीमसेनाश्चत्वारःपुत्राः १ जन्होस्तुसुरथोनामात्मजोबभूव२तस्यविदूरथोविदूरथस्यसार्वभौमःसार्वभौमाज्जयसेनस्तस्मादारावीततश्चायुतायुरायुतायोरक्रोधनस्तस्माद्देवातिथिस्ततऋक्षोऽन्यः३ऋक्षाद्भीमसेनस्ततश्चदिलीपोदिलीपात्प्रतीपस्तस्यापिदेवापिशांतनुबाल्हीकसंज्ञास्त्रयःपुत्राबभूवुः । देवापिर्बाल्यएवारण्यंविवेश ४ शांतनुरवनीपतिरभवत् । अयंचतस्यश्लोकःपृथिव्यांगीयते । यंयंकराभ्यांस्पृशतिजीर्णंयौवनमेतिसः । शांतिंप्राप्नोतियेकायांचतुर्थेंशेएकोनविंशोध्यायः १९ विंशेतुकुरुपुत्राणांवंशानाहपराशरः यत्रस्वपुत्रसंतानधृतराष्ट्रादिसंततिः १ कुरोःपुत्राणांमध्येसुधनुषोवंशउक्तइदानींकुरुपुत्रस्यैवपरिक्षितोवंश उच्यते परिक्षितइति १ कुरुपुत्रस्यैवजह्नोर्वंशमाहजह्नोरिति २ पूर्वोक्ताजमीढपुत्राद्दक्षादन्यः ३ देवापेर्वंशोनाभवदित्याशयेनाहदेवापिरिति ४ यंयंजंतुंस्पृशतिसयौवनमेतियेनाग्र्यशांतिंचाप्नोति एतावतायौवनादिरूपंकल्याणंतनोतीतिशान्तनुनामनिरुक्तिरुक्तेतिज्ञेयम् ५ प्रसंगात्परिवेदनदोषमाह तस्येत्यादिनाववर्षभगवान्पर्जन्यइत्यंतेन ६ अश्मसारिणाअश्मसारि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम्नास्वयमेवतपस्विवेषधारिणःप्रयोजिताः ७ अतिऋजुमतेःयथाश्रुतार्थग्राहिणः ८ ९ शान्तनोर्वंशमतिविस्तरमग्रेबक्ष्यन्प्रथमंबाल्हीकवंशमाह बाल्हीकस्येति ममपराशरस्यपुत्रोम

नाद्र्यांकर्मणातेनशांतनुः ५ तस्यशांतनोराष्ट्रेद्वादशवर्षाणिदेवोनववर्ष ६ ततएवाशेषराष्ट्रविनाशमवेक्ष्यासौराजाब्राह्मणानपृच्छद्भोःकस्मादस्मिन्
राष्ट्रेदेवोनवर्षतिकोममापराधइति । तेतमूचुः । अग्रजस्यतेऽर्हेयवमानिस्त्वयाभुज्यतेपरिवेत्तात्वमित्युक्तःसपुनस्तानपृच्छत्किंमयाविधेयमितितेतमू
चुः । यावद्देवापिर्नपतनादिदोषैरभिभूयतेतावत्तस्याहंराज्यंतदलमेतेनतस्मैदीयतामित्युक्तेतस्यमंत्रिप्रवरेणाश्मसारिणातत्रारण्येतपस्विनोवेदवाद
विरोधवक्तारःप्रयोजिताः७ तैरप्यतिऋजुमतेर्महीपतिपुत्रस्यबुद्धिर्वेदविरोधमार्गानुसारिण्यक्रियत८राजाचशांतनुर्द्विजवचनोत्पन्नपरिवेदनशोकस्ता
न्ब्राह्मणानग्रणीकृत्यअग्रजराज्यप्रदानायारण्यंजगामतदाश्रममुपगताश्चतमवनीपतिपुत्रंदेवापिमुपतस्थुः । तेब्राह्मणावेदवादानुबद्धानिवचांसिरा
ज्यमग्रेतेनकर्तव्यमित्यर्थवतितमूचुः ।असावपिवेदवादविरोधयुक्तिदूषितमनेकप्रकारंतानाहततस्तेब्राह्मणाःशांतनुमूचुः। आगच्छभोराजन्नलमत्राति
निर्बंधेनप्रशांतएवासौअनावृष्टिदोषःपतितोयमनादिकालमहितवेदवचनदूषणोच्चारणात्पतितेचाग्रजेनैवपरिवेद्यंभवतीत्युक्तःस्वपुरमागत्यराज्यम
करोत् । वेदवादविरोधिवचनोच्चारणदूषितेचज्येष्ठेतस्मिन्देवापावखिलसस्यनिष्पत्तयेववर्षभगवान्पर्जन्यः ९ बाल्हीकस्यसोमदत्तःपुत्रोभूत् । सोम
दत्तस्यापिभूरिभूरिश्रवःशलसंज्ञास्त्रयःपुत्राः । शांतनोरप्यमरनद्यांगंगायामुदारकीर्तिरशेषशास्त्रार्थविद्भीष्मःपुत्रोऽभूत् । सत्यवत्यांचचित्रांगदवि
चित्रवीर्यौपुत्रावजनयच्छांतनुः चित्रांगदस्तुबालएवचित्रांगदेनगंधर्वेणाहवेविनिहतः विचित्रवीर्योऽपिकाशिराजतनयेअंबिकांबालिकेउपयेमेतदुप
भोगातिखेदाच्चयक्ष्मणागृहीतःपंचत्वमगमत् । सत्यवतीनियोगाच्चमत्पुत्रःकृष्णद्वैपायनोमातुर्वचनमनतिक्रमणीयमितिविचित्रवीर्यक्षेत्रेधृतराष्ट्रंपांडुंत
त्प्रहितभुजिष्यायांचविदुरमुत्पादयामास १० धृतराष्ट्रोऽपिदुर्योधनदुःशासनादिप्रधानंपुत्रशतमुत्पादयामास पांडोरप्यरण्येमृगशापोपहतप्रजनन
सामर्थ्यस्यधर्मवायुशक्रैर्युधिष्ठिरभीमसेनार्जुनाःकुंत्यांनकुलसहदेवौचाश्विभ्यांमाद्र्यांपंचपुत्राःसमुत्पादितास्तेषांद्रौपद्यांपंचपुत्राबभूवुः । युधिष्ठिरा
त्प्रतिविंध्योभीमसेनात्सुतसोमःश्रुतकीर्तिरर्जुनात् । शतानीकोनकुलाच्छ्रुतकर्मासहदेवात् । अन्येचपांडवानामात्मजास्तद्यथायौधेयीयुधिष्ठिराद्दे
वकंपुत्रमवापहिडिंबाघटोत्कचंभीमसेनादेवसर्वत्रगंपुत्रमवापसहदेवाच्चविजयासुहोत्रंनामपुत्रंप्राप्तवती । करेणुमत्यांचनकुलोऽपिनिरमित्रमजीज
नत् अर्जुनस्याप्युलूप्यांनागकन्यायामिरावान्नामपुत्रोऽभूत् । मणिपूरपतिपुत्र्यांचपुत्रिकाधर्मेणबभ्रुवाहनंनामपुत्रमजीजनत् ११ सुभद्रायांचार्भक

त्पुत्रःभुजिष्यायांदास्याम् १० मणिपुरंनामनगरंतत्पतेःपुत्र्यांपुत्रिकाधर्मेणअस्यांयोजायतेपुत्रःसमेपुत्रोभवेदितिकन्यादातुर्वाग्बधेन ११ परिक्षीणेषुकुरुष्वितिभगवतस्तद्रक्षणेपरिक्षिन्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनिरुक्तौ चहेतुः आत्मेच्छामात्रकारणेनमानुषरूपंधर्तुंशीलंयस्यतस्य १२ सांप्रतमित्यनेनपरिक्षिद्राज्यकालएवपराशरमैत्रेयसंवादइतिगम्यते अखंडिताआयतिःप्रभावोयत्रतद्यथास्यादि तिक्रियाविशेषणम् स्यात्प्रभावेपिचायतिरित्यमरः आयतिरुत्तरफलंधनादिसंपत्साअखंडितायत्रतथास्यादितिवा १३ ॥ ॥ इतिश्रीविष्णुपुराणेटीकायांरत्नगर्भवै॰ चतुर्थेंशेविं शोध्यायः २० ॥ ॥ एकविंशेकुरोर्वंशोभविष्यउपवर्ण्यते क्षेमकंप्राप्ययःसंस्थांकलावुपगमिष्यति १ कुरुपुत्रपरिक्षितइवास्यापिजनमेजयादिसंज्ञाएवचत्वारःपुत्राः १ तस्यजन

लेऽपियोऽसावतिबलपराक्रमसमस्तारातिरथविजेतासोऽभिमन्युरजायत।अभिमन्योरुत्तरायांपरिक्षीणेषुकुरुष्वश्वत्थामप्रयुक्तब्रह्मास्त्रेणगर्भएवभस्मी कृतोभगवतःसकलसुरासुरवंदितचरणयुगलस्यआत्मेच्छाकारणमानुषरूपधारिणोऽनुभावात्पुनर्जीवितमवाप्यपरिक्षिज्जज्ञे १२योऽयंसांप्रतमेतद्भूमं डलमखंडितायतिधर्मेणपालयतीति १३ इतिश्रीविष्णुपुराणेचतुर्थेंशेविंशोध्यायः २० । । पराशरउवाच। ।अतःपरंभविष्यानहंभूपालान्कीर्तयि ष्येऽयंसांप्रतमवनीपतिस्तस्यापिजनमेजयश्रुतसेनोग्रसेनभीमसेनाःपुत्राश्चत्वारोभविष्यंति १ तस्यापरःशतानीकोभविष्यतियोऽसौयाज्ञवल्क्याद्वेद मधीत्यकृपादस्त्राण्यवाप्यविषयविरक्तचित्तवृत्तिश्चशौनकोपदेशादात्मविज्ञानप्रवणःपरंनिर्वाणमाप्स्यति २शतानीकादश्वमेधदत्तोभवितातस्मादप्य धिसीमकृष्णोऽधिसीमकृष्णान्निचक्नुः योगंगयापहृतेहस्तिनापुरेकौशांब्यांनिवत्स्यतितस्याप्युष्णःपुत्रोभविताउष्णाच्चित्ररथस्ततःशुचिरथस्तस्मा द्वृष्णिमांस्ततःसुषेणस्तस्मादपिसुनीथःसुनीथाद्दृढस्ततोनृचक्षुस्तस्यापिसुखावलस्तस्मात्परिप्लवस्ततश्चसुनयस्ततोमेधावीमेधाविनोनृपंजयस्ततो मृदुस्तस्मात्तिग्मस्तिग्माद्बृहद्रथस्तस्माद्वसुदानस्ततोपरःशतानीकः ३ तस्माच्चउदयनउदयनादहीनरस्ततश्चखंडपाणिस्ततोनिरमित्रस्तस्माच्चक्षे मकः।तत्रायंश्लोकः । ब्रह्मक्षत्रस्ययोयोनिर्वंशोराजर्षिसत्कृतः। क्षेमकंप्राप्यराजानंससंस्थांप्राप्स्यतेकलौ ४। । इतिश्रीविष्णुपुराणेचतुर्थेंशेएकविं शोध्यायः २१ । । पराशरउवाच। ।अतश्चेक्ष्वाकवोभविष्याःपार्थिवाःकथ्यंतेबृहद्बलस्यपुत्रोबृहत्क्षणः १ तस्माद्गुरुक्षेपस्ततोवत्सोवत्साद्वत्सव्यू हस्ततःप्रतिव्योमस्तस्यापिदिवाकरस्तस्मात्सहदेवः २ ततोबृहदश्वस्तत्सूनुर्भानुरथस्तस्यापिसुप्रतीकस्ततोमरुदेवोमरुदेवात्सुनक्षत्रस्तस्मात्कि नरःकिंनरादंतरिक्षस्तस्मात्सुवर्णस्ततश्चमित्रजित्ततश्चबृहद्राजस्तस्यापिधर्माधर्मिणः कृतंजयःकृतंजयाद्रणंजयोरणंजयात्संजयस्तस्माच्छाक्यःशा क्याच्छुद्धोदनस्तस्माद्रातुलस्ततःप्रसेनजित्ततश्चक्षुद्रकस्ततः कुंडकस्तस्मादपिसुरथस्ततश्चसुमित्रोंत्यइत्येतेचेक्ष्वाकवोबृहद्बलान्वयाः। अत्रानुवंश

मेजयस्य आत्मविज्ञानप्रवणस्तत्त्वज्ञः २ पूर्वोक्ताज्जनमेजयपुत्रादपरःशतानीकः ३ ब्रह्मणःब्राह्मणस्यक्षत्रस्यक्षत्रियस्यचयोनिःकारणम् पूर्वंयथोक्तत्वात्संस्थांसमाप्तिम् ४ ॥ ॥ इति श्रीविष्णुपुराणेच॰ एकविंशोध्यायः २१ ॥ ॥ सोमवंशेभविष्याणांराज्ञामत्रप्रसंगतः द्वाविंशेसूर्यवंश्यानांभविष्योवंशउच्यते बृहद्बलस्येतिचतुर्थेध्यायेर्जुनतनयेनाभिमन्युनाभारतयुद्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षयमनीयतेत्यत्रदर्शितस्तस्येत्यर्थः १ यत्रयत्रनाम्नावैलक्षण्यंदृश्यते तत्रकल्पयुगादिभेदेनव्यवस्थापनीयम् २ ३ इतिश्रीविष्णुपुराणेवैष्णवाकूतचन्द्रिकायांद्वाविंशोध्यायः २२ बार्हद्रथानां वंशेपिभविष्यानवदन्नृपान् अंत्योरिपुंजयोयत्रतदंतेप्राभवत्कलिः १ सोमसूर्यवंशयोर्भविष्यान्नृपानुक्त्वासोमवंशपल्लवभूतानांबार्हद्रथानांभविष्यानाह मागधानामिति १ तत्रचसंगत्यर्थंकीर्तितानामपिजरासंधादीनामनुवादंकुर्वन्नयुतायुप्रभृतीन्भविष्यानाह अत्रहीत्यादिनायावत्समाप्ति २ ३ ॥ ॥ इतिश्रीविष्णुपुराणेत्रयोविंशोध्यायः २३ ॥ ॥ चतुर्विंशेकलेर्धर्मसंख्ये

श्लोकः। इक्ष्वाकूणामयंवंशःसुमित्रांतोभविष्यति।यतस्तंप्राप्यराजानंससंस्थांप्राप्स्यतेकलौ ३। इति०वि०च०द्वाविंशोध्यायः २२। पराशरउवाच। मागधानांबार्हद्रथानांभविष्याणामनुक्रमंकथयामि १ अत्रहिवंशेमहाबलाजरासंधप्रधानाबभूवुः २ जरासंधसुतात्सहदेवात्सोमापिस्तस्माच्छ्रुतवान्तस्याप्ययुतायुस्ततश्चनिरमित्रस्तत्तनयःसुक्षत्रस्तस्मादपिबृहत्कर्माततश्चसेनजित्तस्माच्चश्रुतंजयस्ततोविप्रस्तस्यचपुत्रःशुचिनामाभविष्यति। तस्यापिक्षेम्यस्ततश्चसुव्रतःसुव्रताद्धर्मस्ततःसुश्रुमस्ततोदृढसेनस्ततःसुमतिस्तस्मात्सुबलस्तस्यसुनीतोभवितातत्सत्यजित्सत्यजितोविश्वजित्तस्यापिरिपुंजयःपुत्रइत्येतेबार्हद्रथाभूपतयोवर्षसहस्रमेकंभविष्यंति ३। । इतिश्रीविष्णुपुराणेचतुर्थेशेत्रयोविंशोध्यायः। । २३। । पराशरउवाच। । योऽयंरिपुंजयोनामबार्हद्रथोंत्यस्तस्यशुनकोनामामात्योभविष्यति १ सचैनंस्वामिनंहत्वास्वपुत्रंप्रद्योतनामानमभिषेक्ष्यति। तस्यापिपालकनामापुत्रोभवितातत्श्चविशाखयूपस्तत्पुत्रोजनकस्तस्यचनंदिवर्धनइत्येतेअष्टत्रिंशदुत्तरमब्दशतंपंचप्रद्योताःपृथिवींभोक्ष्यंति २ ततश्चशिशुनागस्तत्पुत्रश्चकाकवर्णोभवितातत्पुत्रःक्षेमधर्मातस्यापिक्षत्रौजास्तत्पुत्रोबिंदुसारस्ततश्चाजातशत्रुस्तस्माच्चदर्भकोदर्भकाच्चोदयनस्तस्मादपिनंदिवर्धनस्ततोमहानंदीइत्येतेशैशुनागादशभूमिपालास्त्रीणिवर्षशतानिद्विषष्ट्यधिकानिभविष्यंति ३ महानंदिसुतःशूद्रागर्भोद्भवोऽतिलुब्धोमहापद्मोनंदःपरशुरामइवापरोखिलक्षत्रांतकारीभविता ४ ततःप्रभृतिशूद्राभूमिपालाभविष्यंति। सचैकच्छत्रामनुल्लंघितशासनोमहापद्मःपृथिवींभोक्ष्यति ५ तस्याप्यष्टौसुताःसुमाल्याद्याभवितारस्तस्यचमहापद्मस्यानुपृथिवींभोक्ष्यंतिमहापद्मस्तत्पुत्राश्चएकंवर्षशतमवनीपतयोभविष्यं

क्षुद्रास्तथानृपाः भूमेर्गीतावशिक्षाचवैराग्यायनिरूपिताः १ इदानींतद्दृश्यानेवभूभुजःकालेनाल्पबलपौरुषान्मलीमसान्दस्युप्रायांश्चाह योयमित्यादिनासर्वपृथिव्यांभूभुजोभविष्यंतीत्यंतेन १ प्रद्योताःप्रद्योतनामानःअत्रचराज्ञांतद्राज्यानांचवर्षसंख्याआयूराज्याल्पत्वप्रदर्शनेनवैराग्यार्था २ शैशुनागाःशिशुनागापत्यानि ३ महापद्मइति कोटिःशतगुणापद्मंपद्मंशतगुणंपुनःनिखर्वंतद्दशगुणंमहापद्ममिहेष्यतेइत्युक्तेस्तावत्संख्याकस्यसैन्यस्यधनस्यवास्वामीमहापद्मोनंदः ४ एकमेवछत्रंयस्यांताम् ५ नंदान्नंदतत्पुत्रांश्चकौटिल्यःकौटिल्यप्रधानवात्स्यायनविष्णुगुप्तादिपर्यायश्चाणक्यःसमुद्धरिष्यति ६ चन्द्रगुप्तंनंदस्यैवपत्न्यंतरस्यमुरासंज्ञस्यपुत्रंमौर्याणांप्रथमम् ७ शुंगाःशुंगसंज्ञाः ८ तानेवाह पुष्यमित्रइति पुष्यमित्रःशुंगानांप्रथमः ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निमित्रादयोनवएवंशुंगादश १० ११ कण्वान्कथंभूर्यातितत्राह देवभूतिमिति शातकर्णीत्युपनाम १२ एतेत्वंध्रभृत्यास्त्रिंशदित्यन्वयः १३ आभीराद्यामौनांताएकोनाशीतिराजान एकोनचतुर्दशवर्षाणिपृथिवींभोक्ष्यंति १४ ततश्चपौरास्त्रीण्यब्दशतानिभोक्ष्यंति क्वचित्पौराइत्यत्रपुनर्मौनाइतिपाठः तदाभीरादिमध्यगणितानामपिमौनानांव्यतिरेकेणपूर्वाराज्यवर्षसंख्या

ति । नवैवतान्नंदान्कौटिल्योब्राह्मणःसमुद्धरिष्यति ६ तेषामभावेमौर्याश्चपृथिवींभोक्ष्यंतिकौटिल्यएवचंद्रगुप्तंराज्येऽभिषेक्ष्यति ७ तस्यापिपुत्रो बिंदुसारोभविष्यति । तस्याप्यशोकवर्धनस्ततःसुयशास्ततोदाशरथस्ततःसंगतस्ततःशालिशूकस्तस्मात्सोमशर्मातस्माच्छतधन्वातस्याप्यनुबृह द्रथनामाभविता । एवंमौर्यादशभूपतयोभविष्यंतिअब्दशतंसप्तत्रिंशदुत्तरंतेषामंतेपृथिवींशुंगाभोक्ष्यंति ८ ततःपुष्यमित्रःसेनापतिःस्वामिनंहत्वा राज्यंकरिष्यति ९ अस्यात्मजोऽग्निमित्रस्तस्मात्सुज्येष्ठस्ततोवसुमित्रस्तस्मादप्यार्द्रकस्ततःपुलिंदकस्ततोघोषवसुस्तस्मादपिवज्रमित्रस्ततोभाग वतः १० तस्माद्देवभूतिरित्येतेदशशुंगाद्वादशोत्तरवर्षशतंपृथिवींभोक्ष्यंति । ततःकण्वानेषाभूर्यास्यति ११ देवभूतिंतुशुंगराजानंव्यसनिनंतस्यै वामात्यःकण्वोवसुदेवनामानिपात्यस्वयमवनींभोक्तातत्पुत्रोभूमिमित्रस्तस्यापिनारायणः।नारायणस्यसुशर्माएतेकाण्वायनाश्चत्वारःपंचचत्वारिंशद्व र्षाणिभूपतयोभविष्यंति । सुशर्माणंकण्वंस्वभृत्योबलवाञ्शिप्रकनामाहत्वांध्रजातीयोवसुधांभोक्ष्यति । ततश्चकृष्णनामातद्भ्राताभूपतिर्भवतितस्य श्रीशातकर्णिस्तस्यापिपूर्णोत्संगः । तत्पुत्रश्चशातकर्णिस्तस्माच्चलंबोदरस्तस्माद्दिवीलकस्ततोमेघस्वातिस्ततःपटुमांस्ततश्चारिष्टकर्माततोहालो हालात्पत्तलकस्ततःप्रविल्लसेनस्ततःसुन्दरःशातकर्णीतस्माच्चकोरःशातकर्णी १२ ततःशिवस्वातिस्ततश्चगोमतीपुत्रस्तत्पुत्रःपुलिमांस्तस्या पिशातकर्णीशिवश्रीस्ततःशिवस्कंधस्तस्माद्यज्ञश्रीस्ततोविजयस्ततश्चंद्रश्रीस्तस्यापिपुलोमार्चिरेवमेतेत्रिंशच्चत्वार्यब्दशतानिषट्पंचाशदधिकानिपृ थिवींभोक्ष्यंतिअंध्रभृत्याः १३ सप्ताभीरादशगर्दभिलाभूभुजोभविष्यंतिततःषोडशशकाभूभुजोभवितारः । ततश्चाष्टौयवनाश्चतुर्दशतुषारामुंडा श्चत्रयोदशएकादशमौनाः । एतेपृथिवींत्रयोदशवर्षशतानिनवनवत्यधिकानिभोक्ष्यंति १४ ततश्चपौराएकादशभूपतयोब्दशतानित्रीणिमहींभो क्ष्यंति १५ तेषुच्छिन्नेषुकैलिकिलायवनाभूपतयोभविष्यंतिमूर्धाभिषिक्तस्तेषांविंध्यशक्तिः १६ ततःपुरंजयस्ततोरामचंद्रस्तस्माद्धर्मोधर्माद्वरांगःकृतनं

इयंतुततःपृथगेवमौनानांराज्यवर्षशतत्रयंसंख्येतिज्ञेयम् १५ केलिकिलानगरीतत्रभवाःकैलिकिलास्तेषांमूर्धाभिषिक्तोमुख्यःविंध्यशक्तिः मूर्धावसिक्तइतिपाठेक्षत्रियमुख्यइत्यर्थः १६ तेषां विंध्यशक्त्यादीनांयथायथंत्रयोदशपुत्राबाह्लीकाश्चत्रयःपुष्यमित्रादयस्त्रयोदशमेकलामेकलदेशजाःसप्तकोशलायांनवैवनैषधास्तावंतःनवैवभूपतयोभविष्यंति मेकलादिदेशानांमध्येत्वप्रसिद्धा देशास्तत्तद्देशीयेभ्योज्ञेयाः १७ एतेततस्तत्पुत्राइत्यारभ्यशूद्राइत्यंतास्तुल्यकालाःखंडमंडलपतयोल्पप्रसादत्वादिविशिष्टाभूभृतोभविष्यंतीत्यन्वयः १८ राजाश्रयेणशुष्मिणोबलिनःनतुधर्मेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्लेच्छाश्चार्याश्चविपर्ययेणम्लेच्छामध्येआर्याश्चांतेइत्येतद्रूपेण १९ जगतिधर्मस्यानुदिनंह्रासादर्थस्यचव्यवच्छेदात्परिच्छिन्नत्वात्संक्षयोभविष्यति २० २१ रत्नताम्रभागितारत्नभूतताम्रा

दनःसुषिनंदिनंदियशाःशिशुकप्रवीरौचएतेवर्षशतंषड्वर्षाणिचभविष्यंति । ततस्तत्पुत्रास्त्रयोदशैवबाल्हीकाश्चत्रयस्ततः । पुष्यमित्रपटुमित्रास्त्रयो दशमेकलाश्चसप्तकोशलायांतुनवैवभूपतयोभविष्यंतिनैषधास्तुतावंतएवभूपतयोभविष्यंति १७ मगधायांविश्वस्फाटिकसंज्ञोऽन्यान्वर्णान्करिष्य तिकैवर्तपटुपुलिंदब्राह्मणान्राज्येस्थापयिष्यत्युत्साद्याखिलक्षत्रजातिंनवनागाःपद्मावत्यांकांतीपुर्यांमथुरायामनुगंगाप्रयागंमागधाःसुह्माश्चभोक्ष्यं तिकोशलेंद्रताम्रलिप्तान्समुद्रतटपुरींचदेवरक्षितोरक्षिष्यति । कलिंगमाहिषकमाहेंद्रभौमागुहांभोक्ष्यंतिनैषादनैमिषिककालतोयाञ्जनपदान्माणि धारवंश्याभोक्ष्यंति । स्त्रीराज्यमूषिकजनपदान्कनकाह्वयाभोक्ष्यंतिसौराष्ट्रावंतिशूद्रानर्बुदमरुभूमिविषयांश्चव्रात्याद्विजाभीरशूद्राद्याभोक्ष्यंति । सिंधुतटदार्विकोर्वीचंद्रभागाकाश्मीरविषयान्व्रात्याम्लेच्छादयःशूद्राभोक्ष्यंति एतेचतुल्यकालाःसर्वेपृथिव्यांभूभृतोभविष्यंति ।अल्पप्रसादाबृहत्को पाःसर्वकालमनृताधर्मरुचयःस्त्रीबालगोवधकर्तारःपरस्वादानरुचयोऽल्पसाराउदितास्तमितप्रायास्वल्पायुषोमहेच्छात्यल्पधर्माश्चभविष्यंति १८ तैश्चविमिश्रजनपादास्तच्छीलवर्तिनोराजाश्चयशुष्मिणोम्लेंच्छाश्चार्याश्चविपर्ययेणवर्तमानाःप्रजाःक्षपयिष्यंति १९ ततश्चानुदिनमल्पाल्पह्रा सात्यवच्छेदाद्धर्मार्थयोर्जगतःसंक्षयोभविष्यति २० ततश्चार्थएवाभिजनहेतुर्धनमेवाशेषधर्महेतुराभिरुचिरेवदांपत्यसंबंधहेतुरनृतमेवव्यवहारजय हेतुःस्त्रीत्वमेवोपभोगहेतुः २१ रत्नताम्रभागितैवपृथिवीहेतुर्ब्रह्मसूत्रमेवविप्रत्वहेतुर्लिंगधारणमेवाश्रमहेतुरन्यायएववृत्तिहेतुः २२ दौर्बल्यमेववृ त्तिहेतुर्भयगर्भोच्चारणमेवपांडित्यहेतुः २३ दानमेवधर्महेतुराढ्यतैवसाधुत्वहेतुः २४ स्नानमेवप्रसाधनहेतुः स्वीकरणमेवविवाहहेतुःस द्वेषधार्येवपात्रंदूरायतनोदकमेवतीर्थमित्येवमनेकदोषोत्तरेभूमंडलेसर्ववर्णेष्वेवयोयोबलवान्सभूपतिर्भविष्यति । एवंचातिलुब्धकरभारासहाःशै लानामंतराद्रोणीःप्रजाःसंश्रयिष्यंति। मधुशाकमूलफलपत्रपुष्पाहाराश्चभविष्यंतितरुवल्कलचीवरप्रावरणाश्चातिबहुप्रजाशीतवातातपवर्षसहाभवि ष्यंतिनचकश्चित्त्रयोविंशतिवर्षाणिजीविष्यत्यनवरतंचात्रकलियुगेक्षयमायात्यखिलमेवैषजनःक्षयमुपैष्यति२५श्रौतस्मार्तधर्मेविप्लवमत्यंतमुपगतेक्षी णप्रायेचकलावशेषजगत्स्त्रष्टुश्चराचरगुरोरादिमयस्यांतमयस्यसर्वमयस्यब्रह्ममयस्यात्मस्वरूपिणोभगवतोवासुदेवस्यांशःशंभलग्रामेप्रधानब्राह्म

दिमत्वमेवपृथिवीहेतुरुत्तमभूमित्वेकारणंनतुपुण्यतीर्थादिमत्त्वम् उन्नतांबुमत्तेतिपाठेउन्नतेगिरितटादावंबुमत्त्वंवृत्तिर्जीविका २२ भयगर्भोच्चारणंभयोपदर्शनपूर्वकमुच्चारणम् २४ दानमेवधर्महेतु र्नतुयागादि २४ स्वीकरणमेवविवाहहेतुर्नतुस्मृत्याद्युक्तविधिप्रकारःसद्वेषधारीदांभिकःकलियुगेक्षयमशेषंयातिसतिजनःक्षयमुपैष्यतीत्यन्वयः २५ एवंकलेरंतेकल्क्यवतारेणसत्ययुगप्रवृत्तिमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रौतस्मार्तेत्यादिना आदिमयस्यसर्वकारणरूपस्यअंतस्यानिषेधावधिभूतस्य अतएवसर्वमयस्यनिखिलकार्यमयस्य ततोविकारादिप्राप्तावाह ब्रह्ममयस्यअष्टगुणर्द्धिसमन्वितःअणिमालघिमा प्राप्तिःप्राकाम्येशित्ववश्यता यत्रकामावसायित्वंमहिमेतिगुणाष्टकमितिप्रोक्तगुणयुक्तः अन्येत्वन्यथागुणाष्टकंवदंति अणिमामहिमाचैवलघिमागरिमातथा ईशित्वंचवशित्वंचप्रकाम्यंकाममे वचेति २६ प्रबुद्धानामित्यनेनसत्त्वगुणोद्रेकोदर्शितः २७ तेनकालेनकृतानामाहितशक्तीनामित्यर्थः तत्कालकृतेतिपाठेप्रसूतेर्विशेषणम् २८ कालस्वभावादेवकृतयुगधर्मानुसारीणि २९ एतत्सर्वकस्मिन्युगेभविष्यतीत्यपेक्षायामाहात्रोच्यतइति तिष्यःपुष्यः चंद्रार्कबृहस्पतीनांतिष्ययोगेकृतंसत्ययुगंभविष्यति यद्यपिप्रतिद्वादशाब्दंकर्कटस्थेबृहस्पतौपुष्यामावास्यायां त्रयाणांपुष्यर्क्षेणयोगःस्यात्तथाप्येकराशौसमेष्यतीतिसहप्रवेशोक्तेर्नातिप्रसंगः ३० उक्तंराजवंशंनिगमयति अतीताइति अनागताभूपालाश्चउक्ताः ३१ अनागतःक्षात्रियवंशःकियत्कालं

णविष्णुयशसोगृहेअष्टगुणर्द्धिसमन्वितःकल्कीरूपीजगत्यत्रावतीर्यसकलम्लेच्छदस्युदुष्टाचरणचेतसामशेषाणामपरिच्छिन्नमाहात्म्यशक्तिःक्षयंकरिष्य ति२६स्वधर्मेषुचाखिलंजगत्संस्थापयिष्यतीत्यनंतरंचाशेषकलेरवसानेप्रबुद्धानांतेषामेवजनपदानाममलस्फटिकविशुद्धामतयोभविष्यंति२७तेषांच बीजभूतानामशेषमनुष्याणांपरिणतानामपितत्कालकृतानामपत्यप्रसूतिर्भविष्यति२८तानिचतदपत्यानिकृतयुगधर्मानुसारीणिभविष्यंतीति २९ अ त्रोच्यते यदाचंद्रश्चसूर्यश्चतथातिष्यबृहस्पती एकराशौसमेष्यंतिभविष्यतिततःकृतम् ३० अतीतावर्तमानाश्चतथैवानागताश्चये । एतेवंशेषुभूपा लाःकथितामुनिसत्तम ३१ यावत्परिक्षितोजन्मयावन्नंदाभिषेचनम् । एतद्वर्षसहस्रंतुज्ञेयंपंचदशोत्तरम् ३२ सप्तर्षीणांचयौपूर्वौदृश्येतेउदितौदि वि । तयोस्तुमध्यनक्षत्रंदृश्यतेयत्समंनिशि । तेनसप्तर्षयोयुक्तास्तिष्ठंत्यब्दशतंनृणाम् ३३ तेतुपारिक्षितेकालेमघास्वासन्द्विजोत्तम।तदाप्रवृत्तश्चक लिर्द्वादशाब्दशतात्मकः ३४ यदैवभगवद्विष्णोरंशोयातोदिवंद्विज । वसुदेवकुलोद्भूतस्तदैवकलिरागतेः ३५ यावत्सपादपद्माभ्यांपस्पर्शमांवसुंध राम् । तावत्पृथ्वीपरिष्वंगेसमर्थोनाभवत्कलिः ३६ गतेसनातनस्यांशेविष्णोस्तत्रभुवोदिवम् । तत्याजसानुजोराज्यंधर्मपुत्रोयुधिष्ठिरः ३७ वि परीतानिदृष्ट्वाचनिमित्तानिसपांडवः । यातेकृष्णेचकाराथसोभिषेकंपरिक्षिते ३८ प्रयास्यंतियदाचैतेपूर्वाषाढांमहर्षयः । तदानंदात्प्रभृत्येषकलि

स्थास्यतीत्यपेक्षायामाह यावदिति पंचदशोत्तरसहस्रवर्षपर्यंतंशुद्धःक्षात्रियवंशःस्थास्यतिअनंतरंनंदेनसर्वक्षत्रियनाशादित्यर्थः ३२ कलेःप्रवृत्तिंवृद्धिंचवक्तुंलक्षणमाह सप्तर्षीणामिति प्राग ग्रशकटाकारंतारासप्तकंसप्तर्षिमंडलंतत्रपूर्वतइष्वाकारेतारात्रयेग्रमध्यमूलेषुमरीचिसभार्यवसिष्ठांगिरसः ततः पश्चिमेखट्वाकारेताराचतुष्केऐशानाग्नेयनैर्ऋतिवायव्यकोणेष्वत्रिपुलस्त्यपुलह क्रतवोयथाक्रमम् तत्रयौपूर्वौप्रथमोदितौपुलहक्रतुसंज्ञौदृश्येतेतयोस्तत्पूर्वयोश्चमध्येसमंदक्षिणोत्तररेखायांसमदेशावस्थितंयदश्विन्यादिनक्षत्रेष्वन्यतमनक्षत्रंदृश्यतेतेनतथैवयुक्तानृणामब्दशतं तिष्ठंतीति ३३ काललक्षणमुक्त्वाकलिप्रवृत्तिमाह तदासंध्यासंध्यांशाभ्यांसहद्वादशाब्दशतात्मकःकलिःपूर्वसंध्यारूपेणप्रवृत्तोपिस्वेनरूपेणप्रवृत्तः प्रकर्षेणवृत्तइत्यर्थः ३४ एतदेवस्प ष्टयति यदैवेतिद्वाभ्याम् ३५ पृथिवीपरिष्वंगेसमर्थइत्युक्तेःपूर्वमपिकलिःप्रविष्टइतिगम्यते ३६ साक्षात्कलिप्रवेशेनुयुधिष्ठिरादिभिःस्वराज्यंपरित्यक्तमित्याह गतइतिद्वाभ्याम् ३७ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलेःप्रवृत्तिमुक्त्वावृद्धिमाह प्रयास्यंतीति ३९ पूर्वोक्तमेवकलिप्रवेशकालमनूद्यतत्संख्यामाह यस्मिन्निति त्रिभिः ४० त्रीणीतिसंध्यासंध्यांशाभ्यांसहेतिज्ञेयम् ४१ दिव्यानिदिव्यसंख्ययासंख्यातानिसप्तपंचसंख्ययाद्वादशाब्दशतानीत्यर्थः निःशेषेणतस्मिन्गतेसतीतिशेषः कृतंकृतयुगम् ४२ ब्राह्मणादिवंशःक्षत्रियवंशश्चसकलःकिमितिनोक्तइत्यतआह ब्राह्मणाइतिद्वाभ्याम् ४३ कुलेकुलेवांतरकुलेषुनामधेयानांपरिसंख्यावहुत्वात्पौनरुक्त्याच्चनोक्ता ४४ महापद्माख्यनंदांतक्षत्रियाणांनाशेपिपुनःप्रवृत्तिमाह देवापिरितिद्वाभ्याम् ४५ क्षत्रस्यप्रावर्त

र्वृद्धिंगमिष्यति ३९ यस्मिन्कृष्णोदिवंयातस्तस्मिन्नेवतदाहनि । प्रतिपन्नंकलियुगंतस्यसंख्यांनिबोधमे ४० त्रीणिलक्षाणिवर्षाणांद्विजमानुषसंख्यया । षष्टिंचैवसहस्राणिभविष्यत्येषवैकलिः ४१ शतानितानिदिव्यानिसप्तपंचचसंख्यया । निःशेषेणततस्तस्मिन्भविष्यतिपुनःकृतम् ४२ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चद्विजसत्तम । युगेयुगेमहात्मानःसमतीताःसहस्रशः ४३ बहुत्वान्नामधेयानांपरिसंख्याकुलेकुले । पुनरुक्तबहुत्वात्तुनमयापरिकीर्तिता ४४ देवापिःपौरवोराजामनुश्चेक्ष्वाकुवंशजः । महायोगबलोपेतौकलापग्रामसंश्रयौ ४५ कृतेयुगइहागत्यक्षत्रप्रावर्तकौहितौ । भविष्यतोमनोर्वंशेबीजभूतौव्यवस्थितौ ४६ एतेनक्रमयोगेनमनुपुत्रैर्वसुंधरा । कृतत्रेतादिसंज्ञानियुगानित्रीणिभुज्यते ४७ कलौतुबीजभूतास्तेकेचित्तिष्ठंतिभूतले । यथैवदेवापिमनूसांप्रतंसमवस्थितौ ४८ एषतूद्देशतोवंशस्तवोक्तोभूभुजांमया । निखिलोगदितुंशक्योनैवजन्मशतैरपि ४९ एतेचान्येचभूपालायैरत्रक्षितिमंडले । कृतंममत्वंमोहांधैर्नित्येनित्यकलेवरैः ५० कथंममेयमबलामत्पुत्रस्यकथंमही । मद्वंशस्येतिचिंतार्ताजग्मुरंतमिमेनृपाः ५१ तेभ्यःपूर्वतराश्चान्येतेभ्यस्तेभ्यस्तथापरे । भविष्याश्चैवयास्यंतितेषामन्येचयेप्यनु ५२ विलोक्यात्मजयोद्योगयात्राव्यग्रान्नराधिपान् । पुष्पप्रहासैःशरदिहसतीववसुंधरा ५३ मैत्रेयपृथिवीगीताःश्लोकाश्चात्रनिबोधतान् । यानाहधर्मध्वजिनेजनकायासितोमुनिः ५४ पृथिव्युवाच । कथमेषनरेंद्राणांमोहोबुद्धिमतामपि । येनफेनसधर्माणोप्यतिविश्वस्तचेतसः ५५ पूर्वमात्मजयंकृत्वाजेतुमिच्छंतिमंत्रिणः । ततोभृत्यांश्चपौरांश्चजिगीषंतेतथारिपून् ५६ क्रमेणानेनजेष्यामोवयंपृथ्वींससागराम् । इत्यासक्तधियोमृत्युंनपश्यंत्यविदूरगम् ५७ समुद्रावरणंयातिमन्मंडलम

कौभविष्यतः यतोमनोर्वंशेसोमसूर्यवंशरूपेबीजभूतौव्यवस्थितौ ४६ कलेःसंध्यायामेवक्षत्रियसत्त्वात्त्रीणियुगानिभुज्यतइत्युक्तम् ४७ देवापिमनुवदन्यत्रापिकलौबीजभूतानांस्थितिमाह कलौत्विति ४८ ४९ वंशकथनस्यवैराग्येतात्पर्यमाह एतेचेति भूमंडलेनित्येकल्पांतस्थायिनितदपेक्षयाअनित्यानिअस्थिराणिकलेवराणियेषांतथाभूतैरपिममत्वंकृतम् ५० मोहांधत्वमेवाह कथंममेयमितिद्वाभ्याम् ५१ तेभ्यस्तेभ्यःपूर्वतराइत्यनेनातीतानांमोहानवस्थादर्शिता एवंभविष्याइत्यनागतानांमोहानवस्था ५२ ५३ ५४ एतदेवपृथ्वीगीतैःप्रपंचयति कथमेषइतिनवभिः फेनसधर्माणः क्षणभंगुराइत्यर्थः ५५ पूर्वमात्मजयइति अजितेंद्रियाणांमंत्रिभृत्यादिजयाभावात् ५६ ५७ किंचएवंसर्वमात्मवशीकुर्वतांममभुवोमंडलंवशंयातियद्यपित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाप्यात्मनामिंद्रियादीनांजयाज्जातमेतदनित्यंराज्यंक्रियदत्यल्पम् यस्मादात्मजयेसतिमुक्तिरत्यंतंफलम् ५८ अनित्यत्वमेवाह उत्सृज्येति पूर्वजाःपूर्वे पूर्वेयामितिवापाठः ५९ राज्येपि त्रादिवैरमपिदोषमाह तत्कृतइति ६० किंचमयिराज्ञांममत्वबुद्धिर्दृढैवेत्याह पृथ्वीममेति अत्रमयियोयोराजामृतोबभूवतस्यैवंकुबुद्धिरासीत्ततःपारमार्थिकफलाभावात् अन्यत्रेतिपाठेमृतः सन्नन्यत्रराजाबभूवतस्यापिवासनावशादियमेवकुबुद्धिःसंसारप्रदासीदित्यर्थः ६१ किंचइदंचित्रमित्याह दृष्ट्वेति मयिममत्वाद्दृताचित्तंसंतमेवमृतंदृष्ट्वातदन्वयस्थस्यद्वदिमत्प्रभवंमाद्विषयंमम

थोवशम् । कियदात्मजयादेतन्मुक्तिरात्मजयेफलम् ५८ उत्सृज्यपूर्वजायातायांनादायगतःपिता । तांममेतिविमूढत्वाज्जेतुमिच्छंतिपार्थिवाः ५९ मत्कृतेपितृपुत्राणांभ्रातॄणांचापिविग्रहाः । जायंतेत्यंतमोहेनममत्वाहृतचेतसाम् ६० पृथ्वीममेयंसकलाममैषाममान्वयस्यापिचशाश्वतेयम् । योयो मृतोह्यत्रबभूवराजाकुबुद्धिरासीदितितस्यतस्य ६१ दृष्ट्वाममत्वावृताचित्तमेकंविहायमांमृत्युपथंव्रजंतम् । तस्यान्वयस्थस्यकथंममत्वंहृद्यास्पदंम त्प्रभवंकरोति ६२ पृथ्वीममैषाशुपरित्यजैनांवदंतियेदूतमुखैःस्वशत्रुम् । नराधिपास्तेषुममातिहासःपुनश्चमूढेषुदयाभ्युपैति ६३ । । पराशर उवाच । । इत्येतेधरणीगीताःश्लोकामैत्रेययैःश्रुतैः । ममत्वंविलयंयातितापन्यस्तंयथाहिमम् ६४ इत्येषकथितःसम्यङ्मनोर्वंशोमयातव । य त्रास्थितिप्रवृत्तस्यविष्णोरंशांशकानृपाः ६५ शृणुयाद्यइमंभक्त्यामनुवंशमनुक्रमात् । तस्यप्रापमशेषंवैप्रणश्यत्यमलात्मनः ६६ धनधान्यर्द्धिमतुलां प्राप्नोत्यव्याहतेंद्रियः श्रुत्वैवमखिलंवंशंप्रशस्तंशशिसूर्ययोः ६७ इक्ष्वाकुजन्हुमांधात्रसगराविक्षितान्रघून् । ययातिनहुषाद्यांश्चज्ञात्वानिष्ठामुपा गतान् ६८ महाबलान्महावीर्याननंतधनसंचयान् । कृतान्कालेनबलिनाकथाशेषान्नराधिपान् ६९ श्रुत्वानपुत्रदारादौगृहक्षेत्रादिकेतथा । द्रव्या दौचकृतप्राज्ञोममत्वंकुरुतेनरः ७० तप्तंतपोयैःपुरुषप्रवीरैरुद्बाहुभिर्वर्षगणाननेकान् । इष्टाश्चयज्ञाबलिनोऽतिवीर्याःकृतास्तुकालेनकथावशेषाः । ७१ पृथुःसमस्तान्प्रचचारलोकानव्याहतोयोऽरिविदारिचक्रः । सकालवाताभिहतोविनष्टःक्षिप्तंयथाशाल्मलितूलमग्नौ ७२ यःकार्तवीर्योबुभुजेसम स्तान्द्वीपान्समाक्रम्यहतारिचक्रः । कथाप्रसंगेष्वभिधीयमानःसएवसंकल्पविकल्पहेतुः ७३ दशाननावीक्षितराघवाणामैश्वर्यमुद्भासितदिङ्मु

त्वंकथमास्पदंकरोतीति ६२ अपिचएतेऽतिशोच्याइत्याह पृथ्वीति तेषुममहासोभवतिमूढत्वाद्दयाभ्युपैतिमामितिशेषः ६३ ६४ ६५ चतुर्थांशस्यश्रवणफलमाह शृणुयादिति मनु वंशस्थानांपुण्यकीर्तीनांश्रवणात्पापक्षयोधनादिवृद्धिश्चभवति ६६ ६७ निष्ठांनाशम् तादृशानामपिनाशानुसंधानान्ममतानिवृत्तिश्चभवतीत्यर्थः ६८ ६९ ७० नचतेषांतपःप्रभावाद्य भावात्कथावशेषत्वमित्याह तप्तमिति ७१ तानेवाह पृथुरितिद्वाभ्याम् ७२ संकल्पविकल्पयोःकेषांचित्संकल्पस्यतथेतिप्रत्ययस्यकेषांचिद्विकल्पस्यकिमासीच्चेतिसंदेहस्यहेतुर्निमि त्तम् संकल्पस्यमनसोविकल्पेहेतुरितिवा ७३ उद्भासितानिदिङ्मुखानियैः उद्भासितदिग्वितानमितिपाठेऐश्वर्यविशेषणम् रावणादीनामैश्वर्यमन्तकस्यभ्रूभंगपातेनकथंभस्मनजातं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंतुजातमेवतस्मादैश्वर्यंधिक् यद्वाकाष्ठंदग्धमपिभस्मभवतिऐश्वर्यंतुभस्मापिकथंनजातंकिंचिदवशिष्टमपिकथंनजातंतस्माद्धिक् ७४ आत्मन्यहंकारास्पेददेहेपिकिंपुनःपुत्रदारादौ ७५ भगीरथाद्याःसत्यंजाताःकिंतुकृतेइतिनविद्मः कालेनादर्शनंनीताइत्यर्थः अत्रराघवादीनांग्रहणंलोकदृष्ट्यावैराग्यार्थम् ७६ तथान्येऽनुक्तास्तथाभिधेयाःकथामात्रावशेषाभविष्यंतीत्यर्थः

खानाम् । भस्मापिजातंनकथंक्षणेनभ्रूभंगपातेनधिगंतकस्य ७४ कथाशरीरत्वमवापयद्वैमांधातृनामाभुविचक्रवर्ती । श्रुत्वापितंकोहिकरोतिसाधु
र्ममत्वमात्मन्यपिमंदचेताः ७५ भगीरथाद्याःसगरःककुत्स्थोदशाननोराघवलक्ष्मणौच । युधिष्ठिराद्याश्चबभूवुरेतेसत्यंनमिथ्याक्वनुतेनविद्मः ।
७५ येसांप्रतंयेचनृपाभविष्याःप्रोक्तामयाविप्रवरोग्रवीर्याः । येतेतथान्येचतथाभिधेयाःसर्वेभविष्यंतियथैवपूर्वे ७७ एतद्विदित्वाननरेणकार्यंमम
त्वमात्मन्यपिपंडितेन । तिष्ठंतुतावत्तनयात्मजायाक्षेत्रादयोयेतुशरीरतोऽन्ये ७६ इतिश्रीविष्णुपुराणेचतुर्थेंशेचतुर्विंशोध्यायः २४ समाप्तोऽयंचतुर्थोंशः

७७ एतदंशतात्पर्यार्थंसंक्षिप्याह एतदिति तनयादयस्तिष्ठंतुतेषुममत्वंसुतरांनकार्यमित्यर्थः ७८ ॥ ॥ इतिश्रीविष्णुपुराणेचतुर्थेंशेटीकायांरत्नगर्भभट्टाचार्यकृतायांवैष्णवाकूतचन्द्रि
कायांचतुर्विंशोध्यायः २४ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीविष्णुपुराणे चतुर्थांशः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ विष्णुपुराण पंचमांश प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ अविघ्नमस्तु ॥ ॥ मनुवंशमहांभोधेश्चतुर्थांशान्महामुनिः कृष्णाख्यंरत्नमुद्धृत्यपंचमेनव्यदर्शयत् १ तत्राष्टत्रिंशदध्यायैःपंचमेप्रथमेत्रच अवतारायकृष्णस्यदेवैःस्तुतिरुदीर्यते १ उक्तानुवादपूर्वकंश्रीकृष्णावतारायउपोद्घातसंगत्यादेवकीविवाहादिप्रसंगमाह नृपाणामिति १ अवतारःप्रादुर्भावस्तद्विशिष्टोंऽशोमायावच्छिन्नंब्रह्मैवोपचारादित्यंशावतारः योऽयंचतुर्थांशेकथितइतिसंगतिर्दर्शिता अशेषतः यदायेनप्रकारेणेतिविस्तारेण २ तच्चरितानिचवदेत्याह चकारेति तत्रकृष्णावतारे अतिपरिच्छिन्नमनुष्याकारलीलाविग्रहेणाविर्भावः अंशाशेनेत्युक्तमुपचारात् नतुशक्तिद्वासेन कृष्णाद्यवतारेष्वपिविश्वरूपदर्शनसर्वैश्वर्याद्युक्तेः नन्वंशिनोंशोद्धारेणशक्त्यादिद्वासस्तथांशस्यापितदपेक्षयाल्पशक्तित्वादिकंधान्यराश्यादिविभागइवप्रसज्येतेतिचेन्न प्रकाशस्वरूपेतदभावात्प्रदीपस्यहितन्मूलकदीपांतरस्यचोपाधिभेदेपिशक्त्यादिसाम्यदर्शनात् पूर्णमदःपूर्णमिदंपूर्णात्पूर्णमदुच्यते पूर्णस्यपूर्णमादायपूर्णमेवावशिष्य

। मैत्रेयउवाच । । नृपाणांकथितःसर्वोभवतावंशविस्तरः । वंशानुचरितंचैवयथातदनुवर्णितम् १ अंशावतारोब्रह्मर्षेयोऽयंयदुकुलोद्भवः । विष्णोस्तंविस्तरेणाहंश्रोतुमिच्छाम्यशेषतः २ चकारयानिकर्माणिभगवान्पुरुषोत्तमः । अंशांशेनावतीर्योर्व्यांतत्रतानिमुनेवद ३ । । पराशर उवाच । । मैत्रेयश्रूयतामेतद्यत्पृष्टोऽहामिहत्वया । विष्णोरंशांशसंभूतिचरितंजगतोहितम् ४ देवकस्यसुतांपूर्वंवसुदेवोमहामुने । उपयेमेमहाभागां देवकीदेवतोपमाम् ५ कंसस्तयोर्वररथंचोदयामाससारथिः । वसुदेवस्यदेवक्यासंयोगेभोजवर्धनः ६ अथांतरिक्षेवागुच्चैःकंसमाभाष्यसादरम् । मेघगंभीरनिर्घोषासमाभाष्येदमब्रवीत् ७ यामेतांवहसेमूढसहभर्त्रारथेस्थिताम् । अस्यास्तवाष्टमोगर्भःप्राणानपहरिष्यति ८ । । पराशरउवाच । । इत्याकर्ण्यसमुद्धृत्यखड्गंकंसोमहाबलः । देवकींहंतुमारब्धोवसुदेवोऽब्रवीदिदम् ९ । । वसुदेवउवाच । । नहंतव्यामहाबाहोदेवकी भवतातव । समर्पयिष्येसकलान्गर्भानस्योदरोद्भवान् १० । । पराशरउवाच । । तथेत्याहचतंकंसोवसुदेवंद्विजोत्तम । नघातयामासचतांदेवकींतस्यगौरवात् ११ एतस्मिन्नेवकालेतुभूरिभारावपीडिता । जगामधरणीमेरौसमाजेत्रिदिवौकसाम् १२ सब्रह्मकान्सुरान्सर्वान्प्रणिपत्याथमे

तइतिश्रुतेः परंब्रह्मनराकृतिगूढंपरंब्रह्ममनुष्यलिंगंकृष्णस्तुभगवान्स्वयमित्यादिवाक्येभ्यश्च यस्तुमत्केशौवसुधातलेइत्यादौअयंकंसंघातयितेत्यत्रचकेशव्यपदेशःसब्रह्मणःपरिपूर्णस्यभूभारहरणरूपंकार्यमत्यल्पयत्नसाध्यमितिव्याख्यापयितुंनतुकेशयोरामकृष्णत्वंवक्तुम् जडयोःकेशयोस्तद्देहक्षेत्रज्ञत्वाभावेनतत्तत्कार्यंकर्तुमशक्तत्वात् केशात्मकमाययोर्द्वरामकृष्णदेहावाविश्य भगवानेवतत्तत्करिष्यतीतिचेदोमितिब्रूमः फलतोऽविशेषात् कृष्णाष्टम्यामहंनिशीतिस्वयमेवोक्तत्वाच्चेत्यलंविस्तरेण ३ संभूतिचरितंचेतिद्वंद्वैक्यम् ४ ५ वरंश्रेष्ठंरथम् यद्वातयोः भीत्येतिशेषः यद्वावररथंजामातृरथमित्यर्थः संयोगेविवाहसंबंधे ६ अंतरिक्षेऽशरीरिणीवागाभाष्यसमाभाष्येतिपुनरुक्तेर्वैवाहिककर्मव्यग्रस्यकंसस्यसम्यगवधारणार्थाय यद्वाआभाष्येबक्तव्येसादरंयथास्यादेवंसमाभाष्यसंबोध्य मेघस्येवगंभीरोनिर्घोषोध्वनिर्यस्याःसा इदंवक्ष्यमाणवाक्यमब्रवीत् ७ ८ आरब्धः कर्तरिक्तः हंतुंप्रवृत्तइत्यर्थः ९ अस्योदरोद्भवानितिसंधिरार्षः अस्यकलत्रस्येतिवाअस्यतवेतिवान्वयः असुक्षेपणइत्यस्यहिलोपेवारूपम् यत्रक्वचिरक्षिपेत्यर्थः अस्यागर्भात्समुद्भतानितिपाठःसुगमः १० ११ एतस्मिन्कालेदेवकीप्रसवापेक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याकंसेस्थितेसति १२ तत्सर्वंयदर्थसमाजेजगामेति १३ विज्ञापितैर्भुवादेवैःस्तुतेविष्णुःस्वमायया षड्भानवतार्याथस्वयंचापिरभूत्प्रभुः अग्निःसुवर्णस्यगुरुर्जनकः अग्नेरपत्यंप्रथमंसुवर्ण भूर्वैष्णवीसूर्यसुताश्चगावइतिस्मृतेः यथाग्निःसुवर्णमलापकर्षणेनरक्षतियथावासूर्यःपर्जन्यरूपेणगाःपालयतिरश्मीन्वावर्धयतितथामांसर्वलोकांश्चदैत्यादिरूपमारणेनपालयत्विति भावः १४ तथापिभगवंतंसाक्षाद्विज्ञप्तुमसमर्थयाभुवातदंशभूताब्रह्मादयोभारावतारणंप्रार्थयंतेप्रजापतिरित्यादिनागच्छेयमातिविह्वलेत्यंतेनकालश्चतदंशस्तच्छक्तित्वात्सर्वेषांवोयुष्माकंसमूहोपितदंशः ए

दिनो । कथयामासतत्सर्वंखेदात्करुणभाषिणी १३ । । पृथिव्युवाच । । अग्निःसुवर्णस्यगुरुर्गवांसूर्यःपरोगुरुः । ममाथाखिललोकानांबंधु र्नारायणोहरिः १४ प्रजापतिपतिर्ब्रह्मापूर्वेषामपिपूर्वजः । कलाकाष्ठानिमेषात्माकालश्चाव्यक्तमूर्तिमान् १५ तदंशभूतःसर्वेषांसमूहोवःसुरोत्तमाः। आदित्यामरुतःसाध्यारुद्रवस्वश्विवह्नयः १६ पितरोयेचलोकानांस्रष्टारोऽत्रिपुरोगमाः । एतत्तस्याप्रमेयस्यरूपंविष्णोर्महात्मनः १७ यक्षराक्ष सदैतेयाःपिशाचोरगदानवाः। गंधर्वाप्सरसश्चैवरूपंविष्णोर्महात्मनः १८ ग्रहर्क्षतारकाचित्रगगनाग्निजलानिलाः । अहंचविषयाश्चैतत्सर्वंविष्णुम यंजगत् १९ तथाप्यनेकरूपस्यतस्यरूपाण्यहर्निशम् । बाध्यबाधकतांयातिकल्लोलाइवसागरे २० तत्सांप्रतमिमेदैत्याःकालनेमिपुरोगमाः । म र्त्यलोकंसमागम्यबाधंतेहर्निशंप्रजाः २१ कालनेमिर्हतोयोऽसौविष्णुनाप्रभविष्णुना । उग्रसेनसुतःकंसःसंभूतःसमहासुरः २२ अरिष्टोधेनुकःके शीप्रलंबोनरकस्तथा । सुंदोसुरस्तथात्युग्रोबाणश्चापिबलेःसुतः २३ तथान्येचमहावीर्यानृपाणांभवनेषुये । समुत्पन्नादुरात्मानस्तान्नसंख्यातुमु त्सहे २४ अक्षौहिण्योहिबहुलादिव्यमूर्तिधृताःसुराः । महाबलानांदृप्तानांदैत्येंद्राणांममोपरि २५ तद्भूरिभारपीडार्तानशक्नोम्यमरेश्वराः । बिभ र्तुमात्मनात्मानमितिविज्ञापयामिवः २६ क्रियतांतन्महाभागममभारावतारणम् । यथारसातलंनाहंगच्छेऽयमतिविह्वला २७ । । पराशरउवा च । । इत्याकर्ण्यधरावाक्यमशेषत्रिदशैस्ततः । भुवोभारावतारार्थंब्रह्माचाहप्रचोदितः २८ । । ब्रह्मोवाच । । यथाहवसुधासर्वंसत्यमेत द्दिवौकसः । अहंभवोभवंतश्चसर्वंनारायणात्मकम् २९ विभूतयस्तुयास्तस्यतासामेवपरस्परम् । आधिक्यन्यूनताबाध्यबाधकत्वेनवर्तते ३० त

तदेवदर्शयतिआदित्यादिसार्धैस्त्रिभिः रुद्राश्चवसवश्चाश्विनौचते १६ महात्मनोविश्वरूपस्य १७ १८ ग्रहर्क्षताराचित्रेत्यनेनग्रहादीनामपितद्रूपतोक्ता अग्निस्तेजःअहंचपृथ्वीविषयाः शब्दादयः १९ सर्वस्यविष्णुमयत्वेकथंपरस्परविरोधस्तत्राह तथापीति २० बाध्यबाधकतामेवाहतदिति २१ ननुकालनेमिःपूर्वमेवहतइतितत्राह कालनेमिरिति २२ २३ अन्येचये नृपाणांभवनेषुसमुत्पन्नाजरासंधादयः २४ अक्षौहिणीसंख्याभारतेचोक्ता अक्षौहिण्यःप्रसंख्यातारथानांदंतिनांतथा एकविंशतिसाहस्रंशतान्यष्टौचसप्ततिः ज्ञेयंशतसहस्रंतुसहस्राणितथा नव नराणामपिपंचाशच्छतानित्रीणिचैवाहि पंचषष्टिसहस्राणितथाश्वानांशतानिच दशोत्तराणिषट्प्राहुरेवमक्षौहिणींबुधाः २५ २६ २७ अशेषैःत्रिदशैःसहाकर्ण्यप्रचोदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोधरयेतिशेषः २८ २९ आधिक्यसहितान्यूनाआधिक्यन्यूनता आधिक्यमितिपृथक्पदंवा आधिक्यंबाधकत्वेनन्यूनताचबाध्यत्वेनवर्ततइत्यर्थः ३० ३१ जगत्यर्थेपृथिव्यर्थे ३२ ३३ आर्तत्रा
णइवाशक्तःखंडेशोमंडलाधिपं धरण्याप्रार्थितंकर्तुंब्रह्मातुष्टावकेशवम् हेअनाम्नायसाक्षाद्वेदस्याविषयद्वेविधेवेदितव्येवैपराचैवापराचेतिश्रुत्युक्तेपरापरब्रह्मविषयेयेद्वेविधेतएवताद्विषयभूतेएवद्वे
ब्रह्मणीमूर्तामूर्तात्मिकेभवतोरूपे ३४ उक्तमेवार्थमनूद्यसंबोधनेनस्पष्टयतिद्वेब्रह्मणीत्विति द्वेब्रह्मणीत्वमसि स्थूलात्मन्सर्वेतिसंबोधनान्मूर्तापरब्रह्मत्वे अणीयःसर्वविदित्यमूर्तपरब्रह्मत्वेज्ञेये किं
चज्ञापकंशब्दब्रह्मयच्चज्ञाप्यंब्रह्ममयस्यविरजःपरंपरमंब्रह्मतेद्वेत्वमसि ३५ ३६ ३७ तेएवशब्दब्रह्मपरब्रह्मणीदर्शयन्भगवतस्तदभेदमाह ऋग्वेदइतित्रिभिःतत्रऋग्वेदादिधर्मशास्त्रांतंयत्क
र्मविषयंशब्दब्रह्मआत्मात्मानौजीवात्मपरमात्मानौदेहौस्थूलसूक्ष्मौगुणवदव्यक्तंचतेषांविचारंविवेकमाचरितुंशीलमस्येतितथाभूतंब्रह्म.वेषयंचयच्छब्दब्रह्मअध्यात्मात्मानौतत्त्वंपदवाच्यौत
योःस्वरूपंतत्त्वंपदलक्षद्वयंतद्यस्मिन्खंडेअस्तितदपिआद्यपतेर्ब्रह्मादिपतेर्नान्यदितित्रयाणामन्वयः आद्यपतेइतिसंबोधनंवा ३८ अखंडस्वरूपितामेवाहत्वमव्यक्तमिति अव्यक्तमिंद्रियगो

दागच्छतगच्छामःक्षीराब्धेस्तटमुत्तरम् । तत्राराध्यहरिंतस्मैसर्वंविज्ञापयामिवै ३१ सर्वदैवजगत्यर्थेससर्वात्माजगन्मयः । स्वल्पांशेनावतीर्योर्व्यां
धर्मस्यकुरुतेस्थितिम् ३२ । । पराशरउवाच । । इत्युक्त्वाप्रययौतत्रसहदेवैःपितामहः । समाहितमतिश्चैनंतुष्टावगरुडध्वजम् ३३ । । ब्र
ह्मोवाच । । द्वेविधेत्वमनाम्नायपरावैचापरातथा । तेएवभवतोरूपेमूर्तामूर्तात्मिकेप्रभो ३४ द्वेब्रह्मणीत्वणीयोऽसिस्थूलात्मन्सर्वसर्ववित्। शब्द
ब्रह्मपरंचैवब्रह्मब्रह्ममयस्ययत् ३५ ऋग्वेदस्त्वंयजुर्वेदःसामवेदस्त्वथर्वच । शिक्षाकल्पोनिरुक्तंचछंदोज्योतिषमेवच ३६ इतिहासपुराणेचतथा
व्याकरणंप्रभुः । मीमांसान्यायिकंयच्चधर्मशास्त्राण्यधोक्षजः ३७ आत्मात्मदेहगुणवद्विचाराचारियद्वचः । तदप्याद्यपतेर्नान्यदध्यात्मात्मस्वरूपव
त् ३८ त्वमव्यक्तमनिर्देश्यमचिंत्यानामवर्णवत् । अपादपाणिरूपंचविष्णुर्नित्यंपरंपदम् ३९ शृणोष्यकर्णःपरिपश्यसित्वमचक्षुरेकोबहुरूप
रूपः । अपादहस्तोजवनोग्रहीतात्वंवेत्सिसर्वंनचसर्ववेद्यः ४० अणोरणीयांसमवस्तुरूपंत्वांपश्यतोऽज्ञाननिवृत्तिरन्या । धीरस्यधीर्यस्यबिभर्ति

चरः अनिर्देश्यंशब्दागोचरः अचिंत्यंमनसोप्यगोचरश्चततूअनामवर्णवच्चततूअपाणिपादरूपंहस्तपादरहितंस्वरूपंअनामवर्णत्वादव्यक्तादिस्वरूपंयत्परंपदंब्रह्मताद्विष्णुरेवत्वमसि विदुरिति
पाठेपदंताद्दशंपदंविदुर्योगिनस्तदपित्वमसीत्यर्थः ३९ ईश्वररूपतामाह शृणोषीतिदशभिः चिद्रूपत्वाद्व्यापकत्वाच्चज्ञानकर्मेंद्रियव्यापारवत्वोपचारोद्रष्टव्यः बहूनिरूपाणिरूपंयस्यअपादो
पिजवनोवेगवान्अपाणिरपिग्रहीताधारकः अत्रश्रुतिश्च अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः सवेत्तिवेद्यंनचतस्यास्तिवेत्तातमाहुरग्र्यंपुरुषंमहांतमिति ४० महापुरुषमे
वत्वामप्रच्युतस्वरूपंपश्यतोमुक्तिरपीत्याह अणोरिति अणोरणीयांसमतिसूक्ष्मतमः अतएवावस्तुरूपम् असत्स्वरूपमितिपाठेअसतःप्रपंचस्यस्वरूपमबाधितंस्वरूपंपश्यतः साक्षात्कुर्व
तोन्याआत्यंतिकीअज्ञाननिवृत्तिःस्यात् किंविशिष्टस्ययस्यधीरस्यधीर्बुद्धिः हेपरतोव्यक्तात्परात्मन्त्वत्तोवरेण्यादानंदात्मनोऽन्यन्नबिभर्तिनध्यायति तस्यत्वाश्रुतंनिदध्यासितंपश्यतोऽविद्यानि
वृत्तिरित्यर्थः ४१ ननुजगत्स्रष्टुःकथमव्यक्तात्परत्वंतत्राह त्वमिति विश्वस्यनाभिराश्रयः विश्वमादिरितिपाठेविश्वंत्वमादिःकारणंच अंतराणिअंतस्थानितावताविश्वस्रष्टृत्वाद्युक्तम् किंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतंभव्यंवर्तमानंचविश्वंत्वमेवअणोरणीयांश्चसपुमांश्चत्वमेकएवप्रकृतेःपरस्ताद्ब्रह्मापित्वमेवेतिईश्वरत्वेप्यच्युतस्वरूपमस्त्येव मायायाःस्वाश्रयाव्यामोहकत्वादितिभावः अणीयइतिपाठेअणीयोव्यक्तंचत्वमेवेति ४२ ईश्वरत्वमेवाह एकइति एकोहुताशनश्चतुर्धा श्रौतास्त्रयऔपासनश्चैकइति यद्वावैद्युतनिर्मथ्यसारैजाठरात्माचतुर्धा वर्चःकांतिंविभूतिमैश्वर्यंचददाति विश्वतो विश्वस्यचक्षुःप्रकाशकस्त्रिधात्रिषुभूरादिलोकेषुपदंत्रिलोकाक्रमणायनिदधेनिहितवान् ४३ अनंतमूर्तेइतियदुक्तंतत्प्रपंचयतिद्वाभ्याम् यथाग्निरिति अनुपश्यतिजीवरूपेणाहामीतिमन्यते ४४ अनंतरूपंविश्वरूपम् स्वरूपिसत्यम् ४५ व्यक्तेत्यादिचतुःश्लोक्याजगद्धितार्थंप्रवृत्त्युन्मुखत्वायस्तौति व्यक्तंमहदादिअव्यक्तंप्रधानंतत्स्वरूपम् समष्टिःकारणात्मनासंघातोवासुदेवः व्यष्टिःकार्यात्मनाविभक्तःसंकर्षणादिः यद्वाविराडात्मनाजीवरूपेणचसमष्टिव्यष्टिरूपता सर्वज्ञःसामान्यतःसर्वदृग्विशेषतः सर्वाशक्त्यादयःसंतियस्य ४६ व्यष्टिरूपत्वेनप्राप्तंन्यूनत्वा

नान्यद्वरेण्यरूपात्परतःपरात्मन् ४१ त्वंविश्वनाभिर्भुवनस्यगोप्तासर्वाणिभूतानितवांतराणि । यद्भूतभव्यंतदणोरणीयान्पुमांस्त्वमेकःप्रकृतेःपरस्तात् ४२ एकश्चतुर्धाभगवान्हुताशनोवर्चोविभूतिंजगतोददाति । त्वंविश्वतश्चक्षुरनंतमूर्तेत्रिधापदंत्वंनिदधेविधातः ४३ यथाग्निरेकोबहुधासमिध्यतेविकारभेदैरविकाररूपः । तथाभवान्सर्वगतैकरूपोरूपाण्यनेकान्यनुपश्यतीश ४४ एकस्त्वमद्यःपरमंपदंयत्पश्यंतित्वांसूरयोनंतरूपम् । त्वत्तोनान्यत्किंचिदस्तिस्वरूपियद्वाभूतंयच्चभव्यंपरात्मन् ४५ व्यक्ताव्यक्तस्वरूपस्त्वंसमष्टिव्यष्टिरूपवान् । सर्वज्ञःसर्वदृक्सर्वशक्तिज्ञानबलर्द्धिमान् ४६ अन्यूनश्चाप्यवृद्धिश्चस्वाधीनोनादिमान्वशी । क्षमतंद्रीभयक्रोधकामादिभिरसंयुतः ४७ निरवद्यःपरःप्राप्तोनिरधिष्ठोक्षरक्रमः । सर्वेश्वरःपराधारोधाम्नांधामात्मकोक्षयः ४८ सकलावरणातीतनिरालंबनभावन । महाविभूतिसंस्थाननमस्तेपुरुषोत्तम ४९ नाकारणात्कारणाद्वाकारणाकारणात्तव । शरीरग्रहणंव्यापिन्धर्मत्राणायतेपरम् ५० । । पराशरउवाच । । इत्येवंसंस्तवंश्रुत्वामनसाभगवानजः । ब्रह्माणमाहविश्वात्माविश्वरूपधरोहरिः ५१ । । भगवानुवाच । । भोभोब्रह्मंस्त्वयामत्तःसहदेवैर्यदिष्यते । तदुच्यतामशेषंतुसिद्ध

दिकंनिवारयति अन्यूनइति वशीनियंताक्षमःश्रमःतंद्रीआलस्यम् ४७ निरवद्यःशुद्धः निरधिष्ठोनिराश्रयः अक्षरोविनाशीक्रमोविक्रमोयस्य पराधारःब्रह्मादीनामाश्रयः धाम्नांसूर्यादीनामपिधामात्मकःप्रकाशस्वरूपः ४८ सकलावरणातीतप्रकृत्याद्यावरणहीन अतोनिरालंबनभावनानिराकारब्रह्मभावनाविषय महाविभूतिःप्रपंचरूपापरब्रह्मरूपावासंस्थानंरूपंयस्य तथाभूत ४९ इतिस्तुत्वाधर्मत्राणायतेऽवतारोस्त्वितिप्रार्थयते नाकारणादिति अकारणंनित्यंकर्मकारणंकाम्यंप्रायश्चित्तंपुंसवनादिकंमिश्रंएतेभ्यः यद्वाकस्यसुखस्यारणात्प्रापणात्कारणंधर्मः तद्विपरीतमकारणमधर्मः तदुभयंमिश्रितंकारणाकारणक्रमेणदेवतिर्यङ्मनुष्यजन्मकारणानिएतेभ्यस्तवशरीरग्रहणम् नकूटस्थस्यतव तेषामभावात्किंतुधर्मत्राणायैवलीलयातद्ग्रहणम् तथाचइदानीमपिधर्मत्राणायतथाशरीरग्रहणमस्त्वितिभावः ५० विश्वरूपधरइतिविश्वरूपप्रदर्शनंकारिष्यमाणकृष्णावतारेप्येवंसामर्थ्यंभातीतिसूचनार्थम् ५१ यदिष्यतेऽपेक्ष्यते ५२ साध्वसंभयंतेनावनतशरीरेषुसत्सु ५३ प्रवृत्तिःसृष्टिःसंस्थानंस्थितिः ५४ अप्रमेयत्वमेवदर्शयन्सबोधयति सूक्ष्मेति अतिबृहत्प्रमाणंयस्य अतिगौरवयुक्तआत्मामूर्तिर्यस्य अतिसूक्ष्मातिस्थूलतेए

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाह प्रधानेति प्रधानस्यप्रकृतेः बुद्धिर्महत्तत्त्वंइंद्रियवानहंकारस्तयोःप्रधानस्यपुंसश्चमूलअतिसूक्ष्म अपरात्मन्भूतभौतिकस्वरूपातिस्थूल मूलात्परात्मन्निति पाठेप्रधानबुद्धींद्रियवत्प्र
धानंपुमानेवमूलजगत्कर्तृत्वात् तस्मात्परात्मन्नियंतृस्वरूपेत्यर्थः ५५ स्तुत्वाप्रकृतमाह एषामहीति एषागोरूपधरामहीजगतांपरायणंत्वामुपैतिचरणयोःसमीपेपतति महीप्रसूतैरसुरैः
पीडितः शिथिलीकृतःशैलबंधः पर्वतमूलबंधोयस्याःसा अपारःअशक्यःपारः पर्यंतोयस्यतम् अपारसारमितिपाठेऽनंतबलम् ५६ अस्माभिश्चाकिंसाहाय्यंकार्यंतदाज्ञापयेत्याहद्वाभ्या

मेवावधार्यताम् ५२ ततोब्रह्माहरेर्दिव्यंविश्वरूपंसमीक्ष्यतत् । तुष्टावभूयोदेवेषुसाध्वसावनतात्मसु ५३ । । ब्रह्मोवाच । । नमोनमस्तेऽ
स्तुसहस्रमूर्तेसहस्रबाहोबहुवक्त्रपाद । नमोनमस्तेजगतःप्रवृत्तिविनाशसंस्थानपराप्रमेय ५४ सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाणगरीयसामप्य
तिगौरवात्मन् । प्रधानबुद्धींद्रियवत्प्रधानमूलापरात्मन्भगवन्प्रसीद ५५ एषामहीदेवमहीप्रसूतैर्महासुरैःपीडितशैलबंधा । परायणंत्वांजगता
मुपैतिभारावतारार्थमपारपारम् ५६ एतेवयंवृत्ररिपुस्तथायंनासत्यदस्रौवरुणस्तथैव । इमेचरुद्रावसवःससूर्याःसमीरणाग्निप्रमुखास्तथान्ये ५७
सुराःसमस्ताःसुरनाथकार्यमेभिर्मयायत्तुतदीशसर्वम् । आज्ञापयाज्ञांपरिपालयंतस्तवैवतिष्ठामसदास्तदोष ५८ । । पराशरउवाच । । ए
वंसंस्तूयमानस्तुभगवान्परमेश्वरः । उज्जहारात्मनःकेशौसितकृष्णौमहामुने ५९ उवाचचसुरानेतौमत्केशौवसुधातले । अवतीर्यभुवोभारक्ले
शहानिंकरिष्यतः ६० सुराश्चसकलाःस्वांशैरवतीर्यमहीतलम् । कुर्वंतुयुद्धमुन्मत्तैःपूर्वोत्पन्नैर्महासुरैः ६१ ततःक्षयमशेषास्तेदैतेयाधरणीतले ।
प्रयास्यंतिनसंदेहोमद्दृक्पातविचूर्णिताः ६२ वसुदेवस्ययापत्नीदेवकीदेवतोपमा । तस्यायमष्टमोगर्भोमत्केशोभवितासुराः ६३ अवतीर्यचतत्रायंकं
संघातयिताभुवि । कालनेमिंसमुद्भूतामित्युक्त्वांतर्दधेहरिः ६४ अदृश्यायततस्तस्मैप्रणिपत्यमहामुने । मेरुपृष्ठंसुराजग्मुरवतेरुश्चभूतले ६५कंसायचा
ष्टमेगर्भेदेवक्यांधरणीधरः । भविष्यतीत्याचचक्षेभगवान्नारदोमुनिः ६६कंसोऽपितदुपश्रुत्यनारदात्कुपितस्ततः । देवकींवसुदेवंचगृहेगुप्तावधारयत्
६७ जातंजातंचकंसायतेनैवोक्तंयथापुरा । तथैववसुदेवोऽपिपुत्रमर्पितवान्द्विज ६८ हिरण्यकशिपोःपुत्राःषड्गर्भाइतिनःश्रुताः । विष्णुप्रयुक्तातान्निद्रा

म् एतेवयंएषोहमित्यर्थः नासत्यदस्रौअश्विनौ ५७ ५८ उज्जहारउत्पाटितवान् केशोद्धारस्याभिप्रायःपूर्वमेवोक्तः ५९ भारनिमित्तस्यक्लेशस्यहानिंकरिष्यतः ६० तथापियुद्धक्रीडार्थं
सुरानाज्ञापयति सुराश्चेति ६१ अस्मद्युद्धात्कथंक्षयंयास्यंतीतिचेत्तत्राह ममदृक्पातेनैवविचूर्णिताःसंतः ६२ तस्यायमितिसंधिश्छांदसः तत्रायमितिपाठःसुगमः ६३ अयंकृष्णवर्णो
मत्केशइतिरामकृष्णचरितानामुपलक्षणमेतत् कंसंकंसरूपेणसमुत्पन्नंकालनेमिम् ६४ नारदःकंसायाचचक्षेइतिसंबंधः ६५ गुप्तावरुद्धौ ६६ तेनैवस्वेनैवयथोक्तंसमर्पयिष्येसकलान्
पुत्रानस्योदरोद्भवानिति तथैवसमर्पितवान् ६७ ६८ तान्षड्गर्भान्क्रमाद्देवक्यागर्भान्कृत्वान्ययोजयत्योजितवतीगर्भेइतिवापाठःकान्येहिषड्गर्भाःपूर्वजन्मनिकीर्तिमत्सुषेणादिनामानः हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रण्यकशिपुपुत्रकालनेमिपुत्राःतेहिपितामहंविहायब्रह्माणमाश्रितास्ततःपितामहेनपितैववोभाविजन्मनिघातयिष्यतीतिशप्ताःसमुद्रेशयानाश्चकृताइतिहरिवंशोक्ता·श्रुताः ६९ विष्णुप्रयुक्तेत्यत्रो
क्तंनियोगमेवस्पष्टयितुमाहयोगनिद्रेत्यादिनायावत्समाप्ति आत्मानुभवएवबाह्यवृत्तिरहितोनिद्रेत्युपचारात् महामायाचसैवस्वाश्रयाव्यामोहनात्ययाब्रह्मादिस्तंबांतंजगन्मोहितंकुतस्तत्राह
अपविद्ययाज्ञानाच्छादिन्याअतः नियोगार्हांतामाहेत्यर्थः ७० ७१ ७२ संभूतिसमंदेवकीरोहिण्योर्गर्भाधानप्रसादकालसाम्ययथास्यात् तत्राहितगर्भायाःपश्चाद्रोकुलंगतायारोहिण्याःसप्तमेमा
सिवायुभूतंगर्भमपनीयतत्रदेवकीगर्भाकर्षणंज्ञेयंहरिवंशादौ ७३ रोधःकारागृहंतत्रउपरोधान्निरोधात् ७४ तवचेदंयशःस्थास्यतीत्याह गर्भेति७५त्वयाचयशोदागर्भेगंतव्यम् अविलंबितंसमका

क्रमाद्गर्भान्नयोजयत् ६९ योगनिद्रामहामायावैष्णवीमोहितंयया।अविद्ययाजगत्सर्वंतामाहभगवान्हरिः ७०भगवानुवाच गच्छनिद्रेममादेशात्पाताल
तलसंश्रयान् । ऐकैकश्येनषड्गर्भान्देवकीजठरंनय ७१ हतेषुतेषुकंसेनशेषाख्योंशस्ततोमम । अंशोंशेनोदरेतस्याःसप्तमःसंभविष्यति ७२ गो
कुलेवसुदेवस्यभार्यान्यारोहिणीस्थिता । तस्याःससंभूतिसमंदविनेयस्त्वयोदरम् ७३ सप्तमोभोजराजस्यभयाद्रोधोपरोधतः । देवक्याःपति
तोगर्भइतिलोकोवदिष्यति ७४ गर्भसंकर्षणात्सोऽथलोकेसंकर्षणेतिवै ७५ संज्ञामवाप्स्यतेवीरःश्वेताद्रिशिखरोपमः । ततोहंसंभविष्यामि
देवक्याजठरेशुभे । गर्भेत्वयायशोदायागंतव्यमविलंबितम् ७६ प्रावृट्कालेनभस्येचकृष्णाष्टम्यामहंनिशि । उत्पत्स्यामिनवम्यांतुप्रसूतिंत्व
मवाप्स्यसि ७७ यशोदाशयनेमांतुदेवक्यास्त्वामनिंदिते । मच्छक्तिप्रेरितमातेर्वसुदेवोनयिष्यति ७८कंसश्चत्वामुपादायदेविशैलशिलातले ।प्रक्षेप्स्य
त्यंतरिक्षेचत्वंस्थानंसमवाप्स्यसि ७९ ततस्त्वांशतदृक्शक्रःप्रणम्यममगौरवात् । प्रणिपातानतशिराभगिनीत्वेग्रहीष्यति ८० ततःशुंभनिशुंभादी
न्हत्वादैत्यान्सहस्रशः । स्थानैरनेकैःपृथिवीमशेषांमंडयिष्यसि ८१ त्वंभूतिःसन्नतिःकीर्तिःक्षांतिर्द्यौःपृथिवीक्षितिः । लज्जापुष्टिरुषायाचकाचिदन्या
त्वमेवसा८२येत्वामार्येतिदुर्गेतिदेवगर्भेंबिकेतिच । भद्रेतिभद्रकालीतिक्षेम्याक्षेमंकरीतिच८३प्रातश्चैवापराह्णेचस्तोष्यंत्यानम्रमूर्तयः ।तेषांहिप्रार्थितं
सर्वंमत्प्रसादाद्भविष्यति ८४सुरामांसोपहारैश्चभक्षभोज्यैःसुपूजिता । नृणामशेषकामांस्त्वंप्रसन्नासंप्रदास्यति ८५तेसर्वेसर्वदाभद्रेमत्प्रसादादसंश

लमेव ७६ प्रसवकालेकिंचिद्वैलक्षण्यमित्याह प्रावृडिति नभसिमुख्यचांद्रश्रावणेमासिनिशिरात्रावष्टम्यामहमुत्पत्स्यामिअर्धरात्रादनंतरंनवम्यांप्रविष्टायांत्वम् ७७ यशोदाशयनेमांनेष्यतित्वां
तुदेवक्याःशयने ७८ कंसोमांघातयिष्यतीत्यतआह कंसइति अंतरिक्षेस्थानंसमवाप्स्यासिनतुशिलायांपातनम् ७९ तांप्रोत्साहयतितत्स्वामितिसप्तभिः शतंसहस्रपरिमितादृशोयस्यसः
८० स्थानैर्योगपीठाख्यायतनैर्विध्यजालंधराद्यैः८१ तस्याविभूतीराह त्वंभूयःतिरितिसंन्नतिर्विनयःउषाप्रातःकालधिष्ठात्रीदेवता याचकाचनअन्यास्त्रीजातिःसाचत्वमेव ८२ हेदेवगर्भेत्वामार्ये
त्यादिभिःयेस्तुवंति सुरामांसादिभिःशूद्राद्यैर्यथाधिकारत्वंपूजितासतीयान्कामान्प्रदास्यसितेसर्वेअसंदिग्धाअव्यभिचरितामत्प्रसादाद्भविष्यंति अतोह्यसंशयंगच्छअसंशयंप्रदास्यसीतिवान्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यः ८३ ८४ ८५ ८६ इ॰वि॰टीकायांपंचमांशेप्रथमोध्यायः १ द्वितीयेगर्भंगंविष्णुमवगत्याातिविस्मिताः देवकींतुष्टुवुर्देवादर्शयंतोहरेर्गुणान् यथोक्तंयुक्तयनुसारेणषड्गर्भ
नाम्नांदेवक्यागर्भेविन्यासंक्रमेणनिधानम् अन्यस्यशेषाख्यस्यसप्तमगर्भस्यदेवक्याउदराद्रोहिणीगर्भप्रतिकर्षणंचक्रे १ गतेदेवकीगर्भादितिशेषः देवक्यागर्भेहरिःप्रविवेशेत्यन्वयः २ पर
मेष्ठिनापरमेश्वरेण ३ ४ कश्चिन्मनुष्योदेवकींद्रष्टुंनसेहेनशक्तः देवानांतुमनांसिअभीष्टलाभात्तांद्रष्टुंक्षोभमतिहर्षययुः ५ अतएवतांतुष्टुवुः स्त्रीपुरुषैस्तत्रस्थैरप्यदृष्टाः संतः ६ पुराब्रह्मग

यम् । असंदिग्धाभविष्यंतिगच्छदेवियथोदिता ८६ इतिश्रीविष्णुपुराणेपंचमेअंशेप्रथमोध्यायः १ । । पराशरउवाच । । यथोक्तंसाजगद्धा
त्रादेवदेवेनवैपुरा । षड्गर्भगर्भविन्यासंचक्रेचान्यस्यकर्षणम् १ सप्तमेरोहिणींप्राप्तेगतेगर्भेततोहरिः । लोकत्रयोपकारायदेवक्याःप्रविवेशवै २ यो
गनिद्रायशोदायास्तस्मिन्नेवततोदिने । संभूताजठरेतद्वद्यथोक्तंपरमेष्ठिना ३ ततोग्रहगणःसम्यक्प्रचचारदिविद्विजः । विष्णोरंशेमहींयातेऋतवो
प्यभवञ्छुभाः ४ नसेहेदेवकींद्रष्टुंकश्चिदप्यतितेजसा । जाज्वल्यमानांतांद्रष्टुंमनांसिक्षोभमाययुः ५ अदृष्टाःपुरुषस्त्रीभिर्देवकींदेवतागणाः । बि
भ्राणांवपुषाविष्णुंतुष्टुवुस्तामहर्निशम् ६ प्रकृतिस्त्वंपरासूक्ष्माब्रह्मगर्भाभवःपुरा । ततोवाणीजगद्धातुर्वेदगर्भातिशोभने ७ सृज्यस्वरूपगर्भाचसृ
ष्टिभूतासनातने । बीजभूताचसर्वस्ययज्ञगर्भाभवस्त्रयी ८ फलगर्भात्वमेवेज्यावह्निगर्भातथारणिः । अदितिर्देवगर्भात्वंदैत्यगर्भातथादितिः ९
ज्योत्स्नावासवगर्भात्वंज्ञानगर्भासिसंनतिः । नयगर्भाथवानीतिर्लज्जात्वंप्रश्रयोद्वहा १० कामगर्भातथेच्छात्वंतुष्टिस्तोषगर्भिणी । मेधाचबोधगर्भा
सिधैर्यगर्भाचयाधृतिः ११ ग्रहर्क्षतारकागर्भाद्यौरस्याखिलहैतुकी । एताविभूतयोदेवितथान्याश्चसहस्रशः । तथासंख्याजगद्धात्रिसांप्रतंजठरेतव
१२ समुद्राद्रिनदीद्वीपवनपत्तनभूषणा । ग्रामखर्वटखेटाद्यासमस्तापृथिवीशुभे १३ समस्तवह्न्योंऽभांसिसकलाश्चसमीरणाः । ग्रहर्क्षतारकाचि
त्रंविमानशतसंकुलम् १४ अवकाशमशेषस्ययद्ददातिनभश्चयत् । भूलोकोऽथभुवर्लोकःस्वर्लोकोऽथमहर्जनः १५ तपश्चब्रह्मलोकश्चब्रह्मांडमखिलं
शुभे । तदंतर्येस्थितादेवादैत्यगंधर्वचारणाः १६ महोरगास्तथायक्षाराक्षसाःप्रेतगुह्यकाः । मनुष्याःपशवश्चान्येयेचजीवायशस्विनि १७ तैरंतस्थै

र्भात्रह्मप्रतिविचारणीप्रकृतिस्त्वमभवः अभवदितिप्राठेयाब्रह्मगर्भाअभवत्सात्वामेत्यन्वयः एवमुत्तरत्र ७ ८ ९ ज्योत्स्नापूर्वसंध्या सत्सुगुरुषुनतिः शुश्रूषा नयोन्यायःसामादिर्गर्भेयस्याः
सा नीतिर्नीतिशास्त्रम् त्वंलज्जाअनौद्धत्येनवृत्तिः प्रश्रयोविनयः १० कामःकाम्यार्थःगर्भेयस्य इच्छाभिलाषः तुष्टिरलंबुद्धिः तोषस्तन्निमित्तःसंतोषोगर्भेयस्याःसात्वम् दुःखहेतुषुसत्सुक
र्तव्यापरिहाणेच्छाधृतिः कर्तव्यापरिहाणंधैर्यम् ११ अखिलहैतुकीदृष्ट्यादिद्वारासर्वस्यहेतुरेवहैतुकी एताःप्रकृत्याद्याःप्रकृतिनियतैकैकवस्तुगर्भास्तवविभूतयः इदानींतुपृथिव्यादिसमस्त
प्रपंचगर्भश्रीकृष्णस्तवगर्भेअस्तीतिस्तुवंतआहुःसांप्रतंजठरेतवेत्यादिनायावत्समाप्ति १२ १३ १४ १५ रुपंतत्त्वम् कर्मलीला स्वरूपंमूर्तिः नामकर्मोतिपाठेयस्यरूपादीनिअखिलप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माणानिचमहत्त्वादिपरिमाणानि परिच्छेदस्यनिर्धारणस्यगोचरेनवर्तते यद्वाअखिलप्रमाणानीतिषष्ठ्यर्थेप्रथमा यस्यरूपादीनिप्रमाणानांपरिच्छेद्यानिनभवंतीत्यर्थः सविष्णुस्तवगर्भंप्राप्तः १६ १७ तंत्वंप्रीत्याधारयनत्वन्यगर्भसामान्यबुद्ध्याविषादंकुर्वितिभावः इतिश्रीविष्णुपुराणेटीकायांपंचमेअंशेद्वितीयोध्यायः २ तृतीयेविष्णुतच्छक्त्योरुत्पत्तिरिहकथ्यते परिवर्तेन गमनंमथुरायाव्रजादपि १ अखिलंजगदेवपद्मंतस्यबोधायप्रकाशायअच्युतरूपेणभानुनादेवक्येवपूर्वसंध्यातस्यामाविर्भूतम् २ तस्यकृष्णस्यजन्मदिनमाह्लादिसुखकरमभूत् कौमुदःका

रनंतोऽसौसर्वेशःसर्वभावनः । रूपकर्मस्वरूपाणिनपरिच्छेदगोचरे । यस्याखिलप्रमाणानिसविष्णुर्गर्भगस्तव १८ त्वंस्वाहात्वंस्वधाविद्यासुधात्वं ज्योतिरंबरे । त्वंसर्वलोकरक्षार्थमवतीर्णामहीतले १९ प्रसीददेविसर्वस्यजगतःशंशुभेकुरु । प्रीत्यात्वंधारयेशानंधृतंयेनाखिलंजगत् २० इतिश्री विष्णुपुराणेपंचमेअंशेद्वितीयोध्यायः २ । पराशरउवाच । । एवंसंस्तूयमानासादेवैर्देवमधारयत् । गर्भेणपुंडरीकाक्षंजगतांत्राणकारण म् १ ततोखिलजगत्पद्मबोधायाच्युतभानुना । देवकीपूर्वसंध्यायामाविर्भूतंमहात्मना २ तज्जन्मदिनमत्यंतमाह्लाद्यमलदिङ्मुखम् । बभूवसर्व लोकस्यकौमुदीशशिनोयथा ३ संतःसंतोषमधिकंप्रशमंचंडमारुताः । प्रसादंनिम्नगायाताजायमानेजनार्दने ४ सिंधवोनिजशब्देनवाद्यंचक्रुर्मनो रमम् । जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः ५ ससृजुःपुष्पवर्षाणिदेवाभुव्यंतरिक्षगाः । जज्वलुश्चाग्नयःशांताजायमानेजनार्दने ६ मध्यरात्रेऽखि लाधारेजायमानेजनार्दने । मंदंजगर्जुर्जलदाःपुष्पवृष्टिमुचोद्विज ७ फुल्लेंदीवरपत्राभंचतुर्बाहुमुदीक्ष्यतम् । श्रीवत्सवक्षसंजातंतुष्टावानकदुंदुभिः । ८ अभिष्टूयचतंवाग्भिःप्रसन्नाभिर्महामतिः । विज्ञापयामासतदाकंसाद्भीतोद्विजोत्तम ९ । वसुदेवउवाच । । ज्ञातोऽसिदेवदेवेशशंखचक्रग दाधर । दिव्यंरूपमिदंदेवप्रसादेनोपसंहर १० अद्यैवदेवकंसोऽयंकुरुतेममयातनाम् । अवतीर्णमितिज्ञात्वात्वामस्मिन्ममंदिरे ११ । । देव क्युवाच । । योऽनंतरूपोखिलविश्वरूपोगर्भेपिलोकान्वपुषाबिभर्ति । प्रसीदतामेषसदेवदेवःस्वमाययाविष्कृतबालरूपः १२ उपसंहरसर्वात्मन् रूपमेतच्चतुर्भुजम् । जानातुमावतारंतेकंसोऽयंदितिजांतक १३ । । भगवानुवाच । । स्तुतोऽहंयत्त्वयापूर्वंपुत्रार्थिन्यातदद्यते । सफलंदेवि

तिकःतस्येयंकौमुदीपूर्णिमेव अमलानिदिङ्मुखानिप्रसन्नानियस्मिंस्तत् ३ ४ सिंधवोनद्यःसमुद्रावा ५ अंतरिक्षगादेवाभुविपुष्पवर्षाणिससृजुः शांताःसौम्याःप्रदक्षिणावर्तशिखत्वेनशुभ सूचकाइत्यर्थः ६मध्यरात्रइतिकालोक्तिर्जन्माष्टम्यादिव्रतकालविध्यर्था ७ ८ ९ यद्यपितवभयंनास्त्येवतथापिमयिप्रसादेनहेतुनाइदंरूपमुपसंहर १० तदेवाह अद्यैवेति कुरुतइतिवर्तमानसामी प्येलट् इत्येवंचतुर्भुजरूपेणत्वामवतीर्णंज्ञात्वा ११ नविद्यतेदेशतःकालतश्चरूपतश्चांतोयस्यतद्रूपंयस्यसः नित्याद्वैतस्वरूपोऽप्यखिलविश्वरूपःकृत्स्नजगद्रूपःमद्गर्भेवसन्नपिसर्वाधिष्ठानाचि द्रूपेणवपुषालोकान्बिभर्ति १२ दितिजांतकेतिसंबोधनम् दितिजात्मजइतिपाठेउग्रसेनरूपधारिणाद्रुमिलाख्येनदितिजेनतद्भार्यायांकंसोजनितइतिहरिवंशेनारदोक्तार्थोज्ञेयः १३ जातोह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यत्रत्रिधेतियोज्यते स्वायंभुर्वैतरेसुतपःपत्न्यांपृश्न्यांवैवस्वतेचकश्यपपत्न्यामादित्यांइदानींवसुदेवपत्न्यांतस्यामेवपृश्निगर्भवामनकृष्णस्वरूपतयाविष्णुर्जातइतिभागवतोक्तेः १४ उप संहरेत्युक्तेपिचतुर्भुजत्वसंहारस्यानुक्ततयामातुःप्रार्थनयाकंसवधपर्यंतमेवाद्विभुजत्वप्रतीतिमात्रांद्विभुजत्वम् जरासंधयुद्धादौदिव्यास्त्रधारणार्थंचतुर्भुजत्वप्रसिद्धेः १५ १६ वर्षतांसताम् १७ विष्णुंवहन्निति हेतुः तद्वहनादेवजानुमात्रजलांजातांययौअतिक्रांतवानित्यर्थः अयमेवहेतुस्त्रापिदुर्घटेकपाटबंधनिद्रत्याद्रष्टव्यः १८ यमुनायांयमुनायास्तटेयोगनिद्रयामोहितानेवनंदादीन्द

संजातंजातोऽहंयत्तवोदरात् १४ । । पराशरउवाच । । इत्युक्त्वाभगवांस्तूष्णींबभूवमुनिसत्तम । वसुदेवोऽपितंरात्रावादायप्रययौबहिः १५ मोहिताश्चाभवंस्तत्ररक्षिणोयोगनिद्रया । मथुराद्वारपालाश्चव्रजत्यानकदुन्दुभौ १६ वर्षतांजलदानांचतोयमत्युल्बणंनिशि । संछाद्यतंययौशे षःफणैरानकदुंदुभिम् १७ यमुनांचातिगंभीरांनानावर्तशताकुलाम् । वसुदेवोवहन्विष्णुंजानुमात्रजलांययौ १८ कंसस्यकरमादायतत्रैवाभ्याग तांस्तटे । नंदादीन्गोपवृक्षांस्तुयमुनायांददर्शसः १९ तस्मिन्कालेयशोदापिमोहितायोगनिद्रया । तामेवकन्यांमैत्रेयप्रसूतामोहितेजने २० वसु देवोपिविन्यस्यबालमादायदारिकाम् । यशोदाशयनेतूर्णमाजगामामितद्युतिः २१ ददृशेचविशुद्धासायशोदाजातमात्मजम् । नीलोत्पलदलश्या मंततोत्यर्थंमुदंययौ २२ आदायवसुदेवोपिदारिकांनिजमंदिरे । देवकीशयनेन्यस्ययथापूर्वमतिष्ठत २३ ततोबालध्वनिंश्रुत्वारक्षिणःसहसोत्थिताः कंसायावेदयामासुर्देवकीप्रसवंद्विज २४ कंसस्तूर्णमुपेत्यैनांततोजग्राहबालिकाम् । मुञ्चमुञ्चेतिदेवक्यासन्नकंठ्यानिवारितः २५ चिक्षेपचाशि लापृष्ठेसाक्षिप्तावियतिस्थितिम् । अवापरूपंचमहत्सायुधाष्टमहाभुजम् २६ प्रजहासतथैवोच्चैःकंसंचरुषिताब्रवीत् । किंमयाक्षिप्तयाकंसजातोय स्त्वांवधिष्यति २७ सर्वस्वभूतोदेवानामासीन्मृत्युःपुरासते । तदेतत्संप्रधार्याशुक्रियतांहितमात्मनः २८ इत्युक्त्वाप्रययौदेवीदिव्यस्त्रग्गंधभूष णा । पश्यतोभोजराजस्यस्तुतासिद्धैर्विहायसि । २९ । । इतिश्रीविष्णुपुराणेपंचमेंशेतृतीयोध्यायः । ३ । । पराशरउवाच । । कंसस्ततोद्विग्नमनाःप्राहसर्वान्महासुरान् । प्रलंबकेशिप्रमुखानाहूयासुरपुंगवान् १ । कंसउवाच । । हेप्रलंबमहाबाहोकेशिन्धेनुकपूतने अरिष्टाद्यैस्तथाचान्यैःश्रूयतांवचनंमम २ मांहंतुममरैर्यज्ञःकृतःकिलदुरात्मभिः । मद्वीर्यतापितैर्वीरान्नत्वेतान्गणयाम्यहम् ३ किमिन्द्रेणाल्पवीर्येण

दर्शी १९ यशोदापिमोहितासतीतांप्रसूतवती २० यशोदाशयनेबालंविन्यस्यसम्यक्निवेश्यतत्कन्यामादायचजगामेत्यन्वयः अमितातमस्यापिगतिर्हेतुर्द्युतिर्यस्यसः २१ २२ यथापूर्वंपू र्ववदामुक्तनिगडोऽतिष्ठत् २३ २४ सन्नकंठ्यागद्गदकंठ्यानिवारितोऽप्येनांकन्यांजग्राह २५ आकाशेस्थितिंमहद्रूपंचावाप२६ पुराकालनेमिजन्मनि२७ २८ भोजराजस्येत्यनादरेष ष्ठी २९ इतिश्रीविष्णुपुराणेटीकायांपंचमेअंशेतृतीयोध्यायः चतुर्थेयोगनिद्रोक्तंकालंबालंजिघांसितुम् कुबुद्धीनादिशत्कंसःप्रलंबादीननायुषः ततोद्विग्नमनाइतिसंधिरार्षः यद्वाउद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्नंउद्वेगः विस्तीर्णोद्वेगयुक्तचित्तइत्यर्थः तदोद्विग्नेतिवापाठः १ युष्माभिरन्यैश्चममवचःश्रूतयामित्यन्वयः २ ३ एकचारिणाएकाकिना छिद्रेषुप्रमादेषु ४ ५ पृष्ठनैवेतियुद्धारंभएवपला यतीतिभावः ६ आपोमुक्ताःकिम् नापोमुक्ताइतिवापाठः ७ सर्वेसन्नतिंनम्रतांकिंनगताअपितुगताएव तेसर्वेइतिपाठेऽसन्नतिमितिच्छेदः गुरुश्वशुरत्वात् ८ ९ १० यशस्विनो दा ननिष्ठाः तेषांदेवोपकारकाणाम् तथाचतेषांनाशेदेवानांवृद्ध्यभावादपकारइतिभावः तस्मादितःप्रदानंदेवाउपजीवंतीतिश्रुतेः ११ १२ १३ १४ १५ तद्भाविनःतन्निमित्तकंमरणंभा

किंहरेणैकचारिणा । हरिणाचापिकिंसाध्यंछिद्रेष्वसुरघातिना ४ किमादित्यैःसवसुभिरल्पवीर्यैःकिमग्निभिः । किञ्चान्यैरमरैःसर्वैर्मद्वीर्यबलनिर्जितैः ५ किन्नदृष्टोऽमरपतिर्मयासंयुगमेत्यसः । पृष्ठेनैववहून्बाणानपागच्छन्नवक्षसा ६ मद्राष्ट्रेवारितावृष्टिर्यदाशक्रेणकिंतदा । मद्बाणभिन्नैर्जलदैरापे मुक्तायथेप्सिताः ७ किमुर्व्यामवनीपालामद्बाहुबलभीरवः । नसर्वेसन्नतिंयाताजरासंधमृतेगुरुम् ८ अमरेषुममावज्ञाजायतेदैत्यपुंगवाः । हास्यंमेजायतेवीरास्तेषुयत्नपरेष्वपि ९ तथापिखलुदुष्टानांतेषामभ्यधिकंमया । अपकारायदैत्येंद्रायतनीयंदुरात्मनाम् १० तद्येयशस्विनःकेचित्पृथिव्यांयेचयज्विनः । कार्योदेवापकारायतेषांसर्वात्मनावधः ११ उत्पन्नश्चापिमृत्युर्मेभूतपूर्वश्चमेकिल । इत्येतद्बालिकाप्राहदेवकीगर्भसंभवा १२ तस्माद्बालेषुपरमोयत्नःकार्योमहीतले । यत्रोद्रिक्तंबलंबालेसहंतव्यःप्रयत्नतः १३ इत्याज्ञाप्यासुरान्कंसःप्रविश्यात्मगृहंततः । मुमोचवसुदेवंचदेवकींचनिरोधतः १४ । । कंसउवाच । । युवयोर्घातितागर्भावृथैवैतेमयाधुना । कोऽप्यन्यएवनाशायबालोममसमुद्यतः १५ तदलंपरितापेननूनंतद्भाविनोहिते । अर्भकायुवयोःकोवानायुषोऽतेविहन्यते १६ इत्याश्वास्यविमुक्तौचकंसस्तौपरिशंकितः । अंतर्गृहंद्विजश्रेष्ठप्रविवेशपुनःस्वकम् १७ । । इतिश्रीविष्णुपुराणेपंचमेअंशेचतुर्थोध्यायः । ४ । । । विमुक्तोवसुदेवोऽपिनंदस्यशकटंगतः । प्रहृष्टंदृष्टवान्नंदंपुत्रोजातोममेतिवै १ वसुदेवोऽपितंप्राहदिष्ट्यादिष्ट्येतिसादरम् । वार्धकेऽतिसमुत्पन्नस्तनयोयत्तवाधुना २ दत्तोहिवार्षिकःसर्वोभवद्भिर्नृपतेःकरः तदर्थमागतास्तस्मान्नात्रस्थेयंमहात्मना ३ यदर्थमागताःकार्यंतन्निष्पन्नंकिमास्यते । भवद्भिर्गम्यतांनंदतच्छीघ्रंनिजगोकुलम् ४ ममापिबालकस्तत्ररोहिणीप्रसवोहियः । सरक्षणीयोभवतायथायंतनयोनिजः ५ इत्युक्ताःप्रययुर्गोपानंदगोपपुरोगमाः । शकटारोपितैर्भांडैःकरंदत्त्वामहाबलाः ६

वियेषांते तदेवाह कइति वाशब्देनकेनचेत्यपि १६ १७ इतिश्रीविष्णुपुराणेपंचमेअंशेचतुर्थोध्यायः ४ पंचमेपंचतांप्राप्तांपूतनांवीक्ष्यकातरः नंदश्चक्रेहरेरक्षांगोपुच्छभ्रमणादिभिः १ कंसस्यबालघातोद्यमंनिशम्यवसुदेवस्तद्रक्षार्थंनंदादीन्गोकुलंप्रस्थापयितुंशकटावमोचनंगत्वावदादित्याह विमुक्तइतिपंचभिः १ अतिवार्धकेनेतनयःसमुत्पन्नइत्यन्वयः २ ३ किमास्यतेकिमर्थमत्रस्थीयते महाधनानांदुष्टजनसंनिधानंनयुक्तमितिभावः ४ रोहिण्यांप्रभवोजन्मयस्यसः निजइत्यत्रनिजत्वेनाभिमतइति वक्तुर्ममनिजइतिवागूढोभिसंधिः ५ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७ हंतुमागतास्तनंकिमितिददौतत्राह यस्माइति उपहन्यतेनश्यति ८ प्राणैःसहितंपपौ कालात्मामगवानेषदैत्यान्भोक्तुंसमुद्यतः पंचाभिःपूतनाप्राणैःपंचप्राणाहुतिःकृता९ विच्छिन्नंस्नायु रूपमास्थिबधनंयस्याःसा अतिभीषणेति मायिनामंतकालेसहजरूपप्राप्तेः १० ११ गोपुच्छभ्रामणेनापास्तोबालदोषोयस्यतमपाकरोदकरोत् स्थानांतरेनीतवतीवा १२ गोपुरीषंगोम यम् करीषमितिपाठेशुष्कगोमयम् १३ प्रभवत्यस्मादितिप्रभवः तदेवाह यस्येति १४ १५ १६ त्रिभिःविक्रमैःपादन्यासैःक्रमेणक्रांतंत्रैलोक्यंयेनसः स्फुरंतिआयुधानियस्यसः ऐक

वसतांगोकुलेतेषांपूतनाबालघातिनी । सुप्तंकृष्णमुपादायरात्रौसंप्रददौस्तनम् ७ यस्मैयस्मैस्तनंरात्रौपूतनासंप्रयच्छति । तस्यतस्यक्षणेनां गंबालकस्योपहन्यते ८ कृष्णस्तस्याःस्तनंगाढंकराभ्यामतिपीडितम् । गृहीत्वाप्राणसहितंपपौकोपसमन्वितः ९ साविमुक्तमहारावाविच्छिन्न स्नायुबन्धना । पपातपूतनाभूमौम्रियमाणातिभीषणा १० तन्नादश्रुतिसंत्रासविबुद्धास्तेव्रजौकसः । तदृशुःपूतनोत्संगेकृष्णंतांचनिपातिताम् ११ आदायकृष्णंसंत्रस्तायशोदापिद्विजोत्तम । गोपुच्छभ्रामणापास्तबालदोषमपाकरोत् १२ गोपुरीषमुपादायनंदगोपोऽपिमस्तके । कृष्णस्यप्रददौ रक्षांकुर्वन्निदमुदीरयत् १३ । । नंदगोपउवाच । । रक्षतुत्वामशेषाणांभूतानांप्रभवोहरिः । यस्यनाभिसमुद्भूतात्पंकजादभवज्जगत् १३ येनदंष्ट्राग्रविधृताधारयत्यवनीजगत् । वराहरूपधृग्देवःसत्वांरक्षतुकेशवः १५ नखांकुरविनिर्भिन्नवैरिवक्षस्थलोविभुः । नृसिंहरूपीसर्वत्रसत्वां रक्षतुसर्वगः १६ वामनोरक्षतुसदाभवंतंयःक्षणादभूत् । त्रिविक्रमक्रमाक्रांतत्रैलोक्यस्फुरदायुधः १७ शिरस्तेपातुगोविंदःकंठंरक्षतुकेशवः । गुह्यंसजठरंविष्णुर्जंघापादंजनार्दनः १८ मुखंबाहूप्रबाहूचमनःसर्वेंद्रियाणिच । रक्षत्वव्याहतैश्वर्यस्तवनारायणोव्ययः १९ शार्ङ्गचक्रगदापाणि शंखनादाहताःक्षयम् । गच्छंतुप्रेतकूष्मांडाराक्षसायेतवाहिताः २० त्वांपातुदिक्षुवैकुंठोविदिक्षुमधुसूदनः । हृषीकेशोंबरेभूमौरक्षतुत्वांमहीधरः२१ एवंकृतस्वस्त्ययनोनंदगोपेनबालकः । शायितःशकटस्याधोबालपर्यंकिकातले २२ तेचगोपामहद्दृष्ट्वापूतनायाःकलेवरम् । मृतायाःपरमंत्रासंवि स्मयंचतदाययुः । २३ । । इतिश्रीविष्णुपुराणेपंचमेअंशेपंचमोध्यायः । ५ । । । पराशरउवाच । । कदाचिच्छकटस्याधःशयानोमधु सूदनः । चिक्षेपचरणावूर्ध्वंस्तन्यार्थीप्ररुरोदच १ तस्यपादप्रहारेणशकटंपरिवर्तितम् । विध्वस्तकुंभभाण्डंतद्विपरीतंपपातवै २ ततोहाहाकृतःस

पद्यंवा तथाभूतक्षणादभूदित्यन्वयः १७ १८ बाहूप्रबाहूचकूर्परस्यऊर्ध्वभागौअधोभागौच १९ शार्ङ्गचक्रगदापाणेर्विष्णोर्येशंखनादास्तैराहताः पाणिपदस्थानेखड्गपदस्यक्वचित्पाठः २० २१ एवंकृतंस्वस्त्ययनंक्षेमकरंकर्मयस्यसः बालपर्यंकिकास्वल्पपर्यंकः तस्यतलेउपरिशायितः २२ २३ इतिश्रीविष्णुपुराणेरत्नगर्भभट्टाचार्यकृतायांपंचमेअंशेटीकायांपंचमो ध्यायः ५ भंगोत्रशकटस्यानुयमलार्जुनयोरपि वृंदावनगतिःकृष्णक्रीडाप्रावृत्तथोच्यते १ विध्वस्तकुंभभांडंविशीर्णकुंभाद्युपकरणम् कुप्यभांड मितिपाठेकुप्यंसुवर्णरजतातिरिक्तंद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यम् २ ३ केनकेनेतिसंभ्रमोक्तिः ४ ५ ६ शकटेआरूढंआरोपितंभग्नभांडरूपंकपालंयया कपालिकमितिपाठेक्रियाविशेषणं कपालिकाः इतिपाठेताश्चार्चयामासेत्यन्वयःअत्रश कटमपिदैत्याविष्टत्वात्पातितमितिहरिवंशस्वरसाद्वदंति ७ तत्रतदागोपानामपिप्रच्छन्नः तैरप्यज्ञातःकंसस्यभयादित्यर्थः ८ ९ घृष्टजानुकरौरिंगिणौजानुभ्यांसंचारिणावित्यर्थः १० न

र्वोगोपगोपीजनोद्विज । आजगामाथददृशेबालमुत्तानशायिनम् ३ गोपाःकेनेतिकेनेतिशकटंपरिवर्तितम् । तत्रैवबालकाःप्रोचुर्बालेनानेनपातितम् ४ रुदतादृष्टमस्माभिःपादविक्षेपताडितम् । शकटंपरिवृत्तंवोनैतदन्यस्यचेष्टितम् ५ ततःपुनरतीवासन्गोपाविस्मितचेतसः । नंदगोपोऽपिजग्राह बालमत्यंतविस्मितः ६ यशोदाशकटारूढभग्नभाण्डकपालिका । शकटंचार्चयामासदधिपुष्पफलाक्षतैः ७ गर्गश्चगोकुलेतत्रवसुदेवप्रचोदितः । प्र च्छन्नस्तत्रगोपानांसंस्कारमकरोत्तयोः ८ ज्येष्ठंचराममित्याहकृष्णंचैवतथापरम् । गर्गोमतिमतांश्रेष्ठोनामकुर्वन्महामतिः ९ अल्पेनैवहिकालेनरिं गिणौतौतदाव्रजे । घृष्टजानुकरौविप्रबभूवतुरुभावपि १० करीषभस्मदिग्धांगौभ्रममाणावितस्ततः । ननिवारयितुंसेहेयशोदातौनरोहिणी ११ गोवाटमध्येक्रीडंतौवत्सवाटगतौपुनः । तदहर्जातगोवत्सपुच्छाकर्षणतत्परौ १२ यदायशोदातौबालावेकस्थानचरावुभौ । शशाकनोवारयितुंक्रीडं तावतिचंचलौ १३ दाम्नाबद्धातदामध्येनिबबंधउलूखले । कृष्णमक्लिष्टकर्माणमाहचेदममर्षिता १४ यदिशक्तोऽसिगच्छत्वमतिचंचलचेष्टितम् । इत्यु क्त्वाचनिजंकर्मसाचकारकुटुंबिनी १५ व्यग्रायामथतस्यांसकर्षमाणउलूखलम् । यमलार्जुनमध्येनजगामकमलेक्षणः १६ कर्षतावृक्षयोर्मध्येति र्यग्गतमुलूखलम् । भग्नावुत्तुंगशाखाग्रौतेनतौयमलार्जुनौ १७ ततःकटकटाशब्दंसमाकर्ण्यचकातरः । आजगामव्रजजनोददृशेचमहामुने १८ भ ग्नस्कंधौनिपतितौभग्नशाखौमहीतले । नवोद्गताल्पदंतांशुसितहासंचबालकम् १९ तयोर्मध्यगतंबद्धंदाम्नागाढंतथोदरे । ततश्चदामोदरतांसययौ दामबंधनात् २० गोपवृद्धास्ततःसर्वेनंदगोपपुरोगमाः । मंत्रयामासुरुद्विग्नामहोत्पातायभीरवः २१ स्थानेनेहननःकार्यंव्रजामोऽन्यन्महावनम् । उ त्पाताबहवोह्यत्रदृश्यंतेनाशहेतवः २२ पूतनायाविनाशश्चशकटस्यविपर्ययः । विनावातादिदोषंचद्रुमयोःपतनंतथा २३ वृंदावनमितःस्थानात्त स्माद्गच्छाममाचिरम् । यावद्भौममहोत्पातदोषोनाभिभवेद्व्रजम् २४ इतिकृत्वामतिंसर्वेगमनेतेव्रजौकसः । ऊचुःस्वंस्वंकुलंशीघ्रंगम्यतांमाविलंब्य

चरोहिणीतौनिवारयितुंसेहेशक्ता ११ १२ १३ १४ १५ यमलार्जुनवृक्षयोर्मध्येन तौहिजलेविवस्त्रंस्त्रीभिःक्रीडंतौनलकूबरमणिग्रीवाख्यौकुबेरपुत्रौदृष्टौनारदशापाद्द्रुमौजातौतयोर्भा ग्येनशापांतायजगामकमलेक्षणइत्यर्थः १६ १७ कटकटेतिशब्दानुकरणम् १८ स्कंधःशाखावाधिभागःसभग्नोययोस्तौ नवोद्गतानांदंतानामंशुभिःसितोहासोयस्यतंबालंददृशेइत्यन्वयः १९ २० महोत्पातायमहोत्पातमपनेतुंमंत्रयामासुः २१ इहबृहद्वनेस्थानेनवासेन महावनंगभीरवनम् २२ २३ भौमःभूमिवासनिमित्तश्चसउत्पातरूपोदोषश्च २४ मतिंसंमतिम् कुलंयूथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् २५ ततोवृहद्वनाच्छकटैर्गोधनैश्चसहवत्सपालांश्चकालयंतश्चालयंतः २६ द्रव्याणांभांडवस्त्रादीनामवयवैर्निर्धूतमाकीर्णम् काकैश्चकाकीभिःस्वल्पकाकजातिभिश्चसमाकीर्णम् २७ भगवताशुभेनसमृद्धंभवत्वितिमनसासंकल्पेनयदावृंदावनंध्यातंतदाघर्मकालेपिनवंशष्पंतृणमुद्भूतमितिद्वयोरन्वयः २८ २९ शकटीनांवाटःश्रेणीआवृतिर्वापर्यंतेयस्यसः पर्यंतेइति पाठेवनस्यविशेषणम् चंद्रार्धाकारेणसंस्थितिर्यस्यसःयमुनाचक्रानुरोधात् ३० तत्रस्थानस्थितौतत्क्रीडास्थानस्थितौएकस्थानेतिवापाठः ३१ बर्हिपत्रकृतापीडौमयूरपिच्छकृतवेषौ अवतंसःकर्णभूषा गोपैर्वर्धितवेणुभिरेवकृतातोद्यौसंपादितमृदंगादिवाद्यकृत्यौ पत्रमयैर्वाद्यैःकृतस्वनौच ३२ काकपक्षःशिखा पावकीशाखाविशाखौस्कंदांशाविव हसंतौशाखामृगादिचे

ताम् २५ ततःक्षणेनप्रययुःशकटैर्गोधनैस्तथा । यूथशोवत्सपालांश्चकालयंतोव्रजौकसः २६ द्रव्यावयवनिर्धूतंक्षणमात्रेणतत्तदा । काककाकीस माकीर्णंव्रजस्थानमभूद्द्विज२७ वृंदावनंभगवताकृष्णेनाक्लिष्टकर्मणा ।शुभेनमनसाध्यातंगवामृद्धिमभीप्सता २८तत्रतत्रातिरुक्षेपिघर्मकालेतदाद्वि ज । प्रावृट्कालइवोद्भूतंनवशष्पंसमंततः २९ ससमावासितःसर्वोव्रजोवृंदावनेततः । शकटीवाटपर्यंतश्चंद्रार्धाकारसंस्थितः ३० वत्सपालौचसं वृत्तौरामदामोदरौततः । तत्रस्थानस्थितौगोष्ठेचेरतुर्बाललीलया ३१ बर्हिपत्रकृतापीडौवन्यपुष्पावतंसकौ । गोपवेणुकृतातोद्यौपत्रवाद्यकृतस्वनौ । ३२ काकपक्षधरौबालौकुमाराविवपावकी । हसंतौचरमंतौचचेरतुस्तन्महद्वनम् ३३ क्वचिद्धसंतावन्योन्यंक्रीडमानौतथापरैः । गोपपुत्रैःसमंवत्सां श्चारयंतौविचेरतुः ३४ कालेनगच्छतातौतुसप्तवर्षौबभूवतुः।सर्वस्यजगतःपालौवत्सपालौमहाव्रजे ३५ प्रावृट्कालस्ततोऽतीवमेघौघस्थगितांबरः। बभूववारिधाराभिरैक्यंकुर्वन्दिशामिव ३६ प्ररूढनवशष्पाढ्यशक्रगोपास्तृतामही । यथामारकतेवासीत्पद्मरागविभूषिता ३७ ऊहुरुन्मार्गगा मीनिनिम्नगांभांसिसर्वतः । मनांसिदुर्विनीतानांप्राप्यलक्ष्मींनवामिव ३८ नरेजेंऽतरितश्चंद्रोनिर्मलोमलिनैर्घनैः । सद्वाक्यवादोमूर्खाणांप्रगल्भा भिरिवोक्तिभिः ३९ निर्गुणेनापिचापेनशक्रस्यगगनेपदम् । अवाप्यताविवेकस्यनृपस्येवपरिग्रहे ४० मेघपृष्ठेबलाकानांरराजविमलाततिः। दुर्वृ त्तवृत्तेचेष्टेवकुलीनस्यातिशोभना ४१ नबबंधांबरेस्थैर्यंविद्युदत्यंतचंचला । मैत्रीवप्रवरेपुंसिदुर्जनेनप्रयोजिता ४२ मार्गाबभूवुरस्पष्टानवशष्पच

ष्टाभिः ३३ क्वचिद्धसंतौद्रव्यादिहरणेनान्योऽन्यंपरिहसंतौएवंक्रीडमानौ ३४ जगतःपालकौसंतौवत्सपालौसप्तवर्षौबभूवतुः तदागोपनाट्यायसमर्थौबभूवतुरितिभावः ३५ भगवतःप्राव पिगोपलीलांवर्णयितुंप्रथमंप्रावृषंवर्णयति प्रावृट्कालइत्यष्टभिः मेघौघैःस्थगितमाच्छादितमंबरंयत्रसः ३६ महीनवशष्पाढ्यासतीमारकतायथातथासीत् सैवशक्रगोपास्तृतासतीपद्मरा गविभूषितेवासीदित्यन्वयः शक्रगोपोरुणवर्णकीटविशेषः ३७ ऊहुरवहन् ३८ सद्वाक्यवादः वेदांतयुक्तिः मूर्खाणांचार्वाकाद्यानाम् प्रगल्भाभिर्निःशंकाभिः ३९ निर्गुणेनज्यारहितेन शक्रस्यइंद्रस्यचापेनधनुषागगनेपदमव्याप्यत यथाअविवेकस्यभूपस्यपरिग्रहेस्वीकारेकापुरुषेणापिपदंलभ्यतेतद्वत् ४० ततिःपंक्तिः दुर्वृत्तवृत्तेसकपटेपुंसिकुलीनस्पचेष्टेव दुर्वृत्तवृत्तचेष्टेति पाठेदुर्वृत्तेअपकारिण्यापिवृत्तचेष्टामिष्कपटवृत्तिरिव ४१ अंबरेऽतिशुद्धेपिविद्युत्स्थैर्यंनबबंधनचकार यतश्चंचला प्रकर्षेणयोजिताकृतापि ४२ अस्पष्टादुर्विज्ञेयाः प्रजडानामन्यत्प्रतिज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यान्यद्वदंतांयुक्तयोयथाअर्थांतरंप्रकृतानुपयोगित्वंप्राप्ताबुद्ध्यारूढानभवंतितद्वत् ४३ तदेवंप्रावृषमनुवर्ण्यतत्रभगवल्लीलामाह उन्मत्तेतियावदध्यायसमाप्ति उन्मत्ताः मयूराः सारंगाधमरा श्चयत्र ४४ गोभिःसममतिरम्यंयथास्यात्तथागेयेतालेचरतौचेरतुः गेयतानरतावितिपाठेतानोनामसुस्वरंगायतोन्येनक्रियमाणोवेण्वादिश्रुत्यनुग्रहःशीतवृक्षलताश्रयंयथास्यात् शीतवृक्षल ताश्रयावितिपाठः शीतवृक्षोवंजुलः ४५ मायूरस्त्रग्धरौमयूरपिच्छरचनाविशेषधरौ ४६ निद्रार्थमंतरमवकाशमिच्छंतौ पर्णशय्यासुसुप्तौ ४७ मयूरकेकानुगतंयथास्यादेवंगोपवेणोः प्रवा

यावृताः । अर्थांतरमनुप्राप्ताःप्रजडानामिवोक्तयः ४३ उन्मत्तशिखिसारंगेतस्मिन्कालेमहावने । कृष्णरामौमुदायुक्तौगोपालैःसहचेरतुः ४४ क्व चिद्गोभिःसमंरम्यंगेयतालरतावुभौ । चेरतुःक्वचिदत्यर्थंशीतवृक्षलताश्रयम् ४५ क्वचित्कदंबस्त्रक्चित्रौमायूरस्त्रग्धरौक्वचित् । विचित्रौक्वचिदासा तांविविधैर्गिरिधातुभिः ४६ पर्णशय्यासुसुप्तौचक्वचिन्निद्रांतरैषिणौ । क्वचिद्गर्जतिजीमूतेहाहाकाररवावृतौ ४७ गायतामन्यगोपानांप्रशंसापरमौ क्वचित् । मयूरकेकानुगतंगोपवेणुप्रवादकौ ४८ इतिनानाविधैर्भावैरुत्तमप्रीतिसंयुतौ । क्रीडंतौतौवनेतस्मिन्चेरतुस्तुष्टमानसौ ४९ विकाले तौसमंगोभिर्गोपवृंदसमन्वितौ । आजग्मतुःकृष्णबलौगोपवेषधरावुभौ ५० विकालेचयथाजोषंव्रजमेत्यमहाबलौ । गोपैःसमाजैःसहितौचिक्री डातेऽमराविव ५१ । इतिश्रीविष्णुपुराणेपंचमेअंशेषष्ठोध्यायः ६ पराशरउवाच । । एकदातुविनारामंकृष्णोवृंदावनंययौ । विचचा रवृतोगोपैर्वन्यपुष्पस्त्रगुज्ज्वलः १ सजगामाथकालिंदींलोलकल्लोलशालिनीम् । तीरसंलग्नफेनौघैर्हसंतीमिवसर्वतः २ तस्यांचातिमहाभीमंविषाग्नि शृतवारिणम् । ह्रदंकालियनागस्यददृशोतिविभीषणम् ३ विषाग्निनाविसरतादग्धतीरमहातरुम् । वाताहतांबुविक्षेपस्पर्शदग्धविहंगमम् ४ तमती वमहारौद्रंमृत्युचक्रमिवापरम् । विलोक्याचिंतयामासभगवान्मधुसूदनः ५ अस्मिन्वसतिदुष्टात्माकालियोसौविषायुधः । योमयानिर्जितस्त्यक्त्वादु ष्टोनष्टःपयोनिधिम् ६ तेनेयंदूषितासर्वायमुनासागरांगना । ननरैर्गोधनैर्वापितृषार्तैरुपजीव्यते ७ तदस्यनागराजस्यकर्तव्योनिग्रहोमया । नित्यत्रस्ताःसुखंयेनचरेयुर्व्रजवासिनः ८ एतदर्थंनृलोकेस्मिन्नवतारोमयाकृतः । यदेषामुत्पथस्थानांकार्याशास्तिर्दुरात्मनाम् ९ तदेतंनातिदूर

दकौप्रकृष्टंजगदतुः ४८ ४९ विकालेसायंकालेआजग्मतुः ५० तथाविगतःकालः दिनंयत्रेतिव्युत्पत्याविकालेरात्रावपिक्रीडितवंतावित्यर्थः ५१ इतिश्रीविष्णुपुराणेपंचमेअंशे षष्ठोध्यायः ६ गोपलीलांप्रदर्श्यात्रचिकीर्षुरतिमानुषम् कालिंदीह्रदतःकृष्णःकालियंचोदवासयत् रामोहिज्येष्ठःकनिष्ठस्यस्नेहात्विषह्रादप्रवेशनंनानुमन्येतेत्यतोरामंविनाययौ १ लोलकल्लोलैःचंचलवीचिभिःशालिनींयुक्ताम् फेनौघैःशौक्ल्याद्धसंतीमिव २ विषाग्निनाशृतंक्वथितंवारियस्यास्ति व्रीह्यादित्वादिनिः तंह्रदमातिभीषणंभयजननम् ३ विसरताविसर्पतावाता हतांबुनाविक्षेपाविक्षिप्यंतइतिविक्षेपाविप्रुषस्तेषांस्पर्शेनदग्धाविहंगमायस्मिन् ४ ५ मयामद्विभूतिभूतेनताक्ष्येणनिर्जितःपाथोनिधिंतत्रस्थंरमणकंद्वीपंत्यक्त्वानष्टः पलायितःसन्नस्मिन्ह्रदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौभरिशापभयात्तार्क्ष्यस्यागम्येवसति ६ ७ ८ ९ निग्रहनिश्चयेपिअगाधजलस्थितस्यनिग्रहानुपपत्त्याह्रदप्रवेशमध्यवस्यति तदेतमिति कदंबश्चायममृतंहरतागरुडेनाक्रांतत्वान्नदह्यत इतिपुराणांतरप्रसिद्धिः १० परिकरंवस्त्रादिकम् वेगितःवेगवान् ११ असिंचत्सिषेच १२ तेमहीरुहाअहेर्दुष्टविषज्वालाभिस्तप्तंयदंबुतद्युक्तपवनेनोक्षिताःसिक्ताःसंतोजज्वलुः ज्वालाभिर्व्याप्तंदिशामंतरंयैः १३ भुजंआस्फोटयामासबाहुशब्दंचकारेत्यर्थः १४ विषज्वालाभिराकुलैर्व्याप्तैःफणैर्मुखैर्विशिष्टोऽभ्युपागमत् १५ हारिहारोपशोभिताः हारिभिर्मनोहारिभिर्हारैरु

स्थंकदंबमुरुशाखिनम् । अधिरुह्योत्पतिष्यामिह्रदेस्मिन्ननिलाशिनः १० इत्थंविचिंत्यबद्ध्वाचगाढंपरिकरंततः । निपपातह्रदेतत्रसर्पराजस्यवेगितः ११ तेनाभिपततातत्रक्षोभितःसमहाह्रदः । अत्यर्थंदूरजातांस्तुतानसिंचन्महीरुहान् १२ तेहिदुष्टविषज्वालातप्तांबुपवनोक्षिताः । जज्वलुःपादपाःसद्योज्वालाव्याप्तदिगंतराः १३आस्फोटयामासतदानागराजह्रदेभुजम् ।तच्छब्दश्रवणाच्चाशुनागराजोभ्युपागमत् १४आताम्रनयनःकोपाद्विषज्वालाकुलैःफणैः । वृतोमहाविषैश्चान्यैरुरगैरनिलाशनः १५नागपत्न्यश्चशतशोहारिहारोपशोभिताः।प्रकंपिततनूत्क्षेपचलत्कुंडलकांतयः १६ततःप्रवेशितःसर्पैःसकृष्णोभोगबंधने । ददंशुश्चापितेकृष्णंविषज्वालाविलैर्मुखैः १७ तंतत्रपतितंदृष्ट्वानागभोगनिपीडितम् । गोपाव्रजमुपागम्यचुक्रुशुःशोकलालसाः १८ एषमोहंगतःकृष्णोमग्नोवैकालियेह्रदे । भक्ष्यतेसर्पराजेनतदागच्छतपश्यत १९ एतच्छ्रुत्वाततोगोपावज्रपातोपमंवचः । गोप्यश्चत्वरिताजग्मुर्यशोदाप्रमुखाह्रदम् २०हाहाक्कासाविति जनोगोपीनामेतिविह्वलः । यशोदयाससंभ्रांतोद्रुतंप्रस्खलितंययौ २१ नंदगोपश्चगोपाश्चरामश्चाद्भुतविक्रमः । त्वरितंयमुनांजग्मुःकृष्णदर्शनलालसाः २२ ददृशुश्चापितेतत्रसर्पराजवशंगतम् । निष्प्रयत्नंकृतंकृष्णंसर्पभोगेनवेष्टितम् २३ नंदगोपश्चनिश्चेष्टोन्यस्यपुत्रमुखेदृशम् । यशोदाचमहाभागाबभूवमुनिसत्तम २४ गोप्यस्त्वन्यारुदंत्यश्चददृशुःशोककातराः । प्रोचुश्चकेशवंप्रीत्याभयकातर्यगद्गदम् २५ सर्वायशोदयासार्धंविशामोत्रमहाह्रदे । नागराजस्यनोगंतुमस्माकंयुज्यतेव्रजे २६ दिवसःकोविनासूर्यंविनाचंद्रेणकानिशा । विनावृषेणकागावोविनाकृष्णेनकोव्रजः २७ विनाकृतानयास्यामःकृष्णेनानेनगोकुलम् । अरक्षंनातिसेव्यंचवारिहीनंयथासरः २८

पशोभिताः प्रकंपितानांतनूनामुत्क्षेपेणप्रेरणेनचलंतियानिकुंडलानितैःकांतिःशोभायासांताः १६ भोगोदेहःसएववंधनंरज्जुःतत्रप्रवेशितः स्वदेहवेष्टनेनवशीकृतइत्यर्थः ददंशुः दष्टवंतः १७ चुक्रुशुरुच्चैर्निवेदितवंतः शोकेनलालसाः अभिलाषायेषांतेउत्सुकाइत्यर्थः १८ क्रोशनमेवाह एषइति १९ २० गोपीनांजनःसर्वोपिव्यक्तिःद्रुतंप्रस्खलितंयथास्यात्तथाययौ २१ २२ २३ यशोदाचनिश्चेष्टाबभूव २४ शोकेनकातराविवशाः भयकातर्याभ्यांगद्गदंयथास्यादेवंप्रोचुः कातर्यमधैर्यम् २५ यत्प्रोचुस्तदाह सर्वाइतिसप्तभिः नोशब्दोनिषेधार्थः अस्माकमस्माभिः २६ कृष्णेनविनाकोव्रजः अतितुच्छइत्यर्थः तत्रगूढोपमाःप्राह दिवसइति २७ कृष्णेनविनाकृताविरहितानयास्यामो व्रजंकिंभूतं अरक्षंरक्षकहीनम् नातिसेव्यंदुःसेव्यम् अरण्यमितिपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठेयथाशब्दस्योभयत्रसंबंधः २८ यत्रायंहरिर्नास्तितेनापिमर्त्यलोकवासेनरतिरस्तीतिविस्मयःआश्चर्यं मातरितिपाठेसंबोधनं मातुरितिपाठे जननीगृहेणेत्यर्थः हरिंविनामातुर्गृहेपिसुखं नास्तीत्यर्थः २९ ३० अत्यर्थंमधुरालापैर्हृतमशेषंमनोरूपंधनंयेनतम् धनाइतिपाठेहृतंमनोधनंयासामितिव्याख्येयम् ३१ ३२ वासेनविधुरान्संविग्नान् नाशविधुरानितिपाठेमृत्यु भयशून्यान्मर्तुकामानित्यर्थः ३३ आत्मसंज्ञाअनन्यवेद्यःसंकेतस्तथात्वमस्यजगतोनाभिरित्यादिरूपयाकृष्णमाहकिमत्रेत्यष्टभिः कृष्णमाहात्म्यसंज्ञयेतिपाठेकृष्णमाहात्म्यस्यसंज्ञ यास्मरणेनाहेतिशेषः ३४ हेअनंतआत्मानंनवेत्सिनानुसंधत्सइतियत्एतत्किम् ३५ नचतवाज्ञानंयतोस्यजगतस्त्वमाश्रयः अराणांचक्रावयवानांनाभिश्चक्रपिंडिकेव यस्मिन्प्रतिष्ठितारथ

यत्रनेंदोवरदलप्रख्यकांतिरयंहरिः । तेनापिमर्त्यवासेनरतिरस्तीतिविस्मयः २९ उत्फुल्लपंकजदलस्पष्टकांतिविलोचनम् । अपश्यंतोहरिंदी नाः कथंगोष्ठेभविष्यथ ३० अत्यर्थंमधुरालापहृताशेषमनोधनम् । नविनापुंडरीकाक्षंयास्यामोनंदगोकुलम् ३१ भोगेनवेष्टितस्यापिसर्पराजेनप श्यत । स्मितशोभिमुखंगोप्यःकृष्णस्यास्मद्विलोकने ३२ इतिगोपीवचःश्रुत्वारौहिणेयोमहाबलः । गोपांश्चत्रासविधुरान्विलोक्यस्तिमितेक्षणः ३३ नंदंचदीनमत्यर्थंन्यस्तदृष्टिंसुतानने । मूर्च्छाकुलांयशोदांचकृष्णमाहात्म्यसंज्ञया ३४ किमत्रदेवदेवेशभावोऽयंमानुषस्त्वया । व्यज्यतेऽत्यंतमा त्मानंकिमनंतनवेत्सियत् ३५ त्वमस्यजगतोनाभिरराणामिवसंश्रयः । कर्ताचहर्तापाताचत्रैलोक्येत्वंत्रयीमयः ३६ सेंद्ररुद्राश्विवसुभिरादित्यैर्मरु दग्निभिः । चिंत्यसेत्वमचिंत्यात्मन्समस्तैश्चैवयोगिभिः ३७ जगत्यर्थेजगन्नाथभारावतरणेच्छया । अवतीर्णोऽद्यमर्त्येषुतवांशश्चाहमग्रजः ३८ म नुष्यलीलांभगवन्भवतोभजतःसुराः । विडंबयंतस्त्वल्लीलांसर्वएवसदासते ३९ अवतार्यभवान्पूर्वंगोकुलेत्रसुरांगनाः । क्रीडार्थमात्मनःपश्चादव तीर्णोसिशाश्वतः ४० अत्रावतीर्णयोःकृष्णगोपाएवहिबांधवाः ।गोप्यश्चसीदतःकस्मात्वद्बंधूंस्त्वंमुपेक्षसे ४१ दर्शितोमानुषोभावोदर्शितंबालचापल म् । तदयंदम्यतांकृष्णदुष्टात्मादशनायुधः ४२ । । पराशरउवाच । । इतिसंस्मारितःकृष्णःस्मितभिन्नोष्ठसंपुटः । आस्फोट्यमोचयामा सस्वदेहंभोगबंधनात् ४३ आनम्यचापिहस्ताभ्यामुभाभ्यांमध्यमंफणम् । आरुह्यभुग्नशिरसिप्रननर्तोरुविक्रमः ४४ व्रणाःफणेऽभवंस्तस्यकृ

नाभाविवाराइतिश्रुतेः३६ वस्तुतोऽचिंत्यात्मन्मायोपाधिभिस्त्वंसेंद्ररुद्रादिभिःसमस्तैश्चयोगिभिश्चिंत्यसे ३७ जगत्यर्थेभूमेर्हितार्थम् ३८ मनुष्यलीलांभजतोभवतस्तवलीलांगोपवेषाएवसु राअनुकुर्वंतआसते ३९ तथासुरांगनाश्चस्वयमवतार्यस्वयमवतीर्णोऽसि ४० अतोबंधुत्वेनास्मदर्थेअवतीर्णानेतान्किमुपेक्षसे ४१ उपसंहरन्कर्तव्यमाह दर्शितइति ४२ स्मितेति बलभद्रव चसाजातरहस्यज्ञानानांगोपानांमोहनायमायात्मकास्मितोद्गमः ४३ मध्यमंफणमानम्यभुग्नशिरसिआरुह्यपीडयित्वाप्रननर्त आरुह्याभुग्नशिरसइतिपाठेअभुग्नशिरसइतिच्छेदेअनम्रशिरसः फणमितिसंबंधः ४४ अंघ्रिकुट्टनैःनृत्यव्याजेनपापप्रहारैःयत्रोन्नतिंकुरुतेततस्तन्नामनमयामास यतोनतिंचेतिपाठेनतिंपादावनतिंकृष्णःकुरुते ततःतत्रास्यशिरोननामेतियोजना ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रांत्यानृत्यलीलाभ्रमणेनरेचकैःपादन्यासविशेषैः मुखनासिकारंध्रैर्वाववामचंडेनपादानिपातेन दंडपातानिपातेनेतिपाठेदंडवत्पातस्तीव्रप्रहारस्तद्वत्पादनिपातेनेत्यर्थः यद्वा भ्रांतिरेचकदंड पाताख्याःपादन्यासविशेषानृत्येभरतोक्ताः तथाहि अंतर्भ्रमरिकाज्ञेयाभ्रमरीवाह्यपूर्विका अनग्नभ्रमरीचस्यादुचितभ्रमरीतथा चित्रभ्रमारिकाचैवचक्रभ्रमरिकातथा निपातभ्रमरीचेतिभ्रमाःस प्तप्रकीर्तिताः पार्श्वाभ्यांचानुगमनंस्खलितैश्चालितैःपदैः विविधैश्चैवपादस्यपादरेचकउच्यते नूपुरंपुरतःकृत्वाचरणंसंप्रसारयेत् क्षिप्रमाविद्धकरणंदंडपातातुसास्मृतेति ४६ ४७ नविद्य तेउत्तमोयस्माद्धेअनुत्तम यत्परंज्योतिर्ब्रह्मयश्चतस्यांशःपरमेश्वरःसचत्वमितिज्ञातोऽसि कालियदमनेअन्यस्यासामर्थ्यात् ४८ एवंचेत्तर्हिममस्वरूपंबर्णयंतुअतआहुः नसमर्थाइतिद्वाभ्याम्

ष्णस्यांघ्रिविकुट्टनैः । यत्रोन्नतिंचकुरुतेननामास्यततःशिरः ४५ मूर्च्छामुपययौभ्रांत्यानागःकृष्णस्यरेचकैः । चंडपातनिपातेनववामरुधिरंबहु ४६ तंनिर्भुग्नशिरोग्रीवमास्येभ्यःस्रुतशोणितम् । विलोक्यशरणंजग्मुस्तत्पत्न्योमधुसूदनम् ४७ । । नागपत्न्यऊचुः । । ज्ञातोऽसिदेवदेवे शसर्वेशस्त्वमनुत्तम । परंज्योतिरचिंत्यंयत्तदंशःपरमेश्वरः ४८ नसमर्थाःसुरास्तोतुंयमनन्यभवंप्रभुम् । स्वरूपवर्णनंतस्यकथंयोषित्करिष्यति ४९ यस्याखिलंमहीव्योमजलाग्निपवनात्मकम् । ब्रह्मांडमल्पकांशांशःस्तोष्यामस्तंकथंवयम् ५० यतंतोनविदुर्नित्यंयत्स्वरूपमयोगिनः । पर मार्थमणोरल्पंस्थूलात्स्थूलंनताःस्मतत् ५१ नयस्यजन्मनेधातायस्यनांतायचांतकः । स्थितिकर्तानचान्योऽस्तियस्यतस्मैनमःसदा ५२ कोपःस्व ल्पोऽपितेनास्तिस्थितिपालनमेवते । कारणंकालियस्यास्यदमनेश्रूयतामतः ५३ स्त्रियोऽनुकंप्याःसाधूनांमूढादीनाश्चजंतवः । यतस्ततोऽस्यदी नस्यक्षम्यतांवदतांवर ५४ समस्तजगदाधारोभवानल्पबलःफणी । त्वत्पादपीडितोजह्यान्मुहूर्तार्धेनजीवितम् ५५ क्वपन्नगोऽल्पवीर्योऽयंक्वभवा न्भुवनाश्रयः । प्रीतिद्वेषौसमोत्कृष्टगोचरौचयतोऽव्यय ५६ ततःकुरुजगत्स्वामिन्प्रसादमवसीदतः । प्राणांस्त्यजतिनागोऽयंभर्तृभिक्षाप्रदीयता म् ५७ । । पराशरउवाच । । इत्युक्तेताभिराश्वस्यक्लांतदेहोऽपिपन्नगः । प्रसीददेवदेवेतिप्राहवाक्यंशनैःशनैः ५८ तवाष्टगुणमैश्वर्यंनाथ स्वाभाविकंपरम् । निरस्तातिशयंयस्यतस्यस्तोष्यामिकिंत्वहम्५९ त्वंपरस्त्वंपरस्माद्यःपरंत्वत्तःपरात्मकम् । परस्मात्परमोयस्त्वंतस्यस्तोष्यामिकिं

अनन्यस्माद्भवतीतिअनन्यभवःस्वयंभूस्तम् तस्यस्वरूपवर्णनंयोषिदस्माद्कथंकरिष्यति४९तर्हिकिमर्थमुद्यताः तत्राहुः यतंतइतिद्वाभ्याम् ५०स्तोतुमसमर्थाःकेवलंनताःस्मइतिभावः५१ यस्यजन्मादिकर्ताअपरोनास्तिविष्ण्वंतराभावात् ५२ स्तुत्वाप्रार्थयंते कोपइतिपंचभिः कालियस्यदमनेस्थितिपालनंलोकरक्षासंपादनंकारणंनिमित्तंनतुकोपोऽस्तिअतःपालनप्रवर्तनात् ५३ ५४ ५५ प्रीतिद्वेषौसमोत्कृष्टविषयौ यथाप्रीतिःसमोत्कृष्टविषयाएवंद्वेषोपि नतुनिकृष्टगोचरः अकीर्तिकरत्वात् ५६ अयंतुनिकृष्टत्वात्प्रसादैकपात्रमित्याह ततइति नचात्रविलंबःकार्यइ त्याह प्राणानिति ५७ ताभिर्भर्तृभिक्षाप्रदीयतामित्युक्तेश्रीकृष्णचरणपातशैथिल्येनाश्वस्यविश्वस्यनहनिष्यतीतिप्रतीत्यवाकालियःशनैःप्राह ५८ यस्यतवनिरस्तातिशयमष्टगुणैश्वर्यंतस्य किंपरंरूपंस्तोष्यामीत्यन्वयः ५९ तस्यनिरतिशयमैश्वर्यमेवदर्शयति त्वमिति त्वंपरःसर्वोत्कृष्टःतत्रहेतुः यस्त्वंप्रकृतेःपरस्मात्पुंसःपरंब्रह्मैवयतःपरमात्मकमव्यक्तंत्वत्तःप्रवर्तते तत्कुतइत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्राह परस्मादिंद्रियादिवर्गात्परमोयस्त्वम् तथाचश्रुतिःइंद्रियेभ्यःपराह्यर्थाह्यर्थेभ्यश्चपरंमनः मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः महतःपरमव्यक्तामव्यक्तत्पुरुषःपरः पुरुषान्नपरंकिंचि त्साकाष्ठासापरागतिरिति पाठांतरेष्वेतदनुसारिण्येवव्याख्या ६० तस्यसर्वोत्कृष्टत्वंस्पष्टयति यस्मादितिसप्तभिः भवंतीतिशेषः ६१ यस्यएकावयवस्यसूक्ष्मांशएतज्जगत् पादोस्यवि श्वाभूतानीतिश्रुतेः अचित्कथंचितोंऽशइतिचेत्तत्राह कल्पनामयोवयवांशोयस्य जगद्रूपस्यावयवांशस्यकाल्पनिकत्वमित्यर्थः ६२ सदसद्रूपिणःस्थूलसूक्ष्मदेहाभिमानिनोब्रह्माद्याः ६३ नंद नादिसमुद्भूतैःपारिजातादिपुष्पहरिचंदनाद्यनुलेपनैः ६४ ६५ यमर्चयंतिध्यानेनध्यानरूपंसमर्चनंकुर्वंति ६६ भावपुष्पादिभिर्मनोमयपुष्पाद्युपचारैः यद्वाभावपुष्पैरहिंसादिभिः यथाअ

त्वहम् ६० यस्माद्ब्रह्मचरुद्रश्चचंद्रेंद्रमरुदश्विनः । वसवश्चसहादित्यैस्तस्यस्तोष्यामिकिंत्वहम् ६१ एकावयवसूक्ष्मांशोयस्यैतदखिलञ्जगत् । क ल्पनावयवांशस्यतस्यस्तोष्यामिकिंत्वहम् ६२ सदसद्रूपिणोयस्यब्रह्माद्यास्त्रिदशेश्वराः । परमार्थंनजानंतितंस्तोष्यामिकथंत्वहम् ६३ ब्रह्माद्यै रर्च्यतेयश्चदिव्यपुष्पानुलेपनैः । नंदनादिसमुद्भूतैःसोऽर्च्यतेवाकथंमया ६४ यस्यावताररूपाणिदेवराजःसदार्चति । नवेत्तिपरमंरूपंसोऽर्च्य तेवाकथंमया ६५ विषयेभ्यःसमाहृत्यसर्वाक्षाणिचयोगिनः । यमर्चयंतिध्यानेनसोऽर्च्यतेवाकथंमया ६६ हृदिसंकल्प्ययद्रूपंध्यानेनार्चं तियोगिनः । भावपुष्पादिभिर्नाथसोऽर्च्यतेवाकथंमया ६७ सोऽहंतदेवदेवेशनार्चनादौस्तुतौनच । सामर्थ्यवान्कृपामात्रमनोवृत्तिःप्रसी दमे । ६८ । सर्पजातिरियंक्रूरायस्यांजातोऽस्मिकेशव । तत्स्वभावोऽयमत्रास्तिनापराधोममाच्युत । ६९ । सृज्यतेभवतापूर्वंतथासंक्रियते जगत् । जातिरूपस्वभावाश्चसृज्यंतेसृज्यतात्वया । ७० । यथाहंभवतासृष्टोजात्यारूपेणचेश्वर । स्वभावेनचसंयुक्तस्तथेदंचेष्टितंमया । । ७१ । यद्यन्यथाप्रवर्तेयंदेवदेवततोमयि । न्याय्योदंडनिपातस्तेतवैववचनंयथा ७२ तथापियज्जगत्स्वामीदंडंपातितवान्मयि । ससोढो यंवरोदंडस्त्वत्तोमेनान्यतोवरः ७३ हतवीर्योहतविषोदमितोऽहंत्वयाच्युत । जीवितंदीयतामेकमाज्ञापयकरोमिकिम् ७४ । । श्रीभ गवानुवाच । । । नात्रस्थेयंत्वयासर्पकदाचिद्यमुनाजले । सभृत्यपरिवारस्त्वंसमुद्रसलिलंव्रज ७५ मत्पदानिचतेसर्पदृष्ट्वामूर्द्ध

हिंसाप्रथमंपुष्पंपुष्पामिंद्रियनिग्रहः सर्वभूतदयापुष्पंक्षमापुष्पंविशिष्यते शमपुष्पंतपःपुष्पंध्यानपुष्पंचसप्तमम् सत्यंचैवाष्टमंपुष्पमेभिस्तुष्यतिकेशवइति आदिशब्दान्नित्यानित्यविवे कादिभिः ६७तदेवंस्तुत्वाप्रसादंप्रार्थयति सोहमिति कृपामात्राकरुणामयीमनोवृत्तिर्यस्यतथाभूतःसन्प्रसीद ६८अहोत्वयिदंडएवोचितइतिचेत्तत्राह सर्पेतिषड्भिःस्वभावःक्रौर्यादिःअत्रक्रौर्यादौ ६९अयमेवापराधइतिचेत्तत्राह सृज्यतइति जातिःसर्पत्वादिःरूपंफणित्वादि स्वभावःपूर्वोक्तः सृज्यतेत्यार्षम्७०७१ तथापिनिषिद्धाचरणेदंड्यएवेत्यतआह यदीतितेत्वया तववचनंश्रुति स्मृतिरूपम् स्वभावविहितंकर्मकुर्वन्नाप्नोतिकिल्बिषम् परित्राणायसाधूनामित्यादि साधुत्वंचत्वदाज्ञाकारित्वंतच्चममास्त्येवेतिभावः ७२ जिघांसंतंजिघांसीयादित्यपिममवचनमितिचेत्त त्राह तथापित्वत्तोदंडोपिवरःश्रेष्ठःअन्यस्मादभीष्टलाभोपिनवरइत्यर्थः त्वत्तोममेत्ययंवरइतिपाठेत्वत्तोयोदंडः अयंवरएवममेत्यभ्युपैतिदुःस्वभावनिवृत्तेः ७३ तदेवाह हतवीर्यइति ७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरुडोमांहनिष्यतीत्यतआह मत्पदानीति ७५ ७६ ७७ ७८ गोपानंदादयः ७८ अन्येसमानवयस्याःश्रीदामादयः ७० चरितेगीयमानेसति चरितैरितिपाठेनिमित्तभूतैरित्यर्थः ८१ ८२ ॥ ॥ इतिश्रीविष्णुपुराणेवैष्णवाकूतचंद्रिकायांपंचमेअंशेसप्तमोध्यायः ७ ॥ ॥ समुद्रेकालियंक्षिप्त्वातथाकाशेचधेनुकम् अष्टमेनिर्दहतिंचक्रेगोकुलेसाग्रजोहरिः १ २ फ

निसागरे । गरुडः पन्नगरिपुस्त्वयिनप्रहरिष्यति ७६ । । पराशरउवाच । । इत्युक्त्वासर्पराजानंमुमोचभगवान्हरिः । प्रणम्यसोऽपिकृष्णायजगामपयसांनिधिम् ७७ पश्यतांसर्वभूतानांसभृत्यापत्यबांधवः । समस्तभार्यासहितःपरित्यज्यस्वकंह्रदम् ७८ ततःसर्वेपरिष्वज्यमृतंपुनरिवागतम् । गोपामूर्धनिगोविंदंसिषिचुर्नेत्रजैर्जलैः ७९ कृष्णमक्लिष्टकर्माणमन्येविस्मितचेतसः । तुष्टुवुर्मुदितागोपादृष्ट्वाशिवजलांनदीम् ८० गीयमानेसगोपीभिश्चरितेचारुचेष्टितः । सहितोबलदेवेननंदेनचयशोदया ८१ संस्तूयमानोगोपालैःकृष्णोव्रजमुपागमत् । । इतिश्रीविष्णुपुराणेपंचमेअंशेसप्तमोध्यायः ७ । । पराशरउवाच । । गाःपालयंतौचपुनःसहितौबलकेशवौ । भ्रममाणौवनेतत्ररम्यंतालवनंगतौ १ तत्तुतालवनंनित्यंधेनुकोनामदानवः । नृगोमांसकृताहारःसदाध्यास्तेखराकृतिः २ तत्तुतालवनंपक्वफलसंपत्समन्वितम् । दृष्ट्वास्पृहान्वितागोपाःफलदानेऽब्रुवन्वचः ३ हेरामहेकृष्णसदाधेनुकेनैवरक्ष्यते । भूप्रदेशोयतस्तस्मात्पक्वानीमानिसंतिवै ४ फलानिपश्यतालानांगंधामोदितदिंशिच । वयमेतान्यभीप्सामःपात्यतांयदिरोचते ५ इतिगोपकुमाराणांश्रुत्वासंकर्षणोवचः । कृष्णश्चपातयामासभुवितालफलानिवै ६ तालानांपततांशब्दमाकर्ण्यसदुरासदः । आजगामाथदुष्टात्माकोपाद्दैतेयगर्दभः ७ पद्भ्यामुभाभ्यांसतदापश्चिमाभ्यांबलीबलम् । जघानोरसिताभ्यांचसचतेनाथगृह्यत ८ गृहीत्वाभ्रामणेनैवसोंबरेगतजीवितम् । तस्मिन्नेवसचिक्षेपवेगेनतृणराजनि ९ ततःफलान्यनेकानितालाग्रान्निपतन्खरः । पृथिव्यांपातयामासमहावातोंबुदानिव १० अन्यानप्यस्यवैज्ञातीनागतान्दैत्यगर्दभान् । कृष्णश्चिक्षेपतालाग्रेबलभद्रश्चलीलया ११ क्षणेनालंकृतापृथ्वीपक्वैस्तालफलैस्तदा । दैत्यगर्दभदेहैश्चमैत्रेयशुशुभेधिकम् १२ ततोगावोनिराबाधास्तस्मिंस्तालवनेद्विज । नवशष्पंसुखंचेरुर्यन्नभुक्तमभूत्पुरा । । इतिश्रीविष्णुपुराणेपंचमेअंशेअष्टमोध्यायः ८। । पराशरउवाच । । तस्मिन्नासभदैतेयेसानुगेविनिपातिते । सेव्यंगोगोपगोपीनांरम्यंतालवनं

लादानेस्पृहान्विताअब्रुवन् फलदाननिमित्तमितिवा ३ तदेवाहहेरामेतिद्वाभ्याम् ४ गंधेनामोदिताःसुरभीकृताःदिशोयैस्तानि ५ ६ ७ ताभ्यांतयोःपादयोःसधेनुकःतेनबलेनाप्यगृह्यत गृहीतः ८ सबलःभ्रामणैरेवांबरेगतजीवितंमृतधेनुकंतृणराजनितालवृक्षेचिक्षेप ९ महावातेरितानिवेतिपाठेवाशब्दइवार्थे १० ११ १२ १३ ॥ ॥ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचमेअंशेटीकायांअष्टमोध्यायः ८ ॥ ॥ स्वयंस्तुतोयथाकृष्णःकालीयदमनेतथा जघानबलभद्रोपिप्रलंबंहरिणेडितः १ भांडाराख्योवटस्तत्संबंधिवनम् २ खेलमानौबालकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डांकुर्वंतौ क्ष्वेडमानाविति पाठे सिंहवन्नदंतौ क्ष्वेडातुसिंहनादःस्यादित्यभिधानात् विचिन्वंतौवासयोग्यानन्विष्यंतौ व्याहरंतौआह्वयंतौ ३ नियोगपाशस्कंधौदुह्यमानगवादिपादानियंत्रण रज्जुस्कंधौ बालशृंगाविति काकपक्षधरत्वसूचनायवयोविशेषसूचनार्थंबा ४ रूषितांबरौरंजितवस्त्रौ महेंद्रस्यायुधेनधनुषासम्यक्काशोदीप्तिर्ययोः तथाभूतौ श्वेतकृष्णांबुदाविव ५ ६ ७ स्पंदोलिकाभिर्मनुष्यहस्तमयदोलारोहैर्नियुद्धैर्बाहुयुद्धैर्व्यायामंश्रमम् क्षपणीयैर्यंत्रविशेषक्षिप्तैरश्मभिः ८ तल्लिप्सुरसुरस्तौजिघृक्षुः गोपवेषेणातिरोहितःअसुरत्वेनालक्षितः९ तदेवाह सइति अवगा

बभौ १ ततस्तौजातहर्षौतुवसुदेवसुतावुभौ । हलाधेनुकदैतेयंभांडीरवनमागतौ २ खेलमानौप्रगायंतौविचिन्वंतौचपादपान् । चारयंतौचगादूरे व्याहरंतौचनामभिः ३ नियोगपाशस्कंधौतौवनमालाविभूषितौ । शुशुभातेमहात्मानौबालशृंगाविवर्षभौ ४ सुवर्णांजनचूर्णाभ्यांतौतदारूषितांबरौ । महेंद्रायुधसंकाशौश्वेतकृष्णाविवांबुदौ ५ चेरतुर्लोकसिद्धाभिःक्रीडाभिरितरेतरम् । समस्तलोकनाथानांनाथभूतौभुवंगतौ ६ मनुष्यधर्माभिरतौमानयंतौमनुष्यताम् । तज्जातिगुणयुक्ताभिःक्रीडाभिश्चेरतुर्वनम् ७ ततःस्पंदोलिकाभिश्चानियुद्धैश्चमहाबलौ । व्यायामंचक्रतुस्तत्रक्षेपणीयैस्तथाश्मभिः ८ तल्लिप्सुरसुरस्तत्रउभयोरममाणयोः । आजगामप्रलंबाख्योगोपवेषतिरोहितः ९ सोऽवगाहतनिःशंकस्तेषांमध्यममानुषः । मानुषंवपुरास्थायप्रलंबोदानवोत्तमः १० तयोश्छिद्रांतरप्रेप्सुरविषह्यममन्यत । कृष्णंततोरौहिणेयंहंतुंचक्रेमनोरथम् ११ हरिणाक्रीडनंनामबालक्रीडनकंततः । प्रक्रीडिताहितेसर्वेद्वौद्वौयुगपदुत्पतन् १२ श्रीदाम्नासहगोविंदःप्रलंबेनतथाबलः । गोपालैरपरैश्चान्यैर्गोपालाःसहपुप्लुवुः १३ श्रीदामानंतथाकृष्णःप्रलंबंरोहिणीसुतः । जितवान्कृष्णपक्षीयैर्गोपैश्चान्येपराजिताः १४ तेवाहयंतस्त्वन्योन्यंभांडीरस्कंधमेत्यवै । पुनर्वृतिरेसर्वेयेयेतत्रपराजिताः १५ संकर्षणंतुस्कंधेनशीघ्रमुत्क्षिप्यदानवः । नतस्थौप्रजगामैवःसचंद्रइववारिदः १६ असहन्रौहिणेयस्यसभारंदानवोत्तमः । ववृधेसुमहाकायःप्रावृषीवबलाहकः १७ संकर्षणस्तुतंदृष्ट्वादग्धशैलोपमाकृतिम् । स्रग्दामलंबाभरणंमुकुटाटोपिमस्तकम् १८ रौद्रंशकटचक्राक्षंपादन्यासचलत्क्षितिम् । क्रियमाणस्ततःकृष्णमिदंवचनमब्रवीत् १९ कृष्णकृष्णक्रियाम्येषपर्वतोदग्रमूर्तिना । केनापिपश्यदैत्येनगोपालच्छद्मरूपिणा २० यदत्रसांप्रतंकार्यंमयामधुनिषूदन । तत्कथ्यतांप्रयात्येवदुरात्मातित्व

हतप्राविशत् अडभावस्त्वार्षः १० छिद्रांतरप्रेप्सुः प्रमादावसरप्रतीक्षमाणः अविषह्यमप्रधृष्यम् ११ हरिणाक्रीडनंहरिणवत्क्रीडनमाप्लुतः द्वयोर्हिप्लुतयोर्योग्रेयातिसजेतापरोजितःसजेतारंवहन्भांडीरंनीत्वाप्लुतिस्थानंनयेदितिपणःउत्पतन्अप्लुतवंतः अडागमाभावश्छांदसः १२ १३ तत्रप्रलंबंश्रीदामपक्षीयंरोहिणीसुतोजितवान्एवंकृष्णपक्षीयैरन्यैः श्रीदामपक्षीयाजिताः १४भांडीरस्कंधंतदुपलक्षितंदेशम् जयपराजयव्यत्ययेनान्योन्यंवहंतः पुनर्वृतिरेनिवृत्ताः १५ १६ १७ दग्धशैलोपमातत्सदृशीआकृतिर्यस्य स्रग्भिर्ग्रथितंयत्स्थूलंदामतदेवलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाभरणंयस्य मुकुटेनाटोपिसंबंधिमस्तकंयस्यतम् १८ शकटचक्रेइवाक्षिणीयस्य पादन्यासेनचलंतीक्षितिर्यस्यतम् १९ क्रियामिक्रिये पर्वनवदुदग्राउन्नतामूर्तिर्यस्यतेन २० २१ पूर्वकालिय
दमनेमांतत्त्वंस्मारितवान्इदानींस्वयमेवमुह्यतीतियत्स्मितंतेनभिन्नमोष्ठपुटंयस्य २२ सर्वात्मन्सर्वस्वरूप सर्वेषांगुह्यानांसूक्ष्माणांयद्गुह्यमव्यक्तंयस्मादपिगुह्यात्मनाउपनिषद्रहस्यस्वरूपेण २३
तदेवस्पष्टयति स्मरेतिद्वाभ्याम् कारणाग्रजकारणानामपिपूर्वास्थितजगदवस्थायामपिकारणात्मनैकमेवंकारणमात्मानंस्मर तद्वत्प्रलयेयस्त्वमेवतंचस्मरअनुसंधत्स्व २४ननुत्वमेवकारणमित्यत
आह किमितित्वंचाहंचावामेवकारणमितियथावत्किंनवेत्सिभुवोभारावतारणार्थायआवामुपगताविति अतइमंभारभूतंजहीतिभावः २५ इदानींविराड्रूपेणस्तौतिनभइति २६ तदुद्भवमहापुरुषरू
पेणस्तौति सहस्रवक्त्रइति सहस्रमपरिमिताहस्तादिरूपाःशरीरांशानांभेदायस्यसः सहस्रंयेपद्मोद्भवाःब्रह्माणः तेषांयोनिर्जनकः २७ एतद्दिव्यंसहस्रंसूर्यप्रकाशंरूपमन्योनवेत्ति अंतेप्रलयेइदं

रान्वितः २१ । । पराशरउवाच । । तमाहरामगोविंदःस्मितभिन्नौष्ठसंपुटः । महात्मारौहिणेयस्यबलवीर्यप्रमाणवित् २२ किमर्थंमानुषो
भावोव्यक्तएवावलंब्यते । सर्वात्मन्सर्वगुह्यानांगुह्याद्गुह्यात्मनात्वया २३ स्मराशेषजगन्नाथकारणंकारणाग्रज । आत्मानमेकंतद्वच्चजगत्येकार्णवेचयः।
२४ किंनवेत्सियथाहंचत्वंचैकंकारणंभुवः । भारावतारणार्थायमर्त्यलोकमुपागतौ २५ नभःशिरस्तेंबुमयीचमूर्तिःपादौक्षितिर्वक्रमनंतवह्निः । सो
मोमनस्तेश्वसितंसमीरोदिशश्चतस्त्रोव्ययबाहवस्ते २६ सहस्रवक्त्रोभगवान्महात्मासहस्रहस्तांघ्रिशरीरभेदः । सहस्रपद्मोद्भवयोनिराद्यःसहस्र
शस्त्वांमुनयोगृणंति २७ दिव्यंहिरूपंतववेत्तिनान्योदेवैरशेषैरवताररूपम् । तवार्च्यतेवेत्सिनकिंयदंतेत्वय्येवविश्वंलयमभ्युपैति २८ त्वयाधृतेयं
धरणीबिभर्तिचराचरंविश्वमनंतमूर्ते । कृतादिभेदैरजकालरूपोनिमेषपूर्वोजगदेतदत्सि २९ अत्तंयथावाडववह्निनांबुहिमस्वरूपंपरिगृह्यखस्थ
म् । हिमाचलेभानुमतोंशुसंगाज्जलत्वमभ्येतिपुनस्तदेव ३० एवंत्वयासंहरणेत्तमेतज्जगत्समस्तंपुनरप्यवश्यम् । तवैवसर्गायसमुद्यतस्यजगत्त्वम
भ्येत्यनुकल्पमीश ३१ भवानहंचविश्वात्मन्नेकमेवहिकारणम् । जगतोऽस्यजगत्यर्थेभेदेनावांव्यवस्थितौ ३२ तत्स्मर्यताममेयात्मंस्त्वयात्माजहि
दानवम् । मानुष्यमेवावलंब्यबंधूनांक्रियतांहितम् ३३ । । पराशरउवाच । । इतिसंस्मारितोविप्रकृष्णेनसुमहात्मना । विहस्यपीडयामासप्र

विश्वंत्वयिलयमभ्युपैतीतिकिंनवेत्सिनानुसंधत्से २८ निमेषपूर्वोनिमेषादिवत्सरांतरूपेणकृतादिस्वरूपःकालस्त्वमेवैतज्जगदत्सिग्रससे २९ जगत्प्रलयोद्भवहेतुत्वंदृष्टांतेनाह अत्तमितिद्वाभ्याम्
सामुद्रमंबुवाडवाख्येनवह्निनाअत्तंभक्षितंघनीभूयहिमस्वरूपंकर्षकसंज्ञेनवायुनावाडवाग्निगतेनसूर्यरश्मिनाडीमयेनपरिगृह्यगृहीत्वाखस्थमाकाशस्थंकृतंसद्धिमाचलेभवतीतिशेषः पुनश्चभानु
मतोरवेरंशुसंगाज्जलत्वमभ्येति यथात्वयासंहारकालेवाडवाग्निस्थानीयेनरुद्रादिरूपेणात्तंजगधंजगत्सूक्ष्मावस्थंहिमाचलस्थानीयेपरमपुरुषेयावत्प्रलयंस्थितंसद्धिरण्यगर्भरूपेणसर्गायोद्यतस्यत
वसिसृक्षासंबंधात्पुनःस्थूलजगद्रूपत्वमनुकल्पं प्रतिगृह्य चास्तमितिपाठेहिमाचलेक्षिप्तमित्यर्थः तथाचस्वयमेवोक्तम् सरित्समुद्रभौमास्तुतथापःप्राणिसंभवाः चतुःप्रकाराभगवानादत्तेसाविता
मुने विवस्वानष्टभिर्मासैरादायजगतोजलम् सोमंपुष्णात्यथेंदुश्चवायुनाडीमयैर्दिवि हिमोष्णवारिवृष्टीनांहेतुस्तुसमयागतइत्यादि ३० ३१ इदानींपूर्वोक्तमेवद्वयोरभेदमुपसंहरन्कर्तव्यमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवानहंचेति३२ यद्यप्येवंस्वरूपमास्थितःतथापिमानुष्यमेवाबलंव्यबंधुहितायइमंजहि ३३ ३४ अहनादितिच्छांदसम्३५निष्कासितंमास्तिष्कंमस्तकस्नेहोयस्यसः ३६ ३७ ३८इतिवैष्ण
वाकूतचन्द्रिकायांटीकायांनवमोध्यायः ९ शरद्रूपकमिंद्रेज्यानिषेधेनाद्रिपूजनम् दशमेवर्ण्यतेकृष्णात्पूज्यपूजकरूपिणः इदानीमसुरवधप्रसंगेनइंद्रस्याप्यसुरभावनिराकरणायगोवर्ध
नोद्धरणंवक्ष्यन्वैराग्यज्ञानंदर्शयञ्शरदंवर्णयति तयोरितिपंचदशभिः विकसंतिसरोजानियस्यांसाशरदभवत् १ शफरःक्षुद्रमत्स्यविशेषः पल्वलःस्वल्पगर्तविशेषः परित्यक्तोमदोदर्पोयैस्ते
३ जलमुदकंअहंकारादिजडवर्गस्यतदेवसर्वस्वंनिजबंधनंहित्वामलःश्यामलत्वंकार्पण्यंचतद्रहिताः सितमूर्तयःशुभ्राःशुद्धसत्त्वाश्च विज्ञानिनआत्मज्ञाः ४ शोषःस्वल्पत्वंभोगसंकोचंच

लंबंबलवान्बलः ३४ मुष्टिनाचाहनन्मूर्ध्निकोपसंरक्तलोचनः । तेनचास्यप्रहारेणबहिर्यातेविलोचने ३५ सनिष्कासितमस्तिष्कोमुखाच्छोणितमुद्व
मन् । निपपातमहीपृष्ठेदैत्यवर्योममारच ३६ प्रलंबंनिहतंदृष्ट्वाबलेनाद्भुतकर्मणा । प्रहृष्टास्तुष्टुवुर्गोपाःसाधुसाध्वितिचाब्रुवन् ३७ संस्तूयमानो
रामस्तुगोपैर्दैत्येनिपातिते । प्रलंबेसहकृष्णेनपुनर्गोकुलमाययौ ३८ । । इतिश्रीविष्णुपुराणेपंचमेअंशेनवमोध्यायः ९ । । पराशरउवाच ।
तयोर्विहरतोरेवंरामकेशवयोर्व्रजे । प्रावृड्व्यतीताविकसत्सरोजाचाभवच्छरत् १ अवापतापमत्यर्थंशफरःपल्वलोदके । पुत्रक्षेत्रादिसक्तेनममत्वेन
यथागृही २ मयूराभौनिनस्तस्थुःपरित्यक्तमदावने । असारतांपरिज्ञायसंसारस्येवयोगिनः ३ उत्सृज्यजलसर्वस्वंविमलाःसितमूर्तयः । तत्यजु
श्चांबरंमेघागृहंविज्ञानिनोयथा ४ शरत्सूर्यांशुतप्तानिययुःशोषंपयांसिच । बव्हालंबिममत्वेनहृदयानीवदेहिनाम् ५ कुमुदैःशरदंभांसियोग्यताल
क्षणंययुः । अवबोधैर्मनांसीवसंबंधममलात्मनाम् ६ तारकाविमलेव्योम्निरराजाखंडमंडलः । चंद्रश्चरमदेहात्मायोगीसाधुकुलेयथा ७ शनकैःश
नकैस्तीरंतत्यजुश्चजलाशयाः । ममत्वंक्षेत्रपुत्रादिरूढंसर्वेयथाबुधाः८पूर्वत्यक्तैःसरोंभोभिर्हंसायोग्यंपुनर्ययुः । क्लेशैःकुयोगिनोशेषैरंतरायहताइव
९ निभृतोभवदत्यर्थंसमुद्रस्तिमितोदकः । क्रमावाप्तमहायोगोनिश्चलात्मायथायतिः १० सर्वत्रातिप्रसन्नानिसलिलानितथाभवन् । ज्ञातेसर्वग
तेविष्णौमनांसीवसुमेधसाम् ११ बभूवविमलंव्योमशरदाध्वस्ततोयदम् । योगाग्निदग्धक्लेशौघंयोगिनामिवमानसम् १२ सूर्यांशुजनितंतापंनि

शरदंभांसिअर्थान्निर्मलानि कुमुदैःसितोत्पलैःयोग्यतालक्षणंअन्योन्यानुरूपंसंबंधंययुः अमलात्मनांमनांसिअर्थाच्छुद्धानिअवबोधैरात्मतत्त्वज्ञानैरिव ६ तारकाभिःसहनिर्मलेव्योम्निअखं
डमंडलःपूर्णिमासंभृतकलामयदेहःसन्चंद्रोरराज साधूनांकुलेचरमौदेहात्मानौस्थूलसूक्ष्मदेहौयस्यसोऽखंडप्रकाशोयोगीयथा ७ ८ अंतरायैर्विघ्नैर्हताअभिभूताःकुयोगिनोयथाक्लेशैरविद्या
दिभिःपुनर्योगंयांतितद्वत् ९ निभृतोनिःशब्दःस्तिमितोदकोनिश्चलजलःयमनियमादिक्रमेणाप्तोमहायोगोऽसंप्रज्ञातसमाधिलक्षणोयेनसयतिर्यथा १० सर्वत्रनद्यादौशत्रुमित्रादिकेच सुमे
धसांभक्तानांमनांसीव ११ १२ १३ नभसआकाशादब्दान्मेघान् भुवोभूमेःपंकंअंभसोजलात्कालुष्यंमलिनत्वंशरदपाहरद्व्ययोजयत् प्राप्ताहारोनामयोगस्यैकमंगम् इंद्रियार्थेभ्योवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयेभ्यइंद्रियाणीव १४ सरसामंभोभिः प्राणायामोभ्यस्यतइवेतिजलानिकदाचित्कुल्योदकैःपूर्यंतेकर्हिचित्स्तंभितानिकदाचिद्रिक्तानिचभवंतीतिउत्प्रेक्षा कुंभकादिभिरितिरेचकविशेषणम् रेचकारंभकारिभिरितिपाठेरेचनंरेचकःजलाशयस्यशोषणंतदारंभंकर्तुंशीलंयेषांतैः यद्वाआदिशब्दबहुवचनाभ्यांतदावृत्तिरुक्ता एतत्त्रयात्मकश्चप्राणायामोभवति यदुक्तम् पूरकःपूरणं वायोःकुंभकःस्थापनंक्वचित् बहिर्निःसारणंतस्यरेचकःपरिकीर्तितइति १५ इंद्रस्यमहः यज्ञोत्सवस्तदारंभायोद्यतान्तदुद्युक्तान्कृष्णोददर्श १६ उत्सुकान्चिकीर्षून् कौतुहलात्तद्व्याजेन वस्तुतइंद्रमहभंगार्थैव १७ १८ १९ तत्सस्यमुपयुंजानावर्त्तयामइत्यन्वयः विसर्गलोपेसंधिरार्षः २० २१ २२ ननुनपर्जन्याद्वृष्टिःकिंतुसूर्यादेवआदित्याज्जायतेवृष्टिरितिवचना

न्येतारापतिःशमम् । अहंकारोद्भवंदुःखंविवेकःसुमहानिव १३ नभसोब्दान्भुवःपंकंकालुष्यंचांभसःशरत् । इंद्रियाणींद्रियार्थेभ्यःप्रत्याहारइवाहरत् १४ प्राणायामइवांभोभिःसरसांकृतपूरकैः । अभ्यस्यतेऽनुदिवसंरेचकैःकुंभकादिभिः १५ विमलांबरनक्षत्रेकालेचाभ्यागतेव्रजम् । ददर्शेंद्रमहारंभायोद्यतान्व्रजवासिनः १६ कृष्णस्तानुत्सुकान्दृष्ट्वागोपानुत्सवलालसान् । कौतूहलादिदंवाक्यंप्राहवृद्धान्महामतिः १७ कोऽयंशक्रमहोनामयेनवोहर्षआगतः । आहतंनंदगोपश्चपृच्छंतमितिसादरम् १८ मेघानांपयसांचेशोदेवराजःशतक्रतुः । तेनसंचोदितामेघावर्षंत्यंबुमयंरसम् १९ तद्वृष्टिजनितंसस्यंवयमन्येचदेहिनः । वर्तयामोपयुंजानास्तर्पयामश्चदेवताः २० क्षीरवत्यइमागावोवत्सवत्यश्चनिर्वृताः । तेनसंवर्धितैःशष्पैस्तुष्टाःपुष्टाभवंतिवै २१ नासस्यानातृणाभूमिर्नबुभुक्षार्दितोजनः । दृश्यतेयत्रदृश्यंतेवृष्टिमंतोबलाहकाः २२ भौममेतत्पयोदुग्धंगोभिःसूर्यस्यवारिदः । पर्जन्यःसर्वलोकस्यभवायभुविवर्षति २३ तस्मात्प्रावृषिराजानःसर्वेशक्रंमुदायुताः । महैःसुरेशमर्चंतिवयमन्येचदेहिनः २४ । । पराशरउवाच । । नंदगोपस्यवचनंश्रुत्वेत्थंशक्रपूजने । कोपायत्रिदशेंद्रस्यप्राहदामोदरस्तदा २५ नवयंकृषिकर्तारोवाणिज्याजीविनोनच । गावोऽस्मद्दैवतंतातवयंवनचरायतः २६ आन्वीक्षिकीत्रयीवार्तादंडनीतिस्तथापरा । विद्याचतुष्टयंत्वेतद्वार्तामत्रशृणुष्वमे २७ कृषिर्वणिज्यातद्वच्चतृतीयंपशुपालनम् । विद्याह्येकामहाभागवार्तावृत्तित्रयाश्रया २८ कर्षकाणांकृषिर्वृत्तिःपण्यंविपणिजीविनाम् । अस्माकंगौःपरावृत्तिर्वार्ताभेदैरियंत्रि

दित्यतआह भौममिति सूर्यस्यरश्मिभिर्भौमरसंदुग्धंपूरितंवारिदोवारिदाधिष्ठातापर्जन्यइंद्रोजगतोभवायवर्षति वारिदैरितिपाठेकरणैरित्यर्थः याभिरादित्यस्तपतिरश्मिभिस्ताभिःपर्जन्योवर्षतीतिश्रुतेः २३ प्रावृषिगतायामितिशेषः शरद्वर्णनप्रसंगात् यद्वाचांद्रभाद्रपदशुद्धद्वादश्यामिंद्रमहः साकदाचित्कन्यायांसूर्येपिभवतीतिशरद्वर्णनोपपत्तिः यथाश्वयुक्त्रयोदशीवर्षात्रयोदशीत्युच्यते २४ २५ २६ वार्तानिरुच्यतत्रगवांपूजनंवक्तुंविद्याचतुष्टयमुपदिशति आन्वीक्षिकीतर्कविद्या त्रयीत्रयोवेदाः वार्तावक्ष्यमाणा दंडनीतिरर्थशास्त्रम् अत्रविद्याचतुष्टयमध्ये वैश्यवार्तांविद्यांमेमत्तःशृणुष्व २७ २८ एवमेकावार्तावृत्तित्रयाश्रयातत्राप्यस्माकंगौःपरावृत्तिः गाइतिपाठेगावइत्यर्थः कुसीदमतिनिंद्यत्वान्नोक्तम् इयंवार्ताजीविकाकर्षकादिभिरधिकारिभेदै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रिभिर्भिन्नेतिशेषः २९ ततःकिमतआह विद्ययेति पूज्याआदरणीया आर्चनीयागंधादिभिरर्हणीया ततःसातस्यपूजकस्यैवउपकारिकाअभीष्टप्रदा ३० व्यतिरेकेदोषमाह योन्यस्याइति ३१ गवांपूज्यत्वमुक्त्वाविवक्षितगोवर्धनपूजायांहेतुमाह कृष्यंताइतिग्रामंपरितःकृष्यमाणंक्षेत्रंकृषिःतदंतास्तद्बहिःसीमाःसाधारणप्रचारयोग्योदेशः तदंतंवनंतदंतागिरयः तेचगिरयोस्माकं परागतिः व्रजस्यविहारभूमित्वात् ३२ अस्माकमनावृतानांगिरयएवरक्षकाःअतस्तएवपूज्याइत्याह तद्द्वारबंधेतिसार्धैस्त्रिभिः द्वारबंधएवावरणंयेषांतेग्रामवासिनोवयंन तथाएवंगृहंक्षेत्रं चास्तियेषांतथाभूताअपिनवयम् किंतुचक्रोपलक्षितेनशकटेनयेचरंतिवणिजस्तेयथातथावयम् प्रभूततृणजलादिमंतोनियतवासनिरताःशुष्मिणःसुखिनः अतोऽस्माकंकिमिंद्रपूजयेतिभावः

भिः २९ विद्ययायोययायुक्तस्तस्यसादैवतंमहत् । सैवपूज्यार्चनीयाचसैवतस्योपकारिका ३० योऽन्यस्याःफलमश्नन्वैपूजयत्यपरांनरः । इहच प्रेत्यचैवासौततोनाप्नोतिशोभनम् ३१ कृष्यंताःप्रथिताःसीमाःसीमांतंचपुनर्वनम् । वनांतागिरयःसर्वेतेचास्माकंपरागतिः ३२ नद्वारबंधावरणान गृहक्षेत्रिणस्तथा । शुष्मिणस्त्वखिलेलोकेयथावैचक्रचारिणः ३३ श्रूयंतेगिरयश्चामीवनेऽस्मिन्कामचारिणः । तत्तद्रूपंसमास्थायरमंतेस्वेषुसानुषु ३४ यदाचैवापराध्यंतेतेषांतेकाननौकसः । तदासिंहादिरूपैस्तान्घातयंतिमहीधराः ३५ गिरियज्ञस्त्वयंतस्माद्गोयज्ञश्चप्रवर्त्यताम् । किम स्माकंमहेंद्रेणगावःशैलाश्चदेवताः ३६ मंत्रयज्ञपराविप्राःसीरयज्ञाश्चकर्षकाः । गिरिगोयज्ञशीलाश्चवयमद्रिवनाश्रयाः ३७ तस्माद्गोवर्धनःशैलो भवद्भिर्विविधार्हणैः । अर्च्यतांपूज्यतांमेध्यंपशुंहत्वाविधानतः ३८ सर्वघोषस्यसंदोहोगृह्यतांमाविचार्यताम् । भोज्यंतांतेनवैविप्रास्तथायेचाभिवा ञ्छकाः ३९ तमर्चितंकृतेहोमेभोजितेषुद्विजातिषु । शरत्पुष्पकृतापीडाःपरिगच्छंतुगोगणाः ४० एवंममतंगोपाःसंप्रोत्याक्रियतेयदि । ततः कृताभवेत्प्रीतिर्गवामद्रेस्तथामम ।४१। । पराशरउवाच । । इतितस्यवचःश्रुत्वानंदाद्यास्तेव्रजौकसः । प्रीत्युत्फुल्लमुखाविप्रसाधुसा ध्वित्यथाब्रुवन् ४२ शोभनंतेमतंवत्सयदेतद्भवतोदितम् । तत्करिष्यामहेसर्वेगिरियज्ञःप्रवर्त्यताम् ४३ तथाचकृतवंतस्तेगिरियज्ञंव्रजौकसः । दधिपायसमांसाद्यैर्ददुःशैलबलिंततः ४४ द्विजांश्चभोजयामासुःशतशोऽथसहस्रशः । गावःशैलंततश्चक्रुश्चार्चितास्ताःप्रदक्षिणम् ४५ वृषभा श्चातिनर्दंतःसतोयाजलदाइव । गिरिमूर्धनिकृष्णोऽपिशैलोऽहमितिमूर्तिमान् ४६ बुभुजेऽन्नंबहुविधंगोपपर्याहृतंद्विज । तेनैवकृष्णोरूपेणगोपैः

३३ गिरीणामचेतनानांकथंरक्षकत्वंपूज्यत्वंचेत्यतआह श्रूयतइति ३४ प्रत्युतगिरींन्विहायशक्रपूजायामनर्थसंभावनेत्याह यदाचेति तेमहीधराः येऽपराध्यंतेतान् ३५ युक्तिमुक्त्वापू ज्यत्वमुपसंहरति इंद्रपूजाप्यस्तुनेत्याह किमिति ३६ तदेवदृष्टांतगर्भेणवचसानिर्धारयति मंत्रेति मंत्रस्तत्प्रकाशितदेवोवातस्ययज्ञपराविप्रामंत्रालंबनत्वात् सीरयज्ञपराश्चकर्षकायथातथा वयमपिगिरिगोयज्ञशीलाएव ३७ ३८ सर्वघोषस्यसंदोहःसम्यग्दोहभवक्षीरादिगृह्यताम्३९तमद्रिंशरत्पुष्पैःकृतआपीडोभूषायेषांतेपरिगच्छंतुप्रदक्षिणीकुर्वंतु ४० ४१ ४२ सर्वा न्प्रत्याहुः गिरियज्ञःप्रवर्त्यतामिति ४३ ४४ ४५ सतोयाजलदाइवेतिगंभीरध्वनिमात्रेदृष्टांतः शैलोऽहमितिस्वमूर्तिभेददर्शनमिंद्रतोवैलक्षण्येनगोपानांभक्त्यतिशयार्थम् ४६ तेनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वरूपेणतांमूर्तिमर्चितवान् ४७ लब्ध्वावरानित्युक्त्वाच्छैलरूपेणवरोदत्तइतिगम्यते ४८ इतिविष्णुपुराणेवैष्णवाकूतचंद्रिकायांपंचमेअंशेदशमोध्यायः १० ॥ मखभंगरुषाश
क्राद्रजभंगायवर्षणम् एकादशेततस्त्राणंगोवर्धनधृतोच्यते १ संवर्तकंसंहारकम् १ २ कृष्णाश्रयएवबलंतेनध्मातःइतिवदुत्सिक्तः अचीकरत्कृतवान् ३ आजीवोजीवनोपायः गोपत्व
स्यचहेतुर्यागावस्ताःपीड्यंतां गावःकथंपीडनीयाइतिचेत्तत्राह वचनान्ममेति ४ वाय्वंबुनोरुत्सर्गेणयोजितंसंबद्धंसाहाय्यंअहमापिसाक्षाद्वातवृष्टीःकरिष्यामीत्यर्थः ५ ६ धाराणांमह

सहगिरेःशिरः । अधिरुह्यार्चयामासद्वितीयामात्मनस्तनुम् ४७ अंतर्धानंगतेतस्मिन्गोपालब्ध्वाततोवरान् । कृत्वागिरिमहंगोष्ठंनिजमभ्याययुः
पुनः । ४८ । । इतिश्रीविष्णुपुराणेपंचमेअंशेदशमोध्यायः । १० । । पराशरउवाच । । महेप्रतिहतेशक्रोमैत्रेयातिरुषान्वितः । सं
वर्तकंनामगणंतोयदानामथाब्रवीत् १ भोभोमेघानिशम्येतद्वदतोवचनंमम । आज्ञानंतरमेवाशुक्रियतांमाविचार्यताम् २ नंदगोपःसुदुर्बुद्धिर्गोपैर
न्यैःसहायवान् । कृष्णाश्रयबलाध्मातोमहभंगमचीकरत् ३ आजीवोयःपरस्तेषांगोपत्वस्यचकारणम् । तागावोवृष्टिवातेनपीड्यंतांवचनान्मम ४
अहमप्यद्रिशृंगाभंतुंगमारुह्यवारणम् । साहाय्यंवःकरिष्यामिवाय्वंबूत्सर्गयोजितम् ५ । । पराशरउवाच । । इत्याज्ञप्ताःसुरेंद्रेणमुमुचु
स्तेबलाहकाः । वातवर्षंमहाभीममभावायगवांद्विज ६ ततःक्षणेनधरणीककुभोंबरमेवच । एवंधारामहासारपूरणेनाभवन्मुने ७ विद्युल्लताकशापा
तत्रस्तैरिवघनैर्घनम् । नादापूरितदिक्कैर्धारासारमपात्यत ८ अंधकारीकृतेलोकेवर्षद्भिरनिशंघनैः । अधश्चोर्ध्वंचतिर्यक्कजगदाप्यमिवाभवत् ९
गावश्चानेनपततावर्षवातेनवेगिना । धुताःप्राणाञ्जहुःसन्नत्रिकसक्थिशिरोधराः १० क्रोडेनवत्सानाक्रम्यतस्थुरन्यामहामुने । गावोविवत्सा
श्चकृतावारिपूरेणचापराः ११ वत्साश्चदीनवदनाःपवनाकंपिकंधराः । त्राहित्राहीत्यल्पशब्दाःकृष्णमूचुरिवार्तकाः १२ ततस्तद्गोकुलंसर्वंगोपी
गोपजनाकुलम् । अतीवार्तंहरिर्दृष्ट्वामैत्रेयाचिंतयत्तदा १३ एतत्कृतंमहेंद्रेणमहभंगविरोधिना । तदेतदखिलंगोष्ठंत्रातव्यमधुनामया १४ इमम
द्रिमहंधैर्यादुत्पाट्योरुशिलातलम् । धारयिष्यामिगोष्ठस्यपृथुच्छत्रमिवोपरि १५ । । पराशरउवाच । । इतिकृत्वामतिंकृष्णोगोवर्धनमहीधर

सारःसंपातःतेनपूरणेनाधिक्येनधरण्यादिकमेकमभवत्सर्वंजलमयमभूदित्यर्थः ७ विद्युल्लतैवकशातस्याःपातेनवातेनत्रस्तैरिव ततएवनादेनापूरितंदिशांचक्रंयैः तथाभूतैर्घनैर्घनंनिबिडंयथा
स्यादेवंधाराणांसारंश्रेष्ठंवर्षमपात्यतप्रसारितम् यद्वाकरिवृंहितन्यायेनधाराणामासारंसंपातःअपात्यताऽक्रियत उभयत्रापिछीबत्वमार्षम् इयमुत्प्रेक्षा तेनयथालोकेकशापातत्रस्तैर्जनैःक्रोश
द्भिर्निगूढमपिसर्वस्वंनिपात्यते किंवासदश्वैरेवकशात्रस्तैःप्रस्वेदप्रवाहोनिपात्यतेयथातद्वदित्यर्थः ८ आप्यमम्मयमिवजगदभवत् ९ धुताः कंपिताःसन्नाअवसन्नाःत्रिकंकटिःसक्थिऊरुः
शिरोधराकंधराचयासांताःप्राणाञ्जहुः १० क्रोडेनकुक्षिणाआक्रम्याच्छाद्यतस्थुः ११ पवनेनाकंपिन्यःकंधरायेषांते अल्पशब्दस्त्राहीतिकृष्णमूचुरिव स्वत्कृतापराधजमिदंत्वयैवनिवर्तनीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितिभावः १२ १३ महभंगाद्विरोधिनाप्रतिकूलेनसता १४ धैर्याद्बलादुरुशिलातलंमहाशिलास्वरूपम् शिलाघनमितिपाठेशिलाभिर्घनंसाद्रम् १५ १६ १७ यथाजोषंयथासुखं इहगिरिगर्तेप्रविश्यास्यताम् निर्भयैर्वातवर्षभयरहितैःगिरिपातस्यममहस्ततोगिरिपाताच्चनभेतव्यम् १८ १९ व्रजौकवासिभिरितिपाठेओकःशब्दसलोपश्छांदसः व्रजैकवासिभिरीतिपाठे व्रजएकस्मिन्वस्तुंशीलंयेषांतैः २० २१ २२ ततोवलभिर्दिंद्रोघनान्वारयामासेत्यन्वयः २३ वितथोमिथ्याभूतोर्थोयस्यतथाभूतंवचोयस्यतथाभूतेदेवेंद्रेसति २४ व्रजौकसैर्व्रजौको

म् । उत्पाट्यैककरेणैवधारयामासलीलया १६ गोपांश्चाहजगन्नाथःसमुत्पाटितभूधरः । विशध्वमत्रसहिताःकृतंवर्षनिवारणम् १७ सुनिर्वातेषुदेशेषुयथाजोषमिहास्यताम् । प्रविश्यनात्रभेतव्यंगिरिपातस्यनिर्भयैः १८ इत्युक्तास्तेनतेगोपाविविशुर्गोधनैःसह । शकटारोपितैर्भांडैर्गोप्यश्चासारपीडिताः १९ कृष्णोपितंदधारैवंशैलमत्यंतनिश्चलम् । व्रजौकोवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः २० गोपगोपीजनैर्हृष्टैःप्रीतिविस्तारितेक्षणैः । संस्तूयमानचरितःकृष्णःशैलमधारयत् २१ सप्तरात्रंमहामेघावृषुर्नंदगोकुले । इंद्रेणचोदिताविप्रगोपानांनाशकारिणा २२ ततोधृतेमहाशैलेपरित्रातेचगोकुले । मिथ्याप्रतिज्ञोबलभिद्वारयामासतान्घनान् २३ व्यभ्रेनभसिदेवेंद्रेवितथार्थवचस्यथ । निष्क्रम्यगोकुलंकृष्णःस्वस्थानंपुनरागमत् २४ मुमोचकृष्णोऽपितदागोवर्धनमहागिरिम् । स्वस्थानेविस्मितमुखैर्दृष्टस्तैस्तुव्रजौकसैः २५ । । इतिश्रीविष्णुपुराणेपंचमेअंशेएकादशोध्यायः ११ । । पराशरउवाच । । धृतेगोवर्धनेशैलेपरित्रातेचगोकुले । रोचयामासकृष्णस्यदर्शनंपाकशासनः ३ सोधिरुह्यमहानागमैरावतममित्रजित् । गोवर्धनगिरौकृष्णोददर्शत्रिदशेश्वरः २ चारयंतंमहावीर्यंगाश्चगोपवपुर्धरम् । कृत्स्नस्यजगतोगोपंवृतंगोपकुमारकैः ३ गरुडंचददर्शोच्चैरंतर्धानगतंद्विज । कृतच्छायंहरेर्मूर्ध्निपक्षाभ्यांपक्षिपुंगवम् ४ अवरुह्यसनागेंद्रादेकांतेमधुसूदनम् । शक्रःसंमितमाहेदंप्रीतिविस्फुरितेक्षणः ५ कृष्णकृष्णशृणुष्वेदंयदर्थमहमागतः । त्वत्समीपंमहाभागनैतच्चिंत्यंत्वयान्यथा ६ भारावतारणार्थायपृथिव्याःपृथिवीतलम् । अवतीर्णोखिलाधारस्त्वमेवपरमेश्वरः ७ महभंगविरुद्धेनमयागोकुलनाशकाः । समादिष्टामहामेघास्तैश्चैतत्कदनंकृतम् ८ त्राताःस्तायत्त्वयागावःसमुत्पाट्यमहागिरिम् । तेनाहंतोषितोवीरमर्मणात्यद्भुतेनते ९ साधितंकृष्णदेवानामद्यमन्येप्रयोजनम् । त्वयायमद्रिप्रवरःकरेणै

भिः २५ क्वचिदत्राध्यायोनास्ति इतिवैष्णवाकूतचंद्रिकायांपंचमेअंशेएकादशोध्यायः ११ गोभिःसहेंद्रोगोविंदमुपेंद्रत्वेभिषिक्तवान् रक्षार्थमिहकृष्णोपिन्यासविष्णुरितीर्यते रोचयामासइच्छितवान् १ २ गोपंपालकम् ३ ४ ५ अन्यथाविरोधितयाएतन्मदागमनंनाचिंत्यम् यद्वाइदंश्रुत्वाचतदन्यथामिथ्येतिनाचिंत्यंनमंतव्यम् ६ स्वकार्यंनिवेदयिष्यन्श्रीकृष्णस्यऐश्वर्यमभिनंदति भारावतारणेत्तिचतुर्भिः ७ ८ तेनमहागिरिधारणेनाहंतोषितएव नतुमेविप्रियंकृतम् ९ तत्रहेतुमाह साधितमिति १० प्रस्तुतमाह गोभिरिति गोभिर्गोकुलस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिःसुरभ्यादिभिस्त्वयात्राताभिः ११ उपेंद्रत्वेसत्यलोकेश्वरत्वे निरुक्तंचैतद्धरिवंशे ममोपरियथेंद्रस्त्वंस्थापितोगोभिरीश्वरःउपेंद्रइतिलोकेत्वांगास्यंतिदिविदेवताइति अतएवगवामिंद्रेतिव्युत्प त्त्यागोविंदस्त्वंभविष्यसि १२ उपवाह्याद्राजवाहनात् १३ प्रस्नवःस्तन्यस्त्रावस्तेनोद्गतदुग्धैरार्द्रांवसुंधरांचक्रुःताअपिदुग्धैरभिषेकंचक्रुरित्यर्थः १४ १५ १६ १७ साह्यंसाहाय्यं स चरक्षणीयः यथालोकेनस्वात्मारक्ष्यतेतद्वत् १८ १९ यावत्स्थास्यामिभूतलइत्यादिवाक्यस्यगोपैःपराभवोभावीतिभावः २० २१ महाहवः भारतयुद्धम् भारावतरणंकृतंआवाभ्यामि

केनयद्धृतः १० गोभिश्चचोदितःकृष्णत्वत्सकाशमिहागतः । त्वयात्राताभिरत्यर्थंयुष्मत्सत्कारकारणात् ११ सत्वांकृष्णाभिषेक्ष्यामिगवांवाक्यप्र चोदितः । उपेंद्रत्वेगवामिंद्रोगोविंदस्त्वंभविष्यसि १२ । । पराशरउवाच । । अथोपवाह्यादादायघंटामैरावताद्गजात् । अभिषेकंतयाचक्रेप वित्रजलपूर्णया १३ क्रियमाणेभिषेकेतुगावःकृष्णस्यतत्क्षणात् । प्रस्नवोद्गतदुग्धार्द्रांसद्यश्चक्रुर्वसुंधराम् १४ अभिषिच्यगवांवाक्याद्देवेंद्रोवैजनार्द नम् । प्रीत्यासप्रश्रयंकृष्णंपुनराहशचीपतिः १५ गवामेतत्कृतंवाक्यंतथान्यदपिमेशृणु । यद्ब्रवीमिमहाभागभारावतरणेच्छया १६ ममांशःपुरुष व्याघ्रपृथायांपृथिवीधर । अवतीर्णोर्जुनोनामसरक्ष्योभवतासदा १७ भारावतारणेसाह्यंसतेवीरःकरिष्यति । सरक्षणीयोभवतायथात्मामधुसूद न १८ । । श्रीभगवानुवाच । । जानामिभारतेवंशेजातंपार्थंतवांशकम् । तमहंपाललिष्यामियावदस्मिमहीतले १९ यावन्महीतले शक्रस्थास्याम्यहमरिंदम । नतावदर्जुनंकश्चिद्देवेंद्रयुधिजेष्यति २० कंसोनाममहाबाहुर्दैत्योरिष्टस्तथापरः । केशीकुवलयापीडोनरकाद्यास्तथा परे २१ हतेष्वेतेषुदेवेंद्रभविष्यतिमहाहवः । तत्रविद्धिसहस्राक्षभारावतरणंकृतम् २२ सत्वंगच्छनसंतापंपुत्रार्थेकर्तुमर्हसि । नार्जुनस्यारिपुः कश्चिन्ममाग्रेप्रभविष्यति २३ अर्जुनार्थेत्वहंसर्वान्युधिष्ठिरपुरोगमान् । निवृत्तेभारतेयुद्धेकुंत्यादास्याम्यविक्षतान् २४ पराशरउवाच । इत्यु क्तःसंपरिष्वज्यदेवराजोजनार्दनम् । आरुह्यैरावतंनागंपुनरेवदिवंययौ २५ कृष्णोऽपिसहितोगोभिर्गोपालैश्चपुनर्व्रजम् । आजगामसगोपीनांहृष्टि पूतेनवर्त्मना २६ । । इतिश्रीविष्णुपुराणेपंचमेअंशेद्वादशोध्यायः । । १२ । । पराशरउवाच । । गतेशक्रेतुगोपालाःकृष्णमक्लिष्टकारि णम् । ऊचुःप्रीत्याधृतंदृष्ट्वातेनगोवर्धनाचलम् १ वयमस्मान्महाभागभवतामहतोभयात् । गावश्चभवतात्रातागिरिधारणकर्मणा २ बालक्रीडेयमतु

तिशेषः २२ २३ अविक्षताञ्शस्त्राऽछिन्नांगान् २४ २५ दृष्टिपूतेनकृष्णःकदासमेष्यतीतिभावनयैवदृष्ट्यापूतेनअतोगोपीनामौत्सुक्याद्रासोत्सवः २६ इतिश्रीविष्णुपुराणेवैष्णवाकू तचंद्रिकायांद्वादशोध्यायः १२ तत्त्वंविविदिषून्गोपान्प्रेमकोपान्निरस्यता कृष्णेनरासोगोपीभिःसप्रपंचमिहोच्यते १ भवतामखभंगंकुर्वतानिमित्तेनयद्भयंतस्मात् यद्वाभवता जायमानेनवयंगावश्चभवतात्राताइत्यन्वयः २ बालक्रीडेयंबहिंपत्रेत्याद्युक्तापूतनावधादिरूपावा दिव्यमलौकिकंकर्म ३ तदेवाह कालियइति प्रलंबोविनिपातितइत्यत्रणिजंतात्तुक्तः ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमाहात्म्यस्मारणाद्बलभद्रेणद्वाराप्रयोज्यकर्त्रात्वयाविनिपातितइत्यर्थः एतद्विलक्षणदर्शनाच्छंकितानि ४ पादौपादाभ्यांशपामः ५ शंकायांकारणान्युक्तातान्येवद्रढयतिप्रीतिरिति सर्वस्य व्रजस्यापिप्रीतिर्विशेषतःसर्वात्मत्वशंकांकरोतीत्यर्थः ६ ७ ८ इत्येवमुक्तःक्षणंतूष्णींभूत्वावि वार्यतान्प्राहेत्यन्वयः ९ देवाद्यन्यतमत्वेउक्तेबंधुसुखंगोपानांनभवति मनुष्योयमित्युक्तेऽसं भावनेत्यतोवस्तुतत्वाच्चमुग्धवद्बंधुत्वमेवाह मत्संबंधेनेतित्रिभिः १० यद्वीति अत्रपांक्तोर्थोव्यक्तएव वास्तवोर्थस्त्वयंमत्संबंधेनअहंकारसंबंधेनैवयदिवोलज्जाजुगुप्सावैराग्यंनजायतेकिंतुअ हंवाअहमेवश्लाघ्यइत्यभिमानस्तदाविचारेणप्रकृतिपुरुषविवेकेनाधिकारिसाध्येनयुष्माकंकिं नकिमपि किंतुयदिमयिश्रीकृष्णेभवतांनिरुपाधिप्रीतिर्यदिचश्लाघ्यःसर्वोत्कृष्टोहमितिमयिबुद्धि

लागोपालत्वंजुगुप्सितम् । दिव्यंचकर्मभवतःकिमेतत्तातकथ्यताम् ३ कालियोदमितस्तोयेप्रलंबोविनिपातितः । धृतोगोवर्धनश्चायंशंकितानिमनां सिनः ४ सत्यंसत्यंहरेःपादौशपामोऽमितविक्रमायथात्वद्वीर्यमालोक्यनत्वांमन्यामहेनरम् ५ प्रीतिःसस्त्रीकुमारस्यव्रजस्यतवकेशव । कर्मचेदमश क्यंयत्समस्तैस्त्रिदशैरपि ६ बालत्वंचातिवीर्यंचजन्मचास्मास्वशोभनम् । चिंत्यमानममेयात्मञ्शंकाकृष्णंप्रयच्छति ७ देवोवादानवोवात्वंयक्षोगं धर्वएवच । किंचास्माकंविचारेणबांधवोऽसिनमोऽस्तुते ८ क्षणंभूत्वातसौतूष्णींकिंचित्प्रणयकोपवान् । इत्येवमुक्तस्तैर्गोपैराहकृष्णोमहामुने ९ मत्संबंधेनभोगोपायदिलज्जानजायते । श्लाघ्यश्चाहंततःकिंवोविचारेणप्रयोजनम् १० यदिवोऽस्तिमयिप्रीतिःश्लाघ्योहंभवतांयदि । तदात्मबंधुस दृशीबुद्धिर्वःक्रियतांमयि ११ नाहंदेवोनगंधर्वोनयक्षोनचदानवः । अहंवोबांधवोजातोनातश्चिंत्योहमन्यथा १२ इतिश्रुत्वाहरेर्वाक्यंबद्धमौनास्ततो व्रजम् । ययुर्गोपामहाभागतस्मिन्प्रणयकोपिनि १३ कृष्णस्तुविमलंव्योमशरच्चंद्रस्यचंद्रिकाम् । तथाकुमुदिनींफुल्लामामोदितदिगंतरम् १४ वनरा जींतथाकूजद्भृंगमालामनोरमाम् । विलोक्यसहगोपीभिर्मनश्चक्ररतिंप्रति १५ सहरामेणमधुरमतीवललितंप्रियम् । जगौकलपदंशौरिर्नामतत्रकृतव्र तः १६ रम्यंगीतध्वनिंश्रुत्वासंत्यज्यावसथांस्तदा । आजग्मुस्त्वरितागोप्योयत्रास्तेमधुसूदनः १७ शनैःशनैर्जगौगोपीकाचित्तत्रलयानुगम् । द त्तावसानाकाचिच्चतमेवमनसास्मरत् १८ काचित्कृष्णेतिकृष्णेतिप्रोक्तालज्जामुपाययौ।ययौचकाचित्प्रेमांधातत्पार्श्वमविलज्जिता १९ काचिदावसथस्यां

स्तदाआत्मनोबंधुःपरमेश्वरस्तत्सदृशीपरमप्रेमास्पदबुद्धिर्मायिक्रियताम् यतोहंबांधवोतर्यान्येवजातआविर्भूतोस्मिनदेवादिरूपइति तदार्चाबंधुसदृशीबांधवाइतिपाठेऽर्चाभक्तिर्बंधुरंतर्या मीत्यर्थः ११ १२ प्रणयःस्नेहस्तेनकोपिनि १३ १४ १५ इदानींरासोत्सवार्थंगोपीःसंमेलयिष्यञ्जगावित्याह सहरामेणेति कलपदंअव्यक्तमधुराक्षरम् शौरिःकृष्णः नामप्रकाश्येन गोकुलेकृतंव्रतंस्वरनियमोयेनसः इत्थंवादितेएवंबोद्धव्यमितिकृतसंकेतइत्यर्थः तारमंद्रकृतक्रममितिपाठेतारमंद्राभ्यामुच्चोपांशुध्वनिभ्यांकृतःक्रमःयथोक्तपूर्वापरभावोयत्रगानइत्यर्थःअत्रै वपाठांतराणिविस्तरभयात्त्यक्तानि १६ आवसथान्गृहान् १७ लयानुगमितिद्रुतमध्यविलंबिताख्यत्रिलयात्मकतालविश्रांतिकालानुगम् तदुक्तम् तालांतरानुवर्तीयःकालोसौलयनंलयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लयानुगेतिपाठेगोपीविशेषणम् १८ १९ अन्याकाचिद्गोपकन्यकाआवसथस्यांतःस्थितावहिर्गुरुंश्वशुरादिकंदृष्ट्वाअंतरेवस्थितासतीतन्मयत्वेनतदेकचित्तत्वेनगोविंदंदध्यौ २० ततश्च तच्चिंतयायोविपुलाह्लादस्तेनसर्वपुण्यफलरूपेणक्षीणःपुण्यचयोयस्याः पूर्वंतुतदप्राप्तिमहादुःखेनविलीनमशेषपातकंयस्याःसा २१ ततश्चवस्तुतोजगत्सूतिरुत्पत्तिर्यस्मात्तंपरब्रह्मस्वरूपि णंकृष्णंकांतबुद्ध्यापिचिंतयंतीमुक्तिंप्राप्तेतित्रयाणामन्वयः पूर्वंसंचिताशेषपुण्यपापयोर्भोगेनक्षयेसतिभगवद्ध्यानमहिम्नासंजातात्मसाक्षात्कारान्मुक्तिमवापेत्यर्थः गोप्यःकामाद्भयात्कंसोद्वे षाच्चैद्यादयोनृपाइतिभागवतोक्तेः २२ रासारंभस्ययोरसोरागस्तेनोत्सुकोरजनींमानयामास तत्रेरेमेइत्यर्थः अन्योन्यव्यतिषक्तहस्तानांस्त्रीपुरुषाणांमंडलीभूयभ्रमतांनृत्यविनोदोरासोनाम उक्तंचभरतेन अनेकनर्तकीयोग्यंचित्तताललयान्वितम् आचतुःषष्टियुग्मत्वाद्रासकंमसृणोद्धतमिति २३ कृष्णेअन्यदेशगतेसतिकृष्णचेष्टासुआयत्तास्तदनुकारिण्यःमूर्तयोयासांताःकृष्णा

तःस्थितादृष्ट्वाबहिर्गुरुम् । तन्मयत्वेनगोविंदंदध्यौमीलितलोचना २० तच्चिंताविपुलाल्हादक्षीणपुण्यचयातथा । तदप्राप्तिमहादुःखविलीनाशेष पातका २१ चिंतयंतीजगत्सूतिंपरब्रह्मस्वरूपिणम् । निरुच्छ्वासतयामुक्तिंगतान्यागोपकन्यका २२ गोपीपरिवृतोरात्रिंशरच्चंद्रमनोरमाम् । मान यामासगोविंदोरासारंभरसोत्सुकः २३ गोप्यश्चवृंदशःकृष्णचेष्टास्वायत्तमूर्तयः । अन्यदेशगतेकृष्णेचेरुर्वृंदावनांतरम् २४ कृष्णोऽहमेतल्ललितंव्र जाम्यालोक्यतांगतिः । अन्याब्रवीतिकृष्णस्यममगीतिर्निशम्यताम् २५ दुष्टकालियतिष्ठात्रकृष्णोऽहमितिचापरा । बाहुमास्फोट्यकृष्णस्यलीलास र्वस्वमाददे २६ अन्याब्रवीतिभोगोपानिःशंकंस्थीयतामिति । अलंवृष्टिभयेनात्रधृतोगोवर्धनोमया २७ धेनुकोऽयंमयाक्षिप्तोविचरंतुयथेच्छया । गा वोब्रवीतिचैवान्याकृष्णलीलानुकारिणी २८ एवंनानाप्रकारासुकृष्णचेष्टासुतास्तदा । गोप्योव्यग्राःसमंचेरूरम्यंवृंदावनंवनम् २९ विलोक्यैकाभु वंप्राहगोप्योगोपवरांगना । पुलकाचितसर्वांगीविकासिनयनोत्पला ३० ध्वजवज्रांकुशांकाब्जरेखावंत्यालिपश्यत । पदान्येतानिकृष्णस्यलीलालंकृत गामिनः ३१ कापितेनसमंयाताकृतपुण्यमदालसा । पदानितस्याश्चैतानिघनान्यल्पतनूनिच ३२ पुष्पावचयमात्रोच्चैश्चक्रेदामोदरोध्रुवम् । येना ग्राक्रांतिमात्राणिपदान्यत्रमहात्मनः ३३ अत्रोपविश्यसातेनकापिपुष्पैरलंकृता । अन्यजन्मनिसर्वात्माविष्णुरभ्यर्चितोतया ३४ पुष्पबंधनसंमा

न्वेषणपरावृंदावनांतरंविचेरुः २४ कृष्णचेष्टाएवाह कृष्णोहमितिपंचभिः यदिकृष्णमन्विष्यथतर्हिअहमेवकृष्णोममगतिर्विलोक्यताम् २५ कृष्णलीलासर्वस्वंश्रेष्ठंप्रियानुकरणम् यदु क्तम् सुकुमारांगविन्यासामसृणोललितंभवेत् प्रियानुकरणंलीलामधुरांगविचेष्टितैरिति २६ २७गावोयथेच्छयाविचरंत्वितिकाचिद्ब्रवीतीत्यन्वयः २८व्यग्राउत्सुकाः २९अन्वेषणप्रकारानाह विलोक्येतिदशभिः पुलकैराचितंव्याप्तंसर्वांगंयस्याःसा एकाभुवंविलोक्यप्राह हेगोप्यःहेआलिहेसखि एकवचनमार्षम् कृष्णपदानिपश्यतेतिद्वयोरन्वयः यद्वागोपीप्राहअलिपश्येत्युभय त्रव्यत्ययः कामसंमूढानांविरुद्धप्रयोगानुकरणंवा किंविशिष्टानिपदानिध्वजवज्रांकुशरेखावंतिध्वजाद्यंकाश्चाब्जरेखाचतद्वंतिध्वजवज्रांकुशाब्जांकरेखावंतीतिपाठेअंकमाकारःलीलयाअ लंकृतंयथाभवतिएवंगमनशीलस्य ३० ३१ घनानिमंथरगामित्वादल्पांतराणि अल्पतनूनिस्त्रीपदत्वाद्ह्रस्वाणिअपृथूनिच एतानिस्त्रीपदचिह्नानि ३२ उच्चैःऊर्ध्वीभूय पुष्पावचयस्यचिह्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माह येनेति अग्रेणप्रपदेनैवाक्रांतिमात्रंयेषुतानिपदचिह्नानि ३३ मृदितस्थलपतितपुष्पादिदृष्ट्यात्रोपविश्येत्यनुमानम् ३४ पुष्पबंधनेनकृतोमानोगर्वोययातामपास्यत्यक्त्वा ३५अन्यस्याः पदानिकल्पयंति अनुयानेइति अनुयानेनुगमनेर्थात्कृष्णस्य नितंबभरेणमंथरास्थरागंतव्येपुरतोगच्छंतंकृष्णंप्रातुंशीघ्रंगमनेकर्तव्येद्रुतंयाति तत्रलिंगंनिम्नैःसंस्थितिरवलंबनंयस्याःसा अनुयातेतिपाठेगोपीविशेषणम् ३६ कृष्णस्यहस्तेन्यस्तोऽग्रहस्तोहस्ताग्रंययासेयंतेनकृष्णेनसहयातितत्रलिंगंअनायत्ताअनात्माधीनाःपदन्यासायस्यांतादृशीपदपद्धतिर्लक्ष्यते ३७ हस्तसंस्पर्शमात्रेणहस्तग्रहणमात्रंकृत्वाधूर्तेनशठेनएषाविमानिताअवमानिताअनयासहनरेमइत्यर्थः अतोनैराश्यादस्याःपदंनिवृत्तंव्यावृत्तंलक्ष्यते ३८ नूनामिति रतोचितंनिभृतंनिकुंजानिद्रष्टुमहंत्वरेत द्दष्ट्वात्वांनेतुंपुनरेष्यामीतिनूनंकृष्णेनेयमुक्तायेनकृष्णस्यपदपद्धतिःपदपंक्तिरेषात्वरिताशीघ्रानिम्नादृश्यते ३९ कृष्णान्वेषणनिवृत्तिमाह प्रविष्टइतिद्वाभ्याम् गहनंदुर्गवनम् अतएवएतत्कृष्णप

नकृतमानामपास्यताम्।नंदेगोपसुतोयातोमार्गेणानेनपश्यत ३५ अनुयानेसमंचान्यानितंबभरमंथरा। यागंतव्येद्रुतंयातिनिम्नपादाग्रसंस्थितिः३६ हस्तन्यस्ताग्रहस्तेयंतेनयातितथासखि । अनायत्तपदन्यासालक्ष्यतेपदपद्धतिः ३७ हस्तसंस्पर्शमात्रेणधूर्तेनैषाविमानिता । नैराश्यान्मंदगामिन्यानिवृत्तंलक्ष्यतेपदम् ३८ नूनमुक्तात्वरामीतिपुनरेष्यामितेंतिकम् । तेनकृष्णेनयेनैषात्वरितापदपद्धतिः ३९ प्रविष्टोवाहनंकृष्णःपदमत्रनलक्ष्यते । निवर्तध्वंशशांकस्यनैतद्दीधितिगोचरे ४० निवृत्तास्तास्ततोगोप्योनिराशाःकृष्णदर्शने । यमुनातीरमागम्यजगुस्तच्चरितंतदा ४१ ततो ददृशुरायांतंविकासिमुखपंकजाः । गोप्यस्त्रैलोक्यगोप्तारंकृष्णमक्लिष्टचेष्टितम् ४२ काचिदालोक्यगोविंदमायांतमतिहर्षिता । कृष्णकृष्णेतिकृष्णेतिप्राहनान्यदुदैरयत् ४३ काचिद्भ्रूभंगुरंकृत्वाललाटफलकंहरिम् । विलोक्यनेत्रभृंगाभ्यांपपौतन्मुखपंकजम् ४४ काचिदालोक्यगोविंदंनिमीलितविलोचना । तस्यैवरूपंध्यायंतीयोगारूढेवलक्ष्यते ४५ ततःकाश्चित्प्रियालापैःकाश्चिद्भ्रूभंगवीक्षितैः । निन्येऽनुनयमन्याश्चकरस्पर्शेनमाधवः ४६ ताभिःप्रसन्नचित्ताभिर्गोपीभिःसहसादरम् । ररामरासगोष्ठीभिरुदारचरितोहरिः ४७ रासमंडलबंधोपिकृष्णपार्श्वमनुज्झता । गोपीजनेननैवाभूदेकस्थानस्थितात्मना ४८ हस्तेप्रगृह्यचैकैकांगोपिकांरासमंडलीम् । चकारतत्करस्पर्शनिमीलितदृशंहरिः ४९ ततःप्रववृतेरम्याचलद्वलय

दंदीधितीनांरश्मीनांगोचरेविषयेनभवतिरश्म्यभावान्नपदंलक्ष्यतइत्यर्थः ४० ४१ तादात्म्यभावनाभिर्योगोपीभिर्नविलोकितः सएवचरिताख्यानैराविरासरमापतिः गोपीनांकृष्णदर्शनमहोत्सवमाह ततइतिचतुर्भिः४२ काचित्कीर्तनैकलभ्यंहरिंज्ञात्वाकृष्णकृष्णेत्यावृत्त्याप्राह नान्यदुदैरयदुक्तवती४३ काचित्प्रणयकोपेनचलिताभ्यांभ्रूभ्यांभंगुरमाकुंचितंललाटफलकंकृत्वा हरिंविलोक्यनेत्रभृंगाभ्यांतस्यमुखपंकजंपपौ ४४ काचिद्गोविंदंविलोक्यनेत्रद्वारेणतमंतःप्रवेश्यपुनर्निर्गमोमास्त्वितीवनिमीलितविलोचनाध्यायंतीयोगारूढेवलक्ष्यते ४५ इदानींगोपीनामनुनयपूर्वकंताभिःसहरासक्रीडामाह ततइत्यादिनाक्षपिताहिताइत्यंतेन अनुनयंनिन्येसांत्वयामास ४६ ४७ रासमंडलबंधोपीति कृष्णपार्श्वमनुज्झताएकस्मिंस्थानेकृष्णपार्श्वएवस्थितआत्मामनोदेहश्चयस्यतेनदेहताश्चित्ततोपिश्रीकृष्णनिकटमात्रवर्तिनागोपीजनेनरासमंडलबंधश्चिकीर्षितोपिनैवाभूत् ४८ तथापिहरिर्यथारासमंडलंकृतवान्तदाहंहस्तेप्रगृह्येति मध्यवर्तीहरिरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वीकृतंलांगूलंयेन कठिनंस्कंधबंधनंग्रीवासंस्थानंयस्य ३ उदग्रस्यउच्छ्रितस्यककुदोगलपृष्ठभंगस्याभोगोविस्तारोयस्य प्रमाणाद्दुरतिक्रमोऽन्यैरलंघनीयः ४ ५ ६ ७ अग्रेन्यस्तेविषाणाग्रेयेन कृष्णकुक्षौकृतेईक्षणेयेन ८ ९ अवज्ञास्मितमेवलीलातयोपलक्षितोनच चाल जग्राह च १० विषाणग्रहणेनाबलम् ११ छिन्नंसजलंवस्त्रमिव १२ १३ १४ इतिश्रीवि॰

यन्सगवांगर्भान्दैत्योवृषभरूपधृक् ५ सूदयंस्तापसानुग्रान्वनान्यटतियःसदा। ततस्तमतिघोराक्षमवेक्ष्यातिभयंकरम् ६ गोपागोपास्त्रियश्चैवकृष्ण कृष्णेतिचुक्रुशुः । सिंहनादंततश्चक्रेतलशब्दंचकेशवः ७ तच्छब्दश्रवणाच्चासौदामोदरमुखंययौ । अग्रन्यस्तविषाणाग्रःकृष्णकुक्षिकृतेक्षणः ८ अभ्यधावतदुष्टात्माकृष्णंवृषभदानवः । आयांतंदैत्यवृषभंदृष्ट्वाकृष्णोमहाबलः ९ नचचालतदास्थानादवज्ञास्मितलीलया । आसन्नंचैवजग्राह ग्राहवन्मधुसूदनः १० जघानजानुनाकुक्षौविषाणग्रहणाबलम् । तस्यदर्पबलंभंक्त्वागृहीतस्यविषाणयोः ११ अपीडयदरिष्टस्यकंठंछिन्नमिवांबरम् । उत्पाट्यशृंगमेकंतुतेनैवाताडयत्तदा १२ ममारसहसादैत्योमुखाच्छोणितमुद्वमन् । तुष्टुवुर्निहतेतस्मिन्दैत्येगोपाजनार्दनम् १३ जंभेहतेसहस्राक्षंपुरादेवगणोयथा १४ । । इतिश्रीविष्णुपुराणेपंचमेअंशेचतुर्दशोध्यायः । १४ । । पराशरउवाच । । ककुद्मिनिहतेदैत्येधेनुकेविनिपातिते । प्रलंबेनिधनंनीतेधृतेगोवर्धनाचले १ दमितेकालियेनागेभग्नेतुंगद्रुमद्वये । हतायांपूतनायांचशकटेपरिवर्तिते २ कंसायनारदःप्राहयथावृत्तमनुक्रमात् । यशोदादेवकीगर्भपरिवर्त्ताद्यशेषतः ३ श्रुत्वातत्सकलंकंसोनारदाद्देवदर्शनात् । वसुदेवंप्रतितदाकोपंचक्रेसदुर्मतिः ४ सतंकोपादुपालभ्यसर्वयादवसंसदि । जगर्हयादवांश्चैवकार्यंचैतदचिंतयत् ५ यावन्नबलमारूढौरामकृष्णौसुबालकौ । तावदेवमयावध्यावसाध्यौरूढयौवनौ ६ चाणूरोऽत्रमहावीर्योमुष्टिकश्चमहाबलः । एताभ्यांमल्लयुद्धेनघातयिष्यामिदुर्मदौ ७ धनुर्महमहायागव्याजेनानीयतौव्रजात् । तथातथायतिष्यामियास्येतेसंक्षयंयथा ८ श्वफल्कतनयंसोऽहमक्रूरंयदुपुंगवम् । तयोरानयनार्थायप्रेषयिष्यामिगोकुलम् ९ वृंदावनचरंघोरमादेक्ष्यामिचकेशिनम् । तत्रैवासावतिबलस्तावुभौघातयिष्यति १० गजःकुवलयापीडोमत्समीपमुपागतौ । घातयिष्यतिवागोपौवसुदेवसुतावुभौ । ११ । । पराशरउवाच । । इत्यालोक्यसदुष्टात्माकंसोरामजनार्दनौ । हंतुंकृतमतिर्वीरमक्रूरंवाक्यम

पंचमेअंशेचतुर्दशोध्यायः १४ ज्ञात्वाकंसेनदेवर्षेर्गर्भव्यत्यासनिह्नवम् उक्तंपंचदशेक्रूरप्रेषणंगोकुलंप्रति १ रासोत्सवादिकुतुकैर्विस्मृतंतुसुरोहितम् इतीवनारदेनेत्थंकंसद्वाराप्रबोधितम् २ श्रीकृष्णस्यगोकुलचरितमुक्त्वामथुराचरितंप्रस्तोतुमाह ककुद्मिनीतियावदध्यायसमाप्ति ककुद्मिनिवृषाकृतौदैत्ये १ २ देवकीयशोदयोर्गर्भयोरपत्ययोःपरिवर्तोव्यत्ययः ३ देवदर्शनाद्देवर्षेः ४ तंवसुदेवमुपालभ्यनिर्भर्त्स्य ५ कंसस्यमनोरथानाह यावदितिषड्भिः बलनारूढौप्राप्तबलौ ६ ७ ८ ९ वंदावनचरंकेशिनंदूतद्वाराआदेक्ष्यामियथासौतौघातयिष्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयतएकैवांहस्तेप्रगृह्यरासमंडलींचकार कृष्णस्पर्शनेननिमीलितेदृशौयस्यास्तांनिमीलितलोचनत्वान्ममैवहस्तंगृहीतवान्हरिरितिसर्वासामभिमानइतिभावः तदुक्तंभागवते रासोत्सवःसंप्रवृत्तोगोपीमंडलमंडितः योगेश्वरेणतन्मध्येप्रविष्टेनद्वयोर्द्वयोरिति रासमंडलेइतिवापाठः यद्वाउभयतःस्थितस्यकृष्णस्यपार्श्वमनुज्झताअतएवएकस्मिन्कृष्णपार्श्वएवास्थितात्मनानिश्चलचित्तेनरासमंडलबंधोपिक्रीडापिनैवाभूदपितुअभूदेवैतदेवाह हस्तेप्रगृह्येति ४९ ततःशरद्वर्णनरूपंकविकृतंगेयंतस्यगीतिर्गानंप्रववृते किंविशिष्टाचलतांवलयानांनिःस्वनैरनुयाता ततःप्रवृत्तोरासश्चेत्यादिपाठेतुचलंतोवलयानांनिस्वनायस्मिन्सः अनुयाताशरत्काव्यगेयगीतिर्यस्मिन्सइतिविग्रहः ५० तदेवाह कृष्णइति ५१ चलद्भिर्वलयैर्लपनशीलामुखरा५२५३गोप्यःपुल

निस्वनैः । अनुयाताशरत्काव्यगेयगीतिरनुक्रमात् ५० कृष्णःशरच्चंद्रमसंकौमुदींकुमुदाकराम् । जगौगोपीजनस्त्वेकंकृष्णनामपुनःपुनः ५१ परिवर्तश्रमेणैकाचलद्वलयलापिनी । ददौबाहुलतांस्कंधेगोपीमधुनिघातिनः ५२ काचित्प्रविलसद्बाहुःपरिरभ्यचचुंबितम् । गोपीगीतस्तुतिव्याजनिपुणामधुसूदनम् ५३ गोपीकपोलसंश्लेषमभिपद्यहरेर्भुजौ । पुलकोद्गमसस्यायस्वेदांबुघनतांगतौ ५४ रासगेयंजगौकृष्णोयावत्तारतरध्वनि । साधुकृष्णेतिकृष्णेतितावत्ताद्विगुणंजगुः५५गतेतुगमनंचक्रुर्वलनेसंमुखंययुः।प्रतिलोमानुलोमेनभेजुर्गोपांगनाहरिम् ५६ सतथासहगोपीभीररामममधुसूदनः । यथाब्दकोटिप्रतिमःक्षणस्तेनविनाभवत् ५७ तावार्यमाणाःपतिभिःपितृभिर्भ्रातृभिस्तथा । कृष्णंगोपांगनारात्रौरमयंतिरतिप्रियाः ५८ सोपिकैशोरकवयोमानयन्मधुसूदनः । रेमेताभिरमेयात्माक्षपासुक्षपिताहितः ५९ तद्वर्तृषुतथातासुसर्वभूतेषुचेश्वरः । आत्मस्वरूपरूपोसौव्याप्यवायुरिवस्थितः ६० यथासमस्तभूतेषुनभोग्निःपृथिवीजलम् । वायुश्चात्मातथैवासौव्याप्यसर्वमवस्थितः ६१ । । इतिश्रीविष्णुपुराणेपंचमेअंशेत्रयोदशोध्यायः १३ । । पराशरउवाच । । प्रदोषार्धेकदाचित्तुरासासक्तेजनार्दने । त्रासयन्समदोगोष्ठमरिष्टःसमुपाविशत् १ सतोयतोयदच्छायस्तीक्ष्णशृंगोर्कलोचनः । खुराग्रपातैरत्यर्थंदारयन्वसुधातलम् २ लेलिहानःसनिष्पेषंजिह्वयौष्ठंपुनःपुनः । संरंभाविद्धलांगूलःकठिनस्कंधबंधनः ३ उदग्रककुदाभोगःप्रमाणाद्दुरतिक्रमः । विण्मूत्रलिप्तपृष्ठांगोगवामुद्वेगकारकः ४ प्रलंबकंठोभिमुखस्तंतुघातांकिताननः । पात

कोद्गमएवसस्यंतदर्थंस्वेदरूपंयदंबुतेनघनतांमेघतांहरेर्भुजौयातौ परस्परसंसर्गाद्गोपीकपोलेपुलकोद्गमोहरिभुजयोश्चस्वेदइतिद्वयोरनुरागःसूचितः ५४ ५५ वलनेप्रत्यावृतौ प्रतिलोमानुलोमेनगमनेऽनुलोमगत्यावलनेचप्रतिलोमगत्येत्यर्थः ५६ ५७ ५८ तथानवनवानुरागजननेनकैशोरंकौमारंवयोमानयंस्तदवस्थोचितंचापलमनुकुर्वन्रेमे ५९ ननुधर्मसंस्थापनायावतीर्णस्यभगवतःकथंवापातेप्रवृत्तिर्गोपीनांपापेप्रवर्तनामितितत्राह तद्वर्तृष्विति नतावद्गोपीनांपापम् भगवतस्तद्वर्त्याद्यात्मत्वेनव्यभिचाराभावात् नापिश्रीकृष्णस्य सर्वस्यापिपरमात्मरूपत्वात् अतएवश्रीकृष्णेगोपादीनांद्वेषाभावः ६० सर्वव्यापकत्वमात्रेदृष्टांतमाह यथेति ६१ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचमेअंशेत्रयोदशोध्यायः १३ रासोत्सवेरिष्टमिवारिष्टंदैत्यमहन्हरिः स्वरक्षार्थंव्याजवृषंचतुर्दशइतीर्यते प्रदोषार्धेसायंसंध्यावसाने १ तोदयच्छायस्तोदयकांतिः अर्कविलोचनेयस्यसः २ सनिष्पेषंसंघर्षणसहितंयथाभवत्येवंलेलिहानः संरंभादाविद्धमू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लरहितसत्त्वोपाधिः ततएवापास्तरागद्वेषादिदोषः अतश्चक्षुरादिकंविनैवतदास्फुटबोधरूपः सर्वांतर्यामीमांनिरागसंज्ञास्यतीत्यर्थः ३२ तथाचात्युपादेयत्वात्कृष्णंव्रजाम्येवेत्याह तस्मा
दिति ३३ ॥ ॥ इतिश्रीवैष्णवाकूतचन्द्रिकायांपञ्चमेअंशेसप्तदशोध्यायः ॥ १७ ॥ संभाषनिर्गमौचापिदर्शनंरामकृष्णयोः अक्रूरेणस्तुतिर्गोपीविलापश्चात्रवर्ण्यते यादवोक्रू
रोस्मीत्युक्तासंबंधितांप्रतिपादयन्प्रणमति १ परिषस्वजेआलिंगितवान् कृतसंवंदनावित्यनेनबलभद्रप्रणामादिकमपिसूच्यते तेनाक्रूरेण२ ३ ताभ्यांरामकृष्णाभ्यांसहभुक्तंभोज्ययेनकृतं
नंदादिभिर्यथान्यायंयथायोग्यंसंवंदनादिकंयस्मैतथाभूतः ४ ५ ६ तत्सर्वमाचचक्षेतत्सर्वंश्रुत्वेतितत्सर्वमित्यस्योभयत्रान्वयः ७ औपायिकमुपयोगि ८ ९ १० कंसवाक्यंगोपान्समादि

त्तमस्यअनादिमध्यांतमयस्यविष्णोः ३३ । । इतिश्रीविष्णुपुराणेपंचमेअंशेसप्तदशोध्यायः १७ चिंतयन्नेवगोविंदमुपगम्यसयादवः । अक्रूरोऽ
स्मीतिचरणौननामशिरसाहरेः १ सोऽप्येनंध्वजवज्राब्जकृताचिह्नेनपाणिना । संस्पृश्याकृष्यचप्रीत्यासुगाढंपरिषस्वजे २ कृतसंवंदनौतेनयथा
वद्बलकेशवौ । ततःप्रविष्टौसंहृष्टौतमादायात्ममंदिरम् ३ सहताभ्यांतदाक्रूरःकृतसंवंदनादिकः । भुक्तभोज्योयथान्यायमाचचक्षेततस्तयोः४ यथा
निर्भर्त्स्यतेतेनकंसेनानकदुंदुभिः । यथाचदेवकीदेवीदानवेनदुरात्मना ५ उग्रसेनेयथाकंसःसदुरात्माचवर्तते ।यंचैवार्थंसमुद्दिश्यकंसेनसविसर्जितः
६ तत्सर्वंविस्तराच्छ्रुत्वाभगवान्केशिसूदनः । उवाचाखिलमप्येतज्ज्ञानंदानपतेमया ७ करिष्येचमहाभागयदत्रौपायिकंमतम् । विचिंत्यनान्यथैत
त्तेविद्धिकंसंहतंमया ८ अहंरामश्चमथुरांश्वोयास्यावःसमंत्वया । गोपवृद्धाश्चयास्यंतिआदायोपायनंबहु ९ निशेयंनीयतांवीरनचिंतांकर्तुमर्हसि ।
त्रिरात्राभ्यंतरेकंसंहनिष्यामिसहानुगम् १०। । पराशरउवाच । । समादिश्यततोगोपानक्रूरोऽपिसकेशवः । सुष्वापबलभद्रश्चनंदगोपगृहे
ततः ११ ततःप्रभातेविमलेकृष्णरामौमहाद्युती । अक्रूरेणसमंगंतुमुद्यतौमथुरापुरीम् १२ दृष्ट्वागोपीजनश्चाशुश्लथद्वलयबाहुकः । निशश्वासाति
दुःखार्तःप्राहचेदंपरस्परम् १३मथुरांप्राप्यगोविंदःकथंगोकुलमेष्यति।नागरस्त्रीकलालापमधुश्रोत्रेणपास्यति १४विलासिवाक्यजातेषुनागरीणांकृता
स्पदम्।चित्तमस्यकथंभूयोग्राम्यगोपीषुयास्यति १५ सारंसमस्तगोष्ठस्यविधिनाहरताहरिम् ।प्रहृतंगोपयोषित्सुनिर्घृणेनदुरात्मना १६भावगर्भस्मि
तंवाक्यंविलासललितागतिः । नागरीणामतीवैतत्कटाक्षेक्षितमेवतु १७ ग्राम्योहरिरयंतासांविलासनिगडैर्यतः । भवतीनांपुनःपार्श्वंकयायु

श्यउक्ता ११ अक्रूरेणसमंगंतुंसमुद्यतौरामकृष्णौदृष्ट्वागोपीजनोनिशश्वासप्राहचेतिद्वयोरन्वयः विरहजन्यकातर्येणश्लथद्वलयबाहुकः १२ १३ किंप्राहतदुच्यते मथुरामित्यादिना सो
पिवेणुर्नदृश्यतेइत्यंतेन कथमेष्यतिनकथंचिदत्रहेतुमाह नागरेतिसार्धेन नागरीणांस्त्रीणांशृंगारकलाविषयालापएवमधुतद्यस्मात्पास्यति आलापस्यपानंरसवत्त्वसाम्यान्मधुनोक्तेश्च नागरी
स्त्रीतिक्वचित्पाठः १४ विलासवंतिवाक्यानितेषांजातेषुसमूहेषु यानेष्वितिवापाठः १५विधिवैमुख्यादपिनायास्यतीत्याहसारामिति समस्तगोष्ठस्यसारंहरिंहरताविधिनागोपस्त्रीषुप्रहृतंप्रहारः
कृतः १६ किंचनागरीणामेतद्वाक्यादिअस्मदाद्यपेक्षयाअतीवविशिष्टमित्याहभावेति तत्रभावोबाह्यालंवनोमानसोविकारविशेषः विलासःशृंगारचेष्टा १७विलासनिगडैर्युतोयंत्रितः युतइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिवापाठः कयायुक्त्याकेनविचारेण १८ एषैषइतिवीप्साविस्मयात् संधिस्तुसैषइतिवत्सोचिलोपेचेदितिसुलोपादेव अक्रूरकेणेतिकुत्सितेकः निराकृतागोपीनामाशायेनतेन १९ किंनवेत्ती तिअयमक्रूरःस्वयंक्र प्यनुरागरसाभिज्ञस्तावन्मास्तुकचिदनुरागपरंजनमपिनवेत्तिकिम् येनहेतुनाअस्माकमक्ष्णोराल्हादंहारिमन्यत्रनयति यदिकाप्यनुरागरसाभिज्ञोभवेत्तर्हितद्वियोगदुःखंजा नन्नैवंकुर्यादितिभावः २० अत्यंतंनिर्घृणोनिर्दयः २१ कृष्णोवार्यतामितिवक्तुंगुरूणामग्रतोनक्षमंनयोग्यमितिब्रवीषि तन्नेत्याह गुरवइति २२ २३ २४ येजनाइतःकेनाप्यनिवारि तायांतितेधन्याःयस्मात्पथियांतंकृष्णंपश्यंतःसंतःस्वदेहंपुलकाचितंपुलकव्याप्तमुद्वहिष्यंतिउद्वक्ष्यंतिधारयिष्यंतीत्यर्थः २५ मथुरायांनगर्यांयेपौराविदग्धाजनास्तेषांनयनानाम् २६

त्तयासमेष्यति १८ एषैषरथमारुह्यमथुरांयातिकेशवः । क्रूरेणाक्रूरकेणातिनिराशेनप्रतारितः । १९ । किंनवेत्तिनृशंसोऽयमनुरागपरंजन म् । येनेममक्ष्णोराह्लादंनयत्यन्यत्रनोहरिम् । २० । एवंरामेणसहितःप्रयात्यत्यंतनिर्घृणः । रथमारुह्यगोविंदस्त्वर्यतामस्यवारणे २१ गु रूणामग्रतोवक्तुंकिंब्रवीषिननःक्षमम् । गुरवःकिंकरिष्यंतिदग्धानांविरहाग्निना २२ नंदगोपमुखागोपागंतुमेतेसमुद्यताः । नोद्यमंकुरुतेक श्चिद्गोविंदविनिवर्तने २३ सुप्रभाताद्यरजनीमथुरावासियोषिताम् । पास्यंत्यच्युतवक्त्राब्जंयासांनेत्रालिपंक्तयः २४ धन्यास्तेपथियेकृष्णमि तोयांत्यनिवारिताः । उद्वहिष्यंतिपश्यंतःस्वदेहंपुलकाचितम् । २५ । मथुरानगरीपौरनयनानांमहोत्सवः । गोविंदावयवैर्दृष्टैरतीवाद्यभ विष्यति । २६ । कोनुस्वप्नःसभाग्याभिर्दृष्टस्ताभिरधोक्षजम् । विस्तारिकांतनयनायाद्रक्षंत्यनिवारितम् । २७ । अहोगोपीजनस्या स्यदर्शयित्वामहानिधिम् । उद्धृतान्यत्रनेत्राणिविधात्राकरुणात्मना २८ अनुरागेणशैथिल्यमस्मासुव्रजतोहरेः । शैथिल्यमुपयांत्याशुकरेणु वलयान्यपि २९ अक्रूरःक्रूरहृदयःशीघ्रंप्रेरयतेहयान् । एवमार्तासुयोषित्सुघृणाकस्यनजायते ३० एषकृष्णरथस्योच्चैश्चक्रेणुर्निरीक्ष्यताम् । दू रीकृतोहरिर्येनसोऽपिरेणुर्नदृश्यते ३१ इत्येवमतिहार्देनगोपीजननिरीक्षितः । तत्याजव्रजभूभागंसहरामेणकेशवः ३२ गच्छंतोजवनाश्वेनरथेन यमुनातटम् । प्राप्तामध्याह्नसमयेरामाक्रूरजनार्दनाः ३३ अथाहकृष्णमक्रूरोभवद्भ्यांतावदास्यताम् । यावत्करोमिकालिंद्यामह्निकार्हणमंभसि ३४

विस्तारिणिकांतानिनयनानियासांताःयाअनिवारितंयथास्यात्तथाद्रक्ष्यंतिताभिःकोनुस्वप्नोदृष्टः अत्युत्तमःस्वप्नोदृष्टइत्यर्थः २७ महानिधिंश्रीकृष्णंदर्शयित्वानेत्राणिउद्धृतानिउत्पाटिता नीवविरहदुःखाद्वस्त्वंतरस्याप्यदृष्टेः २८ अनुरागेणेति अनुरागेणअनुरागतोऽस्मासुशैथिल्यंव्रजतोहरेःव्रजतिहरौसतिवलयान्यपिशैथिल्यमुपयांति किंवाव्रजतोहरेरनुरागेणसहवलयान्य पिशैथिल्यमुपयांति अचेतनानिवलयानिअनुजिगमिषंतिनतुप्राणाःहाकष्टमितिभावः २९ क्रूरहृदयःनिर्घृणः तत्रहेतुरेवमिति ३० काचिद्वदतिएषइतिहेहेइतिकाचित्पाठः येनरथेनहरिर्दू रीकृतःतस्यचक्रेणुर्निरीक्ष्यताम् क्षणांतरेपुनराह सोपीति ३१ व्रजभूभागंव्रजोपांतम् ३२ जवनावेगवत्तराअश्वायस्मिन्रथेतेन जविनेतिपाठेसएवार्थः ३३ आह्निकार्हणंमध्याह्नस्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१० ११ १२ स्वप्रयोजनंप्रकाशयन्नक्रूरमादिशतिभोभोइत्यादिनावाच्यास्तथातथेत्यंतेन १३ प्रवर्धतःप्रकर्षेणवर्धेते १४ १५ नियुद्धकुशलौबाहुयुद्धनिपुणौ १६ महामात्रोहस्तिपकस्तेनप्रचोदितःनिहंस्यतेनिहनिष्यति १७ १८ १९ २० प्रसाधिष्येप्रसाधयिष्येत्वयासह २१ उपहार्यउपायनीकृत्वा २२ २३ मधुप्रियोमधुवंश्यानांप्रियः एकदेशसंज्ञयामधुसूदनप्रियइतिवा २४ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचदशोध्यायः १५ षोडशेन्यवधीत्कृष्णःकेशिनंहयरूपिणम् आमंत्र्यतंभावियुद्धैर्नारदोगादितीर्यते क्षिप्रकार्यार्थंकंसेनप्रचो

ब्रवीत् १२ भोभोदानपतेवाक्यंक्रियतांप्रीतयेमम । इतःस्यंदनमारुह्यगम्यतांनंदगोकुलम् । १३ । वसुदेवसुतौतत्रविष्णोरंशसमुद्भवौ । नाशायकिलसंभूतौममदुष्टौप्रवर्धतः । १४ । धनुर्महोममाप्यत्रचतुर्दश्यांभविष्यति । आनेयौभवतागत्वामल्लयुद्धायतावुभौ १५ चाणूरमुष्टिकौमल्लौनियुद्धकुशलौमम । ताभ्यांसहानयोर्युद्धंसर्वलोकोऽत्रपश्यतु १६ नागःकुवलयापीडोमहामात्रप्रचोदितः । सवानिहंस्यतेपापौवसुदेवात्मजौशिशू १७ तौहत्वावसुदेवंचनंदगोपंचदुर्मतिम् । हनिष्येपितरंचेममुग्रसेनंचदुर्मतिम् १८ ततःसमस्तगोपानांगोधनान्यखिलान्यहम् । वित्तंचापहरिष्यामिदुष्टानांमद्वधैषिणाम् १९ त्वामृतेयादवाश्चैतेदुष्टादानपतेमम । एतेषांचवधायाहंयतिष्येनुक्रमात्ततः २० ततोनिष्कंटकंसर्वंराज्यमेतदयादवम् । प्रसाधिष्येत्वयातस्मान्मत्प्रीत्यावीरगम्यताम् २१ यथाचमाहिषंसर्पिर्दधिचाप्युपहार्यवै । गोपाःसंमानयंत्याशुत्वयावाच्यास्तथातथा २२ । पराशरउवाच । । इत्याज्ञप्तस्तदाक्रूरोमहाभागवतोद्विज । प्रीतिमानभवत्कृष्णंश्वोद्रक्ष्यामीतिसत्वरः २३ तथेत्युक्त्वाचराजानंरथमारुह्यशोभनम् । निश्चक्रामतदापुर्यामथुरायामधुप्रियः २४ । । इतिश्रीविष्णुपुराणेपंचमेअंशेपंचदशोध्यायः १५ । । पराशरउवाच । । केशीचापिबलोदग्रःकंसदूतप्रचोदितः । कृष्णस्यनिधनाकांक्षीवृंदावनमुपागमत् १ सखुरक्षतभूपृष्ठःसटाक्षेपधुतांबुदः । द्रुतविक्रांतचंद्रार्कमार्गोगोपानुपाद्रवत् २ तस्यहेषितशब्देनगोपालादैत्यवाजिनः । गोप्यश्चभयसंविग्नागोविंदंशरणंययुः ३ त्राहित्राहीतिगोविंदःश्रुत्वातेषांतदावचः । सतोयजलदध्वानगंभीरमिदमुक्तवान् ४ अलंत्रासेनगोपालाःकेशिनःकिंभयातुराः । भवद्भिर्गोपजातीयैर्वीरवीर्यैर्विलोप्यते ५ किमनेनाल्पसारेणहेषिताटोपकारिणा । दैतेयबलबाह्येनवल्गतादुष्टवाजिना ६ एह्येहिदुष्टकृष्णोऽहंपूष्णस्त्विवपिनाकधृक् । पातयिष्यामिदशनान्वदनादाखि

दितःसन्वृंदावनंतत्रापिकृष्णस्यासन्नंदेशमगमत् १ सटानांकेसरादीनांक्षेपेणधुताःचलिताअंबुदामेघायेन द्रुतेनशीघ्रगमनेनाविक्रांतौविलंघितौचंद्रार्कमार्गौयेनसः २ ३ ४ केशिनस्त्वासेनालम् भीतैर्भवद्भिर्वीराणांवीर्यैःकिंविलोप्यतेनाश्यते सन्निहितस्यस्वामिनःपरिजनत्रासेनहीनवीर्यत्वंसंभाव्यतेऽतोमदीयैर्भवद्भिस्त्वस्तैर्मद्वीर्यैर्विलोप्यतइत्यर्थः ५ हेषितमेवाटोपस्तत्कारिणादैतेयानांबलाद्बाह्येनदैत्यबलहीनेनअतोदैत्यहंतॄणामस्माकंकिमनेनेत्यर्थः वल्गताविचित्रगतिमात्रंकुर्वता ६ पूष्णःसूर्यस्यदंतान्पिनाकधृक्वीरभद्रइवेति पूष्णोरितिपाठेपूषार्यम्णोर्दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपातेसाहचर्यात्पूषशब्देनद्वयोरभिधानम् तदुक्तंशैवे अर्यम्णोदशनान्पूष्णोमुष्णन्कूर्परमूलतः अभिहत्यगणेशानोवीरभद्रोव्यशातयदिति ७ ८ आभोगिनंविस्तारिणमतिस्थूलमित्यर्थः ९ १० आसंभूतेरुत्पत्तिमारभ्य उपेक्षितः अचिकित्सितः ११ विवृतेअक्षिणीचक्रेतदनुमुक्तबंधनेततोनिःसृतेइत्यन्वयः १२ १३ व्यादितंविवृतमास्यंयस्यवैद्युतेनवज्रेण १४ द्वौद्वौ पादौययोःपुच्छपृष्ठेअर्धरूपेययोःएकशब्दश्रवणशब्दात्प्राग् योज्यतेनैकैकाश्रवणाक्षिणीनासिकाययोस्तेतथा १५ अनायस्ताश्रमरहितातनुःशरीरंयस्यसः तस्थिवान्स्थितः १६ १७

लांस्तव ७ इत्युक्त्वास्फोट्यगोविंदःकेशिनःसंमुखंययौ । विवृतास्यश्चसोऽप्येनंदैतेयःप्रत्युपाद्रवत् ८ बाहुमाभोगिनंकृत्वामुखेतस्यजनार्दनः । प्रवेशयामासतदाकेशिनोदुष्टवाजिनः ९ केशिनोवदनंतेनविशताकृष्णबाहुना । शातितादशनाःपेतुःसिताभ्रावयवाइव १० कृष्णस्यववृधेबाहुःकेशिदेहगतोद्विज । विनाशाययथाव्याधिरासंभूतेरुपेक्षितः ११ विपाटितास्योबहुलंसफेनंरुधिरंवमन् । सोऽक्षिणीविवृतेचक्रेनिःसृतेमुक्तबंधने १२ जगामधरणींपादैःशकृन्मूत्रंसमुत्सृजन् । स्वेदार्द्रगात्रःशांतश्चनिर्यत्नःसोऽभवत्ततः १३ व्यादितास्योमहारौद्रःसोसुरःकृष्णबाहुना । निपपातद्विधाभूतोवैद्युतेनयथाद्रुमः १४ द्विपादपुच्छपृष्ठार्धेश्रवणैकाक्षिनासिके । केशिनस्तेद्विधाभूतेशकलेचविरेजतुः १५ हत्वातुकेशिनंकृष्णोमुदितैर्गोपकैर्वृतः । अनायस्ततनुःस्वस्थोहसंस्तत्रैवतस्थिवान् १६ ततोगोप्यश्चगोपाश्चहतेकेशिनिविस्मिताः । तुष्टुवुःपुंडरीकाक्षमनुरागमनोरमम् १७ अथाहांतर्हितोविप्रोनारदोजलदेस्थितः । केशिनंनिहतंदृष्ट्वाहर्षनिर्भरमानसः १८साधुसाधुजगन्नाथलीलयैवयदच्युत । निहतोऽयंयथाकेशीक्लेशदस्त्रिदिवौकसाम् १९ युद्धोत्सुकोऽहमत्यर्थंनरवाजिमहाहवम् । अवृत्तपूर्वमन्यत्रद्रष्टुंस्वर्गादिहागतः २० स्वकर्माण्यवतारेतेकृतानिमधुसूदन । यानितैर्विस्मितंचेतस्तोषमेतेनमेगतम् २१ तुरगस्यास्यशक्रोपिकृष्णदेवाश्वबिभ्यति । धुतकेसरजालस्यहेषतोऽभ्रावलोकिनः २२ यस्मात्त्वयैवदुष्टात्माहतःकेशीजनार्दन ।तस्मात्केशवनाम्नात्वंलोकेख्यातिंगमिष्यसि २३स्वस्त्यस्तुतेगमिष्यामिकंसयुद्धेऽधुनापुनः।परश्वोऽहंसमेष्यामित्वयाकेशिनिषूदन २४ उग्रसेनसुतेकंसेसानुगेविनिपातिते। भारावतारकर्तात्वंपृथिव्याःपृथिवीधर २५ तत्रानेकप्रकाराणियुद्धानिपृथिवीक्षिताम्। द्रष्टव्यानिमयायुष्मत्प्रणीतानिजनार्दन२६सोहंयास्यामिगोविंददेवकार्यंमहत्कृतम्।त्वयासभाजितश्चाहंस्वस्तितेस्तुव्रजाम्यहम् २७ । पराशरउ०

१८ १९ युद्धोत्सुकःयुद्धदर्शनोत्सुकः २० स्वानिअसाधारणानिकर्माणियानितेत्वयाकृतानितैश्चेतोविस्मितंसदनेनतुकेशिवधेनतोषंगतम् २१ धुतंकंपितंकेसराणांजालंसमूहोयेनतस्य हेषतःहेषांशब्दंकुर्वतः २२ केशिवधात्केशवनामनिरुक्तिमाह यस्मादिति २३ अधुनागमिष्यामिकंसयुद्धेपरश्वस्त्वयापुनःसमेष्यामि २४ भारावतारस्यभारहरणस्यकर्ताभारंहरिष्यसीत्यर्थः २५ तत्रभारावतारकरणेआयुष्मतात्वयाप्रणीतानीतिलोकोक्तिः युष्माभिःप्रणीतानीतिवा २६ पूर्वकृतैःकर्मभिःसभाजितःपूजितश्चानंदितश्चेतिवार्थः २७ गोपीनांनेत्रैर्यत्सादरेक्षण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपंपानंतस्यभाजनंविषयःश्रीकृष्णोविवेश २८ इतिश्रीविष्णुपुराणेवैष्णवाकूतचंद्रिकायांषोडशोध्यायः १६ ततःसप्तदशेक्रूरोगच्छन्पाथिमनोरथान् कुर्वन्नेवतथाद्राक्षीत्कृष्णरामा वितीर्यते १ अक्रूरोपीत्यादिकथासंगत्यर्थं उत्कउत्कंठितः अक्रूरस्यमनोरथानाह चिंतयामासेत्यादिनामामक्रूरेतिवक्ष्यतीत्यंतेन मयासदृशोधन्यतरोनास्ति मयामत्तइतिवा २ उन्निद्रस्य स्फुटितस्यअब्जस्यपत्रेइवाक्षिणीयस्यतत् ३ संकल्पनामयंध्यानोपनीतमेवयत्पापंहंति ४ वेदास्तदंगानिचविनिर्जग्मुर्देवानांतत्परंधामपरमाश्रयस्वरूपम् धाम्नामितिपाठेधाम्नातेजोमयानांआ दित्यादीनांपरंधामलोचनयोर्मुखेचसूर्यचंद्रवह्नीनांसत्त्वादित्यर्थः५ ६नास्तिअंतआदिश्चयस्यतम्७अंगंस्प्रक्ष्यतिअंगस्पर्शंकरिष्यति ८योवितत्यततूव्याप्यस्थितः९योमत्स्यादिरूपैर्जगत्स्थितिं

नारदेतुगतेकृष्णःसहगोपैरविस्मितः। विवेशगोकुलंगोपीनेत्रपानैकभाजनम् २८। इति०वि०पं०षो० १६। पराशरउ०। अक्रूरोपिविनिष्क्रम्यस्यं दनेनाशुगामिना। कृष्णसंदर्शनायोत्कःप्रययौनंदगोकुलम् १ चिंतयामासचाक्रूरोनास्तिधन्यतरोमम। योहमंशावतीर्णस्यमुखंद्रक्ष्यामिचक्रिणः २ अद्यमेसफलंजन्मसुप्रभाताचमेनिशा।यदुन्निद्राब्जपत्राक्षंविष्णोर्द्रक्ष्याम्यहंमुखम् ३पापंहंतिचयत्पुंसांस्मृतसंकल्पनामयम्।तंत्पुडरीकनयनंविष्णोर्द्र क्ष्याम्यहंमुखम् ४ विनिर्ययुर्यतोवेदावेदांगान्याखिलानिच। द्रक्ष्यामितत्परंधामदेवानांभगवन्मुखम्५ यज्ञेषुयज्ञपुरुषःपुरुषैःपुरुषोत्तमः। इज्यतेयोऽ खिलाधारस्तंद्रक्ष्यामिजगत्पतिम् ६ इष्ट्वायमिंद्रोयज्ञानांशतेनामरराजताम्। अवापतमनंतादिमहंद्रक्ष्यामिकेशवम् ७ नब्रह्मानेंद्ररुद्राश्विवस्वादि त्यमरुद्गणाः। यस्यरूपंविजानंतिस्प्रक्ष्यत्यंगंसमेहरिः ८ सर्वात्मासर्ववित्सर्वःसर्वभूतेष्ववस्थितः। योवितत्याव्ययोव्यापीसवक्ष्यतिमयासह९ मत्स्य कूर्मवरहाश्वसिंहरूपादिभिःस्थितिम्। चचारजगतोयोऽयंसोऽद्यमामालपिष्यति १० सांप्रतंचजगत्स्वामीकार्यमात्माहृदिस्थितम्। कर्तुंमनुष्यतांप्रा प्तःस्वेच्छादेहधृगव्ययः ११ योऽनंतःपृथिवींधत्तेशेखरस्थितिसंस्थिताम्।सोऽवतीर्णोजगत्यर्थेमामक्रूरेतिवक्ष्यति १२पितृपुत्रसुहृद्भ्रातृमातृबंधुमयीमि माम्।यन्मायांनालमुत्तर्तुंजगत्तस्मैनमोनमः १३तरत्याविद्यांविततांहृदियस्मिन्निवेशिते। योगीमायाममेयायतस्मैविद्यात्मनेनमः १४यज्विभिर्यज्ञपुरुषो वासुदेवश्चसात्त्वतैः।वेदांतवेदिभिर्विष्णुःप्रोच्यतेयोनतोऽस्मितम् १५ यथातत्रजगद्धाम्निधातर्येतत्प्रतिष्ठितम्।सदसत्तेनसत्येनमय्यसौयातुसौम्यताम्

चचार चकारेतिवापाठः समामालपिष्यतिअक्रूरतातेत्यादिसंभाषणंकरिष्यतिअश्वोहयग्रीवः सिंहोनृसिंहः १० ११ शेखरस्येवस्थित्यासंनिवेशेनसंस्थिताम् जगत्यर्थेपृथिव्यर्थेसोऽवतीर्णो रामः१२ पितृपुत्रादिममताबद्धतयैवकंसाज्ञाकारित्वरूपापराधंक्षमापयन्प्रणमति पितृपुत्रेतित्रिभिः जगत्कर्तृ यस्यमायांततुंनालंतस्मैनमः १३ अविद्यामात्माच्छादिनींतामेवापित्रादिममता मयींहृदिविततांयस्मिन्स्थितेयद्ध्यानेनयोगीतरति अत्रहेतुगर्भविशेषणंविद्यात्मनेबोधेद्धाब्रह्माकाराबुद्धिर्विद्यासैवात्माआकारोयस्यतथाभूताय १४ यज्विभिःकर्मिभिः सात्त्वतैरुपासकैः वेदांतवेदिभिर्ज्ञानिभिर्यज्ञपुरुषादिशब्दैर्यःप्रोच्यते कांडत्रयेपिशब्दमात्रभेदेनप्रतिपादितंनतोस्मीत्यर्थः १५ स्वांतर्यामितयाअनुभवन्कृष्णंकंसहतत्वापराधाभावायप्रार्थयते यथेति यत्रधाम्नि प्रकाशकेधातर्यधिष्ठानेसदसत्साध्वसाधुरूपंजगत्प्रतिष्ठितंयथातेनसत्येनासावस्तिभातिप्रीतिरूपेणानुभूयमानोमयिसौम्यतांप्रसन्नतांयातु १६ तथाप्यसावसाधुसन्निधौनेतुंगम्यतइत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वापराधमवगत्यक्षमापयति स्मृतेइति १७ भक्त्यानम्रंप्रवणंआत्मानिकृष्णेमानसंयस्यसः १८ आदोहनेदोहनस्थाने १९ उन्नसंउन्नतनासिकम् २० २१ सेंदुर्योनीलाच लस्तद्वदाभायस्यतम् इंदुस्थानीयंमुखंसितांभोजंवा सार्द्रनीललताहस्तमितिपाठेतत्कालगृहीतनीललताहस्तमित्यर्थः २२ २३ मेघमालेत्यत्रनीलवस्त्रस्यमेघमालासादृश्यम् २४ २५ २६ भगवताअंगसंगेदत्तेसतिममैतदंगमपिफलवत्स्यादित्याशंसा २७ अंगसंगप्रकारमेवाह अप्येषइति यस्यांगुलिस्पर्शेनहतान्यखिलान्यघानियेषांतैरित्यतिपावनत्वमुक्तम् अनाश

१६ स्मृतेसकलकल्याणभाजनंयत्रजायते। पुरुषस्तमजंनित्यंव्रजामिशरणंहरिम् १७। पराशरउ०। इत्थंसंचिंतयन्विष्णुंभक्तिनम्रात्ममानसः। अक्रूरोगोकुलंप्राप्तःकिंचित्सूर्येविराजति १८ सददर्शतदातत्रकृष्णमादोहनेगवाम् । वत्समध्यगतंफुल्लनीलोत्पलदलच्छविम् १९ विस्पष्टपद्मपत्राक्षंश्रीवत्सांकितवक्षसम् । प्रलंबबाहुमासीनंतुंगोरःस्थलमुन्नसम् २० सविलासंस्थिताधारंबिभ्राणंमुखपंकजम् । तुंगरक्तनखंपद्भ्यांधरण्यांसुप्रतिष्ठितम् २१ बिभ्राणंवाससीपीतेवन्यपुष्पसुभूषितम् । सेंदुनीलाचलाभंतंसितांभोजावतंसकम् २२ हंसकुंदेंदुधवलंनीलांबरधरंद्विज । तस्यानुबलभद्रंचददर्शयदुनंदनम् २३ प्रांशुमुत्तुंगबाहुंसंविकासिमुखपंकजम् । मेघमालापरिवृतंकैलासाद्रिमिवापरम् २४ तौदृष्ट्वाविकसद्वक्त्रसरोजःसमहामतिः । पुलकांचितसर्वांगस्तदाक्रूरोभवन्मुने २५ एतत्तत्परमंधामतदेतत्परमंपदम् । भगवद्वासुदेवांशोद्विधायोयमवस्थितः २६ साफल्यमक्ष्णोयुगमेतदत्रदृष्टेजगद्धातरिजातमुच्चैः । अप्यंगमेतद्भगवत्प्रसादाद्दत्तेंगसंगेफलवन्ममस्यात्२७ अप्येषपृष्टेममहस्तपद्मंकरिष्यतिश्रीमदनंगमूर्तिः । यस्यांगुलिस्पर्शहताखिलाघैरवाप्यतेसिद्धिरनाशदोषा २८ येनाग्निविद्युद्रविरश्मिमालाकरालमत्युग्रमपास्यचक्रम्।चक्रंघ्नतादैत्यपतेर्हतानिदैत्यांगनानांनयनांजनानि २९ यत्रांबुविन्यस्यबलिर्मनोज्ञानवापभोगान्वसुधातलस्थः । तथामरत्वंत्रिदशाधिपत्यंमन्वंतरंपूर्णमपेतशंकः ३० अप्येषमांकंसपरिग्रहेणदोषास्पदीभूतमदोषदुष्टम्।कर्तानमौनोपहतंधिगस्तुतज्जन्मनःसाधुबहिष्कृतोयः ३१ज्ञानात्मकस्यामलसत्त्वराशेरपेतदोषस्यसदास्फुटस्य। किंवाजगत्यत्रसमस्तपुंसामज्ञातमस्यास्तिहृदिस्थितस्य ३२तस्मादहंभक्तिविनम्रचेताव्रजामिसर्वेश्वरमीश्वराणाम्।अंशावतारंपुरुषो

दोषानाशदोषाभ्यांरहिता २८ शौर्यैंदार्यैसूचयन्हस्तमेवविशिनष्टि येनेतिद्वाभ्याम् अग्न्यादिरश्मिमालेवकरालंभयंकरंचक्रमपास्यक्षिप्त्वादैत्यपतेश्चक्रंसैन्यंघ्नतामारयतादैत्यांगनानांनयनांजनानिहतानि वैधव्यंकृतमित्यर्थः२९ यत्रहस्तेपादत्रयभूमिदानावसरेंऽबुविन्यस्यजलंदत्त्वावसुधातलस्थःपातालगतोपिभोगानमरत्वंदेवेंद्रत्वंचवरतोवाप ३० अपिशब्दःसंभावनायाम्वस्तुतोदोषादुष्टंकंसपरिग्रहेणदोषास्पदीभूतंदुष्टंमौनोपहतंअसंभाषणोपहतंनकर्तानकरिष्यति अवमानोपहतमितिपाठेअपिकिंकर्ताइतिशंका तत्रासत्संगंनिदर्शयति धिगिति साधुषुबहिष्कृतः असत्कृताश्रयः३१ शंकांनिरस्यति ज्ञानात्मकस्येति जीवोहिउत्पन्नज्ञानेनजानातिरजस्तमोभ्यामाच्छन्नबोधश्चरागादिदोषप्रमुष्टज्ञानश्च ईश्वरस्तुमायाप्रतिफलितचिद्रूपस्तत्रापिरजस्तमोम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदेवपूजादि ३४ ३५ भवद्भ्यांतावदिहास्यतामित्यक्रूरस्यवचसाबालाविमौदुष्टकंसनिकटेकिमर्थमानीताविति तच्छंकानिवृत्त्यर्थंरामकृष्णाभ्यांस्वीयमैश्वर्यरूपंदर्शितमसौतुष्टावेत्याह फणासहस्रमित्यादिनायावदध्यायसमाप्ति फणासहस्राणांमालयापंक्त्याआढ्यंयुक्तम् कुंदवदमलंधवलमंगंयस्य पाठांतरेकुंदानांमालेवयथासन्निवेशंश्वेतंवांगंयस्य उन्निद्रस्यस्फुटस्यपद्मस्यपत्रेइवारुणेअक्षिणीयस्यतम् ३६ वासुकिरंभाद्यैःपवनाशिभिःसर्पैर्वृतंस्तूयमानंच उद्वतोगंधोयस्यास्तयावनमालयाविभूषितम् ३७ अंतर्जलतलेजलमध्येसमप्रदेशेस्थितम् ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ तंभावंद्विधाभूतंदेहंविज्ञाय पाठांतरेविज्ञातःसद्भावःपरमार्थोयस्यतम् विज्ञातसद्भावइतिपाठेदानपतेर्विशेषणम् सर्वेषुयद्विज्ञानंतन्मयंतत्स्वरूपम् अतःकिंनश्वरम् नअच्युतम् न

तथेत्युक्तेततःस्नातःस्वाचांतःसमहामतिः। दध्यौब्रह्मपरंविप्रप्रविश्ययमुनाजले३५ फणासहस्रमालाढ्यंबलभद्रंददर्शसः । कुंदामलांगमुन्निद्रपद्मपत्रारुणेक्षणम् ३६ वृतंवासुकिरंभाद्यैर्महद्भिःपवनाशिभिः। संस्तूयमानमुद्गंधिवनमालाविभूषितम् ३७ दधानमसितेवस्त्रेचारुरूपावतंसकम्। चारुकुंडलिनंमत्तमंतर्जलतलेस्थितम् ३८ तस्योत्संगेघनश्याममाताम्रायतलोचनम् । चतुर्बाहुमुदारांगंवज्रायुधसुभूषितम् ३९ पीतेवसानंवसनेचित्रमाल्यविभूषितम् । शक्रचापतडिन्मालाविचित्रमिवतोयदम् ४० श्रीवत्सवक्षसंचारुकेयूरमुकुटोज्ज्वलम् । ददर्शकृष्णमक्लिष्टंपुंडरीकावतंसकम् ४१ सनंदनाद्यैर्मुनिभिःसिद्धयोगैरकल्मषैः । विचिंत्यमानंतत्रस्थैर्नासाग्रन्यस्तलोचनैः ४२ बलकृष्णौतदाक्रूरःप्रत्यभिज्ञाय विस्मितः । सोचिंतयद्रथाच्छीघ्रंकथमत्रागताविति ४३ विवक्षोस्तंभयामासवाच्यंतस्यजनार्दनः । ततोनिष्क्रम्यसलिलाद्रथमभ्यागतःपुनः ४४ ददर्शतत्रचैवोभौरथस्योपरिधिष्ठितौ । रामकृष्णौयथापूर्वंमनुष्यवपुषान्वितौ ४५ निमग्नश्चपुनस्तोयेददर्शसतथैवतौ । संस्तूयमानौगंधर्वमुनिसिद्धमहोरगैः ४६ ततोविज्ञायतंभावंसतुदानपतिस्तदा । तुष्टावसर्वविज्ञानमयमच्युतमीश्वरम् ४७ तन्मात्ररूपिणेऽचिंत्यमहिम्नेपरमात्मने । व्यापिनेनैकरूपैकस्वरूपायनमोनमः ४८ सत्त्वभूतायतेऽचिंत्यहविर्भूतायतेनमः। नमोविज्ञातपारायपरायप्रकृतेःप्रभो ४९ भूतात्माचेंद्रियात्माचप्रधानात्मातथाभवान् । आत्माचपरमात्माचत्वमेकःपंचधास्थितः ५० प्रसीदसर्वसर्वात्मन्क्षराक्षरमयेश्वर । ब्रह्मविष्णुशि

त्वेतद्विरुद्धम् ईश्वरंलौकिकविलक्षणम् ४७ नैकरूपःअनेकरूपःसचासौअनेकरूपश्चतस्मैकार्यकारणरूपाय ४८ हेअचिंत्यहविर्भूतस्त्वम् यत्पुरुषेणहविषेतिश्रुतेःअविज्ञातःपारोतोयस्यतस्मैप्रकृतेःपरायतामतिक्रम्य स्थिताय आदित्यवर्णंतमसःपरस्तादितिश्रुतेः ४८ भूतात्मामहाभूतोपाधिकः इंद्रियात्माएकादशेंद्रियोपाधिकः एवंप्रधानात्मा आत्मापुरुषः परमात्मानिरुपाधिकंब्रह्म यद्वाअन्नप्राणमनोविज्ञानानंदरूपपंचकोशोपाधिकः किंवाविश्वतैजसप्राज्ञतदनुसंधातृरूपपुरुषपरब्रह्मस्वरूपःपंचधास्थितइत्यर्थः ५० सर्वसमस्तप्राणिरूपः सर्वस्यजडस्यात्मन् अतएवक्षराक्षरमय ईश्वर तयोर्नियामक कल्पनाभिःकल्पितोपाधिभिः ५१ अनाख्येयःशब्दागोचरःस्वरूपंआत्मामूर्तिश्चयस्य अनाख्येयानियानिइयत्तयावक्तुमशक्यानिरूपाणिव्यक्तयस्तेषामात्मन्निति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वातत्किंप्रयोजनमुद्दिश्यतथात्वंनेत्याह अनाख्येयप्रयोजनवचनार्हप्रयोजनरहित लीलामात्रेणैवप्रवृत्तेः शब्दागोचरसुखस्वरूपइतिवातथाअनाख्येयानिअभिधानानि यस्यतंअनंतनामत्वाद्वस्तु नोनामशून्यत्वाच्च ५२ अत्रनामशून्यत्वेहेतुमाह नयत्रेति ५३ अनंतनामत्वेहेतुमाह कल्पनामिति कल्पनयैवतवनामानिनवस्तुतइत्यर्थः ५४ तदेवस्पष्टयति सर्वार्थाइतित्रिभिः ५५ भिन्नार्थैः पृथक्प्रयोजनैः ५६ गभस्तिरूपःसूर्यांशुजन्यवृष्टिद्वारैवविश्वंसृजतिपातिच तेगुणमयस्त्वदधीनगुणजन्यः सदितिपदंवाचकंयस्यतदक्षरंतवपरंरूपम् ज्ञानस्यसदसत्त्वंसदसद्वि

वाद्याभिःकल्पनाभिरुदीरितः ५१ अनाख्येयस्वरूपात्मन्ननाख्येयप्रयोजन । अनाख्येयाभिधानंत्वांनतोस्मिपरमेश्वरम् ५२ नयत्रनाथविद्यं तेनामजात्यादिकल्पनाः । तद्ब्रह्मपरमंनित्यमविकारिभवानज ५३ नकल्पनामृतेऽर्थस्यसर्वस्याधिगमोयतः । ततःकृष्णाच्युतानंतविष्णुसंज्ञाभि रीड्यसे ५४ सर्वार्थास्त्वमजविकल्पनाभिरेतेदेवाद्यंजगदखिलंत्वमेवविश्वम् । विश्वात्मंस्त्वमितिविकारभावहीनंसर्वस्मिन्नहिभवतोस्तिवस्तुकिंचि त् ५५ त्वंब्रह्मापशुपतिरर्यमाविधातात्वंविष्णुस्त्रिदशपतिःसमीरणोऽग्निः । तोयेशोधनपतिरंतकस्त्वमेकोभिन्नार्थैर्जगदभिपासिशक्तिभेदैः ५६ वि श्वंभवान्सृजतिपातिगभस्तिरूपोविश्वंचतेगुणमयोऽयमजप्रपंचः । रूपंपरंसदितिवाचकमक्षरंयज्ज्ञानात्मनेसदसतेप्रणतोऽस्मितस्मै ५७ ओंन मोवासुदेवायनमःसंकर्षणायते । प्रद्युम्नायनमस्तुभ्यमनिरुद्धायतेनमः ५८ । । इतिश्रीविष्णुपुराणेपंचमेअंशेअष्टादशोध्यायः । । १८

पराशरउवाच । । एवमंतर्जलेकृष्णमभिष्टूयसयादवः । अर्चयामाससर्वेशंपुष्पधूपैर्मनोरमैः १ परित्यक्तान्यविषयंमनस्तत्रनिवेश्यसः । ब्र ह्मभूतेचिरंस्थित्वाविररामसमाधितः २ कृतकृत्यमिवात्मानंमन्यमानोमहामते । आजगामरथंभूयोनिर्गम्ययमुनांभसः ३ रामकृष्णौचददृशेय थापूर्वमवस्थितौ । विस्मिताक्षस्तदाक्रूरस्तंचकृष्णोऽभ्यभाषत ४ नूनंतेदृष्टमाश्चर्यमक्रूरयमुनाजले । विस्मयोत्फुल्लनयनोभवान्संलक्ष्यतेयतः ५ । । अक्रूरउवाच । । अंतर्जलेयदाश्चर्यंदृष्टंतत्रमयाच्युत । तदत्रैवहिपश्यामिमूर्तिमत्पुरतःस्थितम् ६ जगदेतन्महाश्चर्यंरूपंयस्यमहा त्मनः । तेनाश्चर्यपरेणाहंभवताकृष्णसंगतः ७ तत्किमेतेनमथुरांप्रयामोमधुसूदन । बिभेमिकंसाद्विग्जन्मपरपिंडोपजीविनाम् ८ इत्युक्त्वाचोद

षयत्वाद्भावाभावाधिष्ठानत्वाद्वा ५७ चतुर्व्यूहरूपंप्रणमति नमइति महाभारतोक्तचतुर्व्यूहेतुवासुदेवःपरंब्रह्म संकर्षणईश्वरः कालशक्त्याद्यात्माप्रद्युम्नः पुमान्व्यक्ताभिमानीअनिरुद्धइत्यु क्तम् क्वचितुअंतःकरणचतुष्काधिष्ठाताएषचतुर्व्यूहः ५८ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचमेअंशेअष्टादशोध्यायः १८ प्रदर्श्याश्चर्यमक्रूरेनिग्रहानुग्रहाविह रजकेमालिकेकृष्णोन्यदर्शय दितीर्यते १ २ ३ विस्मितेविलक्षणेअक्षिणीयस्यतथाभूतः तथापूर्वमवस्थितौरामकृष्णौददर्श ४ ५ अंतर्जलेयद्दृष्टंतदत्रचपश्यामि ६ तेनसर्वाश्चर्यपरेणआश्चर्यश्रेष्ठेनसंगतोऽस्मि तथा चांतर्जलेदृष्टमित्येतावन्मात्रंकिंपृच्छसीतिभावः ७ पुनरपिमोहायकिंचिद्विवक्षुंकृष्णमाह तत्किमेतेनेति एतादृशेनपुण्यतमेनसंवादादिविलंबेपिकंसाद्बिभेमिअतःपरपिंडैः परदत्तैरन्नैरुपजी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वितुंशीलंयेषांतेषामस्माकंजन्मधिक् ८ ९ कृष्णमायामोहितस्तौशिक्षयन्नाह पद्भ्यामिति १० युवयोःकृतेयुष्मन्निमित्तेनिरस्यतेआक्षिप्यते ११ १२ १३ तौरजकंवस्त्रनिर्णेजकंदृष्ट्वा वासांसिअयाचेतांप्रार्थितवंतौ १४ कंसस्यप्रसादेनारूढः विस्मयहेतुर्गर्वोयेनसः १५ १६ १७ १८ १९ २० प्रसादपरमौअनुग्रहपरौ २१ कामतस्तयोरिच्छातःपुष्पाणिददौ

यामासतान्हयान्वातरंहसः । संप्राप्तश्चापिसायाह्नेसोक्रूरोमथुरांपुरीम् ९ विलोक्यमथुरांकृष्णंरामंचाहसयादवः । पद्भ्यांयातंमहावीर्यौरथेनैकोविशाम्यहम् १० गंतव्यंवसुदेवस्यनोभवद्भ्यांतथागृहम् । युवयोर्हिकृतेवृद्धःसकंसेननिरस्यते ११ । पराशरउवाच । इत्युक्त्वाप्रविवेशाथसोऽक्रूरोमथुरांपुरीम् ।प्राविष्टौरामकृष्णौचराजमार्गमुपागतौ १२स्त्रीभिर्नरैश्चसानंदलोचनैरभिवीक्षितौ।जग्मतुर्लीलयावीरौप्राप्तौबालगजाविव १३ भ्रममाणौतुतौदृष्ट्वारजकंरंगकारकम् । अयाचेतांसुरूपाणिवासांसिरुचिराणितौ १४ कंसस्यरजकःसोऽथप्रसादारूढविस्मयः । बहून्याक्षेपवाक्यानिप्राहोच्चैरामकेशवौ १५ ततस्तलप्रहारेणकृष्णस्तस्यदुरात्मनः। पातयामासकोपेनरजकस्यशिरोभुवि १६ हत्वादायचवस्त्राणिपीतनीलांबरौततः । कृष्णरामौमुदायुक्तौमालाकारगृहंगतौ १७ विकासिनेत्रयुगलोमालाकारोतिविस्मितः । एतौकस्यकुतोवैतौमैत्रेयाचिंतयत्ततः १८ पीतनीलांबरधरौतौदृष्ट्वातुमनोहरौ । सतर्कयामासतदाभुवंदेवावुपागतौ १९ विकासिमुखपद्माभ्यांताभ्यांपुष्पाणियाचितः । भुवंविष्टभ्यहस्ताभ्यांपस्पर्शशिरसामहीम् २० प्रसादपरमौनाथौममगेहमुपागतौ । धन्योऽहमर्चयिष्यामीत्याहतौमाल्यजीवनः २१ ततःप्रहृष्टवदनस्तयोःपुष्पाणिकामतः । चारूण्येतानिचैतानिप्रददौसविलोभयन्२२पुनःपुनःप्रणम्यासौमालाकारोनरोत्तमौ।ददौपुष्पाणिचारूणिगंधवंत्यमलानिच२३मालाकारायकृष्णोऽपिप्रसन्नःप्रददौवरम् । श्रीस्त्वांमत्संश्रयाभद्रनकदाजित्त्यजिष्यति २४ बलहानिर्नतेसौम्यधनहानिरथापिवा । यावद्दिनानितावच्चननशिष्यतिसंततिः २५ भुक्त्वाचविपुलान्भोगान्त्वमंतेमत्प्रसादतः । ममानुस्मरणंप्राप्यदिव्यंलोकमवाप्स्यसि २६ धर्मेमनश्चतेभद्रसर्वकालंभविष्यति । युष्मत्संततिजातानामायुर्दीर्घंभविष्यति २७ नोपसर्गादिकंदोषंयुष्मत्संततिसंभवः । अवाप्स्यतिमहाभागयावत्सूर्योभविष्यति २८ । । पराशरउवाच । । इत्युक्त्वातद्गृहात्कृष्णोबलदेवसहायवान् । निर्जगाममुनिश्रेष्ठमालाकारेणपूजितः २९ । । इतिश्रीविष्णुपुराणेपंचमेअंशेएकोनविंशतितमोध्यायः । । १९ । । पराशरउवाच । । राजमार्गेततःकृष्णःसानुलेपनभाजनाम् । ददर्शकुब्जा

चारूण्येतानिइतोप्येतानिचारूणीतिप्रलोभयन् २२ २३ मत्संश्रयामद्वक्षसिस्थितानत्यजिष्यतिनत्यक्ष्यतिइत्युक्त्वात्मनोलक्ष्मीपतित्वंबोधयन्तस्यसामान्यदेवताबुद्धिंनिराकरोति २४ यावद्दिनानियावत्सूर्यंननशिष्यतिननंक्ष्यति २५ २६ २७ वरबाहुल्यकथनंपुष्पैरर्चनंहरेरतिपरितोषायेतिसूचनार्थम् २८ इतिश्रीविष्णुपुराणेपंचमेअंशेएकोनविंशतितमोध्यायः १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंधदानधनुर्भंगौहस्तिचाणूरमुष्टिकाः हताःकंसश्चविंशोक्ताःपुत्रपित्रोर्नतिस्तुती १ अनुलेपनभाजनसहितांकुब्जांददर्श नवंयौवनमवस्थागोचरोविषयोयस्यास्तत्रवर्तमानामित्यर्थः १ २ तस्य दर्शनेनबलात्कृताआकृष्टाचित्तासतीप्राह ३ नैकवक्रेतिविख्यातांअनुलेपनकर्मणिगंधसाधनेकंसेननियोजितांनियुक्ताम् ४ अन्येनपिष्टंगंधवस्तुयोगेनसंमर्दितंकंसस्यप्रीतयेनभवतीत्यतो हमस्यकंसस्यप्रसादधनभाजनंप्रीतिदानपात्रं ५ ६ ७ भक्तिच्छेदानुलिप्तांगौतत्तदंगेषुअनुरूपगंधद्रव्यैःपत्रभंगरचनयाअनुलिप्तदेहौ अतएवसेंद्रचापसितासितांबुदोपमा ८ अनुलेपन स्यसद्यएवकियत्फलंदर्शितवानित्याह ततस्तामितिसार्धेन उल्लापनविधानवित्ऋजुकरणविधानज्ञः मध्यमातर्जनीरूपद्व्यंगुलोपलक्षितेनाग्रपाणिनापाण्यग्रेणचिबुकेमुखाधस्तादुल्लाप्यउद्धृ

मायांतींनवयौवनगोचराम् १ तामाहललितंकृष्णःकस्येदमनुलेपनम् । भवत्यानीयतेसत्यंवदेंदीवरलोचने २ सकामेनैवसाप्रोक्तासानुरागाह रिंप्रति । प्राहसाललितंकुब्जातद्दर्शनबलात्कृता ३ कांतकस्मान्नजानासिकंसेनाभिनियोजिताम् । नैकवक्रेतिविख्यातामनुलेपनकर्मणि ४ नान्यपि ष्टंहिकंसस्यप्रीतयेह्यनुलेपनम् । भवत्यहमतीवास्यप्रसादधनभाजनम् ५ । । श्रीकृष्णउवाच । । सुगंधमेतद्राजार्हंरुचिरंरुचिरानने । आव योर्गात्रसदृशंदीयतामनुलेपनम् ६ । । पराशरउवाच । । श्रुत्वातदाहसाकृष्णंगृह्यतामितिसादरम् । अनुलेपनंचप्रददौगात्रयोग्यमथोभ योः ७ भक्तिच्छेदानुलिप्तांगौततस्तौपुरुषर्षभौ । सेंद्रचापौविराजेतांसितकृष्णाविवांबुदौ ८ ततस्तांचिबुकेशौरिरुल्लापनविधानवित् । उल्लाप्य तोलयामासद्व्यंगुलेनाग्रपाणिना ९ चकर्षपद्भ्यांचतदाऋजुत्वंकेशवोऽनयत् । ततःसाऋजुतांप्राप्तायोषितामभवद्वरा १० विलासललितंप्राहप्रे मगर्भभरालसम् । वस्त्रेप्रगृह्यगोविंदंव्रजगेहंममेतिवै ११ आयास्येभवतीगेहमितितांप्रहसन्हरिः । विससर्जजहासोच्चैरामस्यालोक्यचाननम् । १२ भक्तिच्छेदानुलिप्तांगौनीलपीतांबरावुभौ। धनुःशालांततोयातौचित्रमाल्योपशोभितौ १३ आयोगवंधनूरत्नंताभ्यांपृष्टैस्तुरक्षिभिः । आख्या तंसहसाकृष्णोगृहीत्वापूरयद्धनुः १४ ततःपूरयतातेनभज्यमानंबलाद्धनुः । चकारातिमहाशब्दंमथुरातेनपूरिता १५ अभियुक्तौततस्तौतुभग्नेध नुषिरक्षिभिः । रक्षिसैन्यंनिकृत्योभौनिष्क्रांतौकार्मुकालयात् १६ अक्रूरागमवृत्तांतमुपलभ्यतथाधनुः । भग्नंश्रुत्वाथकंसोऽपिप्राहचाणूरमुष्टिकौ ।

त्य उत्पाट्येतिपाठेसएवार्थः तोलयामासउर्ध्वींचकार ९ तदैवपद्भ्यांचतत्पादयोश्चकर्षअधःस्तंभितवान् एवंताम्ऋजुत्वमनयत् १० विलासेनसाकूतकटाक्षादिनालालितंयथाभवत्येवंप्राह किंकृत्वाप्रेमगर्भभरालसंअंतर्गर्भितप्रेमातिशयेनमंथरंयथास्यादेवंवस्त्रेप्रगृह्य ११ अनुग्रहमेवानुरागमियंमन्यमानामुह्यतीतिप्रहसन्आयास्यइत्युक्त्वाविससर्जप्रस्थापितवान् अनंतरंचास मयएववस्त्रांतकर्षणेनकामातुरत्वंदृष्ट्वारामस्यमुखंकटाक्षभंग्याआलोक्यजहास १२ १३ आयोगवसंज्ञंधनूरत्नंपृष्टैःरक्षिभिराख्यातंतद्धनुर्गृहीत्वाआपूरयदाकर्णमाकृष्टवान् आयागंतदिति पाठेअभिमुख्येनप्राप्तयागंपूजायामुद्देश्यमित्यर्थः आयोग्यमितिपाठेआसमंताद्बहुभिर्गृहीतुंयोग्यमित्यर्थः १४ मथुरातेनपूरितेति रामकृष्णागमंकंसेक्रूरेणकथितंमृदु धनुर्भंगमहाध्वानैरन्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वादीत्स्वयंहरिः १५ अभियुक्तौआक्षिप्तौअवरुद्धावितिवा १६ १७ १८ १९ न्यायतोमल्लशास्त्रोक्तमार्गेण अन्यायतस्तद्विरुद्धेन सामान्यंसाधारणंअर्धराज्यंवादास्यामीत्यर्थः २० मल्लावा दिश्यततोहस्तिपंप्रोवाच २१ २२ उपाकृतान्कल्पितान् २३ सामान्यराजमंचेषुमहीभृतआरूढाः २४ मल्लानांप्राश्निकाःयुक्तायुक्तपरीक्षकास्तेषांवर्गःसमूहः २५ २६ मंचप्रांतेष्वित्यु

१७। कंसउवाच। गोपालदारकौप्राप्तौभवद्भ्यांतौममाग्रतः। मल्लयुद्धेनिहंतव्यौममप्राणहरौहितौ १८ नियुद्धेतद्विनाशेनभवद्भ्यांतोषितोह्यहम्। दास्याम्यभिमतान्कामान्नान्यथैतन्महाबलौ १९ न्यायतोन्यायतोवापिभवद्भ्यांतौममाहितौ। हंतव्यौतद्वधाद्राज्यंसामान्यंवोभविष्यति २० इत्यादिश्यततोमल्लावाहूयैवाथहस्तिपम्। प्रोवाचोच्चैस्त्वयामल्लसमाजद्वारिकुंजरः २१ स्थाप्यःकुवलयापीडस्तेनतौगोपदारकौ। घातनीयौनियुद्धायरंगद्वारमुपागतौ २२ तमथाज्ञाप्यदृष्ट्वाचमंचान्सर्वानुपाकृतान्। आसन्नमरणःकंसःसूर्योदयमुदैक्षत २३ ततःसमस्तमंचेषुनागरःसतदाजनः। राजमंचेषुचारूढाःसहभृत्यैर्महीभृतः २४ मल्लप्राश्निकवर्गश्चरंगमध्यसमीपतः। कृतःकंसेनकंसश्चतुंगमंचेव्यवस्थितः २५ अंतःपुराणांमंचाश्चतथान्येपरिकल्पिताः। अन्येचवारमुख्यानामन्येनगरयोषिताम् २६ नंदगोपादयोगोपामंचेष्वन्येष्ववस्थिताः। अक्रूरवसुदेवौचमंचप्रांतेष्ववस्थितौ २७ नागरीयोषितांमध्येदेवकीपुत्रगृद्धिनी। अंतकालेचपुत्रस्यद्रक्ष्यामिरुचिरंमुखम् २८ वाद्यमानेषुतूर्येषुचाणूरेचातिवल्गति। हाहाकारपरेलोकेआस्फोटयतिमुष्टिके २९ हत्वाकुवलयापीडंदृष्ट्वारोहप्रचोदितम्। मदासृगनुलिप्तांगौगजदंतवरायुधौ ३० मृगमध्येयथासिंहौगर्वलीलावलोकिनौ। प्रविष्टौसुमहारंगंबलदेवजनार्दनौ ३१ हाहाकारोमहाञ्जज्ञेसर्वरंगेष्वनंतरम्। कृष्णोऽयंबलभद्रोऽयमितिलोकस्यविस्मयात् ३२ सोयंयेनहताघोरापूतनासानिशाचरी। क्षिप्तंतुशकटंयेनहतौचयमलार्जुनौ ३३ सोयंयःकालियंनागंननर्तारुह्यबालकः। धृतोगोवर्धनोयेनसप्तरात्रंमहागिरिः ३४ अरिष्टोधेनुकःकेशीलीलयैवमहात्मना। निहतायेनदुर्वृत्तादृश्यतांसोयमच्युतः ३५ अयंचास्यमहाबाहुर्बलभद्रोऽग्रजोऽग्रतः। प्रयातिलीलयायोषिन्मनोनयननंदनः ३६ अयंसकथ्यतेप्राज्ञैःपुराणार्थावलोकिभिः। गोपालोयादववंशमग्नमभ्युद्धरिष्यति ३७ अयंससर्वभूतस्यविष्णोरखिलजन्मनः। अवतीर्णोमहीमंशोनूनंभारहरोभुवः ३८ इत्येवंवर्णितेपौरैरामेकृष्णेचतत्क्षणात्। उरस्ततापदेव

क्त्याअक्रूरवसुदेवयोर्भाव्यर्थज्ञानेदिदृक्षाभावःसूचितः २७ पुत्रगृद्धिनीपुत्रक्षेमाभिकांक्षिणीपुत्रस्यमुखंद्रक्ष्यामीतिस्थिता २८ तदाचवाद्यादिषुक्रियमाणेषुहास्तिनंहत्वासगर्वरामकृष्णौरंगंप्रविष्टावित्याह वाद्यमानेष्वितित्रिभिः २९ मदासृग्भ्यांमदेनरक्तेनचचर्चितगात्रौ गजदंतावेववरायुधेययोस्तौ ३० ३१ इत्येवंकृष्णोयंबलभद्रोयमित्यादिरूपेणपौरैरामेकृष्णेचवर्णितेसतिदेवक्याउरस्ततापसंतप्तमभूदितिसार्धसप्तानामन्वयः ३२ ३३ ३४ ३५ ३६ ३७ सर्वभूतस्यसर्वात्मनः अत्रहेतुः अखिलानांजन्मयस्मात्तस्यांशःभारहरःभारंहर्तुमवतीर्णइति ३८ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३९ पुत्रस्याननविलोकनेविषयेमहोत्सवमिवालोक्यानुभूय विलोकनमितिपाठेपुत्रस्याननंपुत्रकर्तृकंविलोकनंचालोक्यदृष्ट्वेत्यर्थः ४० राजांतःपुरयोषितांसमूहइतिशेषः ४१ स्त्रीणांवि स्मयोक्तिमाह सख्यइतिनवभिः गजयुद्धकृतेनायासेनस्वेदांबुकणिकाभिराचितंव्याप्तंअवश्यायजलोक्षितांहिमवारिसिक्तंशरत्कालीनमंभोजंपरिभूयशोभाधिक्येनतिरस्कृत्यस्थितंमुखंपश्यतते नचदृशोजन्मसफलंक्रियतामितिद्वयोरन्वयः परिभूयास्थिरमितिपाठेदृशअस्थिरंअस्थिरत्वंपरिभूयदृशांस्थिरीकृत्यपश्यततेनचात्मनोजन्मसफलंक्रियताम् अत्रार्थेइवेत्यध्याहार्यंपूर्वत्र ४२

क्याःस्नेहस्रुतपयोधरम् ३९ महोत्सवमिवालोक्यपुत्राननविलोकने । युवेववसुदेवोभूद्विहायाभ्यागतांजराम् ४० विस्तारिताक्षियुगलोराजां तःपुरयोषिताम् । नागरस्त्रीसमूहश्चद्रष्टुंनविररामतम् ४१ सख्यःपश्यतकृष्णस्यमुखमत्यरुणेक्षणम् । गजयुद्धकृतायासस्वेदांबुकणिकाचि तम् ४२ विकासिशरदंभोजमवश्यायजलोक्षितम् । परिभूयस्थितंजन्मसफलंक्रियतांदृशः ४३ श्रीवत्सांकंमहद्धामबालस्यैतद्विलोक्यताम् । वि पक्षक्षपणंवक्षोभुजयुग्मंचभामिनि ४४ किंनपश्यसिदुग्धेंदुमृणालधवलाननम् । बलभद्रमिमंनीलपरिधानमुपागतम् ४५ वल्गतामुष्टिकेनै तच्चाणूरेणतथासखि । क्रियतेबलभद्रस्यहास्यमीषद्विलोक्यताम् ४६ सख्यःपश्यतचाणूरानियुद्धार्थमयंहरिः । समुपैतिनसंत्यत्रकिंवृद्धायुद्धकारि णः ४७ क्वयौवनोन्मुखीभूतसुकुमारतनुर्हरिः । क्ववज्रकठिनाभोगिशरीरोयंमहासुरः ४८ इमौसुललितौयुद्धेवर्तेतेनवयौवनौ । दैतेयमल्लाश्चाणूरप्र मुखास्त्वतिदारुणाः ४९ नियुद्धप्राश्निकानांतुमहानेषव्यतिक्रमः । यद्बालबलिनोर्युद्धंमध्यस्थैःसमुपेक्ष्यते ५० । । पराशरउवाच । । इत्थं पुरस्त्रीलोकस्यवदतश्चालयन्भ्रुवम् । ववल्गबद्धकक्षोंतर्जनस्यभगवान्हरिः ५१ बलभद्रोपिचास्फोट्यववल्गललितंयदा । पदेपदेतदाभूमिर्नशी र्णायत्तदद्भुतम् ५२ चाणूरेणततःकृष्णोयुयुधेमितविक्रमः । नियुद्धकुशलोदैत्योबलदेवेनमुष्टिकः ५३ सन्निपातावधूतैश्चचाणूरेणसमंहरिः । क्षे पणैर्मुष्टिभिश्चैवकीलवज्रनिपातनैः ५४ पादोद्धूतैःप्रसृष्टाभिस्तयोर्युद्धमभून्महत् । अशस्त्रमतिघोरंतुतयोर्युद्धंसुदारुणम् । स्वबलप्राणनिष्पा द्यंसमाजोत्सवसन्निधौ ५५ यावद्यावच्चचाणूरोयुयुधेहरिणासह । प्राणहानिमवापाद्र्यांतावत्तावल्लवाल्लवम् ५६ कृष्णोपियुयुधेतेनलीलयैवजगन्म

४३ महतोलक्ष्म्यादेर्धामआश्रयभूतंवक्षः जगद्धामेतिवापाठः विपक्षक्षपणंभुजयुग्मंचविलोक्यताम् ४४ ४५ वल्गताप्रनृत्यता ४६ युद्धकारिणःकंसस्यवृद्धाबहुज्ञाःकिंनसंति युद्धका रिणइतिवृद्धविशेषणंवा ४७ अत्रहेतुमाह क्वेतित्रिभिः वज्रवत्कठिनंआभोगिविस्तारिचशरीरंयस्य ४८ ४९ यद्यस्मात्समुपेक्ष्यतेनवार्यते ५० वदतःसतःबद्धकक्षःबद्धपरिकरःजनस्यांतः रंगमध्येववल्गननर्त ५१ ५२ नियुद्धकुशलइतिव्यत्ययेनचाणूरबलयोर्विशेषणम् ५३ सन्निपातःपरस्परसंघर्षः अवधूतानिसंश्लिष्टांगमोचनानितैःक्षेपणैराकृष्यनिरसनैर्मुष्टिभिर्मुष्टिघातैः कीलनिपातनानिकफोणिघाताःवज्रनिपातनानिचअरत्निद्वयघातास्तैःयद्वाकीलकवद्वज्रवच्चनिपातनंयेषांतथाभूतैर्मुष्टिभिः ५४ पादोद्धूतैःपरस्परंपादकृतोद्धूननैः प्रसृष्टाभिःसर्वांगसंश्ले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११ १२ यादवानामल्पंबलंतैर्यदाजितंतच्चक्रिणःसन्निधिमाहात्म्यमित्यर्थः १३ ननुकिमत्रचक्रिसान्निध्यमाहात्म्यंस्वयमेवास्त्रबलेनानिर्जितत्वात्तत्राह मनुष्यधर्मशीलस्येति १४ लीलामेवाह मनसैवेतियावत्समाप्ति सहसैवेतिवापाठः १५ १६ उपप्रदानंदानम् १७ छंदतःइच्छातः १८ ॥ ॥ इतिश्रीविष्णुपुराणेपंचमेअंशेवैष्णवाकूतचंद्रिकायांद्वाविंशोध्यायः २२ ॥ ॥ छ ॥ मुचुकुंदेनयवनोहतोदृष्ट्वैवगर्गभूः कृष्णस्तुतोत्रकृष्णेननिर्मिताद्वारकोच्यते पूर्वाध्यायेक्वचित्पलायनंकरोतीत्युक्तंतदेवगर्गाख्यायिकयानिरूपयति गर्गमित्यादिनामथुरांपुनराययाविल्यंतेन गर्गश्यालंशिशिरायणःभविष्यच्छालत्वात्साहिभगिनींगौरींदातुकामस्तस्यपौरुषेजिज्ञासांचक्रे नचस्कंदेथपौरुषइतिहरिवंशोक्तेः तेनश्यालेनस

तःपतेः । अस्त्राण्यनेकरूपाणियदरातिषुमुंचति १४ मनसैवजगत्सृष्टिसंहारंचकरोतियः । तस्यारिपक्षक्षपणेकियानुद्यमविस्तरः १५ तथायेयेमनुष्याणांधर्मास्तदनुवर्तनम् । कुर्वन्बलवतासंधिंहीनैर्युद्धंकरोत्यसौ १६ सामचोपप्रदानंचतथाभेदंप्रदर्शयन् । करोतिदंडपातंचक्वचिदेवपलायनम् १७ मनुष्यदेहिनांचेष्टामित्येवमनुवर्ततः । लीलाजगत्पतेस्तस्यछंदतःसंप्रवर्तते १८ । । इतिश्रीविष्णुपुराणेपंचमेअंशेद्वाविंशोध्यायः । २२ । । पराशरउवाच । गर्गगोष्ठेद्विजःश्यालःषंढइत्युक्तवान्द्विज । यदूनांसन्निधौसर्वेजहसुर्यादवास्ततः १ ततःकोपसमाविष्टोदक्षिणापथमेत्यसः।सुतमिच्छंस्तपस्तेपेयदुचक्रभयावहम् २ आराधयन्महादेवंसोऽयश्चूर्णमभक्षयत् । ददौवरंचतुष्टोऽस्मैवर्षेद्वाहशमेहरः ३ संभोजयामासचतंयवनेशोह्यनात्मजः । तद्योषित्संगमाच्चास्यपुत्रोभूदलिसप्रभः ४ तंकालयवनंनामराज्येस्वेयवनेश्वरः । अभिषिच्यवनंयातोवज्राग्रकठिनोरसम् ५ सतुवीर्यमदोन्मत्तःपृथिव्यांबलिनोनृपान् । पप्रच्छनारदश्चास्मैकथयामासयादवान् ६ म्लेच्छकोटिसहस्राणांसहस्रैःसोभिसंवृतः । गजाश्वरथसंपन्नैश्चकारपरमोद्यमम् ७ प्रययौचाव्यवच्छिन्नोऽछिन्नयानोदिनेदिने । यादवान्प्रतिसामर्षोमैत्रेयमथुरांपुरीम् ८ कृष्णोपिचिंतयामासक्षपितंयादवंबलम् । यवनेनरणेगम्यंमागधस्यभविष्यति ९ मागधस्यबलंक्षीणंसकालयवनोबली । हंतातादिदमायातंयदूनांव्यसनंद्विधा १० तस्माद्दुर्गंकरिष्यामियदूनामतिदुर्जयम् । स्त्रियोपियत्रयुध्येयुःकिंपुनर्वृष्णिपुंगवाः ११ मयिमत्तेप्रमत्तेवासुप्तेप्रवसितेतथा । यादवाभिभवंदुष्टामाकुर्वंत्वरयोधिकाः १२

र्वंयादवसन्निधौगर्गप्रतिषंढोऽपुमानित्युक्तेयादवाजहसुरित्यन्वयः १ ततश्चयदुसमूहस्यभयावहंसुतमिच्छंस्तपस्तेपे २ तदर्थंचमहादेवमाराधयन्व्रतत्वेनायसःलोहस्यचूर्णमभक्षयत् ३ तंचलब्धवरंज्ञात्वास्वगृहंगतंअनात्मजोऽपुत्रोयवनेशःस्वभार्यायांपुत्रोत्पादनायप्रार्थयिष्यन्संभोजयामासभोजनेनसंवर्धयामास सभाजयामासेतिपाठेपूजयामासेत्यर्थः अलिसप्रभः मधुकरतुल्यकांतिः ४ वज्राग्रवत्कठिनमुरोयस्यतम् ५ ६ ७ अव्यवच्छिन्नःकेनाप्यप्रतिहतः अच्छिन्नयानःएकपंक्तिरूपसैन्यसंतानः अव्यवच्छिन्नमितिपाठेश्रांतंश्रांतंवाहनंविवाहायवाहनांतरेणपूर्वमेवतत्रतत्रप्रस्थापितेनअव्यवच्छिन्नंयथाभवत्येवंत्वरयामथुरांप्रययाविल्यर्थः ८ कृष्णोपीति एकतःकालयवनेऽन्यतोमागधेप्राप्तेकृष्णश्चिंतयामासयवनेनसमंप्रथमेरणेतेनक्षपितंक्षीणप्रायंयादवबलम् मागधस्यगम्यंसाध्यंभविष्यति मागधस्यमागधेनसमंप्रथमेरणेतेनचक्षीणंबलंकालयवनोहंताहनिष्यति तदेवमुभयतोयदूनांद्विधाव्यसनंप्राप्तमितिद्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योरन्वयः ९ १० तस्माद्दुर्गतत्करिष्यामियत्रस्त्रियोपितद्बलेनसहयुध्येयुः ११ त्वयिस्थितेकिंदुर्गेणेत्यतआह मयीति मत्तेमद्यादिना प्रमत्तेऽनवहितेच प्रवसिगतेअन्यत्रगते १२ द्वादशयोजनानिपयोनिधियाचेतत्रपुरींनिर्ममे १३ महान्वप्रःप्राकारामूलोच्चभूमिर्यस्याः प्राकारैर्दुर्गगृहैश्चसंकीर्णा १४ १५ आवासितेपुरमध्येनिवेशिते तंवासुदेवम् १६ लक्षणैर्नार दप्रोक्तैर्वासुदेवंज्ञात्वानिश्चित्यअनुयातःअन्वधावत् योवासुदेवःमहायोगिचेतोभिर्नप्राप्यतेतम् १७ १८ १९ तत्क्रोधजेनमुचुकुंदक्रोधोद्दीपितेनस्वदेहजेनैवेत्यर्थः २० कथंभस्मीभूतस्त

इतिसंचिंत्यगोविंदोयोजनानिमहोदधिम् । ययाचेद्वादशपुरींद्वारकांतत्रनिर्ममे १३ महोद्यानांमहावप्रांतडागशतशोभिताम् । प्राकारगृहसंबाधामिंद्रस्येवामरावतीम् १४ मथुरावासिनंलोकंतत्रानीयजनार्दनः । आसन्नेकालयवनेमथुरांचस्वयंययौ १५ बहिरावासितेसैन्येमथुरायांनिरायुधः । निर्जगामसगोविंदोददृशेयवनश्चतम् १६ सज्ञात्वावासुदेवंतंबाहुप्रहरणोनृपः । अनुयातोमहायोगिचेतोभिःप्राप्यतेनयः १७ तेनानुयातःकृष्णोपिप्रविवेशमहागुहाम् । यत्रशेतेमहावीर्योमुचुकुंदोमहेश्वरः १८ सोपिप्रविष्टोयवनोदृष्ट्वाशय्यागतंनरम् । पादेनताडयामासकृष्णंमत्वासुदुर्मतिः १९ दृष्टमात्रश्चतेनासौजज्वालयवनोऽग्निना । तत्क्रोधजेनमैत्रेयभस्मीभूतःसतत्क्षणात् २० सहिदेवासुरेयुद्धेगतोजित्वामहासुरान् । निद्रार्तःसुमहाकालंनिद्रांवव्रेवरंसुरान् २१ प्रोक्तश्चदेवैःसंसुप्तंयस्त्वामुत्थापयिष्यति । देहजेनाग्निनासद्यःसतुभस्मीभविष्यति २२ एवंदग्ध्वासतंपापंदृष्ट्वाचमधुसूदनम् । कस्त्वमित्याहसोप्याहजातोहंशशिनःकुले २३ वसुदेवस्यतनयोयदुवंशसमुद्भवः । मुचुकुंदोपितत्रासौवृद्धगर्गवचःस्मरन् २४ संस्मृत्यप्रणिपत्यैनंसर्वंसर्वेश्वरंहरिम् । प्राहज्ञातोभवान्विष्णोरंशस्त्वंपरमेश्वरः २५ पुरागर्गेणकथितमष्टाविंशतिमेयुगे । द्वापरांतेहरेर्जन्मयदुवंशेभविष्यति २६ सत्वंप्राप्तोनसंदेहोमर्त्यानामुपकारकृत् । तथाहिसुमहत्तेजोनालंसोढुमहंतव २७ तथाहिसजलांभोदनादधीरतरंतव । वाक्यंनमतिचैवौर्वीयुष्मत्पादप्रपीडिता २८ देवासुरमहायुद्धेदैत्यसैन्यमहाभटाः । नसेहुर्ममयत्तेजस्त्वत्तेजोनसहाम्यहम् २९ संसारपतितस्यैकोजंतोस्त्वंशरणंपरम् । सप्रसीदप्रपन्नार्तिहंतर्हरममाशुभम् ३० त्वंपयोनिधयःशैलाःसरितस्त्वंवनानिच । मेदिनीगगनंवायुरापोग्निस्त्वंतथामनः ३१ बुद्धिरव्याकृतंप्राणाःप्राणेशस्त्वंतथापुमान् । पुंसःपरतरंयच्चव्याप्यजन्मविकल्पवत् ३२ शब्दादिहीनमजरममेयंक्षयवर्जितम् । अवृद्धिनाशंतद्ब्रह्मत्वमाद्यंतवि

त्राह सहीतिद्वाभ्याम् २१ २२ २३ भगवताजातोहामित्यादिनासजन्मानिकथितेमुचुकुंदोवृद्धगर्गवचःसर्वंसंस्मृत्यसर्वेषामिंद्रादीनामीश्वरंकृष्णंप्राहप्रत्यभिज्ञामुक्तवान्तुष्टावचज्ञातोभवानित्यादिनायावदध्यायसमाप्ति यस्यहरेर्जन्मभविष्यतीतिमेगर्गेणकथितंसहरिस्त्वमेवज्ञातःप्रत्यभिज्ञातः२४ २५ २६ तत्रलिंगान्याह तथाहीतिसार्धद्वाभ्याम् २७ २८ २९ हेप्रपन्नार्तिहंतःहर्तेतिवापाठः यतएवमतोममाशुभंहर ३० प्रपन्नार्तिहरत्वेहेतुमाह त्वंपयोनिधयइत्यादिनानास्तिकिंचित्त्वयाविनेत्यंतेन३१ व्यापिअधिष्ठानतयासर्वकार्यानुगतंअजन्मविकल्पवज्जन्मरूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पन्नज्ञानौअर्थाद्यदुचक्रंचतथाभूतंदृष्ट्वातयोर्यदुचक्रस्यचमोहायमायांविस्तारितवान् १ २ अपूजनंपूजनेतरत्कुर्वतामित्यर्थः तत्खंडमायुषस्तावत्कालजीवनंव्यर्थं वृथातीर्थंवृथास्नानंवृथाजप्तं वृथाहुतम् सजीवतिवृथाब्रह्मन्यस्यमातासुदुःखितेतिनृसिंहपुराणोक्तेः ३ ४ अतिक्रमस्यकृतंकरणं वीर्यंबलंप्रतापःपराभिभवासहिष्णुतातास्याम् ५ पौराणांमाननंसंमाननम् ६ ७ ८

उवाचचांबभोस्तातचिरादुत्कंठितेनमे । भवंतौकंसभीतेनदृष्टौसंकर्षणेनच २ कुर्वतांयातियःकालोमातापित्रोरपूजनम् । तत्खंडमायुषोव्यर्थंसा धूनामुपजायते ३ गुरुदेवद्विजातीनांमातापित्रोश्चपूजनम् । कुर्वतांसफलंजन्मजन्मिनांतातजायते ४ तत्क्षंतव्यमिदंसर्वमतिक्रमकृतंपितः । कंसवीर्य प्रतापाभ्यामावयोःपरवश्ययोः ५ । । पराशरउवाच । । इत्युक्त्वाथप्रणम्योभौयदुवृद्धाननुक्रमात् । यथावदभिपूज्याथचक्रतुःपौरमानन म् ६ कंसपत्न्यस्ततःकंसंपरिवार्यहतंभुवि । विलेपुर्मातरश्चास्यदुःखशोकपरिप्लुतः ७ बहुप्रकारमस्वस्थःपश्चात्तापातुरोहरिः । ताःसमाश्वास यामासस्वयमस्त्राविलेक्षणः ८ उग्रसेनंततोबंधान्मुमोचमधुसूदनः । अभ्यषिंचत्तथैवैनंनिजराज्येहतात्मजम् ९ राज्येभिषिक्तःकृष्णेनयदुसिंहःसुत स्यसः । चकारप्रेतकार्याणियेचान्येतत्रपातिताः १० कृतौर्ध्वदैहिकंचैनंसिंहासनगतंहरिः । उवाचाज्ञापयविभोयत्कार्यमविशंकया ११ ययाति शापाद्वंशोयमराज्यार्होपिसांप्रतम् । मयिभृत्येस्थितेदेवानाज्ञापयतुकिंनृपैः १२ इत्युक्त्वासोस्मरद्वायुमाजगामसतत्क्षणात् । उवाचचैनंभगवा न्केशवःकार्यमानुषः १३ गच्छेंद्रंब्रूहिवायोत्वमलंगर्वेणवासव । दीयतामुग्रसेनायसुधर्माभवतासभा १४ कृष्णोब्रवीतिराजार्हमेतद्रत्नंमतंमम । सुधर्माख्यासभारत्नंयस्यांयदुभिरासितुम् १५ । । पराशरउवाच । । इत्युक्तःपवनोगत्वासर्वमाहशचीपतिम् । ददौसोपिसुधर्माख्यांसभां वायोःपुरंदरः १६ वायुनाचाहृतांदिव्यांतेसभांयदुपुंगवाः । बुभुजुःसर्वरत्नाढ्यांगोविंदभुजसंश्रयाः १७ विदिताखिलविज्ञानौसर्वज्ञानमयावपि शिष्याचार्यक्रमंवीरौख्यापयंतौयदूत्तमौ १८ ततःसांदीपनिंकाश्यमवंतिपुरवासिनम् । अस्त्रार्थेजग्मतुर्वीरौबलदेवजनार्दनौ १९ तस्याशिष्यत्वमभ्ये त्यगुरुवृत्तिपरौहितौ । दर्शयांचक्रतुर्वीरावाचारमखिलेजने २० सरहस्यंधनुर्वेदंससंग्रहमधीयताम् । अहोरात्रैश्चतुःषष्ट्यातदद्भुतमभूद्द्विज २१ सांदीपनिरसंभाव्यंतयोःकर्मातिमानुषम् । विचिंत्यतौतदामेनेप्राप्तौचंद्रदिवाकरौ २२ अस्त्रग्राममशेषंचप्रोक्तमात्रमवाप्यतौ । ऊचतुर्व्रियतांया

९ १० कृतमौर्ध्वदैहिकंश्राद्धादियेनतम् ११ मयिभृत्येभरणार्हेभ्रातुर्दौहित्रेसतिदेवानाज्ञापयतुनृपैस्तुतैराज्ञप्तैःकिमित्यनेनराजाज्ञापनोपलक्षितराजस्तवार्हत्वरूपचक्रवर्तित्वायोग्यत्व मेवराज्यानर्हत्वंयादवानामितिज्ञेयम् अतएवभगवताराजराजेश्वरत्वमेवांगीकृतम् १२ कार्येणदेवकार्येणनिमित्तेनमानुषः १३ वक्तव्यमाह अलंगर्वेतिपादोनद्वाभ्याम् अलंगर्वेणेत्यने नगोवर्धनोद्धरणवृत्तस्मरणम् १४ १५ १६ १७ विदितंविज्ञातमखिलंविज्ञानंशास्त्रंवायाभ्यांतौ तत्रहेतुः सर्वस्वरूपंज्ञानंब्रह्मतन्मयौ शिष्याचार्यक्रमंआचार्यवान्पुरुषोवेदेत्यादिश्रु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्युक्तम् १८ काश्यंकाश्यांभवम्१९ २० सरहस्यंअस्त्रमंत्रोपनिषत्सहितं संग्रहःअस्त्रप्रयोगःतत्सहितंचाधीतवंतौ २१ २२ २३ अतींद्रियमन्यत्रादृष्टपूर्वंकर्मशस्त्रग्रहणप्रयोगादिकम् २४ तथेत्युक्त्वासमुद्रंहंतुंगृहीतास्त्रौतौप्रतिमहोदधिरुवाचेत्यर्थः २५ २६ २७ २८ २९ यथापूर्वशरीरिणंयथाप्राचीनंशरीरंतादृक्शरीरयुक्तंमाययोत्पाद्यददौ ३० ३१ इतिश्रीविष्णवाकूतचं

तेदातव्यागुरुदक्षिणा २३ सोप्यतींद्रियमालोक्यतयोःकर्ममहामतिः । अयाचतमृतंपुत्रंप्रभासेलवणार्णवे २४ गृहीतास्त्रौततस्तौतुपाद्यपात्रोमहोदधिः । उवाचनमयापुत्रोहृतःसांदीपनेरिति २५ दैत्यःपंचजनोनामशंखरूपःसबालकम् । जग्राहसोस्तिसलिलेममैवारिनिषूदन २६ इत्युक्तोंतर्जलंगत्वाहत्वापश्चजनंचतम् । कृष्णोजग्राहतस्यास्थिप्रभवंशंखमुत्तमम् २७ तस्यनादेनदैत्यानांबलहानिरजायत । देवानांववृधेतेजोयात्यधर्मश्चसंक्षयम् २८ तंपांचजन्यमापूर्यगत्वायमपुरींहरिः । बलदेवश्चबलवाञ्जित्वावैवस्वतंयमम् २९ तंबालंयातनासंस्थंयथापूर्वशरीरिणम् । पित्रेप्रदत्तवान्कृष्णोबलश्चबलिनांवरः ३० मथुरांचततःप्राप्तावुग्रसेनेनपालिताम् । प्रहृष्टपुरुषस्त्रीकामुभौरामजनार्दनौ ३१ इतिश्रीविष्णुपुराणेपंचमे अंशेएकविंशोध्यायः । २१ । । ७ । । पराशरउवाच । । जरासंधसुतेकंसउपयेमेमहाबलः । अस्तिप्राप्तिंचमैत्रेयतयोर्भर्तृहणंपरम् १ महाबलपरीवारोमगधाधिपतिर्बली । हंतुमभ्याययौकोपाज्जरासंधःसयादवम् २ उपेत्यमथुरांसोथरुरोधमगधेश्वरः । अक्षौहिणीभिःसैन्यस्यत्रयोविंशतिभिर्वृतः ३ निष्क्रम्याल्पपरीवारावुभौरामजनार्दनौ । युयुधातेसमंतस्यबलिनौबलिसैनिकैः ४ ततोबलश्चकृष्णश्चमतिंचक्रेमहाबलः । आयुधानांपुराणानामादानेमुनिसत्तम ५ अनंतरंहरेःशार्ङ्गंतूणौचाक्षयसायकौ । आकाशादागतौविप्रतथाकौमोदकीगदा ६ हलंचबलभद्रस्यगगनादागतंज्वलत् । मनसाभिमतंविप्रसौनंदंमुसलंतथा ७ ततोयुद्धेपराजित्यससैन्यंमगधाधिपम् । पुरींविविशतुर्वीरावुभौरामजनार्दनौ ८ जितेतस्मिन्सुदुर्वृत्तेजरासंधेमहामुने । जीवमानेगतेकृष्णस्तंनामन्यतनिर्जितम् ९ पुनरप्याजगामाथजरासंधोबलान्वितः । जितश्चरामकृष्णाभ्यामपक्रांतोद्विजोत्तम १० दशचाष्टौचसंग्रामानेवमत्यंतदुर्मदः । यदुभिर्मागधोराजाचक्रेकृष्णपुरोगमैः ११ सर्वेष्वेवचयुद्धेषुयदुभिःसंपराजितः । अपक्रांतोजरासंधःस्वल्पसैन्यैर्बलाधिकः १२ यद्बलंयादवानांतैरजितंयदनेकशः । तत्तुसन्निधिमाहात्म्यंविष्णोरंशस्यचक्रिणः १३ मनुष्यधर्मशीलस्यलीलासाजग

द्रिकायांएकविंशतितमोध्यायः २१ ॥ ॥ ७ ॥ अष्टादशसुयुद्धेषुनिर्जितोगाज्जरासुतः द्वाविंशेकृष्णरामाभ्यांचक्राद्यस्त्रैरितीर्यते अस्तिप्राप्तिसंज्ञेजरासंधसुतेतयोर्भर्तृहणंकंसहंतारम् १ मागधाधिपतिर्जरासंधः सयादवंयादवैःसहितम् २ सैन्यस्यत्रयोविंशतिभिस्त्रयोविंशत्याअक्षौहिणीभिर्वृतः ३ बलिसैनिकैर्बलियोद्धृभिःसह ४ पुराणानांचक्रादिहलादीनामायुधानाम् ५ ६ ७ ८ तंजरासंधंनिर्जितंनामन्यत पुनरपितदागमनस्यावश्यंभाविलात् पाठांतरेजीवमानेकृष्णेगतेसतितेनजरासंधेनमयानिर्जितमितिस्वयमेवामन्यत ९ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पणैः सामान्यतोयुद्धंतयोर्दर्शयति अशस्त्रमिति ५५ तावत्तत्रापिलवाल्लवंप्रतिक्षणंप्राणहानिंबलहानिमवाप लवाल्लवमल्पमल्पमितिवा ५६ खेदाद्यःकोपस्तस्मान्निजशेखरकेसरं स्वशीर्षापीडभूतंकेसरंपुष्पंचालयताधुन्वता चालयतइतिपाठेतृतीयार्थेषष्ठी ५७ ५८ ५९ नकेवलंजयकिंतुदानवमिमंजहि अंतर्धिगतामेधादिव्यवहिताः ६० ६१ शतगुणंशतवार

यः । खेदाच्चालयताकोपान्निजशेखरकेसरम् ५७ बलक्षयंविवृद्धिंचदृष्ट्वाचाणूरकृष्णयोः । वारयामासतूर्याणिकंसःकोपपरायणः ५८ मृदंगादिषुवाद्येषुप्रतिषिद्धेषुतत्क्षणात् । खेसंगतान्यवाद्यंतदेवतूर्याण्यनेकशः ५९ जयगोविंदचाणूरंजहिकेशवदानवम् । इत्यंतर्धिगतादेवास्तदोचुस्तेचहर्षिताः ६० चाणूरेणचिरंकालंक्रीडित्वामधुसूदनः । उत्पाट्यभ्रामयामासतद्वधायकृतोद्यमः ६१ भ्रामयित्वाशतगुणंदैत्यमल्लममित्रजित् । भूमावास्फोटयामासगगनेगतजीवितम् ६२ भूमावास्फोटितस्तेनचाणूरःशतधाव्रजन् । रक्तस्रावमहापंकांचकारसतदाभुवम् ६३ बलदेवोपितत्कालंमुष्टिकेनमहाबलः । युयुधेदैत्यमल्लेनचाणूरेणयथाहरिः ६४ सोप्येनंमुष्टिनामूर्ध्निवक्षस्याहत्यजानुना । पातयित्वाधराषृष्ठेनिष्पिपेषगतायुषम् ६५ कृष्णस्तोशलकंभूयोमल्लराजंमहाबलः । वाममुष्टिप्रहारेणपातयामासभूतले ६६ चाणूरेनिहतेमल्लेमुष्टिकेचानिपातिते । नीतेक्षयंतोशलकेसर्वेमल्लाःप्रदुद्रुवुः ६७ ववल्गतुस्तदारंगेकृष्णसंकर्षणावुभौ । समानवयसोगोपान्बलादाकृष्यहर्षितौ ६८ कंसोपिकोपरक्ताक्षःप्राहोच्चैर्व्यापृतान्नरान् । गोपावेतौसमाजौघान्निष्क्राम्येतांबलादितः ६९ नंदोपिगृह्यतांपापोनिगडैरायसैरिह । अवृद्धार्हेणदंडेनवसुदेवोपिवध्यताम् ७० वल्गंतिगोपाःकृष्णेनयेचेमेसहिताःपुरः । गावोक्रियंतामेषांचयच्चान्यद्वसुकिंचन ७१ एवमाज्ञापयानंतुप्रहस्यमधुसूदनः । उत्पत्त्यारुह्यतंमंचंकंसंजग्राहवेगितः ७२ केशेष्वाकृष्यविचलत्किरीटमवनीतले । सकंसंपातयामासतस्योपरिपपातच ७३ निःशेषजगदाधारगुरुणापततोपरि । कृष्णेनत्याजितःप्राणानुग्रसेनात्मजोनृपः ७४ मृतस्यकेशेषुतदागृहीत्वामधुसूदनः । चकर्षदेहंकंसस्यरंगमध्येमहाबलः ७५ गौरवेणातिमहतापरिखातेनकृष्यता । कृताकंसस्यदेहेनवेगेनेवमहांभसः ७६ कंसेगृहीतेकृष्णेनतद्भ्राताभ्यागतोरुषा । सुनामाबलभद्रेणलीलयैवनिपातितः ७७ ततोहाहाकृतंसर्वमासीत्तद्रंगमंडलम् । अवज्ञयाहतंदृष्ट्वाकृष्णेनमथुरेश्वरम् ७८ कृष्णोपिवासुदेवस्यपादौजग्राहसत्वरम् । देव

म् ६२ ६३ तत्कालंतस्मिन्नेवकाले ६४ ६५ ६६ ६७ गोपानाकृष्यबलादानीयतैःसहववल्गतुःननृततुः ६८ व्यापृतान्युद्धेरंगाधिकृतान् समाजौघात्समाजानामनेकेषांसमूहात् ६९ ७० वसुधनं किंचनेत्युक्त्वौसर्वस्वंक्रियतामित्यर्थः ७१ स्वमृत्युमजानतोन्यशासनामीतिप्रहस्य ७२ निःशेषस्यजगतआधारेणसमंताद्धारणेनातिगुरुणा ७४ ७५ तेनदेहेनकृष्यताकृष्यमाणेनपरिखाकृता ७६ ७७ ७८ ७९ स्मृतजन्मोक्तवचनाविति स्तुतोहंयत्त्वयापूर्वंपुत्रार्थिन्यातदद्यते सफलंदेविसंजातंजातोहंयत्तवोदरादितियद्वचनं भगवताजन्मसमयेउक्तंतत्स्मृतंया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यांतौ ८० हेदेवानांप्रवरकेशवसीदतामस्माकंयदूनांप्रसीद यथावयोःप्रसादेनकृतःप्रत्युद्धारःसंसारतरणंयेनतस्यसंबोधनम् कृतोद्धारोसीतिपाठःसुगमः प्रवरइतिसविसर्गपाठेदेवानांप्रवरःप्र कृष्टोवरोभूभारहरणलक्षणोयथाकृतइतिशेषः तथावयोःकृतोद्धारोसीत्यर्थः ८१ नकेवलमावयोरुद्धारःकृतःकिंतुअस्मद्गृहावतारेणययातिशापदुष्टंकुलमेवपावितमित्याह आराधितइति ८२ दुर्वृत्तानांनिधनायत्वंस्वयमेवावतीर्णोनतुमत्पुत्रइत्याह त्वमंतरितिषड्भिः सर्वभूतानामंतर्जीवरूपेणावस्थितः तथासर्वेषुभूतेषुकारणतयाचावस्थितः तत्रहेतुःप्रवर्तेतेइति ८३ ८४ यत्त्वेतन्मम देवक्याश्चात्मजोयमितित्वयिप्रीत्यासापह्नवंभ्रांतियुक्तंमनोजायतेएतदत्यंतविडंबनाअवहास्यतैव ८५ एतदेवस्पष्टयतिक्वकर्त्तेतित्रिभिः ८६ ८७ कोष्ठोत्संगशयनःउदरांतरवर्तिनिकोष्ठवत्स्व

क्याश्चमहाबाहुर्बलदेवसहायवान् ७९ उत्थाप्यवसुदेवस्तंदेवकीचजनार्दनम् । स्मृतजन्मोक्तवचनौतावेवप्रणतौस्थितौ ८० । । वसुदेवउवाच । प्रसीदसीदतांदेवदेवानांप्रवरप्रभो । यथावयोःप्रसादेनकृताभ्युद्धारकेशव ८१ आराधितोयद्भगवानवतीर्णोगृहेमम । दुर्वृत्तनिधनार्थायतेननःपावितंकुलम् ८२ त्वमंतःसर्वभूतानांसर्वभूतेष्ववस्थितः । प्रवर्तेतेसमस्तात्मंस्त्वत्तोभूतभविष्यती ८३ यज्ञेत्वमिज्यसेचिंत्यसर्वदेवमयाच्युत । त्वमेवयज्ञोयष्टाचयज्ञानांपरमेश्वर ८४ सापन्हवंममनोयदेतत्त्वयिजायते । देवक्यास्वात्मजप्रीत्यातदत्यंतविडंबना ८५ क्वकर्तासर्वभूतानामनादिनिधनोभवान् । क्वचमेमानुषस्यैषाजिह्मापुत्रेतिवक्ष्यति ८६ जगदेतज्जगन्नाथसंभूतमखिलंयतः । कयायुक्त्याविनामायांसोस्मृतःसंभविष्यति । ८७ यस्मिन्प्रतिष्ठितंसर्वंजगत्स्थावरजंगमम् । सकोष्ठोत्संगशयनोमनुष्याज्जायतेकथम् ८८ सत्वंप्रसीदपरमेश्वरपासिविश्वमंशावतारकरणैर्नममासिपुत्रः । आब्रह्मपादपमयंजगदेतदीशत्वंनोविमोहयसिकिंपरमेश्वरात्मन् ८९ मायाविमोहितदृशातनयोममेतिकंसाद्भयंकृतमपास्तभयातितीव्रम् । नीतोसिगोकुलमतोतिभयाकुलस्यवृद्धिंगतोसिममचातिममत्वमासीत् ९० कर्माणिरुद्रमरुदश्विशतक्रतूनांसाध्यानियानिनभवंतिनिरीक्ष्यतानि । त्वंविष्णुरीशजगतामुपकारहेतोःप्राप्तोसिनःपरिगतंविगतोहिमोहः ९१ । । इतिविष्णुपुराणेपंचमेअंशेविंशतितमोध्यायः । । २० पराशरउवाच । । तौसमुत्पन्नविज्ञानौभगवत्कर्मदर्शनात् । देवकीवसुदेवौतुदृष्ट्वामायांपुनर्हरिः । मोहाययदुवंशस्यविततानसवैष्णवीम् १

ल्पेउत्संगेक्रोडेयःशेतेसएवंभूतःसन्मनुष्याज्जायतेकथम् ८८ पूर्वोक्तंनिगमयन्प्रसादंप्रार्थयते सत्वमिति अवतारकरणैरेवाविश्वंपासि आब्रह्मपादपमयंब्रह्मादिस्तंबपर्यंतंविश्वंत्वमेवातोनोस्मासूकिंमोहयसि त्वत्तइतिपाठेत्वत्तोजातमितिशेषः विमोहयसिअर्थादस्मानिति ८९ त्वन्मायामोहितस्यममएवंविपरीतबुद्धिरेतावंतंकालमासीदिदानींसानिवृत्तेत्याह मायाविमोहितेति हेअपास्तभयअतितीव्रंभयंकंसात्कृतंध्यातंअतोगोकुलंनीतोसि ममत्वमासीन्ममत्वकृतेयंबुद्धिरासीदित्यर्थः ईशेतिवापाठः ९० साबुद्धिर्भ्रांतैवेत्याह कर्माणीति यानिकर्माणिरुद्रादीनांसाध्यानिनभवंतितानितवनिरीक्ष्यजगतामुपकारहेतोःमत्पुत्रत्वंप्राप्तस्त्वंविष्णुरेवासीतिपरिगतंसम्यक्ज्ञातम् अतोममममोहोविगतइति निरीक्षितानीतिपाठेसर्वैर्जनैःप्रत्यक्षतोदृष्टान्यपीत्यर्थः परिगतइतिपुंस्त्वपाठेविष्णोर्विशेषणम् ९१ इतिवैष्णवाकूतचंद्रिकायांपंचमेअंशेविंशतितमोध्यायः २० ॥ उग्रसेनाभिषेकोथसुधर्माहरणंदिवः सांदीपनेःपुत्रदानंविद्यादानादिहोच्यते १ देवकीवसुदेवौतू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिश्रीपंचमेअंशेचतुर्विंशोध्यायः २४ पंचविंशेबहलिनाकृष्टाथयमुनावने वारुणीकांतिरेवत्योरामेणाप्ताइतीर्यते १ २ तस्योपभोगायमुदागच्छमुदेइतिपाठेहर्षायेत्यर्थः ३ वृंदावनस्यावांतरवनेउत्पन्नकदंबतरुकोटरे ४ मदिरायास्तर्षंपिपासाम् ५ ६ ७ अत्यंतघर्मांभःकणिकाएवमौक्तिकानितैरुज्ज्वलःस्नातुमिच्छामिइत्याहेत्यर्थः ८ ९ तेनहलेन कोपाद्यमुनापराधस्मरणार्थंनायासिनायासीतिवीप्सा यदिशक्नोषितदेच्छयान्यतोगम्यताम् १० ११ शरीरिणीअधिष्ठातृरूपिणीसतीप्रसीदमांमुंचेत्यब्रवीत् १२ ममशौर्यबलेअवजानासिन्यक्करो

उवाच । । वनेविहरतस्तस्यसहगोपैर्महात्मनः । मानुषच्छद्मरूपस्यशेषस्यधरणीभृतः १ निष्पादितोरुकार्यस्यकार्येणोर्वीविचारिणः । उपभोगार्थमत्यर्थंवरुणःप्राहवारुणीम् २ अभीष्टासर्वदायस्यमदिरेत्वंमहौजसः । अनंतस्योपभोगायतस्यगच्छमुदाशुभे ३ इत्युक्तावारुणीतेनसंनिधानमथाकरोत् । वृंदावनवनोत्पन्नकदंबतरुकोटरे ४ विचरन्बलदेवोऽपिमदिरागंधमुद्धतम् । आघ्रायमदिरातर्षमवापाथपुरातनम् ५ ततःकदंबात्सहसामधुधारांसलांगली । पतंतींवीक्ष्यमैत्रेयप्रययौपरमांमुदम् ६ ययौचगोपगोपीभिःसमवेतोमुदान्वितः । उपगीयमानोललितं गीतवाद्यविशारदैः ७ समत्तोत्यंतघर्मांभःकणिकामौक्तिकोज्वलः । आगच्छयमुनेस्नातुमिच्छामीत्याहविव्हलः ८ तस्यवाचंनदीसातुमत्तोक्तामवमन्यवै । नाजगामततःक्रुद्धोहलंजग्राहलांगली ९ गृहीत्वातांतटेतेनचकर्षमदविव्हलः । पापेनायासिनायासिगम्यतामिच्छयान्यतः १० साकृष्टातेनसहसामार्गंसंत्यज्यनिम्नगा । यत्रास्तेबलदेवोऽसौप्लावयामासतद्वनम् ११ शरीरिणीतथोपेत्यत्रासविव्हललोचना । प्रसीदेत्यब्रवीद्रामं मुंचमांमुसलायुध १२ सोब्रवीदवजानासिममशौर्यबलेनदि । सोऽहंत्वाहलपातेननयिष्यमिसहस्रधा १३ । । पराशरउवाच । । इत्युक्तयातिसंत्रासात्तयानद्याप्रसादितः । भूभागेप्लावितेतत्रमुमोचयमुनांबलः १४ ततःस्नातस्यवैकांतिराजगाममहात्मनः । अवतंसोत्पलंचारु गृहीत्वैकंचकुंडलम् १५ वरुणप्रहितांचास्मैमालामम्लानपंकजाम् । समुद्रार्हेतथावस्त्रेनीलेलक्ष्मीरियच्छत १६ कृतावतंसःसतदाचारुकुंडलभूषितः । नीलांबरधरःस्रग्वीशुशुभेकांतिसंयुतः १७ इत्थंविभूषितोरेमेतत्ररामस्तदाव्रजे । मासद्वयेनयातश्चपुनःसमथुरांपुरीम् १८ रेवतींनामतनयांरैवतस्यमहीपतेः । उपयेमेबलस्तस्यांजज्ञातेनिशठोल्मुकौ १९ । । इतिश्रीविष्णुपुराणेपंचमेअंशेपंचविंशतितमोध्यायः २५ । ।

षि १३ १४ ततःकांतिर्लक्ष्मीरवतंसोत्पलादिप्रायच्छदित्यन्वयः एककर्णस्यभूषणमुत्पलमन्यस्यचैवकुंडलमितिज्ञेयम् हरिवंशेलक्ष्मीवाक्यम् जातरूपमयंचैवकुंडलंवज्रभूषितम् आदिपद्मंचपद्माक्षादिव्यंश्रवणभूषणम् देवेमांप्रतिगृह्णीष्वपौराणींभूषणक्रियामिति १५ १६ १७ १८ इदानींश्रीकृष्णस्यविवाहान्पुत्रांश्चवक्तुंज्येष्ठस्यरामस्याविवहादिकमनुस्मारयति रेवतीमिति १९ इतिश्रीविष्णवाकूतचंद्रिकायांपंचमेअंशेपंचविंशतितमोध्यायः २५ षड्विंशेरुक्मिणीकृष्णउपयेमइतीर्यते यस्यांबभूवप्रद्युम्नःशंबरोयेनपातितः १ २ भीष्मकोरुक्मिणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहशिशुपालायरुक्मिणींकन्यांददौवाचादत्तवानित्यर्थः जरासंधप्रचोदितइति शिशुपालोहिसुनीथाख्यश्चैद्योपिमागधस्यदत्तपुत्रोभूदतस्तत्प्रचोदितइतिसंगच्छते ३ ४ ५ पुराद्बहिरंबिकापूजार्थंनिर्गतांहरिर्हृतवान् विपक्षभारंविपक्षेषुशत्रुषुकर्तव्ययुद्धादिभारंरामादिष्वासज्यनिक्षिप्य ६ ७ ८ रुक्मीचकेशवमहत्वाकुंडिनंनप्रवेक्ष्यामीतिप्रतिज्ञायकृष्णंहंतुंअभिद्रुतइत्याह कुंडिनमिति ९ पातितएवकेवलंनतुहतः रुक्मिणीभ्रातृत्वात् १० राक्षसेनराक्षसोयुद्धहरणादितिस्मृत्युक्तेनविवाहेन ११ अग्रिमाध्यायेशंबरवधंविस्तरेणवक्तुंसंक्षेपान्निरूपयतितस्मादिति तस्यामि

। । पराशरउवाच । । भीष्मकःकुंडिनेराजाविदर्भविषयेऽभवत् । रुक्मीतस्याभवत्पुत्रोरुक्मिणीचवरांगना १ रुक्मिणींचकमे कृष्णःसाचतंचारुहासिनी । नददौयाचतेचैनांरुक्मीद्वेषेणचक्रिणे २ ददौचशिशुपालायजरासंधप्रचोदितः । भीष्मकोरुक्मिणासार्धंरुक्मिणीमुरुविक्रमः ३ विवाहार्थंततःसर्वेजरासंधमुखानृपाः । भीष्मकस्यपुरंजग्मुःशिशुपालप्रियैषिणः ४ कृष्णोपिबलभद्राद्यैर्यदुभिः परिवारितः । प्रययौकुंडिनंद्रष्टुंविवाहंचेदिभूभृतः ५ श्वोभाविनिविवाहेतुतांकन्यांहृतवान्हरिः । विपक्षभारमासज्यरामाद्येष्वथबंधुषु ६ ततश्चपौंड्रकःश्रीमान्दंतवक्रोविदूरथः । शिशुपालजरासंधशाल्वाद्याश्चमहीभृतः ७ कुपितास्तेहरिंहंतुंचक्रुरुद्योगमुत्तमम् । निर्जिताश्चसमागम्य रामाद्यैर्यदुपुंगवैः ८ कुंडिनंनप्रवेक्ष्यामिअहत्वायुधिकेशवम् । कृत्वाप्रतिज्ञांरुक्मीचहंतुंकृष्णमभिद्रुतः ९ हत्वाबलंसनागाश्वपत्तिस्यंदनसंकुलम् । निर्जितःपातितश्चोर्व्यांलीलयेवसचक्रिणा १० निर्जित्यरुक्मिणंसम्यगुपयेमेसरुक्मिणीम् । राक्षसेनविवाहेनसंप्राप्तांमधुसूदनः ११ तस्माज्जज्ञेचप्रद्युम्नोमदनांशःसवीर्यवान् । जहारशंबरोयंवैयोजघानचशंबरम् १२ । । इतिश्रीविष्णुपुराणेपंचमेअंशेषड्विंशोध्यायः । २६ । । मैत्रेयउवाच । । शंबरेणहतोवीरःप्रद्युम्नःसकथंमुने । शंबरश्चमहावीर्योप्रद्युम्नेनकथंहतः १ । । पराशरउवाच । । षष्ठेद्विजातमात्रंतुप्रद्युम्नंसूतिकागृहात् । ममैषहंतेतिमुनेहृतवान्कालशंबरः २ हत्वाचिक्षेपचैवैनंग्राहोग्रेलवणार्णवे । कल्लोलजनितावर्तेसुघोरेमकरालये ३ पतितंतत्रचैवैकोमत्स्योजग्राहबालकम् । नममारसतस्यापिजठरानलदीपितः ४ मत्स्यबंधैश्चमत्स्योऽसौमत्स्यैरन्यैःसहद्विज । घातितोऽसुरवर्यायशंबरायनिवेदितः ५ तस्यमायावतीनामपत्नीसर्वगृहेश्वरी । कारयामाससूदानामाधिपत्यमनिंदिता ६ दारितेमत्स्यजठरेददृशेसा

तिपाठेरुक्मिण्यामित्यर्थःमदनस्यकामस्यांशःअतएवपूर्ववैरमनुस्मरञ्जहारसचतंहतवान् १२ इतिश्रीविष्णुपुराणेपंचमेअंशेषड्विंशोध्यायः २६ । लब्धोमत्स्योदरात्कामोरत्याश्रुतरहस्ययापुष्टोयःशंबरंहत्वापुरमायादिहोच्यते १ कालशंबरःकृष्णवर्णःमृत्युतुल्योवाशंबरः २ ग्राहोग्रेइत्यादिविशेषणेनमृत्युहेतुबाहुल्योपिनममारेतिभगवद्वीर्यमाहात्म्योक्तिः ३ ४ मत्स्यबंधैर्जालिकैः ५ मायावतीतस्यपत्नीत्युक्त्यामाययैवपत्नीनतुवस्तुतइतिव्यज्यते यद्वानाम्नानाम्नैवपत्नीनार्थतइत्यर्थः यतोऽनिंदितापतिव्रताकामस्यैवभार्येतिएतच्चाग्रेस्फुटीभविष्यतीति ६ ७ ८ कृष्णत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकल्परहितम् ३२ अजरंपरिणामहीनम् क्षयोपक्षयस्तद्विवर्जितम् आद्यंतविवर्जितंदेशतोपाश्चिच्छिन्नम् ३३ ३४ ३५ ३६ ३७ यथाजलस्याशयामृगतृष्णामूढैर्गृह्यतेतथादुःखानिदुःखसाधनान्येवसुखबुद्ध्यासुखसाधनबुद्ध्यागृहीतानि ३८ तान्येवाहराज्यमितिद्वाभ्याम् ३९ ४० नचदेवलोकेपिनिर्वृतिरित्याह देवलोकेति ४१ ४२ ४३ ततोऽक्रियया विहिताकरणेनयासृतिःसंसरणंतद्युताः ततोनिजाक्रियासूतिनरकेष्वितिपाठेनिजाक्रियाभिःसूतिर्जन्मयेषांतेषुनरकेषुदुःखंप्राप्नुवंति यतस्तवस्वरूपंनजानंति ४४ राज्यादिषुममत्वंतन्निमित्तोगर्व

वर्जितम् ३३ त्वत्तोमराःसपितरोयक्षगंधर्वकिंनराः । सिद्धाःसाप्सरसस्त्वत्तोमनुष्याःपशवःखगाः ३४ सरीसृपामृगाःसर्वेत्वत्तःसर्वेमहीरुहाः । यच्चभूतंभविष्यद्वाकिंचिदत्रचराचरम्३५ अमूर्तंमूर्तमथवास्थूलंसूक्ष्मतरंतथा । तत्सर्वंत्वंजगत्कर्त्तर्नास्तिकिंचित्त्वयाविना ३६ मयासंसारचक्रेस्मिन् भ्राम्यताभगवन्सदा । तापत्रयाभिभूतेननप्राप्तानिर्वृतिःक्वचित् ३७ दुःखान्येवसुखानीतिमृगतृष्णाजलाशया । मयानाथगृहीतानितानितापाय चाभवन् ३८ राज्यमुर्वीबलंकोशोमित्रपक्षस्तथात्मजाः । भार्याभृत्यजनायेचशब्दाद्याविषयाःप्रभो ३९ सुखबुद्ध्यामयासर्वंगृहीतमिदमन्यथा । परिणामेतदेवेशतापात्मकमभून्मम ४० देवलोकगतिंप्राप्तोनाथदेवगणोपिहि । मत्तःसाहाय्यकामोभूच्छाश्वतीकुत्रनिर्वृतिः ४१ त्वामनाराध्यजगतांसर्वेषांप्रभवास्पदम् । शाश्वतीप्राप्यतेकेनपरमेश्वरनिर्वृतिः ४२ त्वन्मायामूढमनसोजन्ममृत्युजरादिकान् । अवाप्यतापान्पश्यंतिप्रेतराजाननं नराः ४३ ततोऽक्रियासृतियुतानरकेष्वतिदारुणम् । प्राप्नुवंतिनरादुःखंनस्वरूपविदस्तव ४४ अहमत्यंतविषयीमोहितस्तवमायया । ममत्वगर्वगतांतर्भ्रमामिपरमेश्वर ४५ सोहंत्वांशरणमपारमीशमाद्यंसंप्राप्तःपरमपरंयतोनकिंचित् । संसारभ्रमपरितापतप्तचेतानिर्वाणेपरिणतधाम्निसाभिलाषः ४६ । । इतिश्रीविष्णुपुराणेपंचमेअंशेत्रयोविंशोध्यायः । । २३ । । पराशरउवाच । । इत्थंस्तुतस्तदातेनमुचुकुंदेनधीमता । प्राहेशःसर्वभूतानामनादिर्भगवान्हरिः १ यथाभिवाञ्छितान्दिव्यांल्लोकान्गच्छनरेश्वर । अव्याहतपरैश्वर्योमत्प्रसादोपबृंहितः २ भुक्त्वादिव्यान्महाभोगान्भविष्यसिमहाकुले । जातिस्मरोमत्प्रसादात्ततोमोक्षमवाप्स्यसि ३ । । पराशरउवाच । । इत्युक्तःप्रणिपत्येशंजगतामच्युतंनृपः । गुहामुखाद्विनिष्क्रांतोददृशेसोल्पकान्नरान् ४ ततःकलियुगंज्ञात्वाप्राप्तंतमुंनृपस्तपः । नरनारायणस्थानंप्रययौगंधमादने ५

श्रतावेवगर्तस्तस्यांतर्मध्येभ्रमामि ४५ यतस्त्वत्तःपरमंपरंचकारणंकार्यंचव्यतिरिक्तंनास्ति परमपदमितिपाठेपरमपदस्वरूपंध्यायतोनकिंचिद्व्यतिरिक्तमस्तीतिशेषः परिणतधाम्निअनादिप्रकाशे निर्वाणेपरिपक्वयोगिनामाश्रयेइतिवा ४६ इतिश्रीपंचमेअंशेत्रयोविंशोध्यायः २३ वरप्रदानंराज्ञोत्रम्लेच्छसैन्याद्धनग्रहः उक्तोगतेव्रजंरामेगोपीनांविरहोपिच स्तुतोथभगवान्काम्यकर्मणांभक्तेश्चफलंभोगान्मोक्षंचप्रादादित्याह इत्थमितित्रिभिः १ २ ३ भोगप्रदानादात्मनःशुद्धभावंमत्वातपसेययावित्याह इत्युक्तइतिद्वाभ्याम् अल्पकान्प्रमाणबलादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिरतिहीनान् ४ ५ उपायेनमुचुकुंददृशा ६ ७ कृष्णोयथैकांगिरिगुहांगत्वायवनवधादिकंविधायद्वारकामागतस्तथाबलदेवोपिगोकुलंगत्वासुहृत्संगभाषणयमुनाकर्षणादिकंकृत्वाद्वारकामागतइत्याह बलदेवोपीत्यादिनायावदध्यायसमाप्ति ज्ञातित्वेनाभिमतानांदर्शनेसोत्कंठऔत्सुक्ययुक्तः ८ ९ कैश्चिज्ज्येष्ठैःपरिष्वक्तःकांश्चित्कनिष्ठान्परिषस्वजे कैश्चित्समैःसमं हास्यंचक्रे १० हलायुधंप्रियाण्यवदन्निति द्विकर्मकम् अपरारामकांताःसेर्ष्यमूचुः ११ कृष्णकातास्तुपप्रच्छुरित्याह गोप्यइतिसप्तभिः चलन्प्रेमलवोयस्मिन्तादृगात्माचित्तंयस्यसः १२ तदवाहुः अस्माकंग्राम्याणांचेष्टायाउपहसनंतेनचपुरयोषितांसौभाग्यमानंसौभाग्यगर्वमधिकंकिंनकरोतीतिप्रायशःकरोत्येवेतिसेर्ष्यंप्रश्नम् चेष्टामुपहसन्निति पाठेपिसएवार्थः १३ अन्या

कृष्णोऽपिघातयित्वारिमुपायेनहितद्धनम् । जग्राहमथुरामेत्यहस्त्यश्वरथंदनोज्ज्वलम् ६ आनीयचोग्रसेनायद्वारवत्यान्न्यवेदयत् । पराभिभवनिःशंकंबभूवचयदोःकुलम् ७ बलदेवोऽपिमैत्रेयप्रशांताखिलविग्रहः । ज्ञातिदर्शनसोत्कंठःप्रययौनंदगोकुलम् ८ ततोगोपांश्चगोपीश्चयथापूर्वममित्रजित् । तथैवाभ्यवदत्प्रेम्णाबहुमानपुरःसरम् ९ कैश्चापिसपरिष्वक्तःकांश्चिच्चपरिषस्वजे । हास्यंचक्रेसमंकैश्चिद्गोपगोपीजनैस्तथा १० प्रियाण्यनेकान्यवदन्गोपास्तत्रहलायुधम् । गोप्यश्चप्रेमकुपिताःसेर्ष्यमूचुस्तथापराः ११ गोप्यःपप्रच्छुरपरानागरीजनवल्लभः । कच्चिदास्तेसुखंकृष्णश्चलत्प्रेमलवात्मकः १२ अस्मच्चेष्टोपहसनंनकच्चित्पुरयोषिताम् सौभाग्यमानमधिकंकरोतिक्षणसौहृदम् १३ कच्चित्स्मरतिनःकृष्णोगीतानुगमनंकलम् । अप्यसौमातरंद्रष्टुंसकृदप्यागमिष्यति १४ अथवाकिंतदालापैरपराक्रियतांकथा । यस्यास्माभिर्विनातेनविनास्माकंभविष्यति १५ पितामातातथाभ्राताभर्ताबंधुजनश्चकिम् । नत्यक्तस्तत्कृतेऽस्माभिरकृतज्ञध्वजोहिसः १६ तथापिकंचिदालापमिहागमनसंश्रयम् । करोतिकृष्णोवक्तव्यंभवताकृष्णनानृतम् १७ दामोदरासौगोविंदःपुरस्त्रीसक्तमानसः । अपेतप्रीतिरस्मासुदुर्दर्शःप्रतिभातिनः १८ । पराशरउवाच । आमंत्रितःसकृष्णेतिपुनर्दामोदरेतिच । जहाससुस्वरंगोपीर्हरिणाहृतचेतसः १९ संदेशैःसाममधुरैःप्रेमगर्भैरगर्वितैः । रामेणाश्वासितागोप्यःकृष्णस्यातिमनोहरैः २० गोपैश्चपूर्ववद्रामःपरिहासमनोहराः । कथाश्चकाररेमेचसहतैर्व्रजभूमिषु २१ । । इतिश्रीविष्णुपुराणेपंचमेअंशेचविंशोध्यायः २४ । । पराशर

आहुः कच्चिदिति गीतेनानुगमनमनुवृत्तिंस्वगीतानुगुणमस्माकंगानकलंमधुरंकिंनस्मरति अस्मासुप्रयोजनाभावेपिमात्रादीन्द्रष्टुंकिमेष्यतीतिप्रणयकोपादपराआह अप्यसाविति १४ अपरानिर्वेदादाहुः अथवेति यस्यास्माभिर्विनाजीवनंलोकयात्रावातथास्माकमपितेनविनादुःखेनापिजीवनंलोकयात्रावाभविष्यत्येवेत्यर्थः १५ नास्तिकृतज्ञोयस्मात्तस्यध्वजोमूर्धन्यइतिवास्तवोर्थः १६ शोकातुराबलभद्रमेवकृष्णेतिसंबोध्याहुःतथापीति १७ तथाहेदामोदरेतिबलमेवसंबोधयंत्यऊचुः असौगोविंदःपुरस्त्रीष्वासक्तमानसोस्मासुचगतप्रीतिर्दुर्दर्शःप्रतिभाति १८ इत्येवंहरिणाहृतचेतसोगोपीःप्रतिजहास जहसुरितिपाठेअपरागोप्यस्ताजहसुरित्यर्थः १९ साम्नाप्रियोक्त्यामधुरैरगर्वितैःसानुनयैःकृष्णस्यसंदेशैरामेणाश्वासिताइतिसंबंधः २० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयइत्यत्रषष्ठीलोपआर्षः अतएवकृष्णस्यविशेषणंसूतिसंहारकर्मणइति सूति.संसारकर्मणइतिपाठेसंसारकर्मणोजन्ममरणप्रवाहरूपकर्मणःसूतिःकारणंकामइत्यर्थः ९ विश्रब्धास्वभर्तेति

तिशोभनम् । कुमारंमन्मथतरोर्दग्धस्यप्रथमांकुरम् ७ कोऽयंकथमयंमत्स्यजठरंसमुपागतः । इत्येवंकौतुकाविष्टांतांतन्वींप्राहनारदः ८ अयंसम स्तजगतांसूतिसंहारकर्मणः । शंबरेणहृतःकृष्णतनयःसूतिकागृहात् ९ क्षिप्तःसमुद्रेमत्स्येननिगीर्णस्तेवशंगतः । नररत्नमिदंसुभ्रुविश्रब्धापरि पालय १० । । पराशरउवाच । । नारदेनैवमुक्तासापालयामासतांशिशुम् । बाल्यादेवातिरागेणरूपातिशयमोहिता ११ सयदायौव नाभोगभूषितोभून्महामुने । साभिलाषातदासातुबभूवगजगामिनी १२ मायारतिर्ददौचास्मैमायाःसर्वामहात्मने । प्रद्युम्नायात्मभूतायतंन्यस्तह दयेक्षणा १३ प्रसज्जतींतुतामाहकार्ष्णिःकमललोचनाम् । मातृभावंविहायत्वंकिमेवंवर्तसेऽन्यथा १४ साचास्मैकथयामासनपुत्रस्त्वं ममेतिवै । तनयंत्वामयंविष्णोर्हृतवान्कालशंबरः १५ क्षिप्तःसमुद्रेमत्स्यस्यसंप्राप्तोजठरान्मया । सारोरुदीतितेमाताकांताद्याप्यतिवत्सला १६ । । पराशरउवाच । । इत्युक्तःशंबरंयुद्धेप्रद्युम्नःससमाव्हयत् । क्रोधाकुलीकृतमनायुयुधेचमहाबलः १७ हत्वासैन्यमशेषंतुतस्यदैत्यस्यमा धविः । सप्तमायाव्यतिक्रम्यमायांसयुयुजेष्टमीम् १८ तयाजघानतंदैत्यंमाययाकालशंबरम् । उत्पत्यचतयासार्धमाजगामपितुःपुरम् १९ अं तःपुरेनिपतितंमायारत्यासमन्वितम् । तंदृष्ट्वाकृष्णसंकल्पाबभूवुःकृष्णयोषितः २० रुक्मिणीचावदत्प्रेम्णासास्रदृष्टिरनिन्दिता । धन्यायाःख ल्वयंपुत्रोवर्ततेनवयौवने २१ अस्मिन्वयसिपुत्रोमेप्रद्युम्नोयदिजीवति । सभाग्याजननीवत्सत्वयाकापिविभूषिता २२ अथवायादृशःस्नेहोमम यादृग्वपुश्चते । हरेरपत्यंसुव्यक्तंभवान्वत्सभविष्यति २३ पराशरउवाच । एतस्मिन्नंतरेप्राप्तःसहकृष्णेननारदः । अंतःपुरचरींदेवींरुक्मि णींप्राहहर्षयन् २४ एषतेतनयःसुभ्रुहत्वाशंबरमागतः । त्वहृतोयेनाभवद्बालोभवत्याःसूतिकागृहात् २५ इयंमायावतीभार्यातनयस्यास्यते सती । शंबरस्यनभार्येयंश्रूयतामत्रकारणम् २६ मन्मथेतुगतेनाशंतदुद्भवपरायणा । शंबरंमोहयामासमायारूपेणरूपिणी २७ विहाराद्युपभो गेषुरूपंमायामयंशुभम् । दर्शयामासदैत्यस्यतस्येयंमदिरेक्षणा २८ कामोऽवतीर्णःपुत्रस्तेतस्येयंदयितारातिः । विशंकानात्रकर्तव्यास्नुषेयंतवशोभ ने २९ ततोहर्षसमाविष्टारुक्मिणीकेशवस्तथा । नगरीचसमस्तासासाधुसाध्वित्यभाषत ३० चिरनष्टेनपुत्रेणसंगतांप्रेक्ष्यरुक्मिणीम् । अ

कृतनिश्चया १० ११ यदायौवनाभोगेनतारुण्याविस्तारेणभूषितोऽभवत् १२ १३ प्रसज्जतींरतिप्रसंगंकुर्वतीम् मातृभावंविहायत्यक्त्वा अपहारेणेतिपाठेसएवार्थः १४ १५ १६ १७ १८ १९ कृष्णोयमितिसंकल्पोमनोवृत्तिर्यासांताः २० २१ २२ अथवेत्युत्प्रेक्षायाम् यादृशःपुत्रस्नेहसदृशः यादृग्वपुःकृष्णस्येववपुः २३ २४ २५ २६ २७ विहाराद्युपभोगेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृंगारादिभोगेषु व्यवायादीतिवापाठः मदिरेक्षणामदिरैवमादकमीक्षणंयस्याः २८ विशंकाशंका २९ ३० ३१ ॥ ॥ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचमेअंशेसप्तविंशतितमो ध्यायः ॥ २७ ॥ ॥ अष्टाविंशेथकृष्णस्यतनयान्योषितोब्रवीत् कामानिरुद्धदारार्त्तिरामाद्रुक्मिवधंतथा वीर्यवान्वीर्यवंतमित्यर्थः प्रद्युम्नस्तुपूर्वमेवोक्तः १ २ मित्रविंदासत्याजां बुवतीरोहिणीसुशीलासत्यभामालक्ष्मणाख्याःसप्तपूर्वोक्तरुक्मिणीचेत्यष्टौप्रधानाः शेषांविशेषणम् अत्रचकालिंदीमित्रविंदयोर्भेदेजांबवतीरोहिण्योरैक्यंशैब्यानुप्रवेशश्चहरिवंशोक्तःकल्पभेद

वापविस्मयंसर्वोद्वारवत्यांजनस्तदा ३१ । । इतिश्रीविष्णुपुराणेपंचमेअंशेसप्तविंशोध्यायः २७ पराशरउवाच । चारुदेष्णंसुदेष्णंचचारुदेहंचवीर्य वान् । सुषेणंचारुगुप्तंचभद्रचारुंतथापरम् १ चारुविंदंसुचारुंचचारुंचबलिनांवरम् । रुक्मिण्यजनयत्पुत्रान्कन्यांचारुमतींतथा २ अन्या श्चभार्याःकृष्णस्यबभूवुःसप्तशोभनाः । कालिंदीमित्रविंदाचसत्यानाग्नजितीतथा ३ देवीजांबवतीचापिरोहिणीकामरूपिणी । मद्रराजसुता चान्यासुशीलाशीलमंडना ४ सत्राजितीसत्यभामालक्ष्मणाचारुहासिनी । षोडशात्रसहस्राणिस्त्रीणामन्यानिचक्रिणः ५ प्रद्युम्नोपिमहावीर्योरुक्मि णस्तनयांशुभाम् । स्वयंवरस्थांजग्राहसाचतंतनयंहरेः ६ तस्यामस्याभवत्पुत्रोमहाबलपराक्रमः । अनिरुद्धोरणेरुद्धोवीर्योदधिररिंदमः ७ तस्यापिरुक्मिणःपौत्रींवरयामासकेशवः । दौहित्रायददौरुक्मीतांस्पर्धन्नपिशौरिणा ८ तस्याविवाहेरामाद्यायादवाहरिणासह । रुक्मिणोनगरं जग्मुर्नाम्नाभोजकटंद्विज ९ विवाहेतत्रनिर्वृत्तेप्राद्युम्नेःसुमहात्मनः । कलिंगराजप्रमुखारुक्मिणंवाक्यमब्रुवन् १० अनभिज्ञोहलीद्यूतेतथास्य व्यसनंमहत् । नजयामोबलंकस्मात्द्यूतेनैवमहाद्युते ११ । । पराशरउवाच । । तथेतितानाहनृपान्रुक्मीबलसमन्वितः । सभायांस हरामेणचक्रेद्यूतंचवैतदा १२ सहस्रमेकंनिष्काणांरुक्मिणाविजितोबलः । द्वितीयेपिपणेचान्यत्सहस्रंरुक्मिणाजितः १३ ततोदशसहस्राणिनि ष्काणांपणमाददे । बलभद्रोजयत्तानिरुक्मीद्यूतविदांवरः १४ ततोजहासस्वनवत्कलिंगाधिपतिर्द्विज । दंतान्विदर्शयन्मूढोरुक्मीचाहमदोद्धतः । १५ अजितोऽपंमयाद्यूतेबलदेवःपराजितः । मुधैवाक्षावलेपांधोयोवमेनेक्षकोविदान् १६ दृष्ट्वाकालिंगराजानंप्रकाशदशनाननम् । रुक्मिणंचापि

विषयः कृष्णमंत्रकल्पेषुनामभेदउपासनार्थः अतोगोकुलस्थोक्तदारएवताभिःशक्तिभिःसहमांत्रिकैरुपास्यते ३ ४ ५ प्रद्युम्नोपीत्यत्रमातुलकन्यापरिणयोदाक्षिणात्याचारात् सा चतंजग्राहेत्यनेनपरस्परानुरागःसूचितः ६ ७ शौरिणास्पर्धमानोपिरुक्मीददौ ८ स्पर्धाफलंवक्तुमाह तस्याविवाहेइत्यादिनायावदध्यायसमाप्ति ९ १० तथातथापिअस्यरामस्ययू तेमहद्व्यसनमासंगोऽस्ति ११ १२ १३ बलभद्रोनिष्काणांदशसहस्राणिपणमाददेतानिरुक्म्यजयत् १४ स्वनवत्सशब्दंयथास्यात्तत्रापिदन्तान्प्रदर्शयन्नित्यग्रेदन्तपातनस्पसूचना १५ क्वाप्यजितोमयाद्यूतेपराजितःअबिद्यइतिपाठेद्यूतेऽबिद्योऽभिज्ञः मुधावृथैवाक्षज्ञोहमितिअवलेपेनगर्वेणांधः अक्षकोविदानभिज्ञानवमेने १६ प्रकाशदशनंबिद्दतदंतमाननंयस्यतंदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तितइतिपाठेकिंमयाप्रार्थ्यतेक्षम्यतामिति यतःअदोषायत्वत्पुत्रस्त्वयैवपातितःवधदंडेननिष्पापःकृतइत्यर्थः २९ ३० ३१ षट्सहस्रान्षट्सहस्राणिपरिमाणंयेषांतान् नियुतानिलक्षाणि ३२ ३३ ३४ ३५ इतिश्रीवैष्णवाकूतचंद्रिकायांऊनत्रिंशोध्यायः २९ त्रिंशेदित्याकुंडलाख्यास्तुतःकल्पतरुंहरिः हरन्निंद्रंपराजैष्टसत्ययोक्तमितीर्यते १ उपाध्मासीद्वादितवान् २ ३ ४ तत्प्रवणंतदेकाग्रंविषयांतरपरित्यक्तम् ५ सनातनात्मन्नित्यमूर्ते सर्वात्मन्सर्वांतर्यामिन् भूतात्मन्भूतस्वरूप भूतभावनभूतोत्पादक ६ प्रणेताकर्तागुणात्मकेत्यनेनत

षायतत्सूतिःपरिपाल्यताम् २९ । । पराशरउवाच । । तथेतिचोक्त्वाधरणींभगवान्भूतभावनः । रत्नानिनरकावासाज्जग्राहमुनिसत्तम ३० कन्यापुरेसकन्यानांषोडशातुलविक्रमः । शताधिकानिददृशेसहस्राणिमहामते ३१ चतुर्दंताग्जांश्चान्यान्षट्सहस्रान्सदृष्टवान् । कांबोजानांतथाश्वानांनियुतान्येकविंशतिम् ३२ ताःकन्यास्तांस्तथानागांस्तांश्चाश्वान्द्वारकांपुरीम् । प्रापयामासगोविंदःसद्योनरककिंकरैः ३३ ददृशेवारुणंछत्रंतथैवमणिपर्वतम् । आरोपयामासहरिर्गरुडेपतगेश्वरे ३४ आरुह्यचस्वयंकृष्णःसत्यभामासहायवान् । अदित्याःकुंडलेदातुंजगामत्रिदशालयम् ३५ । । इतिश्रीविष्णुपुराणेपंचमेअंशेऊनत्रिंशोध्यायः २९ । । पराशरउवाच । । गरुडोवारुणंछत्रंतथैवमणिपर्वतम् । सभार्यंचहृषीकेशंलीलयैववहन्ययौ १ ततःशंखमुपाध्मासीत्स्वर्गद्वारगतोहरिः । उपतस्थुस्ततोदेवाःसार्घपात्राजनार्दनम् २ सदेवैरर्चितःकृष्णोदेवमातुर्निवेशनम् । सिताभ्रशिखराकारंप्रविश्यददृशेदितिम् ३ सतांप्रणम्यशक्रेणसहतेकुंडलोत्तमे । ददौनरकनाशंचशशंसचजनार्दनः ४ ततःप्रीत्याजगन्माताधातारंजगतांहरिम् । तुष्टावदितिरव्यग्रंकृत्वातत्प्रवणंमनः ५ नमस्तेपुंडरीकाक्षभक्तानामभयंकर । सनातनात्मन्सर्वात्मन्भूतात्मन्भूतभावन ६ प्रणेतामनसोबुद्धेरिंद्रियाणांगुणात्मक । त्रिगुणातीतनिर्द्वंद्वशुद्धसर्वहृदिस्थित ७ सितदीर्घादिनिःशेषकल्पनापरिवर्जित । जन्मादिभिरसंस्पृष्टस्वप्नादिपरिवर्जित ८ संध्यारात्रिरहोभूमिर्गगनंवायुरेवच । हुताशनोमनोबुद्धिर्भूतादिस्त्वंतथाच्युत ९ सृष्टिस्थितिविनाशानांकर्ताकर्तृपतेभवान् । ब्रह्मविष्णुशिवाख्याभिरात्ममूर्तिभिरीश्वर १० देवायक्षास्तथादैत्याराक्षसाःसिद्धपन्नगाः । कूष्मांडाश्चपिशाचाश्चगंधर्वामनुजास्तथा ११ पशवोमृगाःपतंगाश्चतथैवचसरीसृपाः । वृक्षगुल्मलतावल्लीसमस्ततृणजातयः १२ स्थूलामध्यास्तथासूक्ष्माःसूक्ष्मात्सूक्ष्मतराश्चये ।

मसाभूतभावनत्वंसत्त्वेनमनःप्रणतृत्वंरजसाबुद्धेरिंद्रियाणांचप्रणेतृत्वंसमर्थयते वस्तुतास्त्रिगुणातीतअतोनिर्द्वंद्वेशुद्धेसर्वस्मिन्हृदयेस्थित शुद्धसत्त्वतिपाठेशुद्धसत्त्वानांज्ञानिनांसर्वेषांहृदिस्थितइत्यर्थः ७ सितदीर्घाद्याभिर्वर्णपरिमाणाद्याभिर्निःशेषाभिःकल्पनाभिःपरिवर्जित जन्मादिभिर्विकारैरसंस्पृष्ट तन्मात्राभिरितिकाचित्पाठः स्वप्नादिभिरवस्थाभिःपरिवर्जित ८ भूतादिरहंकारः ९ ब्रह्मादिसंज्ञाभिःस्वयमेवसृष्ट्यादिकर्ता कर्तॄणांअवांतरसृष्ट्यादिकर्तॄणांदक्षादीनांपते १० ११ १२ पूर्वंतेगलंतिचेतिपुद्गलादेहावयवास्तदाश्रयाभेदाः यथाहुः पूरणाद्गलनाद्देहेपुद्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ला:परमाणवइति यद्वापुद्गलादेहास्तदाश्रयाजीवाश्च १३ इदानींमायानुवादपूर्वकंतन्निवृत्तिंप्रार्थयतेमायेत्यादिनाभूतेशनाशयेत्यंतेन अज्ञातपरमार्थानांजीवानामतिमोहनी मोहनमेवाह अनात्मनीति १४ संसारस्यमातुर्जनन्यास्तवमायायाश्चेष्टितम्विपरीताध्यासरूपम् १५ १६ विष्णुमायायाजडरूपायाःकार्यमिथ्याज्ञानमेवमहानावर्तस्तदेवमोहांधतमसंतेनावृताब्रह्माद्याउत्तमामनुष्याःसदसद्विवेकिनःपशवःपशुसदृशाश्च तएतेजीवाः त्वामाराध्यात्मभवक्षयन्नाभीप्संतेकिंतुकामानेवेतियत्सैवेयंतवमायेतिद्वयोरन्वयः अनकारपाठेत्वामित्यस्यविशेषणंआ

देहभेदाभवान्सर्वेयेकेचित्पुद्गलाश्रयाः १३ मायातवेयमज्ञातपरमार्थातिमोहिनी । अनात्मन्यात्मविज्ञानंययामूढोनबुद्ध्यते १४ अहंममेतिभावोत्रयत्पुंसामुपजायते । संसारमातुर्मायायास्तवैतन्नाथचेष्टितम् १५ यैःस्वधर्मपरैर्नाथनरैराराधितोभवान्। तेतरंत्यखिलामेतांमायामात्मविमुक्तये। १६ ब्रह्माद्याःसकलादेवामनुष्याःपशवस्तथा । विष्णुमायामहावर्तमोहांधतमसावृताः १७ आराध्यत्वामभीप्संतेकामान्नात्मभवक्षयम् । यदेतेपुरुषामायासैवेयंभगवंस्तव १८ मयात्वंपुत्रकामिन्यावैरिपक्षक्षयायच । आराधितोनमोक्षायमायाविलसितंहितत् १९ कौपीनाच्छादनप्रायावाञ्छाकल्पद्रुमादपि । जायतेयदपुण्यानांसोपराधःस्वदोषजः २० तत्प्रसीदाखिलजगन्मायामोहकराव्यय । अज्ञानंज्ञानसद्भावभूतंभूतेशनाशय २१ नमस्तेचक्रहस्तायशार्ङ्गहस्तायतेनमः । गदाहस्तायतेविष्णोशंखहस्तायतेनमः २२ एतत्पश्यामितेरूपंस्थूलचिह्नोपलक्षितम् । नजानामिपरंयत्तेप्रसीदपरमेश्वर २३ । । पराशरउवाच । । अदित्यैवंस्तुतोविष्णुःप्रहस्याहसुराराणिम् । मातादेवित्वदस्माकंप्रसीदवरदाभव २४ । । अदितिरुवाच । । एवमस्तुयथेच्छातेत्वमशेषसुरासुरैः । अजयःपुरुषव्याघ्रमर्त्यलोकेभविष्यसि २५ ततोनंतरमेवाहशक्राणीसहितादितिम् । सत्यभामाप्रणम्याथप्रसीदेतिपुनःपुनः २६ । । अदितिरुवाच । । मत्प्रसादान्नतेसुभ्रुजरावैरूप्यमेववा । भविष्यत्यनवद्यांगि सर्वकामाभविष्यसि २७ । । पराशरउवाच । । अदित्यातुकृतानुज्ञोदेवराजोजनार्दनम् । यथावत्पूजयामासबहुमानपुरःसरम् २८ ततोददर्शकृष्णोऽपिसत्यभामासहायवान् । देवोद्यानानिसर्वाणिनंदनादीनिसत्तम २९ ददर्शचसुगंधाढ्यमंजरीपुंजधारिणम् । शैत्याल्हादकरंताम्रबालपल्लवशोभितम् ३० मथ्यमानेमृतेजातञ्जातरूपमयत्वचम् । पारिजातञ्जगन्नाथःकेशवःकेशिसूदनः ३१ तंदृष्ट्वाप्राह

त्मभावक्षयमिति १७ १८ ऐतदेवस्वनिष्ठमाह मयात्वमिति १९ महाफलसाधनात्स्वल्पफलप्रार्थनंस्वाज्ञानकृतमित्यर्थांतरोपन्यासेनदर्शयति कौपीनेति कौपीनंतदाच्छादनंचप्रायशोयस्यांतथाभूतैववाञ्छाकल्पद्रुमादपिजायतइतियत्सोपराधःस्वदोषजःस्वीयाज्ञानजन्यएवेत्यर्थः २० ज्ञानसद्भावभूतंज्ञानवानहमित्याभिमानात्मकम् २१ २२ २३ प्रहस्यहासेनमोहयित्वासुराराणिंसुराणांजन्मभूमिंमातरम् २४ मोहितासत्युवाच एवमस्त्विति यथातवेच्छाएवमस्तुतथैवास्तु वरांतरमप्याह त्वमशेषेति मर्त्यलोकेवर्तमानोपित्वम् २५ २६ २७ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टावाचोयस्यतम् १७ ग्लहंपणंजग्राहस्वीकृतवान् १८ बलदेवस्तंग्लहमजयत् रुक्मीतुबलदेवंप्रतिमयाजितमितिहेबलतवोच्चैरलीकोक्तैरलमितिचप्राह १९ तत्रहेतुः त्वयोक्तो यमिति २० यदुक्तंरुक्मिणानमयैषोनुमोदितइतितत्राहाशरीरवाक् २१ अनुक्तापीति अनुमोदनवचनमनुक्तापिकर्मणैवाक्षपातनरूपेणानुमोदनंकृतंभवति अननुमोदनेतदुत्तरकाले ऽक्षपातनासंभवात् २२ अष्टापदेनक्रीडारेखांकितेनफलकेन २३ २४ जातरूपमयंसुवर्णमयंमहास्तंभमक्षशालायाःआकृष्यतेनजघान बलोबली अर्शादित्वादच् २५ २६

दुर्वाचंकोपंचक्रेहलायुधः १७ ततःकोपपरीतात्मानिष्ककोटिंहलायुधः । ग्लहंजग्राहरुक्मीचतदर्थेक्षानपातयत् १८ अजयद्बलदेवस्तंप्राहोच्चैस्त ज्जितंमया । मयेतिरुक्मीप्राहोच्चैरलीकोक्तैरलंबल १९ त्वयोक्तोयंग्लहःसत्यंनमयैषोनुमोदितः । एवंत्वयाचेद्विजितंनमयाविजितंकथम् २० ततो तरिक्षेवागुच्चैःप्राहगंभीरनादिनी । बलदेवस्यतंकोपंवर्धयंतीमहात्मनः २१ विजितंबलदेवेनरुक्मिणाभाषितंमृषा । अनुक्तापिवचःकिंचित्कृतंभव तिकर्मणा २२ ततोबलःसमुत्थायकोपसंरक्तलोचनः । जघानाष्टापदेनैवरुक्मिणंसमहाबलः २३ कलिंगराजंचादायविस्फुरंतंबलाद्बलः । बभंजदं तान्कुपितोयैःप्रकाशंजहाससः २४ आकृष्यचमहास्तंभंजातरूपमयंबलः । जघानयेन्येतत्पक्षाभूभृतःकुपितोबलः २५ ततोहाहाकृतंसर्वंपलायन परंद्विज । तद्राजमंडलंसर्वंबभूवकुपितेबले २६ बलेननिहतंश्रुत्वारुक्मिणंमधुसूदनः । नोवाचकिंचिन्मैत्रेयरुक्मिणीबलयोर्भयात् २७ ततोऽनि रुद्धमादायकृतोद्वाहंद्विजोत्तम । द्वारकामाजगामाथयदुचक्रेसकेशवः २८ । । इतिश्रीविष्णुपुराणेपंचमेअंशेअष्टाविंशोध्यायः २८ । । प राशरउवाच । । द्वारवत्यांततःशौरिंशक्रस्त्रिभुवनेश्वरः । आजगामाथमैत्रेयमत्तैरावतपृष्ठगः १ प्रविश्यद्वारकांसोऽथसमेत्यहरिणासह । क थयामासदैत्यस्यनरकस्यविचेष्टितम् २ त्वयानाथेनदेवानांमनुष्यत्वेनतिष्ठता । प्रशमंसर्वदुःखानिनीतानिमधुसूदन ३ तपस्विजननाशायसोऽ रिष्टोधेनुकस्तथा । प्रवृत्तोयस्तथाकेशीतेसर्वेनिहतास्त्वया ४ कंसःकुवलयापीडःपूतनाबालघातिनी । नाशंनीतास्त्वयासर्वेयेन्येजगदुपद्रवाः ५ यु ष्मद्दोर्दंडसद्बुद्धिपरित्रातेजगत्त्रये । यज्वियज्ञांशसंप्राप्त्यातृप्तिंयांतिदिवौकसः ६ सोहंसांप्रतमायातोयन्निमित्तंजनार्दन । तच्छ्रुत्वातत्प्रतीकारयत्नंक र्तुंत्वमहास ७ भौमोऽयंनरकोनामप्राग्ज्योतिषपुरेश्वरः । करोतिसर्वभूतानामुपघातमरिंदम ८ देवसिद्धसुरादीनांनृपाणांचजनार्दन । हत्वाहिसोऽ

रुक्मिवधस्यानुमोदनेनिंदनेच रुक्मिण्याबलस्यचभयात् २७ २८ इतिश्रीविष्णुपुराणेपंचमेअंशेवैष्णवाकूतचन्द्रिकायांअष्टाविंशोध्यायः २८ ॥ ॥ शक्रोक्त्यानरकंकृष्णो जघानास्यजहारच कन्यारत्नादिनिचयमूनत्रिंशइतीर्यते इदानींभौमवधप्रसंगेनहरेःपूर्वोक्तषोडशसहस्रभार्यालाभंवक्तुंइंद्रागमनमाह द्वारवत्यामित्यादिनाप्रविमृश्यतामित्यंतेन शक्रः शौरिंप्रत्याजगाम १ २ ३ ४ ५ दोर्दंडसद्बुद्धिभ्यांपरित्रातेजगत्त्रयेसतियज्विनांयज्ञेयेंशाभावास्तेषांसम्यक्प्राप्त्या ६ ७ भौमोभूमिसुतः ८ ९ १० मणिनिर्मितकुंडले कृष्णकुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डलेइतिपाठेकृष्णेतिसंबोधनम् ११ दुर्नीतिमन्यायःप्रतिपत्तव्यंकर्त्तव्यत्वेननिर्णेयंयत्तत्प्रविमृश्यतांविचार्यताम् १२ इदानींस्वकार्यार्थंमांसाधयतिपारिजातार्थंमयासहविरोत्स्यतइतिस्मितं कृत्वा १३ चिंतितंस्मृतिमात्रेणोपागतम् सत्यभामामित्यत्रहरिवंशेपारिजातकुसुमेरुक्मिण्यैदत्तेतदीर्ष्ययाकुपितांसत्यभामामाहभगवान् तुभ्यंपारिजाततरुमेवाहरिष्यामीतितदाहरणायासद र्शनायतांनिन्यइति १४ १५ क्षुरांतैःक्षुरधारावत्तीक्ष्णैः १६ १७ सप्तसहस्राणिपरिमाणंयेषांतान् १८ १९ महत्सैन्यंयस्यतेन २० २१ २२ त्वत्स्पर्शमात्रंसंभवःकारणंयस्यतथा

सुरःकन्यारुरोधनिजमंदिरे ९ छत्रंयत्सलिलस्रावितज्जहारप्रचेतसः । मंदरस्यतथाशृंगंहृतवान्मणिपर्वतम् १० अमृतस्राविणीदिव्येमणिनिर्मितकुंडले । जहारसोऽसुरोदित्यावाञ्छत्यैरावतंद्विपम् ११ दुर्नीतमेतद्गोविंदमयातस्यतवोदितम् । यदत्रप्रतिपत्तव्यंतत्स्वयंप्रविमृश्यताम् १२ । पराश रउवाच । । इतिश्रुत्वास्मितंकृत्वाभगवान्देवकीसुतः । गृहीत्वावासवंहस्तेसमुत्तस्थौवरासनात् १३ सचिंतितमुपारुह्यगरुडंगगनेचरम् । सत्य भामांसमारोप्यययौप्राग्ज्योतिषंपुरम् १४ आरुह्यैरावतंनागंशक्रोपित्रिदशालयम् । ततोजगाममैत्रेयपश्यतांद्वारकौकसाम् १५ प्राग्ज्योतिषपुर स्यासीत्समंताच्छतयोजनम् । आचितामौरवैःपाशैःक्षुरांतैर्भूर्द्विजोत्तम १६ तांश्चिच्छेदहरिःपाशान्क्षिप्त्वाचक्रंसुदर्शनम् । ततोमुरुःसमुत्तस्थौतंज घानचकेशवः १७ मुरोस्तुतनयान्सप्तसहस्रांस्तांस्ततोहरिः । चक्रधाराग्निनिर्दग्धांश्चकारशलभानिव १८ हत्वामुरुंहयग्रीवंतथापंचजनंद्विज । प्राग्ज्योतिषपुरंधीमांस्त्वरावान्समुपाद्रवत् १९ नरकेणास्यतत्राभून्महासैन्येनसंयुगम् । कृष्णस्ययत्रगोविंदोजघ्नेदैत्यान्सहस्रशः २० शस्त्रास्त्र वर्षंमुञ्चंतंभौमंचनरकंबली । क्षिप्त्वाचक्रंद्विधाचक्रेचक्रीदैतेयचक्रहा २१ हतेतुनरकेभूमिर्गृहीत्वादितिकुंडले । उपतस्थेजगन्नाथंवाक्यंचेदमथाब्रवी त् २२ यदाहमुद्धृतानाथत्वयासूकरमूर्तिना । त्वत्स्पर्शसंभवःपुत्रस्तदायंमय्यजायत २३ सोयंत्वयैवदत्तोमेत्वयैवविनिपातितः । गृहाणकुंडलेचेमे पालयास्यचसंततिम् २४ भारावतारणार्थायममैवभगवानिमम् । अंशेनलोकमायातःप्रसादसुमुखःप्रभो २५ त्वंकर्ताचविकर्ताचसंहर्ताप्रभुरव्य यः । जगतांतत्स्वरूपस्यस्तूयतेच्युतकिंतव २६ व्यापीव्याप्यःक्रियाकर्ताकार्यंचभगवान्यदा । सर्वभूतात्मभूतस्यस्तूयतेतवकिंतदा २७ पर मात्मात्वमात्माचभूतात्माचाव्ययोभवान् । यदातदास्तुतिर्नास्तिकिमर्थातेप्रवर्तताम् २८ प्रसीदसर्वभूतात्मन्नरकेणकृतंहियत् । तत्क्षम्यतामदो

भूतोमय्यजायत २३ २४ २५ जगतांकर्ताउत्पादकः विशेषेणदृष्ट्यादिनाकर्तापोषकः प्रभुस्तेषांनियंताअव्ययश्च पाठांतरेप्रभवंत्यस्मादितिप्रभवउपादानकारणम् अपियंत्यस्मिन्नि त्यप्ययःलयस्थानम् तत्स्वरूपस्यजगद्रूपस्यतवप्रहारादिकांकिंस्तूयते २६ इतोपिस्तोतुमशक्यत्वमित्याह व्यापीतिद्वाभ्याम् व्याप्तिरित्यपिज्ञेयम् विशेषमुक्त्वासामान्यक्रियादित्रयमाह क्रि येति कर्तेतिसर्वकारकोपलक्षणमतआहसर्वेति २७ नास्तित्वमेवाह किमर्थाकिमाश्रया २८ अर्थान्नरकस्यअदोषायदोषनिवृत्त्यर्थंक्षम्यताम् तस्यसूतिःपुत्रःपरिपाल्यतांच त्वत्सुतोविनिपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२९ ३० ३१ ३२ सत्येत्वमत्यर्थंप्रियेतियद्वचः गेहनिष्कुटार्थायगेहोद्यानार्थम् ३३ ३४ उपचारकृतंयथाश्रुतार्थरहितम् ३५ केशपक्षेणबहुकेशकबरेण ३६ मानगर्वितामामनर्थेपि

गोविंदसत्यभामाद्विजोत्तम । कस्मान्नद्वारकामेषनीयतेकृष्णपादपः ३२ यदितेतद्वचःसत्यंसत्येऽत्यर्थंप्रियेतिमे । मद्गेहनिष्कुटार्थायतदयंनी
यतांतरुः ३३ नमेजांबवतीतादृगभीष्टानचरुक्मिणी । सत्येयथात्वमित्युक्तंत्वयाकृष्णासकृत्प्रियम् ३४ सत्यंतद्यदिगोविंदनोपचारकृतंतव । तद
स्तुपारिजातोयंममगेहविभूषणम् ३५ बिभ्रतीपारिजातस्यकेशपक्षेणमंजरी । सपत्नीनामहंमध्येशोभेयमितिकामये ३६ । । पराशरउवाच ।
इत्युक्तःसग्रहस्यैनंपारिजातंगरुत्मति । आरोपयामासहरिस्तमूचुर्वनरक्षिणः ३७ भोःशचीदेवराजस्यमहिषीतत्परिग्रहम्। । पारिजातंनगोविंद
हर्तुमर्हसिपादपम् ३८ शचीविभूषणार्थायदेवैरमृतमंथने । उत्पादितोयंनक्षेमीगृहीत्वैनंगमिष्यसि ३९ देवराजोमुखप्रेक्षोयस्यास्तस्याःपरिग्र
हम् । मौढ्यात्प्रार्थयसेक्षेमीगृहीत्वैनंहिकोव्रजेत् ४० अवश्यमस्यदेवेंद्रोनिष्कृतिंकृष्णयास्यति । वज्रोद्यतकरंशक्रमनुयास्यंतिचामराः ४१ त
दलंसकलैर्देवैर्विग्रहेणतवाच्युत । विपाककटुयत्कर्मतन्नशंसंतिपंडिताः ४२ इत्युक्तेतैरुवाचैतान्सत्यभामातिकोपना । काशचीपारिजातस्यकोवाश
क्रःसुराधिपः ४३ सामान्यःसर्वलोकानांयद्येषोमृतमंथने । समुत्पन्नःसुराःकस्मादेकोगृह्णातिवासवः ४४ यथासुधायथैवेंदुर्यथाश्रीर्वनरक्षिणः ।
सामान्याःसर्वलोकस्यपारिजातस्तथाद्रुमः ४५ भर्तृबाहुमहागर्वाद्रुणद्ध्येनमथोशची । तत्कथ्यतामलंक्षांत्यासत्याहारयतिद्रुम् ४६ कथ्यतांचद्रु
तंगत्वापौलोम्यावचनंमम । सत्यभामावदत्येतदितिगर्वोद्धताक्षरम् ४७ यदित्वंदयिताभर्तुर्यदिवश्यःपतिस्तव । मद्भर्तुर्हरतोवृक्षंतत्कार
यनिवारणम् ४८ जानामितेपतिंशक्रञ्जानामित्रिदशेश्वरम् । पारिजातंतथाप्येनंमानुषीहारयामिते ४९ । । पराशरउवाच । । इत्युक्तारक्षि
णोगत्वाशच्याऊचुर्यथोदितम् । शचीचोत्साहयामासत्रिदशाधिपतिंपतिम् । ततःसमस्तदेवानांसैन्यैःपरिवृतोहरिम् । प्रवृत्तःपारिजातार्थमिंद्रोयो
धयितुंद्विज ५१ ततःपरिघनिःस्त्रिंशगदाशूलपरायुधाः । बभूवुस्त्रिदशाःसज्जाःशक्रेवज्रकरेस्थिते ५२ ततोनिरीक्ष्यगोविंदोनागराजोपरिस्थित
म् । शक्रंदेवपरीवारंयुद्धायसमुपस्थितम् ५३ चकारशंखनिर्घोषंदिशःशब्देनपूरयन् । मुमोचचशरव्रातंसहस्रायुतसंमितम् ५४ ततोदिशोनभ
श्चैवदृष्ट्वाशरशताचितम् । मुमुचुस्त्रिदशाःसर्वेअस्त्रशस्त्राण्यनेकशः ५५ एकैकमस्त्रंशस्त्रंचदैवैर्मुक्तंसहस्रधा। चिच्छेदलीलयैवेशोजगतांमधुसूदनः

नियोजयतीतिग्रहस्य ३७ ३८ ३९ तस्यामौढ्यात् परिग्रहंस्वीकृतमितिभवदन्यःक्षेमीकोव्रजेदितिचवास्तवोर्थः ४० निष्कृतिंप्रतीकारंयास्यतिकारिष्यति साधारणकल्पतरोःस्वीकारस्य
पापस्यनिष्कृतिंपराजयलक्षणंफलंप्राप्स्यतीतिवास्तवोर्थः ४१ विपाकेकटुपरिणामेऽनर्थकरंवस्तुतोदेवानामेवेतिज्ञेयंपराजितत्वात् ४२ ४३ ४४ ४५ ४६ ४७ निवारणंकारय स्वभर्तेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषः४८४९५०५१सज्जाःसन्नद्धाः५२५३ ५४ अस्त्रंअस्त्रमंत्राभिमंत्रितम् शस्त्रंतदितरत् अस्त्रंक्षेपणीयम् शस्त्रंतदितरदितिवा ५५ ५६ चंच्वातुंडेन ५७ ५८ ५९ ६० अस्तानिरस्ताः ६१ वक्रेणभक्षयन्पक्षाभ्यांताडयन्नखरांकुरैर्दारयन् ६२ ६३ ६४ ६५ ६६ ६७ ६८ सोपहासमाह त्रैलोक्येश्वरेतित्रिभिः पारिजातस्रगाभोगातन्माल्यव्याप्ता ६९ ७० ७१

५६ पाशंसलिलराजस्यसमाभाष्योरगाशनः । चकारखंडशश्चंच्वाबालपन्नगदेहवत् ५७ यमेनप्रहितंदंडंगदाविक्षेपखंडितम् । पृथिव्यांपातयामासभगवान्देवकीसुतः ५८ शिबिकांचधनेशस्यचक्रेणतिलशोविभुः । चकारशौरिरर्कंचदृष्टिदृष्टंहतौजसम् ५९ नीतोऽग्निःशतशोबाणैर्द्रावितावसवोदिशः । चक्रविच्छिन्नशूलाग्रारुद्राभुविनिपातिताः ६० साध्याविश्वेथमरुतोगंधर्वाश्चैवसायकैः । शार्ङ्गेणप्रेरितैरस्ताव्योम्निशाल्मलितूलवत् ६१ गरुत्मानपिवक्रेणपक्षाभ्यांनखरांकुरैः । भक्षयंस्ताडयन्देवान्दारयंश्चचचारवै ६२ ततःशरसहस्रेणदेवेंद्रमधुसूदनौ । परस्परंववर्षातेधाराभिरिवतोयदौ ६३ ऐरावतेनगरुडोयुयुधेतत्रसंकुले । देवैःसमस्तैर्युयुधेशक्रेणचजनार्दनः ६४ छिन्नेष्वशेषबाणेषुशस्त्रेष्वस्त्रेषुचत्वरन् । जग्राहवासवोवज्रंकृष्णश्चक्रंसुदर्शनम् ६५ ततोहाहाकृतंसर्वंत्रैलोक्यंसचराचरम् । वज्रचक्रधरौदृष्ट्वादेवराजजनार्दनौ ६६ क्षिप्तंवज्रमथेंद्रेणजग्राहभगवाञ्हरिः । नमुमोचतथाचक्रंतिष्ठतिष्ठेतिचाब्रवीत् ६७ प्रनष्टवज्रंदेवेंद्रंगरुडक्षतवाहनम् । सत्यभामाब्रवीद्वीरंपलायनपरायणम् । ६८ । । सत्यभामोवाच । । त्रैलोक्येश्वरनोयुक्तंशचीभर्तुःपलायनम् । पारिजातस्रगाभोगात्त्वामुपस्थास्यतेशची ६९ कीदृशंदेवराज्यंतेपारिजातस्रगुज्ज्वलम् । अपश्यतोयथापूर्वंप्रणयाभ्यागतांशचीम् ७० अलंशक्रप्रयातेननव्रीडांयातुमर्हसि । नीयतांपारिजातोऽयंदेवाःसंतुगतव्यथाः ७१ पतिगर्वावलेपेनबहुमानपुरःसरम् । नददर्शगृहायातामुपचारेणमांशची ७२ स्त्रीत्वादगुरुचित्ताहंस्वभर्तुःश्लाघनापरा । ततःकृतवतीशक्रभवतासहविग्रहम् ७३ तदलंपारिजातेनपरस्वेनहृतेनच । रूपेणगर्वितासातुभर्त्रास्त्रीकानगर्विता ७४ । । पराशरउवाच । । इत्युक्तोवैनिवृत्तेदेवराजस्तथाद्विज । प्राहचैनामलंचंडिसाखिखेदातिविस्तरैः ७५ नचापिसर्गसंहारस्थितिकर्ताखिलस्ययः । जितस्यतेनमेव्रीडाजायतेविश्वरूपिणा ७६ यस्मिञ्जगत्सकलमेतदनादिमध्येयस्माद्यतश्चनभविष्यतिसर्वभूतात् । तेनोद्भवप्रलयपालनकारणेनव्रीडाकथंभवतिदेविनिरा

ताहिंकिमर्थंविग्रहःकारितइत्यतआहपतीतित्रिभिः पत्यर्पितगर्वस्तन्निमित्तेनावलेपेनमदेनगृहागतामपिमांउपचारेणासनादिदानेनसहबहुमानपुरःसरंनददर्श ७२ ७४ पतिगर्वावलेपंशच्यादोषमुद्भाव्यभर्तृश्लाघनापराहमितिवदत्याःस्वस्यापिशचीसाद्दश्यंप्राप्तंपरिहरतिरूपेणेति भर्त्रीकानगर्विताअपितुसर्वैव सातुरूपेणगर्वितेत्यधिकोदोषइत्यर्थः चण्डिकोपनेधृष्टेइतिवा सख्युर्मित्रभूतस्यममखेदहेतुभिरुक्तिविस्तरैरलम् ७५ नव्रीडांगंतुमर्हसीतियदुक्तंतत्राह नचापीतित्रिभिः ७६ यस्मिन्तिष्ठतीतिपालकत्वंयस्मादुपादानकारणाद्यतश्चनिमित्तकारणभूताद्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वतिउद्भवहेतुत्वंनभविष्यतिअभावमेष्यतीतिप्रलयकारणत्वंवोक्तम् ७७ अल्पास्वल्पपरिमाणातत्रापिअणुतोपिसूक्ष्मातिदुर्लक्ष्यामूर्तिर्यस्य आद्यैर्ब्रह्मादिभिर्नज्ञायतेतंअकृतमीशंस्वतःसिद्धमीश्वरंजगदुपकृतेमर्त्यभूतंविजेतुंकःसमर्थइत्यन्वयः ७८ ॥ ॥ इतिश्रीविष्णुपुराणेपंचमेअंशेत्रिंशोध्यायः ३० ॥ ॥ एकत्रिंशेकल्पतरुमानीयोदावहत्समम् षोडशस्त्रीसहस्राणि भगवानित्यवर्णयत् पराजितःसंस्तौषीतिभावगंभीरंप्रहस्य १ अपराधकृतमितिभावेक्तः तवापराधेइदंकृतमितिवास्तवोर्थः २ उचितास्पदंयथोचितस्थानंसत्योपवनाच्छच्युपवनंनोचितं

कृतस्य ७७ सकलभुवनसूतिर्मूर्तिरल्पाणुसूक्ष्माविदितसकलवेद्यैर्ज्ञायतेयस्यनाद्यैः । तमजमकृतमीशंशाश्वतंस्वेच्छयैनंजगदुपकृतिमर्त्यंकोविजेतुं समर्थः ७८ । । इतिश्रीविष्णुपुराणेपंचमेअंशेत्रिंशोध्यायः ३० । । पराशरउवाच । । संस्तुतोभगवानित्थंदेवराजेनकेशवः । प्रहस्यभावगंभीरमुवाचेदंद्विजोत्तम १ देवराजोभवानिंद्रोवयंमर्त्याजगत्पते । क्षंतव्यंभवतैवैतदपराधकृतंमम २ पारिजाततरुश्चायंनीयतामुचितास्पदम् । गृहीतोऽयंमयाशक्रसत्यावचनकारणात् ३ वज्रंचेदंगृहाणत्वंयद्भष्टंप्रहितंत्वया । तवैवेदंप्रहरणंशक्रवैरिविदारणम् ४ । । शक्रउवाच । विमोहयसिमामीशमर्त्योऽहमितिकिंवदन् । जानीमस्त्वांभगवतोनतुसूक्ष्मविदोवयम् ५ योऽसिसोऽसिजगत्त्राणप्रवृत्तौनाथसंस्थितः । जगतःशल्यनिष्कर्षकरोष्यसुरसूदन ६ नीयतांपारिजातोयंकृष्णद्वारवतींपुरीम् । मर्त्यलोकेत्वयामुक्तेनायंसंस्थास्यतेभुवि ७ । । पराशरउवाच । । तथेत्युक्त्वाचदेवेंद्रमाजगामभुवंहरिः । प्रसक्तैःसिद्धगंधर्वैःस्तूयमानस्तथर्षिभिः ८ ततःशंखमुपाध्मायद्वारकोपरिसंस्थितः । हर्षमुत्पादयामासद्वारकावासिनांद्विज ९ अवतीर्याथगरुडात्सत्यभामासहायवान् । निष्कुटेस्थापयामासपारिजातंमहातरुम् १० यमभ्येत्यजनःसर्वोजातिंस्मरतिपौर्विकीम् । वास्यतेयस्यपुष्पाणांगंधेनोर्वीत्रियोजनम् ११ ततस्तेयादवाःसर्वेदेहबंधानमानुषान् । ददृशुःपादपेतस्मिन्कुर्वंतोमुखदर्शनम् १२ किंकरैःसमुपानीतंहस्त्यश्वादिततोधनम् । स्त्रियश्चकृष्णोजग्राहनरकस्यपरिग्रहान् १३ ततःकालेशुभेप्राप्तेउपयेमेजनार्दनः । ताःकन्यानरकेणासन्सर्वतोयाःसमाहृताः १४ एकस्मिन्नेवगोविंदःकालेतासांमहामुने । जग्राहविधिवत्पाणीन्पृथग्गेहेषुधर्मतः १५ षोडशस्त्रीसहस्राणिशतमेकंतथाधिकम् । तावंतिचक्रेरूपाणिभगवान्मधुसूदनः १६ एकैकश्येनताःकन्यामेनिरेमधुसूदनः । ममैवपाणिग्रहणंमैत्रेयकृतवानिति

स्थानमितिहृदयम् तदेवाह गृहीतइति ३ तवैवेदमित्येवकारात्कल्पतरुस्तुसाधारणइतिकाक्वाध्वनितम् ४ त्वांयथादृष्टमात्ररूपंजानीमःनतुतवसूक्ष्मरूपविदः शल्यनिष्कर्षकण्टकोद्धारम् ५ ६ पृथिव्यांकल्पतरुस्थित्यवधिमाह मर्त्यलोकइति ७ प्रसक्तैरनुगच्छद्भिःसिद्धादिभिःस्तूयमानः ८ ९ १० पौर्विकींपूर्वजन्मसंबंधिनीम् ११ अमानुषान्देहबंधान् स्वदेहान्देहाकारान्ददृशुःतस्य जातिस्मारकत्वात् १२ नरकस्यपरिग्रहान्विवाहार्थमवरुद्धाःस्त्रियःकन्याः १३ १४ १५ १६ १७ १८ इतिश्रीविष्णुपुराणेपंचमेअंशेएकत्रिंशोध्यायः ३१ ॥ द्वात्रिंशेथहरेःपुत्राअवशिष्टानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपिताः प्राद्युम्निश्चतथैवोषामुद्वाहेतिचोच्यते पूर्वोक्तपुत्रानुवादपूर्वकंहरेःसर्वान्पुत्रानाह प्रद्युम्नाद्याइतिपंचभिः १ २ अत्रचअष्टमहिष्यनंतर्भूतायाःशैव्यायास्तनयोक्तिःप्रख्यातपुत्रोक्तिप्रस्तावाय ३ ४ ५ अनिरुद्धस्यविवाहांतरंवक्तुंप्रद्युम्नादीन्पुनरनुवदति प्रद्युम्नइति ६ ७ यत्रविवाहेयुद्धमभूत् यत्ररणेबाहूनांसहस्रंचक्रिणाछिन्नम् ८ ९ १० तदाश्रयांभर्त्रा

१७ निशासुजगतःस्रष्टातासांगेहेषुकेशवः । उवासविप्रसर्वासांविश्वरूपधरोहरिः १८ । । इतिश्रीविष्णुपुराणेपंचमेअंशेएकत्रिंशोध्यायः ३१ । । पराशरउवाच । । प्रद्युम्नाद्याहरेःपुत्रारुक्मिण्यांकथितास्तव । भानुंभैमरिकंचैवसत्यभामाव्यजायत १ दीप्तिमंतःप्रपक्षाद्याश्चारोहिण्यांतनयाहरेः । बभूवुर्जांबवत्यांचसांबाद्याबाहुशालिनः २ तनयाभद्रविंदायानाग्नजित्यांमहाबलाः । संग्रामजित्प्रधानास्तुशैब्यायांचाभवन्सुताः ३ वृकाद्यास्तुसुतामाद्र्यांगात्रवत्प्रमुखान्सुतान्। अवापलक्ष्मणापुत्रान्कालिंद्याश्चश्रुतादयः ४ अन्यासांचैवभार्याणांसमुत्पन्नानिचक्रिणः । अष्टायुतानिपुत्राणांसहस्राणांशतंतथा ५ प्रद्युम्नःप्रथमस्तेषांपूर्वेषांरुक्मिणीसुतः । प्रद्युम्नादनिरुद्धोभूद्वज्रस्तस्मादजायत ६ अनिरुद्धोरणेरुद्धोबलेःपौत्रोमहाबलः । बाणस्यतनयामूषामुपयेमेद्विजोत्तम ७ यत्रयुद्धमभूद्घोरंहरिशंकरयोर्महत् । छिन्नंसहस्रंबाहूनांयत्रबाणस्यचक्रिणा ८ । । मैत्रेयउवाच । । कथंयुद्धमभूद्ब्रह्मन्नुषार्थेहरकृष्णयोः । कथंक्षयंचबाणस्यबाहूनांकृतवाञ्हरिः ९ एतत्सर्वंमहाभागममाख्यातुंत्वमर्हसि । महत्कौतूहलंजातंकथयात्रकथामिमाम् १० । । पराशरउवाच । । उषाबाणसुताविप्रपार्वतींशंभुनासह । क्रीडंतीमुपलक्ष्योच्चैःस्पृहांचक्रेतदाश्रयाम् ११ ततःसकलचित्तज्ञागौरीतामाहभाविनीम् । अलमत्यनुतापेनभर्त्रात्वमपिरंस्यसे १२ इत्युक्तेसातदाचक्रेकदेतिमतिमात्मनः । कोवाभर्तामममेत्येनांपुनरप्याहपार्वती १३ वैशाखशुक्लद्वादश्यांस्वप्नेयोऽभिभवंतव । करिष्यतिसतेभर्ताराजपुत्रिभविष्यति १४ । । पराशरउवाच । । तस्यांतिथौपुमान्स्वप्नेयथादेव्याउदीरितम् । तथैवाभिभवंचक्रेरागंचक्रेचतत्रसा १५ ततःप्रबुद्धापुरुषमपश्यंतीसमुत्सुका । क्वगतोऽसीतिनिर्लज्जामैत्रेयोक्तवतीसखीम् १६ बाणस्यमंत्रीकुंभांडश्चित्रलेखातुतत्सुता । तस्याःसख्यभवत्साचप्राहकोऽयंत्वयोच्यते १७ यदालज्जाकुलानासौकथयामाससासखी । तदाविश्वासमानीयसर्वंमेवाभ्यवादयत् १८ विदितार्थांतुतामाहपुनरूषायथोदितम् । देव्यातथैवतत्प्राप्तौ

सहक्रीडाविषयांस्पृहाम् ११ १२ गौर्याइत्युक्तेभर्त्रासहरतिरात्मनःकदास्यादितिमतिंचक्रे १३ अभिभवंआक्रम्यसंभोगम् १४ १५ औत्सुक्यातिशयेनभ्रांत्यासखीमेवक्वगतोसीत्युक्तवती १६ क्वगतोसीत्युक्तःकःपुमांस्त्वयोच्यते १७ अभ्यवादयत्आभिमुख्येनयथावृत्तमुषामवादयत्स्वप्नप्रतिकथामकारयत् १८ तांचित्रलेखामाह देव्यायथोदितंसतेभर्ताभविष्यतीतितथैवतस्यभर्तुःप्राप्तौतमुपायम् १९ अस्यैउषायै प्रदर्शयदित्यत्राडभावश्छांदसः २० मनुष्येषुकांतसाजात्येनदृष्टिंददौतत्रापिअंधकवृष्णिषुकांतसमानवेषत्वात् २१ रामकृष्णौकिंचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कांतसदृशौदृष्ट्वालज्जाजडेवासीत् प्रद्युम्नदर्शनेत्रतिकांतसादृश्येनश्वशुरबुद्ध्याव्रीडायुक्तांदृष्टिमन्यतोनिन्ये २२ २३ योगगामिनीयोगबलादाकाशगामिनी २४ इतिश्रीविष्णुपुराणे वैष्णवाकूतचंद्रिकायांपंचमेअंशेद्वात्रिंशोध्यायः ३२ त्रयस्त्रिंशेबाणयुद्धंसानुबंधंनिरूपितम् बहुबाहुर्द्विबाहुस्तुबाणोयत्रारिणाकृतः अथयुद्धेबाणबाहुच्छेदंवक्ष्यन्तस्यशंभोरपिस म्मतिंदर्शयन्नाह बाणोपीतिचतुर्भिः अग्रेसंमुखेप्राह अनिरुद्धागमनात्प्रागितिवा १ २ पिशिताशिनोमांसभुजोनिशाचरादीनानंदयतियस्तंरणंप्राप्स्यसि ३ इतिशंभोर्वचनंश्रुत्वामुदि

योभ्युपायःकुरुष्वतम् १९ । । पराशरउवाच । । ततःपटेसुरान्दैत्यान्गंधर्वांश्चप्रधानतः । मनुष्यांश्चाभिलिख्यास्यैचित्रलेखाप्रदर्शयत् २० अपास्यसातुगंधर्वांस्तथोरगसुरासुरान् । मनुष्येषुददौदृष्टिंतेष्वप्यंधकवृष्णिषु २१ कृष्णरामौविलोक्यासीत्सुभ्रूर्लज्जाजडेवसा । प्रद्युम्नदर्शनेव्री डादृष्टिंनिन्येन्यतोद्विज २२ दृष्टमात्रेततःकांतेप्रद्युम्नतनयेद्विज । दृष्ट्वात्यर्थविकासिन्यालज्जाक्वापिनिराकृता २३ सोऽयंसोऽयंममेत्युक्तेतयासायोग गामिनी । ययौद्वारवतीमूषांसमाश्वास्यततःसखीम् २४ । । इतिश्रीविष्णुपुराणेपञ्चमेअंशेद्वात्रिंशतितमोध्यायः ॥ ३२ ॥ । ७ । । प राशरउवाच । । बाणोऽपिप्रणिपत्याग्रेमैत्रेयाहत्रिलोचनम् । देवबाहुसहस्रेणनिर्विण्णोऽहंविनारणम् १ कच्चिन्ममैषांबाहूनांसाफल्यकरणो रणः । भविष्यतिविनायुद्धंभारायममकिंभुजैः २ । । शंकरउवाच । । मात्वरध्वजभंगस्तेयदाबाणभविष्यति । पिशिताशिजनानंदंप्रा प्स्यसित्वंमहारणम् ॥ ३ ॥ । पराशरउवाच । । ततःप्रणम्यमुदितःशंभुमभ्यागतोगृहान् । भग्नंतंध्वजमालोक्यहृष्टोहर्षांतरंययौ ४ ए तस्मिन्नेवकालेतुयोगविद्याबलेनतम् । अनिरुद्धमथानिन्येचित्रलेखावराप्सराः ५ कन्यांतःपुरमध्येतंरममाणंसहोषया । विज्ञायरक्षिणोगत्वाश शंसुर्दैत्यभूपतेः ६ व्यादिष्टंकिंकराणांतुसैन्यंतेनमहात्मनः । जघानपरिघंलौहमादायपरवीरहा ७ हतेषुतेषुबाणोऽपिरथस्थस्तद्वधोद्यतः । युद्ध मानोयथाशक्तियदावीर्येणनिर्जितः ८ माययायुयुधेतेनसतदामंत्रिचोदितः । ततश्चपन्नगास्त्रेणबबंधयदुनंदनम् ९ द्वारवत्यांक्वयातोऽसावनिरुद्धे तिजल्पताम् । यदूनामाचचक्षेतंबद्धंबाणेननारदः १० तच्छोणितपुरेश्रुत्वानीतंविद्याविदग्धया । योषिताप्रत्ययंजग्मुर्यादवानामरैरिति ११ ततोगरुडमारुह्यस्मृतमात्रागतंहरिः । बलप्रद्युम्नसहितोबाणस्यप्रययौपुरीम् १२ पुरीप्रवेशेप्रमथैर्युद्धमासीन्महात्मनः । ययौबाणपुराभ्याशंनी

तोदृष्टस्तंध्वजंभग्नंदृष्ट्वाहृर्षांतरंययावित्यन्वयः ४ ५ ६ तेनव्यादिष्टंसैन्यंपरवीरहाअनिरुद्धोजघान ७ ८ ९ अनिरुद्धेतीत्यत्रसंधिरार्षः असावनिरुद्धःक्वयातइतिजल्पतामित्यर्थः १० नारदवाक्यादेवयोगविद्यानिपुणयायोषिताचित्रलेखयानीतंशोणितपुरेवर्तमानंश्रुत्वायादवानामरैर्नीतइतिप्रत्ययंजग्मुः पारिजातहरणेपराभूतैर्नीतइतिशंकांजहुरित्यर्थः ११ १२ प्रम थैःशिवगणविशेषैः १३ १४ त्रिपाद्भस्मप्रहरणस्त्रिशिरारक्तलोचनइत्यादिमंत्रलिंगाज्ज्वरस्यतस्यप्रहरणभूतंयद्भस्मतस्यस्पर्शेनसंभूतस्तापोयस्यबलदेवस्यसःअतएवामीलितेईक्षणेयस्यसः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णस्यअंगसंगमादालिंगनाच्छमंस्वास्थ्यमवाप श्रममितिपाठेज्वराभिभूतकृष्णस्पर्शाद्बलभद्रोपिश्रांतोभूदित्यर्थः १५ ततःसमाहेश्वरोज्वरःकृष्णदेहंप्रविश्यतेनसहयुद्ध्यमानस्तदानी मेवसृष्टेनवैष्णवेनज्वरेणतद्देहाद्बहिर्निराकृतःनिःसारितः १६ १७ लयंसौक्ष्म्यंनिन्येनतुनाशं युवांज्वरौज्वरपतीपीडायांमरणेप्रभू पीडनेतुभवानस्तुमरणेमामकोज्वरइतिहरिवंशेभगवतैव कार्यद्वयव्यवस्थानात् १८ १९ अग्नीन्तत्पुररक्षकान्पंच आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्याख्यान्क्षयंतत्रादर्शनंनीत्वा २० २१ यत्रयुद्धेअस्त्राणामंशुभिर्ज्वालाभिःप्रकर्षेण

त्वातत्संक्षयंहरिः १३ ततस्त्रिपादस्त्रिशिराज्वरोमाहेश्वरोमहान् । बाणरक्षार्थमत्यर्थंयुयुधेशार्ङ्गधन्वना १४ तद्भस्मस्पर्शसम्भूततापःकृष्णांगसंग मात् । अवापबलदेवोऽपिशममामीलितेक्षणः १५ ततःसयुद्ध्यमानस्तुसहदेवेनशार्ङ्गिणा । वैष्णवेनज्वरेणाशुकृष्णदेहान्निराकृतः १६ नाराय णभुजाघातपरिपीडनविव्हलम् । तंवीक्ष्यक्षम्यतामस्येत्याहदेवंपितामहः १७ ततश्चक्षांतमेवेतिप्रोक्तातंवैष्णवंज्वरम् । आत्मन्येवलयंनिन्येभ गवान्मधुसूदनः १८ ममत्वयासमंयुद्धेयेस्मरिष्यंतिमानवाः । विज्वरास्तेभविष्यंतीत्युक्त्वाचैनंययौज्वरः १९ ततोऽग्नीन्भगवान्पञ्चजित्वानीत्वा क्षयंतथा । दानवानांबलंविष्णुश्चूर्णयामासलीलया २० ततःसमस्तसैन्येनदैतेयानांबलेःसुतः । युयुधेशंकरश्चैवकार्तिकेयश्चशौरिणा २१ हरिशं करयोर्युद्धमतीवासीत्सुदारुणम् । चुक्षुभुःसकलालोकायत्रास्त्रांशुप्रतापिताः २२ प्रलयोऽयमशेषस्यजगतोनूनमागतः । मेनिरेत्रिदशायत्रवर्तमाने महाहवे २३ जृंभणास्त्रेणगोविंदोजृंभयामासशंकरम् । ततोविनेदुर्दैतेयाःप्रमथाश्चसमंततः २४ जृंभाभिभूतस्तुहरोरथोपस्थउपाविशत् । नशशा कतथायोद्धुंकृष्णेनाक्लिष्टकर्मणा २५ गरुडक्षतवाहश्चप्रद्युम्नास्त्रनिपीडितः । कृष्णहुंकारनिर्धूतशक्तिश्चापययौगुहः२६जृंभितेशंकरेनष्टेदैत्यसैन्येगुहे जितेनीतेप्रमथसैन्येचसंक्षयंशार्ङ्गधन्वना२७नन्दीशसंगृहीताश्वमधिरूढोमहारथम्।बाणस्तत्राययौयोद्धुंकृष्णकार्ष्णिबलैःसह २८बलभद्रोमहावीर्यो बाणसैन्यमनेकधाविव्याधबाणैःप्रभ्रश्यधर्मतश्चापलायतः २९ आकृष्यलांगलाग्रेणमुसलेनावपोथितम् । बलंबलेनददृशेबाणोबाणैश्चचक्रिणा । ३० ततःकृष्णस्यबाणेनयुद्धमासीत्समंततः । परस्परमिषून्दीप्तान्कायत्राणविभेदकान् ३१ कृष्णश्चिच्छेदबाणांस्तान्बाणेनप्रहिताञ्शनैः ।

तापिताःसंतः २२ प्रलयोनूनमागतइतिमेनिरे २३ विनेशुःपलायिताः २४ जृंभाभिभूतःआलस्यव्याप्तः रथोपस्थेरथपृष्ठे २५ कृष्णहुंकारेणनिर्धूताशक्तिरायुधंयस्यसगुहोऽपययौअप क्रांतः २६ २७ २८ धर्मतःधर्मानुरोधेनअपलायतःअपलायमानान्बाणसैनिकान्प्रभ्रश्यस्थानात्प्रच्याव्यविव्याधेत्यन्वयः अपलायतेतिपाठेयदाविव्याधतदाधर्मतःप्रभ्रश्यप्रभ्रष्टंसत्पला यतेत्यर्थः २९ बलेनरामेणमुसलेनायुधेनचक्रिणाचबाणैरवपोथितंस्वबलंबाणोददृशइत्यन्वयः ३० कृष्णस्यबाणेनसहपरस्परंसमंततोयुद्धमासीत् तदेवाह कृष्णःइषून्कायत्राणंकवचं तस्यविभेदकान्चिच्छेद तेनकृष्णेनप्रहितान्बाणान्बाणःशनैश्चिच्छेद समंततइत्यत्रसमस्यतइतिपाठेइषून्समस्यतःक्षिपतःकृष्णस्यबाणेनसहपरस्परंयुद्धमासीदित्यर्थः ३१ ३२ ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचुर्येणास्त्रेसीदतिक्षीणेसति ३४ अर्कशतसंभूतंयदितेजःस्यात्तदातस्यसदृशीद्युतिर्यस्यतत् ३५ कोटवीदैत्यविद्यामंत्रमयीदैत्यकुलदेवता कोट्टवीतिक्वचित्पाठः ३६ ३७ असुरैरपास्तः क्षिप्तोयःशस्त्रौघस्तस्यक्षेपणेनाशनेआदृतमुद्युक्तम् ३८ ३९ ४० ४१ सर्वभूतरूपस्यापितवशरीरग्रहणात्मिकालीलाप्रयोजनंविनैवशरीरग्रहणसंकल्पः चेष्टासत्पालनाऽसन्निग्रहादि व्यापारः सैवोपलक्षणंज्ञानसाधनंयस्याःसा ४२ बाणस्यास्ययन्मयाव्याहृतंउक्तंअभयंदत्तंतत्त्वयानृतंनकार्यमित्यर्थः ४३ ४४ ४५ ४६ मत्तःअविभिन्नामितिच्छेदः नात्मानमितिपा

बिभेदकेशवंबाणोबाणंविव्याधचक्रभृत् ३२ मुमुचातेतथास्त्राणिबाणकृष्णौजिगीषया । परस्परक्षतिपरौपरमामर्षिणौद्विज ३३ छिद्यमानेष्वशेषेषुशरेष्वस्त्रेचसीदति । प्राचुर्येणहरिर्बाणंहंतुंचक्रेततोमनः ३४ ततोऽर्कशतसंभूतंतेजसःसदृशद्युति । जग्राहदैत्यचक्रारिर्हरिश्चक्रंसुदर्शनम् । ३६ मुंचतोबाणनाशायतच्चक्रंमधुविद्विषः । नभ्रादैत्येयविद्याभूत्कोटवीपुरतोहरेः ३६ तामग्रतोहरिर्दृष्ट्वामीलिताक्षःसुदर्शनम् । मुमोचबाणमुद्दिश्यछेत्तुंबाहुबलंरिपोः ३७ क्रमेणतत्तुबाहूनांबाणस्याच्युतचोदितम् । छेदंचक्रेऽसुरापास्तशस्त्रौघक्षेपणादृतम् ३८ छिन्नेबाहुबलेतस्यकरस्थंमधुसूदनः । मुमुक्षुर्बाणनाशायविज्ञातस्त्रिपुरद्विषा ३९ सउपेत्याहगोविंदंसामपूर्वमुमापतिः । विलोक्यबाणदोर्दंडच्छेदासृक्स्रावववर्षणम् । ४० । । रुद्रउवाच । । कृष्णकृष्णजगन्नाथजानेत्वांपुरुषोत्तमम् । परेशंपरमात्मानमनादिनिधनंपम् । देवतिर्यङ्मनुष्येषुशरीरग्रहणात्मिका । लीलेयंसर्वभूतस्यतवचेष्टोपलक्षणा ४२ तत्प्रसीदाभयंदत्तंबाणस्यास्यमयाप्रभो । तत्त्वयानानृतंकार्यंयन्मयाव्याहृतंवचः ४३ अस्मत्संश्रयवृद्धोयमपराधस्तवाव्यय । मयादत्तवरोदैत्यस्ततस्त्वांक्षमयाम्यहम् ४४ । । पराशरउवाच । । इत्युक्तःप्राहगोविंदःशूलपाणिमुमापतिम् । प्रसन्नवदनोभूत्वागतामर्षोऽसुरंप्रति ४५ । । भगवानुवाच । । युष्मद्दत्तवरोबाणोजीवतादेषशंकर । त्वद्वाक्यगौरवादेतन्मयाचक्रंनिवर्तितम् ४६ त्वयायदभयंदत्तंतद्दत्तमखिलंमया । मत्तोविभिन्नमात्मानंद्रष्टुमर्हसिशंकर ४७ योऽहंसत्वंजगच्चेदंसदेवासुरमानुषम् । अविद्यामोहितात्मानःपुरुषाभिन्नदर्शिनः४८ । । पराशरउवाच । । इत्युक्त्वाप्रययौकृष्णःप्राद्युम्निर्यत्रतिष्ठति । तद्बंधफणिनोनेशुर्गरुडानिलशोषिताः ४९ ततोनिरुद्धमारोप्यसपत्नीकंगरुत्मति । आजग्मुर्द्वारकांरामकार्ष्णिदामोदराःपुरीम् ५० । । इतिश्रीविष्णुपुराणेपंचमेअंशेत्रयस्त्रिंशोध्यायः ३३ । । मैत्रेयउवाच । । चक्रेकर्ममहच्छौरिर्बिभ्रत्सन्मानुषींतनुम् । जिगायशक्रंशर्वंचसर्वदेवांश्चलीलया १ यच्चान्यदकरोत्कर्मादि

ठस्तुसुगमः ४७ ४८ प्राद्युम्निरानिरुद्धः नेशुःपलायिताः ४९ ५० इतिश्रीवैष्णवाकूतचंद्रिकायांत्रयस्त्रिंशोध्यायः ३३ पौंड्रकंकाशिराजंचभगवानरिणावधीत् कृत्यांचकाशिकांचात्रददाहेतिनिरूप्यते १ दिव्यचेष्टादेवचेष्टातस्यविघातकृद्यदन्यत्कर्मतत्कथ्यताम् दिव्यचेष्टात्रकाशिराजसुतेनोत्पादितवीरभद्ररूपकृत्याव्यापारः २ कृत्यानाशद्वारायथावाराणसीद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्धातच्छ्रूयताम् ३ पौंड्रकःपौंड्रदेशजोवासुदेवनाम्नायोभवत्सोज्ञैर्जनैर्वासुदेवस्त्वमवतीर्णइत्युक्तआत्मानंसत्यमेववासुदेवोहमितिमेने ततश्चविष्णुचिह्नमकरोदितिद्वयोरन्वयः ४ नष्टामनुष्योहमितिस्मृतिर्यस्यसः ५ ६ ७ आत्मनस्तवचक्रादिकंचिह्नंवासुदेवात्मकंनामचयन्मदीयंतत्सर्वमशेषतस्त्यक्त्वात्याजयित्वामांमूढमुक्त्वाभर्त्सयित्वाआत्मनोममजीवितार्थायजीवितरूपमर्थंग्रहीतुंप्रगतानतिर्यत्रदंडेनव्रजकुर्वितिवास्तवोर्थः इत्थंभावेनाप्यस्यनिस्तारोभावीतिसंग्रहस्य तदेवरूपंदुरवापमापेतिशुकोक्तेः समुत्स्रक्ष्येत्वयीतिदूतमुखेनपौंड्रंसंबोध्यवदति चक्रं

व्यचेष्टाविघातकृत् । कथ्यतांतन्महत्कर्मपरंकौतूहलंहिमे २ । । पराशरउवाच । । गदतोममविप्रर्षेश्रूयतामिदमादरात् । नरावतारेकृष्णेनदग्धावाराणसीयथा ३ पौंड्रकोवासुदेवस्तुवासुदेवोऽभवद्भुवि । अवतीर्णस्त्वमित्युक्तोजनैरज्ञानमोहितैः ४ समेनेवासुदेवोहमवतीर्णोमहीतले । नष्टस्मृतिस्ततःसर्वंविष्णुचिह्नमचीकरत् ५ दूतंचप्रेषयामासकृष्णायसमहात्मने । त्यक्त्वाचक्रादिकंचिह्नंमदीयंनामचात्मनः ६ वासुदेवात्मकंमूढमुक्त्वासर्वमशेषतः । आत्मनोजीवितार्थायततोमेप्रणतिंव्रज ७ इत्युक्तःसंग्रहस्यैनंदूतंप्राहजनार्दनः । निजचिह्नमहंचक्रंसमुत्स्रक्ष्येत्वयीतिवै ८ वाच्यश्चपौंड्रकोगत्वात्वयादूतवचोमम । ज्ञातस्त्वद्वाक्यसद्भावोयत्कार्यंतद्विधीयताम् ९ गृहीतचिह्नएवाहमागमिष्यामितेपुरम् । ततस्त्यक्ष्यामितेचक्रंनिजचिह्नमसंशयम् १० आज्ञापूर्वंचयदिदमागच्छेतित्वयोदितम् । संपादयिष्येश्वस्तुभ्यंतदप्येषोविलंबितम् ११ शरणंतेसमभ्येत्यकर्तास्मिन्नृपतेतथा । यथात्वत्तोभयंभूयोनमेकिंचिद्भविष्यति १२ । । पराशरउवाच । । इत्युक्तेऽपगतेदूतेसंस्मृत्याभ्यागतंहरिः । गरुत्मंतंतथारुह्यत्वरितंतत्पुरंययौ १३ सचापिकेशवोद्योगंश्रुत्वाकाशिपतिस्तदा । सर्वसैन्यपरीवारःपार्ष्णिग्राहउपाययौ १४ ततोबलेनमहताकाशिराजबलेनच । पौंड्रकोवासुदेवोऽसौकेशवाभिमुखंययौ १५ तंददर्शहरिर्दूरादुदारस्यंदनेस्थितम् । चक्रहस्तंगदाखड्गबाहुंपाणिगतांबुजम् १६ स्रग्धरंधृतशार्ङ्गंचसुपर्णरचनाध्वजम् । वक्षस्थलेकृतंचास्यश्रीवत्संददृशेहरिः १७ किरीटकुंडलधरंपीतवासःसमन्वितम् । दृष्ट्वातंभावगंभीरंजहासगरुडध्वजः १८ युयुधेचबलेनास्यहस्त्यश्वबलिनाद्विज । निस्त्रिंशर्ष्टिगदाशूलशक्तिकार्मुकशालिना १९ क्षणेनशार्ङ्गनिर्मुक्तैःशरैरिविदारणैः । गदाचक्रनिपातैश्चसूदयामासतद्बलम् २० काशिराजबलंचैवक्षयंनीत्वाजनार्दनः । उवाचपौंड्रकंमूढमात्मचिह्नोपलक्षणम् २१ । । श्रीभगवानुवाच

क्षिप्त्वात्वांहनिष्यामीतिभावः ८ इममर्थंविस्तारयन्नाहवाच्यइतिचतुर्भिः त्वद्वाक्यस्यसद्भावःसम्यगभिप्रायोज्ञातइतिसोन्मूलनं यत्कार्यमवश्यंकरणीयंतद्विधीयतां चक्रक्षेपानंतरंतस्यासंभ्रमादित्यर्थः ९ १० आगच्छेतियत्त्वयोदितमभिप्रायतइतिशेषः एषस्त्वयमेवसंपादयिष्ये ११ प्रणतिंव्रजेत्यस्यप्रत्युत्तरंशरणमिति त्वत्तोभयंनभविष्यतीत्यत्रत्वन्मरणानंतरं भयाभावइतिभावः १२ संस्मृत्यासंस्मरणेनाभ्यागतम् १३ पार्ष्णिग्राहः सहायः १४ १५ १६ १७ १८ हस्तिभिरश्वैश्चबलिना निस्त्रिंशाद्यैरायुधैःशालिनाआढ्येन १९ २० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२ २३ २४ अपचितौआनृण्येस्थितःसन्युयुधे २५ २६ २७ किमेतत्केनचैतच्छिन्नमित्याहेत्यन्वयः २८ २९ ३० पितृहंतुर्वधायकृत्यासमुत्तिष्ठत्वितिवत्रेनतुहिनस्त्विति शंकरे णापिवधार्थंसमुत्थानमात्रंभविष्यतीत्यनुमतमितिवधाभावेपिनविरोधः ३१ ३२ ज्वलन्केशानांकलापःसमूहोयस्याः कपालिकेतिपाठेकपालंशिरः ३३ त्रासेनविचलंतिलोचनानियस्य

पौंड्रकोक्तंत्वयायत्तुदूतवक्त्रेणमांप्रति। समुत्सृजेतिचिह्नानितत्तेसंपादयाम्यहम् २२ चक्रमेतत्समुत्सृष्टंगदेयंतेविसर्जिता। गरुत्मानेषनिर्दिष्टःसमारोहतुतेध्वजम् २३। । पराशरउवाच। । इत्युच्चार्यविमुक्तेनचक्रेणासौविदारितः। परितोगदयाभग्नोगरुत्मांश्चगरुत्मता २४ ततोहाहाकृतेलोकेकाशीनामधिपोबली। युयुधेवासुदेवेनमित्रस्यापचितौस्थितः २५ ततःशार्ङ्गविनिर्मुक्तैश्छित्त्वातस्यशरैःशिरः। काशिपुर्यांसचिक्षेपकुर्वंल्लोकस्यविस्मयम् २६ हत्वाचपौंड्रकंशौरिःकाशिराजंचसानुगम्। पुनर्द्वारवतींप्राप्तोरेमेस्वर्गगतोयथा २७ तच्छिरःपतितंतत्रदृष्ट्वाकाशिपतेःपुरे। जनःकिमेतदित्याहकेनेत्यत्यंतविस्मितः २८ ज्ञात्वातंवासुदेवेनहतंतस्यसुतस्ततः। पुरोहितेनसहितस्तोषयामासशंकरम् २९ अविमुक्तेमहाक्षेत्रेतोषितस्तेनशंकरः। वरंवृणीष्वेतितदातंप्रोवाचतदात्मजम् ३० सवत्रेभगवन्कृत्यापितृहंतुर्वधायमे। समुत्तिष्ठतुकृष्णस्यत्वत्प्रसादान्महेश्वर ३१। । पराशरउवाच। । एवंभविष्यतीत्युक्तेदक्षिणाग्नेरनंतरम्। महाकृत्यासमुत्तस्थौतस्यैवाग्निनिवेशनात् ३२ ततोज्वालाकरालासाज्वलत्केशकलापिका। कृष्णकृष्णेतिकुपिताकृत्याद्वारवतींययौ ३३ तामवेक्ष्यजनस्त्रासविचलल्लोचनोमुने। ययौशरण्यंजगतांशरणंमधुसूदनम् ३४ काशिराजसुतेनेयमाराध्यवृषभध्वजम्। उत्पादितामहाकृत्येत्यवगम्याथचक्रिणा ३५ जहिकृत्यामिमामुग्रांवह्निज्वालाजटाकुलाम्। चक्रमुत्सृष्टमक्षेषुक्रीडासक्तेनलीलया ३६ तदग्निमालाजटिलंज्वालोद्गारातिभीषणम्। कृत्यामनुजगामाशुविष्णुचक्रंसुदर्शनम् ३७ चक्रप्रतापविध्वस्ताकृत्यामाहेश्वरीतदा। ननाशवेगिनीवेगात्तदप्यनुजगामताम् ३८ कृत्यावाराणसीमेवप्रविवेशत्वरान्विता। विष्णुचक्रप्रतिहतप्रभावामुनिसत्तम ३९ ततःकाशिबलंभूरिप्रमथानांतथाबलम्। समस्तशस्त्रास्त्रयुतंचक्रस्याभिमुखंययौ ४० शस्त्रास्त्रमोक्षचतुरंदग्ध्वातद्बलमोजसा। कृत्यागर्भामशेषांतांतदावाराणसींपुरीम् ४१ प्रभूतभृत्यपौरांतुसाश्वमातंगमानवाम्। साशेषकोषकोष्ठाढ्यांदुर्निरीक्ष्यांसुरैरपि ४२ ज्वालापरिकृताशेषगृहप्राकारचत्वरम्। ददाहतद्धरेश्चक्रंसकलामेवतांपुरीम् ४३ अक्षीणमरिमत्यल्पसाध्यसाधनसस्पृहम्। तच्चक्रंप्रस्फुरद्दीप्तिविष्णारेभ्याय

सः ३४ ३५ वह्निज्वालायुक्ताभिर्जटाभिराकुलांजहिइत्युक्त्वाचक्रमुत्सृष्टं अक्षेषुपाशकेषु ३६ तच्चक्रंअग्निमालाभिर्जटिलम् ज्वालानामुद्गारैर्निर्गमैर्भीषणम् स्त्रीलिंगपाठेकृत्याविशेषणम् ३७ ननाशापलायत तच्चक्रमप्यनुजगाम ३८ ३९ ४० ४१ प्रभूताभृत्यपौराश्चयस्यांसा सभूभृद्भृत्यपौरामितिपाठांतरम् तदाभूभृत्नृपःसमग्रकोषांतर्गृहसहिताम् ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वालापरिकृतंज्वालावेष्टितमशेषगृहादियस्याम् ४३ अक्षीणंसमृद्धमरिंप्रतिअत्यल्पस्यसाध्यस्यकृत्यानाशवाराणसीदाहादेःसाधनात्संपादनात्सस्पृहंस्वल्पकार्यसाधनेनाकृतार्थमिवबृहत्कार्यसाधनेसोत्कंठमित्यर्थः अक्षीणामर्षमत्यल्पेतिपाठेत्वगतक्रोधमितिचक्रविशेषणम् इतिहेतोरन्यसाध्यसाधनेसस्पृहमिवेत्यर्थः ४४ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचमेअंशेचतुस्त्रिंशोध्यायः ३४ इहाधिगंगांकुरवःपात्यमानाःपुरासह सांबंसभार्यंहालिनेभियाददुरितीर्यते अदहत्काशिकांकृष्णश्चक्रेणसकलामतः हलेनैचउद्वलःक्षेतुंगंगायांहस्तिनापुरम् १

यौकरम् ४४ । । इतिश्रीविष्णुपुराणेपंचमेअंशेचतुस्त्रिंशोध्यायः ३४ । । मैत्रेयउवाच । । भूयएवाहमिच्छामिबलभद्रस्यधीमतः । श्रोतुंपराक्रमंब्रह्मंस्तन्ममाख्यातुमर्हसि १ यमुनाकर्षणादीनिश्रुतानिभगवन्मया । तत्कथ्यतांमहाभागयदन्यत्कृतवान्बलः २ । । पराशरउवाच । । मैत्रेयश्रूयतांकर्मयद्रामेणाभवत्कृतम् । अनंतेनाप्रमेयेणशेषेणधरणीभृता ३ दुर्योधनस्यतनयांस्वयंवरकृतक्षणाम् ।बलादादत्तवान्वीरःसांबोजांबवतीसुतः ४ ततःक्रुद्धामहावीर्याःकर्णदुर्योधनादयः । भीष्मद्रोणादयश्चैनंबबंधुर्युधिनिर्जितम् ५ तच्छ्रुत्वायादवाःसर्वेक्रोधंदुर्योधनादिषु। मैत्रेयचक्रुश्चक्रुश्चतान्निहंतुंमहोद्यमम् ६ तान्निवार्यबलःप्राहमदलोलकलाक्षरम् । मोक्ष्यंतितेमद्वचनाद्यास्याम्येकोहिकौरवान् ७बलदेवस्ततोगत्वानगरंगजसाव्हयम् । बाह्योपवनमध्येभून्नविवेशचतत्पुरम् ८ बलमागतमाज्ञायभूपादुर्योधनादयः । गामर्घ्यमुदकंचैवरामायप्रत्यवेदयन् ९ गृहीत्वाविधिवत्सर्वेततस्तानाहकौरवान् । आज्ञापयत्युग्रसेनःसांबमाशुविमुंचत १० ततस्तुतद्वचःश्रुत्वाभीष्मद्रोणादयोद्विज । कर्णदुर्योधनाद्याश्चचुक्रुधुर्द्विजसत्तम ११ ऊचुश्चकुपिताःसर्वेबाल्हीकाद्याश्चकौरवाः । अराज्यार्हंयदोर्वंशमवेक्ष्यमुसलायुधम् १२ भोभोकिमेतद्भवताबलभद्रोदितंवचः । आज्ञांकुरुकुलोत्थानांयादवःकःप्रदास्यति १३ उग्रसेनोऽपियद्याज्ञांकौरवाणांप्रदास्यति । तदलंपांडुरैश्छत्रैर्नृपयोग्यैरलंकृतैः १४ तद्गच्छबलपापाढ्यंसांबमन्याय्यचेष्टितम् । विमोक्ष्यामोनभवतोनोग्रसेनस्यशासनात् १५ प्रणतिर्याकृतास्माकंमान्यानांकुकुरांधकैः । ननामसाकृताकेयमाज्ञास्वामिनिभृत्यवत् १६ गर्वमारोपितायूयंसमानासनभोजनैः । कोदोषोभवतांनीतिर्यत्प्रीत्यानावलोकिता १७ अस्माभिरर्घोभव

२ ३ बलभद्रमाहात्म्यंवक्तुंप्रस्तावमाह दुर्योधनस्येत्यादिनाविविशुर्गजसाह्वयमित्यंतेन कृतक्षणांतत्कृतावसराम् कृतेक्षणामितिपाठेराजसुकृतमीक्षणंययाताम् ४ ५ ६ मदेनलोलाक्षरंचपलाव्यक्तमधुराक्षरंयथाभवत्येवंप्राह ७ पुरंनविवेशमद्वाक्याकरणेसकौरवंपुरमेवगंगायांप्रक्षेतुमिच्छन् ८ उदकमत्रपाद्यंप्रत्यवेदयन्दत्तवंतः ९ १० ११ यदोर्वंशंयदुवंशजंतमुग्रसेनमराज्यार्हमवेक्ष्यमुसलायुधमूचुः १२ १३ यद्यस्मासुआज्ञापयंतितत्तदायदूनांपांडुरैरलंकृतैर्भूषितैश्छत्रैरलम् तेषांछत्राण्यपिहरिष्यामइतिभावः विडंबितैरितिपाठेऽस्मच्छत्रानुकरणैरित्यर्थः यद्वायद्यस्माद्यादवाआज्ञापयंतितदास्माकंछत्रैरलमिति १४ १५ पूर्वमस्माकंयाप्रणतिर्विज्ञातिर्भवद्भिर्यादवैःकृताननामसास्तुस्वामिनिभृत्यवत् भृत्येष्वेवास्मासुयाआज्ञाकृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेयंकिम् भृत्यतइतिपाठेयथेत्यध्याहार्यम् अस्माकंयादवाभृत्यास्तेषामाज्ञानयुनक्ति किंतुविज्ञापनमेवयुक्तमितिभावः १६ समानासनभोजनैःसहासनसहभोजनादिभिर्यूयंगर्वमारोपितायद्य स्मात्प्रीत्यानीचैःसहसमानासनादिकंनकार्यमितिनीतिर्नावलोकिताअस्माभिरताभवतांकोदोषः किंत्वस्माकमेवापराधइत्यर्थः १७ एतदर्घार्पणंप्रेमप्रेमकार्यंनत्वस्माकंकुलादर्घार्पणंयुष्मत्कु लोचितम् इदमप्यनुचितंकृतमितिभावः १८ नुमुंचामइतिकृतैकनिश्चयाःकृतैकमस्याः १९ अधिक्षेपजन्मनातिरस्कारभवेन अंतःकोपेनेत्यपिपाठः २० २१ स्वगतंयदुवाचतदाह

तोयोऽयंबलनिवेदितः । प्रेमैतन्नैतदस्माकंकुलाद्युष्मत्कुलोचितम् १८ । । पराशरउवाच । । इत्युक्त्वाकुरवःसर्वेनमुंचामोहरेःसुतम् । कृतै कनिश्चयास्तूर्णंविविशुर्गजसाव्हयम् १९ मत्तःकोपेनचाघूर्णस्तदधिक्षेपजन्मना । उत्थायपाष्णर्यावसुधांजघानसहलायुधः २० ततोविदारिताष्ट ध्वीपार्ष्णिपातान्महात्मनः । आस्फोटयामासतदादिशःशब्देनपूरयन् २१ उवाचचातिताम्राक्षोभ्रुकुटीकुटिलाननः । अहोमहाबलेपोऽयमसारा णांदुरात्मनाम् २२ कौरवाणामाधिपत्यमस्माकंकिलकालजम् । उग्रसेनस्ययेनाज्ञांमन्यंतेऽद्यापिलंघिनीम् २३ आज्ञांप्रतीच्छेद्धर्मेणसहदेवैः शचीपतिः । सदाध्यास्तेसुधर्मांतामुग्रसेनःशचीपतेः २४ धिङ्मानुषाणामुच्छिष्टेतुष्टिरेषांनृपासने । पारिजाततरोःपुष्पंमंजरीर्वनिताजनः २५ बिभर्तियस्यभृत्यानांसोऽप्येषनमहीपतिः । समस्तभूभुजांनाथउग्रसेनःसतिष्ठतु २६ अद्यनिष्कौरवामुर्वींकृत्वायास्यामितांपुरीम् । कर्णंदुर्योधनं द्रोणमद्यभीष्मंसबाल्हिकम्२७दुःशासनादीन्भूरिंचभूरिश्रवसमेवच। सोमदत्तंशलंभीममर्जुनंसयुधिष्ठिरम् २८ यमजौकौरवांश्चान्यान्हत्वासाश्व रथद्विपान् । वीरमादायतंसांबंसपत्नीकंततःपुरीम् २९ द्वारकामुग्रसेनादीन्गत्वाद्रक्ष्यामिबांधवान् । अथवाकौरवाधानींसमस्तैःकुरुभिःसह ३० भारावतारणंशीघ्रंदेवराजेनचोदितः । भागीरथ्यांक्षिपाम्याशुनगरींगजसाव्हयाम् ३१ । । पराशरउवाच । । इत्युक्त्वामदरक्ताक्षःकर्षणाधो मुखंहलम् । प्राकारवप्रेविन्यस्यचकर्षमुसलायुधः ३२ आघूर्णितंतत्सहसाततोवैहस्तिनापुरम् । दृष्ट्वासंक्षुब्धहृदयाश्चुक्रुशुःसर्वकौरवाः ३३ रा मराममहाबाहोक्षम्यतांक्षम्यतांत्वया । उपसंह्रियतांकोपःप्रसीदमुसलायुध ३४ एषसांबःसपत्नीकस्तवनिर्यापितोबल । अविज्ञातप्रभावाणांक्षम्य

अहोइत्यादिनागजसाह्वयमित्यंतेन असाराणांबलहीनानांअहोमहानवलेपः २२ कौरवाणामाधिपत्यंस्वतःअस्माकंकालजंकादाचित्कमितियत् येनमदेनलंघनींलंघ्यांमन्यंते अविलंघ नीमितिपाठेयेअद्यनमन्यंतेतेषामितिपूर्वेणान्वयः २३ आज्ञायाअविलंघनीयत्वमेवाह आज्ञामितिसार्धाभ्याम् धर्मेणराजधर्मेणप्रतीच्छेत्गृह्णाति २४ यस्यउग्रसेनस्यभृत्यानांवनिताजनः पारिजाततरोःपुष्पाणिमंजरीश्चबिभर्तीतिद्वयोरन्वयः २५ २६ २७ २८ यमजौनकुलसहदेवौ २९ ३० भारावतारणंप्रतिदेवराजेनप्रेरितोहंकौरवाणामाधानीमावासनगरींगंगायां क्षिपामीत्यन्वयः ३१ कर्षणायाधोमुखंहलंप्राकारवप्रेदुर्गस्यमूलदेशेविन्यस्यमूलंचकर्ष ३२ घूर्णितंविचलितंअधोमुखेनावर्जितमितियावत् ३३ ३४ निर्यापितःसमर्पितः ३५ ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३७ ३८ उद्वाहधनेनपारिबर्हेणभार्ययाचसमन्वितम् ३९ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचमेअंशेपंचत्रिंशोध्यायः ३५ सुहृदोपचितिंकुर्वन्द्विविदोविविधालयम् हलिनादलितोमु ष्याषट्त्रिंशेमृतउच्यते मैत्रेयश्रूयतांतस्येतियदुक्तंतदेवविवृणोति कृतंयदन्यदिति यद्वाबलस्ययमुनाकर्षणादिकंश्रूयतांअश्रूयतेत्यस्यव्यत्ययः यदन्यद्द्विविदवधाख्यंतदपिश्रूयतामिति

तामपराधिनाम् ३५ । । पराशरउवाच । । ततोनिर्यातयामासुःसांबंपत्न्यासमन्वितम् । निष्क्रम्यस्वपुरात्तूर्णंकौरवामुनिपुंगव ३६ भीष्म द्रोणकृपादीनांप्रणम्यवदतांप्रियम् । क्षान्तमेवमयेत्याहबलोबलवतांवरः ३७ अद्याप्याघूर्णिताकारंलक्ष्यतेतत्पुरंद्विज । एषप्रभावोरामस्यबलशौर्यो पलक्षणम् ३८ ततस्तेकौरवाःसांबंसंस्थाप्यहलिनासह । प्रेषयामासुरुद्वाहधनभार्यासमन्वितम् ३९ इतिश्रीविष्णुपुराणेपंचमेअंशेपञ्चत्रिंशोध्या यः ३५ । । पराशरउवाच । । मैत्रेयश्रूयतांतस्यबलस्यबलशालिनः । कृतंयदन्यत्तेनाभूत्तदपिश्रूयतांत्वया १ नरकस्यासुरेंद्रस्यदेवपक्षविरो धिनः । सखाभवन्महावीर्योद्विविदोनामवानरः २ वैरानुबंधंबलवान्सचकारसुरान्प्रति । नरकंहतवान्कृष्णोबलदर्पसमन्वितम् ३ करिष्येसर्वदेवानां तस्मादेषप्रतिक्रियाम् । यज्ञविध्वंसनंकुर्वन्मर्त्यलोकक्षयंतथा ४ ततोविध्वंसयामासयज्ञानज्ञानमोहितः । बिभेदसाधुमर्यादांक्षयंचक्रेचदेहिनाम् ५ ददाहचपलोदेशान्पुरग्रामांतराणिच । क्वचिच्चपर्वतक्षेपैर्ग्रामादीन्समचूर्णयत् ६ शैलानुत्पाट्यतोयेषुमुमोचांबुनिधौतथा । पुनश्चार्णवमध्यस्थःक्षोभ यामाससागरम् ७ तेनविक्षोभितश्चाब्धिरुद्वेलोद्विजजायते । प्लावयंस्तीरजान्ग्रामान्पुरादीनतिवेगवान् ८ कामरूपीमहारूपंकृत्वासस्यान्यशेषतः । लुंठन्भ्रमणसंमर्दैःसंचूर्णयतिवानरः ९ तेनविप्रकृतंसर्वंजगदेतद्दुरात्मना । निःस्वाध्यायवषट्कारंमैत्रेयासीत्सुदुःखितम् १० एकदारैवतोद्यानेपपौ पानंहलायुधः । रेवतीचमहाभागातथेवान्यावरस्त्रियः ११ उपगीयमानोविलसल्ललनालोकमध्यगः । रेमेयदुवरश्रेष्ठःकुबेरइवमंदरे १२ ततः सवानरोऽभ्येत्यगृहीत्वासारिणोहलम् । मुसलंचचकारास्यसंमुखेचविडंबनम् १३ तथैवयोषितांतासांजहासाभिमुखंकपिः । पानपूर्णांश्चकरकां श्चिक्षेपाहत्यवैपदा १४ ततःकोपपरीतात्माभर्त्सयामासतंबलः । तथापितमवज्ञायचक्रेकिलकिलध्वनिम् १५ ततःसमुत्थायबलोजगृहेमुद्गलंरुषा। सोऽपिशैलशिलांभीमांजग्राहप्लवगोत्तमः १६ चिक्षेपचसतांक्षिप्तांमुसलेनसहस्रधा । बिभेदयादवश्रेष्ठःसापपातमहीतले १७ आपतन्मुसलंचासौ

१ २ सद्विविदःसुरान्प्रतिवैरानुबंधंकृतवान् तत्रहेतुमाह नरकमिति ३ कृष्णपक्षीयत्वात्सर्वदेवानांप्रतिक्रियांकरिष्ये ४ ५ पुरग्रामांतराणिपुरग्रामभेदान् ६ तोयेष्वित्यत्रपोतेष्विति पाठःक्वचिद्वहित्रेष्वित्यर्थः ७ ८ लुंठन्स्वांगंभूमौपातयन्तत्रचभ्रमणसंमर्दनैः ९ १० रैवतोद्वारकायाःपूर्वतोगिरिस्तस्योपवने ११ विलसल्ललनालोकानांविलसत्स्त्रीजनानांमध्यगः मौलिमध्यगइतिपाठेमौलयःश्रेष्ठाइत्यर्थः १२ विडंबनंमुखादिविक्रियांदर्शयन्हलमुसलाभ्यांरामानुकरणंच १३ पीयतइतिपानंमदिरादितत्पूर्णान्करकान्पात्रविशेषान् १४ १५ १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७ १८ गतजीवितइत्यनेनश्रीरामकृतमपिदीर्घजीवित्वंमहदतिक्रमानष्टमित्युक्तम् आयुःश्रियंततोदीप्तिंलोकानाशिषएवच हंतिश्रेयांसिसर्वाणिपुंसोमहदतिक्रमइतिवचनात् १९ अ
शीर्यतदीर्णमभूत् २० २१ २२ २३ इतिश्रीवैष्णवाकूतचंद्रिकायांपंचमेअंशेषट्त्रिंशोध्यायः विप्रशापात्संजहारस्वमूर्तिंस्वकुलंहरिः उपदिश्योद्धवंसांशःसप्तत्रिंशइतीर्यते
दुष्टक्षितीशानांवधंचक्रेयथैवफाल्गुनेनसमंतत्सारथ्येनक्षितेर्भारमवतारयामासेतिद्वयोरन्वयः १ २ ३ मानुष्यंमनुष्यनाट्यम् सांशोबलप्रद्युम्नादिसहितः ४ ५ उक्तंप्रश्नंवक्तुंप्रस्तावमा

समुल्लंघ्यप्लवंगमः । वेगेनागम्यरोषेणतलेनोरस्यताडयत् १८ ततोबलेनकोपेनमुष्टिनामूर्ध्निताडितः । पपातरुधिरोद्गारीद्विविदोगतजीवितः १९
पततातच्छरीरेणगिरिशृंगमशीर्यत । मैत्रेयशतधावज्रिवज्रेणेवहिताडितम् २० पुष्पवृष्टिंततोदेवारामस्योपरिचिक्षिपुः । प्रशशंसुस्तऽतोभ्येत्यसा
ध्वेतत्तेमह कृतम् २१ अनेनदुष्टकपिनादैत्यपक्षोपकारिणा । जगन्निराकृतंवीरदिष्ट्यानःक्षयमागतः २२ । । पराशरउवाच । । एवंविधान्यने
कानिबलदेवस्यधीमतः । कर्माण्यपरिमेयाणिशेषस्यधरणीभृतः २३ । । इतिश्रीविष्णुपुराणेपंचमेअंशेषट्त्रिंशोध्यायः ३६ । पराशरउवाच ।
एवंदैत्यवधंकृष्णोबलदेवसहायवान् । चक्रेदुष्टक्षितीशानांतथैवजगतःकृते १ क्षितेश्चभारंभगवान्फाल्गुनेनसमंविभुः । अवतारयामासहरिःसम
स्ताक्षौहिणीवधात् २ कृत्वाभारावतरणंभुवोहत्वाखिलान्नृपान् । शापव्याजेनविप्राणामुपसंहृतवान्कुलम् ३ उत्सृज्यद्वारकांकृष्णस्त्यक्त्वामानुष्य
मात्मभूः । सांशोविष्णुमयंस्थानंप्रविवेशपुनर्निजम् ४ । । मैत्रेयउवाच । । सविप्रशापव्याजेनसंजह्रेस्वंकुलंकथम् । कथंचमानुषंदेहमुत्सस
र्जजनार्दनः ५ । । पराशरउवाच । विश्वामित्रस्तथाकण्वोनारदश्चमहामुनिः । पिंडारकेमहातीर्थेदृष्टायदुकुमारकैः ६ ततस्तेयौवनोन्मत्ताभावि
कार्यप्रचोदिताः । सांबंजांबवतीपुत्रंभूषयित्वास्त्रियंयथा ७ प्रश्रितास्तान्मुनीनूचुःप्रणिपातपुरःसरम् । इयंस्त्रीपुत्रकामस्यबभ्रोःकिंजनयिष्यति ८
पराशरउवाच । । दिव्यज्ञानोपपन्नास्तेविप्रलब्धाःकुमारकैः । मुनयःकुपिताःप्रोचुर्मुसलंजनयिष्यति ९ येनाखिलकुलोत्सादोयादवानांभविष्य
ति । इत्युक्तास्तैःकुमारास्तेह्याचचख्युर्यथातथम् । उग्रसेनायमुसलंजज्ञेसांबस्यचोदरात् १० तदुग्रसेनोमुसलमयश्चूर्णमकारयत् । जज्ञेसचैर
काश्चूर्णःप्रक्षिप्तस्तैर्महोदधौ ११ मुसलस्याथलौहस्यचूर्णितस्यांधकैर्द्विज । खंडंचूर्णयितुंशेकुर्नैवतेतोमराकृति १२ तदप्यंबुनिधौक्षिप्तंमत्स्यो

ह विश्वामित्रइत्यादिनावासुदेवानुमोदिताइत्यंतेन ६ भाविकार्यंयादवसंहारः तेनप्रचोदिताःप्रयुक्ताः ७ बभ्रोर्बभ्रुनाम्नोयादवस्यपत्नीकिंजनयिष्यतीतिप्रश्रिताविनीतवेषामुनीन्पप्रच्छुः
८ दिव्यस्यभगवदिच्छादेर्ज्ञानेनयुक्ताः दिव्यमलौकिकंयज्ज्ञानंतेनयुक्ताइतिवा विप्रलब्धाःप्रतारिताःप्रोचुःशापरूपवचनमूचुः शापमेवाह मुसलमित्यादि ९ सांबस्योदरायथामुसलमभव
त्तथोग्रसेनायाचचख्युर्नतुश्रीकृष्णाय १० उग्रसेनोपिश्रीकृष्णमविज्ञाप्यैवायसंमुसलंचूर्णमकारयत् अनेनविनाशायतेषांश्रीकृष्णवैमुख्यंसूचितम् सचचूर्णःतच्चूर्णमहोदधौक्षिप्तंसद्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लायांलग्नमेरकास्त्रिधारतृणविशेषाजज्ञेइतिप्रकृतिसंख्यागृहीता एकंमुसलंयदूनांनाशायपरस्परायुधत्वासंभवाच्चूर्णद्वारानेकैरकारूपेणपरिणतमितिभावः ११ सौमराकृतितोमराग्रसदृशम् १२ जालिभिर्मत्स्यजीविभिर्घातितस्योदरात् लुब्धोजरासंज्ञस्तंतोमराकृतिंखंडंजग्राह सतुयदुवंश्यएवव्याधत्वंगतइतिहरिवंशेप्रसिद्धम् १३ किमितिनैच्छत्तत्राह विधिनेति १४ तत्रैव हरत्वंतरमप्याह देवैश्चेत्यादिनाआख्येयमनुजीविभिरित्यंतेन १५ १६ पंचविंशाधिकंशतं शरच्छतंव्यतीयायपंचाविंशाधिकामितिशुकोक्तेः १७ १८ १९ यथाकालमवतारकार्यासि

जग्राहजालिभिः । घातितस्योदरात्तस्यलुब्धोजग्राहतंजरा १३ विज्ञातपरमार्थोपिभगवान्मधुसूदनः । नैच्छत्तदन्यथाकर्तुंविधिनायत्समाहितम् । १४ देवैश्चप्रहितोदूतःप्रणिपत्याहकेशवम् । रहस्येकमहंदूतोभगवन्प्रहितःसुरैः १५ वस्वश्विमरुदादित्यरुद्रसाध्यादिभिःसह । विज्ञापयति वःशक्रस्तदिदंश्रूयतांप्रभो १६ भारावतारणार्थायवर्षाणामधिकंशतम् । भगवानवतीर्णोऽत्रत्रिदशैःसंप्रसादितः १७ दुर्वृत्तानिहतादैत्याभुवो भारोवतारितः । त्वयासनाथास्त्रिदशाभवंतुत्रिदिवेशते १८ तदतीतंजगन्नाथवर्षाणामधिकंशतम् । इदानींगम्यतांस्वर्गेभवतेयदिरोचते १९ देवै र्विज्ञाप्यतेचेत्थमथात्रैवरतिस्तव । तत्स्थीयतांयथाकालमाख्येयमनुजीविभिः २० । । भगवानुवाच । । यत्त्वमात्थाखिलंदूतवेद्म्यहंतदह मप्युत । प्रारब्धएवहिमयायादवानामपिक्षयः २१ भुवोनाद्यापिभारोऽयंयादवैरनिबर्हितैः । अवतार्यकरोम्येतत्सप्तरात्रेणसत्वरः २२ यथा गृहीतंचांभोधेर्दत्त्वाहंद्वारकाभुवम् । यादवानुपसंहृत्ययास्येचत्रिदशालयम् २३ मनुष्यदेहमुत्सृज्यसंकर्षणसहायवान् । प्राप्तएवास्मिमंतव्योदे वेंद्रेणतथासुरैः २४ जरासंधादयोयेऽन्येनिहताभारहेतवः । क्षितेस्तेभ्यःकुमारोऽपियदूनांनापचीयते२५ तदेतत्सुमहाभारमवतार्यक्षितेरहम् । यास्याम्यमरलोकस्यपालनायब्रवीहितान् २६ । । पराशरउवाच । । इत्युक्तोवासुदेवेनदेवदूतःप्रणम्यतम् । मैत्रेयदिव्ययागत्यादेवराजांति कंययौ २७ भगवानप्यथोत्पातान्दिव्यान्भौमांतरिक्षजान् । ददर्शद्वारकापुर्याविनाशायदिवानिशम् २८ तान्दृष्ट्वायादवानाहपश्यध्वमिति दारुणान् । महोत्पाताञ्शमायैषांप्रभासंयाममाचिरम् २९ । । पराशरउवाच । । महाभागवतःप्राहप्रणिपत्योद्धवोहरिम् । भगवन्यन्म याकार्यंतदाज्ञापयसांप्रतम् ३० मन्येकुलमिदंसर्वंभगवान्संहरिष्यति । नाशायास्यनिमित्तानिकुलस्याच्युतलक्षये ३१ । । भगवानुवाच । ।

द्धौसत्यामाख्येयंविज्ञाप्यम् २० ब्रह्मशापापदेशेनमयैवप्रारब्धः २१ यादवैरनिबर्हितैरसंदृतैर्भारोद्यापिनावतारितइतिशेषः तमवतार्यएतद्वक्ष्यमाणंकरोमि २२ तदेवाह यथायेनसमयवं धेन २३ यास्येयास्यामीत्युक्तेनियतकालशंकायामाह प्राप्तएवाहंमंतव्यः २४ यदूनांकुमारोबालोपितेभ्योनापचीयतेन्यूनोनभवति २५ २६ २७ भगवानपिस्पष्टानुत्पातान्ददर्श दिव्यान्ग्रहयुद्धादीन् भौमान्भूकंपादीन् अंतरिक्षजान्दिग्दाहादीन् २८ एषामुत्पातानांशमायप्रभासंयाम यादवानामधिकारिदेवानांद्वारकामरणेमुक्तिःस्यात्तन्माभूदित्यभिप्रायेणप्रभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सगमनप्रेरणामिति २९ महाभागवतःउद्धवः उत्पातंननाशयतिकिंतुप्रभासंप्रतिप्रेरयतीतिस्वकुलक्षयआरब्धइतिभगवदभिप्रायंज्ञात्वाहरिंप्राह ३० ३१ ३२ ताभ्यांनरनारायणाभ्यांपा वितंमहीतलंयत्रतत्रासिद्धिमवाप्स्यसि मन्मनाइत्यनेनभक्तियोगोपदेशोगम्यते ३३ ३४ ३५ ३६ ३७ संघर्षेणस्पर्धया अतिवादोदुरुक्तिःसएवेंधनंयत्रअसौकलहाग्निर्जज्ञे ३८ दै

गच्छत्वंदिव्ययागत्यामत्प्रसादसमुत्थया । बदरीमाश्रमंपुण्यंगंधमादनपर्वते ३२ नरनारायणस्थानेतत्पावितमहीतले । मन्मनामत्प्रसादेनतत्र सिद्धिमवाप्स्यसि ३३ अहंस्वर्गंगमिष्यामिउपसंहृत्यवैकुलम् । द्वारकांचमयात्यक्तांसमुद्रःप्लावयिष्यति ३४ इत्युक्त्वाप्रणिपत्यैनंजगामसतदो द्धवः । नरनारायणस्थानंकेशवेनानुमोदितः ३५ ततस्तेयादवाःसर्वेरथानारुह्यशीघ्रगान् । प्रभासंप्रययुःसार्धंकृष्णरामादिभिर्द्विज ३६ प्रा प्यप्रभासंप्रयताःस्नातास्तेकुकुरांधकाः । चक्रुस्तत्रमुदापानंवासुदेवानुमोदिताः ३७ पिबतांतत्रवैतेषांसंघर्षेणपरस्परम्। अतिवादेंधनोजज्ञेकलहा ग्निःक्षयावहः ३८ जग्मुःपरस्परंतेतुशस्त्रैर्दैवबलात्कृताः । क्षीणशस्त्राश्चजग्रुहुःप्रत्यासन्नामथैरकाम् ३९ एरकातुगृहीतातैर्वज्रभूतैवलक्ष्यते । त यापरस्परंजघ्नुःसंप्रहारेसुदारुणे४०प्रद्युम्नसांबप्रमुखाःकृतवर्माचसात्यकिः।अनिरुद्धादयश्चान्येपृथुर्विपृथुरेवच४१ चारुवर्माचारुकश्चतथाक्रूरादयो द्विज । एरकारूपिभिर्वज्रैस्तेनिजघ्नुःपरस्परम्४२ निवारयामासहरिर्यादवांस्तेचकेशवम् । सहायंमेनिरेप्राप्तंतेनजघ्नुःपरस्परम् ४३ कृष्णोऽपिकु पितस्तेषामेरकामुष्टिमाददे । वधायसोऽपिमुसलंमुष्टिर्लोहमभूत्तदा४४ जघानतेननिःशेषानाततायीन्सयादवान् । जघ्नुश्चसहसाभ्येत्यतथान्येवैपर स्परम् ४५ ततश्चार्णवमध्येनजैत्रोऽसौचक्रिणोरथः । पश्यतोदारुकस्याशुहतोऽश्वैर्द्विजसत्तम ४६ चक्रंगदातथाशार्ङ्गंतूणौशंखोऽसिरेवच । प्र दक्षिणंहरिंकृत्वाजग्मुरादित्यवर्त्मना ४७ क्षणेननाभवत्काश्चिद्यादवानामघातितः । ऋतेकृष्णंमहाबाहुंदारुकंचमहामुने ४८ चंक्रम्यमाणौतंरा मंवृक्षमूलेकृतासनम् । ददृशातेमुखाच्चास्यनिष्क्रामंतंमहोरगम् ४९ निष्क्रम्यसमुखात्तस्यमहाभोगोभुजंगमः । प्रययावर्णवंसिद्धैःपूज्यमानस्त थोरगैः ५० तमर्घ्यमादायतदाजलधिःसंमुखंययौ । प्रविवेशचतत्तोयंपूजितःपन्नगोत्तमैः ५१ दृष्ट्वाबलस्यनिर्याणंदारुकंप्राहकेशवः।इदंस र्वंत्वमाचक्ष्ववसुदेवोग्रसेनयोः ५२ निर्याणंबलभद्रस्ययादवानांतथाक्षयम् । योगेस्थित्वाहमप्येतत्परित्यक्ष्येकलेवरम् ५३ वाच्यश्चद्वारकावासीज

वंश्रीकृष्णःतेनबलात्कृताविमोहिताः मुसलचूर्णजांपूर्वमेवतत्रभगवतोत्पादितत्वात्प्रत्यासन्नांएरकामित्येकवचनाद्धननेद्वितीयापेक्षाभावःसूचितः ३९ अतएवाह वज्रभूतेवेतिसंप्रहारेयु द्धे ४० ४१ ४२ निवारकमपिकृष्णंविपक्षसहायंमेनिरेततश्चतमनादृत्यपरस्परंजघ्नुः ४३ तेषांवधायसोप्येरकामुष्टिर्लोहमुसलमभूत् ४४ आततायीन्आततायिनःस्ववधेप्रवृत्तान् ४५ ४६ ४७ ४८ चंक्रम्यमाणौतत्रतत्रभ्रमंतौ ददृशातेइत्युभयत्रसंबध्यते ४९ ५० ५१ ५२ योगेस्थित्वेतिवचोदेहस्यहेयतांयोगस्यचोपादेयत्वमितिलोकशिक्षार्थम् ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५४ ५५ शक्नोषिचेदस्मन्नैरपेक्ष्येणस्वशक्त्याजनःपाल्यइत्यर्जुनोवाच्यइतिअर्जुनस्यपूर्वगर्वापगमायोक्तम् ५६ ५७ ५८ ५९ आत्मनिब्रह्मसमारोप्यब्रह्माहमितिध्यात्वातमात्मानं सर्वभूतेष्वधारयत् सर्वभूतान्यहमितिअचिंतयत् ६० दुर्वासायदुवाचतद्वचोमानयञ्जानुनिपदंकृत्वाअर्धासनेनोपविश्ययोगयुक्तोभवत् एवंहिभारतेकथा एकदाद्वारकागतंदुर्वाससंभगवा न्भोजयामासततस्तदाज्ञयातदुच्छिष्टशेषेणस्वांगंलिंपन्नतिपवित्रतयापादतलेलेपवर्जनाद्दुर्वाससाउक्तःपादतलेमर्मणिबिद्धोभवेतितदेतद्वचोमानयंस्तथोपविष्टइति ६१ मुसलावशेषलौहमे

नःसर्वस्तथाहुकः । यथेमांनगरींसर्वांसमुद्रःप्लावयिष्यति । तस्माद्रथैश्चसज्जैस्तुप्रतीक्ष्योह्यर्जुनागमः ५४ नस्थेयंद्वारकामध्येनिष्क्रांतेतत्रपांडवे । तेनैवसहगंतव्यंयत्रयातिसकौरवः ५५ गत्वाचब्रूहिकौंतेयमर्जुनंवचनान्मम । पालनीयस्त्वयाशक्त्याजनोऽयंमत्परिग्रहः ५६ इत्यर्जुनेनसहितोद्वा रवत्याभवान्जनम् । गृहीत्वायातुवज्रश्चयदुराजोभविष्यति ५७ । । पराशरउवाच । । इत्युक्तोदारुकःकृष्णंप्रणिपत्यपुनःपुनः । प्रदक्षिणंचबहु शःकृत्वाप्रायाद्यथोदितः ५८ सर्वंगत्वातदाचक्रेद्वारकायांतथार्जुनम् । आनिनायमहाबुद्धिर्वज्रंचक्रेतथानृपम् ५९ भगवानपिगोविंदोवासुदेवात्मकं परम् । ब्रह्मात्मनिसमारोप्यसर्वभूतेष्वधारयत् ६० समानयन्द्विजवचोदुर्वासायदुवाचह । योगयुक्तोभवत्पादंकृत्वाजानुनिसत्तम ६१ आययौ चजरानामसतदातत्रलुब्धकः । मुसलावशेषलोहैकसायकन्यस्ततोमरः ६२ सतत्पादंमृगाकारमवेक्ष्यारादवस्थितः । ततोविव्याधतेनैवतोमरेण द्विजोत्तम ६३ गतश्चददृशेतत्रचतुर्बाहुधरंनरम् । प्रणिपत्याहचैवैनंप्रसीदेतिपुनःपुनः ६४ अजानताकृतमिदंमयाहरिणशंकया । क्षम्यतांनात्म पापेनदग्धंमांदग्धुमर्हसि ६५ । । पराशरउवाच । । ततस्तंभगवानाहनतेस्तिभयमण्वपि । गच्छत्वंमत्प्रसादेनलुब्धस्वर्गंसुरास्पदम् ६६ पराशरउवाच । । विमानमागतंसद्यस्तद्वाक्यसमनंतरम् । आरुह्यप्रययौस्वर्गंलुब्धकस्तत्प्रसादतः ६७ गतेतस्मिन्सभगवान्संयोज्यात्मानमा त्मनि । ब्रह्मभूतेव्ययेचिंत्यवासुदेवमयेमले ६८ अजन्मन्यजरेनाशिन्यप्रमेयेखिलात्मनि । तत्याजमानुषंदेहमतीत्यविविधांगतिम् ६९ इतिश्रीविष्णु पुराणेपंचमेअंशेसप्तत्रिंशोध्यायः । । ३७ । । पराशरउवाच । । अर्जुनोऽपितदन्विष्यकृष्णरामकलेवरम् । संस्कारंलंभयामासतथान्ये षामनुक्रमात् १ अष्टौमहिष्यःकथितारुक्मिणीप्रमुखास्तुयाः । उपगुह्यहरेर्देहंविविशुस्ताहुताशनम् २ रेवतीचैवरामस्यदेहमाश्लिष्यसत्तम । वि

वएकस्मिन्श्रेष्ठेसायकेकाडेन्यस्तःतोमरःशल्यविशेषोयस्यसः ६२ ६३ ६४ ६५ लुब्धलुब्धकसुराणांभोग्यमास्पदंस्वर्गंगच्छ एतावतायथाकथंचित्स्वपादोपसर्पणएवमादिफलंभव तीतिस्वदेहंत्यजतापिलुब्धकंसदेहंस्वर्गंनयतास्वातंत्र्यंदर्शितम् ६६ ६७ आत्मनिआत्मतत्त्वे ६८ अखिलात्मनिअखिलस्वरूपे मानुषंदेहंतल्लीलांत्रिविधांत्रिगुणात्मिकांगतिमतीत्य नतुत्रिगुणात्मकदेहांतरंजग्राहेत्यर्थः इतिश्रीविष्णुपुराणेवैष्णवाकूतचंद्रिकायांपंचमेअंशेसप्तत्रिंशत्तमोध्यायः ३७ अष्टत्रिंशेपथिजितोगोपैःपार्थोनियन्स्त्रियः राज्याभिषेकोवज्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यव्यासोक्त्यादिश्चकीर्त्यते १ २ तस्यरामस्यसंगेनआह्लादस्तेनशीतलप्रायम् ३ ४ ५ ६ ७ अवतीर्णःआविर्भूतः कालकायःमलिनांगःकालविशेषाभिमानीदेवोवा कालकामइ
तिपाठेस्वावसरापेक्षःकलिः ८ कायबलिरितिपाठेपातितयादवानांकायाएवबलयःपूजोपहारायस्यसः ९ १० ११ पंचनदाख्येदेशे १२ निहतेश्वरास्त्रियोनीयमानादृष्ट्वालोभःसमभ

वेशज्वलितंवह्निंतत्संगाल्हादशीतलम् ३ उग्रसेनस्तुतच्छ्रुत्वातथैवानकदुन्दुभिः । देवकीरोहिणीचैवविविशुर्जातवेदसम् ४ ततोऽर्जुनःप्रेतकार्यं
कृत्वातेषांयथाविधि । निश्चक्रामजनंसर्वंगृहीत्वावज्रमेवच ५ द्वारवत्याविनिष्क्रांताःकृष्णपत्न्यःसहस्रशः । वज्रंजनंचकौंतेयःपालयञ्शनकैर्ययौ ६
सभासुधर्माकृष्णेनमर्त्यलोकेसमुज्झिते । स्वर्गंजगाममैत्रेयपारिजातश्चपादपः ७ यस्मिन्दिनेहरिर्यातोदिवंसंत्यज्यमेदिनीम् । तस्मिन्नेवावती
र्णोयंकालकायोबलीकलिः ८ प्लावयामासतांशून्यांद्वारकांचमहोदधिः । यदुदेवगृहंत्वेकंनाप्लावयतसागरः ९ नातिक्रांतुमलंब्रह्मंस्तदद्यापिमहोद
धिः । नित्यंसन्निहितस्तत्रभगवान्केशवोयतः १० तदतीवमहापुण्यंसर्वपातकनाशनम् । विष्णुक्रीडान्वितंस्थानंदृष्ट्वापापात्प्रमुच्यते ११ पा
र्थःपंचनदेदेशेबहुधान्यधनान्विते । चकारवासंसर्वस्यजनस्यमुनिसत्तम १२ ततोलोभःसमभवत्पार्थेनैकेनधन्विना । दृष्ट्वास्त्रियोनीयमानादस्यूनां
निहतेश्वराः १३ततस्तेपापकर्माणोलोभोपहतचेतसः । आभीरामंत्रयामासुःसमेत्यात्यंतदुर्मदाः १४ अयमेकोऽर्जुनोधन्वीस्त्रीजनंनिहतेश्वरम् ।
नयत्यस्मानतिक्रम्यधिगेतद्भवतांबलम् १५ हत्वागर्वंसमारूढोभीष्मद्रोणजयद्रथान् । कर्णादींश्चनजानातिबलंग्रामनिवासिनाम् १६ देहेयष्टीर्म
हामायागृण्हीतायंसुदुर्मतिः । सर्वानेवावजानातिकिन्नोबाहुभिरुन्नतैः १७ पराशरउवाच । ततोयष्टिप्रहरणादस्यवोलोप्त्रहारिणः । सहस्रशोभ्य
धावंततंजनंनिहतेश्वरम् १८ ततोनिवृत्यकौंतेयःप्राहाभीरान्हसन्निव । निवर्तध्वंचधर्मज्ञायदीत्थंनमुमूर्षवः १९ अवज्ञायवचस्तस्यजगृहुस्तेतदाध
नम् । स्त्रीजनंचैवमैत्रेयविष्वक्सेनपरिग्रहम् २० ततोऽर्जुनोधुनुर्दिव्यंगांडीवमजरंयुधि । आरोपयितुमारेभेनशशाकचवीर्यवान् २१ चकारसज्जंकृ
च्छ्राच्चतच्चाभूच्छिथिलंपुनः । नसस्मारतथास्त्राणिचिंतयन्नपिपांडवः २२ शरान्मुमोचचैतेषुपार्थःसेर्ष्यममार्षितः । त्वग्भेदंतेपरंचक्रुरस्तागांडीवधन्व
ना २३ वह्निनायेक्षयादत्ताःशरास्तेपिक्षयंययुः । मुच्यतःसहगोपालैरर्जुनस्याहवक्षये २४ अचिंतयच्चकौंतेयःकृष्णस्यैवहितद्बलम् । यन्मयाशरसं
घातैःसकलाभूभृतोजिताः २५ मिषतःपांडुपुत्रस्यततस्ताःप्रमदोत्तमाः । आभीरैरपकृष्यंतकामाच्चान्याःप्रवव्रजुः २६ ततःशरेषुक्षीणेषुधनुष्को

वत् १३ १४ १५ १६ महामायामहत्योमायाअलौकिकयुद्धानियासुताः महामायाइतिवापाठः १७ यष्टिप्रहरणादंडायुधाः लोप्त्रहारिणःपरस्वग्राहिणः १८ इत्थंयादिनमुमूर्षव
स्त्रातुरभावात् १९ २० २१ अस्त्राणिप्रयोगमंत्रान् २२ २३ खांडवदाहेग्निनादत्ताः आहवेनक्षये भवक्षयेइतिपाठेउद्भवक्षयेइत्यर्थः २४ २५ मिषतःपश्यतइत्यनादरेषष्ठी २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनुष्कोट्याचापाग्रेण जहसुर्दंडप्रहारैस्तेषामेववैदग्ध्यात् २७ २८ मुक्तोस्मीत्यत्रमुष्टोस्मीत्यपिपाठेवंचितोस्मीत्यर्थः २९ एकपदेएकस्मिन्नेवक्षणे अश्रोत्रियेवेदविवर्जिते ३० ३१ स्थानंधानुष्कसंस्थानविशेषः असारतांनिष्प्रयोजनताम् ३२ स्वानुमानेनभीमस्याप्यसारतामाह भीमस्येति ३३ ३४ इंद्रप्रस्थाद्व्रजाह्वयंगच्छन्कचित्काननाश्रयंव्यासंददर्श ३५ चिरंवंदमानंचिरंविलोक्याचिरमुवाच पृच्छ्यमानोपिदुःखावेशेनतस्मिन्वक्तुमशक्नुवतिबहुधाविलोक्यअत्यंतंविच्छायोनिःश्रीकोसीतिपुनरुवाचेत्यर्थः ३६ स्वयमेवविच्छायत्वेहेतून्बहुधा

ट्याधनंजयः । जघानदस्यूंस्तेचास्यप्रहाराञ्जहसुर्मुने २७ प्रेक्षतस्त्वेवपार्थस्यतृष्ण्यंधकवरस्त्रियः । जग्मुरादायतेम्लेच्छाःसमस्तामुनिसत्तम । २८ ततःसुदुःखितोजिष्णुःकष्टंकष्टमितिब्रुवन् । अहोभगवतानेनमुक्तोऽस्मीतिरुरोदवै २९ तद्धनुस्तानिचास्त्राणिसरथस्तेचवाजिनः । सर्वमेकपदेन ष्टंदानमश्रोत्रियेयथा ३० अहोतिबलवद्दैवंविनातेनमहात्मना । यदसामर्थ्ययुक्तेपिनीचवर्गेजयप्रदम् ३१ तौबाहूसचमेमुष्टिःस्थानंतत्सोऽस्मिचार्जुनः पुण्येनैवविनातेनगतंसर्वमसारताम् ३२ ममार्जुनत्वंभीमस्यभीमत्वंतत्कृतंध्रुवम् । विनातेनयदाभीरैर्जितोऽहंकथमन्यथा ३३ । पराशरउवाच । इत्थंवदन्ययौजिष्णुर्मथुराख्यंपुरोत्तमम् । चकारतत्रराजानंवज्रंयादवनंदनम् ३४ सददर्शततोव्यासंफाल्गुनःकाननाश्रयम् । तमुपेत्यमहाभागं विनयेनाभ्यवादयत् ३५ तंवंदमानंचरणाववलोक्यमुनिश्चिरम् । उवाचपार्थविच्छायःकथमत्यंतमीदृशः ३६ ॥ ॥ व्यासउवाच ॥ ॥ अवी रजोनुगमनंब्रह्महत्याथवाकृता । दृढाशाभंगदुःखीवाभ्रष्टच्छायोऽसिसांप्रतम् ३७ सांतानिकादयोवातेयाचमानानिराकृताः । अगम्यस्त्रीरतिर्वात्वं तेनासिविगतप्रभः ३८ भुंक्तेप्रदायविप्रेभ्योमृष्टमेकोथवाभवान् । किंवाकृपणवित्तानिहृतानिभवतार्जुन ३९ कच्चिच्चसूर्यवातस्यगोचरत्वंगतोर्जुन । दुष्टचक्षुर्हतोवात्वंनिःश्रीकःकथमन्यथा ४० स्पृष्टोनखांभसावापिघटतोयोक्षितोपिवा । तेनातीवासिविच्छायोन्यूनैर्वायुधिनिर्जितः ४१ ततःपार्थोवि निःश्वस्यश्रूयतांभगवन्निति । प्रोक्तोयथावदाचष्टव्यासायात्मपराभवम् ४२ ॥ ॥ अर्जुनउवाच ॥ ॥ यद्बलंयच्चनस्तेजोयद्वीर्यंयःपराक्रमः । याश्रीच्छायाचनःसोऽस्मान्परित्यज्यहरिर्गतः ४३ गौरवेणेवमहतास्मितपूर्वाभिभाषिणा । हीनावयंमुनेतेनजातास्तृणमयाइव ४४ अस्त्राणांसाय

विकल्पयन्नाह अवीरजइतिपंचभिः अवीणांमेषीणांरजसोनुगमनंतत्पृष्ठतोनुगमनंकिंकृतम् अवीरजइतिअजारजःखररजइत्यादेरुपलक्षणम् यद्वाअवीस्त्रीधर्मिणीतस्यारजोनुगमनंरजस्वला गमनमित्यर्थः स्त्रीधर्मिण्यविरात्रेयीमालिनीपुष्पवत्यपीत्यमरः शरणागतादेरयंमांरक्षिष्यतीत्यादिर्यादृढाशातस्याभंगेनवादुःखीसन् ३७ सांतानिकःसंतानार्थमुद्वोढुकामोधनार्थी आदिश ब्दान्मनूक्तान्यप्रत्याख्येयान्यपितथाचमनुः सांतानिकंयक्ष्यमाणमध्वगंसर्ववेदगं गुर्वर्थंपितृमात्रर्थेस्वाध्यायार्थ्युपतापिनः नवैतान्स्नातकान्विद्यात्ब्राह्मणान्धर्मभिक्षुकानिति ३८ कृपणे तितस्यवित्तप्राणत्वात्तद्वित्तहरणमतिपापायेत्यर्थः ३९ ४० पूर्णेघटेनीयमानेततउच्छलतातोयेनसिक्तः यद्यपिसर्वज्ञत्वाद्व्यासोजानात्येवतथाप्येतेषामुत्कटाधर्मत्वख्यापनार्थमेवमुक्तम् ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४२ बलंशक्तिः तेजःसामर्थ्यं वीर्यंप्रभावः पराक्रमोविक्रांतिः श्रीःसंपत् छायाकांतिः एतद्रूपोयोहरिः ४३ गौरवेणादरेण इतरेणेवेतिपाठेप्रभुत्वेतिप्राकृतेनसख्येव स्मितपूर्वंभाषमाणेन तृणमयाःक्षेत्रादिषुबिभीषिकार्थंनिर्मिताधम्विनइववयंजाताः ४४ ४५ ४६ अंगराजाद्याः कर्णाद्याः ४७ उक्तंविच्छायत्वेहेतुंद्रढयन्नाह निर्यौवनेति नकेवलमहंविच्छायः महीअपि

कानांचगांडिवस्यतथामम । सारतायाभवन्मूर्तासगतःपुरुषोत्तमः ४५ यस्यावलोकनादस्माञ्श्रीर्जयःसंपदुन्नतिः । नतत्याजसगोविंदस्त्यक्त्वा स्मान्भगवान्गतः ४६ भीष्मद्रोणांगराजाद्यास्तथादुर्योधनादयः । तत्प्रभावेणनिर्दग्धाःसकृष्णस्त्यक्तवान्भुवम् ४७ निर्यौवनाहतश्रीकाभ्र ष्टच्छायेवमेमही । विभातितातनैकोऽहंविरहेतस्यचक्रिणः ४८ यस्यानुभावाद्भीष्माद्यैर्मय्यग्नौशलभायितम् । विनातेनाद्यकृष्णेनगोपालैरस्मिनि र्जितः ४९ गांडिवंत्रिषुलोकेषुख्यातिर्यदनुभावतः । गतंतेनविनाभीरैर्लगुडैस्तत्तिरस्कृतम् ५० स्त्रीसहस्राण्यनेकानिमन्नाथानिमहामुने । यततो ममनीतानिदस्युभिर्लगुडायुधैः ५१ आनीयमानमाभीरैःकृष्णकृष्णावरोधनम् । हृतंयष्टिप्रहरणैःपरिभूयबलंमम ५२ निःश्रीकतानमेचित्रंयज्जी वामितदद्भुतम् । नीचापमानपंकांकीनिर्लज्जोऽस्मिपितामह ५३ ॥ ॥ व्यासउवाच ॥ ॥ अलंतेव्रीडयापार्थनत्वंशोचितुमर्हसि । अवेहिसर्वभू तेषुकालस्यगतिरीदृशी ५४ कालोभवायभूतानामभवायचपांडव । कालमूलमिदंज्ञात्वाभवस्थैर्यधनोर्जुन ५५ नद्यःसमुद्रागिरयःसकलाचवसुं धरा । देवामनुष्याःपशवस्तरवःससरीसृपाः ५६ सृष्टाःकालेनकालेनपुनर्यास्यंतिसंक्षयम् । कालात्मकमिदंसर्वंज्ञात्वाशममवाप्नुहि ५७ य च्चाहकृष्णमहात्म्यंतत्तथैवधनंजय । भारावतारकार्यार्थमवतीर्णःसमेदिनीम् ५८ भाराक्रांताधरायातादेवानांसमितिंपुरा । तदर्थमवतीर्णोऽसौ

भ्रष्टच्छायेवकिंचनिर्गतंयौवनंसस्यादिप्रसवसामर्थ्यंयस्यास्तथाभूताविभाति ४८ तत्रैवहेत्वंतरमाहयस्येति अग्नितुल्येमायिशलभायितंशलभवदाचरितम् ४९ ५० अहंनाथःपालकोयेषां तानि यततोयतमानस्यममममामनादृत्य ५१ कृष्णहेव्यास कृष्णस्यावरोधनंअंतःपुरंस्त्रीवर्गइत्यर्थः ५२ ५३ ५४ भवायउद्भवाय ५५ ५६ कालात्मकंकालाधीनम् ५७ ५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५९ ६० ६१ ६२ ६३ अर्जुनस्यानुतापमूलंगर्वंनिराकरोति यतइति यतःकालात्त्वयैकेनभीष्मादयोहतास्तत्कालोत्थःसतेषांत्वयान्यूनेनाभिभवोनकिं ६४ तदुपपादयति विष्णो रितिपंचभिः अंतेत्वयिभगवदनुभावाविरमेतदुद्भवःपराभवोद्भवः ६५ सर्वभूतानांशरीराणिसमाविश्यजगतांस्थितिंनाशंचकरोति ६६ भवोद्भवेभाग्यस्योदये भवांतेभाग्यनाशे ६७ ६८

कामरूपीजनार्दनः ५९ तच्चनिष्पादितंकार्यमशेषाभूभृतोहताः । वृष्ण्यंधककुलंसर्वंतथापार्थोपसंहृतम् ६० नकिंचिदन्यत्कर्तव्यमस्यभूमि तलेप्रभोः । ततोगतःसभगवान्कृतकृत्योयथेच्छया ६१ सृष्टिसर्गेकरोत्येषदेवदेवःस्थितिंस्थितौ । अंतेऽतायसमर्थोऽयंसांप्रतंवैयथाकृतम् ६२ त स्मात्पार्थनसंतापस्त्वयाकार्यःपराभवात् । भवंतिभवकालेषुपुरुषाणांपराक्रमाः ६३ यतस्त्वयैकेनहताभीष्मद्रोणादयोनृपाः । तेषामर्जुनकालोत्थः किंन्यूनाभिभवोनसः ६४ विष्णोस्तस्यानुभावेनयथातेषांपराभवः । त्वत्तस्तथैवभवतोदस्युभ्योतेतदुद्भवः ६५ सदेवोन्यशरीराणिसमाविश्य जगत्स्थितिम् । करोतिसर्वभूतानांनाशंचांतेजगत्पतिः ६६ भवोद्भवेसकौंतेयसहायोऽभूज्जनार्दनः । भवांतेत्वद्विपक्षास्तेकेशवेनावलोकिताः ६७ कःश्रद्दध्यात्सगांगेयान्हन्यास्त्वंसर्वकौरवान् । आभीरेभ्यश्चभवतःकःश्रद्दध्यात्पराभवम् ६८ पार्थैतत्सर्वभूतस्यहरेर्लीलाविचेष्टितम् । त्वयायत्कौरवा ध्वस्तायदाभीरैर्भवाञ्जितः ६९ गृहीतादस्युभिर्यच्चभवतःशोचितास्त्रियः । तदप्यहंयथावृत्तंकथयामितवार्जुन ७० अष्टावक्रःपुराविप्रोजलवासप रोभवत् । बहून्वर्षगणान्पार्थगृणन्ब्रह्मसनातनम् ७१ जितेष्वसुरसंघेषुमेरुपृष्ठेमहोत्सवः । बभूवतत्रगच्छंत्योददृशुस्तंसुरस्त्रियः ७२ रंभाति लोत्तमाद्यास्तुशतशोथसहस्रशः । तुष्टुवुस्तंमहात्मानंप्रशशंसुश्चपांडव ७३ आकंठमग्नंसलिलेजटाभारधरंमुनिम् । विनयावनताश्चैनंप्रणेमुःस्तोत्र तत्पराः ७४ यथायथाप्रसन्नोसौतुष्टुवुस्तंतथातथा । सर्वास्ताकौरवश्रेष्ठवरिष्ठंद्विजन्मनाम् ७५ । ।अष्टावक्रउवाच । प्रसन्नोऽहंमहाभागाभवती नांयदिष्यते । मत्तस्तद्वियतांसर्वंप्रदास्याम्यपिदुर्लभम् ७६ रंभातिलोत्तमाद्यास्तुवैदिक्योप्सरसोब्रुवन् । प्रसन्नेत्वय्यसंप्राप्तंकिमस्माकमितिद्वि ज ७७ इतरास्त्वब्रुवन्विप्रप्रसन्नोभगवान्यदि । तदिच्छामःपतिंप्राप्तंविप्रेंद्रपुरुषोत्तमम् ७८ । व्यासउवाच । । एवंभविष्यतीत्युक्त्वाउत्तरारज

६९ तासांचस्त्रीणांदस्युभिर्हरणंमुनिशापप्राप्तंकेनवारयितुंशक्यमित्याख्यायिकांकथयन्नाह गृहीताइत्यादिनादस्युहस्तंगमिष्यथेत्यंतेन ७० उदवासपरःजलवासतत्परः ७१ ७२ तुष्टु वुःप्रगीतैर्वाक्यैः प्रशशंसुरप्रगीतैर्वाक्यैः ७३ ७४ ७५ भवतीनांभवतीभिःदुर्लभमपिदास्यामि ७६ वैदिक्योवेदप्रसिद्धाः ७७ ७८ उत्तरारजलान्निर्गतः ७९ गूहमानानांहास्यंप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छादयंतीनाम् ८० ८१ ८२ पुनःसुरेंद्रलोकंगमिष्यथेतिप्राहेत्यन्वयः ८३ ८४ ८५ माहात्म्यंगौरवम् ८६ उन्नतेःसकाशात्पतनंध्रुवम् संचयक्षयःसंचयादनंतरंक्षयइत्यर्थः ८७ शिक्षन्तःभावयंतः तादृशाहर्षशोकविहीनाःसंतिभवंति ८८ तत्रहस्तिनापुरे तंत्रमितिपाठेसैन्यमित्यर्थः ८९ वीरपथोनिराहारस्यदेहस्याभावायापरावृत्तयेगमनंवीरपथस्तेन वीरपथे

लान्मुनिः । तमुत्तीर्णंचददृशुर्विरूपंवक्रमष्टधा ७९ तंदृष्ट्वागूहमानानांयासांहासःस्फुटोऽभवत् । ताःशशापमुनिःकोपमवाप्यकुरुनंदन ८० अष्टावक्रउवाच । । यस्माद्विरूपरूपंमांमत्वाहासावमानना । भवतीभिःकृतातस्मादेषशापंददाम्यहम् ८१ मत्प्रसादेनभर्तारंलब्ध्वातुपुरुषोत्तमम् । मच्छापोपहताःसर्वादस्युहस्तंगमिष्यथ ८२ । । व्यासउवाच । । इत्युदीरितमाकर्ण्यमुनिस्ताभिःप्रसादितः । पुनःसुरेंद्रलोकंवैप्राहभूयोगमिष्यथ ८३ एवंतस्यमुनेःशापादष्टावक्रस्यकेशवम् । भर्तारंप्राप्यतायातादस्युहस्तंसुरांगनाः ८४ तत्त्वयानात्रकर्तव्यःशोकोल्पोपिहिपांडव । तेनैवाखिलनाथेनसर्वंतदुपसंहृतम् ८५ भवतांचोपसंहारमासन्नंतेनकुर्वता । बलंतेजस्तथावीर्यंमाहात्म्यंचोपसंहृतम् ८६ जातस्यनियतंमृत्युःपतनंचतथोन्नतेः । विप्रयोगावसानस्तुसंयोगःसंचयक्षयः ८७ विज्ञायनबुधाःशोकंनहर्षमुपयान्तिये । तेषामेवेतरेचेष्टांशिक्षन्तःसन्तितादृशाः ८८ तस्मात्त्वयानरश्रेष्ठज्ञात्वैतद्भ्रातृभिःसह । परित्यज्याखिलंतत्रगंतव्यंतपसेवनम् ८९ तद्गच्छधर्मराजायनिवेद्यैतद्वचोमम । परश्वोभ्रातृभिःसार्धंगतिंवीरपथाकुरु ९० ॥ ॥ पराशरउवाच ॥ ॥ इत्युक्तोभ्येत्यपार्थाभ्यांयमाभ्यांचाहसोर्जुनः । दृष्टंचैवानुभूतंचकथितंतदशेषतः ९१ व्यासवाक्यंचतेसर्वेश्रुत्वार्जुनसमीरितम् । राज्येपरीक्षितंकृत्वाययुःपांडुसुतावनम् ९२ इत्येतत्तवमैत्रेयविस्तरेणमयोदितम् । जातस्ययद्यदोर्वंशेवासुदेवस्यचेष्टितम् ९३ ॥ ॥ इतिश्रीविष्णुपुराणेपञ्चमेअंशेअष्टत्रिंशोध्यायः ३८ । । इतिपंचमोंशःसमाप्तः ५ । । ७ ।

त्यार्षम् ९० पार्थाभ्यांयुधिष्ठिरभीमाभ्यांदृष्टंप्रत्यक्षतोयदुकुलक्षयादि अनुभूतंआभीरात्पराजयादि कथितंव्यासेनपरश्वःप्रयाणादि ९१ ९२ कृष्णलीलांनिगमयति इत्येतदिति ९३ पंचमांसमहांभोधिरत्नश्रीहरिचेष्टितम् परीक्ष्यरत्नगर्भेणसत्सुनिक्षिप्तमीक्षितुम् इतिश्रीविष्णुपुराणेवैष्णवाकूतचंद्रिकायांपंचमेअंशेअष्टत्रिंशोध्यायः ३८ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्री विष्णुपुराणे पंचमांशः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्री विष्णुपुराणे षष्ठांश प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः । । षष्ठेप्यष्टभिरध्यायैरभ्यधायिससाधना मुक्तिरुक्ताविरागायकलिंचप्रतिसंचरम् १ तत्रापिप्रथमेध्यायेकलिःश्रवणभीषणः हरिपांडवनिर्याणंसप्रपंचंप्रपंच्यते २ प्र
थमांशमारभ्योक्तमनुवदन्बुभुत्सितमर्थंपृच्छति व्याख्यातेतिद्वाभ्याम् १ यथावत्सर्वात्मनाउपसंहृतिंआत्यंतिकंलयमित्यर्थः महाप्रलयसंज्ञांप्राकृतामुपसंहृतिंचकल्पांतेब्रह्मदिनांतेदैनंदि
नींचेत्यर्थः २ प्राकृतेमहाप्रलये ३ तत्रप्रथमंकल्पप्रमाणंदर्शयन्नाह अहोरात्रमिति मानुषोमासःपितॄणामहोरात्रम् मानुषएवाब्दोदेवानामहोरात्रम् चतुर्युगानांद्वेसहस्रेब्रह्मणोहोरात्रमित्य
र्थः ४ चतुर्युगस्यप्रमाणमाह कृतमिति ५ चतुर्युगेष्वेवसाम्यंविशेषंचाह चतुर्युगानीति ६ आद्यंतयोर्युगयोर्वैसादृश्यहेतुमाह आद्यइति एतच्चातिवैराग्यार्थमुक्तम् ७ प्रलयप्रश्नस्यापर्यव

। मैत्रेयउवाच । । व्याख्याताभवतासर्गवंशमन्वंतरस्थितिः । वंशानुचरितंचैवविस्तरेणमहामुने १ श्रोतुमिच्छाम्यहंत्वत्तोयथावदुपसंहृति
म् । महाप्रलयसंज्ञांचकल्पांतचमहामुने २ । । पराशरउवाच । । मैत्रेयश्रूयतांमत्तोयथावदुपसंहृतिः । कल्पांतेप्राकृतेचैवप्रलयेजायते
यथा ३ अहोरात्रंपितॄणांतुमासोऽब्दस्त्रिदिवौकसाम् । चतुर्युगसहस्रेतुब्रह्मणोद्वेद्विजोत्तम ४ कृतंत्रेताद्वापरंचकलिश्चैवचतुर्युगम् । दिव्यैर्वर्षसह
स्रैस्तुतद्द्वादशभिरुच्यते ५ चतुर्युगान्यनेकानिसदृशानिस्वरूपतः । आद्यंकृतयुगंमुक्त्वामैत्रेयांतंतथाकलिम् ६ आद्येकृतयुगेसर्गोब्रह्मणाक्रियते
यतः । क्रियतेचोपसंहारस्तथांतेऽपिकलौयुगे ७ । । मैत्रेयउवाच । । कलेःस्वरूपंभगवन्विस्तराद्वक्तुमर्हसि । धर्मश्चतुष्पाद्भगवान्यस्मि
न्विप्लवमृच्छति ८ । । पराशरउवाच । । कलिस्वरूपंमैत्रेययद्भवान्प्रष्टुमिच्छति । तन्निबोधसमासान्नोवर्ततेयन्महामुने ९ वर्णाश्रमाचारव
तीप्रवृत्तिर्नकलौनृणाम् । नसामऋग्यजुर्वेदविनिष्पादनहेतुकी १० विवाहोनकलौधर्म्योनशिष्यगुरुसंस्थितिः । नदांपत्यक्रमोनैववह्निदेवात्मकः
क्रमः ११ यत्रतत्रकुलेजातोबलीसर्वेश्वरःकलौ । सर्वेभ्यएववर्णेभ्योयोग्यःकन्यावरोधनी १२ येनतेनैवयोगेनाद्विजातिर्दीक्षितःकलौ । यैवसैवचमै
त्रेयप्रायश्चित्तक्रियाकलौ १३ सर्वमेवकलौशास्त्रंयस्ययद्वचनंद्विज । देवताश्चकलौसर्वाःसर्वःसर्वस्यचाश्रमः १४ उपवासस्तथायासोवित्तोत्सर्गस्त
थाकलौ । धर्मोयथाभिरुचितैरनुष्ठानैरनुष्ठितः १५ वित्तेनभवितापुंसांस्वल्पेनाढ्यमदःकलौ । स्त्रीणांरूपमदश्चैवकेशैरेवभविष्यति १६ सुवर्णमणि

सानेपिप्रसंगादन्यत्पृच्छतिकलेरिति विप्लवंनाशम् ८ उत्तरमाह कलिस्वरूपमित्यादिनायावदुत्तराध्यायसमाप्ति प्रष्टुकामः ९ वर्णाश्रमयोर्यआचारस्तद्वतीतदनुरूपानृणांनप्रवृत्तिः सामा
दिभिर्वेदैर्हेतुभिर्यन्निष्पादनंप्रवृत्त्यंगकार्यताज्ञानंतदेवहेतुर्यत्रतथाभूताचनभवति वेदानुसारिणीनभवतीत्यर्थः १० धर्मइति धर्मादनपेतोयोयस्यविवाहःसनास्तीत्यर्थः शिष्यस्यगुरोश्चसम्य
क्स्थितिःशुश्रूषानुग्रहरूपानास्ति दंपत्योर्यःक्रमःपरस्पराव्यभिचारवृत्तिःसनास्ति वह्न्यात्मकोहोमोदेवात्मकःपूजाचक्रमोविध्यनुरूपोनास्ति ११ सर्वेश्वरःनियंतादंडधरइत्यर्थः सर्ववर्णे
भ्यःकन्यावरोधनीयोग्योभविष्यतिविवाहेधनंविनावर्णनियमोनास्तीत्यर्थः १२ येनतेनयोगेनउपायेननिषिद्धद्रव्यादिनादीक्षितःस्यात् यैवसैवानियतेत्यर्थः १३ यस्ययद्वचनंतत्सर्वमेवशास्त्रं
भविष्यति येनतेनकल्पिताःसर्वादेवताः १४ विधिंविनापियथाभिरुचितैरनुष्ठानैरनुष्ठितउपवासादिर्धर्मःस्यात् आयासःकृच्छ्रादिःतीर्थयात्रादिर्वा १५ केशैरेवनरत्नाद्यलंकारैः १६ तदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्पष्टयति सुवर्णेति १७ १८ योयोबहुलंधनंददातिससएवउत्तमानामपिस्वामीभविता स्वामित्वेहेतुःसंबंधोयस्यतथाभूतःअभिजनःपूर्वस्वामिपुत्रतादिर्नभावीनभविता पृथक्पदत्वेबह्व
र्थदानादिनासंबंधएवस्वामित्वेहेतुः कलौभावीनाभिजनःनसत्कुलीनत्वमित्यर्थः स्वामित्वहेतुसंबंधोभविताभिजनस्तदेतिपाठेस्वामित्वहेतुनाबह्वर्थदानादिनायःसंबंधःसएवाभिजनःमहाकु
लीनत्वंभविताभाविष्यतीत्यर्थः १९ द्रव्याणांसंघाताःसंचयागृहांताःगृहाएवांतःसमाप्तिर्येषांतेतथा धनसंचयाअपितादृशाएवभविष्यंतियेगृहानिर्माणएवसमाप्स्यंतिनतुधर्माद्युपयोगिनइत्यर्थः
मतिश्चद्रव्यांताद्रव्यमात्रोपार्जननिष्ठानतुआत्मज्ञानोपयोगिनी अर्थाश्चात्मभोगमात्रोपक्षीणानधर्माद्युपयोगिनः २० स्वैरिण्यःपुंश्चल्यः यतोललितेसुन्दरएवस्पृहायासान्ताःस्पृहालवःअ

रत्नादौवस्त्रेचोपक्षयंगते । कलौस्त्रियोभविष्यंतितदाकेशैरलंकृताः १७ परित्यक्ष्यंतिभर्तारंवित्तहीनंतथाश्रयः । भर्ताभविष्यतिकलौवित्तवानेवयो
षिताम् १८ योयोददातिबहुलंससस्वामीतदानृणाम् । स्वामित्वहेतुसंबंधोभावीनाभिजनस्तथा १९ गृहांताद्रव्यसंघाताद्रव्यांताचतथामतिः । अ
र्थाश्चात्मोपभोगांताभविष्यंतिकलौयुगे२०कलौस्त्रियोभविष्यंतिस्वैरिण्योललितस्पृहाः।अन्यायावासवित्तेषुपुरुषाश्चस्पृहालवः२१अभ्यर्थितोऽपिसु
हृदास्वार्थहानिंनमानवः। पणार्धार्धार्धमात्रेणकरिष्यतितदाद्विज२२समानपौरुषंचेतोभाविविप्रेषुवैकलौ । क्षीरप्रदानसंबंधिभाविगोषुचगौरवम्२३
अनावृष्टिभयात्प्रायःप्रजाःक्षुद्भयपीडिताः । भविष्यंतितदासर्वागगनासक्तदृष्टयः २४ कंदपर्णफलाहारास्तापसाइवमानवाः । आत्मानंपातयि
ष्यंतितदावृष्ट्यातिदुःखिताः २५ दुर्भिक्षमेवसततंतदाक्लेशमनीश्वराः । प्राप्स्यंतिव्याहतसुखप्रमोदामानवाःकलौ २६ अस्नानभोजिनोनाग्निदेव
तातिथिपूजनम् । करिष्यंतिकलौप्राप्तेनचपैत्र्योदकक्रियाः २७ लोलुपाङ्गस्वदेहाश्चबङ्कन्नादनतत्पराः । बहुप्रजाल्पभाग्याश्चभविष्यंतिकलौस्त्रि
यः २८ उभाभ्यामथपाणिभ्यांशिरःकंडूयनंस्त्रियः । कुर्वत्योगुरुभर्तॄणामाज्ञांभेत्स्यंत्यनादृताः २९ स्वपोषणपराःक्षुद्रादेहसंस्कारवर्जिताः । परु
षानृतभाविन्योभविष्यंतिकलौस्त्रियः ३० दुःशीलादुष्टशीलेषुकुर्वत्यःसततंस्पृहाम् । असद्वृत्ताभविष्यंतिपुरुषेषुकुलांगनाः ३१ वेदादानंकरि
ष्यंतिबटवश्चतथाव्रताः । गृहस्थाश्चनहोष्यंतिनदास्यंत्युचितान्यपि ३२ वनवासिनोभविष्यंतिग्राम्याहारपरिग्रहाः । भिक्षवश्चापिमित्रादिस्नेह

भिकांक्षिणः २१ पणोऽशीतिर्वराटिकाः तदर्धार्धकाकिणीमात्रंतदर्धमात्रेपिविषयेनार्थहानिंकरिष्यति दशवराटिकाअपिनत्यक्ष्यतीत्यर्थः २२ समानपौरुषंस्वापेक्षयासमानंपुरुषत्वंविप्रेष्व
पीत्याकारंचित्तंशूद्रादेर्भविष्यतिब्राह्मणसाम्यंस्वस्मिन्प्रत्येष्यंतीत्यर्थः समाप्तपौरुषमितिपाठेसमाप्तंस्वापेक्षयाविप्रेषुसंक्षिप्तंपौरुषमितिचित्तेशूद्रादेर्भविष्यति समानपुरुषमितिपाठेसगर्वंनि
ष्ठुरंचेत्यर्थः क्षीरप्रदानसंबंधिक्षीरप्रदानौपाधिकंगौरवंयवसादिदानादरःनतुजात्या २३ अनावृष्ट्याःभयेनक्षुद्भयेनचपीडिताव्याकुलाःसंतोमेघापेक्षयागगनासक्तदृष्टयोभविष्यंति २४
पातयिष्यंतिघातयिष्यंति २५ कलौसततंदुर्भिक्षमेवअतएवक्लेशंप्राप्स्यंतिततश्चव्याहतसुखप्रमोदाः प्रमोदोहर्षः अनीश्वरानिर्धनाः २६ २७ २८ आज्ञांभेत्स्यंतिआज्ञाभंगंकरिष्यंति अ
नादृताःआदरशून्याः २९ परुषमनृतंभावितुंशीलंयासांताः ३० दुःशीलेषुदुष्टचेष्टेषुस्पृहांकुर्वत्योव्यभिचारिण्योभविष्यंति ३१ आश्रमवैकृतमाह वेदादानमिति अव्रताआश्रमोक्तनिय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्सदृशंगवांपयः उशीरंसुगंधितृणविशेषः तज्जन्यमौशीरम् ५३ इयालाद्याभार्याश्चात्रादयःहारिण्योहद्याभार्याश्चबहुव्रीहिर्वा रम्यभार्येषुनृषुजाराणांसख्यंभावीत्यर्थः ५४ कर्मात्मकःकर्मा
धीनशरीरः ५५ ५६ यद्यद्वस्तुतत्सर्वंदुःखायभविष्यति ५७ क्वचित्कीकटादौ ५८ तत्रकलौअल्पेनायासेनयत्नेनहरिकीर्तनादिनायंपुण्यराशिंकरोतिसाहिकृतयुगेतपसामहताक्रियते य
इतिपाठेयःकोपिअतिमलिनोपीत्यर्थः अनेनैकेनगुणेनकलिःसर्वश्रेष्ठइत्यर्थः ५९ इतिश्रीवैष्णवाकूत॰षष्ठेंशेप्रथमोध्यायः १ सर्वदोषहरंश्रेष्ठंगुणमेकंकलेरिह अपृष्टएवाहमु
निःप्रसंगाच्छूद्रयोषितोःदोषनिधिरपिकलिःस्वल्पायासेनमहाफलदायीत्युपपादयन्निकृष्टयोःस्त्रीशूद्रयोरिहगुणाधिक्यंवक्तुमितिहासंप्रस्तौति व्यासइति अत्रायत्नसाध्यमहापुण्ये वस्तुनि

तानराः ५५ वाङ्मनःकायिकैर्दोषैरभिभूताःपुनःपुनः। पापान्यनुदिनंचैवकरिष्यंत्यल्पमेधसः ५६ निःसत्यानामशौचानांनिर्ह्रीकाणांतथानृणाम्।
यद्यद्दुःखायतत्सर्वंकलिकालेभविष्यति ५७ निःस्वाध्यायवषट्कारेस्वधास्वाहाविवर्जिते। तदाप्रविरलोविप्रक्वचिल्लोकोभविष्यति ५८ तदाल्पेनैवय
त्नेनपुण्यस्कंधमनुत्तमम्। करोतियंकृतयुगेक्रियतेतपसाहिसः ५९। । इतिश्रीविष्णुपुराणेषष्ठेंशेप्रथमोध्यायः १। । पराशरउवाच। ।
व्यासःप्राहमहाबुद्धिर्यदत्रैवहिवस्तुनि। तच्छ्रूयतांमहाभागगदतोममतत्त्वतः १ कस्मिन्कालेल्पकोधर्मोददातिसुमहत्फलम्। मुनीनामप्यभूद्वादः
कश्चासौक्रियतेसुखम्२ संदेहनिर्णयार्थायवेदव्यासंमहामुनिम्। ययुस्तेसंशयंप्रष्टुंमैत्रेयमुनिपुंगवाः ३ ददृशुस्तेमुनिंतंतुजाह्नवीसलिलेद्विज। वे
दव्यासंमहाभागमर्धस्नातंसुतंमम ४ स्नानावसानंतेतस्यप्रतीक्षंतोमहर्षयः। तस्थुस्तटेमहानद्यास्तरुखंडमुपाश्रिताः ५ मग्नोथजाह्नवीतोयादुत्थाया
हसुतोमम। व्यासःसाधुःकलिःसाधुरित्येवंशृण्वतांवचः ६ तेषांमुनीनांभूयश्चममज्जसनदीजले। उत्थायसपुनर्व्यासःशूद्रधन्योसिचाब्रवीत् ७
निमग्नश्चसमुत्थायततःप्राहमहामुनिः। योषितःसाधुधन्यास्तास्ताभ्योधन्यतरोस्तिकः ८ ततःस्नात्वायथान्यायमायांतंतंकृतक्रियम्। उपत
स्थुर्महाभागामुनयस्तेसुतंमम ९ कृतसंवंदनांश्चाहकृतासनपरिग्रहान्। किमर्थमागतायूयमितिसत्यवतीसुतः १० तमूचुःसंशयंप्रष्टुंभगवंतमु
पागताः। अलंतेनास्तुवृत्तंतत्कथ्यतामपरंत्वया ११ कलिःसाध्वितियत्प्रोक्तंशूद्रःसाध्वितियोषितः। यच्चाहभगवान्साधुर्धन्याश्चेतिपुनःपुनः १२

विषये १ वादोविचारः कैरधिकारिभिः असौधर्मः सुखमनायासेन २ संशयंसंदेहविषयमर्थंप्रष्टुंययुः ३ ४ स्नानस्यावसानंसमाप्तिंप्रतीक्षंतःदक्षसमाश्रितास्तस्थुः ५ उत्थायउन्मज्य
तेषांशृण्वतांकलिःसाधुःसाधुरित्येवंवचोव्यासआहेत्यन्वयः तदेवपृष्टेनापिव्यासेनकस्मिन्कालेस्वल्पायासेनापिमहत्फलमित्येतत्प्रश्नोत्तरतयाकलेःसाधुत्वमुक्तम् १ कैश्चासौक्रियतेसुखमि
त्यस्योत्तरतयास्त्रीशूद्रयोर्धन्यत्वमाह शूद्रधन्योसीति बुद्धिसान्निध्याच्छूद्रसंबोधनम् शूद्रोधन्योपीतिपाठःसुगमः अत्रकलेरतिशयसाधुत्वंशूद्रस्यतद्धन्यतरत्वंस्त्रीणांतद्धन्यतमत्वंचगंगायामघ
मर्षणेभगवद्ध्यानेनप्रतीतमितिज्ञापयितुंपुनर्निमज्जनोन्मज्जनमितिज्ञेयम् ७ ८ ९ कृतंसंवंदनंयैस्तान् १० अलंतेनसंशयप्रश्नेनातस्तत्तावदास्ताम् ११ साध्वित्यत्रविसर्गलोपसंधी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महीनाःबटवोब्रह्मचारिणःवेदानामादानमध्ययनंकरिष्यंति उचितानिन्यायप्राप्तानि ३२ वनवासिनोवानप्रस्थाः भिक्षवःसंन्यासिनः अवश्यपोष्यान्विहायान्यान्मित्रादीन्परिकल्प्यतेषुस्ने हसंबंधेनयंत्रणंतद्वशत्वंयेषांतथाभूताभविष्यंति ३३ अरक्षितारःप्रजापालनमकुर्वंतः हर्तारःकरग्राहिणः तथाशुल्कव्याजेनवणिक्जमानांवित्तापहारिणोभविष्यंति ३४ ३५ शूद्रवृत्त्यासे

संबंधयंत्रणाः ३३ अरक्षितारोहर्तारःशुल्कव्याजेनपार्थिवाः । हारिणोजनचित्तानांसंप्राप्तेतुकलौयुगे ३४ योयोनागरथाश्वाढ्यःससराजाभवि ष्यति । यश्चयश्चाबलःसर्वःससभृत्यःकलौयुगे ३५ वैश्याःकृषिवणिज्यादिसंत्यज्यनिजकर्मयत् । शूद्रवृत्त्याप्रवर्त्स्यंतिकारुकर्मोपजीविनः ३६ भैक्षव्रतातथाशूद्राःप्रव्रज्यालिंगिनोधमाः । पाषंडसंश्रयांवृत्तिमाश्रयिष्यंत्यसंस्कृताः ३७ दुर्भिक्षकरपीडाभिरतीवोपद्रुताजनाः । गोधूमान्नयवा न्नाढ्यान्देशान्यास्यंतिदुःखिताः ३८ वेदमार्गेप्रलीनेचपाषंडाढ्येततोजने । अधर्मवृद्ध्यालोकानामल्पमायुर्भविष्यति ३९ अशास्त्रविहितंघोरंतप्य मानेषुवैतपः । नरेषुनृपदोषेणबालमृत्युर्भविष्यति ४० भविन्रीयोषितांसूतिःपंचषट्सप्तवार्षिकी । नवाष्टदशवर्षाणांमनुष्याणांतथाकलौ ४१ प लितोद्गमश्चभवितातदाद्वादशवार्षिकः । नातिजीवतिवैकश्चित्कलौवर्षाणिविंशतिम् ४२ अल्पप्रज्ञावृथालिंगादुष्टांतःकरणाःकलौ । यतस्ततोविनंक्ष्यं तिकालेनाल्पेनमानवाः ४३ यदायदाहिपाषंडवृद्धिर्मैत्रेयलक्ष्यते । तदातदाकलेर्वृद्धिरनुमेयाविचक्षणैः ४४ यदायदासतांहानिर्वेदमार्गानुसारिणाम् । तदातदाकलेर्वृद्धिरनुमेयाविचक्षणैः ४५ प्रारंभाश्चावसीदंतियदाधर्मकृतांनृणाम् । तदानुमेयंप्राधान्यंकलेर्मैत्रेयपंडितैः ४६ यदायदानयज्ञानामी श्वरःपुरुषोत्तमः । इज्यतेपुरुषैर्यज्ञैस्तदाज्ञेयंकलेर्बलम् ४७ नप्रीतिर्वेदवादेषुपाषंडेषुयदारतिः । कलेर्वृद्धिस्तथाप्राज्ञैरनुमेयाद्विजोत्तमैः ४८ कलौजग त्पतिंविष्णुंसर्वस्रष्टारमीश्वरम् । नार्चयिष्यंतिमैत्रेयपाखंडोपहतानराः ४९ किंदेवैःकिंद्विजैर्वेदैःकिंशौचेनांबुजन्मना । इत्येवंविप्रवक्ष्यंतिपाषंडोपहताज नाः ५० अल्पवृष्टिस्तुपर्जन्यःसस्यंवल्पफलंतथा । फलंतथाल्पसारंचविप्रप्राप्तेकलौयुगे ५१ शाणीप्रायाणिवस्त्राणिशमीप्रायामहीरुहाः । शूद्रप्रा यास्तथावर्णाभविष्यंतिकलौयुगे ५२ अणुप्रायाणिधान्यानिआजप्रायंतथापयः । भविष्यतिकलौप्राप्तेऔशीरंचानुलेपनम् ५३ श्वश्रूश्वशुरभूयि ष्ठागुरवश्चनृणांकलौ । श्यालाद्याहारिभार्याश्चसुहृदोमुनिसत्तम ५४ कस्यमातापिताकस्ययदाकर्मात्मकःपुमान् । इतिचोदाहरिष्यंतिश्वशुरानुग

वयावर्त्स्यंतिवर्तिष्यंते वर्ततीत्यपिक्वचित्पाठः कारूणांशिल्पिनांकर्मकटादिक्रियामुपजीवितुंशीलंयेषांते ३६ प्रव्रज्यालिंगिनःसंन्यासिवेषाः ३७ दुर्भिक्षादिपीडिताःस्वल्पवृष्ट्यादिजा यमानगोधूमाद्यन्नाढ्यान्देशान्यास्यंति ३८ ३९ ४० ४१ विंशतिंवर्षाण्यतिक्रम्यकश्चिन्नजीविष्यति ४२ ४३ कलेःप्राबल्येलिंगान्याह यदेतिपंचभिः ४४ ४५ ४६ ४७ ४८ ४९ अंबुजन्मनाजलकृतेनशौचेनाकिम् विप्रवक्ष्यंतिविरुद्धंप्रकर्षेणवादिष्यंति ५० अल्पसारमल्पबीजम् ५१ शाणीशणसूत्रजंवस्त्रम् ५२ अणुश्चीनकंधान्यम् आजंअजादुग्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छांदसौ १२ १३ हृदिस्थसंशयप्रश्नस्योत्तरंमयादत्तमबुद्धापुनरेतेपृच्छंतीतिप्रहस्यइदंवक्ष्यमाणमब्रवीत् १४ यत्कृतेदशभिरितिद्वाभ्यांकलौस्वल्पकालेनधर्मोत्कर्षइतिध्यायन्कृतइतिद्वाभ्यांस्वल्पायासेनपुण्योत्कर्षइतिचकलेःसाधुत्वमुक्तं हायनेनवर्षेण १५ १६ १७ १८ शूद्राणामल्पायासेनपुरुषार्थसिद्धिंवक्तुंतत्रत्रैवर्णिकानामतिक्लेशमाह व्रतचर्येतिचतुर्भिः उपहरणमुपहारास्तैर्गुरवेसर्वलाभार्पणैरित्यर्थः व्रतचर्यापरैर्ग्राह्योवेदःपूर्वमितितुपाठःसुगमः १९ वृथाकथाश्रीकृष्णकीर्तनरहिता वृथाभोज्यंश्रीकृष्णानिवेदितादि वृथायात्राभगवत्तीर्थादियात्रा

तत्सर्वंश्रोतुमिच्छामोनचेद्गुह्यंमहामुने । तत्कथ्यतांतदाकृत्स्नंपृच्छामस्त्वांप्रयोजनम् १३ इत्युक्तोमुनिभिर्व्यासःप्रहस्येदमथाब्रवीत् । श्रूयतांभोमुनिश्रेष्ठायदुक्तंधुसाधुसाध्विति १४ यत्कृतेदशभिर्वर्षैस्त्रेतायांहायनेनतत् । द्वापरेतच्चमासेनअहोरात्रेणतत्कलौ १५ तपसोब्रह्मचर्यस्यजपादेश्चफलंद्विजाः । प्राप्नोतिपुरुषस्तेनकलिःसाध्वितिभाषितम् १६ ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन् । यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवम् १७ धर्मोत्कर्षमतीवात्रप्राप्नोतिपुरुषःकलौ । स्वल्पायासेनधर्मज्ञास्तेनतुष्टोस्म्यहंकलौ १८ व्रतचर्योपहारैश्चग्राह्योवेदोद्विजातिभिः । ततस्तुधर्मसंप्राप्तैर्यष्टव्यंविधिवद्धनैः १९ वृथाकथावृथाभोज्यंवृथायात्राद्विजन्मनाम् । पतनायतथाभाव्यंतैस्तुसंयमिभिःसदा २० असम्यक्करणेदोषास्तेषांसर्वेषुवस्तुषु । भोज्यपेयादिकंचैषांनेच्छाप्राप्तिकरंद्विजाः २१ पारतंत्र्यंसमस्तेषुतेषांकार्येषुवैततः । जयंतितेनिजाँल्लोकान्क्लेशेनमहताद्विजाः २२ द्विजशुश्रूषयैवैषपाकयज्ञाधिकारवान् । निजंजयतिवैलोकंशूद्रोधन्यतरस्ततः २३ भक्ष्याभक्ष्येषुनास्यास्तिपेयापेयेषुवैयतः । नियमोमुनिशार्दूलास्तेनासौसाध्वितीरितम् २४ स्वधर्मस्याविरोधेननरैर्लब्धंधनंसदा । प्रतिपाद्यंचपात्रेषुयष्टव्यंचयथाविधि २५ तस्यार्जनेमहाक्लेशःपालनेचद्विजोत्तमाः । तथासद्विनियोगायविज्ञेयंगहनंनृणाम् २६ एभिरन्यैस्तथाक्लेशैःपुरुषोद्विजसत्तमाः । निजाञ्जयतिवैलोकान्प्राजापत्यादिकान्क्रमात् २७ योषिच्छुश्रूषणंभर्तुःकर्मणामनसागिरा । कुर्वतीसमवाप्नोतितत्सालोक्यंततोद्विजाः २८ नातिक्लेशेनमहतातानेवपुरुषोयथा । तृतीयंव्याहृतंतेनमयासाध्वितियोषिताम् २९ एतद्वःकथितंसर्वंयन्निमित्तमिहागताः । तत्पृच्छतयथाकाममहंवक्ष्यामिवःस्फुटम् ३० । । पराशरउवाच । । ततस्तेमुनयःप्रोचुर्यत्प्रष्टव्यंमहामुने । अन्यस्मिन्नेवतत्प्रश्नेयथावत्कथितंत्वया ३१ ततःप्रहस्यतान्प्राहकृष्णद्वैपायनोमुनिः ।

व्यतिरिक्ता गतिःक्रिया पतनायपापाय तथाचसंयमिभिःसदाभाव्यम् २० नइच्छयाप्राप्तिकरंस्वेच्छयोपभोग्यंनभवतिकिंतुनोदनयेत्यर्थः २१ २२ शूद्राणांतुनैषक्लेशइतिधन्यतरत्वमित्याह द्विजशुश्रूषयेतिद्वाभ्याम् २३ २४ स्त्रीणांधन्यतमत्वंवक्तुंपुरुषाणांक्लेशानाह स्वधर्मस्येतित्रिभिः २५ २६ २७ एवंक्लेशैःपुंसःयागतिःसाऽक्लेशेनस्त्रीणामित्याह योषिदिति २८ पुरुषोयथामहताक्लेशेनलोकानाप्नोतितथानातिक्लेशेनस्वल्पायासेनतानेवलोकानाप्नोतीत्यर्थः २९ एतदिदानींयत्पृष्टंतत्कथितंयन्निमित्तमागतास्तत्पृच्छतेत्यन्वयः ३० ३१ इदानींमिदुक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातमितिपुनःप्रहस्यतान्प्राह ह्रदिस्थप्रश्नस्यव्यासेनकथंनिर्णयःकृतइतिविस्मयोत्फुल्लनयनान् ३२ दिव्येनचक्षुषाज्ञानदृष्ट्या ३३ अशेषप्रश्नोत्तरस्योपसंहारःअल्पेनेतिचतुर्भिः आत्मनः स्वस्यगुणैःधर्मसाधनैर्हरिकीर्तनादिभिरंभोभिःक्षालितंमार्जितमखिलंकिल्बिषंयैस्तैर्नरैःकर्तृभिर्धर्मःसिध्यति ३४ ३५ एतत्तृतीयंस्त्रीरूपंधन्यतमंमतंसंमतम् पतिशुश्रूषारूपस्यसाधनस्यापि सुखात्मकत्वात् त्रितयमितिपाठेत्रितयंकलिशूद्रस्त्रीरूपमित्यर्थः ३६ अभिप्रेतंज्ञातुमिष्टम् ३७ ३८ ३९ ४० प्रासंगिकंसमाप्यप्रस्तुतंवक्तुंप्रतिजानीते यच्चाहमिति अंतरालादैनंदिनीम् ४१ इतिवै॰चंद्रि॰षष्ठेअंशेद्वितीयोध्यायः २ संक्षेपाद्विपरार्धांतकालमाहतृतीयके नैमित्तिकंचप्रलयंवैराग्यायातिभीषणम् १ प्रतिसंचरःप्रलयः १ ब्राह्मःब्रह्मदिनांतजःद्विपरार्धिकः द्विगुणेपरार्धेब्रह्मायुःसमाप्तौभवःसएवप्राकृतःप्रकृतौतत्कार्यप्रलयरूपः २ प्रथमांशोक्तामपिद्विपरार्धसंख्यांसंक्षेपाज्ज्ञातुंपुनःपृच्छति परार्धसंख्यामिति ३ तत्रसंक्षेपात्तामा

विस्मयोत्फुल्लनयनांस्तापसांस्तानुपागतान् ३२ मयैषभवतांप्रश्नोज्ञातोदिव्येनचक्षुषा । ततोहिवःप्रसंगेनसाधुसाध्वितिभाषितम् ३३ अल्पेनैव प्रयत्नेनधर्मःसिध्यतिवैकलौ । नरैरात्मगुणांभोभिःक्षालिताखिलकिल्बिषैः ३४ शूद्रैश्चद्विजशुश्रूषातत्परैर्मुनिसत्तमाः । तथास्त्रीभिरनायासात्पतिशुश्रूषयैवहि ३५ ततस्तृतीयमप्येतन्ममधन्यतमंमतम् । धर्मसंसाधनेक्लेशोद्विजातीनांकृतादिषु ३६ भवद्भिर्यदभिप्रेतंतदेतत्कथितंमया। अपृष्टेनापिधर्मज्ञाःकिमन्यत्क्रियतांद्विजाः ३७ । । पराशरउवाच । । ततःसंपूज्यतेव्यासंप्रशसंसुःपुनःपुनः । यथागतंद्विजाजग्मुर्व्यासोक्तिक्षतसंशयम् ३८ भवतोपिमहाभागरहस्यंकथितंमया । अत्यंतदुष्टस्यकलेरयमेकोमहान्गुणः ३९ कीर्तनादेवकृष्णस्यमुक्तबंधःपरंव्रजेत् ४० यच्चाहंभवताष्टष्टोजगतामुपसंहृतिम् । प्राकृतामंतरालांचतामप्येषवदामिते ४१ । । इतिश्रीविष्णुपुराणेषष्ठेंशेद्वितीयोध्यायः २ । । पराशरउवाच । । सर्वेषामेवभूतानांत्रिविधःप्रतिसंचरः । नैमित्तिकःप्राकृतिकस्तथैवात्यंतिकोमतः १ ब्राह्मोनैमित्तिकस्तेषांकल्पांतेप्रतिसंचरः । आत्यंतिकोपिमोक्षाख्यःप्राकृतोद्विपरार्धिकः २ । । मैत्रेयउवाच । । परार्धसंख्यांभगवन्समाचक्ष्वययातुसः । द्विगुणीकृतयाज्ञेयःप्राकृतःप्रतिसंचरः ३ । । पराशरउवाच । । स्थानात्स्थानाद्दशगुणमेकस्माद्गण्यतेद्विज । ततोद्वादशमेभागेपरार्धमभिधीयते ४ परार्धंद्विगुणंयच्चप्रा

ह स्थानादिति तथाहवायुः कोटिकोटिसहस्राणिपरार्धमितिकीर्त्यते परार्धद्विगुणंचापिपरमाहुर्मनीषिणः स्थानंदशगुणंविद्यादेकंदशशतंततः सहस्रमयुतंतस्मान्नियुतंप्रयुतंततः अर्बुदंन्यर्बुदंचैवर्बुदंचैवततःपरम् खर्वंचैवातिखर्वंचशंखःपद्मस्तथैवच समुद्रोमध्यमंतश्चपरार्धंपरमेवच एवमष्टादशैतानिपदानिगणनाविधौ कल्पसंख्याप्रवृत्तस्तुपरार्धोब्रह्मणःस्मृतः तावच्छेषोस्य कालोन्यस्तदंतेप्रतिसृज्यतइति एकंदशगुणंदश दशदशगुणाःशतम् शतंदशगुणंसहस्रमित्येवमेकादिस्थानानामंकानांवामतोवृद्ध्याष्टादशेस्थानेपरार्धंभवति कल्पाश्चात्रसंख्येयाः कल्पसंख्याप्रवृत्तस्तुपरार्धोब्रह्मणस्मृतइतिवायूक्तेः ततश्च कोटिकोटिसहस्राणिपरार्धंतत्राद्विगुणंपरंब्रह्मायुरित्युक्तंभवति यदुक्तंप्रथमांशे निजेनतस्यमानेनआयुर्वर्षशतंस्मृतम् तत्पराख्यंपरार्धंतुतदर्धमभिधीयतइति अस्मिंश्चपक्षेकल्पानांषट्विंशत्सहस्राणिब्रह्मायुरित्युक्तंभवति अनयोःपक्षयोर्महाकल्पभेदेनव्यवस्था यद्वा वायूक्तकल्पशब्देनलक्षणयामानुषदिव्यवर्षादिभिःपरार्धसंख्यापूरणीये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यविरोधःकथंचित्समर्थनीयः ४ ५ नैमित्तिकंप्रलयंवक्तुंपूर्वोक्तमेवनिमेषादिक्रमेणकल्पप्रमाणंस्मारयति निमेषइतिसप्तभिः मात्रालघ्वक्षरोच्चारणकालःउपचारात्सैवमात्राप्रमाणंयस्यसः निमेषकालतुल्याहिमात्रालघ्वक्षरंयदीतिब्रह्मांडोक्तेः तैर्निमेषैः ६ घटिकाज्ञानोपायमाह उन्मानेनेतिसार्धेन अर्धेनयोगेत्रयोदशसार्धद्वादशेत्यर्थःपलानिसार्धद्वादशताम्रपलानितैर्निर्मितेनउन्मानेनउन्मीयतेपरिमाणतोज्ञायतेनेनेतिउन्मानंपात्रंतेनसानाडिकाजायतइतिशेषः ७ किंप्रमाणंतत्पात्रमितितत्राह मागधेनप्रमाणेनजलप्रस्थस्तुसस्मृतइति मागधेन प्रमाणेनजलप्रस्थपूर्णपात्रमुपचारात् ननुतथापिपात्रेणकथंकालःपरिछेद्यःतस्यक्रियापरिच्छेद्यत्वादित्याशंक्याक्रियासिद्धयेपात्रंविशिनष्टि हेमेति माषःपंचगुंजः हेम्नोमाषैश्चतुर्भिश्चतुरंगुलशलाकारूपेणपरिणतैःकृतं

कृतःप्रलयोद्विज। तदाव्यक्तेखिलंव्यक्तंस्वहेतौलयमेतिवै ५ निमेषोमानुषोयोयंमात्रामात्रःप्रमाणतः । तैःपंचदशभिःकाष्ठात्रिंशत्काष्ठास्तथाकला ६ नाडिकातुप्रमाणेनकलादशचपंचच। उन्मानेनांभसःसातुपलान्यर्धत्रयोदश ७ हेममाषैःकृतच्छिद्रंचतुर्भिश्चतुरंगुलैः। मागधेनप्रमाणेनजलप्रस्थस्तुसस्मृतः ८ नाडिकाभ्यामथद्वाभ्यांमुहूर्तोद्विजसत्तम । अहोरात्रंमुहूर्तास्तुत्रिंशन्मासोदिनैस्तथा ९ मासैर्द्वादशभिर्वर्षमहोरात्रंतुतद्दिवि । त्रिभिर्वर्षशतैर्वर्षषष्ट्याचैवसुरद्विषाम् १० तैस्तुद्वादशसाहस्रंचतुर्युगमुदाहृतम् । चतुर्युगसहस्रंतुकथ्यतेब्रह्मणोदिनम् ११ सकल्पस्तत्रमनवश्चतुर्दशमहामुने । तदंतेचैवमैत्रेयब्राह्मोनैमित्तिकोलयः १२ तस्यस्वरूपमत्युग्रंमैत्रेयगदतोमम। शृणुष्वप्राकृतंभूयस्तववक्ष्याम्यहंलयम् १३ चतुर्युगसहस्रांतेक्षीणप्रायेमहीतले । अनावृष्टिरतीवोग्राजायतेशतवार्षिकी १४ ततोयान्यल्पसाराणितानिसत्त्वान्यनेकशः । क्षयंयांतिमुनिश्रेष्ठपार्थिवान्यन्नपीडनात् १५ ततःसभगवान्कृष्णोरुद्ररूपधरोव्ययः । क्षयाययततेकर्तुमात्मस्थाःसकलाःप्रजाः १६ ततःसभगवान्विष्णुर्भानोःसप्तसुरश्मिषु । स्थितःपिबत्यशेषाणिजलानिमुनिसत्तम १७ पीत्वांभांसिसमस्तानिप्राणिभूमिगतानिवै । शोषंनयतिमैत्रेयसमस्तंपृथिवीतलम् १८ समुद्रान्सरितःशैलाञ्शिलाःप्रस्रवणानिच । पातालेषुचयत्तोयंतत्सर्वंनयतिक्षयम् १९ ततस्तस्यानुभावेनतोयाहारोपबृंहिताः । तएवरश्मयःसप्तजायंतेसप्तभास्कराः २० अधश्चोर्ध्वंचतेदीप्तास्ततःसप्तदिवाकराः । दहंत्यशेषंत्रैलोक्यंसपातालतलंद्विज २१ दह्यमानंतुतैर्दीप्तैस्त्रैलोक्यंद्विजभास्करैः ।

छिद्रंएतदुक्तंभवतिसार्धद्वादशपलताम्रमयंशलाकारूपहेमचतुर्माषकरणककृताधश्छिद्रंजलेस्थापितंयावताकालेनच्छिद्रद्वाराजलप्रस्थपूर्णंसन्मग्नंभवतितावत्कालोनाडिका तथाचशुकः द्वादशार्धपलोन्मानंचतुर्भिश्चतुरंगुलैः स्वर्णमाषैःकृतच्छिद्रंयावत्प्रस्थजलप्लुतामिति ८ तथात्रिंशतादिनैर्मासइत्यर्थः ९ १० ११ १२ नैमित्तिकलयमेवाह तस्यस्वरूपमितियावदध्यायसमाप्ति १३ कलेरंतेदुर्भिक्षादिनाक्षीणप्राये १४ १५ क्षयायरुद्ररूपःसन्नात्मस्थासूक्ष्मरूपेणस्वनिष्ठाःप्रजाःकर्तुंयतते १६ सप्तरश्मिषुस्थितोविष्णुःसूर्यरूपेणपिबति रश्मयःकूर्मोक्ताः सुषुम्नोहरिकेशश्चविश्वकर्मातथैवच विश्वव्यवास्तथावर्चावसुःसंयद्वसुस्तथेति १७ प्राणिगतानिरक्तवसादीनि भूमिगतानिवापीकूपतडागादिस्थानि १८ १९ तस्यविष्णोःसप्तभास्कराः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरागोश्राजःपटलःपतंगःस्वर्णभाक्ज्योतिष्मान्सविभासःसप्तसूर्याइतिश्रुत्युक्ताः २० २१ आभोगोविस्तारः निस्नेहंअतिरुक्षम् २२ २३ २४ २५ ज्वालानांमालाःसमूहास्ता सांमहांतआवर्तायस्मिन्सःतत्रैवत्रैलोक्यमध्यएव २६ अंबरीषंभर्जनपात्रंज्वालावर्तएवपरिवारःउपकरणंयस्यसः २७ अधिकारिकामन्वादयःहृताधिकाराअनुष्ठितस्वीयनियोगाःसंतोमह

४ साद्रिनद्यर्णवाभोगंनिःस्नेहमभिजायते २२ ततोनिर्दग्धवृक्षांबुत्रैलोक्यमखिलंद्विज । भवत्येषाचवसुधाकूर्मपृष्ठोपमाकृतिः २३ ततःका लाग्निरुद्रोसौभूत्वासर्वहरोहरिः । शेषाहिश्वाससंतापात्पातालानिदहत्यधः २४पातालानिसमस्तानिसदग्ध्वाज्वलनोमहान् ।भूमिमभ्येत्यसकलंतद त्तिवसुधातलम् २५ भुवर्लोकंचतत्सर्वंस्वर्लोकंचैवदारुणः । ज्वालामालामहावर्तस्तत्रैवपरिवर्तते २६ अंबरीषमिवाभातित्रैलोक्यम खिलंतदा । ज्वालावर्तपरीवारमुपक्षीणचलाचलम् २७ ततस्तापपरीतास्तुलोकद्वयनिवासिनः । हृताधिकारागच्छंतिमहर्लोकंमहामुने २८ तस्मादपिमहाभागतप्तालोकास्ततःपरम् । गच्छंतिजनलोकंतेदशावृत्त्यापरैषिणः २९ ततोदग्ध्वाजगत्सर्वंरुद्ररूपीजनार्दनः । मुखनिश्वासजान्मे घान्करोतिमुनिसत्तम ३० ततोगजकुलप्रख्यास्तडित्वंतोभिनादिनः । उत्तिष्ठंततदाव्योम्निघोराःसंवर्तकाघनाः ३१ केचिदंजनसंकाशाःके चित्कुमुदसंनिभाः । धूम्रवर्णाघनाःकेचित्केचित्पीताःपयोधराः ३२ केचिद्रासभवर्णाभालाक्षारसनिभास्तथा । केचिद्वैदूर्यसंकाशाइंद्रनीलनिभाः क्वचित् ३३ शंखकुंदनिभाश्चान्येजात्यंजननिभास्तथा । इंद्रगोपनिभाःकेचिन्मनःशीलनिभास्तथा ३४ वासपर्णनिभाःकेचिदुत्तिष्ठंतिघनाघ नाः । केचित्पुरवराकाराःकेचित्पर्वतसन्निभाः ३५ कूटागारनिभाश्चान्येकेचिदूर्णनिभाघनाः । महाकायामहासाराःपूरयंतिनभस्तलम् ३६ वर्षंतस्तेमहामेघास्तमग्निमतिभैरवम् । शमयंत्यखिलंविप्रत्रैलोक्यांतरविस्तृतम् ३७ नष्टेचाग्नौशतंतेपिवर्षाणामधिकंघनाः । प्लावयंतोजग त्सर्वंवर्षंतिमुनिसत्तम ३८ धाराभिरक्षमात्राभिःप्लावयित्वाखिलांभुवम् । भुवर्लोकंतथैवोर्ध्वंप्लावयंतिदिवंद्विज ३९ अंधकारीकृतेलोकेनष्टेस्था वरजंगमे । वर्षंतितेमहामेघावर्षाणामधिकंशतम् ४० । । इतिश्रीविष्णुपुराणेषष्ठेंशेतृतीयोध्यायः ३ । । पराशरउवाच । । सप्तर्षिस्थानमाक्रम्यस्थितेंभसिमहामुने । एकार्णवंभवत्येतत्त्रैलोक्यमखिलंततः १ मुखनिश्वासजोविष्णोर्वायुस्ताञ्जलदांस्ततः । नाशय

लोकंयाति २८ तस्मादपिसंतप्ताःसंतस्तद्वासिभिःसहजनंप्रयांति तेषांमन्वादीनांमध्येयेपरैषिणःपरब्रह्मप्राप्तिमिच्छवस्तएवंदशवारावर्तनेनैवक्रमात्तपःसत्यादिद्वारातत्परमीश्वरंविशंति यद्वादशायाअवस्थायाःसंहाररूपायाआवृत्त्यापरैषिणऊर्ध्वलोकैषिणइति २९ ३० ३१ ३२ ३३ इंद्रगोपोवर्षाभवोरक्तवर्णःकीटविशेषः ३४ वासःनीलपक्षःपक्षिविशेषः घनाघनानि बिडामेघाः ३५ केचित्कूटागारोगृहविशेषःमहासारामहानासारोधारासंपातोयेषांते महारावाइतिवापाठः ३६ ३७ ३८ ३९ ४० इतिश्रीविष्णवाकूत॰ षष्ठेंशेतृतीयोध्यायः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तकृतानांपरस्यांतेप्रकृतौलयउच्यते तुरीयेयत्रजीवाश्चलीनाब्रह्मणिशेरते १ नैमित्तिकप्रलयेसत्यनंतरंकिंजायतइतितत्राह सप्तर्षिस्थानमित्यादिनानैमित्तिकस्तेकथितइत्यंतेनग्रंथेन १ २ ३ शेषएवशय्यातामास्थितःशेते ४ ५ ६ नैमित्तिकपदनिरुक्तिमाह निमित्तमिति यच्छेतेतन्निमित्तम् ब्रह्मनिद्रानिमित्तजन्यत्वान्नैमित्तिकोनाम्नेत्यर्थः ७ यदाजागर्तितदाजगच्चे ष्टतेसृष्ट्युन्मुखंभवति ८ कियंतंकालंशेतेतत्राह पद्मयोनेरिति यद्यावत्प्रमाणम् ९ १० कल्पसंहाराद्ब्रह्मादिनावसानात् ११ संक्षालनेपरिशोधनेकृते १२ नैमित्तिकाद्विशेषमाह महदा

न्वातिमैत्रेयवर्षाणामपरंशतम् २ सर्वभूतमयोचिंत्योभगवान्भूतभावनः । अनादिरादिर्विश्वस्यपीत्वावायुमशेषतः ३ एकार्णवेतत स्तस्मिञ्शेषशय्यास्थितःप्रभुः । ब्रह्मरूपधरःशेतेभगवानादिकृद्धरिः ४ जनलोकगतैःसिद्धैःसनकाद्यैराभिष्टुतः । ब्रह्मलोकगतैश्चैवचिंत्यमा नोमुमुक्षुभिः ५ आत्ममायामयींदिव्यांयोगनिद्रांसमास्थितः । आत्मानंवासुदेवाख्यंचिंतयन्परमेश्वरः ६ एषनैमित्तिकोनाममैत्रेयप्रतिसं चरः । निमित्तंतत्रयच्छेतेब्रह्मरूपधरोहरिः ७ यदाजागर्तिसर्वात्मासतदाचेष्टतेजगत् । निमीलयत्येतदखिलंमायाशय्याशयेच्युते ८ पद्मयो नेर्दिनंयत्तुचतुर्युगसहस्रवत् । एकार्णवेकृतेलोकेतावतीरात्रिरुच्यते ९ ततःप्रबुद्धोरात्र्यंतेपुनःसृष्टिंकरोत्यजः । ब्रह्मस्वरूपधृक्विष्णुर्यथाते कथितंपुरा १० इत्येषकल्पसंहारादांतरःप्रलयोद्विज । नैमित्तिकस्तेकथितःप्राकृतंशृण्वतःपरम् ११ अनावृष्ट्याग्निसंपर्कात्कृतसंक्षालनेमु ने । समस्तेष्वेवलोकेषुपातालेष्वखिलेषुच १२ महदादेर्विकारस्यविशेषांतस्यसंक्षये । कृष्णेच्छाकारितेतस्मिन्प्रवृत्तेप्रतिसंचरे १३ आ पोग्रसंतिवैपूर्वंभूमेर्गंधात्मकंगुणम् । आत्तगंधाततोभूमिःप्रलयत्वायकल्पते १४ प्रनष्टेगंधतन्मात्रेभवत्युर्वीजलात्मिका । आपस्तदाप्रवृद्धा स्तुवेगवत्योमहास्वनाः १५ सर्वमापूरयंतीदंतिष्ठंतिविचरंतिच । सलिलेनैवोर्मिमतालोकास्तांस्तान्समंततः १६ अपामपिगुणोयस्तुज्यो तिषापीयतेतुसः । नश्यंत्यापस्ततस्ताश्चरसतन्मात्रसंक्षयात् १७ ततश्चापोहृतरसाज्योतिषंप्राप्नुवंतिवै । अग्न्यवस्थेतुसलिलेतेजसासर्व तोवृते १८ सचाग्निःसर्वतोव्याप्यआदत्तेतज्जलंतदा । सर्वमापूर्यतेर्चिर्भिस्तदाजगदिदंशनैः १९ अर्चिर्भिःसंवृतेतस्मिंस्तिर्यगूर्ध्वमधस्तथा । ज्योतिषोपिपरंरूपंवायुरात्तिप्रभाकरम् २० प्रलीनेचततस्तस्मिन्वायुभूतेखिलात्मनि । प्रनष्टेरूपतन्मात्रेहृतरूपोविभावसुः २१ प्रशाम्य

देविशेषांतस्यपृथिव्यंतस्यविकारस्यसंक्षयेसंक्षयनिमित्तंप्रतिसंचरेतस्मिन्प्राकृतेप्रवृत्तेसतीत्यर्थः १३ आत्तोगृहीतोगंधोयस्याःसा प्रलयत्वायप्रलयाय १४ जलात्मिकाभवतिविवेचक स्यगंधस्याभावादित्यर्थः १५ सलिलेनोर्मिमताऊर्मिरूपेणसलिलेनापस्तांल्लोकानापूरयंतीतिपूर्वेणैवान्वयः लोकाव्याप्ताइतिपाठःसुगमः १६ अपांगुणोरसोज्योतिषापीयते १७ १८ सर्वतआद त्तेआत्मसात्करोति १९ प्रभाकरंप्रकाशकंरूपंवायुरात्तिग्रसते २० २१ निरालोकेनिर्ज्योतिष्के २२ प्रलीयतेस्मिन्नितिप्रलयंस्वाधिष्ठानंअतएवात्मसंभवमुत्पत्त्युपादानमाकाशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्चमूलमितिवापाठः मूलंशब्दमासाद्य ऊर्ध्वमधःदिशोदशवदोधवीतिप्रसरति २३ अनावृतंविकारैरपरिच्छिन्नम् २४ २५ परिमंडलंवर्तुलम् अंडकटाहवेष्टितत्वात् सुषिरंछिद्राकारम् शब्देनलक्ष्यतेनुमीयतइतिशब्दलक्षणंसूक्ष्मशब्दएवमात्रास्वरूपंयस्यतत् २६ भूतादिशब्देनात्रत्रिविधाहंकारोगृह्यतेनतुतामसएवभूतानामिंद्रियाणांचयुगपत्तत्रलयोक्तेः भूतेंद्रियग्रहणंदेवानामुपलक्षणम् एवंतामसशब्दोप्यहंकारमात्रस्योपलक्षणम् अभिमानात्मकइतिविशेषणात् अभिमानस्यसर्वत्रसमत्वादावरणप्राधान्येनात्रतामसशब्दप्रयोगः २७ बुद्धिलक्षणःसत्त्वगुणप्रधानत्वात् उक्तमेवपृथिव्यादेर्महत्तत्त्वपर्यंतंसृष्टिप्रातिलोम्येनलयमावरणेष्वतिदेष्टुंब्रह्मांडांतर्बहिर्वर्तमानस्यसंहार्यस्यजगतआद्यंतकोटीमाह उर्वीति ब्रह्मांडस्यांतर्बाह्यतश्चजगतोंतःप्रांते

तितदाज्योतिर्वायुर्दोधूयतेमहान् । निरालोकेतदालोकेवायुसंस्थेचतेजसि २२ ततःप्रलयमासाद्यवायुःसंभवमात्मनः । ऊर्ध्वंचाधश्चतिर्यक्कदोधवीतिदिशोदश २३ वायोरपिगुणंस्पर्शमाकाशंग्रसतेततः । प्रशाम्यतितदावायुःखंतुतिष्ठत्यनावृतम् २४ अरूपमरसस्पर्शमगंधंनचमूर्तिमत् । सर्वमाधारयच्चैवसुमहत्तत्प्रकाशते २५ परिमंडलंतत्सुषिरमाकाशंशब्दलक्षणम् । शब्दमात्रंतदाकाशंसर्वमावृत्यतिष्ठति २६ ततःशब्दगुणंतस्यभूतादिर्ग्रसतेपुनः । भूतेंद्रियेषुयुगपद्भूतादौसंस्थितेषुवै । अभिमानात्मकोह्येषभूतादिस्तामसःस्मृतः २७ भूतादिर्ग्रसतेचापिमहान्वैबुद्धिलक्षणः । उर्वीमहांश्चजगतःप्रांतेंतर्बाह्यतस्तथा २८ एवंसप्तमहाबुद्धेक्रमात्प्रकृतयस्तुवै । प्रत्याहारेतुताःसर्वाःप्रविशंतिपरंपरम् । २९ येनेदमावृतंसर्वमंडमप्सुप्रलीयते । सप्तद्वीपसमुद्रांतंसप्तलोकंसपर्वतम् ३० उदकावरणंयत्तज्ज्योतिषापीयतेतुतत् । ज्योतिर्वायौलयंयातियात्याकाशेसमीरणः ३१ आकाशंचैवभूतादिर्ग्रसतेतंतथामहान् । महांतमेभिःसहितंप्रकृतिर्ग्रसतेद्विज ३२ गुणसाम्यमनुद्रिक्तमन्यूनंचमहामुने । प्रोच्यतेप्रकृतिर्हेतुःप्रधानंकारणंपरम् ३३ इत्येषाप्रकृतिःसर्वाव्यक्ताव्यक्तस्वरूपिणी । व्यक्तंस्वरूपमव्यक्तेतस्मिन्मैत्रेयलीयते ३४ एकःशुद्धोक्षरोनित्यःसर्वव्यापीतथापुमान् । सोप्यंशःसर्वभूतस्यमैत्रेयपरमात्मनः ३५ नसंतिसर्वभूतेशेनामजात्यादिकल्पनाः । सत्तामात्रात्मकेज्ञेयज्ञानात्मन्यात्मनःपरे ३६ सब्रह्मतत्परंधामपरमात्मासचेश्वरः । सविष्णुःसर्वमेवेदंयतोनावर्ततेयतिः ३७ प्रकृतिर्यामयाख्याताव्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौलीयेतेपरमात्मनि ३८ परमात्माचसर्वेषामाधारःपरमेश्वरः । विष्णुर्नाम्नास

उर्वीआदिःप्रांतेमहानित्यर्थः २८ ततःकिमतआह एवमिति यथाकारणेषुपृथिव्यादेःकार्यस्यसंहारउक्तएवमावरणान्यपिसप्तप्रकृतयःसंहारेपरंपरंस्वंस्वंकारणंप्रविशंति २९ तदाह येनेति त्रिभिः येनेदंसप्तद्वीपादिकमावृतमासीत् एतदंडंपृथिव्यावरणरूपमप्सुप्रलीयतइत्यर्थः ३० ३१ ३२ प्रकृतिस्वरूपंदर्शयन्नुतत्रस्वाभिन्नस्यकार्यस्यलयमुपसंहरति गुणसाम्येतिद्वाभ्याम् ३३ व्यक्ताव्यक्तस्वरूपिणीकार्यकारणरूपा ३४ प्रकृतिपुरुषयोरपिपरमात्मनिलयंवक्तुंतयोस्तदंशत्वमाह एकइति सर्वव्यापीप्रकृतितत्कार्याधिष्ठाता सर्वभूतस्येतिविशेषणादपिशब्दाच्च प्रकृतिरपितदंशइत्युक्तंभवति ३५ कःपुनःपरमात्मेतितत्राह नसंतीतिद्वाभ्याम् आत्मनःपरेपुरुषोत्तमे ३६ ३७ लीयेतेलीनाविवतिष्ठतः ३८ परमात्मनोनास्तिलयइत्याह परमात्मेति ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्सएवपरमपुरुषार्थः तत्प्राप्त्यर्थमेवप्रवृत्तिनिवृत्तिकर्मरूपसाधनानुष्ठानमित्याह प्रवृत्तामितित्रिभिः ४० तदेवविशिष्याह ऋगितिद्वाभ्याम् ४१ ४२ ज्ञानयोगप्रकारमाह ह्रस्वदीर्घेतित्रिभिः वासुदेवःसर्वमितिगीतोक्तेः ४३ ४४ ४५ सर्वोत्कर्षप्रतिपत्त्यर्थसर्वातिशायिनीमहोरात्रिकल्पनामाह द्विपरार्धेतिद्वाभ्याम् ४६ तथापुरुषेतत्रपरमेश्वरेस्थितेप्रकृतौचस्थिताया मित्यन्वयः ४७ एतच्चनवास्तवमित्याह नैवाहरिति उपचारःसर्वातिशयप्रतिपत्त्यर्थउच्यतेक्रियते ४८ ४९ इतिवैष्णवाकूतचंद्रिकायांभट्टाचार्यटीकायांषष्ठेंशेचतुर्थोध्यायः ४ पंच

वेदेषुवेदांतेषुचगीयते ३९ प्रवृत्तंचनिवृत्तंद्विविधंकर्मवैदिकम् । ताभ्यामुभाभ्यांपुरुषैःसर्वमूर्तिःसइज्यते ४० ऋग्यजुःसामभिर्मार्गैःप्रवृत्ते इज्यतेह्यसौ । यज्ञेश्वरोयज्ञपुमान्पुरुषैःपुरुषोत्तमः ४१ ज्ञानात्माज्ञानयोगेनज्ञानमूर्तिःसइज्यते।निवृत्तेयोगिभिर्मार्गेविष्णुर्मुक्तिफलप्रदः ४२ ह्रस्व दीर्घप्लुतैर्यत्तुकिंचिद्वस्त्वभिधीयते । यच्चवाचामविषयेतत्सर्वंविष्णुरव्ययः४३व्यक्तंसएवचाव्यक्तंसएवपुरुषोव्ययः।परमात्माचविश्वात्माविश्वरूपधरो हरिः ४४ व्यक्ताव्यक्तात्मिकातस्मिन्प्रकृतिःसंप्रलीयते । पुरुषश्चापिमैत्रेयव्यापिन्यव्याहतात्मनि ४५ द्विपरार्धात्मकःकालःकथितोयोमयातव । तदहस्तस्यमैत्रेयविष्णोरीशस्यकथ्यते ४६ व्यक्तेचप्रकृतौलीनेप्रकृत्यांपुरुषेतथा । तत्रस्थितेनिशाचान्यातत्प्रमाणामहामुने ४७ नैवाहस्तस्यन निशानित्यस्यपरमात्मनः । उपचारस्तथाप्येतत्तस्येशस्यद्विजोच्यते ४८ इत्येषतवमैत्रेयकथितःप्राकृतोलयः । आत्यंतिकमतोब्रह्मन्निबोधप्रति संचरम् ४९ । । इतिश्रीविष्णुपुराणेषष्ठेअंशेचतुर्थोध्यायः । । ४ । । पराशरउवाच । । आध्यात्मिकादिमैत्रेयज्ञात्वातापत्रयंबुधः । उत्पन्नज्ञानवैराग्यःप्राप्नोत्यात्यंतिकंलयम् १ आध्यात्मिकोवैद्विविधःशारीरोमानसस्तथा । शारीरोबहुभिर्भेदैर्भिद्यतेश्रूयतांचसः २ शिरोरोग प्रतिश्यायज्वरशूलभगंदरैः । गुल्मार्शश्वासश्वयथुच्छर्द्यादिभिरनेकधा ३ तथाक्षिरोगातीसारकुष्टांगामयसंज्ञकैः । भिद्यतेदेहजस्तापोमानसंश्रो तुमर्हसि ४ कामक्रोधभयद्वेषलोभमोहविषादजः । शोकासूयावमानेर्ष्यामात्सर्यादिभवस्तथा ५ मानसोपिद्विजश्रेष्ठतापोभवतिनैकधा । इत्येवमादिभिर्भेदैस्तापोह्याध्यात्मिकःस्मृतः ६ मृगपक्षिमनुष्याद्यैःपिशाचोरगराक्षसैः । सरीसृपाद्यैश्चनृणांजन्यतेचाधिभौतिकः ७ शीतोष्ण

मेमोक्षसामग्रीवैराग्याद्युपपत्तये त्रिविधादुःखधारोक्तातथाविद्येपरापरे १ वैराग्यार्थंत्रिविधंतापंप्रतिपादयिष्यन्नात्यंतिकप्रलयाख्यंमोक्षंप्रतिवैराग्यादेर्हेतुत्वमाह आध्यात्मिकादीति १ त्रिविधस्तापएवावांतरभेदाद्बहुधेत्याह आध्यात्मिकेत्यादिनाभिद्यतेमुनिसत्तमइत्यंतेन २ प्रतिश्यायःपीनसःश्वयथुःशोथः ३ अंगामयोवातजलोदरादिः ४ कामःस्त्र्यादिविषयेच्छा द्वे षःअप्रीतिः तत्कृताप्रहाणेच्छेतियावत् लोभोयथाविषयार्थलिप्सा मोहोवैचित्त्यम् विषादःसत्त्वहानिः शोकोनुशोचनम् असूयागुणेपिदोषारोपणम् ईर्ष्याक्षमाराहित्यम् मात्सर्यंपरो त्कर्षासहनम् ५ आत्मानंकार्यकारणसंघातमधिकृत्यभवतीत्याध्यात्मिकः ६ भूतानिनिमित्तीकृत्यभवतीत्याधिभौतिकस्तमाह मृगेति ७ एवमाधिदैविकंयथा शीतोष्णेत्यादि तापोदुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खम् ८ तच्चाध्यात्मिकादित्रिधाभिन्नमपिगर्भाद्यवस्थाभेदैरवांतरैःसहस्रधाभिन्नंभवतीतिविवृणोति गर्भेत्यादिनासंसारतापार्केत्यतःप्राक्तनेनग्रन्थेन जन्मेतिजन्मानन्तरभाविनामुपलक्षण म् ९ तत्रगर्भदुःखमाह सुकुमारेतिचतुर्भिः उल्बंगर्भवेष्टनम् भग्नपृष्ठादियस्यसः १० मातुर्भोजनैर्भुक्तैरतितापिभिर्वर्धमानावेदनायस्यसः आत्मनोंगानांप्रसारणादावसमर्थः ११, १२ १३ जन्मदुःखमाह जायमानइतिद्वाभ्याम् पुरीषादिभिराविलमाननंयस्यसः प्राजापत्येनप्रजापतिनियुक्तेनगर्भसंकोचकेन तस्माज्ज्यायान्सन्गर्भःकनीयांसंसन्तंयोनिंनहिनस्तिब्रह्मणाहि

वातवर्षांबुवैद्युतादिसमुद्भवः । तापोद्विजवरश्रेष्ठकथ्यतेचाधिदैविकः ८ गर्भजन्मजराव्याधिमृत्युजंनारकंतथा । दुःखंसहस्रशोभेदैर्भिद्यतेमुनिस त्तम ९ सुकुमारतनुर्गर्भेजंतुर्बहुमलावृते । उल्बसंवेष्टितोभुग्नपृष्ठग्रीवास्थिसंहतिः १० अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः । अतितापिभि रत्यर्थंवर्धमानातिवेदनः ११ प्रसारणाकुंचनादौनांगानांप्रभुरात्मनः । शकृन्मूत्रमहापंकशायीसर्वत्रपीडितः १२ निरुच्छ्वासःसचैतन्यःस्मरञ्ज न्मशतान्यथ । आस्तेगर्भेतिदुःखेननिजकर्मनिबंधनः १३ जायमानःपुरीषासृङ्मूत्रशुक्राविलाननः । प्राजापत्येनवातेनपीड्यमानास्थिबंधनः १४ अधोमुखोवैक्रियतेप्रबलैःसूतिमारुतैः । क्लेशैर्निष्क्रांतिमाप्नोतिजठरान्मातुरातुरः १५ मूर्छामवाप्यमहतींसंस्पृष्टोबाह्यवायुना । विज्ञानभ्रं शमाप्नोतिजातश्चमुनिसत्तम १६ कंटकैरिवतुन्नांगःक्रकचैरिवदारितः । पूतिव्रणान्निपतितोधरण्यांकृमिकोयथा १७ कंडूयनेपिचाशक्तःपरिवर्तेप्य नीश्वरः । स्नानपानादिकाहारमथाप्नोतिपरेच्छया १८ अशुचिप्रस्तरेसूक्ष्मकीटदंशादिभिस्तथा । भक्ष्यमाणोपिनैवैषांसमर्थोविनिवारणे २९ ज न्मदुःखान्यनेकानिजन्मनोनंतराणिच । बालभावेयदाप्नोतिआधिभौतादिकानिच २० अज्ञानतमसाच्छन्नोमूढांतःकरणोनरः । नजानातिकुतःको हंकाहंगंताकिमात्मकः २१ केनबंधेनबद्धोहंकारणंकिमकारणम् । किंकार्यंकिमकार्यंवाकिंवाच्यंकिंचनोच्यते २२ कोधर्मःकश्चवैधर्मःकस्मिन्वर्तेथ वाकथम् । किंकर्तव्यमकर्तव्यंकिंवाकिंगुणदोषवत् २३ एवंपशुसमैर्मूढैरज्ञानप्रभवंमहत् । अवाप्यतेनरैर्दुःखंशिश्नोदरपरायणैः २४ अज्ञानंता मसोभावःकार्यारंभाप्रवृत्तयः । अज्ञानिनांप्रवर्ततेकर्मलोपास्तथाद्विज २५ नरकंकर्मणोलोपात्फलमाहुर्महर्षयः । तस्मादज्ञानिनांदुःखमिहचामु

संकृतइतिश्रुतेः १४ सूतिमारुतैःप्रसूत्यर्थंगर्भप्रेरकैर्वायुभिः १५जन्मानंतरंदुःखमाह मूर्छामितिचतुर्भिः१६तुन्नांगःव्यथितगात्रःक्रकचैर्विदारणपत्रैः पूतिव्रणाद्दुर्गंधिव्रणतुल्ययोनेश्च १७ १८ अशुचिप्रस्तरेअमेध्ययुक्तशय्यायाम् १९२० यौवनदुःखान्याह आज्ञानेतिषड्भिः अज्ञानमिहकामभोगाद्यभिनिवेशः तेनतमसाछन्नःअंधीभूतःकुतइत्यादिनजानाति २१ कारणं अस्मादिदंभविष्यतीतिगृहीतहेतुभावम् अकारणंतद्विपरीतम् कार्याकार्येलौकिके २२ कर्तव्याकर्तव्येवैदिके किंगुणदोषवत्किंगुणवत्किंदोषवदित्यर्थः २३ उपसंहरति एवमिति२४य तोऽज्ञानंतामसोभावस्ततोविहितेष्वपिकार्यारंभेषुअप्रवृत्तयःस्युः ततःकर्मलोपाःप्रवर्तते २५ ततश्चकर्मलोपान्नरकप्राप्तिःफलमिति इत्थमिहलोकेअमुत्रपरलोकेचोत्तममत्यंतंदुःखम् २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्धकदुःखान्याह जरेतिदशभिः वलीलम्बमानत्वक् शिरारक्तवाहिनीनाडीसैवास्थिबन्धनंस्नायुः २७ दूरेदूरस्थेर्थेप्रनष्टंकुन्ठंनयनंयस्यसः व्योम्निचक्षुर्गोलकाकाशेअंतर्गतोनिमग्नेतारकेक नीनिकेयस्यसः २८ नतापृष्ठास्थिसंहतिर्यस्य कुब्जीभूतइत्यर्थः २९ कृच्छ्रेणचंक्रमादिषुचेष्टितंयस्यसः ३० अनायत्तैरस्वाधीनैःकरणैरिंद्रियैः ३१ ३२ ३३ निर्विण्णाःसोद्वेगाःअशेषबां

त्रचोत्तमम् २६जराजर्जरदेहश्चशिथिलावयवःपुमान्। विचलच्छीर्णदशनोवलिस्नायुशिरावृतः२७दूरप्रनष्टनयनोव्योमांतर्गततारकः। नासाविवर निर्यातरोमपुंजश्चलद्वपुः२८प्रकटीभूतसर्वास्थिर्नतपृष्ठास्थिसंहतिः। उत्सन्नजठराग्निवादल्पाहारोल्पचेष्टितः२९ कृच्छ्राच्चंक्रमणोत्थानशयनासनचेष्टितः। मंदीभवच्छ्रोत्रनेत्रःस्रवल्लालाविलाननः ३० अनायत्तैःसमस्तैश्चकरणैर्मरणोन्मुखः। तत्क्षणेप्यनुभूतानामस्मर्ताखिलकर्मणाम् ३१ सकृदुच्चारितेवाक्येसमुद्भूतमहाश्रयः। श्वासकासमहायाससमुद्भूतप्रजागरः ३२ अन्येनोत्थाप्यतेन्येनतथासंवेश्यतेजरी। भृत्यात्मपुत्रदाराणामवमानपरावृतः ३३ प्रक्षीणाखिलशौचश्चविहाराहारसस्पृहः। हास्यःपरिजनस्यापिनिर्विण्णाशेषबांधवः ३४ अनुभूतमिवान्यस्मिञ्जन्मन्यात्मविचेष्टितम्। संस्मरन्यौवनेदीर्घंनिःश्वसित्यतितापितः ३५ एवमादीनिदुःखानिजरायामनुभूयवै। मरणेयानिदुःखानिप्राप्नोतिशृणुतान्यपि ३६ श्लथद्ग्रीवांघ्रिहस्तोथव्याप्तोवेपथुनानरः। मुहुर्ग्लानीपरवशोमुहुर्ज्वानलवान्वितः ३७ हिरण्यधान्यतनयभार्याभृत्यगृहादिषु। एतेकथंभविष्यंतीत्यर्तावममताकुलः ३८ मर्मभिद्भिर्महारोगैःक्रकचैरिवदारुणैः। शरैरिवांतकस्योग्रैश्छिद्यमानात्मबंधनः ३९ परिवर्तमानताराक्षिर्हस्तपादं मुहुःक्षिपन्। संशुष्यमाणताल्वोष्ठपुटोघुरघुरायते ४० निरुद्धकंठोदोषौघैरुदानश्वासपीडितः। तापेनमहताव्याप्तस्तृषार्तश्चतथाक्षुधा ४१ क्लेशादुत्क्रांतिमाप्नोतियाम्यकिंकरपीडितः। ततश्चयातनादेहंक्लेशेनप्रतिपद्यते ४२ एतान्यन्यानिचोग्राणिदुःखानिमरणान्नृणाम्। शृणुष्वनरकेयानिप्राप्यंतेपुरुषैर्मृतैः ४३ याम्यकिंकरपाशाद्यैर्ग्रहणंदंडताडनम्। यमस्यदर्शनंचोग्रमुग्रमार्गविलोकनम् ४४ करंभवालुकावाह्नियंत्रशस्त्रातिभीषणे। प्रत्येकंनरकेयाश्चयातनाद्विजदुःसहाः ४५ क्रकचैःपाट्यमानानांमूषायामपिधम्यताम्। कुठारैःकृंत्यमानानांभूमौचापिनिखन्यताम् ४६ शूलेष्वारोप्यमाणानांव्याघ्रवक्त्रेप्रवेश्यताम्। गृध्रैःसंभक्ष्यमाणानांद्वीपिभिश्चोपभुज्यताम् ४७ क्वाथ्यतांतैलमध्येचक्लिद्यतांक्षारकर्दमे। उच्चा

धवायस्मात्सः ३४ यौवनेयदात्मनोविविधंचेष्टितंतदन्यजन्मानुभूतमिवसंस्मरन्दीर्घमुच्छ्वासंमुञ्चति ३५ ३६ मरणदुःखान्याहश्लथग्रीवेतिसार्द्धैःषड्भिःवेपथुनाकम्पेन३७३८३९परिवर्तमानाविपरीतातारकनीनिकायत्रतादृगक्षियस्यसः अदंततामावश्छांदसः४० दोषौघैःश्लेष्मादिसंघैर्निरुद्धकण्ठःसन्घुरघुरइत्येवंशब्दंकुरुतेइतिपूर्वेणान्वयः उदानऊर्ध्वगोवायुस्तद्रूपश्वासेनपीडितः ४१ यातनार्थमम्पंदेहम् ४२ नरकदुःखान्याह शृणुष्वेतिषड्भिः ४३ याम्यकिंकरैःपाशादिभिर्ग्रहणंबन्धनम्४४ करंभवालुकास्तप्तवालुकाः नरकेयाश्चयातनास्ताश्चप्राप्यंतइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिपूर्वेणान्वयः ४५ धम्यतांखन्यतामित्यादिपरस्मैपदमार्षम् कृत्यमानानांच्छिद्यमानानाम् ४६ द्वीपिभिर्व्याघ्रैः ४७ ४८ पापमेवहेतुस्तद्भवानि ४९ स्वर्गेपिदुःखमित्याह नकेवलमिति निर्वृतिर्निःशेषंसुखंनास्तिकिंतुदुःखमेवास्तीत्यर्थः दृष्टवदानुश्रविकःसह्यविशुद्धिक्षयातिशययुक्तइतिसांख्योक्तेः ५० पूर्वोक्तदुःखानांप्रवाहरूपतामतिवैराग्यार्थमाह पुनश्चेतिषड्भिः५१५२ नानाविधैरत्रानुक्तैरपिदुःखैःप्लुतोव्याप्तआस्ते सूत्रकारणानाम्पक्ष्मणामोघैःसूत्रावयवसमूहैःकार्पासबीजंयथाव्याप्तंतद्वत् ५३ उत्पत्तौद्रव्योपार्जने ५४ यद्यत्प्रीतिकरंतत्तद्देवतारतम्येनदुःख वृक्षस्यबीजंदुःखपरंपराजनकंतद्भावमुपगच्छति ५५ ननुसुखमपिक्रियतेतत्राह कलत्रादिकैरसुखंदुःखंभूरियथाक्रियतेनतथासुखंक्रियते धनंगवादि ५६ एवंदुःखानुसंधानेनविवेकवैराग्या दिनामुमुक्षैवपुंसोयुक्तेत्याह इतीतिसार्धैस्त्रिभिः ५७ यतस्त्रिविधस्यदुखसमूहस्यजन्मादिस्थानेषुप्रकर्षेणभविष्यतोभगवत्प्राप्तिरेवभेषजंमताशास्त्रेषुसम्मता आल्हादःप्रमोदःतद्युक्तंसुखभा

न्निपात्यमानानांक्षिप्यतांक्षेप्ययंत्रकैः ४८ नरकेयानिदुःखानिपापहेतुभवानिवै । प्राप्यंतेनारकैर्विप्रतेषांसंख्यानविद्यते ४९ नकेवलंद्विजश्रे ष्ठनरकेदुःखपद्धतिः । स्वर्गेपिपातभीतस्यक्षयिष्णोर्नास्तिनिर्वृतिः ५० पुनश्चगर्भेभवतिजायतेवपुनर्नरः । गर्भेविलीयतेभूयोजायमानोस्तमेति वा ५१ जातमात्रश्चम्रियतेबालभावेथयौवने । मध्यमंवावयःप्राप्यवार्धकेवाध्रुवामृतिः ५२ यावज्जीवतितावच्चदुःखैर्नानाविधैःप्लुतः । तंतु कारणपक्ष्मौघैरास्तेकार्पासबीजवत् ५३ द्रव्यनाशेतथोत्पत्तौपालनेचतथानृणाम् । भवंत्यनेकदुःखानितथैवेष्टविपत्तिषु ५४ यद्यत्प्रीतिकरंपुं सोवस्तुमैत्रेयजायते । तदेवदुःखवृक्षस्यबीजत्वमुपगच्छति ५५ कलत्रपुत्रमित्रार्थगृहक्षेत्रधनादिकैः । क्रियतेनतथाभूरिसुखंपुंसांयथासुखम् ५६ इतिसंसारदुःखार्कतापतापितचेतसाम् । विमुक्तिपादपच्छायामृतेकुत्रसुखंनृणाम् ५७ तदस्यत्रिविधस्यापिदुःखजातस्यपंडितैः । गर्भजन्म जराद्येषुस्थानेषुप्रभविष्यतः ५८ निरस्तातिशयाह्लादसुखभावैकलक्षणा । भेषजंभगवत्प्राप्तिरेकांतात्यंतिकीमता ५९ तस्मात्तत्प्राप्तयेयत्नःकर्त व्यःपंडितैर्नरैः।तत्प्राप्तिहेतुज्ञानंचकर्मचोक्तंमहामुने ६० आगमोत्थंविवेकाच्चद्विधाज्ञानंतथोच्यते।शब्दब्रह्मागममयंपरंब्रह्मविवेकजम् ६१ अंधंतम इवाज्ञानंदीपवच्चेंद्रियोद्भवम्। यथासूर्यस्तथाज्ञानंयद्विप्रर्षेविवेकजम्६२मनुरप्याहवेदार्थंस्मृत्वायन्मुनिसत्तम।तदेतच्छ्रूयतामत्रसंबंधेगदतोमम ६३

वःसुखत्वंसुखसामान्यमेवएकंलक्षणंस्वरूपंयस्याःसाकिंभूताप्राप्तिरात्यंतिकी पुनर्वियोगाभावादेकान्ता किंचित्साधनवैगुण्येपियागादिफलवत्नसाधनव्यभिचारिणीत्यर्थः किंचएकैवेतिपा ठेभोक्तृभोग्यभावहीनाब्रह्मात्मैक्यलक्षणेति ५८ ५९ कथंसाभवतीत्यतआह तस्मादिति यत्नस्यसाधनभावतिष्ठत्वेनसाधनंतावदाह तत्प्राप्तीति कर्मणःसाधनत्वमपिसाक्षादितिप्राचीनाः अपरेतुसत्त्वशुद्धिद्वारापरंपरयेतिवदंति ६० तत्रज्ञानंद्विविधमित्याह आगमेति तदेवविवृणोति शब्देति शब्दाद्वेदवाक्याज्जायमानंधर्मादिविषयकंज्ञानंशब्दब्रह्मतदागममयमागमज न्यंज्ञानमित्युच्यते परंब्रह्म प्रकृतेःपरंब्रह्मेतिप्रकृतिपुरुषविवेकाज्जायमानंतत्त्वंपदार्थविवेकजंवाज्ञानमित्यर्थः विषयिविषयाभेदोपचारादेवयुक्तम् ६१ तत्रविवेकज्ञानस्यसाक्षान्मुक्तिहेतु त्वमुपपादयति अंधंतमइति अज्ञानंसंसारबीजभूतंअंधंतमइवप्रकाशनाश्यम् तत्रप्रकाशतारतम्यनतमोनाशतोरतम्यंदर्शयन्नज्ञानतत्कार्यनाशतारतम्यंप्रतिपादयति दीपवच्चेति अयंभावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहिसंसारबीजभूतंकिंचिद्वस्त्वस्तिकिंत्वज्ञानमेवतस्यचतत्त्वज्ञानेननाशेमुक्तिःसुलभैवेति ६२ उक्तलक्षणेज्ञानद्वैधेमनुवाक्यसंमतिमाह मनुरिति अत्रसंबंधेस्मिन्प्रसंगे ६३ परंब्रह्मगच्छति श
ब्दब्रह्मणिऋग्वेदादिवाच्यधर्मादौनिष्णातः विचारेणकाम्यकर्मविहायनिष्कामकर्मनिष्ठः ततश्चशुद्धांतःकरणःसन्विवेकज्ञानेनपरंब्रह्मप्राप्नोतीत्यर्थः विविदिषंतियज्ञेनेति कषायपक्तिःकर्माणि
ज्ञानंतुपरमागतिः कषायेकर्मभिःपक्केततोज्ञानंप्रवर्तते विद्यांचाविद्यांचयतस्तद्वेदोभयंसह अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुत इत्यादिश्रुतिभ्यः ६४ तत्रैवश्रुतिसंमतिमप्याह द्वेवि
द्येइति विद्याशब्देनतद्धेतुब्रह्मकर्मविषयौवेदभागावुच्येते परयाउपनिषद्रूपयाऋग्वेदादिशब्देनाजरप्रतिपादकवेदभागादितरःकर्मभागउच्यतेसाअपरा ६५ अथपराख्ययायदक्षरमधि
गम्यतेतदृश्यमग्राह्यमित्याद्यथर्वश्रुत्युक्तंपरांवेद्याविषयमक्षराख्यंपरंतत्त्वमाह यत्तदितित्रिभिः यद्वा परविद्यांतर्गतोपासनाकांडरहस्यभगवदुपासनांवक्तुंतद्विषयमाह यत्तदिति ६६ विभुं
प्रभुम् पुंस्त्वमार्षम् एवंभूतयोनिमिति विभ्वितिपाठोवा सर्वगतमपरिच्छिन्नम् व्यापिसर्वकार्यानुगतम् अव्याप्यंकेनापिनव्याप्यम् यतःसर्वंजायते ६७ ६८ तत्परंब्रह्मैवस्वेच्छयाविष्कृ

द्वेब्रह्मणीवेदितव्येशब्दब्रह्मपरंचयत् । शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति ६४ द्वेविद्येवेदितव्येवैइतिचाथर्वणीश्रुतिः । परयात्वक्षरप्राप्तिर्ऋग्वे
दादिमयापरा ६५ यत्तदव्यक्तमजरमचिंत्यमजमव्ययम् । अनिर्देश्यमरूपंचपाणिपादाद्यसंयुतम् ६६ विभुंसर्वगतंनित्यंभूतयोनिमकारणम् ।
व्याप्यव्याप्यंयतःसर्वंतंवैपश्यंतिसूरयः ६७ तद्ब्रह्मतत्परंधामतद्ध्येयंमोक्षकांक्षिणाम् । श्रुतिवाक्योदितंसूक्ष्मंतद्विष्णोःपरमंपदम् ६८ तदेवभ
गवद्वाक्यंस्वरूपंपरमात्मनः । वाचकोभगवच्छब्दस्तस्यस्यादक्षयात्मनः६९ एवंनिगदितार्थस्यसतत्त्वंतस्यतत्त्वतः । ज्ञायतेयेनतज्ज्ञानंपरमन्यत्र
यीमयम् ७० अशब्दगोचरस्यापितस्यवैब्रह्मणोद्विज । पूजायांभगवच्छब्दःक्रियतेह्यौपचारिकः ७१ शुद्धेमहाविभूत्याख्येपरेब्रह्मणिवर्तते । मैत्रे
यभगवच्छब्दःसर्वकारणकारणे ७२ संभर्तेतितथाभर्ताभकारोर्थद्वयान्वितः । नेतागमयितास्रष्टागकारार्थस्तथामुने ७३ ऐश्वर्यस्यसमग्रस्यवी
र्यस्ययशसःश्रियः ।ज्ञानवैराग्ययोश्चैवषण्णांभगइतींगना ७४ वसंतितत्रभूतानिभूतात्मन्यखिलात्मनि ।सर्वभूतेष्वशेषेषुवकारार्थस्ततोव्ययः ७५

तषाड्गुण्यात्मकपरमेश्वराख्यंभगवच्छब्दवाच्यंसद्वादशाक्षरादिपरविद्योपासनयाभक्तैःसुलभदर्शनमित्याह तदेवेति भगवद्वाच्यंद्वादशाक्षरादेर्वाच्यम् ६९ ईदृग्विषयंविज्ञानंपरविद्येत्याह
एवमिति एवंद्वादशाक्षरादिनानिगदितार्थस्यभगवतःसतत्त्वंनिजरूपंयेनद्वादशाक्षरजन्येनज्ञानेनतत्त्वतोयथावज्ज्ञायतेतत्परंपरविद्या त्रयीमयंतुधर्मविषयमन्यदपरंअपरविद्येत्यर्थः ७० न
न्वीश्वरोपिब्रह्मैवचेत्कथंतर्हिभगवच्छब्दवाच्यत्वमानिर्देश्यत्वादित्याशंक्यकैमुतिकन्यायेनाह अशब्देतिद्वाभ्याम् अशब्दगोचरस्यभगवच्छब्दाविषयस्यपूजायांनिमित्तभूतायांआविष्कृत
षाड्गुण्येनोपाधिनाअत्रापियदिभगवच्छब्दःक्रियतेप्रयुज्यतेतत्रापिशुद्धांशस्यसत्त्वेनउपचारतःलक्षणयैवप्रवर्तते किंवाच्यंशुद्धेऽसंगेमहाविभूत्याख्येऽचिंत्यैश्वर्येपरब्रह्मणिवर्ततइति तटस्थ
स्थैवषाड्गुण्यादेर्मायिकस्यभगवच्छब्दप्रवृत्तिनिमित्तत्वमितिभावः ७१ ७२ अक्षरार्थनिरुक्त्यापिपरमैश्वर्यवाचकत्वमित्याह संभर्तेतिचतुर्भिः संभर्तापोषकःभर्ताधारयिता अर्थद्वयान्वि
तःअर्थद्वयवाचकः ततोज्ञानकर्मफलयोःप्रापयितागमयिताप्रलयसमयेकारणंप्रतिकार्याणांसंगमयितास्रष्टापुनरपितेषामुद्गमयितासर्वकर्ताइतिगकारार्थः ७३ इदानीमक्षरद्वयात्मकस्यप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दस्यार्थमाह ऐश्वर्यस्येति ऐश्वर्यस्यसर्वशक्तिनियंतृत्वस्यशक्तिप्रेरणमीशितेतिशुकोक्तेः इंगनासंज्ञा ७४ वकारस्यार्थमाह वसंतीति यत्राधिष्ठानेभूतानिवसंतिसचभूतेषुवसतीतिवका रार्थः अव्ययःपरमात्माअव्यभिचरितइतिवा ७५ एवमेषशब्दोवासुदेवस्यवाचकःनान्यस्य तथाभगवच्छब्दमध्येवर्तमानाभगवाःप्रत्येकमक्षरैकसाम्येनानिरुक्त्यातंतमर्थंप्रतिपादयंतःषा ड्गुण्यवत्त्वंबोधयंतीत्यर्थः ७६ तदेवंपरमेश्वरेनिरतिशयैश्वर्यादियुक्तेमुख्योयंशब्दःअन्यत्रदेवादावुपचारेणवर्ततइत्याह तत्रेति तत्रपरमेश्वरोयंचभगवानितिशब्दोनोपचारेणवर्ततेकिंतुमुख्य वृत्त्यैव कथंभूतः पूज्यस्यभगवत्पदार्थस्योक्तौयापरिभाषासंकेतरूपसंबंधग्रहस्तत्समन्वितः अन्यत्रउपचारस्तत्रसंकेताभावादित्यर्थः७७उपचारबीजमाह उत्पत्तिमिति भूतानांप्राणिनांआग तिंपरलोकान्मनुष्यादियोनिंप्रत्यागमनम् गतिंचेहलोकात्परलोकंप्रतिगमनंविद्यांसंसारनिवर्तिकां अविद्यांबंधहेतुभूताम् उत्पत्तिलयौभवनाभवनेभकारार्थौ गत्यागतीगकारार्थौ विद्याविद्येव कारार्थौ योजानातिसोपिजनोक्षरसाम्येनानिरुक्तार्थरूपद्वयगुणयोगाद्गौणवृत्त्याभगवानित्युच्यते ७८ भगवच्छब्दवाच्यषाड्गुण्यंप्रकारांतरेणाह ज्ञानेति एतदर्थस्यान्यत्रसंभवंवारयति अशे

एवमेषमहाशब्दोभगवानितिसत्तम । परमब्रह्मरूपस्यवासुदेवस्यनान्यगः ७६ तत्रपूज्यपदार्थोक्तिपरिभाषासमन्वितः । शब्दोयंनोपचारेणअन्य त्रह्युपचारतः ७७ उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिम् । वेत्तिविद्यामविद्यांचसवाच्योभगवानिति ७८ ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगव च्छब्दवाच्यानिविनाहेयैर्गुणादिभिः ७९ सर्वाणितत्रभूतानिवसंतिपरमात्मनि । सभूतेषुचसर्वात्मावासुदेवस्तथास्मृतः ८० खांडिक्यजनकायाह पृष्टःकेशिध्वजःपुरा । नामव्याख्यामनंतस्यवासुदेवस्यतत्त्वतः ८१ भूतेषुवसतेसोंतर्वसंत्यत्रचतानियत् । धाताविधाताजगतांवासुदेवस्ततःप्रभुः८२ ससर्वभूतप्रकृतिंविकारंगुणादिदोषांश्चमुनेव्यतीतः । अतीतसर्वावरणोखिलात्मातेनास्तृतंयद्भुवनांतराले ८३ समस्तकल्याणगुणात्मकोहिस्वशक्ति लेशावृतभूतसर्गः । इच्छागृहीताभिमतोरुदेहःसंसाधिताशेषजगद्धितोसौ ८४ तेजोबलैश्वर्यमहावरोधःसवीर्यशक्त्यादिगुणैकराशिः । परःपराणांसक लानयत्रक्लेशादयःसंतिपरावरेशे ८५ सईश्वरोव्यष्टिसमष्टिरूपोव्यक्तस्वरूपःप्रकटस्वरूपः । सर्वेश्वरःसर्वविशेषवेत्तासमस्तशक्तिःपरमेश्वरात्मा ८६

षतोहेयैरविद्यातत्कार्यकर्मतत्फलैर्गुणादिभिश्चविनेति ७९ द्वादशाक्षरांतर्गतभगवच्छब्दार्थमुक्त्वावासुदेवशब्दार्थमाह सर्वाणीति वसनाद्वासुः साधनात्साधुरितिपदवत् द्योतनाच्चदेवः ततःकर्मधारयःतदुक्तंवसनाद्देवनाच्चैववासुदेवंततोविदुरिति ८० जनकादयोपिभगवन्नामार्थालोचननिष्ठयैवब्रह्मज्ञानंप्राप्ताइतिदर्शयन्नाह खांडिक्येतिषड्भिः ८१ भूतेषुसोंतरितिवासुशब्दो व्याख्यातः विश्वधातृत्वाविधातृत्वरूपक्रीडात्मकस्यदिवधात्वर्थस्यकथनाद्देवशब्दोपिव्याख्यातइतिज्ञेयम् ८२ द्वादशाक्षरार्थमनुसंधानसौकर्यार्थंसंक्षिप्याह ससर्वेतिपंचभिः प्रकृतिंप्रधानाद्यष्टकं विकारंमहाभूतादिगुणाः सत्त्वादयः आदिशब्दात्सुखादयः दोषाःक्लेशास्तान् भुवनांतरालेयदस्तितत्सर्वंतेनास्तृतंछन्नंव्याप्तमितियावत् ८३ ईश्वरतामाह समस्तेतित्रिभिः स्वशक्तिलेशःसंस कर्षणोहंकारस्तेनावृतः कारणत्वेनव्याप्तोभूतसर्गोयेनसःइच्छागृहीतेतिअवतारोक्तिः असौषड्गुणः ८४ कल्याणगुणानाह तेजोबलेतितत्तद्रूपइत्यर्थः ८५ व्यष्टिःसंकर्षणादिःसमष्टिर्वासुदे वः अव्यक्तेतिच्छेदः अत्रद्वादशाक्षरार्थोयथायथमनुसंधेयः ८६ प्रकृतमनुसंहरति ज्ञायतइति येनसज्ञायतेपरोक्षवृत्त्याज्ञायते संदृश्यतेसाक्षात्क्रियते अवगम्यतेअविद्यातत्कार्यनिवृत्त्याप्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्यतेतज्ज्ञानंपराविद्या अन्यदज्ञानंअविद्यांतर्वर्तिनीअपराविद्येत्यर्थः अतोयद्भगवच्छब्दनिरुक्तार्थैकचिंतया प्राप्यतेतत्पदंविष्णोस्तत्रोपेक्षाकथंनृणाम् ८७ इतिश्रीवैष्णवाकूतचंद्रिकायांषष्ठेंशे पंचमोध्यायः ५ षष्ठेस्वाध्याययोगाभ्यांदर्शनंस्याद्यथाविभोः खांडिक्यकेशिध्वजयोःकथारंभस्तथोच्यते पूर्वाध्यायांतेभगवद्दर्शनंयेनसापराविद्येत्युक्तम् तच्चमनननिदिध्यासनसह कृतेनश्रवणेनभवतीतिप्रसिद्धमुपायंविहायउपायांतरमाह स्वाध्यायेति स्वाध्यायःप्रणवजपः संयमोध्यानधारणासमाधिरूपोयोगः ताभ्यांसदृश्यतेतस्यप्राप्तावपितदेवद्वयंकारणम् अतएवत द्धेतुद्वयंतद्दर्शनद्वारातत्प्राप्तिहेतुत्वात्तद्ब्रह्मेत्यभिधीयते १ तदनुष्ठानप्रकारमाह स्वाध्यायादिति संपत्त्यासमृद्ध्यातथाचयोगशास्त्रम् जपाच्छ्रांतःपुनर्ध्यायेद्ध्यानाच्छ्रांतःपुनर्जपेत् जपध्यानानियो

सज्ञायतेयेनतदस्तदोषंशुद्धंपरंनिर्मलमेकरूपम्।संदृश्यतेवाप्यवगम्यतेवातज्ज्ञानमेवाहततोन्यरूपम् ८७इतिश्रीविष्णुपुराणेषष्ठेअंशेपंचमोध्यायः५ । । पराशरउवाच । । स्वाध्यायसंयमाभ्यांसदृश्यतेपुरुषोत्तमः । तत्प्राप्तिकारणंब्रह्मतदेतदितिपठ्यते १ स्वाध्याययोगमासीतयोगात्स्वा ध्यायमाचरेत् । स्वाध्याययोगसंपत्त्यापरमात्माप्रकाशते २ तदीक्षणायस्वाध्यायश्चक्षुर्योगस्तथापरः । नमांसचक्षुषाद्रष्टुंब्रह्मभूतःसशक्यते ३ । । मैत्रेयउवाच । । भगवंस्तमहंयोगंज्ञातुमिच्छामितंवद । ज्ञातेयत्राखिलाधारंपश्येयंपरमेश्वरम् ४ । । पराशरउवाच । । के शिध्वजोयथाप्राहखांडिक्यायमहामुने । जनकाययथायोगंतथाहंकथयामिते ५ । । मैत्रेयउवाच । । खांडिक्यःकोभवद्ब्रह्मन्कोवाकेशि ध्वजोभवत् । कथंतयोश्चसंवादोयोगसंबंधवानभूत् ६ । । पराशरउवाच । । धर्मध्वजोवैजनकस्तस्यपुत्रोमितध्वजः । ऋतध्वजश्चनामासी त्सदाध्यात्मरतिर्नृपः७ऋतध्वजस्यपुत्रोभूद्धन्यःकेशिध्वजोद्विज । पुत्रोमितध्वजस्यापिखांडिक्यजनकोद्विज८कर्ममार्गेतिखांडिक्यःपृथिव्यामभवत्कृ ती । केशिध्वजोप्यतीवासीदात्मविद्याविशारदः ९ तावुभावपिचैवास्तांविजिगीषूपरस्परम् । केशिध्वजेनखांडिक्यःस्वराज्यादवरोपितः १० पुरोधसामंत्रिभिश्चसमवेतोल्पसाधनः । राज्यान्निराकृतःसोथदुर्गारण्यचरोभवत् ११ इयाजसोपिसुबहून्यज्ञान्ज्ञानव्यपाश्रयः । ब्रह्मविद्यामधि ष्ठायतर्तुंमृत्युमविद्यया १२ एकदावर्तमानस्ययागेयागविदांवरः । तस्यधेनुंजघानोग्रःशार्दूलोविजनेवने १३ ततोराजाहतांज्ञात्वाधेनुंव्या

गेनपश्येदात्मानमात्मनीति २ ननुचक्षुरादिजन्यज्ञानेप्यात्मनएवस्फुरणात्कथमिदमेवद्वयंतत्प्रकाशकमित्युच्यतइतितत्राहतदीक्षणायेतिएतद्द्वयंचक्षुःप्रकाशकंनमांसमयचक्षुरादिभिःपार पूर्णब्रह्मभूतोद्रष्टुंशक्यतइत्यर्थः ३ ज्ञातेज्ञात्वानुष्ठितेसतीत्यर्थः ४ पूर्वाध्यायांतेउपाक्षिप्तमेवयोगनिरूपणार्थमितिहासमनुवर्तयति केशिध्वजइत्यादिनायावदध्यायसमाप्ति ५ योगसंबं धवान्योगविषयकः ६ ७ ८ अतिअतिशयितःकृती ९ १० अल्पसाधनोल्पपरिवारः ११ सोपिकेशिध्वजःज्ञानव्यपाश्रयःब्रह्मविद्यामधिष्ठायकर्तृकर्मादिकंसर्वंब्रह्मैवेतिमतिमवलंब्ययज्ञा न्इयाजचकार किमर्थंअविद्ययाकर्मलक्षणयामृत्युंकामादिकषायशेषंतर्तुंक्षपयितुम् १२ तस्यधेनुमित्यत्रधर्मदोग्ध्रीमितिपाठेधर्मःप्रवर्ग्योहविर्विशेषस्तदर्थंपयोदोग्ध्रीं शार्दूलोव्याघ्रः १३ कि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्रप्रायश्चित्तंविधीयतइतिपप्रच्छ १४ तथैवतेनोक्तःकशेरुरपिशुनकंपृच्छेतिप्राहेत्यन्वयः १५ १६ कशेर्वादिर्नवेत्ति किंतुत्वच्छत्रुरेववेत्तीत्यन्वयः १७ प्राप्तएवेति धर्मार्थंयतमानस्तुअंत राचेद्विपद्यते सधर्मफलमाप्नोतीत्यादिवचनात् १८ अविकलोयागोभविष्यतीत्याहेतिपूर्वेणान्वयः १९ २० २१ कृष्णाजिनकवचबंधेतस्याभिप्रायंवर्णयति कृष्णाजिनधरेमयिखांडिक्यो

९

घ्रेणऋत्विजः । प्रायश्चित्तंसपप्रच्छकिमत्रेतिविधीयते १४ तेचोचुर्नवयंविद्मःकशेरुःपृच्छ्यतामिति । कशेरुरपितेनोक्तस्तथैवप्राहभार्गवम् १५ शुनकंपृच्छराजेंद्रनाहंवेद्मिसवेत्स्यति । सगत्वातमपृच्छच्चसोप्याहशृणुयान्मुने १६ नकशेरुर्नचैवाहंनचान्यःसांप्रतंभुवि । वेत्त्येकएवत्वच्छ त्रुःखांडिक्योयोजितस्त्वया १७ सचाहतंप्रयाम्येषप्रष्टुमात्मरिपुंमुने । प्राप्तएवमयायज्ञोयदिमांसहनिष्यति १८ प्रायश्चित्तंसचेत्पृष्टोवदि ष्यतिरिपुर्मम । ततश्चाविकलोयागोमुनिश्रेष्ठभविष्यति १९ । । पराशरउवाच । । इत्युक्त्वारथमारुह्यकृष्णाजिनधरोनृपः । वनंजगामयत्रा स्तेखांडिक्यःसमहामतिः २० तमायांतंसमालोक्यखांडिक्योरिपुमात्मनः । प्रोवाचक्रोधताम्राक्षःसमारोपितकार्मुकः २१ । । खांडिक्यउ वाच । । कृष्णाजिनत्वंकवचमाबध्यास्मान्निहंस्यसि । कृष्णाजिनधरेवेत्सिनमयिप्रहरिष्यति २२ मृगाणांवदपृष्ठेषुमूढकृष्णाजिनंनकिम् । येषां मयात्वयाचोग्राःप्रहिताःशितसायकाः २३ सत्वामहंहनिष्यामिनमेजीवन्विमोक्ष्यसे । आततायिसिदुर्बुद्धिर्ममराज्यहरोरिपुः २४ । । केशिध्वजउवाच । । खांडिक्यसंशयंप्रष्टुंभवंतमहमागतः । नत्वांहंतुंविचार्यैतत्कोपंबाणंविमुंचवा २५ । । पराशरउवाच । । ततःसमं त्रिभिःसार्धमेकांतेसपुरोहितैः । मंत्रयामासखांडिक्यःसर्वैरेवमहामतिः २६ तमूचुर्मंत्रिणोवध्योरिपुरेषवशंगतः । हतेतुपृथिवीसर्वातववश्याभ विष्यति २७ खांडिक्यश्चाहतान्त्सर्वानेवमेवनसंशयः । हतेतुपृथिवीसर्वाममवश्याभविष्यति २८ परलोकजयस्त्वस्यपृथिवीसकलाममं । नह न्मिचेल्लोकजयोममत्वस्यवसुंधरा २९ परलोकजयोनंतःस्वल्पकालोमहीजयः । तस्मादेनंनहनिष्येयत्पृच्छतिवदामितत् ३० । । पराशरउ वाच । । ततस्तमभ्युपेत्याहखांडिक्यजनकोरिपुम् । प्रष्टव्यंयत्त्वयासर्वंतत्पृच्छस्ववदाम्यहम् ३१ ततःसर्वंयथावृत्तंधर्मधेनुवधंद्विज । कथ यित्वासपप्रच्छप्रायश्चित्तंहितत्कृतम् ३२ समाचष्टयथान्यायंद्विजकेशिध्वजायतत् । प्रायश्चित्तमशेषंहियद्वैतत्रविधीयते ३३ वेदितार्थःसतेनैव

नप्रहरिष्यतीतिवेत्सिमन्यसइति २२ एतद्व्यर्थमित्याह मृगाणामिति येषांपृष्ठेष्वित्यनुषंगः २३ मेमयानविमोक्ष्यसेयतआततायी अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारापहर्ता चषडेतेआततायिनइतिस्मृतेः आततायित्वेहेतुःराज्यहरः अतएववस्तुतःसवनस्थस्यापिवधेनदोषः नाततायिवधेदोषोहंतुर्भवतिकश्चनेतिवचनात् २४ कोपंवामुंचबाणंवामुंचेत्यन्वयः २५ २६ २७ २८ परलोकजयस्त्वस्येत्युक्तानहन्मिचेल्लोकजयोममेतिउपसन्नवधकृतपापरूपप्रतिबंधाभावात् पूर्वैरेवपुण्यैःपरलोकसिद्धेरितिभावः २९ ३० ३१ ३२ समाचष्टेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इममेवविषयंप्रस्तुत्यस्मृतिहोमाख्यंप्रायश्चित्तंवाजसनीयशाखायामुक्तम् चंद्रात्तेनमनस्पृणोमिस्वाहेत्यादि अस्यप्रायश्चित्तस्यश्रुतिप्रसिद्धत्वेपिसविशेषंखांडिक्यएवजानातीतिगम्यते यथा न्यायमशेषमाचष्टेत्युक्तत्वात् ३३ ३४ नीत्वासमाप्य ३५ ३६ तथाप्यनिष्पन्नक्रियंअकृतकृत्यंतथातथाममचेतःकिंनिवर्ततइतिचिंतयामासेत्यन्वयः ३७ ३८ ३९ ४० माक्रुधःक्रो

अनुज्ञातोमहात्मना । यागभूमिमुपागम्यचक्रेसर्वक्रियाःक्रमात् ३४ क्रमेणविधिवद्यागंनीत्वासोवभृथाप्लुतः । कृतकृत्यस्ततोभूत्वाचिंतयामासपार्थिवः३५ पूजिताऋत्विजःसर्वेसदस्यामानितामया । तथैवार्थिजनोप्यर्थैर्योजितोभिमतैर्मया ३६ यथार्हमत्रलोकस्यमयासर्वंविचेष्टितम् । अनिष्पन्नक्रियंचेतस्तथापिममकिंयथा ३७ इत्थंसंचिंतयन्नेवसस्मारसमहीपतिः । खांडिक्यायनदत्तेतिमयावैगुरुदक्षिणा ३८ सजगामततोभूयोरथमारुह्यपार्थिवः । मैत्रेयदुर्गगहनंखांडिक्योयत्रसंस्थितः३९ खांडिक्योपिपुनर्दृष्ट्वातमायांतंधृतायुधः । तस्थौहंतुंकृतमतिस्तमाहसपुनर्नृपः ४० केशिध्वजउवाच । । भोनाहंतेपकारायप्राप्तःखांडिक्यमाक्रुधः । गुरोर्निष्क्रयदानायमामवेहित्वमागतम् । ४१ । निष्पादितोमयायागःसम्यक्तदुपदेशतः । सोऽहंतेदातुमिच्छामिवृणुष्वगुरुदक्षिणाम् ४२ । । पराशरउवाच । । भूयःसमंत्रिभिःसार्धंमंत्रयामासपार्थिवः । गुरोर्निष्कृतिकामोत्रकिमयंप्रार्थ्यतामिति ४३ तमूचुर्मंत्रिणोराज्यमशेषंप्रार्थ्यतामिति । कृतिभिःप्रार्थ्यतेराज्यमनायासितसैनिकैः ४४ प्रहस्यतानाहनृपःसखांडिक्योमहामतिः । स्वल्पकालंमहीराज्यंमादृशैःप्रार्थ्यतेकथम् ४५ एवमेतद्भवंतोत्रअर्थसाधनमंत्रिणः । परमार्थःकथंकोत्रयूयंनात्रविचक्षणाः ४६ इत्युक्त्वासमुपेत्यैनंसतुकेशिध्वजंनृपम् । उवाचकिमवश्यंत्वंददामिगुरुदक्षिणाम् ४७ । । पराशरउवाच । बाढमित्येवतेनोक्तःखांडिक्यस्तमथाब्रवीत् । भवानध्यात्मविज्ञानपरमार्थविचक्षणः ४८ यदिचेद्दीयतेमह्यंभवतागुरुनिष्क्रयः । तत्क्लेशप्रशमायालंयत्कर्मतदुदीरय ४९ । । इतिश्रीविष्णुपुराणेषष्ठेअंशेषष्ठोध्यायः ६ । । केशिध्वजउवाच । । नप्रार्थितंत्वयाकस्मान्मद्राज्यमपकंटकम् । राज्यलाभाद्विनानान्यत्क्षत्रियाणामतिप्रियम् १ । । खांडिक्यउवाच । । केशिध्वजनिबोधत्वंमयानप्रार्थितंयतः । राज्यमेतदशेषंतेयत्रगृद्ध्यंत्यपंडिताः २ क्षत्रियाणामयंधर्मोयत्प्रजापरिपालनम् । वधश्चधर्मयुद्धेनस्वराज्यपरिपंथिनाम् ३ यत्राशक्तस्यमेदो

धंमाकार्षीः ४१ ४२ ४३ अनायासितायुद्धाद्यायासमप्रापिकाःसैनिकाभटायैः ४४ ४५ अत्रराज्येर्थसाधनेयूयंमंत्रिणःसचिवाः अत्रसंसारेकःपरमार्थःसचकथंभवतीत्यत्रयूयंनाविचक्षणाः ४६ ४७ ४८ तत्तर्हि ४९ इतिश्रीवैष्णवाकूतचं॰पेष्ठ॰षष्ठोध्यायः ६ एतत्पुराणसर्वस्वंविद्यामाध्यात्मिकींवराम् केशिध्वजःसप्तमेदातूखांडिक्यायेत्यवर्णयत् १ ब्रह्मविद्यांदास्यन्खांडिक्यंविवेकवैराग्यपरिक्षार्थंकेशिध्वजःप्राह नप्रार्थितामिति अतिप्रियम् प्रजापालनस्यैवक्षत्रियधर्मत्वात् अन्यथाकर्मनिष्ठस्यतवपापप्रसंगःस्यादितिभावः १ एतस्योत्तरंकेशिध्वजेतिपंचभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रराज्येपंडिताएवगृध्यंतिअभिकुर्वंति २ ननुस्वधर्मसिद्धयेपंडितानामपिराज्यकांक्षैवयुक्तेत्युक्तंतत्राह क्षत्रियाणामिति यत्प्रजापालनंयच्चस्वराज्यपरिपंथिनांधर्मयुद्धेनवधःक्षत्रियाणांधर्मः सचराज्याधिकृतानामेवनतुक्षत्रियमात्रस्य ३ अतोयत्रयद्राज्येत्वयापद्धतेसतिपुनरुद्धर्तुमशक्तस्यासमर्थदोषोनैवास्ति असक्तस्येतिपाठेराज्येअनासक्तस्येत्यर्थः रज्याधिकाराभावेनतदधिकृत धर्मेप्याधिकारनिवृत्तेः अन्यथातुस्यादेव ननुअविद्यामयस्यराज्यकर्मणोमिथ्यात्वात्त्यागेपिकथंदोषःस्यादितिचेत्तत्राह बंधायेति एषाकर्ममयीअविद्याक्रमोज्झिताअधिकारेपित्यक्तासतीपापबं धायभवत्येवेत्यर्थः ४ एवंचसतिममेयंत्वद्राज्यस्पृहानधर्मार्थंकिंतुएतज्जन्मनिराज्योपभोगार्थमेव अन्येषांराज्याधिकृतानांयाराज्यस्पृहासादोषादर्थकामात्लोभाज्जायतइति तथानैव यतः धर्ममेवानुरुध्यतेनुवर्तते धर्मार्थमेवप्रजापालनेवर्ततेअर्थकामावानुषंगिकावित्यर्थः ५ तर्हियाच्ञामात्रेणराज्याधिकाराद्धर्मएवकिमितिनक्रियतेतत्राह नयाच्ञाइति अतोधर्मत्वादविद्यांतर्गत त्वाच्चत्वदीयंराज्यंनमयाप्रार्थितम् ६ अतोयत्रगृध्यंत्यपंडिताइतियदुक्तंतत्सिद्धमेवेत्याह राज्यइति अहंमानएवमहापानंतेनयोमदस्तेनमत्ताः ७ एतच्छ्रुत्वाकेशिध्वजःकिमुवाचतत्राह

षोनैवास्त्यपहृतेत्वया । बंधायैवभवत्येषाअविद्याप्यक्रमोज्झिता ४ जन्मोपभोगालिप्सार्थमियंराज्यस्पृहामम । अन्येषांदोषजानैवधर्ममेवानु रुध्यति ५ नयाच्ञाक्षत्रबंधूनांधर्मायैतत्सतांमतम् । अतोनयाचितंराज्यमविद्यांतर्गतंतव ६ राज्येगृध्यंत्यविद्वांसोममत्वाहतचेतसः । अहंमा नमहापानमदमत्तानमादृशाः ७ । । पराशरउवाच । ।ततःप्रहृष्टःसाध्वीतिप्राहकेशिध्वजोनृपः। खांडिक्यजनकंप्रीत्याश्रूयतांवचनंमम ८ अह मप्यविद्ययामृत्युंतर्तुकामःकरोमिवै । राज्यंयुगांश्चविविधान्भोगैःपुण्यक्षयंतथा ९ तदिदंतेमनोदृष्ट्याविवेकैश्वर्यतांगतम् । श्रूयतांवाथविद्यायाःस्व रूपंकुलनन्दन १० अनात्मन्यात्मबुद्धिर्यात्वस्वेस्वमितियामतिः । अविद्यातरुसम्भूतिबीजमेतद्द्विधास्थितम् ११ पंचभूतात्मकेदेहेदेहीमोहतमो वृतः । अहमेतदितीत्युच्चैःकुरुतेकुमतिर्मतिम् १२ आकाशवाय्वग्निजलपृथिवीभ्यःपृथक्स्थिते । आत्मन्यात्ममयंभावंकःकरोतिकलेवरे १३ कलेवरो

ततःप्रहृष्टइति साध्वीतिदीर्घपाठश्छांदसः अध्यात्मतबुद्धेर्विशेषणंवा ८ स्वस्यापिराज्येप्रवृत्तौहेतुमाह अहमिति यत्त्वयोक्तंराज्यमविद्यांतर्गतंतत्सत्यमेवतथापिअविद्ययाप्रजापालनादिरू पयामृत्युंकामक्रोधादिकंसंसारहेतुंतर्तुंप्रारब्धंराज्यादिकमहंकरोमि अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुतइतिश्रुतेः ९ तदेवंव्याप्तेनज्ञातंतवमनःविवेकेऐश्वर्यसामर्थ्यंयस्यतस्यभावःवि वेकैश्वर्यतांगतंस्वयमेवप्राप्तमितियत्तद्दिष्ट्याभाग्यमित्यर्थः विवेकैश्वर्यमागतमितिपाठःसुगमःतदेवंशिष्यतापादकंतदीयंविवेकादिकंपरीक्ष्याभिनंद्यचेदानींयत्पृष्टंतत्क्लेशप्रशमायालंयत्कर्मत दुदीरयेतितदुत्तरंवक्तुंप्रथमंतावदविद्याख्यंक्लेशस्वरूपंदर्शयति श्रूयतामिति १० तत्राविद्यास्वरूपतोदर्शयितुमसुकरत्वेनकार्यतोदर्शयति अनात्मनीति अनात्मनिदेहादावहमितियाबुद्धिर्या वास्वेस्वंमदीयमितिमतिः एवंद्विधास्थितंअविद्यातरुसम्भूतिअविद्यातरुकार्यंएतदेवसंसारबीजभूतम् अहंममेतिधीद्वयंयस्मात्साअविद्येत्यर्थः ११ तत्राहंबुद्धेरविद्याकार्यत्वमुपपादयति पञ्च भूतेति पञ्चभूतात्मकेदेहेदेहीमोहहेतुनातमसास्वाज्ञानेनावृतःसन्नहमेतदितिकुमतिर्मतिंमिथ्यामतिंकुरुते द्वितीयइतिशब्दस्तदावृत्त्यर्थः १२ कुमतित्वमेवस्पष्टयति आका शोति आकाशादिभ्यस्तत्साक्षितयाआत्मनिपृथक्स्थितेसतितत्कार्येदेहेअहंभावंकःकुर्यात् १३ ममप्रत्ययस्यापिमिथ्यात्वंप्रकटयति कलेवरेतिद्वाभ्याम् अदेहेदेहाद्व्यतिरिक्तेआत्मानिस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिदेहोपभोग्यंगेहादिमदीयमितिकःप्राज्ञोमन्यते १४ एवंकलेवरेऽनात्मनिसतितदुत्पादितेषुपुत्रादिषुकःस्वाम्यंकुर्यात् १५तदेवमहंममाभिमानयोरविद्याकार्यत्वमुक्त्वेदानींतत्पूर्वककर्तृत्वभोक्तृत्वाद्यपिअविद्यकमित्याह सर्वमिति सर्वंकर्मदेहोपभोगायमानवःकुरुतेभुक्तमपचमितिअहंकारास्पदस्यैवकर्तृत्वभोक्तृत्वप्रतीतेःदेहंचपुंसःसकाशात्अन्यद्यदातदाचपुंसोभोगसंबंधोनास्त्येवपरंकेवलमधिष्ठानमात्रेणतत्कर्मतस्यबन्धायैवस्यात् १६देहोपभोगायेतियदुक्तंतद्दृष्टांतेनसमर्थयते मृन्मयेतिद्वाभ्याम् मृदम्भोभ्यामन्नपानीयाभ्यामुपलेपेनास्थितिर्यस्यसः १७ भोगैर्भुज्यमानैरन्नादिभिःगर्वोभिमानः १८ पुंसोबंधायेतियदुक्तंतत्रबंधस्वरूपमेवाह अनेकेति सहस्रमेवसाहस्रंअनेकजन्मसाहस्राणियस्यांतांसंसारस्यपदवींमार्गंगच्छन् मोहश्रमंमोहात्कर्तृत्वभोक्तृत्वाद्यभिनिवेशाद्यःश्रमस्तंप्राप्तः अतएववासनाकर्तृत्वादिसंस्कारःसैवरेणुस्तेनगुण्ठितश्छन्नः १९ प्रसंगात्तदुपशमप्रकारमाह प्रक्षाल्यतइति ज्ञानमेवोष्णंवारितेनसवासनारूपोरेणुः

पभोग्यंहिगृहक्षेत्रादिकंचयत् । अदेहेत्वात्मनिप्राज्ञोममेदमितिमन्यते १४ इत्थंचपुत्रपौत्रेषुतद्देहोत्पादितेषुकः । करोतिपंडितःस्वाम्यमनात्मनिकलेवरे १५ सर्वंदेहोपभोगायकुरुतेकर्ममानवः । देहंचान्यद्यदापुंसस्तदाबन्धायतत्परम् १६ मृन्मयंहियथागेहंलिप्यतेवैमृदंभसा । पार्थिवोयंतथादेहोमृदंभोलेपनास्थितिः १७ पञ्चभूतात्मकैर्भोगैःपञ्चभूतात्मकंवपुः । आप्याय्यतेयदिततःपुंसोगर्वोत्रकिंकृतः १८ अनेकजन्मसाहस्रींसंसारपदवींव्रजन् । मोहश्रमंप्रयातोसौवासनारेणुगुंठितः १९ प्रक्षाल्यतेयदासोस्यरेणुर्ज्ञानोष्णवारिणा । तदासंसारपांथस्ययामिमोहश्रमःसमम् २० मोहश्रमेशमंयातेस्वस्थांतःकरणःपुमान् । अनन्यातिशयाबाधःपरंनिर्वाणमृच्छति २१ निर्वाणमयएवायमात्माज्ञानमयोमतः । दुःखाज्ञानमयाधर्माःप्रकृतेस्तेतुनात्मनः २२ जलस्यनाग्निसंसर्गःस्थालीसंगस्तथापिहि । शब्दोद्रेकादिकान्धर्मांस्तत्करोतियथामुने २३ तथात्माप्रकृतेःसंगादहंमानादिदूषितः । भजतेप्राकृतान्धर्मान्नन्यस्तेभ्योपिसोव्ययः २४ तदेतत्कथितंबीजमविद्यायामयातव । क्लेशानांचक्षयकरंयोगादन्यन्नविद्यते २५ । । खांडिक्यउवाच । । तद्ब्रवीहिमहाभागयोगंयोगविदुत्तम । विज्ञातयोगशास्त्रार्थस्त्वमस्यांनिमिसंततौ २६ । । केशिध्वजउवाच । । योगस्वरूपंखांडिक्यश्रूयतांगदतोमम । यत्रस्थितोनच्यवतेप्राप्यब्रह्मलयंमुनिः २७ मनएवमनुष्याणांकारणंबंधमोक्षयोः । बंध

प्रकर्षेणक्षाल्यते अज्ञानकृतस्यसवासनस्यमोहस्यज्ञानेनैवनाशइत्यर्थः २० ततःकिमतआह मोहश्रमइति नविद्यतेन्यस्मिन्नतिशयोयस्मात्तच्चतदबाधंनिरुपद्रवंच पुंस्त्वपाठेपुमानित्यस्य विशेषणम् अनन्यातिशयउत्तमाधिकारी अतएवाबाधस्त्रिविधबाधारहितःसन्निर्वाणंमोक्षाख्यंप्राप्नोति २१ एवंतर्हिनिर्वाणस्यकादाचित्कत्वेनानित्यताप्रसंगइत्यतआह निर्वाणेति निर्वाणस्यस्वभावत्वेननित्यत्वादविद्यानिवृत्तिरेवज्ञानसाध्येतिभावः २२ एवंचेदात्मनिदुःखादिप्रतीतिर्नस्यात्तत्राह जलस्येतिद्वाभ्याम् साक्षादग्निसंयोगाभावेप्यग्निनातप्तस्थालीसंगात्तदन्तस्थंजलंशब्दंउद्रेकंच आदिशब्दादुष्णत्वादिकंयथाकरोतिभजते २३ तथाप्रकृतेर्देहेअहंमानात्तद्धर्मान्सआत्माभजते २४ देहाभिमानादिकंसंसारबीजमुपसंहरन्तत्राशंकयोगमप्युपक्षिपति तदेतदिति अविद्यापास्तरूपायाजन्यंसंसारबीजमेतद्देहाभिमानरूपंकथितम् तथापंचक्लेशानांचकारादविद्यायाश्चक्षयकरंयोगादन्यन्नविद्यतइत्यपिकथितमेवेत्यन्वयः २५ २६ यत्रयोगोस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तआरूढोमुनिर्ब्रह्मलयंमुक्तिंप्राप्यततोनच्यवतेपुनर्नसंसरति २७ योगेस्थितिश्चविषयवैतृष्ण्यंविनानभवतीत्याशयेनाहमनएवेति २८ अतश्चैवंकुर्यादित्याह विषयेभ्यइति विज्ञानात्मा विवेकज्ञानप्रधानआत्मापुमान्विषयेभ्योमनःसमाहृत्यतेनमनसापरमेश्वरंचिंतयेदितियोगसामान्योक्तिः २९ सामान्यतोयोगफलमप्याह आत्मभावमिति तद्ब्रह्मचिंतितंसद्ध्यायिनंपुरुषं आत्मभावंआत्म्यैक्यंनयति विकार्यविकारार्हलोहंस्वशक्त्याआकर्षकःअयस्कांतोयथा अयंतुदृष्टांतःसंयोगमात्रेनतुतदैक्यम् ३० पूर्वोपक्षिप्तंयोगस्वरूपंदर्शयति आत्मेति आत्मप्रयत्नः यमनियमादिपंचविषयःतत्सापेक्षातदधीनाविशिष्टाधारणादित्रयस्वरूपायामनोगतिर्मनोनिवृत्तिस्तस्याब्रह्मणिसंयोगः जीवात्मब्रह्मैक्यविषयत्वंयोगोभिधीयते ध्यातृध्येयैक्यधीर्योगइत्यर्थः यथाहयोगीयाज्ञवल्क्यः ज्ञानंयोगात्मकंविद्धियोगश्चाष्टांगसंयुतः संयोगोयोगइत्युक्तोजीवात्मपरमात्मनोरिति ३१ योगिलक्षणमाह एवमिति एवमनेनप्रकारेणवैशिष्ट्ययुक्तोधर्मउपलक्षणंयस्ययोगस्यसयस्यास्तिसएवयोगीमुमुक्षुश्च अन्यश्चअणिमादिसिद्ध्यपेक्षीभोगलंपटइत्यर्थः ३२ इदानीमवस्थाभेदेनयोगिनोद्वैविध्यमाह योगयुगिति प्रथमंयोगसिद्धेःपूर्वयोगाभ्या

स्यविषयासंगिमुक्तेर्निर्विषयंतथा २८ विषयेभ्यःसमाहृत्यविज्ञानात्मामनोमुनिः । चिंतयेन्मुक्तयेतेनब्रह्मभूतंपरेश्वरम् २९ आत्मभावंनयत्येनंतद्ब्रह्मध्यायिनंमुने । विकार्यमात्मनःशक्त्यालोहमाकर्षकोयथा ३० आत्मप्रयत्नसापेक्षाविशिष्टायामनोगतिः । तस्याब्रह्मणिसंयोगोयोगइत्यभिधीयते ३१ एवमत्यंतवैशिष्ट्ययुक्तधर्मोपलक्षणः । यस्ययोगःसवैयोगीमुमुक्षुरभिधीयते ३२ योगयुक्प्रथमंयोगीयुंजमानोभिधीयते । विनिष्पन्नसमाधिस्तुपरब्रह्मोपलब्धिमान् ३३ यद्यंतरायदोषेणदुष्यतेनास्यमानसम् । जन्मांतरैरभ्यसतोमुक्तिःपूर्वस्यजायते ३४ विनिष्पन्नसमाधिस्तुमुक्तिंतत्रैवजन्मनि । प्राप्नोतियोगीयोगाग्निदग्धकर्मचयोचिरात् ३५ ब्रह्मचर्यमहिंसांचसत्यास्तेयापरिग्रहान् । सेवेतयोगीनिष्कामोयोग्यतांस्वमनोनयन् ३६ स्वाध्यायशौचसंतोषतपांसिनियतात्मवान् । कुर्वीतब्रह्मणितथापरस्मिन्प्रवणंमनः ३७ एतेयमाःसनियमाःपंचपंचप्रकीर्तिताः । विशिष्टफलदाःकाम्यानिष्कामानांविमुक्तिदाः ३८ एकंभद्रासनादीनांसमास्थायगुणैर्युतः । यमाख्यैर्नियमाख्यैश्चयुंजीतनियतो

सीयोगयुगभिधीयते निष्पन्नसमाधिस्तुपरब्रह्मोपलब्धिमान्ब्रह्मज्ञानीत्युच्यते ३३ तयोर्मुक्तौविलंबाविलंबावाह यदीतिद्वाभ्याम् आलस्यंव्याधयस्तीव्राःप्रमादोत्थानसंश्रयाः अनवस्थितचित्तत्वमश्रद्धाभ्रांतिदर्शनम् दुःखानिदौर्मनस्यंचविषयेषुचलोलताइत्येवमादिनाअंतरायदोषेणाविघ्नदोषेणपूर्वस्ययोगयुक्संज्ञस्यमानसंनदुष्यतेयदितदाजन्मांतरैरभ्यसतोमुक्तिःस्यात् बहुवचनंत्रित्वपर्यवसायि यदितुदुष्यतेतदापियोगमाहात्म्याद्बहुभिर्जन्मभिःस्यादेव अल्पाभ्यासोपियोमर्त्यःसोपिजन्मत्रयात्परम् नयोनियंत्रपीडायैपुनरेतिनसंशयइतिवायुसंहितोक्तेः ३४ योगाग्निनादग्धकर्मसमूहः ३५ इदानींयमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयइत्यष्टांगयोगांगानिक्रमेणदर्शयिष्यन्प्रथमंयमनियमानाह ब्रह्मचर्यमितित्रिभिः स्वीयंमनोब्रह्मप्रवेशाय योग्यतांप्रापयन् ३६ ब्रह्मणिप्रवणंमनःकुर्वीतेत्यनेनब्रह्मणिप्रणिधानाख्यंपंचमंनियमंदर्शयति ३७ ३८ आसनमाह एकमिति गुणैर्यमनियमाख्यैर्युतः भद्रासनादीनांलक्षणमाहयोगीयाज्ञवल्क्यः गुल्फौतुवृषणस्याधःसीविन्याःपार्श्वयोःक्षिपेत् पार्श्वेपादौचहस्ताभ्यांदृढंबद्धामुनिश्चलम् भद्रासनंभवेदेतत्सर्वव्याधिविनाशनमित्यादि ३९ प्राणायाममाह प्राणाख्यमिति सबी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जःसालंबनोमंत्रजपध्यानसहितः ४० द्विविधस्यापितस्यपुनःप्रत्येकंत्रैविध्यमाह परस्परेणेति निःश्वासेनमुखनासिकाभ्यांनिर्गच्छतियोवायुःसप्राणःश्वासेनांतःप्रविशतियःसोपानः तत्रप्राण कृतोपानवृत्तेरभिभवोनिरोधोरेचकाख्यःप्राणायामः एवमपानवृत्त्याप्राणवृत्त्यभिभवःपूरकाख्यःप्राणायामः एवंतेनपरस्पराभिभवकारणेनसप्राणायामोद्विविधः तथातयोर्युगपत्संयमादभिभ वस्तृतीयःकुंभकाख्यःप्राणायामः एभिस्त्रिभिरभिभवैरेकःप्राणायामइत्येके अत्रावांतरभेदोग्रंथविस्तरभयान्नलिखितः ४१ तत्रसबीजस्यालंबनमाह तस्यचेति स्थूलंहिरण्यगर्भादिरूपम् ४२ प्रत्याहारमाहशब्दादिष्विति निगृह्यव्यावृत्त्यचित्तानुकारिणीचित्तविषयातिरिक्तविषयरहितानीत्यर्थः ४३ प्रत्याहारस्ययोगोपयोगप्रकारमाह वश्यतेति तेनप्रत्याहारेणइंद्रियाणांचलस्वरू पाणामपिवश्यताजायंतइत्यन्वयः व्यतिरेकमाह अवश्यैरिति ४४ प्राणायामप्रत्याहारानंतरमेवधारणाकार्येत्याह प्राणायामेनेति ४५ यदाधारंचेतोदोषाणांसमुद्भवंकारणंहंतिसआश्रयःक

यतिः ३९ प्राणाख्यमनिलंवश्यमभ्यासात्कुरुतेतुयत् । प्राणायामःसविज्ञेयःसबीजोबीजएवच ४० परस्परेणाभिभवंप्राणापानौयदानिलौ । कुरुतःसद्विधातेनतृतीयःसंयमात्तयोः ४१ तस्यचालंबनवतःस्थूलरूपंद्विजोत्तम । आलंबनमनंतस्ययोगिनोभ्यसतःस्मृतम् ४२ शब्दादिष्वनु रक्तानिनिगृह्याक्षाणियोगवित् । कुर्याच्चित्तानुकारीणिप्रत्याहारपरायणः ४३ वश्यतापरमातेनजायतेहिबलात्मनाम् । इंद्रियाणमवश्यैस्तैर्न योगीयोगसाधकः ४४ प्राणायामेनपवनैःप्रत्याहारेणचेंद्रियैः । वशीकृतैस्ततःकुर्यात्स्थितंचेतःशुभाश्रये ४५ । । खांडिक्यउवाच । । कथ्य तांमेमहाभागचेतसोयःशुभाश्रयः । यदाधारमशेषंतुहंतिदोषसमुद्भवम् ४६ । । केशिध्वजउवाच । । आश्रयश्चेतसोब्रह्मन्द्विधातच्चस्वभावतः । भूपमूर्तममूर्तंचपरंचापरमेवच ४७ त्रिविधाभावनाभूपविश्वमेतन्निबोधताम् । ब्रह्माख्याकर्मसंज्ञाचतथाचैवोभयात्मिका ४८ कर्मभावात्मिकाह्येका ब्रह्मभावात्मिकापरा । उभयात्मिकातथैवान्यात्रिविधाभावभावना ४९ सनंदनादयोब्रह्मभावभावनयायुताः । कर्मभावनयाचान्येदेवाद्याःस्थावरा श्चराः ५० हिरण्यगर्भादिषुचब्रह्मकर्मात्मिकाद्विधा । अधिकारबोधयुक्तेषुविद्यतेभावभावना ५१ अक्षीणेषुसमस्तेषुविशेषज्ञानकर्मसु । विश्वमेतत्प

थ्यताम् दोषफलोद्भवमितिपाठेदोषाणांफलानामंतरायाणामुद्भवमित्यर्थः ४६ उत्तरमाह आश्रयइति चेतसआश्रयोब्रह्मैव तत्राधिकारिभेदेनाश्रयभेदंवक्तुंब्रह्मणश्चतुर्धाभेदमाह तच्चेति त च्चब्रह्ममूर्तममूर्तंचेतिद्विधास्वभावतःस्वेच्छातः स्वरूपतइतिवापाठः मूर्तंपरिच्छिन्नंअमूर्तंतादितरत् तच्चप्रत्येकंपरंचापरंचेतिद्विधा तत्रपरममूर्तंनिर्गुणंब्रह्म अपरममूर्तंषड्गुणेश्वररूपम् परंमूर्तं पद्मनाभादिलीलाविग्रहरूपम् अपरंमूर्तंहिरण्यगर्भादिविश्वरूपम् ४७ तदेवंचतुर्विधब्रह्मरूपेषुचतुर्थंविश्वाख्यंरूपमाह त्रिविधेति त्रिविधभावनाश्रयंजीवात्मकत्वादुपचाराद्विश्वमेवत्रिधा भावनेत्युच्यते एतत्स्थूलंरूपंपरब्रह्मप्राप्त्युपायत्वाच्चतुर्थमपिप्रथमंनिर्दिष्टम् अत्रप्रथमंमनःसाधनार्थमित्यर्थः भावनाहिज्ञानजन्यःसंस्कारः तामेवसंज्ञयानिर्दिशतिब्रह्माख्येति४८ विषयतो पितांनिरूपयति कर्मभावात्मिकेतिभावोविषयस्तद्वताभावनात्रिविधा ४९ तत्रब्रह्मादिप्रतिनियतभावनाप्रवृत्तानधिकारिणःपृथक्दर्शयति सनंदनादयइतिद्वाभ्याम् पूर्वापरजन्मसुतत्तद्भाव नाभ्यासात्तद्युक्तत्वम् ५० हिरण्यगर्भादिषुह्यधिकारोजगत्सर्गादिविषयआत्मतत्त्वबोधश्चतद्युक्तेषूभयात्मिकाभावनाविद्यते हिरण्यगर्भश्चात्रचतुर्मुखः आदिशब्दात्कश्यपादिः आत्मतत्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वोधीपीवेदहकैवल्याभावोविकारित्वात् यावदधिकारमवस्थितिरधिकारिणामितिव्यासोक्तेः ५१ अतएवाविद्यायाःसर्वात्मनानिवृत्त्यभावात्सनन्दनादयोपिजीवाःस्थूलविश्वान्तःपातिन इत्याह अक्षीणेष्विति विशेषेषुप्रतिनियतेषुज्ञानेषुप्रारब्धकर्मसुचअक्षीणेषुसत्सुइदंजगदन्यत्परंब्रह्मचान्यदितिभेदभ्रमःस्यादेव भेदेनभेदहेतुनाअहंकारेणभिन्नदृशांभावभावनाविद्यतइतिपू र्वेणान्वयः अंततोध्यातृध्येयभेददर्शित्वादित्यर्थः ५२ ब्रह्मभावनाप्रसंगादमूर्तपरब्रह्मस्वरूपमाह प्रत्यस्तमितेतिद्वाभ्याम् प्रत्यस्तमितः प्रलीनोभेदोयस्मिंस्तद्वचसामगोचरंआत्मसंवेद्यंस्व प्रकाशम् ५३ विश्वरूपाद्वैरूप्यंवैलक्षण्यंलक्षणंयस्यतज्ज्ञानंपरमात्माविष्णोःपरंरूपमित्यन्वयः ५४ तत्रश्रेष्ठरूपत्वादिदमेवचिन्तयितुंयोग्यमित्यतआह नतदिति प्रथमंचिन्तयितुमश क्यमित्यर्थः विश्वगोचरंविश्वात्मकम् ५५ तदेवप्रपंचयति हिरण्यगर्भइत्यादिपञ्चभिः ५६ ५७ विशेषान्तंपृथिव्यंतम् ५८ ५९ एतच्चराचरंएतानिपूर्वोक्तानिसर्वाणिचराचराणिय

रंचान्यद्भेदभिन्नदृशांनृप ५२ प्रत्यस्तमितभेदंयत्सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यंतज्ज्ञानंब्रह्मसंज्ञितम् ५३ यत्रविष्णोःपरंरूपमरूप स्याजमक्षरम् । विश्वस्वरूपवैरूप्यलक्षणंपरमात्मनः ५४ नतद्योगयुजाशक्यंनृपचिंतयितुंयतः । ततःस्थूलंहरेरूपंचिंत्यंयद्विश्वगोचरम् ५५ हि रण्यगर्भोभगवान्वासवोथप्रजापतिः ।मरुतोवसवोरुद्राभास्करास्तारकाग्रहाः ५६गंधर्वयक्षदैत्याद्याःसकलादेवयोनयः।मनुष्याःपशवःशैलाःसमुद्राः सरितोद्रुमाः ५७ नृपभूतान्यशेषाणिभूतानांयेचहेतवः । प्रधानादिविशेषांतंचेतनाचेतनात्मकम् ५८ एकपादंद्विपादंचबहुपादमपादकम् । मूर्तमे तद्धरेरूपंभावनात्रितयात्मकम् ५९ तच्चसर्वमिदंविश्वंजगदेतच्चराचरम् । परब्रह्मस्वरूपस्यविष्णोःशक्तिसमन्वितम् ६०विष्णुशक्तिःपराप्रोक्ताक्षत्र ज्ञाख्यातथापरा। अविद्याकर्मसंज्ञान्यातृतीयाशक्तिरिष्यते ६१ ययाक्षेत्रज्ञशक्तिःसाचेष्टितानृपसर्वगा । संसारतापानखिलानवाप्नोत्यनुसंततम् ६२तयातिरोहितत्वाच्चशक्तिःक्षेत्रज्ञसंज्ञिता । सर्वभूतेषुभूपालतारतम्येनलक्ष्यते ६३ अप्राणवत्सुस्वल्पाल्पास्थावरेषुततोधिका । सरीसृपेषुतेभ्यो न्याप्यतिशक्त्यापतत्रिषु ६४ पतत्रिभ्योमृगास्तेभ्यःस्वशक्त्यापशवोधिका । पशुभ्योमनुजाश्चातिशक्त्यापुंसोविभाविताः ६५ एभ्योपिनागगंध

र्स्मिस्तज्जगदिदंकारास्पदंविश्वाख्यमूर्तंहरेरूपमित्यन्वयः एतच्चहरेस्तत्त्वतोनरूपंकिन्तुतच्छक्तिसमन्वितंतयोपास्यमित्याह शक्तिसमन्वितमिति ६० कासाशक्तिर्ययासमन्वितमित्यत आह विष्णुशक्तिःपरास्वरूपभूताचित्स्वरूपापरमपदादिपदवाच्याप्रत्यस्तमितभेदंयत्सत्तामात्रमित्यत्रपूर्वोक्ता राहोःशिरइतिवद्विष्णुरेवपराशक्तिरित्यर्थः तथाभावनात्रयात्मि कांपूर्वोक्तांशक्तिमाह क्षेत्रज्ञाख्येति परापरभेदहेतुभूतशक्त्यंतरमाह अविद्येतिकर्मेतिचसंज्ञायस्यामायायाःसातथोक्ता अविद्याकार्याणांमध्येकर्मणएवनिर्देशःसंसाराख्यकार्येप्राधान्यसूचना र्थः ६१ तदेवाह ययेति वस्तुतःसर्वगतापिययाअविद्ययापरिच्छिद्यवेष्टांप्रापितासतीसाक्षेत्रज्ञशक्तिः कर्मभिःसंसारतापान्प्राप्नोतीत्यर्थः ६२ जीवानांन्यूनाधिकभावेपिसैवहेतुरित्याह तयेति ६३ तारतम्यमेवाह अप्राणवत्स्वितिसार्धैश्चतुर्भिः अप्राणवत्सुअनभिव्यक्तप्राणेषुशिलादिषुस्वल्पाल्पाअत्यल्पा स्थावरेषुवृक्षादिषुततोत्यल्पशक्तेःप्रकाशादधिका अधिकज्ञानादि शक्त्यालक्ष्यते सरीसृपेषुक्षुद्रकीटादिषुतेभ्यःस्थावरेभ्योन्याविलक्षणा ततोपिपतत्रिषुपक्षिषुअतिशक्त्याअधिकशक्त्यालक्ष्यते ६४ मनुजाःपुंसःपरमेश्वरस्यातिशक्त्याविभाविताःलक्ष्यंते ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःशक्रादतिशयितःप्रजापतिः ६६ असंगत्वेपियोगेदृष्टांतःनभसायथेति ६७ तदेवंमूर्तयोर्मध्येस्थूलंविश्वाख्यंरूपंप्रपंचितम् अमूर्तयोस्तुप्रथमंपररूपंब्रह्मोक्तंद्वितीयंअमूर्तसच्छब्दादि वाच्यमीश्वराख्यंरूपमाह द्वितीयमिति योगिध्येयंआरूढयोगिभिश्चिन्त्यम् ६८ तद्विशिनष्टि समस्तेति एताःपूर्वोक्ताःशुभादिकाःकार्यगताःशक्तयःयत्रईश्वरेसर्वकारणभूतेप्रतिष्ठिताः अतएवविश्वरूपंरूप्यतेयेनततमहत्सर्वोत्कृष्टम् ६९ इदानींमूर्तयोर्द्वितीयंसलीलाविग्रहाख्यंपररूपमाह समस्तशक्तीति तदेवऐश्वरममूर्तंरूपंकर्तृसमस्तशक्तिरूपाणिसमस्ताःशक्तयोयेषु तानिस्वस्यरूपाणिकरोतिआविर्भावयति देवताद्यनुरूपचेष्टावंति देवउपेंद्रादिः तिर्यक्कूर्मादिः मनुष्योरामादिःआदिशब्दान्मिश्रोनृसिंहादिः ७० लीलयेतियदुक्तंतत्समर्थयति जगता

वंयक्षाद्यादेवतानृप । शक्रःसमस्तदेवेभ्यस्ततश्चातिप्रजापतिः ६६ हिरण्यगर्भोपिततःपुंसःशक्त्योपलक्षितः । एतान्यशेषरूपाणितस्यरूपाणिपार्थिव । यतस्तच्छक्तियोगेनयुक्तानिनभसायथा ६७ द्वितीयंविष्णुसंज्ञस्ययोगिध्येयंमहामते । अमूर्तंब्रह्मणोरूपंयत्सदित्युच्यतेबुधैः ६८समस्तशक्तयश्चैतान्नृपयत्रप्रतिष्ठिताः । तद्विश्वरूपरूपंवैरूपमेतद्धरेर्महत् ६९ समस्तशक्तिरूपाणितत्करोतिजनेश्वर । देवतिर्यङ्मनुष्यादिचेष्टावंतिस्वलीलया ७० जगतामुपकारायनसाकर्मनिमित्तजा । चेष्टातस्याप्रमेयस्यव्यापिन्यव्याहतात्मिका ७१ तद्रूपंविश्वरूपस्यतस्यययोगयुजानृप । चिंत्यमात्मविशुद्ध्यर्थंसर्वकिल्बिषनाशनम् ७२ यथाग्निरुद्धतशिखःकक्षंदहतिसानिलः । तथाचित्तस्थितोविष्णुर्योगिनांसर्वकिल्बिषम् ७३ तस्मात्समस्तशक्तीनामाधारेतत्रचेतसः । कुर्वीतसंस्थितिंसातुविज्ञेयाशुद्धधारणा ७४ शुभाश्रयस्यचित्तस्यसर्वगस्यतथात्मनः । त्रिभावभावनातीतोमुक्तयेयोगिनांनृप ७५ अन्येतुपुरुषव्याघ्रचेतसोयेव्यपाश्रयाः । अशुद्धास्तेसमस्तास्तुदेवाद्याःकर्मयोनयः ७६ मूर्तंभगवतोरूपंसर्वापाश्रयनिस्पृहम् । एषावैधारणाज्ञेयायच्चित्तंतत्रधारयेत् ७७ तत्रमूर्तंहरेरूपंयादृक्चिंत्यंनराधिप । तच्छ्रूयतामनाधारेधारणानोपपद्यते ७८ प्रसन्नचारुवदनंपद्मपत्रोपमेक्षणम् । सुकपोलंसुविस्तीर्णललाटफलकोज्ज्वलम् ७९ समकर्णांतविन्यस्तचारुकर्णविभूषणम् । कंबुग्रीवंसुविस्तीर्णश्रीवत्सांकितवक्षसम् ८० वलीविभंगिनाभग्ननाभिनाचोदरेणवै । प्रलंबाष्टभुजंविष्णुमथवापिचतुर्भुजम् ८१ समास्थितोरुजंघंचसुस्थिरांघ्रिकरांबुजम् ।

मित्यादि कर्मनिमित्तजाताहिचेष्टापरिच्छिन्नाव्याहताचभवतिइयंतुव्यापिनीसर्वजगद्विषयाअव्याहतात्मिकाचअतःसाचेष्टास्वतंत्रेश्वरस्यलीलैवेत्यर्थः एतद्रूपनिरूपणस्यप्रयोजनमाह तद्रूपमितिचतुर्भिः तच्चतुर्धोक्तेषुमूर्तपराख्यलीलाविग्रहरूपम् ७२ कक्षंशुष्कंतृणम् ७३ सर्वशक्तीनामाश्रयेलीलाविग्रहेचेतसःस्थितिंकुर्वीत करोतीतियत्साशुद्धधारणा ७४ शुद्धधारणाखेआश्रयशुद्धत्वंहेतुमाह शुभाश्रयइति सर्वगस्यात्मनोब्रह्मणोपिशुभाश्रयः तथोक्तंगीतासु ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यचेत्यादि महात्मनइतिपाठेशुभाशुभसर्वविषयगामिनश्चित्तस्येत्यर्थः त्रिभावभावनातीतःअसंसारित्वात् ७५ स्थूलविश्वाख्याश्रयधारणाग्रहांविहायेयमेवधारणाकार्येत्याह अन्येत्विति द्वाभ्याम् ७६ सर्वाश्रयेषुनिस्पृहंनिरपेक्षंस्वाश्रयमित्यर्थः चित्तविशेषणंवा धारणाशब्दनिरुक्तिमाह एषेति ७७ अनाधारेआश्रयाभावेसति ७८ आश्रयमेवाह प्रसन्नेतिपञ्चभिः ७९ कम्बुग्रीवंरेखात्रयांकितकण्ठम् सुविस्तीर्णश्रीवत्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंवक्षोयस्यतम् ८० वलयउदरमध्यगतास्तिर्यग्रेखाएवविभंगाविशिष्टाभंगास्तद्वता मग्नानाभिर्यत्रतथाभूतेनोदरेणउपलक्षितम् वलित्रिभंगिनेतिपाठेवलयएवत्रयोभंगास्तरंगाइवरेखाःसं तियस्मिंस्तेनेत्यर्थः ८१ समस्थितेऊरुजंघेयस्यतम् ब्रह्मैवधृतकाठिन्यवत्तादृक्भूतम् ८२ अक्षवलयोक्षमाला अष्टभुजपक्षेवशिष्टयोर्भुजयोःपद्मबाणौज्ञेयौ चतुर्भुजत्वेशंखचक्रगदा पद्मान्वितंचिन्तयेत् ८३ ८४ धारणादार्ढ्यज्ञानार्थलक्षणमाह वदतइति ध्येयामूर्तिर्यदाचित्तान्नापयातितदातांधारणांसिद्धांदृढांमन्येत ८५ इदानींभूषणावयवपरित्यागेनधारणासौ कर्य्यमाह ततइति ८६ अवस्थानवतीदृढा ८७ तत्ततःपादादीनामवयवानामेकैकमवयवंचेतसोवियोज्यएकावयवंदेवंचेतसोविषयंकुर्याद्ध्यायेदित्यर्थः चेतसेतिपाठःसुगमःअतएवभागव तेउक्तम् तत्सर्वव्यापकंचित्तमाकृष्यैकत्रधारयेत् नान्यानिचिन्तयेद्भूयःसुस्मितंभावयेन्मुखमिति तदेवंलीलाविग्रहधारणोक्तातत्कारणेश्वरधारणामाह अवयविनिलीलामूर्तिकारणभूतेईश्व राख्येयेनावयवाःस्वीयाःप्रकटीकृतास्तस्मिन्नित्यर्थः प्रणिधानंसूक्ष्मधारणातत्परोभवेत् ८८ इदानींध्यानमाह तद्रूपेति तद्रूपस्यधारणाश्रयरूपस्यप्रत्ययेज्ञाने षष्ठ्यर्थेसप्तमी एकासमानप्र

चिंतयेद्ब्रह्मभूतंतंपीतनिर्मलवाससम् ८२ किरीटचारुकेयूरकटकादिविभूषितम् । शार्ङ्गशंखगदाखड्गचक्राक्षवलयान्वितम् ८३ चिंतयेत्तन्मयोयो गीसमाधायात्ममानसम् । तावद्यावत्दृढीभूत्वातत्रैवनृपधारणा ८४ वदतस्तिष्ठतोन्यद्वत्स्वेच्छयाकर्मकुर्वतः । नापयातियदाचित्तात्सिद्धांमन्ये ततांसदा ८५ ततःशंखगदाचक्रशार्ङ्गादिरहितंबुधः । चिंतयेद्भगवद्रूपंप्रशांतंसाक्षसूत्रकम् ८६ सायदाधारणातद्वदवस्थानवतीततः । किरीटके यूरमुखैर्भूषणैरहितंस्मरेत् ८७ तदेकावयवंदेवंचेतसोपिपुनर्बुधः । कुर्यात्ततोवयविनिप्रणिधानपरोभवेत् ८८ तद्रूपप्रत्ययेचैकासंततिश्चान्यनि स्पृहा । तद्ध्यानंप्रथमैरंगैःषड्भिर्निष्पाद्यतेनृप ८९ तस्यैवकल्पनाहीनस्वरूपग्रहणंहियत् । मनसाध्याननिष्पाद्यंसमाधिःसोभिधीयते ९० विज्ञानप्रापकंसर्वपरब्रह्मणिपार्थिव । प्रापणीयस्तथैवात्मप्रक्षीणाशेषभावनः ९१ क्षेत्रज्ञःकरणीज्ञानंकरणंतेनतस्यतत् । निष्पाद्यमुक्तिकार्यंवैकृ तकृत्यंनिवर्तते ९२ तद्भावभावनापन्नस्ततोसौपरमात्मनः । भवत्यभेदीभेदश्चतस्याज्ञानकृतोभवेत् ९३ विभेदचनकेज्ञानेनाशमात्यंतिकेगते ।

कारायासंततिःप्रवाहः अन्यनिस्पृहाविषयांतरव्यवधानशून्यासाध्यानंएकावयवेश्वरधारणासमानाकाराधीसन्ततिर्ध्यानमित्यर्थः तच्चप्रथमैर्यमादिभिःषड्भिरंगैर्निष्पाद्यते तद्रूपप्रत्ययाइ तिपाठेधारणाप्राप्तवस्तुनःप्रत्ययोयस्यांसंततौसेत्यर्थः ८९ समाधिलक्षणमाह तस्यैवेति तस्यध्येयस्यकल्पनाहीनंयत्स्वरूपग्रहणम् हीतिप्रसिद्धौप्रसिद्धंयत्तदेकाकारत्वेचिरतरावस्थानंध्या नसाध्यंसमाधिरित्यर्थः तदाहपातंजलिः देहबंधश्चित्तस्यधारणंतत्प्रत्ययैकतानताध्यानंतदैकार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिरिति ९० इदानींजातसमाधेर्मुक्तिप्राप्तिकारणमाह वि ज्ञानमिति विज्ञानंसमाधिसाध्यंब्रह्मात्म्यैक्यापरोक्षज्ञानंप्रापकंयोगिनःप्राप्येपरब्रह्मणिप्रक्षीणाअशेषाःपूर्वोक्तास्तिस्रोभावनायस्यतथाभूतोजीवःप्रापणीयः विज्ञानंजीवात्मानंब्रह्मप्रापयतीत्य र्थः ९१ ननुविज्ञानस्याविद्याकार्यस्यव्यवधायकत्वात्ब्रह्मात्म्यैक्यंकथमितितत्राह क्षेत्रज्ञःकरणीति करणीकरणाधिष्ठातातस्यक्षेत्रज्ञस्ययुक्तिकार्यंनिष्पाद्यदग्धेंधनानलवद्विज्ञानंनिवर्तते ९२ तद्भावंब्रह्मभावंप्रतिज्ञानेनभावनाप्रापणातामापन्नःसन्नभेदीभवति ननुज्ञानिनोपिभेदप्रतीतिरस्त्येवान्यथाउपदेशाद्यसिद्धेस्तत्राह भेदश्चेति अक्षरत्रयाधिकसपादश्लोकेन भेदोहिअज्ञानेनभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेत्तस्मिंश्चाज्ञानेकारणेऽत्यंतंनष्टेसतिभेदस्य सबीजस्यनाशादत्यंतासतःपुनःप्ररोहाभावेपिवाधितानुवृत्त्याउपदेशादिव्यवहारइत्यर्थः ९३ ९४ ९५ योगस्यसद्भावेयाथार्थ्येकथितेसति ९६ ननुमनोमलेहंममतादौनष्टेसतिममतवोपदेशेनेतिलद्वचनंविरुध्येतेत्यतआहममेतीतिअसन्मिथ्यैवतदन्यथासत्यमेतादितिवक्तुंविज्ञेयभेदिभिर्भेदवादिभिरपिनशक्यंयुक्त्याअनुभवेनचबाधित त्वाद्विज्ञातवेदिभिरितिपाठेविदितपरमार्थैर्गदितुमपिनशक्यंकुतःपुनर्व्यवहर्तुमित्यर्थः ९७ एतदेवस्पष्टयतिअहंममेतीति ९८ ९९ १०० राजानंसुतंकृत्वेत्युक्त्याकेशिध्वजेन

आत्मनोब्रह्मणाभेदमसंतंकःकरिष्यति ९४ इत्युक्तस्तेमयायोगःखांडिक्यपरिपृच्छतः । संक्षेपविस्तराभ्यांतुकिमन्यत्क्रियतांतव ९५ । । खांडिक्यउवाच । । कथितेयोगसद्भावेसर्वमेवकृतंमम । तवोपदेशेनाशेषोनष्टश्चित्तमलोयतः ९६ ममेतियन्मयाचोक्तमसदेतन्नचान्यथा । नरेंद्रगदितुंशक्यमपितुज्ञेयभेदिभिः ९७ अहंममेत्यविद्येयंव्यवहारस्तथानया । परमार्थस्त्वसंलाप्योगोचरोवचसांनसः ९८ तद्गच्छश्रेयसेसर्वंममैतद्भवताकृतम् । यद्विमुक्तिप्रदोयोगःप्रोक्तःकेशिध्वजाव्ययः ९९ । । पराशरउवाच । । यथार्हपूजयातेनखांडिक्येनसपूजितः । आजगामपुरंब्रह्मंस्ततःकेशिध्वजोनृपः १०० खांडिक्योपिसुतंकृत्वाराजानंयोगसिद्धये । वनंजगामगोविंदेविनिवेशितमानसः १ तत्रैकांतमतिर्भूत्वायमादिगुणशोधितः विष्ण्वाख्येनिर्मलेब्रह्मण्यवापनृपतिर्लयम् १०२ केशिध्वजोपिमुक्त्यर्थंस्वकर्मक्षपणोन्मुखः । बुभुजेविषयान्कर्मचक्रेचानभिसंहितम् १०३ सकल्याणोपभोगैश्चक्षीणपापोमलस्ततः । अवापसिद्धिमत्यंततापक्षयफलांद्विज १०४ । । इतिश्रीविष्णुपुराणेषष्ठेअंशेसप्तमोध्यायः ७ । । पराशरउवाच । । इत्येषकथितःसम्यक्तृतीयःप्रतिसंचरः । आत्यंतिकोविमुक्तिर्यालयोब्रह्मणिशाश्वते १ सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच । वंशानुचरितंचैवभवतोगदितंमया २ पुराणंवैष्णवंत्वेतत्सर्वकिल्बिषनाशनम् । विशिष्टंसर्वशास्त्रेभ्यःपुरुषार्थोपपादकम् ३ तुभ्यंयथावन्मैत्रेयप्रोक्तंशुश्रूषवेव्ययम् । यदन्यदपिवक्तव्यंतत्पृच्छाद्यवदामिते ४ । । मैत्रेयउवाच । । भवताकथितंसर्वंयत्पृष्टोसिमयामुने । श्रुतंचैतन्मयाभक्त्यानान्यत्प्रष्टव्यमस्तिमे ५ विच्छिन्नसर्वसंदेहंवैमत्यंमनसिस्थितम् । त्वत्प्रसादान्मयाज्ञाताउत्पत्तिस्थितिसंयमाः ६ ज्ञातश्चतुर्विधोराशिःश

तदीयंराज्यमापिदत्तमितिप्रतीयते यद्वाराजानंमंत्र्यादिस्वामिनंकृत्वेत्यर्थः १०१ १०२ मुक्त्यर्थंविदेहकैवल्यार्थम् अनभिसंहितंनिष्कामंलोकसंग्रहार्थंकर्मचक्रे १०३ कल्याणोपभोगैर्जीवन्मुक्तोपिभोगैःक्षीणपापःप्रक्षीणप्रारब्धकर्मा १०४ इतिश्रीवैष्णवाकृत॰षष्ठे॰सप्तमोध्यायः ७ अष्टमेप्यथसंवादःपुराणश्रवणस्तुतिः सर्वात्मतानुवादश्चहरेरत्राष्टमेकृतः पूर्वाध्यायोक्तात्यंतिकप्रलयोपसंहारपूर्वकमादितःसर्वपुराणार्थस्तोतुमुपसंहरन्नाह इतीतिचतुर्भिः ब्रह्मणिलयरूपायाविमुक्तिःसएवात्यंतिकःप्रतिसंचरःकथितइत्यन्वयः १ २ ३ ४ ५ विच्छिन्नाःसर्वसंदेहाअसंभावनाविपरीतभावनागर्भायत्रतद्वैमत्यंअहंममतारहित्यंमनसिस्थितम् ६ चतुर्विधोराशिःचतुर्विभागःसंसृष्टौचतुर्धासंस्थितःस्थितौ प्रलयंचकरोत्यंतेचतुर्भेदोजना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्दनइतिप्रथमांशोक्तः पूर्वाध्यायोक्तःपरतत्त्वेश्वरतदवतारजगद्रूपोवा त्रिविधाशक्तिः विष्णुशक्तिःपराप्रोक्ताक्षेत्रज्ञाख्यातथापरा अविद्याकर्मसंज्ञान्यातृतीयाशक्तिरिष्यतेइत्युक्ता त्रिविधाभाव न ब्रह्माख्याकर्मसंज्ञाचतथा चैवोभयात्मिकेत्युक्ता ७ यथाजगदेतद्विष्णोर्नव्यतिरिच्यतेतथाज्ञातमित्यन्वयः ८ ९ १० ११ वेदैःसंमितंतुल्यंसर्ववेदार्थसारोक्तैः सर्वेदोषारागादयस्तदुत्थः १२ एतत्पुराणार्थसंक्षेपेणानुवदन्नेतच्छ्रवणफलमाहसर्गश्चेत्यादिना १३ १४ १५ धीमतांभरतादीनांचरितानिच १६ १७ १८ अवशेनापिअस्वाधीनेनापियस्यविष्णोर्नाम्नि

क्तिश्चत्रिविधागुरो । विज्ञातंचापिकात्स्न्र्येनत्रिविधाभावभावना ७ त्वत्प्रसादान्मयाज्ञातज्ञेयैरन्यैरलंद्विज । यथैतदखिलंविष्णोर्जगन्नव्यतिरिच्यते ८ कृतार्थोस्म्यपसंदेहस्त्वत्प्रसादान्महामुने । वर्णधर्मादयोधर्माविदितायदशेषतः ९ प्रवृत्तंचनिवृत्तंचज्ञातंकर्मयथाखिलम् । प्रसीदविप्र प्रवरनान्यत्प्रष्टव्यमस्तिमे १० यदस्यकथनायासैर्योजितोसिमयागुरो । तत्क्षम्यतांविशेषोस्तिनसतांपुत्रशिष्ययोः ११ । । पराशरउवाच । एतत्तेयन्मयाख्यातंपुराणंवेदसंमितम् । श्रुतेस्मिन्सर्वदोषोत्थःपापराशिःप्रणश्यति १२ सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच । वंशानुचरितंकृत्स्नंमयात्रतवकीर्तितम् १३ अत्रदेवास्तथादैत्यागंधर्वोरगराक्षसाः । यक्षाविद्याधराःसिद्धाःकथ्यंतेप्सरसस्तथा १४ मुनयोभावितात्मानःकथ्यंतेतपसान्विताः । चातुर्वर्ण्यंतथापुंसांविशिष्टचरितानराः १५ पुण्याःप्रदेशामेदिन्याःपुण्यानद्योथसागराः । पर्वताश्चमहापुण्याश्चरितानिचधीमताम् १६ वर्णधर्मादयोधर्मावेदशाखाश्चकृत्स्नशः । येषांसंश्रवणात्सद्यःसर्वपापैःप्रमुच्यते १७ उत्पत्तिस्थितिनाशानांहेतुर्योजगतोव्ययः । ससर्वभूतःसर्वात्माकथ्यतेभगवान्हरिः १८ अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः । पुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्वृकैरिव १९ यन्नामकीर्तितंभक्त्याविलापनमनुत्तमम् । मैत्रेयाशेषपापानांधातूनामिवपावकः २० कलिकल्मषमत्युग्रंनरकार्तिप्रदंनृणाम् । प्रयातिविलयंसद्यःसकृद्यत्रानुसंस्मृते २१ हिरण्यगर्भदेवेंद्ररुद्रादित्याश्विवायुभिः । किन्नरैर्वसुभिःसाध्यैर्विश्वेदेवादिभिःसुरैः २२ यक्षरक्षोगणैःसिद्धैर्दैत्यगंधर्वदानवैः । अप्सराभिस्तथातारानक्षत्रैःसकलैर्ग्रहैः २३ सप्तर्षिभिस्तथाधिष्ण्यैर्धिष्ण्याधिपतिभिस्तथा । ब्राह्मणाद्यैर्मनुष्यैश्चतथैवपशुभिर्मृगैः २४ सरीसृपैर्विहंगैश्चप्रेताद्यैः समहीरुहैः । वनाद्रिसागरसरित्पातालैःसधरादिभिः २५ शब्दादिभिश्चसहितंब्रह्मांडमखिलंजगत् । मेरोरिवाणुर्यस्यैतद्यन्मयंचद्विजोत्तम २६

कीर्तितेसति यथाहरिणजिघृक्षयामिलितैरकस्मादागतांसिंहंदृष्ट्वात्रस्तैर्वृकैःसहरिणःपरित्यज्यतेतद्वत्सिंहत्रस्तैर्मृगैरितिपाठेयथासिंहोदूरात्त्यज्यतइतियोज्यम् १९ भक्त्याकीर्तनेफलमाह यन्नामेति प्रायश्चित्तानिहिपापमात्रंनाशयंतिनतुतद्वासनांइदंत्वशेषाणांसवासनानांविलापनंविनाशनम् अनुत्तममितिविशेषणंदृष्टांतेनस्पष्टयति धातूनामिति धातूनांसुवर्णादीनांधात्वंतरजन्यंमलंप्रक्षालनादिनाननाशयतिकिंतुपावकएवतद्वत् २० एतत्पुराणश्रवणस्यातिफलंवक्तुंतत्रसंभावनाहेतुमाह कलिकल्मषमितिसप्तभिः यत्रयस्मिन्सकृदनुस्मृते २१ यस्यचहिरण्यगर्भादिभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहितंब्रह्मांडंमेरोःपरमाणुरिवात्यल्पंयन्मयंचतत्सचविष्णुरत्रकीर्त्यतइत्यन्वयः २२ २३ २४ २५ २६ २७ अतएवयदश्वमेधावभृथस्नानादिसाध्यंमहापुण्यमयंतत्समफलमेवैतत्पुराणश्रवणादाप्नोतीत्यर्थः २८ २९ ३० केशवार्पितमानसःसन्मथुरायांहरिंदृष्ट्वायत्परमांगतिंफलमवाप्नोतितदस्यपुराणश्रवणस्यसमाधानेनकीर्तनमात्रादाप्नोति ३१ ३२ भगवद्भक्त्या अध्यायमात्रश्रोतुस्तफलंवक्तुंज्येष्ठमासीयशुक्लपक्षेयमुनास्नानादिकर्तुःस्वगतंपितृगतंचफलमाह यमुनासलिलइतिसार्धैःसप्तभिः ज्येष्ठानक्षत्रपौर्णमासीयुक्तमूलंनामप्रवृत्तिहेतुयस्यासौज्ये

ससर्वःसर्ववित्सर्वस्वरूपोरूपवर्जितः । भगवान्कीर्त्यतेविष्णुरत्रपापप्रणाशनः २७ यदश्वमेधावभृथेस्नातःप्राप्नोतिवैफलम् । सफलंतदवाप्नोतिश्रुत्वैतन्मुनिसत्तम २८ प्रयागेपुष्करेचैवकुरुक्षेत्रेतथार्बुदे । कृतोपवासःप्राप्नोतितदस्यश्रवणादिभिः २९ यदग्निहोत्रेसुहुतेवर्षेणाप्नोतिवैफलम् । महापुण्यमयंविप्रतदस्यश्रवणात्सकृत् ३० यज्ज्येष्ठशुक्लद्वादश्यांगत्वावैनियतेंद्रियः । मथुरायांहरिंदृष्ट्वाप्राप्नोतिपरमांगतिम् ३१ तदाप्नोतिफलंसम्यक्समाधानेनकीर्तनात् । पुराणस्यास्यविप्रर्षेकेशवार्पितमानसः ३२ यमुनासलिलेस्नातःपुरुषोमुनिसत्तम । ज्येष्ठामूलेमलेपक्षेशुचिर्भूत्वाजितेंद्रियः ३३ समभ्यर्च्याच्युतंसम्यङ्मथुरायांसमाहितः । अश्वमेधस्ययज्ञस्यप्राप्नोत्यविकलंफलम् ३४ आलोक्यर्धिमतोन्येषामुन्नीतानांस्ववंशजैः । एतत्किलोचुरन्येषांपितरःसपितामहाः ३५ कश्चिदस्मत्कुलेजातःकालिंदीसलिलाप्लुतः । अर्चयिष्यतिगोविंदंमथुरायामुपोषितः ३६ ज्येष्ठामूलेसितेपक्षेयेनैवंवयमप्युत । परामृद्धिमवाप्स्यामस्तारिताःस्वकुलोद्भवैः ३७ ज्येष्ठामूलासितेपक्षेसमभ्यर्च्यजनार्दनम् धन्यानांकुलजःपिंडान्यमुनायांप्रदास्यति ३८ तस्मिन्कालेसमभ्यर्च्यतत्रकृष्णंसमाहितः । दत्त्वापिंडंपितृभ्यश्चयमुनासलिलाप्लुतः ३९ यदाप्नोतिनरःपुण्यंतारयन्स्वपितामहान् । श्रुत्वाध्यायंतदाप्नोतिपुराणस्यास्यभक्तिमान् ४० एतत्संसारभीरूणांपरित्राणमनुत्तमम् । दुःस्वप्ननाशनंनॄणांसर्वदुःखनिबर्हणम् ४१ इदमार्षंपुराप्राहऋभवेकमलोद्भवः । ऋभुःप्रियव्रतायाहसचभागुरयेब्रवीत् ४२ भागुरिस्तंभमित्रायदधीचायसचोक्तवान् । सवैसारस्वतेप्रादाद्भृगुःसारस्वतादपि ४३ भृगुणापुरुकुत्सायनर्मदायैसचोक्तवान् । नर्मदाधृतराष्ट्रायनागायापूरणायच ४४ ताभ्यांचनागराजायप्रोक्तंवासुकयेतथा । वासुकिःप्राहवत्सायवत्सश्चाश्वतरायवै ४५ कंबलायचतेनोक्तमेलापत्रायतेनवै । पातालंसमनुप्राप्तस्ततोवेदशि

ष्ठामूलोज्येष्ठमासस्तस्यशुक्लपक्षे ३३ ३४ पितृगतंफलंचाह आलोक्येति स्ववंशजैरितोलोकादुन्नीतानामृद्धिमालोक्यअन्येषांपितरएतद्वक्ष्यमाणमूचुः ३५ ३६ ३७ ३८ प्रकृतमाह तस्मिन्निति ३९ यत्स्वगतंपितृगतंचफलमाप्नोतिभक्तिमानुत्तमभक्तियुक्तस्तदाप्नोति ४० एतत्पुराणप्राशस्त्यंसामान्यतःप्राह एतदिति ४१ सम्प्रदायप्रवृत्तिमप्याह इदमार्षमिति ऋषिर्नारायणस्तेनप्रोक्तमार्षम् ४२ भृगुःप्राप्तवानितिशेषः अत्रसम्प्रदायान्तरभेदःकल्पभेदव्यवस्थितः इदानींतुअष्टाविंशतिकलियुगारंभेमैत्रेयपृष्टेनपराशरेणपूर्वजन्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निसारस्वतशिष्येणपुलस्त्यवरदानतःस्मृतमिदमल्पग्रन्थसहितंमैत्रेयायोक्तमितिज्ञेयम् ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० मनुष्येभ्यइतिपञ्चमीषष्ठ्यर्थे ५१ ५२ अच्युतंमनसिकृत्वासकलमिदंशृणोतियःसवाजिमेधफलंप्राप्नोतीत्यत्रविद्योपास्तिसहितस्याश्वमेधस्यफलमितिबोद्धव्यंअन्यथाहरिभक्तिमतोध्यायमात्रश्रोतुरप्यश्वमेधफलंभवति ५३ पवित्रपरमंपवित्रेषुश्रेष्ठंशृण्वन्पठंश्चयत्फलंप्राप्नोतिनतत्कुत्राप्यस्ति यस्मादेकान्तसिद्धिरूपोहरिरेवतत्प्राप्यंफलंतच्चहरिलक्षणंफलंस्वर्गादिलोकेष्वपिनास्तीत्यर्थः ४४ हरिकीर्तनमात्रेणसर्व

राःपुनः ४६ प्राप्तवानेतदखिलंसर्वैप्रमितयेददौ । दत्तंप्रमितिनाचैवजातूकर्ण्यायधीमते ४७ जातूकर्ण्येनचैवोक्तमन्येषांपुण्यशालिनाम् । वसिष्ठवरदानेनममाप्येतत्स्मृतिंगतम् ४८ मयापितुभ्यंमैत्रेययथावत्कथितंत्विदम् । त्वमप्येतच्छिनीकायकलेरंतेप्रदास्यसि ४९ इत्येतत्परमंगुह्यं कलिकल्मषनाशनम् । यःशृणोतिनरःपापैःससर्वैर्द्विजमुच्यते ५० पितृयक्षमनुष्येभ्यःसमस्तामरसंस्तुतिः । कृतातेनभवेदेतद्यःशृणोतिदिनेदिने ५१ कपिलादानजनितंपुण्यमत्यंतदुर्लभम् । श्रुत्वातस्यदशाध्यायानवाप्नोतिनसंशयः ५२ यस्त्वेतत्सकलंशृणोतिपुरुषःकृत्वामनस्यच्युतं सर्वंसर्वमयंसमस्तजगतामाधारमात्माश्रयम् । ज्ञानंज्ञेयमनंतमादिरहितंसर्वामराणांहितंसप्राप्नोतिनसंशयोस्यविकलंयद्वाजिमेधेफलम् ५३ यत्रादौभगवांश्चराचरगुरुर्मध्येतथांतेचसब्रह्मज्ञानमयोच्युतोखिलजगन्मध्यांतसर्गप्रभुः । तच्छृण्वन्पुरुषःपवित्रपरमंभक्त्यापठंश्चापियत्प्राप्नोत्यस्तिनतत्समस्तभुवनेष्वेकांतसिद्धिर्हरिः ५४ यस्मिन्न्यस्तमतिर्नयातिनरकंस्वर्गोपियच्चिंतनेविघ्नोयत्रनिवेशितात्ममनसोब्राह्मोपिलोकोल्पकः।मुक्तिंचेतसियःस्थितोमलधियांपुंसांददात्यव्ययःकिंचित्रंयदघंप्रयातिविलयंतत्राच्युतेकीर्तिते ५५ यज्ञैर्यज्ञविदोयजंतिसततंयज्ञेश्वरंकर्मिणोयंयंब्रह्ममयंपरापरपरंध्यायंतिचज्ञानिनः। यंसंप्राप्यनजायतेनम्रियतेनोवर्धतेहीयतेनैवासन्नचसद्भवत्यतिततःकिंवाहरेःश्रूयताम् ५६ कव्यंयःपितृरूपधृक्विधिहुतंहव्यंचभुंक्तेविभुर्देवत्वेभगवाननादिनिधनःस्वाहास्वधासंज्ञितः।यस्मिन्ब्रह्मणिसर्वशक्तिनिलयेमानानिनोमानिनांनिष्ठायैप्रभवंतिहंतिकलुषंश्रोत्रंसयातोहरिः५७नांतोस्तियस्यनचयस्यसमुद्भवोस्तिवृद्धिर्नयस्यपरिणामविवर्जितस्य। नापक्षयंचसमुपैत्यविकल्पवस्तुयस्तंनतोस्मिपुरुषोत्तममाद्यमी

पापक्षयोभवतीतियदुक्तंतत्कैमुतिकन्यायेनोपपादयतियस्मिन्निति न्यस्तासकृद्बलात्क्षिप्तामतिर्येनयस्याच्युतस्यचिन्तनेध्यानेक्रियमाणेस्वर्गप्राप्तिरापिविघ्नप्रायामुक्तौकालविलम्बहेतुत्वात् यस्मिन्निवेशितःसमर्पितआत्मामनश्चयेनतस्यब्रह्मलोकोत्यल्पकः यस्माच्चेतसिस्थितश्चमुक्तिमेवददातितस्मात्तस्मिन्कीर्तितेअघंनश्यतीतिकिंचित्रमित्यर्थः ५५ अतःसर्वसंमतत्वाच्छ्रीहरिरेवश्रोतव्यइत्याहयज्ञैरितिद्वाभ्यांपरापराभ्यांकार्यकारणाभ्याम्परंभिन्नंहरिंप्राप्यनैवासन्नचसत्कार्यंकारणंचनभवति पितृपुत्रादिभावेनसंसरतीत्यर्थःहरेरतिअतिक्रमेणाकिंश्रूयताम् ५६ अग्नौविधिनाहुतंहव्यंदेवत्वेवर्तमानःस्वाहयोपलक्षितोभुंक्तेकव्यंचविप्रमुखेहुतंस्वधयोपलक्षितोभुंक्तेइत्यन्वयः मानिनांप्रामाणिकानांमानानिप्रमाणानिनिष्ठायैपरिच्छेदायनप्रभवंतिसमर्थानिनभवंतिस्वप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काशत्वात् सहरिःश्रोत्रंप्राप्तःकलुषंहन्तितवसएवश्रोतव्यइत्यर्थः ५७ अथेदानीमेतत्पुराणस्यप्रत्ययानवच्छिन्नप्रवाहप्रवृत्त्यर्थंअन्तेपिमङ्गलायपरमेश्वरपुरुषप्रधानव्यक्तानिभगवद्रूपाणिप्रण
मति नान्तइतिचतुर्भिः अविकल्पंवस्तुब्रह्मैवयस्तम् कालस्यईश्वरस्वरूपत्वान्नपृथङ्नमस्कारः तस्यैवानुईश्वरतःसमनन्तरंगुणभुग्गुणात्मकस्यप्रधानस्याधिष्ठाताएकःसमष्टिरूपेणबहु
धाब्रह्मादिव्यष्टिरूपेणअशुद्धइवसृष्ट्याव्यासक्तत्वाज्जीवानाम् विभूतिर्विस्तारस्तत्कर्ता सकलसत्त्वेतिपाठेपिसएवार्थः ५९ ज्ञानानामिन्द्रियाणांतत्प्रवृत्तीनांप्रवृत्तिविषयाणांचानियममयाय
अत्रहेतुमाह त्रिगुणात्मकायेति गुणनियमेनज्ञानादिनियमादितिभावः स्वरूपभवनायस्वतःसिद्धाय कर्मणिचतुर्थ्यः स्वरूपमभवायेतिपाठेषष्ठ्यर्थेचतुर्थ्यः तथातस्यस्वरूपंवंदेइत्यर्थः६०

ड्यम् ५८ तस्यैवयोनुगुणभुग्बहुधैकएवशुद्धोप्यशुद्धइवमूर्तिविभागभेदैः । ज्ञानान्वितःसकलतत्त्वविभूतिकर्तातस्मैनतोस्मिपुरुषायसदाव्ययाय
५९ ज्ञानप्रवृत्तिनियमैकमयायपुंसोभोगप्रदानपटवेत्रिगुणात्मकाय । अव्याकृतायभवभावनकारणायवंदेस्वरूपभवनायसदाक्षराय ६० व्योमा
निलाग्निजलभूरचनामयायशब्दादिभोग्यविषयोपनयक्षमाय । पुंसःसमस्तकरणैरुपकारकायव्यक्तायसूक्ष्मविमलायसदानतोस्मि ६१ इतिवि
विधमजस्ययस्यरूपप्रकृतिपरात्ममयंसनातनस्य । प्रदिशतुभगवानशेषपुंसांहरिरपजन्मजरादिकांससिद्धिम् ६२ । । इतिश्रीविष्णुपुराणे
पराशरसंहितायांषष्ठेअंशेअष्टमोध्यायः । । ८ । । समाप्तोयंग्रंथः । । ७ । । ७ । । ७ । । ७ । । ७ ।

व्यक्तायप्रपंचरूपाय पुंसइतिपूर्वपरयोःसंबध्यते सूक्ष्मरूपेणविमलायशुद्धाय सूक्ष्मविलयायेतिपाठेसूक्ष्मेअव्यक्तेविलयोयस्यतस्मैनतोस्मि ६१ इदानींसंक्षेपविस्ताराभ्यांनिरूपितंभगवद्रूप
चतुष्टयमनुस्मरंस्ततोजीवानांसीदतांमुक्तिंप्रार्थयति इतीति प्रकृतिपरात्ममयंप्रकृतिर्व्यक्ताव्यक्तरूपापरःपरमेश्वरःआत्मास्वरूपंएतन्मयंअपजन्मजरादिकांमुक्तिलक्षणांसिद्धिंप्रदिशत्विति
६२ यदस्यग्रंथस्यस्फुटपदपदार्थादिविदुषांनकेषामप्यर्थःस्फुरतिसतिसंदेहतिमिरे अतोविद्यावाचस्पतिवचनदीपावलिमतामयाव्यक्तानर्थान्हृदिकुरुतसंतःसहृदयाः चंद्राकरस्यतनयोर
तिनाथमिश्रःक्षोणींद्रमंत्रकुदभूदथतत्सुतेन ॥ सूर्याकरेणनृपमंत्रिवरेणयत्नात्संप्रार्थितोविहितवानहमस्यटीकाम् १ इतिश्रीरत्नगर्भभट्टाचार्यविरचितायांवैष्णवाकूतचंद्रिकायां विष्णु
पुराणव्याख्यायां षष्ठेअंशेअष्टमोध्यायः ८ ॥ समाप्तिमगमत् ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं वैष्णवाकूतचन्द्रिका समेतं श्रीमद्विष्णुपुराणं सटीकं ऐनापुर इत्युपाख्यश्रीमद्बाळाचार्यात्मजा
उद्धवाचार्या एतेषां साहाय्येन पित्रे इत्युपाङ्क कृष्णशास्त्रिभिः संशोध्य मुम्बय्यां
गोपाळ नारायण प्रभृतिजनताया मुद्रायन्त्रालये पिङ्गे उपनामक
कृष्णात्मजरामचन्द्रेण मुद्रायन्त्रालयाधिपतये मुद्रितं
नवा धिकाष्टादशशततमे शाके कार्तिके
मासि मुद्रणं समाप्तिमगमत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रीस तयार.

खालीं लिहिलेले ग्रन्थ चांगल्या जाड कागदावर मोठ्या सुन्दर टायपानीं आह्मीं छापिलेले विक्रीस तयार आहेत, प्रत्येक ग्रन्थाच्या दरएक अध्यायापूर्वी उत्कृष्ट चित्रें दिलीं आहेत, व प्रत्येक पृष्ठाखालीं कठीण शब्दांचे अर्थ दिले आहेत.

संस्कृत आणि प्राकृत ग्रन्थांचीं नांवें.

संस्कृत.

वाल्मीकि रामायण, सटीक	रु. १२	०
श्रीभाद्विष्णुपुराण सटीक	४	०
सुन्दरकाण्ड, वाल्मीकिरामायण	१	०
विष्णुसहस्रनाम	०	॥
विष्णुसहस्रनामावली	०	२
धातुरूपावली	०	३
पृथ्वीसहस्रनामावली	०	२
रामायणमाहात्म्य	०	८
गौपमाहात्म्य	०	६
देवीसहस्रनामावली	०	२
श्रीमानुदत्तस्य-रसतरङ्गिणी टिप्पणीसमेता	०	१०
श्रीनागनाथस्य-भावशतकं टिप्पणीसहितं	०	४

संस्कृत.

समासचन्द्रिका	रु० ०	१
मेघदूत	०	४
समासचक्र	०	२
शब्दरूपावली	०	२
गणेशसहस्रनामावली	०	२
शिवसहस्रनामावली	०	२
फाल्गुनमाहात्म्य	०	८
मार्गशीर्षमाहात्म्य	०	६
ज्येष्ठमाहात्म्य	०	६
आषाढ माहात्म्य	०	६
शङ्कराचार्यस्य-सुन्दरलहरी टिप्पणीयुतम्	०	४
अष्टावक्रस्य-अध्यात्ममदीपिका पाठान्तरैः समेता	०	६

प्राकृत.

जैमिनी अश्वमेध	रु० १	८
संतलीलामृत	२	०
नाथलीलामृत	२	०
पांडवप्रताप	१	०
भक्तविजय	२	८
रामविजय	२	०
हरिविजय	१	०
दासबोध	२	०
शिवलीलामृत	०	१२
शनिमाहात्म्य	०	२
व्यङ्कटेशस्तोत्र	०	१
सिंहासनबत्तिशी	०	४

पारिशिष्ट भागचे बुकडीपोंत मराठी, इङ्गजी, संस्कृत, गुजराथी, हिन्दुस्थानी, शालोपयोगी इत्यादि सर्व प्रकारचीं पुस्तकें माफक दरानें मिळतील.

गोपाळ नारायण आणि कंपनी,

बुकसेलर्स मुंबई.

कालिकादेवी रोड, घर नंबर १९.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकं श्रीमद्विष्णुपुराणं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu